संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 138 पुष्पम्

श्रीजयदेवकृतं

# श्रीगीतगोविन्दम्

## त्रयोदशटीकासमेतम्

(प्रथमो भागः)


प्रधानसम्पादकः
प्रो. मुरलीमनोहरपाठकः
कुलपतिः

संकलकः
आचार्यः प्रफुल्लकुमारमिश्रः

सम्पादकः
प्रो. शिवशङ्करमिश्रः





शोध-प्रकाशनविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
नवदेहली-16

संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 138 पुष्पम्

श्रीजयदेवकृतम्

# श्रीगीतगोविन्दम्

## त्रयोदशटीकासमेतम्

**( प्रथमो भागः )**

प्रधान-सम्पादकः

**प्रो. मुरलीमनोहरपाठकः**

कुलपतिः

संकलकः

**आचार्यः प्रफुल्लकुमारमिश्रः**

उपाध्यक्षः

महर्षिसान्दिपनीराष्ट्रियवेदविद्याप्रतिष्ठानम्

उज्जयिनी

सम्पादकः

**प्रो. शिवशङ्करमिश्रः**

शोधविभागाध्यक्षः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

**( केन्द्रीयविश्वविद्यालयः )**

**नवदेहली-110016**

प्रकाशकः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

बी–4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–110016

© प्रकाशकाधीनः

प्रकाशनवर्षम् : 2023

ISBN : 978-81-87987-97-9

मूल्यम् : ₹ 3000.00 (भागचतुष्टयम्)

मुद्रकः

**डी.वी. प्रिन्टर्स**

97–यू.बी., जवाहरनगरम्, देहली–110007

# ।। कुलपतेरनुशंसा।।

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः यदाप्रभृतिः विद्वद्भिः विद्यापीठरूपेण समारब्धः तदारभ्य नानाशास्त्राणां महार्घरत्नभूताः बहवो गौरवपूर्णाः ग्रन्थाः प्राकाश्यतां गताः। सर्वे खलु ग्रन्थाश्छात्राध्यापकाचार्याणां तथा विबुधानामानन्दवर्द्धनार्थं ज्ञानलाभार्थञ्च वितरिताश्च यथामूल्यम्।

अस्यां शृङ्खलायामुत्कलप्रदेशस्याचार्यः प्रो. प्रफुल्लकुमारमिश्रः महता प्रयासेन महाकविश्रीजयदेवकृतस्य श्रीगीतगोविन्दस्य विविधटीकासु समग्रदेशस्य प्रतिनिधिभूतानां टीकानां समीक्षणं विधाय चतुर्षु खण्डेषु तासां प्रकाशननिमित्तं प्रस्तौति। तत्र समीक्षात्मकमध्ययनम्, त्रयाणां लेखकानामाङ्ग्लानुवादः, पाठान्तराणि, पाठान्तर-श्लोकाश्च गृहीतास्सन्ति। अपि च गीतगोविन्दकृतानां तथानुकृतीनां विवरणमपि संगृहीतम्। श्रीगीतगोविन्दमेव संस्कृतसाहित्ये प्रथमं गीतात्मकं काव्यमस्ति। तत्रस्थितानां श्लोकानामभिनयः ललितपदबन्धेन विहितः। तत्रत्यानां गीतानां विविधराग-तालच्छन्दस्सु सन्नद्धत्वात् काव्याभिनयस्वारस्यं सुतरां सहृदयामानन्दवर्द्धनार्थं नवीनं कौशलं गृहणाति। प्रथमे श्लोके विस्तृतं साधनं नितरां नृत्याभिनयार्थं प्रयुक्तमस्ति। तच्च ओडिशी, मणिपुरी, भरतनाट्यम्, कुच्चिपुडी, कथकली, कुडीअट्टम्, मोहिनीअट्टम्प्रभृतिषु सर्वप्रकारकेषु शास्त्रीयनृत्येषु बाहुल्येन प्रयुक्तम्। द्वादश-शतकस्येतस्य कवेः कृतिरियं पृथिव्यां बह्वीषु प्रथितभाषास्वनुदिताम्रेडिता चास्ति। महाकाव्यस्यास्याध्ययनं निश्चप्रचं कृतमस्ति भागचतुष्टये। अस्मद्विश्वविद्यालयः महाकाव्यमिदं प्रकाश्य गौरवमनुभवति। आचार्यप्रफुल्लकुमारमिश्रमहोदयेभ्यः वर्धापनानि। शोधप्रकाशनविभागस्य सर्वेऽपि सदस्याः धन्यवादार्हा इति शम्।

**- प्रो. मुरलीमनोहरपाठकः**

कुलपतिः

# सम्पादकीयम्

विदितमेतद्धि अपारे काव्यसंसारे कविरेव प्रजापतिः। आग्नेयपुराणस्य वाक्यमिदं नानाव्यञ्जनाः प्रकटयितुकामान् कविसम्प्रदायान् स्मारयति। किञ्च विचित्रमार्गं सुकुमारमार्गञ्चावलम्बमानाः कवयः काव्यसंसारं मण्डयामासुः। परमितोऽपि सुकुमारतामाविष्कर्त्तुमौत्कलकवेः जयदेवस्य यत्नः सुतरां श्लाघ्यो भवति। दुरूहवाक्ययोजना शास्त्रवैदुष्यमथवा वर्णनाबाहुल्यं केवलं कविसहृदयोरानन्दवर्द्धनं न साधयेत्। शास्त्रीयसन्दर्भसंग्रथनं प्रपञ्चवर्णनमथवा सर्वमाहत्योऽपि तद्गुणाः सहृदयानां हृदये मनोग्राहितां नैवावलम्बन्ते। अथ च श्रीहर्षस्य कालिदासस्य भारविमाघभट्टीनां सकलगुणग्राहितावलम्बनं नैव सहृदयानां मनांसि तथा रञ्जयति यथा नूतनप्रकार काव्यप्रकल्पनं भाषासु पालिप्राकृतापभ्रंशादिषु पूर्वभारते सन्दृष्टम्। अत एव सकलानि उदाहरणपद्यानि आचार्येणानन्दवर्द्धनेन हालकृतगाहासत्तसई-प्रभृतिभ्यो मुक्तकेभ्यः स्वीकृतानि सन्ति।

चारुकलामयी महोदधिपादधौत-उत्कला देवदेवश्रीजगन्नाथस्य पावनभूमिरस्ति। तत्र नानादिग्देशेभ्यस्समागत्य चतुर्षु दिक्षु कवि-पण्डित-गायक-वादक-योगिसाधकप्रभृतयः साहित्य-संगीत-कला-ध्यान-योग-भक्त्यादीनि क्षेत्राणि संवर्द्धयन्ति। तदनुगुणं केन्दुविल्वात् समागतः श्रीजगन्नाथभक्तिभावगद्गदः जयदेवकविः।

श्रीजयदेवस्तथा दाक्षिणात्यनृत्याङ्गना कलाप्रवीणा श्रीजगन्नाथाय निवेदितप्राणा पद्मावती, फलतः काव्यतत्त्वनां नूतनमहिमानमुद्घाटयितुमनयोः संगीतमूलकं साहित्यं श्रीगीतगोविन्दनामकाव्यं विश्वविश्रुतमभूत्। फलतः संगीतात्मकं काव्यं प्रणिनाय भक्तकविः श्रीजयदेवः। यत्रैकादशसंख्याकानां रागाणां संयोजनेन चतुर्विंशतिप्रबन्धाः समन्विताः बभूवुः। अपि च विविधटीकाकाराणां दृष्ट्या द्विसप्ततित आरभ्य शतपर्यन्तं श्लोकाः सन्ति। प्रत्येकं सूत्रात्मकस्य श्लोकस्य भाष्यात्मकं नृत्यगीतं रागतालसंयोगेन प्रस्तावितमस्ति। अतः यद्यपि द्वादशसर्गविधानं महाकाव्येऽस्मिन् वर्तते तथापि प्रतिसर्गमेकं द्वे वा ततोऽधिकं प्रबन्धबन्धनमस्ति। मालवरागेण समारब्धस्य गीतस्योपन्यासादनन्तरं पुनः रागिणी समायाति। मालवः खलु रागराजः सायं गीयते। गुज्जरी एव रागिणी अस्ति। द्वादश-सर्गाणां नामान्यपि अत्र श्रीकृष्णस्य नानाचरित्रमाधारीकृत्य कल्पितात्तदिह यथाक्रमं लिख्यते। सामोददामोदरः, अक्लेशकेशवः, मुग्धमधुसूदनः स्निग्धमाधवः साकाङंक्षपुण्डरिकाक्षः, कुण्ठवैकुण्ठः, नागरनारायणः, विलक्ष्यलक्ष्मीपतिः, मन्दमुकुन्दः, चतुरचर्तुभुजः, सानन्ददामोदरः, सुप्रीतःपीताम्बरश्च। एतस्य नामकरणस्य महत्वं श्रीकृष्णस्य रसरासप्रबन्धव्यवहारस्थितस्य

लीलाविलासस्य तथा मनोनुकूलराधाकृष्णयोर्व्यवहार: प्रपञ्चयते। तदर्थं चतुर्विंशतिगीतेषु प्रबन्धेषु वा यथाक्रमम् मालवः, गुज्जरी, वसन्तः, रामकिरी, गुज्जरी, कर्णाटः, देशाख्यः, देशवराडी, गुज्जरी, नटराग:/गुण्डकिरी, मालवः/मालवगौडः, वसन्तः, गुज्जरीस्तथा रामकिरी रागा: प्रपञ्चिता: वर्तन्ते। केषाञ्चिद् रागाणां टीकाकारा: नाम्न: वैभिन्न्यं कुर्वन्ति। यथा 'गुण्डकिरी' शब्दस्यार्थ: लघुशूक: परन्तु गौण्डकिरी, किरवाणी, गोणकेरी, गोण्डकिरी इत्यपि दृष्टमस्ति। अपि च रामकिरी, बृहत्शूक: परन्तु 'रामकेरी' इत्यपि नाम्ना टीकाकारा: उल्लेखयन्ति।

चतुर्विंशप्रहरेषु गीतस्य गीतगोविन्दस्य रागानुसारं कालनिर्णयं कृत्वा गीतगोविन्दस्य कथावस्तुन: समयनिरूपणं भवितुमर्हति। प्रतिरागं गायनकालानुगुणं नवदिनात्मक: कथाविशेष: स्यात्। रागविषयानतिरिच्य रागाणां ध्यानादिकं विहाय तत्र शास्त्रीयाङ्गान्यपि ज्ञातव्यानि सन्ति। तालानां परिवेषणेन गायनकाल: रसः, जातिः, अंशः, न्यासः, कम्पितस्तथावर्जितानां विचारोऽपि कर्त्तुं शक्यते। गीतगोविन्दकाव्ये रूपकतालः, नि:सारू, यतितालः, एकतालितालः, अष्टतालः/ अट्टताल श्च विविधगीतेषु संयोजिता: सन्ति। तालो नाम वर्णात् वर्णस्य व्यवधानम्। छन्दसां विवरणमपि साधारणतया इत्थं वर्तते। तत्र अनुष्टुभ्/प्, आर्या, उपेन्दवज्रा, द्रुतविलम्बितम्, पुष्पिताग्रा, पृथ्वी, मालिनी, वंशस्थम्, वसन्ततिलका, शार्दूलविक्रीडितम्, शिखरिणी, स्रग्धरा, हारिणी, छन्दोभिरलंकृतमस्ति। गुरुग्रन्थसाहेबमध्ये उद्धृतेषु पञ्चदशभक्तेषु कबीरः, नामदेवः, रविदासः, धन्ना, त्रिलोचनः, भीकनः, जयदेवः, वेणी, पीपा, सेखपरीदः, सेणः, रामानन्दः, परमानन्दः, सुरदासप्रभृतीनामुल्लेख: वर्त्तते। श्रीजयदेवस्य पदद्वयमस्ति। तथैव जयदेवस्योल्लेख: वर्तते तद् यथा-

"जयदेवनामा विप्रसुधामा तिनको कृपाकरे अपार" प्रभृति।

श्रीजयदेवस्य संगीतात्मकं महाकाव्यं प्राचीनपरम्परानुकूलं भवति। भारतीयानि प्रमुखसंगीतशास्त्राणि खलु नारदीयशिक्षा, नाट्यशास्त्रम्, दत्तिलं कोहलः, कश्यपः, यष्टिकः, शुक्राचार्यः, विशाखिलः, शार्द्धूलः, आञ्जनेयः, मत्तङ्गः (वृहद्देशी), सागरनन्दि, संगीतमकरन्दः, अभिनवगुप्तः, नान्यदेवः, सुधाकलसस्य संगीतोपनिषत्सारः, सोमेश्वरः, संगीतचूडामणिः, शारदातनयस्य भावप्रकाशनम्, संगीतसुधाकरः, संगीतरत्नावली, संगीतरत्नाकरः, संगीतसमयसारः, ज्यायसेनापतिः, पाल्लुरिक: सोमनाथः, शृङ्गारहारः, रसतत्त्वसमुच्चयः, संगीतचिन्तामणिः, कुम्भकर्णस्य संगीतराजः, संगीतसर्वस्वम्, रागविवोधः, रसकौमुदी, संगीतसुधाप्रभृतय: भारते संगीतज्ञा: बभूवुः। उत्कले संगीतज्ञा: किल भवन्ति; शुभङ्करदेवः, संगीतदामोदरः, हरिनायकस्य संगीतसारः, गीतप्रकाशः, कृष्णदासवडजेनामहापात्रस्य संगीतमुक्तावली,

कविरत्नमिश्रस्य कथाङ्कुरनिबन्धः, दामोदरमिश्रस्य संगीतदर्पणः, हलधरमिश्रस्य संगीतकल्पलतिका, नीलकण्ठस्य सङ्गीतार्णवचन्द्रिका, रघुनाथरथस्य नाट्यमनोरमा, पुरुषोत्तममिश्रस्य संगीतनारायणः, गोपीनाथ-कविभूषणस्य संगीतकामोदः, नारायणमिश्रस्य संगीतसरणी, महेश्वरमहापात्रस्य अभिनयचन्द्रिका (१६७०) प्रभृतयः संगीतग्रन्थाः शास्त्राणि च प्रणितानि। परं ते सर्वे जयदेवस्य परवर्त्तिनः शास्त्रकाराः। अस्मात् अनुमीयते यदुत्कले सुदृढ़ा संगीतशास्त्रपरम्परा प्राचलत्। तदर्थं गीतगोविन्द-काव्यस्य प्रभावेन शिवलीलामृतं, विष्णुलीलामृतं प्रभृतीनि बहूनि गीतकाव्यानि विरचितानि दृश्यन्ते। तस्य सारिणी चतुर्थखण्डे सविवरणं चर्च्चितास्ति। गीतगोविन्दस्य सर्वप्राचीना टीका भवति उदयनस्य भावविभाविनीटीका। आरनोल्ड, ली.साईगल्, वारवाराष्टोलामिलरप्रभृतिभिः आङ्ग्लटीकाकृद्भिराधुनिकैश्च तस्योल्लेखः न क्रियते। परन्तु सा टीका इदानीं नाथद्वारस्य मन्दिरेऽस्तीति श्रूयते। उदयनोऽस्ति भुवनेश्वरस्य मेघेश्वरमन्दिरस्य ब्रह्मेश्वरमन्दिरशिलालेखस्य तथा नियालीस्थितशोभनेश्वरमन्दिरस्य शिलालेखस्य कविः। तस्य परिवारभूतः महाकविः कविडिण्डिमोपाधिनालंकृतः जीवदेवाचार्यः भक्तिभागवतम् तथा भक्तिवैभवनाटकमित्यनयोः रचयिता आसीत्। पुरीस्थित- षोडशशासनग्रामसंकुलेषु वीरनरसिंहपुरस्थाने कवेः जन्म अभूत्। श्रीजगन्नाथस्य यात्रापूजाविधानमेतस्य रचयिताऽस्ति गदाधरराजगुरुः। तथैव वीरहरेकृष्णपुरवास्तव्यः साहित्यदर्पणग्रन्थकारस्य वृद्धप्रपितामहः महान् खलु आलंकारिकः कविराजः नारायणदासः सर्वाङ्गसुन्दरीटीकाकारोऽस्ति। वस्तुतः तट्टीका प्रथमटीकारूपेणोपलभ्यते। विश्वनाथकविराजस्य साहित्यदर्पणग्रन्थात् मन्ये शतवर्षेभ्यः प्राक् सा टीका प्रणीताऽसीत्। अतः दण्डिनः उल्लेखः विशेषतः अलंकारविषयेषु तेन क्रियते। प्रणीतासु टीकासु राजस्थानस्य नरपतेः विशिष्टसंगीतज्ञस्य राणाकुम्भकर्णस्य तलस्पर्शिशास्त्रचर्च्चा गीतगोविन्दस्य संगीतात्मकगीतानां समीक्षा सुतरां गुरुत्वं वहति। अतः सर्वेषां गीतानां संगीतसुलभच्छन्दसां निर्णयस्तत्र प्रतीयते। ग्रन्थेऽस्मिन् तेषां तेषां गीतानां विवरणं निश्चप्रचं वर्तते। उदाहरणस्वरूपतः वक्तुं शक्यते यत् प्रथमतः दशावतारगीतं/स्तोत्रं तावत् कीर्त्तिधवलच्छन्दसि वर्तते, परन्तु ध्रुवपदे खलु भ्रमरनामच्छन्दः प्रकल्पितमस्ति। द्वितीयं तु मङ्गलनामच्छन्दः। एवं प्रकारेण गीतानां संगीतच्छन्दोदृष्ट्या विवेचनं कृतं राणाकुम्भेन। तदर्थं तेन छन्दचूडामणिग्रन्थस्योद्धरणं कृतमस्ति। रसमञ्जरीटीकाकारः शंकरमिश्रः संगीत-रत्नाकरमुद्धरति मालवरागस्य रूपकतालस्य च लक्षणार्थम्। अपि च नैके टीकाकाराः संगीतरत्नाकरमनुसरन्ति। "अस्मिन् पदे रागतालयोरङ्गान्यपि उद्ग्राहस्तथा आभोगस्यान्तिमत्वात् तत् खलु ध्रुवपदरूपेण गृह्यते। अत्र उद्ग्राहादिधातूनां विश्रामभूमित्वात् अन्यानि च उद्ग्राहादिप्रतिरूपकाणि पदानीति प्रतिबोद्धव्यम् एवमन्याष्वपि अष्टपदीषु बोद्धव्यम्" इत्येव राणाकुम्भः मन्यते। अतः स्मर्यन्ते दत्तिलः,

मतङ्गः, नारदादयः वृहद्देश्यां, संगीतमकरन्दे च प्रबन्धस्य धातूनाम्, अङ्गानां जात्यादीनाञ्च विषयेषूल्लेखो नास्ति। तथैव संगीतदामोदरे, अथ च गीतप्रकाशे, संगीतकौमुद्यां, कल्पलतिकायां मुक्तावल्याञ्च उद्ग्राहः, ध्रुवः, आभोगश्चेति धातूनां ग्रहणपूर्वकं लक्षणानि विहितानि सन्ति। परं चान्यैः उद्ग्राहः, मेलापकः, ध्रुवः आभोगश्चेति धातोः धातुचतुष्टयं विविच्यते। प्रबन्धस्य षडङ्गानां विषये सर्वेषां सहमतमपि वर्तते, परन्तु ग्रन्थान्तरे कालान्तरे च वैभिन्यमस्ति। तानि नामानि संगीतरत्नाकरे स्वीकृतानि। अपि च गीतप्रकाशे तत् प्रपञ्चितमस्ति। यथा-

न रागाणां न तालानां न बाधानां विशेषतः।
नापि प्रबन्धगीतानामन्तो जगति विद्यते।।१/८।।
एवं प्रबन्धाः जायन्ते स्वेच्छया बहवः कवेः।
शक्तिवर्णविशेषेण नामान्येषाञ्च कारयेत्।।१।९।।

तदपि रघुनाथरथस्य नाट्यमनोरमायामादौ तालवाद्यरागात्मके संगीते नृत्यं कथं प्रभवति तद् व्यवस्थितमस्ति यथा,

न तालेन विना गीतं न बाधं तालवर्जितम्।
न नृत्यं तालहीनञ्च ततस्तालोऽत्र कारणम्।। ३/६२

एतत् खलु शास्त्रदृष्ट्यापि पुनः विवेचयितुं शक्यते। "एतं करोति जयदेवकविः प्रबन्धम्।" इत्यत्र प्रबन्धस्य गभीराध्ययनमपेक्षते। तत्र महाकाव्यमेव प्रबन्धपदवाच्यं भवति। परन्तु संगीतशास्त्रदृष्ट्या गीतगोविन्दं क्षुद्रगीतप्रबन्धनाम्ना अभिधातुं शक्यते। पुनः क्षुद्रगीताभ्यन्तरे चित्रपदानामधेया तथा चित्रकला अपि वक्तुं शक्यते। उत्कलीय-परम्परायामप्ययं रागः इदानीमपि प्रचलितोस्ति। फलतः गीतगोविन्दे गीतं वाद्यं तथा नृत्यमिति त्रयाणां संयोगः सामान्यमेव भवति। जयदेवः खलु संगीतज्ञोऽभूत्। इदानीमपि श्रीजगन्नाथस्य जगन्मोहने द्वारोद्घाटनसमये तथा रात्रौ शयनसमये एतस्य गानं प्रवर्तते, यद्यपि तत्र संगीतानुसारं माहारी/देवदासीनृत्यं न भवति। तदनुगुणं शिलालिपिरपि श्रीमन्दिरे जयविजयद्वारे उत्कीर्णाऽस्ति। एतस्य गीतिमयता जनसामान्येषु यथा ग्राहीताऽस्ति तदवलम्ब्य अष्टशतवर्षेभ्यः महतीयं परम्परा उज्जीविताऽस्ति। आचार्येण प्रफुल्लमिश्रमहोदयेन टीकाकाराणां स्वकीयया दृष्ट्या तथा स्वर्णलताटिप्पण्यां तत्त्वं प्रकटीकर्त्तुं महान् प्रयत्नो व्यधायि। कर्मेदं कविपण्डित-सहृदयानां मनसि आनन्दवर्द्धनं विधास्यतीति आशास्यते। श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविश्वविद्यालयः एतस्य महापरिश्रमस्य प्रकाशनार्थं सन्तोषमनुभवति। आचार्यमिश्रमहोदयेभ्यः धन्यवचनं वितीर्य अस्मिन् कर्मणि सम्पृक्तेभ्यः सर्वेभ्यो मुद्रणव्यापारे स्थितेभ्यः आधमर्ण्यमाविष्कृत्य विरमामीति शम्।।

संहृदयहृदयसंविदग्धः<br>**आचार्य शिवशङ्करमिश्रः**

# पुरोवाक्

विश्वविश्रुतस्य गीताभिनय-सम्वलितस्य राधाकृष्णाभ्यां प्रणयगीतस्यामरगाथा कविना जयदेवेन भगवतः परमेश्वरस्य देवदेवश्रीजगन्नाथस्य चरणतले श्रीक्षेत्रे पुरुषोत्तमे प्रणिता। तेषां तेषां चतुर्विंशंतिगीतानां गानंताललयक्रमेण संघटितम्। तस्य भार्या पद्मावती च तदनुगुणं नृत्यसेवया देवदेवं पूजयामास।

गच्छता कालेनाप्यष्टशतवर्षेण तस्य प्रचारः सप्तसागरस्य तटमपि पशपर्श। गानक्रममपि भारतीयशास्त्रीयसंगीतानां यथा ओडिशी, कुचीपुडी, भरतनाट्यं, कथक-नृत्यम्, कथाकलि तथा मणिपुरी प्रभृतीनां नृत्यकदम्बानां सुतरां धेयाष्टपदीरूपेण स्वीकृतमस्ति। पृथिव्यां सर्वासु सम्भ्रान्तभाषासु तस्यानुवादः चर्चा च बाहुल्येन शतशत-वर्षेभ्यः विहिता। वयनशिल्पेऽपि गीतगोविन्दपदसम्बलितं वस्त्रं श्रीजगन्नाथस्य प्रियतमं वस्त्रमस्ति। यस्याच्छादनेन सः प्रतिरात्रं निद्रां याति। तद् यथा,

कंसारीरपि संसारवासनाबन्धशृङ्खलाम्।<br>
राधामाधाय हृदये तत्याज व्रजसुन्दरीः।।३/१७

कोणार्कस्थितसूर्यमन्दिरे तथा बहुशूत्कलीयप्राचीनमन्दिरेष्वपि श्रीगीतगोविन्दस्य चित्राणि नायिकानायकव्यवहाराणि च दर्शितानि आसन्। तदर्थं सकलकलाया अन्यतम विभावरूपेण चित्रकला नाम, पटचित्राणि, तालीपत्रचित्राण्यपि श्रीगीतगोविन्दस्य पद्यवस्तूनि आधारीकृत्य समृद्धतां गतानि।

तदेतस्य ग्रन्थस्य पाण्डुलिपयः न केवलं न्यूनातिन्यूनं द्विसहस्रम् उपलब्धाः सन्ति, अपि च टीकायाः बाहुल्यमपि द्रष्टुं शक्यते।

आराष्ट्रं गीतगोविन्दस्य प्रचारः बहुषु मन्दिरेषु गीतमिति दृश्यते। टीकापि तदनुगुणं विविधेषु मन्दिरेषु लभ्यते।

ग्रन्थेऽस्मिन् न केवलं टीकाऽस्ति प्रत्युत तत्र आङ्ग्लानुवादत्रयमस्ति। महाकविभिः Dr. Arnold , Dr. Lee Seigal, Dr. Barbara Stoler Miller. महोदयैः तेषामनुवादस्योपरि लघु मन्तव्यमपि प्रणीतमस्ति। तथा श्रीगीतगोविन्दस्यानुकृतयः सारिणीमाध्यमेनापि प्रदत्ताः सन्ति।

# कृतज्ञता

विंशतिवर्षादधिककालात् ग्रन्थस्योपरि कार्यमारब्धम्। परं विघ्नबाहुल्येन कार्यं नैवावसितम्। यद्वाऽस्तु ग्रन्थोऽयं बहूनां विदुषां सहाय्येन प्रणीतोस्ति। प्रस्तुतेऽस्मिन् ग्रन्थे चर्तुदशटीकानां संयोजनं जातमस्ति। अपरद्वयस्यापि संयोजनं कर्त्तुं यतते। परं लिपिकाठिन्येन तत् खलु मुद्रापयितुं विलम्बकारणेन परवर्त्तिनि प्रकाशने तद्भवितेति आशास्यते। विदुषां सहयोगेन प्रकाश्यं नेष्यते। श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालयस्य कुलपतीनामाचार्यमुरलीमनोहरपाठकमहोदयानां तथा शोध-विभागाध्यक्षाणां प्रो.शिवशंकरमिश्रमहोदयानामुद्यमेनैतद्कार्यमग्रेसरति। ममाधमर्ण्यं तेभ्यो विद्वत्तल्लजेभ्यो विज्ञापयामि। संशोधनार्थं प्रो.किशोरचन्द्रपाढ़ीमहोदयेभ्यः, डा.सीमाञ्चलदाशमहोदयेभ्यस्तथा प्रो.सूर्यमणिरथमहोदयेभ्यः धन्यवचनमाविष्करोमि। टकंणादिकं कर्त्तुं झुनीराणीसाहु मीनकेतनदासस्तथा मामिनामहापात्रेभ्यः धन्यवादान् विज्ञापयामि।

षण्णवतिवयस्कानां मम पितृपादानां प्राड्विवाग्काशीनाथमिश्रमहोदयानां चरणकमलवन्दनपुरःसरं नतिततिं निवेदयामि। मम भार्या स्वर्णलतामिश्रः नप्त्री लास्या स्त्रगधरा मम कन्या प्राचीश्री, ममान्ये परिवारजनाः पुत्रौ मण्डनमातृगुप्तौ तथा चान्ये बहवः शुभाकांक्षिणः ओडिशासर्वकारस्य मुख्यशासनसचिवचरः डा.अजितकुमार-त्रिपाठी, जयदेवन्यासस्य डा.प्रफुल्लचन्द्रत्रिपाठी, मुख्यशासनसचिवचरः डा.सुवास-पाणिमहोदयः, प्रत्नविद्डाःविजयरथः, जयदेवन्यासस्य मित्राणि तथा चान्ये मयि दत्तादरस्य महिम्ना अयं ग्रन्थः समाप्ततां गच्छति। अतः तेभ्यः मम बहुमान्येभ्यः कार्त्तज्ञमाविष्करोमि।

अन्ततो गत्वा मम पितामहः पण्डितरघुनाथमिश्रः पितामही सूर्यमणिः मातामही सावित्रीदेवी, चन्द्रमणिस्तथा माता प्रमिलासुन्दरी पितृव्यौ वृन्दावनचिन्तामणिमिश्रौ अन्ये गुरुवः सर्वे मम पूज्याः स्मर्यन्ते।

मन्मातरं जगन्मातरं श्रीमातरं श्रीअरविन्दञ्च मनसि निधाय ह्येतत् कार्यं समर्प्यते तेभ्यः इति शम्।

विदुषां संश्रवः
प्रफुल्लकुमारमिश्रः

श्रीकृष्णजन्माष्टमी
वि.शं २०८०

# सूची


| | सर्गः | विषय | पृष्ठा |
|---|---|---|---|
| १. | प्रथमः सर्गः | सामोददामोदरः | १९ |
| २. | द्वितीयः सर्गः | अक्लेशकेशवः | ३२४ |
| ३. | तृतीयः सर्गः | मुग्धमधुसूदनः | ४४४ |

हरिहरि याहि माधव याहि केशव मा वद कैतववादं।



हरिहरि याहि माधव याहि केशव मा वद कैतववादं।
तामनुसर सरसीरुहलोचन या तव हरति विषादम्।। ध्रुवम्।।२।। (गीतम् १७)

# श्लोक:/प्रबन्ध: सूची


| | | |
|---|---|---|
| ❖ | **प्रथम: सर्ग:** | **१९-३२२** |
| I.1 | मेघै र्मेदुरमम्बरं..... | १९-४७ |
| I.2 | वाग्देवताचरितचित्रित..... | ४८-६० |
| I.3 | यदि हरिस्मरणे..... | ६१-६९ |
| I.4 | वाच: पल्लवयत्युमापतिधर:..... | ७०-७९ |
| I.I.1.1 | प्रलयपयोधिजले..... | ८०-९३ |
| I.I.1.2 | क्षितिरतिविपुलतरे...... | ९४-९९ |
| I.I.1.3 | वसति दशनशिखरे...... | १००-१०४ |
| I.I.1.4 | तव करकमलवरे....... | १०५-१०९ |
| I.I.1.5 | छलयसि विक्रमणे....... | ११०-११४ |
| I.I.1.6 | क्षत्रियरुधिरमये....... | ११५-१२० |
| I.I.1.7 | वितरसि दिक्षु रणे...... | १२१-१२४ |
| I.I.1.8 | वहसि वपुषि विषदे....... | १२५-१२९ |
| I.I.1.9 | निन्दसि यज्ञविधेरह ह....... | १३०-१३४ |
| I.I.1.10 | म्लेच्छनिवहनिधने....... | १३५-१४० |
| I.I.1.11 | श्रीजयदेवकवेरिदं....... | १४१-१४४ |
| I.5 | वेदानुद्धरते जगन्निवहते..... | १४५-१५३ |
| I.I.2.1 | श्रितकमलाकुचमण्डल..... | १५४-१६० |
| I.I.2.2 | दिनमणिमण्डलमण्डन...... | १६१-१६५ |
| I.I.2.3 | कालियविषधरगञ्जन...... | १६६-१६९ |
| I.I.2.4 | मधुमुरनरकविनाशन..... | १७०-१७२ |
| I.I.2.5 | अमलकमलदललोचन....... | १७३-१७६ |
| I.I.2.6 | जनकसुताकृतभूषण....... | १७७-१७९ |

| | | |
|---|---|---|
| I.I.2.7 | अभिनवजलधरसुन्दर...... | १८०-१८२ |
| I.I.2.7 | (क) तव चरणं प्रणता....... | १८३-१८४ |
| I.I.2.8 | श्रीजयदेवकवेरिदं......... | १८५-१८८ |
| I.6 | पद्मापयोधरतटीपरिरम्भलग्न..... | १८९-१९७ |
| I.7 | वसन्ते वासन्तीकुसुम..... | १९८-२०६ |
| I.I.3.1 | ललितलवङ्गलतापरिशीलन..... | २०७-२१८ |
| I.I.3.2 | उन्मदमदनमनोरथ....... | २१९-२२१ |
| I.I.3.3 | मृगमदसौरभरभसवशंवद...... | २२२-२२६ |
| I.I.3.4 | मदनमहीपतिकनकदण्डरूचि केतकी..... | २२७-२३० |
| I.I.3.5 | विगलितलज्जितजगदव........ | २३१-२३६ |
| I.I.3.6 | माधविकापरिमलललिते........ | २३७-२४० |
| I.I.3.7 | स्फुरदतिमुक्तलता....... | २४१-२४४ |
| I.I.3.8 | श्रीजयदेवभणितमिदमुदयति...... | २४५-२४८ |
| I.8 | दरविदलित मल्लीवल्लिचञ्चत्पराग..... | २४९-२५४ |
| I.9 | उन्मीलन्मधुगन्धलुब्ध..... | २५५-२६२ |
| I.10 | अनेकनारीपरिरम्भसम्भ्रम..... | २६३-२६७ |
| I.I.4.1 | चन्दनचर्चितनीलकलेवर..... | २६८-२७५ |
| I.I.4.2 | पीनपयोधरभारभरेण........ | २७६-२७९ |
| I.I.4.3 | कापि विलासविलोल...... | २८०-२८२ |
| I.I.4.4 | कापि कपोलतले.......... | २८३-२८६ |
| I.I.4.5 | केलिकलाकुतुकेन च........ | २८७-२९० |
| I.I.4.6 | करतलतालतरल........ | २९१-२९४ |
| I.I.4.7 | श्लिष्यति कामपि......... | २९५-२९९ |
| I.I.4.8 | श्रीजयदेवकवेरिदमद्भुत........ | ३००-३०२ |
| I.11 | विश्वेषामनुरञ्जनेन..... | ३०३-३०९ |
| I.12 | अद्योत्सङ्गवसद्भुजङ्गकवल..... | ३१०-३१६ |
| I.12 | (क) रासोल्लासभरेण..... | ३१७-३२२ |

| | | |
|---|---|---|
| ❖ | **द्वितीयः सर्गः** | **३२४-४४२** |
| II.13 | विहरति वने..... | ३२४-३३० |
| II.I.5.1 | संञ्चरदधरसुधामधुरध्वनि..... | ३३१-३३७ |
| II.I.5.2 | चन्द्रकचारुमयूरशिखण्डक...... | ३३८-३४१ |
| II.I.5.3 | गोपकदम्बनितम्बवती....... | ३४२-३४५ |
| II.I.5.4 | विपुलपुलक.......... | ३४६-३४९ |
| II.I.5.5 | जलदपटलवलदिन्दुविनिन्द....... | ३५०-३५३ |
| II.I.5.6 | मणिमयमकरमनोहर.......... | ३५४-३५८ |
| II.I.5.7 | विशदकदम्बतले........... | ३५९-३६३ |
| II.I.5.8 | श्रीजयदेवभणितमति....... | ३६४-३६५ |
| II.14 | गणयति गुणग्रामं..... | ३६६-३७४ |
| II.I.6.1 | निभृतनिकुञ्जगृहं गतया..... | ३७५-३८४ |
| II.I.6.2 | प्रथमसमागमलज्जितया..... | ३८५-३९० |
| II.I.6.3 | किसलयशयननिवेशितया..... | ३९१-३९५ |
| II.I.6.4 | अलसनिमीलितलोचनया........ | ३९६-४०० |
| II.I.6.5 | कोकिलकलरवकूजितया....... | ४०१-४०६ |
| II.I.6.6 | चरणरणितमणिनूपुरया...... | ४०७-४११ |
| II.I.6.7 | रतिसुखसमयरसालसया....... | ४१२-४१८ |
| II.I.6.8 | श्रीजयदेवभणितमिद......... | ४१९-४२२ |
| II.15 | हस्तस्रस्तविलासवंशमनृ...... | ४२३-४२९ |
| II.16 | दुरालोकस्तोकस्तबकनवकाशो..... | ४३०-४३६ |
| II.16 (क) | साकूतस्मितमाकुलाकुलगलद्धा....... | ४३७-४४२ |
| ❖ | **तृतीयः सर्गः** | **४४४-५२०** |
| III.17 | कंसारिरपि संसारवासना..... | ४४४-४४८ |
| III.18 | इतस्ततस्तामनुसृत्य..... | ४४९-४५२ |
| III.I.7.1 | मामियं चलिता विलोक्य..... | ४५३-४५७ |
| III.I.7.2 | किं करिष्यति किं.......... | ४५८-४६० |
| III.I.7.3 | चिन्तयामि तदाननं........ | ४६१-४६३ |
| III.I.7.4 | तामहं हृदि संगतामनिशं...... | ४६४-४६६ |

| | | |
|---|---|---|
| III.I.7.5 | तन्वि खिन्नमसूयया....... | ४६७-४६९ |
| III.I.7.6 | दृश्यसे पुरतो गतागतमेव......... | ४७०-४७२ |
| III.I.7.7 | क्षम्यतामपरं कदापि....... | ४७३-४७५ |
| III.I.7.8 | वर्णितं जयदेवकेन......... | ४७६-४७८ |
| III.19 | हृदि बिसलताहारो नायं..... | ४७९-४८५ |
| III.20 | पाणौ मा कुरु चूतसायकममुं..... | ४८६-४९२ |
| III.21 | भ्रूचापे निहितः कटाक्षविशिखो..... | ४९३-५०० |
| III.22 | तानि स्पर्शसुखानि ते च तरलाः...... | ५०१-५०७ |
| III.23 | भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि..... | ५०८-५१२ |
| III.23 (क) | तिर्यक्कण्ठविलोल.... | ५१३-५२० |

# श्री गीतगोविन्दम्
## चर्तुदश टीकोपेतम्

(१) नारायणदाशकृत- सर्वाङ्गसुन्दरी
(२) राणाकुम्भकृत- रसिकप्रिया
(३) जगद्धरकृत- सारदीपिका
(४) शंकरमिश्रकृत- रसमञ्जरी
(५) लक्ष्मीधरकृत- श्रुतिरञ्जनी
(६) शुक्लध्वजनृपतिकृत- सारवती
(७) वनमालिभट्टकृत- सञ्जीवनी
(८) नारायणपण्डितकृत- पदद्योतनिका
(९) कृष्णपण्डितकृत- जयन्ती
(१०) धनञ्जय-धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)
(११) पूजारीगोस्वामीकृत- बालवोधिनी
(१२) लक्ष्मणकृत- रसिकरङ्गदा
(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी
(१४) श्रीकान्तमिश्रकृत-पदभावार्थचन्द्रिकाटीका

## ।। प्रथमः सर्गः ।।

## सामोददामोदरः



## श्रीजयदेवकविविरचितम्

## गीतगोविन्दम्

### ।। प्रथमः सर्गः ।।

।सामोददामोदरः।

**१ - मेघै र्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्**
**नक्तं भीरुरयंत्वमेव तदिमं राधे गृहं प्रापय।**
**इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं**
**राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ।।१ ।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

श्रीकृष्णाय नमः

सर्वाङ्गसुन्दरी राधा कृष्णः सर्वाङ्गसुन्दरः।
तयोरानन्दजननी टीका सर्वाङ्गसुन्दरी ।।१ ।।
नत्वा श्रीहरिचरणं कुरुते सर्वाङ्गसुन्दरीटीकाम्।
श्रीनारायणदासः कविराजोऽयं गीतगोविन्दे ।।२ ।।
आस्ते यदि हृदि वाञ्छा बोद्धुं तत्त्वेन गीतगोविन्दम्।
श्रीनारायणदासस्याभिप्रायं जनाः श्रृणुत ।।३ ।।

स्वेष्टदेवतासंकीर्त्तनेन स्वविघ्नहेतूनुन्मूलनाय मङ्गलमाचरता निखिलप्रबन्धप्रमेयं तत् श्रीकृष्णकेलिकथाजातस्य सूचकं केलिशब्दस्य च महाकाव्यलक्षणानि निपुणतया आशिषा संकीर्त्तयता कविराजजयदेवेन अभ्रान्तं प्रथमं पाठ्यम्।

महाकाव्योपक्रमे आशीर्नमस्क्रियावस्तुनिर्देशो वा क्रियत इति कविसंप्रदायः। त्रिविधमङ्गलनिरूपणं ततः प्रारीप्सितग्रन्थस्य निर्विघ्नेन परिसमाप्तये प्रचयपरिपन्थि-कलुषनिवृत्तये च श्रीकृष्णाख्यं वस्तुनिर्द्देशलक्षणम्। सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्।

आशीर्नमस्क्रियावस्तुनिर्द्देशो वापि तन्मुखम्।। इति **काव्यादर्शे**।

अत एव जयदेवोऽपि तथैव निबन्धं विधित्सुराह मेधैर्मेदुरमम्बरमिति। पक्षत्रयमत्र सम्भाव्यते। तत्र जयन्तीति पदोपन्यासात् आशीर्ज्ञेया लोट् ये विधानात् "जयन्तीत्यनेन च नमस्कार आक्षिप्यन्ते" इति काव्यप्रकाशोक्ते नमस्क्रिया।

अत्र ग्रन्थे विष्णुरेव नायक उपलक्ष्यते। तस्य प्रागुपन्यासाद् वस्तुनिर्द्देशोऽपीति पक्षत्रयं प्रतिपादितम्। अधुना श्लोकयोजना। राधामाधवयोर्यमुनाकूले रहः केलयोर्निर्जनस्थानक्रीड़ाः प्रत्यध्वकुञ्जद्रुमं जयन्ति जययुक्ता भवन्तीत्यर्थः। निर्भरकेलिप्रतिपादनार्थमत्र रहः शब्दोपादानम्। प्रत्यध्वकुञ्जद्रुममिति अध्वकुञ्जद्रुमं लक्ष्यीकृत्येत्यर्थः कुञ्जेनोपलक्षितो द्रुमः कुञ्जद्रुमः। अध्वनः कुञ्जद्रुमोऽध्वकुञ्जद्रुम इति षष्ठीसमासः। केचित्तु "लक्षणेनाभिप्रेत आभिमुख्ये" इति अव्ययीभावसमासेन प्रत्यध्वकुञ्जद्रुमं साधयां चक्रुः। किं भूतयोरित्याह।

इत्थं नन्दनिदेशतश्चलितयोरिति इत्थमनेन प्रकारेण नन्दगोपशासनाद् गृहं प्रस्थापितयोरित्यर्थः। कः पुनरसौ नन्दनिदेश इत्याह, नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापयेति। एवं कारः कोपाविष्कारः । हे मुग्धे! यतः कार्य्याकार्य्यमविचार्य्य नक्तं भीरुरयं त्वयैतावद्दूरमानीतस्तस्मात्त्वमेवेमं कृष्णं गृहं प्रापयेति कोपाविष्कारार्थः। कोपाविष्कारश्च राधे! इत्याक्षेप सम्वोधनपदेनैव लभ्यते। न पुनर्वत्से! पुत्रि! मातरि! इत्यादिनेति। राधाशब्दः पुनरुक्तोऽप्यदुष्टः यदुक्तं प्रयोज्य इति ।

विषादे विस्मये हर्षे कोपे दैन्येऽवधारणे।

प्रसादनेऽनुकम्पायां पुनरुक्तं न दुष्यति ।। इति ।।

केपि त्वय्येवायं जातविश्वासः त्वया नीयमानो गमिष्यतीति अवधारणार्थमेवकारं वर्ण्णयां चक्रुः। ननु कथं दिवारात्रिशङ्केत्याह। मेघैर्मेदुरमित्यादि, अम्बरमाकाशं मेघैर्मेदुरं स्निग्धमाच्छादितमिति यावत्। वनभुवः श्यामास्तमालद्रुमैरिति, अरण्यप्रदेशाः तापिञ्छबृक्षैः श्यामला इत्यर्थः। जलदाच्छन्नतया रवेरदर्शनं तमालश्यामकाननत्वेनान्धकारबाहुल्यमतो रात्रिशङ्का जागरूकेत्यभिप्रायः। ननु केलयः जयन्तीति। केलीनां जयक्रियाकर्त्तृत्वं न घटते। अचेतनस्य चिकीर्षाया अभावात्। उत्कर्षप्रतिपत्तिरेव जयतेरर्थः। तथाह नियतोत्कर्षप्राप्तिपत्तौ सकर्मकोऽयम्। तथा जयति शत्रुं राजेति अनियतोत्कर्षप्रतिपत्तौ तावपि सकर्मकः, यदि तव शत्रुं जयति। सर्वोत्कर्षप्रतिपत्तौ अकर्मकः। यथा जयति रघुवंशतिलक इति। यश्च सर्वोत्कृष्टः कस्तं न नमतीति जयत्यर्थेन नमस्कार आक्षिप्यते। ततो मुख्यार्थवाधेनार्थान्तरसंक्रमितवाच्य व्यङ्ग्यस्वरूपतया राधामाधवयोः रहः केलयो नमस्कारार्हा इत्यर्थः। तेन रहः केलिं प्रति प्रणतोऽस्मीत्यर्थः सम्पाद्यते। राधामाधवयोरिति राधा च माधवश्चेति द्वन्दः। क्वचिदनभ्यर्हितस्यापि पूर्वनिपातः स्यात्प्रायिकं चैतत्सर्वमित्युक्तेः। यद्वा श्रृङ्गाररसप्रधानं

हि काव्यं श्रृङ्गाररसे च स्त्रिया एव प्राधान्यमिति राधायाः प्राङ्‌निपातः। नक्तं भीरुरयं त्वमेव तदिममित्यत्रान्वादेशाभावादेनादेशो न। अस्त्ययं दण्ड इममानयेत्यत्र यत्र तत्किञ्चिद्विधाय कार्य्यात्कार्य्यान्तरं निर्द्दिश्यते सोऽन्वादेश इति। जयादिति काशिकाकारः। राधाविशाखा माचष्टे राधागोपाङ्गनामपि। ''दामोदरो हृषीकेशः केशवो माधवः स्वभूः'' "**इत्यमरः**"। ''निकुञ्जकुञ्जौ वा क्लीवे लतादि पिहितोदरे'' "**इत्यमरः**"। ''रहस्तत्त्वे रतेगुह्ये'' इति **मेदिनी**। ''नक्तं च रजनाविति'' **इत्यमरः**।। शार्दूलविक्रीडितं छन्दः।।१ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१ ।। कल्याणं कमलापतिर्दिशतु मे यः कौस्तुभे राधया
वीक्ष्य स्वं प्रतिबिम्बितं प्रतियुवत्येषेति तर्काकुलम्।
आश्लेषोन्मुखयापि मानपरया मन्वानया कैतवं
तिर्यग्वक्रितकन्धरं वलितया सासूयमालोकितः।।१ ।।

सोऽव्यान्मामरविन्दनाभ उदयद्यन्नाभिपद्मालया
पद्मा पद्मविनीलमीलनविधिप्रावीण्यवन्नेत्रयोः।
योगादर्धनिमीलिताम्बुजवशात्संभोगभोगेतरा-
वस्थाद्वन्द्वभवानुभूतिजनितक्रीडासुखान्यन्वभूत्।।२ ।।

दिश्यान्मेऽर्धशिवातनुः स भगवान्नित्योदितां संपदं
शम्भुर्विश्वजयश्रियः परवशीकारैकसत्कार्मणम्।
यत्रैकाङ्गनवीनविभ्रमरसादेकाङ्गगुप्तेरना-
स्वादात्संभवदद्भुतैकपरमा जागर्ति हेमाद्रिजा।।३ ।।

नत्वा मतङ्गभरतप्रमुखान्सुगीत
संगीतशास्त्रनिपुणाञ्जयदेववाचाम्।
श्रीकुम्भकर्णनृपतिर्विवृतिं तनोति
गानं निधाय सरसं रसिकप्रियाह्वाम् ।।४ ।।

श्रीवैजपायनसगोत्रवर्यः श्रीबप्पनामा द्विजपुङ्गवोऽभूत्।
हरप्रसादादपसादराज्य प्राज्योपभोगाय नृपोऽभवद्यः।।५ ।।
यदन्वये निर्जिततर्कवादिपदःपदं तत्परमा व्यभाति ( ?)।
श्रीमेदपाटे गुहिलप्रधाने यत्राभवन्भूपतयः प्रसूताः।।६ ।।

तत्र क्रमाद्द्रव्यपरम्पराढ्ये हम्मीरनामा नृपतिर्बभूव।
चन्द्रादिरत्नप्रकरक्रमेण रत्नाकरे कल्पतरुर्यथाऽऽसीत् ।।७।।
दानानि संगतवनीपकमात्रपात्रमासाद्य यो ददिरनन्तगुणानि कामम्।
पञ्चाननो विषमधाटिषु यः प्रसिद्धश्चक्रे मृधान्यखिलशत्रुभयावहानि ।।८।।

तस्मादभूत्सत्तनयः प्रभूतनयः परायः सदयः शतायुः।
श्रीक्षेत्रसिंहः प्रतिपक्षनागसिंहः पराहंकृतिमत्तसिंहः।।९।।
ततोऽभवल्लक्ष्य उदीतलक्ष्यविपक्षपक्षक्षयकारदक्ष्यः।
गयाविमोक्षास्थितधर्मरक्षःस्वक्षः कृतत्र्यक्षसमस्तलक्ष्यः।।१०।।

तन्नन्दनो निर्जितपूर्वराजचारित्रसंपादितमेदिनीकः।
श्रीमोकलेन्द्रः प्रणतारिमौलिमाणिक्यभाभासितपादपद्मः।।११।।
श्रीकुम्भकर्णस्तदनु क्षितिन्द्रः क्षितिं बिभर्तीन्द्रसमानसारः।
शेषादिकेभ्यो धरणे धरित्र्या भरस्य विश्राणितविश्रमः सन्।।१२।।

स श्रीशभक्तिप्रवणः प्रवीणः संगीतशास्त्रेऽखिलशास्त्रवेत्ता।
श्रीगीतगोविन्दसुगीतकस्य नव्याकृतिं व्याकृतिमातनोति।।१३।।
जित्वा तु पृथिवीं कृत्वा तत्पतीन्करदायिनः।
राधामाधवसारस्य रसिको रमतेऽधुना।।१४।।

प्रत्यज्ञायि प्रबन्धो यो जयदेवेन धीमता।
न तस्य विद्यते लक्ष्म सर्वाङ्गैरुपलक्षितम्।।१५।।
अतः स्वरादिभिः षड्भिरङ्गैःसंयोज्य तथ्यताम्।
नीत्वा गीत्वा तदा हित्वा कुटीकासु(स्तु) प्रवर्त्यते।।१६।।

शृङ्गारे सप्रपञ्चे रस इह रुचिरौत्ययुक्तौ प्रकृष्टे-
ऽलंकारे नायिकाया गुणगणगणने वर्णने नायकस्य।।
गीतौ प्रीतौ च वृत्तौ लयमनु रसिकःकौतुकं चेत्तदेमा
दोषैर्मुक्ता गुणाढ्याः शृणुत नरपतेः कुम्भकर्णस्य वाचः।।१७।।

स किं बन्धः श्लाघ्यो व्रजति शिथिलीभावमसकृ-
द्विचारेणाक्षिप्तो ननु भवति टीकापि किमु सा।
न या ग्रन्थग्रन्थिप्रकटनपटुः किं तु तददो
द्वयं युक्तं कर्त्तुं प्रभवतितरां कुम्भनृपतिः।।१८।।

शृङ्गारोत्तरसत्काव्यवेदिविद्वन्मुदे मया।
मेघैर्मेदुरमित्यादिपद्यं व्याक्रियतेऽधुना।।१९।।

गमकालापपेशलतया मध्यमग्रामे षाडवेन मध्यमग्रहेण मध्यमादिरागेण गीयते।

गणपतिमभिमतफलदं वरदं प्रणिपत्य सिद्धिगुणविशदम्।
गीतौ जयदेवकृते धातुं कुम्भो नृपस्तनुते।।२०।।

अथ कुम्भकर्णनृपतिः स्तुत्वा नत्वा सरस्वतीं देवीम्।
स्वरपाटतेनकानां करोति गुम्फं सुमानार्थम्।।२१।।

मेघैरिति।। जयन्ति सर्वोत्कर्षेण वर्तन्ते। सर्वोत्कृष्टत्वेन नमस्करणीयत्वमुक्तम्। तेन नमस्क्रिया काव्यमुखं द्योतितम्। आशीर्वा। कास्ताः ? रहः केलयः सुरतक्रीडाः। "रह्ये गुह्ये रहो रते" इति। तासां विषयं निर्दिशति- क्व ? यमुनाकूले प्रत्यध्वकुञ्जद्रुमम्। अध्वनि कुञ्जद्रुमोऽध्वकुञ्जद्रुमः। अध्वकुञ्जद्रुमं प्रतीति प्रत्यध्वकुञ्जद्रुमम्। ननु चात्र नित्यसमासत्वाद्वाक्येन न भवितव्यम्। नेतदस्ति। प्रतिशब्दस्य वीप्सायां कर्मप्रवचनीयसंज्ञा विहिता। तद्योगे यथा स्यादित्येवमर्थः। तस्याश्च वाक्य एव प्रयोगो नान्यत्रेति वाक्यमपि स्यात्। अर्थमर्थं प्रति इत्यादि भाष्यकारप्रयोगाच्च। कस्मिन्सति ? रह एकान्ते। एकान्तं कयोः ? राधामाधवयोः। अत्र राधाया जगद्गुरुपरिग्रहेण सकलमातृत्वेनाभ्यर्हितत्वादल्पाक्षर-तरत्वाच्च पूर्वनिपातः। किं लक्षणयोः। इत्थं वक्ष्यमाणप्रकारेण, कृष्णोक्तेरनु नन्दनिदेशते इति, नन्दसमीपाञ्जलितयोः। तमेव प्रकारमाह-हे राधे! तत्तस्माद्धेतोरिमं मल्लक्षणं जनं त्वमेव गृहं प्रापय। सामान्यनारीव्यावृत्त्या गृहिणीनिर्वर्त्ये संभोगादिकर्मणि समुदिता भवेत्यर्थः। अत्र गृह शब्देन तात्स्थ्याद्गृहिण्युच्यते; गृह "शब्दच्छलेन तामेव पुरस्कृत्य वनविहारदर्शनात्। अत्र प्राप्नोतिरुदयार्थे वर्तते। प्रलाभोदययुक्तिषु" इति **चूडामणिः**। त्वयैवाहं गृहिणीमान् स्यामिति यावत्। एवकारोऽन्ययोगव्यावृत्त्यर्थः। तस्मादिति किम्? यतोऽयं मल्लक्षणो जनो भीरुः, भीरुरिति एभिर्भावहेतुभिः स्मराहतीः सोढुमसमर्थः। तानेव भावानाह - अम्बरमाकाशं मेघैर्मेदुरं सान्द्रं स्निग्धं वर्तते। अपरं च, तमालद्रुमैः श्यामा वनभुवो वर्तन्ते। अपरं च नक्तं रात्रिकालः। एवं देशकालवस्तुलक्षणाः विभावाः सूचिताः। किमुक्तं भवति ? अत्र काव्ये शृङ्गाररसप्राधान्यात्तस्य मेघाद्यास्त्रयोऽप्युद्दीपन(२) भावा उक्ता भवन्ति। राधाद्या आलम्बनविभावाः। भीरुरित्यस्यानुभावः। हर्षावेगशङ्कौत्सुक्यव्रीडा-

चपलतादयो व्यभिचारिण:। इत्थं कार्यं कारणसहकारिभि: रतिस्थायीभाव: सकलरससम्राट् सप्रपञ्च: संभोगाख्योऽभिलाषविरहेर्ष्यासूयालक्षणो विप्रलम्भ: शृङ्गार: साङ्गोपाङ्ग: समुन्मीलितो भवति। तदुक्तम् **(का. प्र.** उ. ४)- कारणान्यथ कार्याणि सहकारिणि यानि तु। रत्यादे:स्थायिनो लोके तानि चेन्नाट्यकाव्ययो:।। विभावा अनुभवाश्च कथ्यन्ते व्यभिचारिण:। व्यक्त: स तैर्विभावाद्यै: स्थायीभावो रस: स्मृत:।। तथा चाभाणि **भरतेन**, "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति:" इति। एवमेतेन पथा श्रीजयदेवेन कविना रसमुख्ये स्थिरीकृते तदाशयमबुद्ध्वा कैश्चिव्द्याख्यातं तत्तावन्न विचक्षणपरीक्षाक्षममीक्षामहे। तथा हि; इत्थं नन्दनिदेशतो नन्दादेशाच्चलितयो: केलयो जयन्ति। इत्थमिति किम्? राधा काचन गोपिका तनन्देन संबोधनम्। हे राधे! इमं मम शिशुं रात्रौ भीरुं त्वमेव गृहं प्रापय, त्वय्येव मम विश्वास इति तदा नायकस्य शिशुत्वेन परवशत्वं, तस्याश्च धात्रीत्वं नंदस्य दूतीकर्म, शृङ्गारविभावानां भयानकहेतुत्वं, कविनिरूपितरसस्यान्यथात्वं चोपपद्यते। तत्र तेषामायुष्मतां क उपालम्भ:? "यत: निर्देशो भाषणादेश, सामीप्यर्थमजानत:। आदेश एव विश्रान्तमतेर्व्याख्या भवेन्न किम्?।। लोके किं कूपमण्डुक: समुद्रमपि तत्समम्। न वेद वेदवादोऽयमिति श्रुतिभिया किल?।।" अथैवं नन्दादेशादनु तथा ग्राम्यतायां शृङ्गार: विनाशितो भवति। यथाह, "अथ शृङ्गारपरता सुतरां सा तिरस्कृता। यत: कुलवधूवत्स चमत्काराय संवृता।।" श्वशुरे वदति प्राय: सुनो रतमनु स्नुषाम्। सा नाम ग्राम्यतापीष्टा सापि नेष्टा विपश्चित:।। "प्रयुक्तं कविना दिकचत्त्वं तदाशयमजानता। नन्दनिर्देशहारिण्यास्तस्या एकत्वमिष्यते।। नायकत्वं यदाम्नातं हरे: काव्यकृता कृतौ। तस्यां तस्मिन्विनिक्षिप्ते गति: का नाम तस्य ते? ।।" यो गीतगोविन्द इति प्रबन्धोगोविन्दनेतारमनुप्रबद्ध:। राधावशे तत्र कृतेऽर्भकत्वात्स गीतराध: कथमत्र न स्यात्?।। प्रामाण्यं सुधियोऽवदन्कविगिरां धर्मोपदेशे बुधा यत्तन्नो भवितुं मुदार्हति गुरोराज्ञा विचार्या न यत्। तत्रेदं तु विचारणीयमिह यो यस्या: करे दीयते रक्षायै स च कामयेत यदि तां तत्किंचिदद्यावधि।। शृङ्गारोपक्रमे चात्र भयानकनिमित्तता। मेघाडम्बर-तादेस्तन्महव्द्याख्यानकौशलम्।। अन्यहेतुभीरन्यस्योत्पत्तिश्चेद्दृश्यते तदा। विस्मयस्थायीभावत्वादद्भुतोपस्थितिर्न किम्? धात्रीयोगान्न शृङ्गारो न हास्यो रहसीङ्गितै:। न भयानकता तस्माद्रस: कोऽत्रावतिष्ठताम्? तस्मादत्र विभावानुभावसंचारिभिर्भवेत्। शृङ्गारो नन्दसामीप्यात्तयोश्चलितयो: स्वत:।। यथा द्रव्याणि नानात्वं भावान्तर विभावत: व्रजन्ति नानारसतां तथा भावास्त एव हि ।। एवं मेघादयोऽपि स्यु: शृङ्गारे च भयानके। विभावाद्यावियुक्तेन भावकेन विभाविता:।। "तस्मात्काव्याभिप्रायसूचितशृङ्गारपरत्वेनात्र

कृतं व्याख्यानमेव न्याय्यमिति। अत्र **मेघैः** "इति बहुवचनेनाक्रममेव नवभिरप्यवस्थाभिराक्रमणाश्चेतसोऽन्यथावृत्तिः सूचिता। "अम्बरम्" इति स्वच्छन्दबिहारभङ्गशङ्कां मा कृथा इति। वनभुवः इति बहुवचनेन नानावस्थरतक्षमं प्रदेशबाहुल्यं द्योतितम्। नक्तम् "इति कालस्य स्वच्छन्द प्रच्छन्नकामुकयोग्यत्वमुक्तम्। माधव "शब्दः सत्यामपि लक्ष्म्यां तस्यामनुरागातिशयद्योतनार्थः। "यमुनाकूल" इति रतिश्रमनिरासससाधनशिशिरसमीरसद्भावार्थम्। अयम् "इति रत्युद्रेकाकुलतया स्वाङ्गेष्वप्यौदासीन्यद्योतनाय। यथा श्रीहर्षमिश्रस्य हंसेन स्वात्मनि निराशीभूतेन गतिस्तयोरेकतरस्तमर्दयन् (**नैषध**.२।१३५) इत्याद्यभाणि। यथा वा श्रीकालिदासस्य ईश्वरेण तयावगणिते आत्मन्यनास्थापरत्वेन अयं जनः प्रष्टुमनास्तपोधने" (**कुमार**. ५।४०) इत्याद्यवादि। अत्र वर्णवृत्यानुप्रासः शब्दालंकारः। पूर्वार्धे समुच्चयोऽर्थालंकारः। तल्लक्षणं तु (**का.प्र**. १०।११६) तत्सिद्धिहेतावेकस्मिन् यत्रान्यत्तत्करं भवेत्। समुच्चयोऽसौ"। यथा - "दुर्वारां स्मरमार्गणाः प्रियतमो दूरे (**शार्ङ्ग. प.**) इत्यादि। उत्तरार्धे चाशीः। तद्योजनं च- सर्वोत्कृष्टास्ताः केलयो विलासकलासु कुतूहलिनः पान्तु। अत्र शब्दार्थालंकारयोरर्थालंकारयोश्च संसृष्टिः; सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः" (**का. प्र**. १०।१३९) इति। अत्र अयम् इत्यात्मन्यौदासीन्यद्योतकं सर्वनामपदं तिलकायमानं बिभ्राणा सूक्तिः समुचितपरभागातिशयेन रुचिरतामावहन्ती शरदिन्दुसुन्दरवदनेव श्यामतिलकेन श्यामेव शुभविशेषकेण विभूषिता अर्थौचित्यचमत्कारकारिणी सकलकविकुलललामभूता कामपि विच्छित्तिमातनोति। यथा (**सा.च**) मग्नानि द्विषतां कुलानि समरे त्वत्खड्गधाराजले नाथास्मिन्निति वन्दिवाचि बहुशो देव! श्रुतायां पुरा मुग्धा गुर्जरभूमिपालमहिषी प्रत्याशया पाथसः कान्तारे चकिता विमुञ्चति मुहुः पत्युः कृपाणे दृशौ।।" अत्र मुग्धा पदं कैश्चित्काव्यलिङ्गमित्यलंकारोऽभाणि। तन्न; तल्लक्षणाभावात्।। लक्षणं तु; तदेवोक्तं काव्यलिङ्गं हेतोर्वाक्यपदार्थता (**का.प्र**. १०।११४)इति। नात्र "वपुःप्रादुर्भावात्" इतिवद्धेतोर्वाक्यार्थता। नापि "प्रणयिसखीसलीलपरिहासरसाधिगतैः (**मालती**.५।३१) इतिवदनेकपदार्थता। नापि भस्मोद्धूलन भद्रमस्तु भवते" "इतिवद्धतोरेकपदार्थता। तस्य गतिं त एव प्रष्टव्याः। एवमिह सुनिपुणमपि निरूप्यमाणोऽलंकृतिगुणो न विद्वच्चित्तचमत्कृतिमातनोति।। तर्हि काव्यचारुतानिबन्धनश्रृङ्गाररसस्वीकारेण रसवदलंकारतेत्यपि नाशङ्कनीयम्। यतोऽत्र श्रृङ्गारस्य प्राधान्यान्नालंकारत्वं येनालंकारता स्यात्। यदाह- "प्रधाने यत्र वाक्यार्थे यत्रायान्ति रसादयः। काव्ये तस्मिन्नलंकारो रसादिरिति

मे मतिः" ।। प्रकृते तु शृङ्गारस्य प्राधान्यमपि प्रतिपन्नम्। अत्र वैदर्भी रीतिः (**का.सू.** १।२।११)" अस्पृष्टा दोषमात्राभिरनल्पगुणगुम्फिता। विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते।। "शृङ्गारावस्थानसूचिका कौशकी वृत्तिः। संभाविता गीतिः। तस्याश्च लक्षणम् संभाविता भूरिगुरुर्द्विकला वार्तिके पथि" । मध्यो लयः। प्रसादो गुणः। अनुकूलो नायकः। स्वाधीनपतिका नायिका।। पूर्वार्धेऽभिलाषलक्षणो विप्रलम्भः। अपरार्धे सम्भोगश्च शृङ्गारः। एवं केलय इति कथाबीजलक्षणं वस्त्वपि निर्दिष्टं भवति।। एवं च त्रविधमपि काव्यमुखं महाकविना समुन्मीलितं भवति।। यदत्र कश्चित्संभोगशृङ्गारलक्षणं वस्त्ववदत्, स एव चास्य विवेचनक्षमः।। शार्दूलविक्रीडितं छन्दः। यथा- "सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्" ।।१।।

## (३) जगद्धरकृत-सारदीपिका

।।१।। करकलितभुजङ्गो मस्तके न्यस्तगङ्गो विहितनटनभङ्गो[२] दत्तदैतेयभङ्गः। चिरविगलदनङ्गस्त्यक्तसङ्गोऽङ्गनाङ्गो भवतु मम[३]विभूत्यै शम्भुरुन्मत्तगङ्गः।। १ ।। नानाटीकाः समालोक्य विचिन्त्य सुचिरं हृदा। गीतगोविन्दटीकेयं क्रियते श्रीजगद्धरैः।।२।।

इह कविर्निर्विघ्नं प्रारीप्सितस्य समाप्तिमुद्दिश्य स्वेष्टदेवतादिकीर्तनरूपं मङ्गलं विधित्सुः महाकाव्यलक्षणभूतं वस्तुनिर्देशमपि कटाक्षयति- मेघैरित्यादि। राधामाधवयोः रहःकेलयो जयन्ति गोपीविशेषकृष्ण- योरेकान्तक्रीडितानि उत्कर्षेण वर्धन्तामित्यर्थः। राधा च माधवश्च राधामाधवौ, "चार्थे द्वन्दः" । राधा काचिद्गोपी "राधावैशाखमासे स्याद्राधा गोप्यां च विद्युति" इति **विश्वः**। मा लक्ष्मीः तस्या धवः स्वामी माधवः। यद्वा मधोरपत्यं माधवः। तस्यापत्यमित्यण्। वृद्धिः। "आद्गुणः" इति गुणः। अवादेशः। जयन्त्वि(न्ती)त्याशंसायां लोट्। उत्वाभावश्चान- भिधानादेवक्री ....ह। कुत्र यमुनाकुले कालिन्दीतटे इत्यर्थः। कीदृशयोः, इत्थमनेन प्रकारेण नन्दनिदेशतः नन्दाज्ञावशाच्चलितयोः गच्छतोः। कमभिमुखीकृत्य प्रत्यध्वकुञ्जद्रुमम्। अध्वनि मार्गे कुञ्जद्रुमः अध्वकुञ्जद्रुमः तं प्रति "लक्षणेत्थम्भूताख्यानेति कर्मप्रवचनीयसंज्ञा" । लक्षणेनाभि प्रति अभिमुखे इति समासः। कर्मप्रवचनीययुक्ते द्वितीया। अथवा वीप्सायामव्यीभावः। हे राधे ! अम्बरम् आकाशं मेघैर्मेदुरं व्याप्तमित्यर्थः। वनभुवः तमालद्रुमैर्वृक्षैः श्यामाः अतः कृष्णः नक्तं रात्रौ भीरुः भयशीलः आर्तिबालत्वात् तस्मादमुं पुरोवर्तिनं कृष्णं गृहं प्रापय, एवं करणे नन्दस्यान्यस्मिन्विश्वासा- भावात्।।१।।

## (४) शंकर मिश्रकृत-रसमञ्जरी

।।१ ।। शंकरजगदम्बिकयोरङ्के पङ्केन खेलन्तम्।
लम्बोदरमवलम्बे यं वेद न तत्वतो वेदः ।।१ ।।
श्यामतामरसदामसुन्दरः पादपङ्कजनमत्पुरन्दरः।
वर्धमानभवदावपावकः पातु कोऽपि वसुदेवशावकः।।२ ।।

इह खलु प्ररिप्सितसमाप्त्यर्थमेतत्काव्यप्रतिपाद्यं राधामाधवकेलिस्मरणरूपं मङ्गलमादावाचरति, मेघैरिति। राधामाधवयो रहःकेलय एकान्तक्रीडा जयन्ति। सर्वोत्कर्षेण वर्त्तन्ते। किंभूतयोः ? इत्थमनेन प्रकारेण नन्दनिदेशतो नन्दाज्ञया चलितयोः प्रस्थितयोः। कीदृशो नन्दनिदेश इत्यत आह, त्वमेवेत्यादि। हे राधे! तत्तस्मात्त्वमेवेमं कृष्णं गृहं प्रापय। अत्रैवकारः कोपोक्तौ। बाल्येऽयं यत्त्वयैतावद्दूरमानीतस्तस्मात्त्वमेव गृहमपि प्रापयेत्येवाभिप्रायात्। कुतः ? यतोऽयं कृष्णो नक्तं रात्रौ भीरुः शिशुत्वाद्भयशीलः। भयहेत्वान्तरमाह, मेघैतित्यादि। अम्बरमाकाशं मेघैर्मेदुरं स्निग्धम्। तथा च वनभुवः काननभूमयस्तमालद्रुमैस्तमालवृक्षैः श्यामाः कुत्र जयन्तीत्यत आह- प्रत्यध्वेति। यमुनायाः कूले प्रत्यध्वकुञ्जद्रुम् अध्वन्यध्वनि कुञ्जे कुञ्जे द्रुम इत्यर्थः। यद्वा, अध्वनःकुञ्जान् द्रुमां लक्षीकृत्येत्यर्थः न च नक्तं भीरुरयं त्वमेव तदीदं द्वीतीयाटौस्खेनः (**पा**. २/४/ ३४) इति सूत्रेणैनादेशः कथं न भवतीति वाच्यं अन्यादेशबिषयत्वाभावात्। किंचित् कार्यं विधातुमुपात्तस्य कार्यान्तरं विधात्तुं पुनरुपादानमन्वादेशः। किंचित् कार्यं बिधातुं इति।अपूर्वं वोधयितुं इत्यर्थः। भीरुत्वस्य अनुवाक्यत्वेन विवक्षितत्वात्। अम्बरं व्योम्नि वाससि **इत्यमरः**। "दोषा नक्तं च रजनी" इति च। "त्रस्ते भीरुं भीरुकभीलुकाः" इत्यपि। निदेशः शासनं च सः" इति च। "निकुञ्जकुञ्जौ वा ल्कीवे लतादिपिहितोदरे" इति च। "रहश्चोपांशु चालिङ्गे एकान्तार्थे रहोऽव्ययम्" ।।१ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१ ।। श्रीकृष्णशरणम्। श्रीराधाकान्तशरणम्। श्रीराधाकुष्णौ जयतः। मेघैरिति। मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्त इति न्यायेन काव्यादि पद्यादौ माङ्गलिके शब्दे प्रयोक्तव्ये सति श्रीपदगुरुत्रयात्मकभूमिदेवताको मगण आदौ प्रयोज्य इति। उक्तं च मगणस्य श्रीपदत्वम्। उर्वीमस्त्रिगुरुः श्रियं वितनुते न स्वस्ति लोकजीवितमिति। यद्यप्यादौ मगणः साधुस्तथाप्यादौ म-वर्ण्णप्रयोगे दोषोऽस्ति। तदुक्तं भयशोक-मरण-क्लेशदाहान् कुरुते क्रमादिह पवर्ग इति शुभवर्ण्णप्रयोग नियमोऽपि **कविकण्ठपाशो** कथित इति।

"वर्णं गणं च काव्यस्य मुखे कुर्यात्सुशोभन् ।
कर्तृनायकयोस्तेन कल्याणमुपजायते।"

अन्यथा कष्टसम्पत्तिरनयोरेव सम्भवेदिति। समाधानं तु जयदेवकवेर्महानुभावत्वाददोष:। तदूक्तं कविकण्ठपाश एव।

जगदुदयस्थिलतिविलयसहिता: खलु लोकाविख्याता:। समानुग्रहकुशला देवा ऋषयो नरा ये वै। तेषामीश्वरशदृशां काव्यग्रथनं सलक्षणं यस्मात्। न प्रत्यवायदोषोस्तेषां तेजोविशेषेण ।इत्यलं गुणदोष गवेषणया। प्रकृतमनुसराम:।

हे राधे यस्मात् कारणात् अम्बरमाकाशं मेघैर्मेदुरं निविड़मिति यावत् वर्तत इति शेष:। अत्र यत्तदोनित्यसम्बन्धादितिन्यायेन तदिममित्यत्र तच्छब्दस्य प्रक्रान्ताद्यर्थभावेन यच्छब्दसापेक्षत्वात्। तत्सामर्थ्यादागतस्य यस्मादित्यस्य साधारणत्वेनागतस्य च वर्त्तत इत्यस्य च यथा वनभुव इत्यादावन्वयोऽप्यवगन्तव्य:। यस्मात् तमालद्रुमैस्तापिञ्छतरुभि: वनभुवो मार्गस्थली विपिनभूमयश्च श्यामा: नीलवर्ण्णा: अविस्पष्टमार्गा इति यावत्। वर्त्तन्त इति शेष:। अत्र तमालद्रुमैरितिपदं तन्त्रेणोपात्तम्। सकृदुच्चरितमनेकोपकारकं तन्त्रमिति तन्त्रविद: कथयन्ति। तेनायमर्थ: संपन्न:। तमालद्रुमस्तापिञ्छतरव:। पलाशाद्रुर्द्रुमागमा **इत्यमर**:। तेषामिव मा येषां ते तादृशा:, मा निषेधे प्रभालक्ष्म्योर्वाणीनद्यो: सरस्वतीति नानार्थदीपिकायाम्। इति व्युत्पत्या इदं पदं मेघैरित्यनेनापि योज्यम्। तथा च नीलमेघस्यावश्यं वृष्टिसूचकत्वेन कृष्णस्यगृहप्रापणोपदेश: समञ्जसो भवति। तथा नक्तं रात्रिश्च। तथायं कृष्णो भीरुभयशीलश्च। एकाकी सन् गृहं प्रतिगन्तुमसमर्थश्चेत्यर्थ: अथवायं नक्तं रात्रौ भीरुरिति वा तत्पूर्वोक्तादम्बरमेदुरत्वादिकारणात्।

त्वमेव इमं भयशीलं बालकृष्णमित्यत्र। एकशब्दानुकथनमात्रेणेदम् एनादेशो न भवति। एष छन्दोऽधीते एनमध्यापयेदित्यादाविव। एनक्रियाप्रयोगाभावात्। अतएव एतमातङ्कितं विद्यादित्यत्रापि एकशब्देनानुकथ-नाभवादेकक्रियाप्रयोगाभावाच्च नैतदेनादेश इति केचित्। "अथैनमद्रेस्तनयाशुशोचेत्यादावेकक्रिया- भावेऽध्येनादेशस्य दृष्टत्वात्"। प्रह्लादनं ज्योतिरनेनेत्यादावेनादेशस्थलेऽपि एनादेशाभाबादेनादेशनियमं कवय: प्रायशो नाङ्गीकुर्वन्तीत्यर्थ इत्यलमतिचर्चया। गृहं स्वकीयवासमन्दिरं प्रापय नय, "गतिबुद्धीत्यादिना द्विकर्मकत्वम् **(पा. १।४।५२)** त्वमेवेत्यत्र तस्या एव तस्मिन्नेवानुरागातिशयद्योतनार्थमेवकार:। अतएव तयोरुत्तरत्रप्राधान्येन वर्ण्यविहारस्वारस्यं च इत्थमनेन पूर्वोक्तप्रकारेण "इदमस्थमुरिति **(पा.५।३।२४)**।

थमुप्रत्ययः। नन्दनिदेशतः नन्दगोपस्य शासनात् अथवा इत्थं चासौ नन्दनिदेशश्च, तस्मादिति वा पञ्चम्यास्तसिलिति **(पा.५।३।७)**। तसिल् प्रत्ययः। सुप्सुपेति समासः। एवं भूतनन्दनिदेशादित्यर्थः। चलितयोः कालिन्दीतटान्निजावासं प्रयातयोरित्यर्थः। राधानाम काचिद्वल्लवाङ्गना माधवः श्रीकृष्णः तयो रहः केलयः एकान्तक्रीड़ाः, वासकसज्जाद्यष्टविधनायिकोचितश्रृङ्गारचेष्टा इति यावत्। इममर्थ मुत्तरत्र कविरेव स्फुटीकरिष्यति। यमुनाकूले कालिन्दीतटप्रदेशे कुञ्जाश्च द्रुमाश्च। अध्वनि गृहागमनमार्गे कुञ्जद्रुमाः अध्वकुञ्जद्रुमाः तान् प्रति प्रत्यध्वकुञ्जद्रुमम्। 'अव्ययं विभक्तीत्यादिना (२।१।६) यथार्थेन वीप्सायामव्ययीभावः।

अध्वनि प्रतिकुञ्जं प्रतिद्रुममित्यर्थः। अथवा अधुना सहेत्यर्थे प्रत्यध्वं प्रतिकुञ्जं प्रतिद्रुममित्यर्थः। अध्वन्यध्येकान्ते क्रीड़ाः सम्भवन्तीति कविप्रसिद्धिः। अतः एकान्ते नैर्भयेन क्रीड़ामन्ये ज्ञास्यन्तीति धिया अतिपरिचयादिह रतिर्भवतीति न्यायं मनसि निधाय विहाराणामभ्यास विहारसूचनार्थं तत्प्रयोग इत्यवगन्तव्यम्।

कुञ्जो नाम लतागृहं जयन्ति सर्वोत्कर्षेण वर्त्तन्ते अथवा राधामाधवयोर्यमुनाकूले प्रत्यध्वकुञ्जद्रुमं या रहः केलयः ता जयन्तीति वा योजना, अस्मिन् पक्षे जयन्तीति पदं सरसं भवति। अत्र यत्तच्छब्दयोः प्रयोगाभावेऽपि तदर्थोऽङ्गीकर्त्तुं शक्यते, तदुक्तं **काव्यप्रकाशे सप्तमोल्लासे** यच्छब्दयोः प्रयोगाभावेऽपि तयोरर्थोऽङ्गीकर्त्तुं शक्यत इत्युक्त्वा इदमुदाहृतम्;

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान् प्रति नैष यत्नः।
उत्पस्यतेऽस्ति मम कोऽपि समानधर्मा कालो ह्ययं निरवधि विपुला च पृथ्वी।।

इत्यत्र तृतीय चरणे य उत्पते तस्मै अयं यत्न इति यत्र नः शब्दाङ्गीकारेण तैरेव व्याख्यातम्। तद्वत्प्रकृतेऽपीति न कोऽपि विरोधः। अत्र जयतेः सर्वोत्कर्षपरत्वं च। इतिवचनादवगन्तव्यम्।

निपाताश्चोपसर्गाश्च धातवश्चेत्यमी त्रयः। अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शकः।।

ननु चात्र विघ्ननिरासकत्वेन नमस्कारस्यैव कर्त्तव्यत्वं युक्तं, न तु सर्वोत्कर्षेण वर्त्तमानस्यास्येति चेन्न, जयतेः सर्वोत्कर्षपरत्वात्तस्य जयत्यर्थे नमस्कार आक्षिप्यते इति। तथा च ताः रहकेलीः प्रणमामीत्यर्थोऽपि लभ्यते। तथा च विघ्ननिरासोऽपि सम्भवतीति भावः। अत्र च आत्मारामस्यापि भगवतः श्रीकृष्णस्य मायावशात्परानु-

जिघृक्षया वा रहः केलयः सम्भवन्त्येव। तदुक्तं **श्रीमद्भागवते - १० स्कन्धे**

भगवानपि ता रात्री शरदोत्फुल्लमल्लिकाः। वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः।।

इति विक्लवितं तासां श्रुत्वा योगेश्वरेश्वरः। प्रहस्य सदयं गोपीरात्मारामोऽप्यरीरमत्।।इति।।

न चात्र धर्मशीलनार्थमवतीर्ण्णस्य भगवतः श्रीकृष्णस्य परदाराभिमर्षणमयुक्तमिति शक्यम्। महात्मनस्तद्दोषाभावात्। उक्तं च तत्रैव;

धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम्। तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा।।इति।

न चात्र श्लोके प्रौढ़नायकस्य बाल्यगुणप्रतिपादनाद्वाक्यदोषः शङ्क्यः। बालस्य सतः पूतनाशकटासुरप्रमुखभङ्गादौ प्रौढ़चेष्टाया दृष्टत्वात् पितृवाक्यानुवादरूपत्वाच्च लोकेऽपि प्रौढ़मपि पुत्रं पिता बालत्वेन व्यवहारन् दृष्टबालस्यैव सतः प्रौढ़चेष्टावर्ण्णनं तस्य लोकोत्कृष्टतासूचनार्थमवगन्तव्यम्। न चात्र मेघैरित्यनेन वर्षर्त्तुप्रतीतेरुत्तरत्र वसन्ते वासन्तीत्यत्र च क्रीड़ोपयोगि वसन्तर्त्तु प्रतीतेर्विरोधः। भगवतः क्रीड़ानां बह्वर्त्तुव्यापित्वस्य पुराणान्तरे प्रसिद्धस्य बिवक्षिततत्वात्। अन्यथा शरत्कालप्रसिद्धानां रासक्रीड़ानां रासे हरिमित्यत्र रासे सहनृत्यपरेत्यत्र च वर्णनाविरोधापत्तिः। केतकीगन्धबन्धुः केतकदन्तुरिताशा इत्यत्र वर्षर्त्तुप्रसिद्धकेतकवर्ण्णनाविरोधाच्च। वर्षाकालस्याप्युद्दीपकत्वेन। क्रियादोषयोगित्वाच्च, अनुगिरमृतुभिर्वितायमानमित्यादौसर्वेश्वरसेवार्थंसर्वदा सर्वर्त्तुसमागमप्रतिपादकपुराणकाव्यविरोधापत्तेरित्यलमति विस्तरेण। अत्र च परस्परावलोकनपरिचुम्बनाद्यनेकभेदः सम्भोगश्रृङ्गारः अभिलाषविरहेर्ष्याप्रवासशापजत्वेन पञ्चविधो विप्रलम्भश्रृङ्गारश्च यथासम्भवं प्रतिपाद्यः न चात्र राधामाधवयोः प्राथमिक सम्भोगः परन्तु विरहेर्ष्यामानान्तरसम्भोगः। निमृतनिकुञ्जेत्यादौ तस्यैव सुज्ञानादिति एवंरूपस्य श्रृङ्गारस्य विष्णुरूप **सामवेदादुत्पत्तिः।** तदुक्तं;

सामऋग्यजुरथर्वेभ्य श्चत्वारः प्रथमे क्रमात्। जाता हास्यादयस्तेभ्यः शान्तस्तूपनिषद्गणात्।।

श्रृङ्गारस्याधिदेवता विष्णुः, तदुक्तं;

"शौरिः शक्रो महाकालो रुद्रोगणपतिर्विधिः। कालो यमः परं ज्योतिरित्येषामधिदेवता।।"

एतन्नायकलक्षणं तु;

"स्थित्वानुराग: सुभग: कलाभिज्ञो विलासवान्। चतुर कामतन्त्रेषु श्रृङ्गाररसनायक:।।"

इत्ययं चतुष्प्रकार:। तदुक्तम् अनुकूलो दक्षिणश्च धृष्टश्च शठ इत्यपि।

एतन्मध्ये कृष्ण: शठ नायको दक्षिणश्च। उक्तमनेन कविना सप्तमसर्ग

"नायात: सखि निर्द्दयो यदि शठस्त्वं दूति! किं दूयसे।
स्वच्छन्दं बहुवल्लभ: स रमते किं तत्र ते दूषणमिति।।"

बहुवल्लभो नाम दक्षिणनायक:। तल्लक्षणं तु;

एकस्यां शक्तचित्तोऽपि कान्तास्वन्यासु य: समम्।
वर्त्तते गूढराग: सन् प्रोक्तोऽसौ दक्षिणो बुधै:।।इति।।

गूढविप्रियकृच्छठ: नायिकामात्रविप्रियकारीत्यर्थ:। रसानुरागवृत्तिरत्र कैशिकी। तदुक्तं; श्रृङ्गारे कैशिकी वृत्तिर्नियता समुपाश्रिता इति। तस्या: लक्षणं तु **(साहित्य दर्पणे)**

"या श्लक्ष्णनेपथ्यविशेषयुक्ता
सुसंयुता या बहुनृत्यगीतै:।
कामोपभोगप्रसवोपरागां
तां कैशिकीं वृत्तिमुदाहरन्तीति।।"

अस्या अङ्गानि तु;

"नर्मस्फुर्ज नर्म च नर्मस्फुटश्च नर्मगर्भश्च।
कैशिक्या: संप्रोक्तान्यङ्गान्येतानि चत्वारि।।
प्रियोपच्छन्दनकृते कृतं वाग्वेशचेष्टितै:।
विदधे क्रीडितं नर्म हासेच्छाभयमानभाक्।।
नर्मस्फूर्ज: स विज्ञेय: सम्भोगोभयमाश्रित:।
नर्मस्फोटो भवेद्भावै: सूचितोऽन्यरसोदय:।।
प्रच्छन्न नेतृव्यापारो नर्म शतसिद्धय इति।"

पाकोऽत्र द्राक्षापाक:। तल्लक्षणं तु; द्राक्षापाक: स विज्ञेयो विहरन्त: स्फुरद्रस इति। अलङ्कारद्वयं तु यथासम्भवमूह्यम्। अत्र श्लोके राधामाधवरह:केलिविषय-रतिप्रतीतेर्भावध्वनि:। रतिर्देवादिविषया भाव इत्यभिधीयत इति लक्षणात्। अलङ्कारस्तु प्रथमार्द्धेऽम्बरमेदुरत्वादि वाक्यार्थानां गृहप्रापणहेतुत्वप्रतीतेर्वाक्यार्थहेतुकं काव्या-लिङ्गमलङ्कार:। "हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं द्विधा मतमिति लक्षणात्।"

इमं गृहं प्रापयत्यनेन राधामाधवयोः रहःकेलयो जयन्तीत्यनेन च एकस्मिन्नेव कृष्णे प्रतीयमानयोर्बालत्वप्रौढत्वयोराभासमानस्य विरोधस्य भगवतो हरेरचिन्त्य महिमत्वेन समाधानाद्विरोधाभासः।

एक वर्ण्णास्यां वृत्तिलक्षणो वृत्त्यनुप्रासाख्यः शब्दालङ्कारः। तदुक्तं **काव्यप्रकाशे**;

"वर्ण्णसाम्यमनुप्रासश्छेको वृत्तिगतो द्विधा।
सोऽनेकस्य सकृद् पूर्वः एकस्याप्यसकृत्परः।।" इति।।

एतेषां तिलतण्डुलवत् संश्लेषात् संसृष्टिरलङ्कारः। तिलतण्डुलसंस्कृतन्यायात् यत्र परस्परं संश्लिष्येयुरलङ्कारा सा संसृष्टिनिर्गद्यते। शार्दूलविक्रीड़ितं वृत्तम्। सूर्य्याश्वैर्मसजस्तताः सगुरवः शार्द्दूलविक्रीडितमिति लक्षणात्।।१।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।सामोददामोदरः।

।।१।।ॐ नमो गणेशाय।
कस्तुरीमकरीरुचं कुचतटे नेत्रेऽञ्जनानां श्रियं
कण्ठे श्यामसरोजदामसुषमामास्ये द्विरेफद्युतिम्।
शृङ्गाराङ्कुरविभ्रमञ्च हृदये वामभ्रुवां तन्वती
रासोल्लासभरोद्धता मधुरिपोः कान्तिच्छटा पातु वः।।१।।

व्याख्यानं विविधं निधाय हृदये प्रख्यातसंख्यावतां
सारं तस्य विविच्य सज्जनसभासम्भाषणैर्भूयशः।
विस्पष्टां जयदेवसत्कविगिरां गूढाशयोद्भाविनीं
टीकां सारवतीमिमाम्वितनुते शुक्लध्वजो भूपतिः।।२।।

सम्प्रति परमरागिणां जनानां श्रवणमननादिप्रकारेण भगवद्-भजनमतिदुर्घटमित्यावेद्य परमकारुणिकः कविः शृङ्गाररसप्रधानभगवच्चरित-वर्णनमारभमाणः समीहितसिद्धिकामो महाकाव्याङ्गभूतवस्तुनिर्द्देशं कुर्व्वन्नेव राधामाधवकेलिकीर्त्तनरूपं मङ्गलमाचरति।

यमुनाकूले प्रत्यध्वकुञ्जद्रुमम् अध्वनि अध्वनि कुञ्जे कुञ्जे द्रुमे द्रुमे राधामाधवयोः रहःकेलयः निभृतरतिहासविलासादिक्रीड़ाः जयन्ति जययुक्ता भवन्तु। अत्र वीप्साया-मव्ययीभावसमासः। यद्यपि जयो हि नाम संग्रामे प्रभुत्वेनामित्राणां वशीकरणम्, स च केलीनां न सम्भवति, तथापि उत्कर्षेण वर्द्धन्तामित्येवार्थः। उत्कर्षेण वृद्धिश्च

निरन्तरचिन्तनविषयत्वम्। चिन्तनेन विघ्ननिवारणं भवत्येवेति तत्प्रार्थनमुचितमेवेति गायतां श्रृण्वतां विघ्ननिवारणं कुर्वन्तु इति जयतेरर्थ इति **भगीरथ:**। तत्र केलीनामतोतत्त्वेन विघ्ननिवारणे सामर्थ्याभावात्। कोदृशयो: ? इत्थम् अनेन प्रकारेण नन्दनिदेशत: चलितयो: नन्दाज्ञां प्राप्य चलितयो: कोऽसौ नन्दनिदेश इत्यत आह- मेघैरिति। अम्बरमाकाशं मेघैर्मेदुरं सान्द्रम्। वनभुव:वनोपलक्षितमुभय:- तमालद्रुमै: श्यामा:तमालवृक्षै:कृष्णवर्णा:। अयं च कृष्णो नक्तं भीरु रात्रौ भयशील:, अतस्त्वमेव राधे इमं गृहं प्रापय नय। मेघै रित्यादितमालद्रुमैरित्यन्तैरतिशयभयानकत्वं दर्शितम्। नक्तं भीरुरित्यनेन सन्ध्यायां निदेशं कुर्वता रात्रिरागतप्रायेति नयने त्वरा दर्शिता। यद्यपि त्वमपि स्त्रीजन: प्रेरयितुमयोग्य: तथापि कृष्णं नेतुं कोऽप्यत्र नास्तीत्याशयेन नयेममित्युक्तम्। एतत्पक्षे एवकारोऽप्यर्थ:, अन्यत्र विश्वासाभावात्। त्वमेव नयेत्येवकारोऽवधारणार्थ इति **जगद्धर**:। अथ छलेन गृहं गृहिणीमात्मानं त्वमेव नय प्रापयेति इवादिष्टम्। ऊक्तञ्च 'न गृहं गृहमित्याहुर्गृहिणीगृहमुच्यत इति। काव्यस्य नायिकाधीनशृङ्गाररसप्राधान्याद्दर्शितत्वेन राधाया: पूर्वनिपात:। क्वचिदनर्च्चितस्य पूर्वनिपात इति वा। यद्यपि राधे त्वमेव गृहं प्रापय इत्यनेन राधिकैवादिष्टा तत् कथं नन्दनिदेशतश्चलितयोरिति, तथाप्यर्थतो माधवस्यापि निर्देश इति बोद्धव्यम्। 'सान्द्रं स्निग्धस्तु मेदुरमिति धरणी:। नक्तञ्च रजनावित्यमर: राधे वैशाखमासे स्याद्राधा गोप्यश्च विन्दतोति। 'आज्ञा निदेश आदेश' इति **विश्व:**। अत्र श्रीकृष्णस्य प्रीतिहेतुप्रतिपादनात् प्रेयो नामालङ्कार:। तथा च **दण्डी** 'प्रीतिप्रकाशनं यत्तत्प्रेय इत्यभिधीयत' इति। तदिह राधामाधवकेलिनिर्देशवस्तुरुपं महाकाव्यलक्षणं निष्पादितम्। तथा च **दण्ड़ी**, सर्गबन्धो महाकाव्यं उच्यते तस्य लक्षणम्। आशोर्नमस्क्रिया वस्तुनिर्द्देशी वापि तन्मुखमित्यलं विस्तरेण।।१ ।।

## (७) वनमालिभट्टकृत- सञ्जीवनी

।।१ ।।श्रीगणेशाय नम:। श्रीकृष्णाय नम:।।

स्थिराणां जङ्गमानांच येन सृष्टिर्निरूपिता।
सर्वेशाय नमस्तस्मै कृष्णाय जगदात्मने।।१ ।।

भूयाद्भद्राय भवतां कृष्ण: कमललोचन:।
कालिन्दीकेलि[३]संसृष्टो मेघश्यामोऽतिसुन्दर:।।२ ।।

लीला ह्यनादिसंसिद्धा गिरिचन्द्रविहारिण:।
जयदेवद्विजद्वारा चतुरेषु प्रकाशिता।।३ ।।

श्रीमद्गिरिवराधीशं वृन्दारण्यपुरन्दरम्।
कृष्णचन्द्रं प्रपद्येऽहं भक्तानुग्रहकातरम्।।४।।

श्रीकृष्णदेवकरुणाप्रतिलब्धविद्य:।
श्रीविट्ठुलेशकृपयाऽऽप्तकिशोरभक्ति:।।
गोविन्दगीतविवृतिं वनमालिनामा।
भट्टस्तनोति[४]सुकृती शिवदाससूनु:।।५।।

ग्रन्थोऽयं जयदेवोक्तो व्याख्यातो विमलाशयै:।
गोविन्दजयदेवोक्तो नेतरैर्वनमालिना[५]।।६।।

टीकाशतं कविवरै: कृतमेव रम्यं।
यद्यस्ति[१] चेत्तदपि नो विफल: प्रयास:।।
राकाधिपे समुदितेऽप्यथ किं प्रदीपो
[२]नापेक्ष्यते भवनकोणतमोनिवृत्त्यै।।७।।

सर्वस्नेहरसाम्बुधि[३]प्रमथनप्रोद्भूतलीलाकृति:।
श्रीराधोत्पललोचना[४]प्रसृमरप्रत्यङ्गगौरच्छटा।।
[५]प्रत्यानन्दरसैकसारसलसन्नेत्राम्बुदाडम्बर:।
कृष्ण [६]श्चाम्बुजलोचनस्तदुभयं वर्वर्ति सर्वोपरि।।८।।

राधा विशाखा ललिता जयन्ती विजया जया।।
सुमुखी [७]सुभगा चेति राधासख्य: प्रकीर्तिता:।।९।।

ग्रन्थादौ महाकविनृपचक्रचूडामणि: श्रीजयदेव: स्वज्ञान सर्वस्वसारनिश्चितं[८] प्रारभ्य निर्विघ्नसमाप्ति- काम: श्रीराधामाधवरतिरूपबीजं[९]वस्तु महामङ्गलमाचरति - [१०]मेघैरिति। श्रीवृषभानुजासहचर: श्रीराधानाम्नीं वल्लभामित्याह। इत्थं कथमिति। हे राधे! नन्द[११]नन्दनकांक्षितसाधिके। यमुनाकूले कलिन्दतनयातटे नक्तं रात्रौ राधामाधवयो: [१२]चैत्रवैशाखयो: केलय: क्रीडाप्रकारा यत्र जयन्ति [१३]तद् गृहमेकान्तकुञ्जकेलिमन्दिरम्। रह इति। कामिनां [१४]विनोदस्थानं [१५]रागिणांचात्यन्तम्। इमं अं श्रीकृष्णं इमाश्च श्यामा: किशोरी[१६]स्तमेव [१]युगपत्तत्प्रापयेत्यन्वय:। शृङ्गारे नायिकाया: प्राधान्यम्। चैत्रवैशाखयोरित्यनेन [२]वसन्तकालोऽपि कामिनां [३]केलिपुष्ट्यर्थं लक्षित:। कीदृश्य: केलय:? वनभुव: [४]वृन्दावनभूसम्बन्धिन्य:। कीदृशयो:? नन्दनिदेशत: [५]नन्दन्या जयन्त्या: देशतो निकटत:। नन्दनीय: श्लाघनीय:। निदेशत: [६]सन्देशतो वा। [७]प्रत्यध्वं अध्वन्यध्वनि प्रत्यासन्ना ये कुञ्जद्रुमास्तान् प्रति चलितयो:।

प्रकटितसौभाग्ययोः। कीदृशं [८]गृहम्? वरं श्रेष्ठम्। [९]पुनः कीदृशम्? भीरुरयं भीरूणां कामयानानां रयो गमनवेगो यत्र। [१०]पुनः कीदृशम्? मेघै [११]र्जलदैः मेघसदृशैर्गाढान्धकारैर्वा तमालद्रुमैः श्यामवृक्षैश्च मेदुरं स्निग्धम्। श्रीकृष्णविशेषणानि [१२]च। कीदृशम्? अम्बरं [१३]नवीनरसभोक्तारम्। [१४]पुनः कीदृशम्? मेघैस्तमालद्रुमैश्च मेदुरं [१५]स्निग्धम्। [१६]स्निग्धनीरदपुञ्जश्यामाङ्गम्। भीरुरयं भीरूणामभिसारिकाणां रयो [१७]राभस्यं स्मितमात्रेण यस्मात्तम्। अथवा राधामाधवयोः रहः केलयः अभिसारोत्सवकारिण्यः एकान्तक्रीडा जयन्ति सर्वोत्कर्षेण वर्तन्त इति। [१८]नन्दयतीति नन्दः सुरतारम्भस्तस्य निदेशः [१९]प्रेरणमिति केचन। यत्तु नन्दाज्ञाभिप्रायं व्याख्यानं [२०]तदत्यन्तमनौचित्या [२१]दुपेक्ष्यम्। कीदृशयोः? अध्वन्यध्वनि प्रत्यासन्ना ये [२२]कुञ्जा द्रुमाश्च तान् प्रति, इत्थं चलितयोः। इत्थं [२३]कथमिति। मेघैर्मेदुरं स्निग्धं अम्बरं, तमालद्रुमाश्च वनभुवः श्यामाः, तस्मादिमं गृहं त्वमेव प्रापय। तत्राप्ययं नक्तं रात्रौ भीरुः [२४]भयशीलः। ननु सर्वतस्तिमिरपुञ्ज [१]कुञ्जे कथं व्रजामीति [२]भङ्ग्योक्तिः। [३]किन्तु त्वमग्रतो व्रज तव प्रत्यङ्गोच्चलितानन्तगौरच्छटाभिर्विधुतान्धतमसि मार्गे [४]श्यामोऽप्ययं सुखं व्रजेदिति भावः। [५]लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः **(पा.सू १.४.९०.)** इत्यादिना कर्मप्रवचनीययोगे द्वितीया। श्यामा इति [६]गौरवत्वाद्बहुवचनम्। नक्तं (१) रात्रौ [७]व्रते चेति निदेशो निकटाज्ञयोः इति **त्रिलोचनः**। [८]भीरुः स्यात्कातरे पुंसि कामयानेऽपि योषिति इति [९]**महोदधिः**। श्यामा स्यादप्रसूता स्त्री श्यामा षोडशवार्षिकी [१०]इत्यपि **विश्वः** [११](८९.११)। [१२]वरः श्रेष्ठे नवरसास्वादके परिणेतरि इति [१३]**यादव**। [१४]भूः प्रकारे च सत्तायां धरण्यां सम्भवेऽपि च इति [१५]**मेदिनीकारः**। [१६]अकारो ब्रह्मविषये ईशमान्यादिषु अनेकार्थः। राधो वैशाखमासे स्याद्राधा गोप्यां च विद्युति इति [१७]विश्वः (६६.१) वैशाखे माधवो [१८]राधो[१९] **इत्यमरः** (१.३.१६)।।१ ।।

१. मेतदपि नो विपुलः-ग.ह.ज.मे तदपि नो विफलः-फ. चेत्तदपि नो विपुलः-अ.चेत्तदपि नो विपुलः मयासः-ब. २. नापेक्षते भवनकोण-अ. नापेक्ष्यन्ते भुवनकोण-ब. ३. प्रमथनमोद्धूत-ब. ४. रसभर-फ. ५. सर्वानन्दरसैकसारसुलसन्नूताम्बुदाडम्बरः-ग.फ.ह.ज. ६. स्वाम्बुजलोचनः-फ. ७. सुभगा चाष्टौ-ग. ८. प्रारम्भनिर्विघ्नसमाप्तिकामः-अ.ब.फ. प्रारम्भनिर्विघ्नसमाप्तिकारणाम्-ज. प्रारम्भनिर्विघ्नपरिसमाप्तिकारणम्-ग. ९. आदित एतदवधिव्याख्याभागो नोपलभ्यते-इ. १०. न स्तः-अ.ब.इ. ११. नन्दनाकांक्षित-इ.ग.फ. १२. चैत्रवैशाखयोः नास्ति-अ.ब. १३. तद्रहगृहमेकान्त-ग. तद्रहग्रहमेकान्त-फ. तद्रहोगृहमेकान्त-ह.ज. तद्गृहमेकान्त-अ. १४ कामिनीविनोद-अ.फ. १५. रागिणाञ्च सम्मतम्-फ. १६. स्त्वमेव तु-इ.

१चुगपत्प्रापय-ब. २. वसन्तः कामिनीकेलिपुष्ट्यर्थम्-ज. ३. पुष्ट्यर्थम्-फ. ४. वृंदावनभुंवन्दिग्यः-अ. ५. नन्दन्याः नास्ति-ग. ६. सन्देशितो व-अ. ७. प्रत्यध्वं नास्ति-ग.फ.ह.ज. ८. वरं गृहम्-अ. ९. १०. पुनः नास्ति-अ.इ. ११. जलधरैः-इ. १२. च.नास्ति ग.ह.ज. १६. श्रीकृष्णविशेषणानिर्मलांगम्-ब. नीलपुञ्जश्यामलांगम्-फ. नीरदपुञ्जश्यामलम्-ग. १७. राभ्यस्यम्-ब. १८. नन्दयति हर्षयतीति-इ.ग.फ.ह.ज. १९. प्रेरणं तस्मादिति केचन-ज. २०. तदत्यन्तमनौचितम्-ग. २१. उपेक्ष्य-अ. अपेक्ष्यम्-व. २२. कुञ्जद्रुमास्तान्-ब. २३. कथम्-ग. २४. भयशीलः नास्ति-अ.ब.

## (८) नारायणपण्डितकृत- पदद्योतनिका

।।१।। [२०]भद्राय भवतां भूयात् कृष्णः सद्भक्तिभावितः।
कालिन्दीजलसंसर्गमेघश्यामोऽतिसुन्दरः।।

[२१]इह कविः [२२]प्रारिप्सितस्य ग्रन्थस्य [२३]निर्विघ्नपरिसमाप्त्यर्थं श्रीकृष्णस्मरण-रूपं वस्तुनिर्देशलक्षणं मङ्गलं तावदाचरति-मेघैरिति। राधामाधवयोः रहः केलयः यमुनाकूले [२४]जयन्तीत्यन्वयः। राधाकृष्णयोः रहःकेलयः एकान्तक्रीडाः यमुनातीरे जयन्ति सर्वोत्कर्षेण वर्तन्ते। कथम्भूतयोः १राधामाधवयोः? प्रत्यध्वकुञ्जद्रुमं २अध्वनि ३मार्गे कुञ्जे लतागृहे द्रुमे ४वृक्षे च। ५इत्थं इति नन्दनिदेशतो नन्दाज्ञया चलितयोः ६प्रस्थितयोः। यद्वा अध्वकुञ्जद्रुमान् प्रति उद्दिश्य चलितयोः। ७इतीति किम्? हे राधे। अम्बरमाकाशं मेघैर्मेदुरं ८सान्द्रं व्याप्तमित्यर्थः। वनभुवः ९तमालद्रुमैः तमालवृक्षैः श्यामाः। अयं कृष्णः नक्तं रात्रौ१०भीरुर्भयशाली अतिबालत्वात्। ११तत्तस्मात्कारणात्त्वमेव इमं पुरोवर्तिनं कृष्णं१२गृहं १३नय। १४एवकारेण नन्दस्यास्मिन् विश्वासाभावः सूचितः।।१।।

१.नास्ति-ज. २.भयोक्तिः-ग.फ. ३.गहिं-ब. ४.श्यामोऽप्यहं सुखं व्रजमीति भावः-अ.ब.५.लक्षणेत्थंभूतेत्यनेन-इ.फ.ग.ह.ज. ६.गौरत्वात्-अ. ७.जते चेति-ब. वृते चेति-फ.८.भीरुः स्यात्कातरे पुंसि कामयानयेति योष्विति-महोदधिः-अ. भीरुः स्यात्कातरपुंसि कामयाने त्रिषु स्त्रियामितिमहोदधिः-ब. ९.नास्ति-फ. १०.इति विश्वोऽपि-ब. इत्यपि-फ.ग.ह.ज. ११.अप्रसूताङ्गनायाञ्च तथा सोमलतौषधौ। त्रिवृताशारिबागुन्द्रानिशाकृष्णप्रियंगुषु।। इत्येव विश्वकोशे दृश्यते। १२.श्रेष्ठे नवरसालोदके पनेतरि-अ. वरःश्रेष्टे नवरसे स्वादके परिणेतरि-फ. १३.नास्ति-फ. १४.भूः प्रकारे वसन्नायाम्-फ.ग.ज. भूःप्रकारे वसत्तायाम्-ह. १५.?१६. वाक्यमिदं नास्ति-ग.फ. १७.नास्ति-फ. १८.मासः-फ. १९.नास्ति-फ.२०.अस्मात्पूर्वं वक्रतुण्डेत्यादि विघ्नेश प्रार्थनाश्लोको दृश्यते-ल.म.२१.इतः पूर्वमधोलिखितः श्लोको दृश्यते क पुस्तके-पिपासूनां भक्तियोगात् श्रीकृष्णचरितामृतम्। लिख्यते जयदेवेन गीतगोविन्द पुस्तकम्।। २२.प्रारम्भितस्य-क प्रारीप्सिताविघ्न-ल.म.२३.निर्विघ्नेन-क.२४.पदत्रयमिदं नास्ति-ल.म.

**(९) कृष्णपण्डितकृत- जयन्ती**

श्री गुरुभ्यो नमः।

श्री सरस्वत्यै नमः। निर्विघ्नमस्तु ।।

।।१ ।। हे राधे अम्बरं आकाशं मेघैः जलदैः मेदुरं व्याप्तम्। जातमिति शेषः। वनभुवः काननभूमयः तमालद्रुमैः तमालवृक्षैः श्यामाः कृष्णवर्णाः। नक्तं निशायां, अयं कृष्णः भीरुः भयशीलः। यद्वा नक्तम्भीरुः (१) रात्रिकाले भीरुः भयशीलः, दिवा न बिभेतीत्यर्थः। तत्तस्मात् कारणात् भयानकमेघादिसमृद्धेः त्वमेव;। इतरानपेक्षायामेवकारः। इमं भीरुं कृष्णं गृहं निवासस्थानं प्रापय णिच्। इत्थं उक्तप्रकारेण नन्दस्य गोपाधिपस्य निदेशतः आज्ञातः चलितयोः प्रापणीयप्रकारतया प्रस्थितयोः राधा राधाह्वगोपी मधोर्गोत्रापत्यं पुमान् माधवः, मायाः लक्ष्म्याः धवो वा कृष्णः, तयोः रहःकेलयः सुरतक्रीडाः आश्लेषचुम्बनादयः। अध्वनि कुञ्जाः लतादिपिहितोदराश्च ते द्रुमाश्च वृक्षाः तेषु तेषु प्रत्यध्वकुञ्जद्रुमम्। यमुनाकूले यमुनातीरे जयन्ति उक्तप्रकारेण वर्धन्ते। (अत्र) वस्तुनिर्देशाख्यं ग्रन्थमुखम्। 'आशीर्नमस्क्रियावस्तुनिर्देशो वाऽपि तन्मुखम्' इति [१]**काव्यादर्शात्** (१-१४)। उत्कृष्टत्वात् क्रीडाः रक्षन्त्वित्याशीः। तादृशक्रीडाशालिनं नमस्कुर्म इति नमस्कारश्च[२] चाक्षेपाल्लभ्यते ग्रन्थमुखतः। अत्र मेघानां बाहुल्येन चन्द्रनक्षत्रप्रकाशरोधात् वनभूमीनां अन्धकारवत्त्वं तेन च पान्थानाम् असञ्चारः। सञ्चारेऽपि अन्धकारवशात् तत्रत्यक्रीडापराणां परानवलोकनं व्यज्यते। एवं रात्रेरपि गमकत्वम्। मेघरात्र्योरुद्दीपनविभावत्वम्। परस्पररते राधाकृष्णयोरालम्बन-विभावत्वम्। भीरुरित्यनेन कालासहिष्णु (त्व) रूपमौत्कण्ठ्यं विरहत्रासश्चेति सञ्चारिभावौ। चलितयोरित्यनेन तदनुसरणभावः। एवं विभावानुभावव्यभिचारि-संयोगाद्रसनिष्पत्तिः इति **भरतसूत्रोक्तेः (नाट्य-शा. ६.३२.३)** शृङ्गाररसो निष्पद्यते।

विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।
आनीयमानः स्वादुत्वं स्थायीभावो रसः स्मृतः।। (द.रू.४.१)

इति राधाकृष्णयोः परस्परं रतिरूपस्थायिनः ज्ञायमानत्वात् शृङ्गारो रसः।

रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः।। **(सा.द.३.१८५)**

शृङ्गारहास्यकरुणवीररौद्रभयानकाः।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः।। (सा.द.३.१८२)

इत्यादिस्थायिकाः शृङ्गारादयो रसा भवन्तीति प्रकृते रतिस्थायिकः शृङ्गाररसोऽत्र। मेदुराम्बरस्य तमालच्छन्नभूमीनां च रात्रिकालस्य भीरुत्वस्य च प्रत्येकं गृहप्रापणीयत्वे हेतुत्वात्समुच्चयालङ्कारः। राधाया अनूढत्वेऽपि तदधीनतया परकीयात्वम्। स्वीयासामान्याभोगापेक्षया परकीयाभोगः परमानन्दहेतुरिति। ईषत्समासवत्वाद्वैदर्भीरीतिः प्रसादो गुणः।।

अत्र केचित्-माधवस्य भीरुत्वेन प्रापयेत्यनेन च कट्यारोहणानयनमिति शिशुत्वम्। राधायाश्च प्रौढ़ात्वेन ज्यायास्त्वमिति रसाभासतामाशङ्क्य तत्परिहारमेवं व्याचख्युः। तथा च, इत्थं पूर्वोक्तप्रकारेण नन्दनिदेशतः समीपादिति माधववचनमेव। अयं माधवः। विरहनिर्विण्णतयाऽहङ्कार - भङ्गादस्मच्छब्दस्थाने इदं शब्दप्रयोगः। इमं मां गृहं प्रापय गृहिणीत्वमेव प्रापय। गृहिणी गृहमुच्यते इति न्यायेन त्वमेवात्मानं गृहिणीं कुर्वितेति भावः। एवं वक्तृ बोद्धव्यवैशिष्ट्याद् गृहमिषेण क्रीडार्थमेव गन्तव्यमिति व्यज्यते। इदमन्येषाम्। माधवस्य तु भगवदवतारत्वेन नानारूप - विभूतिमत्त्वं प्रकटितमेव। एवञ्च माधवः नन्दयशोदयोर्बाल एव दृश्यते। गोपिकानामुद्यद्यौवन एवेति नन्दस्य बालकवद्भानं राधायां ज्यायस्त्वभानं न राधामाधवयो रसाभासापादकमिति। शार्दूलविक्रीडितं वृत्तम् ।।१ ।।

१. अलंकारसर्वस्वात् इति जयंती. २. श्चाक्षेपलभ्य इति ग्रंथ मुखतः-च.१.नास्ति-ड २.३.नास्ति-ल.म.४.वृक्षे च इत्यर्थः-क.५.नास्ति-क.६.नास्ति-ड.क.७.इतीनि किम् नास्ति-ल.म.८.नास्ति-ड.९.तमालद्रुमैःनास्ति-क.१०.भीरुर्भयनाशीलः बालत्वात्-क. भीरुरयं बालत्वात्-ल.म.११.तस्मात्कारणात्-क.१२.नास्ति क.ल.म.१३.नास्ति ल.म.१४.एवंकारेण नन्दस्यान्यस्मिन् विश्वासाभावः सूचितः-ड.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

मङ्गलाचरणम्

।।श्रीहलिने नमः।।

।।१।। वसानं नीलवसनं कुन्देन्दुधवलं बलम्।
अहं करीन्द्रपारीन्द्रं वन्दे बृन्दारकस्तुतम्।।१ ।।
आस्ते हृदि यदि वाञ्छा बोद्धुं तत्त्वेन गीतगोविन्दम्।
शृणु जनरम्यामेतां सर्वाङ्गसुन्दरीटीकाम्।।२ ।।

महाकाव्योपक्रमे आशीर्नमस्क्रियावस्तुनिर्देशो वा क्रियत इति कविसम्प्रदायः। अत एव जयदेवोऽपि तथैव निबन्धं विधित्सुराह - मेघैरिति। पक्षत्रयमत्र सम्भाव्यते। जयन्तीति पदोपन्यासादाशीः ज्ञेया, आशिषि लो(ल)टो विधानात्। जयन्तीत्यनेन च

नमस्कार आक्षिप्यते इति काव्यप्रकाशोक्तेरत्र जयन्तिपदेन च नमस्क्रिया। अत्र ग्रन्थे विष्णुरेव नायक उपलक्ष्यते। तस्य प्रागुपन्यासाद्वस्तुनिर्देशोऽपीति पक्षत्रयं प्रतिपादितम्। राधामाधवयोर्यमुनाकूले प्रत्यध्वकुञ्जद्रुमं रहःकेलयः निर्जनस्थानक्रीडाः जयन्ति सर्वोत्कर्षेण वर्तन्तामित्यर्थः। ''जयो नामाभिभवः स्वीकार उक्तर्षश्चेति'' वृत्तिकृत्। तत्राद्ययोः द्वयोः सकर्मको नेतरत्रेति नात्र सकर्मकः। यश्च सर्वोत्कृष्टः कस्तं न नमतीति। जय(जयन्त्य)त्यर्थेन नमस्कार आक्षिप्यते। ततो मुख्यार्थबाधेनार्थान्तर-प्रक्रमितवाच्यव्यङ्ग्यस्वरूपाः नमस्कारार्हाः। प्रथमानयोः राधामाधवयोः रहःकेलयः इत्यर्थः। तेन रहःकेलिं प्रति प्रणतोऽस्मीत्यर्थः सम्पद्यते। राधामाधवयोः केलिख्यापनेन कवेरतितरां देवविषया रतिर्भावरूपा ध्वनिता। तथा च, ''रतिर्देवादिविषया भाव इत्यभिधीयते। तेनासंलक्ष्यक्रमव्यङ्ग्यो ध्वनिरिति मन्तव्यः।।'' इति। निर्भरकेलिप्रति-पादनार्थमत्र रहश्शब्दोपादानम्। प्रत्यध्वकुञ्जद्रुममिति। अध्वकुञ्जद्रुमं लक्षीकृत्येत्यर्थः। कुञ्जेनोपलक्षिताः द्रुमाः कुञ्जद्रुमाः, अध्वनः कुञ्जद्रुमाः अध्वकुञ्जद्रुमाः इति षष्ठीसमासः। यत्र यत्र कुञ्जद्रुमाः तत्र तत्र केलयः प्रवृत्ता इति वीप्सायां समासो वा। राधामाधवयोरिति। राधा च माधवश्च इति द्वन्द्वः। क्वचिदनभ्यर्हितस्यापि पूर्वनिपातः स्यात्, प्रायिकं चैतत् सर्वमित्युक्तेः। यद्वा शृङ्गाररसप्रधानमिदं काव्यम्। तत्र च स्त्रिय एव प्रधानमिति युक्त एव राधायाः प्राङ्निपातः। यमुनाकूले कथं तयोर्मेलनमित्याशङ्क्य तावेव विशेषयन्नाह - इत्थमिति। अनेन प्रकारेण नन्दगोपशासनात् चलितयोर्गृहं प्रस्थितयोरित्यर्थः। कः पुनरसौ ? नन्दनिदेशत इत्याह। हे राधे! तस्मात्त्वमेव इमं कृष्णं गृहं प्रापय। एवकारोऽवधारणे। त्वय्यैवायं जातविश्वासस्त्वयैव नीयमानो गमिष्यतीति भावः। तस्मादिति। कस्मात्? यस्मात् अम्बरं मेघैर्मेदुरं कालिममहः संयुक्तम्। यद्यपि 'ञिमिदा स्नेहने' इत्यस्य धातोः स्नेहः अर्थस्तथापि कविसम्प्रदायसिद्ध्या मेदुरशब्दस्य कालिममहः संयुक्तत्वमर्थः। तथाह्युपरिष्टादस्यैव कवेः प्रयोगो मेदुरमुदिरसुवेशमिति। तमालद्रुमैर्वनभुवः श्यामाः भवत्वेतत् तथाप्यत्रैव तिष्ठतु कृष्णः, किमर्थं गृहं प्रापणीय इति चेत्तत्राह - नक्तं भीरुरयमिति। नक्तमिवेति गम्यमानोपमया भिन्नपदम्। तेन रात्राविव भीरुरयमित्यर्थः। दुर्दिनतया सूर्यालोकस्य तिरोधाने सति नैशमिवान्धतमः सञ्जायते। मेघैस्तमालद्रुमैश्च प्रादुर्भावितं गगनकाननतलयोः कालिमानमालोक्य बालत्वाद्दिवापि रात्रिमाशङ्कमानो बिभ्यदयं कृष्णो गृहं जिगमिषुरिह न हि स्थातुमर्हति; तस्मादेनं गृहं नयेत्यर्थः। किं वा हे राधे! यतः कार्याकार्यानविचार्य नक्तं रात्रौ भीरुर्भयालुरयं कृष्णस्त्वयैतावद्दूरमानीतः तस्मात्त्वमेव

इमं गृहं नयेति कोपाविष्कारार्थः। एवकारः कोपाविष्कारे। कोपाविष्कारश्च राधे! इत्याक्षेपः सम्बोधनपदेनैव लभ्यते। ''न पुनर्वत्से पुत्रि मातरित्यादिना'' इति। दिवापि रात्रिशङ्का। मेघैर्मेदुरमित्यादिना पूर्वं प्रतिपादितं नक्तं भीरुरयं[१] त्वमेव तदिममित्यत्र इममिति इदमर्थे इदंशब्दस्य रूपम्, अन्यथा एनादेशः स्यात्।।१ ।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।१ ।।श्रीराधाकृष्णाभ्यां नमः

श्रीचैतन्यकृपासीधुकणोन्मत्तेन केनचित्।
टीका संगृह्यते गीतगोविन्दस्य समासतः।।
स्वयं बोद्धुमभिप्रायं जयदेवमहामतेः।
क्रमेणोपक्रमादेषा ग्रथ्यते बालवोधिनी।।
अत्र व्याकरणादीनां ग्रन्थवाहुल्यभीतितः।
विवृतिर्न कृता सा तु ज्ञेया ग्रन्थान्तरे बुधैः।।
बोद्धव्यो बालवोधिन्यां शब्दार्थः शब्दवेदिभिः।
भावार्थदीपिकायां च भावो भावार्थलोलुपैः।।

अथ श्रीराधामाधवयोर्विजनकेलिवर्णनमयं श्रीगीतगोविन्दाख्यं प्रबन्धमारभमाणस्तत्र तयोः सर्वोत्तमतां निश्चिन्वानः श्रीमान् जयदेवनामा कविराजस्तमालवनतमःपुञ्जकुञ्ज सदनाद्वहिः स्थितयोस्तत्र प्रवेशाय गदित श्रीराधासखीवचनमनुस्मरन् तदेव मङ्गलमाचरिति। तद् बर्ण्णनमयत्वात् प्रवन्धोऽयं मङ्गलरूप इति च तं विज्ञापयति मेघैरिति। श्रीराधामाधवयोः रहः केलयो जयन्ति सर्वोत्कर्षेण वर्त्तन्ते। श्रीकृष्णस्य स्वयं भगवत्त्वेन सर्वावतारेभ्यः श्रेष्ठत्वात्। श्रीराधिकायाश्च सर्वलक्ष्मीमयत्वेनास्य सर्वप्रेयसीभ्यश्च श्रैष्ठ्यात्। यथोक्तं श्रीसूतेन, 'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्' इति। तथा च **वृहद्गौतमीये**, 'देवी कृष्णमयी प्रोक्ता राधिका परदेवता। सर्वलक्ष्मीमयी सर्वकान्तिः संमोहिनी परा' इति। अतएवामुं ममोद्यमं बिघ्नान् विधूय संपादयिष्यन्तीत्यर्थः। भगवतः स्वरूपशक्तिवृत्तिविशेषत्वात् केलीनां जयकर्त्तृत्वं युक्तमेव। उत्कर्षप्रतिपत्तिरेव जयतेरर्थः। सर्वोत्कर्षप्रतिपत्तावकर्मकः जयति रघुवंशतिलक इति वत्। क्व जयन्ति? यमुनाकूले। किं लक्ष्यीकृत्य? प्रत्यध्वकुञ्जद्रुमं कुञ्जोपलक्षितो द्रुमः कुञ्जद्रुमः अध्वनः कुञ्जद्रुमोद्धऽध्वकुञ्जद्रुमस्तं लक्ष्यीकृत्य तत्रेत्यर्थः। कीदृशयोः? इत्थमनेन प्रकारेण नन्दयतीति नन्दः स चासौ निदेशश्चेति सः नन्दनिदेशः श्रीराधिका सखी वचनं तस्माच्चलितयोः निदेशमेवाह हे

राधे! यतोऽसौ नक्तं पूर्वरात्रे भीरु: त्वां विहायान्याभि: कृतनृत्यगीताद्यपराधतया भीत: त्वत्कृतवहुनायिका वल्लभतारोपणाशङ्की तस्मात्त्वमेवेमं त्वन्निमित्तानुभूतमर्मवोधं श्रीकृष्णं गृहं मञ्जुतरेति बक्ष्यमाणं केलिसदनं प्रापय, पुर: केलिसदनमनुसरन्ती एतस्य केलिसदनप्राप्तावनुकूला भवेति। अथवा त्वमेवेमं गृहं प्रापय गृहस्थं कुरु त्वयैवायं गृहिणीमानस्त्वित्यर्थ:। एवकारेण समावधारणेन अस्यैव भार्या भवितुं रुक्मिण्यर्हति नापरेति कुण्डिनवासिजनानां रुक्मिणीदेवीं प्रति आशीर्वचनमिव त्वमेव अस्य भार्या भवेत्याशी: सूचिता। 'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते' इत्युक्ते:। ज्योत्स्नावत्यामस्यां जनाकुलायां मया कथमसौ प्रवेशनीयस्तत्र समयानुकूल्यमाह - मेघैरम्बरमाकाशं मेदुरं स्निग्धं आच्छादितमित्यर्थ:। तस्य प्रियामिलनेच्छोद्भूतमेघावृतश्चन्द्र इत्यर्थ:। वनभुवश्च तमालद्रुमै: श्यामा निविड़ान्धकारेण नैव लक्षिता: ततोऽत्र न कापि शङ्केत्यर्थ:। एतदन्तरमेवैतल्लीलावसरे सापीदं बक्ष्यति अक्ष्णोर्निक्षिपदञ्जनमित्यादिना। 'ततो विशन् वनं चन्द्रज्योत्स्ना यावद्विभाव्यते। तम: प्रविष्टमालक्ष्य ततो निववृतु: स्त्रिय:' इति **शुकोक्तिवत्**। जयत्यर्थेन नमस्कार आक्षिप्यते इति काव्यप्रकाशोक्तेन नमस्क्रिया सूचिता ।श्रीराधामाधवयो: रह: केलयोऽत्र प्रतिपाद्या:। अतो बस्तुनिर्देशोऽपि । एवं पक्षत्रयप्रतिपादनैर्महाकाव्यमुख्यत्वमुक्तम्। **काव्यादर्शे,** सर्गबन्धं महाकाव्यमुच्यते तस्य लक्षणं आशीर्नमस्क्रिया वस्तुनिद्देशो वापि तन्मुखमिति। राधामाधवयोरित्यनेन तयोरन्योन्या व्यभिचारिविद्योतमानता सूचिता। यथोक्तं **ऋक्परिशिष्टे** 'राधाया माधवो च देवो माधवेनैव राधिका' इत्यादि। राधामाधवयोरित्यत्र समासेन तयो: पारस्परिकविद्योतमानता च व्यज्यते। शृङ्गाररसप्रधानं हि काव्यं शृङ्गाररसे स्त्रिया एव प्राधान्यं इति श्रीराधाया: प्राङ्निर्देश:।।१ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१ ।।अन्योन्यप्रेमपीयूषास्वादनात्तृप्तमानसौ।
हृदि मे स्फुरतां नित्यं राधामदनमोहनौ।।१ ।।

मद्विधदुर्विधबन्धु: स जयति नीलाचलेन्द्रपूर्णेन्दु:।
येनाऽहं बहुकृपया निजांघ्रिसेवामृतै: पुष्ट:।।२ ।।

संसारदवसंतप्तं स्वप्रेमरसवर्षणै:।
विश्वमाप्यायितं येन तं चैतन्यघनं नुम:।।३ ।।

इयं श्रीगीतगोविन्दटीका रसिकरङ्गदा।
मया संगृह्यते नीलशैलचन्द्रांघ्रिसेविना।।४ ।।

पूर्वैर्विरचिंता यास्तु टीका: सर्वार्थबोधिका:।
ताभ्य: सारं समाकृष्य ग्रथ्नाम्यत्र यथारुचि ।।५।।
नाहं व्याकृतिवेत्ता नापि च भावार्थभावनाभव्य:।
नैवालंकृतिकुशलस्तथापि केनापि लिखामि लोभेन।।६।।
रमन्तामत्र सुधिय: क्षमन्तां मम चापलम्।
तुष्यत: पितरौ यद्वद् बालस्य कलभाषणे।।७।।

अथ श्रीमान् परमभागवत: सकलसहृदयमुकुटमणिर्जयदेवनामा कविराजराज: परमरसरूपयो: दिव्यादिव्यादिसकलनायिकानेत्रमौलिमण्डनभूतयो: नित्यलीलयो: श्रीराधामाधवयो: परमाश्चर्यमाधुर्य- मयलीलामृतं रसं तत्तत् शास्त्रेभ्य: स्वयमास्वाद्य तदास्वादनोच्छलितानन्दपुर: परिप्लावितान्त:करणतया उद्यत्कारुण्यपारवश्येन एवाधुनिकरसिकभवतजनान् तमास्वादयितुं तत्तत् लीलारसमयं श्रीगीतगोविद्याख्यं प्रबन्धं विधातुकाम: तन्निर्विघ्नपरिसमाप्तये मुख्यतया ग्रन्थप्रतिपाद्यं वस्तूपक्षिपन् एव तन्निर्देशरूप- मङ्गलमाचरति।

मेघैरिति। अत्र मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्त इति न्यायेन ''वर्णं गणं च काव्यस्य मुखे कुर्यात् सुशोभनम्'' इति काव्यादिपदादौ गुरुत्रयात्मको 'म' गण: यत् प्रयोजित: तत् साधु । 'म' गणस्य माङ्गलिकत्वात्। उक्तं च 'डर्वी मस्त्रिगुरु: श्रियं वितनुत' इति। तथा आदौ प्रयुक्तस्य 'म' वर्णस्य भयमसुखमरण- क्लेशदाहान् 'प'वर्ग: क्रमात् कुरुत इति दोषावहत्वेऽपि श्रीजयदेवस्य महानुभावात् उत्खातदंष्ट्रसर्पवत् अकिञ्चित्करत्वेन न दोषाधायकत्वमिति प्राञ्च:। तथोक्तं **कविकण्ठपाशै**, ''जगदुदय- स्थितिविलयमहिता: खलु लोकविख्याता:, शापानुग्रहकुशला देवा ऋषयो नरा ये वै''। तेषामीश्वरसादृश्यं काव्यग्रन्थनेन लक्षणं यस्मात्। न प्रत्यवायदोष:, तेषां तेजो विशेषेणेति । राधामाधवयों राधा हरिवल्लभाग्रगण्या श्रीवृषभानुकन्या। यथोक्तम्-

''यथा राधा प्रिया विष्णो: तस्या: कृष्ण: प्रियस्तथा।
सर्वगोपीषु सैवेका विष्णोरत्यन्तवल्लभा'' इति।

माधव: मधुवंशोद्भव: स्वयं भगवान्श्रीनन्दनन्दन:। तयो: यमुनाकूले कालिन्द्यास्तटे प्रत्यध्वकुञ्जद्रुमम्, अध्वनि सङ्केतवसतिगमनमार्गे ये कुञ्जा: द्रुमाश्च तान् प्रति तान् लक्ष्यीकृत्येत्यर्थ:। प्रत्यध्वं प्रतिकुञ्जं प्रतिद्रुममिति वा। रह: केलय: शृङ्गारक्रीडा जयन्ति। उत्कर्षप्रतिपत्तिरेव जयतेरर्थ:। तत्र सर्वोत्कर्षप्रतिपत्तावेवाकर्मकत्वम्। अत:

सर्वोत्कर्षेण प्रवर्त्तते इत्यर्थ:। ''जयति जननिवास:'' इत्यादिवत् । लट्प्रयोगेण लीलानां नित्यता सूचिता ।

श्रीकृष्णस्य स्वयं भावत्त्वेन सर्वेभ्योऽवतारेभ्य: श्रैठ्यात् तथा श्रीराधाया: सर्वलक्ष्मीमयत्वेन तस्या: सर्वप्रेयसीभ्य: श्रैष्ठ्याच्च तत्केलीनामपि सर्वकेलिभ्य उत्कर्षवत्त्वं सिद्धमेव। अत एव मदभीष्टं विघ्नात् विधूय सफलयिष्यतीति भाव:। तस्य स्वयं भगवत्त्वं यथा श्रीभागवते ''एते चांशकला: पुंस: कृष्णस्तु भगवान् स्वयम्'' इति। तस्याश्च सर्वलक्ष्मीमयत्वं यथा बृहद्गौतमीये-''देवी कृष्णमयी प्रोक्ता राधिका परदेवता, सर्वलक्ष्मीमयी सर्वकान्ति: सम्मोहिनीं परा'' इति राधामाधवयोरिति द्वन्द्वसमासस्य उभयप्राधान्येन द्वयो: पारस्परिकविद्योतमानता सूचिता। तथोक्तम् ऋक् परिशिष्टे-

''राधया माधवो देवो माधवेनैव राधिका। विराजते जनेषु इति।''

काव्यमिदं शृङ्गाररसप्रधानम्। शृङ्गारे स्त्रिय एव प्राधान्यादत्र राधाया: पूर्वनिपात:। यमुनाकूल इति सैकतवेदिका कन्दुकखेलादिप्रसङ्गसञ्जातप्रथमा-वलोकनेनाङ्कुरितस्य वृन्दावन गोचारणलीलासमयवादित्रवेणुनिनादाकर्णनकौतुक-सव्रीडमन्दहसितव्यञ्जितभावानुबन्धिद्वितीयदर्शनेन पल्लवितस्य कुमारिकाजनो-चितगौरीव्रताचरणायमुनावगाहनसमयतीरस्था पिताम्बरयाचनापदेशेन नर्मालापपूर्वं जलनिविडित- सर्वाङ्गीणलावण्यावलोकनेन कुसुमितस्यानुरागस्य ततो दुर्विसहविरह-संतप्ततया क्वचिदपि स्थातुमशक्तवत्यास्तीरवानीरकुञ्जकुसुमशयनीयमानीताया: श्रीराधायास्तथा क्वाऽपि निवृत्तिमलभमानस्य प्रथम तदवलोकनादिसुभगप्रदेश-दर्शनेनात्मानं विनोदयितुमागतस्य श्रीकृष्णस्य च। चतुर तुरसखीविरचितसङ्गम-फलस्यापि सम्पादकतया द्वयोरपि कालिन्दीरोधस: स्पृहणीयत्वं सूचितम्। प्रत्यध्वकुञ्जद्रुममिति,

अदृष्टे दर्शनोत्कण्ठा दृष्टे च स्पर्शलालसा।
स्पृष्टेऽपि सेर्ष्या वाम्यं च चित्रमासां विचेष्टितम्।।

इति स्वाभाविकवाम्योदयात् विनोदकौतुकात् वा क्वाऽपि निलीनायां राधायां तदन्वेषणव्यग्रतया क्वचित् मार्गे हंसपदपङ्क्तौ तच्चरणविन्यासधिया लतागृहमुपेत्य तत्र तदविलोकेन क्व गतेति विचारयत:, पुन: अन्यत: कलविहङ्गकुलकाकलिं तत्कङ्कणझणत्कारमाकलय्य कुञ्जान्तरमनुविशत: क्वचन द्रूमे कोकिलकलं तदालापमवकलय्य तं प्रति अनुधावत: क्वचन च प्रदेशे विकसत्प्रसूनपरीत चम्पकलतां

सेयमुपलब्धा गौराङ्गीत्युपसर्पतः पुनरन्यत्र पवनापहृते पद्मिनीपरिमले तदङ्गसौरभभ्रमेण भृङ्गवदितस्ततः भ्रमतस्त- दलाभकृतास्थानचण्डरुदितप्रलपितादिविविधावस्थामनुभवतो माधवस्य, राधाया अपि विरहकातरतया क्वचिदपि चिरं निलेतुमपारयन्त्याः सर्वेऽपि कुञ्जमहीरुहादयः उद्वेजका आसन्।अतो मिलितयोस्तयोरन्योन्य- प्रेमशृङ्खलिततया एवैकमपि हातुमशक्तवतोः विविधलीलाप्रवृत्तिकतया कुञ्जमहीरुहादिस्थलीनां सङ्केतवसतिरिति भावः समुचित एवेति भावः। 'रहः केलय इति'। शृङ्गारस्य परिकरेर्ष्यामानादिविविधत्वेन बहुत्वनिर्देशः। तयोः सङ्केतवसतिप्राप्तौ हेतुगर्भविशेषणम्। किम्भूतयोः इत्थं नन्दनिदेशतश्चलितयोः, इत्थमनेन प्रकारेण नन्दयतीति नन्दः, स चासौ निदेशश्चेति। किम्बा नन्दनीयः श्लाघनीय आशसंनीय इति यावत् द्वयोरभिलषणीय इत्यर्थः। तादृशो यो निदेशः। प्रकरणात् सखीवचनमिति लभ्यते। तस्मात् चलितयोः केलिसदनं प्रति गतयोरित्यर्थः। नन्द इति नन्दयतेर्णिजन्तात् 'कर्त्तृकर्मणोरेवेत्यच्' प्रत्ययः अत्रैवमनुसन्धेयः। एकदा-

''अहेरिव गतिः प्रेम्णः स्वभावकुटिला भवेत्।
अतो हेतोरहेतोश्च यूनोर्मान उदंचति''।। इति न्यायात् हेतुं विना एव उत्पद्यमान ईर्ष्यामानवशीकृतमनस्तेन विरहितयोः ततः क्षणमपि विरहितोपमसहमानयोः परस्परदर्शनोत्कण्ठया केनाऽपि व्याजेन निजनिजगृहात् निर्गत्य पूर्वसङ्केतं वसतिभूतलता-कुञ्जबहिःप्रदेशे यमुनारोधसि सञ्चरतोः तयोः केलिसदनप्रवेशाय कृतयत्नाया वृन्दायाः निदेशेन एवं कुञ्जसङ्गमनमिति। निदेशप्रकारमाह; हे राधे! श्रीकृष्णाकांक्षितसाधिके। विलासवैदग्ध्यादिभिस्तदाराधनपरे इति वा। यस्मादयं ते प्रियतमो नक्तं(१) पूर्वरात्रौ भीरुः त्वां विना अन्याभिः सहकृतवसन्तोत्सवनृत्यादिजनितापराधोदितभययुक्तस्तस्मात् त्वमेव इमं त्वन्निमित्तानु- भूतबहुविधमन्मथव्यथं गृहं मञ्जुतरमिति वक्ष्यमाणानुसारेण केलिसदनरूपं कुञ्जं प्रापय। पुरः प्रविशन्ती अस्य केलिसदनप्राप्तौ अनुकूला भव इत्यर्थः। कारिषोग्निर्माणवकमध्यापयतीतिवत्णिजर्थो बोध्यः। अत एव-

''वह्निसन्तापतो नश्येत् वह्निसन्तापजो व्रणः''

इति न्यायात् प्रेमालापमन्त्रोच्चारणपूर्वकस्वाधरामृतरसायनार्पणैस्त्वज्जनितभयमस्य त्वमेव निष्कासयेति ध्वनितम्।

ननु ज्योत्स्नावत्यां कथमेवं करोमि इत्यत आह; मेघैरम्बरमाकाशं मेदुरं स्निग्धमाच्छादितमित्यर्थः। प्रियामिलनेच्छोर्भगवतो लीलायोगाय तत्क्षणमेव आविर्भूत-मेघावृत्तचन्द्रमिति ज्ञेयम्। न तु मेघैरिति वर्षासूचकैः अग्रे वसन्तसमयस्य उपक्षिप्तत्वात्।

क्रियमाणरासक्रीडायामननुकूलत्वाच्च। समययोग्यतामुक्त्वा स्थानयोग्यतामाह; वनभुव: विपिनप्रदेशा: तमालद्रुमै: तापिच्छतरुभि: श्यामा: नीलवर्णा: गाढान्धकारैरलक्षिता इत्यर्थ:। अतोऽत्र निवृत्तजनसंचारत्वान्न काचित् प्रतिबन्धशंकेति भाव:। अत्र रह: केलयो जयन्तीति सर्वोत्कर्षप्रतिपादकजयन्त्यर्थेन ''चौर्यरतं हि कामिनामुत्कण्ठा विनोदस्थानम्, नात: परं रागिणां किञ्चित् उत्कर्षाधायकमिति व्यज्यते। उक्तं च उज्ज्वलनीलमणौ'',

''अत्रैव परमोत्कर्ष: शृङ्गारस्य प्रतिष्ठित'' इति।

तथा चोक्तं भरतेन-

''बहु कार्यते यत: खलु यत्र प्रच्छन्नकामुकत्वं च।
या च मिथो दुर्लभता सा परमा मन्मथस्य रति:'' इति।

विष्णुगुप्तसंहितायां च-

यत्र निषेधविशेष:, सुदुर्लभत्वं यच्च मृगाक्षीणाम्।
तत्रैव नागराणां निर्भरमासज्जते हृदयम्'' इति।।

अत्र यत्तु गौणत्वचिन्तनं तत्प्राकृतनायिकानेतृविषयम्, न चाप्राकृतलीला-विषयम्।

उक्तं च उज्ज्वलनीलमणौ-

लघुत्वमत्र यत् प्रोक्तं तत्तु प्राकृतनायके।
न कृष्णे रसनिर्य्यासस्वादार्थमवतारिणि।।
नेष्टा यदङ्गिनि रसे कविभि: परेण,
तद् गोकुलाम्बुजदृशां गणमन्तरेण।
आशंसयारसविधेरवतारितानां,
कंसारिणा रसिकमण्डलशेखरेण।।

नाटकलक्षणे च-

यत् परेणोपपत्योस्तु गौणत्वं कथितं बुधै:।
तत्तु कृष्णं च गोपीं च विनेति प्रतिपद्यताम्।।

यत्तु नन्दपदस्य श्रीनन्दगोपे प्रसिद्धत्वात्तन्निदेशाभिप्रायं व्याख्यानं तदत्यन्त-रसापकर्षकत्वादुपेक्ष्यम्। तत्र श्रीराधापेक्षया श्रीकृष्णस्य भीरुत्वनिर्देशात् बालत्वप्रशक्त-वात्सल्यविषयत्वे संपन्ने शृङ्गारस्यातीव वैरस्यापत्ते:।

तदुक्तं श्रीरसामृतसिन्धौ-

''शुचेः सम्बन्धगन्धोऽपि केवले यदि वत्सले।
क्वचिद् भवेत् ततः सुष्ठु वैरस्यायैव कल्पते।।''

किंच च तत्रैव-

''बाल्येऽपि नवतारुण्यप्राकट्यं श्रूयते क्वचित्।
तन्नातिरसवाहित्वान्न रसज्ञैरुदाहृतम्'' इति।।

अत एव-

विरुद्धं खलु यद् वस्तु नायकस्य रसस्य वा।
तदन्यस्थापयेत् धीमानथ वा तत् परित्यजेत्।।

प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत् परा ''इत्यभियुक्तवचनं पुरस्कृत्य बालबोधिन्यादिटीकाकृद्भिः सखीवचनाभिप्रायेण एवं व्याख्यातम्। एतदेव कवेः स्वारस्यमिति स्पष्टमवगम्यते। अत्र ग्रन्थे द्वयोः सङ्गमे सखीवचनस्यैव सर्वत्रानन्दजनकत्वेन वर्णितत्वात्। ननु ब्रह्मवैवर्त्तीयमीदृग्लीलाचरितं श्रूयते, सत्यं, तदैश्वर्यकार्यपर्याकुलतया माधुर्यचर्योपजीविभक्तवर्येभ्यः रागप्राचुर्यमर्यादापर्याप्त्यभावात् प्रायो नाभिरोचते। यदैश्वर्यज्ञानशून्यत्वादेषां रागे प्रधानतेत्युक्तेः। अतः प्रस्तुतव्याख्यानमेवापेक्ष्यमिति। इममित्यत्र एकशब्दानुकथनमात्रेण इदम् एनादेशो न भवति। एष छन्दोऽधीते, एनमध्यापयेत्यादौ इव एकक्रियाप्रयोगाभावात् नात्रैनादेशः इति केचित्। प्रायशः एनादेशनियमं कवयो नाङ्गीकुर्वन्ति। ''अथैनमद्रेस्तनया शुशोचे''त्यादौ एकक्रियाप्रयोगाभावेऽपि तद्दर्शनात्। ''प्रह्लादनं ज्योतिरजन्यनेन'' इत्यादौ एनादेशस्य युक्तत्वेऽपि तद्दर्शनात्। अत्र 'गृहं प्रापय' इत्यनेन केलिगृहप्रापणेनास्य मनोरथं पूरयन्ती कृतकृत्या भवेत्याशीः च सूचिता। जयन्तीत्यनेन केलीः प्रति नतोऽस्मीति नमस्कारोऽपि व्यज्यते। स्वापकर्षबोधानुकूलः व्यापारविशेषो नमस्कार इति न्यायात्। 'रहः केलयः' अत्र प्रतिपाद्याः। अतः वस्तुनिर्देशश्च स्पष्टः इति पक्षत्रयप्रतिपादनैरस्य महाकाव्यमुख्यत्वमुक्तम्। यथा **काव्यादर्शे,**

''सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम्।
आशीर्नमस्क्रियावस्तु निर्देशो वाऽपि तन्मुख'' मिति।।

वृत्तं शार्दूलविक्रीडितम्। लक्षणम्;

सूर्याश्वैर्मसजस्ततः स गुरवः शार्दूलविक्रीडितम्।

पाको द्राक्षापाकः। द्राक्षापाकः स विज्ञेयो बहिरन्तः स्फुरद्रसः इति लक्षणम्।।१ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलताटिप्पणी

।।१ ।। वामे वाहुलतां निधाय हृदये काश्मीरकं मुद्रितं
ताम्बुलादिपुगीमुखेन कुरुते राधाधरपल्लवम्।
हास्ये चन्द्रछविः विपाण्डुररुचिः लास्ये स्फुटममृतम्
सोऽयं मे विदधातु वाञ्छितफलं राधाधवो माधवः।।१ ।।

प्रफुल्लनामा कविशास्त्रकारस्सन्मानसानां धुरिकीर्त्तनीयः।
निर्माय टीकां जयदेवगीते गोविन्दपादेऽर्पयतीह भक्त्या।।२ ।।

श्रीगीतगोविन्दरसामृतस्य टीका ह्यनेकाः प्रथिता धरित्र्याम्।
निर्माय च स्वर्णलताऽभिधानी सट्टिपर्णी धन्यजनो भवेऽस्मिन्।।३ ।।

अथास्मिन्निति; प्रसिद्धेऽस्मिन् संगीतेप्राणभूते राधादामोदरलीलाविलासकदम्बे श्रीपुरुषोत्तमपुरीस्थितैकस्य श्रीपुरुषोत्तमस्य प्रियतमे कविः श्रीजयदेवकृते श्रीगीतगोविन्दनामधेये महाकाव्ये किमपि समन्वयात्मकंः विचारः प्रकटयितुकामेन मया समासतः स्वर्णलतानामधेयाटिप्पणी विवुधानामानन्दवर्धनाय वितन्यते किञ्च श्रीराधाकृष्णयोरलौकिक प्रणयलीला ध्यानजन्य निःश्रेयसः फलप्राप्ति एकवृन्तगत फलद्वय न्यायेन परमपद लाभोपि भवेदिति सम्बन्धः। टिप्पणीकारस्य वंशपरिचयः ग्रन्थान्ते कथयिष्यते।

मेघेति; अथ चुम्बनशिल्पकलाभिज्ञस्य शृङ्गाराध्यापकस्य रतिपण्डितस्य राधाकुचकुम्भध्यान- शीलस्य राधा-वदनचन्द्रिका-जपमानस्य विरहव्याधिना पीडितस्य सामोद-दामोदरस्य यमुना - कूल –वानीरकुञ्जजन्य राधामाधवयोः रतिकेलिः नन्दकर्त्तृककृष्णं गृहे प्रापणजनित-निदेशव्यापारनिष्ठया राधया साकं मेघबाहुल्या-काशस्तथा तमालसान्द्रानीलवृक्षकदम्बे या रहः केली गोपनक्रीडा तद् वर्धतां नाम विजयविमण्डितां नाम जयप्रभाप्रतिष्ठां लभतामिति मङ्गलाचारः। आशीर्नमस्क्रियावस्तु-निर्देश वापि तन्मुखमित्यत्र दहेलीदीपकन्यायेन प्राप्तमङ्गलाचारस्य वस्तुनिर्देशत्वात् राधामाधवयोः यमुनातीरे रहः केली वर्णयिष्यते इति विषयः। पुनःद्वितीयश्लोके अन्वयः कथयिष्यते। सम्बन्धस्तु चतुर्थश्लोके हरिस्मरणस्तथा विलासकलासु कुतुहलमिति देहलीदीपकन्यायेन प्रयोजनद्वयं प्रस्तौति। अथ च तथाभूताः काव्यकोविदः विलासकलाविदः किञ्च रसिकाः सुकुमारमतयः तन्मयीभवनयोग्याः सहृदयास्तत्र अधिकारिण इत्यनुबन्धचतुष्टयः कल्प्यते। मेघस्तमालयोः पुनः यमुनायाः श्रीकृष्णस्य च सकलमन्धकाररूपं रहः केलिनिमित्तमनुकूलं भवति। श्रीजयदेवः खलु ध्वनि-धुरन्धर –कविरासीत्। असौ वाच्य-लक्ष्य-व्यङ्गयानां विविधप्रकाराणां ध्वनिसंयो-

जनपूर्वकं काव्यकदम्बं प्रणिनाय। अत्र नक्तं भीरुः पुनः बहलान्धकारे सान्द्रतमालवनभूमौ कथं रतिकेलिं करोति ? इति मुख्यार्थवाधे नक्तं भीरुः नाम कामार्त्तः पुनः गृहं नाम केलिसदनमथवा केलिकुञ्जमिति बोधव्यम्। पुनः मेघमालायां यथा विद्युत् तथैव श्रीराधा सुवर्णवर्णेन विभाति। न केवलमेकमेव कुञ्जं जिगमिषू तौ प्रत्युत प्रत्यध्व-कुञ्जद्रुमं नाम समग्रः मार्गः कुञ्जेषु पूर्णः तथा। अतः स्वच्छन्दस्तथा गोपनकेल्याः प्रशस्तोऽवसरः। तयोः रतिनैरन्तर्यात् केल्याः रतिक्रीडायाः झटिति प्रयोगः यथा व्याघ्रः क्रीडति तथैवात्र शार्दूलविक्रीडितं च्छन्दसः रचना कल्पिता इति ध्वनिः ।।१ ।।

**२-वाग्देवताचरितचित्रितचित्तसद्मा**
**पद्मावतीचरणचारणचक्रवर्ती।**
**श्रीवासुदेवरतिकेलिकथासमेत**
**मेतं करोति जयदेवकविः प्रबन्धम्।।२ ।।**

**(१) नारायण दाश कृत-सर्वाङ्गसुन्दरी**

।।२।। जयदेव नामा कविरेतं प्रबन्धं गीतगोविन्दाख्यं करोति। कीदृशं श्रीवासुदेवरतिकेलिकथासमेतं श्रीयुक्तवासुदेवस्य रतौ केलिः परिहासादिः। तदाश्रिता या कथा तया समेतमित्यर्थः। जयदेवः कीदृक्, वाग्देवताचरितचित्रितचित्तसद्मा, वाग्देवता सरस्वती तस्याश्चरितं कवित्वादिकं तेन चित्रितं चित्ररूपेण लिखितं चित्तमेव सद्म यस्येति विग्रहः। आश्रयस्य गीतगोविन्दस्य योग्यता प्रतिपादनार्थं चित्तस्य सद्मतयारूपतां साध्वेव सद्म चित्र्यते, तेन साध्वितसद्मनः साधुताप्रतिपादनार्थं चित्रितशब्दोपादानं "गृहगेहोदवसितं वेश्म सद्म निकेतनमित्यमरः।" पुनः कीदृक्, पद्मावतीचरणचारणचक्रवर्त्ती[२], पद्मावती लक्ष्मीः, तस्याश्चरणयोश्चारण- चक्रवर्त्ती नटश्रेष्ठो वा। "चारणः कथितो भृत्ये नर्त्तके स्तुतिपालके" इति **कोषः**। "चक्रवर्त्ती सार्वभौमः नृपोऽन्यो मण्डलेश्वरः।" **इत्यमरः**। अत्र वाग्देवतेत्यनेन कवेः पाण्डित्यम्। पद्मावतीचरणचारणेत्यतनेन लक्ष्म्यां भक्त्यातिशयेन कवेः दारिद्र्यापगमः। अवश्यं कविता दारिद्र्योपशमनाय यतनीयं, यतो दरिद्रकवित्वस्य जनाश्रद्धेयत्वात्। यदुक्तं **विष्णुपुराणे**—

सद्यो वैगुण्यमायान्ति शीलाद्याः सकला गुणाः।
पराङ्मुखी जगद्धात्री यस्यत्वं विष्णुवल्लभे।।इति।।

पद्मावती पद्मं कमलमस्त्यस्याः उषितश्चेति ङीप्, संज्ञायामित्यनुवृत्तौ शरादीनां चेति दीर्घः, अत्र जयदेवकवेः पद्मावती भार्या तदुपादानात् कवेरन्याङ्गनावैमुख्यं शृङ्गारित्वं च इत्याह धृतिदासादेः समीक्षिताभिधानम्। अन्यथा अनेकेष्वेव सत्सु प्राधान्यसम्भवात् कवेः पद्मावत्याः उपपतित्वापत्तिः। न च पद्मावतीशब्दस्य लक्ष्मीवाचितायां

कवेरन्याङ्गनावैमुख्यं श्रृङ्गारित्वं च प्रतिपादितं न भवति इति वाच्यं स्वयमेवास्यार्थस्य जयति पद्मावतीरमणेत्यनेन पुरस्तात्कविना प्रतिपादितत्वात्। तदेवं मुख्यवृत्या पद्मावतीशब्दो लक्ष्मीमाचष्टे, च्छलात्तु कवे: प्रियास्मरणमित्येतत्तद्व्यवस्थितं यथा भारवे: सर्गसमाप्तौ लक्ष्मीशब्द:। वसन्ततिलकं वृत्तम्।।२।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२।। कविरिदानीं सकलकलिकलुषहारिहरिचरितानुस्मरणसरसतापादनेन तद्भक्ताननुगृह्णन्समुचितेष्टदेवता-भावनाभावितान्त:करणस्तत्फलभूतं शृङ्गारोत्तरं प्रबन्धं कर्त्तुं प्रातिजानिते-वाग्देवतेति। जयदेवकविरेतं गीतगोविन्दाभिधं प्रबन्धं करोति। अत्र जगदानन्दकन्दलीकन्दगोविन्दपदारविन्दमकरन्दामोदमधुरतरास्वादमधुकरमधुरचेता भागवतप्रधान: परमकारुणिको जयदेवकविदेवदेवे भगवत्याविष्टचित्त: कलिकलुषान्त:-करणत्वेनेतस्तत: परिविक्षिप्तान् सुखेन तदभिमुखीकरणाय कलावतीकेलिकुतूहलिनं हलिसोदरं निरुपयितुं निर्गुणं निरुपयिषु: निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वरा:। ये मन्दास्तेऽनुकम्प्यन्ते सविशेषनिरूपणै:।। "इति दर्शयितुं धर्मार्थकामा:स्वनुष्ठिता मोक्षायेति मोक्षोपायतया धर्मार्थयोरुपरि वर्त्तमानस्य पुरुषार्थविशेषस्य निदानत्वेन पितृणामानृण्यहेतु-भूतापत्योत्पत्तिद्वारेण नितम्बिनीमूलत्वमुपदर्शयितुं तद्विशिष्टं वासुदेवं विवर्णयिषुरिमं प्रबन्धमुपनिबघ्नाति। तथा चोक्तमभियुक्तै:, संसारे यदुदेति किंचन फलं तत्कृच्छ्रसाध्यं नृणां किं त्वेतत्सुखसाध्यमस्ति युगलंसम्यग्यदि ज्ञायते। तल्लक्ष्मीसमुपार्जनं पुलकिनां रक्तस्वरं गायतां तत्कान्तारतिनिस्तरङ्गमनसामुत्पद्यते नन्दन:।। "इति। **कामशास्त्रेऽपि,** किं स्यात्परत्रेत्याशङ्का यस्मिन्कार्ये न जायते। न चार्थघ्नं सुखं चेति शिक्षास्तस्मि-न्व्यवस्थिता।।" इति। परस्त्रीगतोऽप्ययं रसं उपनिबध्यमानो न पातकाय। यत: कान्तासंमिततया इत्युपदेशप्रामाण्यात्। यथा, एवं श्रीवासुदेवरतिकेलिकथासमेतम्। श्रीश्च: वासुदेवश्च तौ; तयो: रतिकेलिकथासमेतम्। अत्र स्त्रीनामलञ्छितं सर्वं श्री रिति श्री शब्देन राधाभिधीयते। अथवा श्री: शोभा लक्ष्मीर्वा तद्वतो वासुदेवस्य। तदसूचि पूर्वपद्ये माधवशब्देन रतिकेलीति सुरतक्रीडाकथनेन वा। रत्या शृङ्गारस्थायिभावेनानुरागेण या, केलय: कथा: परस्परसंकथनानि तत्समेतम्। अथ कविरात्मनो विशेषणद्वारेण सरस्वतीचरणकिंकरत्वं अनु च प्रबन्धस्य पद्मावतीदेवतासमाराधनफलत्वमाह, वाग्देवतेति। वाग्देवताचरितेन चित्रितं संजातचित्रं चित्तसद्म यस्य स तथा। सरस्वत्यनुस्मरणपरहृदय इत्यर्थ:। अपरं च, लक्ष्मीचरणसेवकाग्रणी:। पद्मं करेऽस्ति यस्या: सा पद्मावती लक्ष्मी:। "शरदीनां च"**(पा. ६।३।१२०)** इति दीर्घ:। अथ पद्मावती अष्टाक्षरमत्राधिदैवतं

तस्याश्चरणेन परिचर्याविशेषेण चक्रवर्ती। कविराज इत्यर्थः। पद्मावता[२] तस्य कलत्रमेके वदन्ति यत्तन्न विचारचारु।
यतः सदाचारपरम्परैषा गृह्णन्ति तन्नाम न नाम सन्तः।। कर्मादिसदैवतसंप्रयोगे तत्कीर्तनं किं न विशेषगर्हम्? रहो विहाय" क्व च नापि द्दृष्टं सतां स्वकान्ताप्रणयादिकं तु।। अतस्तव्द्याख्योपेक्षा। एवं यद्यप्यस्ति तत्त्वं तथापि महतामिहालौकिकचमत्कारि चरितं किंचिद्वीक्ष्यते- "तथा हि सत्यभामाग्रे ननर्त नरकान्तकृत्। देहार्धे च बभारोमामीशो योगिवरोऽपि सन्।। अथवा भक्तियोगस्य स्वभावः कोऽप्यनीद्दृशः। यतस्तद्योगयुक्ता हि गणयन्ति न लौकिकम्।। अथात्मा जायते यस्यां सा जायेति श्रुतीरणात्। तत्स्वरूपपरस्वत्वात्सा भक्तिर्या तया सह।। तथा हि धर्मकार्याणि न सन्त्यत्र तया विना। सर्वेषु धर्मकार्येषु पत्न्युक्ता दक्षिणाङ्गगा।। किन्तु सा भक्तिरत्रोक्ता योपचारेण वार्जिता। तां विनाऽतोऽनुरज्यन्ति सन्तः स्वेनेष्टदैवते।। शृङ्गरित्वादथ स्वीयां जायां नर्तयतीह सः। परार्थनिष्ठवुद्धिनां न हि लोकव्यतिक्रमः।। लोको वेदस्तथाध्यात्मं प्रमाणं त्रविधं स्मृतम्। तत्र लोकस्य मुख्यत्वात्तदुक्तिर्नान्यथा भवेत्।। अतः पद्मावती तस्य कलत्रमिति नान्यथा। परभागवतस्यास्य जयदेवस्य युज्यते।। लोकातीतचरित्रस्य लोकेशस्य पुनः सदा। स्वजायानर्तनं युक्तिमिति युक्ततरं वचः।। "अत्र चित्तसद्मनोरभेदारोपाद्रुपलंकारः, अनुप्रासश्च। उक्ता वसन्ततिलका तभजा जगौ गः।। ओजो गुणः। गौडीया रीतिः। भारती वृत्तिः। भूरिगुरुत्वात्संभाविता गीतिः।। अत्र वसुभिर्दीयत इति तदपत्याभिधानेन प्राप्तापितृधनस्य केलिकरणमुचितमिति अम्लानप्रतिभाप्रकर्पोत्प्रेक्षितेन वासुदेव पदेन सकलप्रबन्धस्यापि पीयुषवर्षेणेव समुचितार्थविशेषेण प्रबन्धः स्फुरदिव चमत्कारकारितामापद्यते। तथा चोक्तम्, उचितार्थविशेषेण प्रबन्धार्थः प्रकाशते। गुणप्रभावभव्येन विभवेनेव सज्जनः।। यथा, "जातं वंशे भुवनविदिते पुष्करावर्तकानाम्" (**मेघ**. पू.६) ईत्यत्राचेतनस्य चेतनाध्यारोपेण मेघस्य दूत्ययोग्यताभिधानाय प्रथितपुष्करावर्तकवंशत्वाद्युपन्यस्तम्।।२।।

## (३) जगद्धरकृत- सारदीपिका

।।२।।इदानीं कविः सरस्वतीलक्ष्म्योः कीर्तनपूर्वकं कृष्णस्य सुरतक्रीडावर्णनं कर्तुमाह वाग्देवतेति। जयदेवकविः एतत्प्रबन्धं कृष्णकेलिकथाप्रतिपादकं ग्रन्थं करोतीत्यन्वयः। कथंभूतो जयदेवकविः वाग्देवताचरितचित्रित- चित्तसद्मा वाग्देवतायाः सरस्वत्याश्चरिते नवरचनानि विशेषेण चित्रितं मण्डितं चित्तसद्म च भवः मनोग्रहं यस्य सः पुनः कथंभूतः पद्मावत्या[२] लक्ष्म्याश्चरणेन सम्वाहनेन चक्रवर्ति त्वं प्राप्तम् इति ।

कथंभूतं प्रबन्धं श्रीवासुदेवेति श्रीराधावासुदेवः श्रीकृष्णस्तयोः रतिकेलिकथया सुरतक्रीडा कथनेन समेतं युक्तम्।।२।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।२।। अत्र रागिमुमुक्षुसाधारणप्रवृत्यर्थं सकलजनमनोहरं शृङ्गाररसगर्भं भगवत्केलिवर्णनरूपं काव्यं कियत इत्यभिधेयं प्रतिजानिते; वाग्देवतेति। जयदेवकविरेतं गीतगोविन्दाख्यं प्रबन्धं करोति। कीदृशम्? श्रीः लक्ष्मी राधारूपेणावतीर्णा, वासुदेवः कृष्णस्तयो रतिकेलिकथया सुरत क्रीडावर्णनेन समेतं युक्तम्। ननु वासुदेव केलिवर्णनं बहुषु ग्रन्थेषु वर्त्तते इति किमनेनेत्यत आह; वाग्देवतेति। वाक्यस्वरूपा या देवता सरस्वती तस्याश्चरितेन प्रसादमाधुर्यादि-गुणसंपन्न-लोकोत्तरकाव्यरचनारूपेण चित्रितं चित्रमालेख्यं तद्युक्तं कृतं चित्तरूपं सद्म गृहं यस्य सः। अत्र सकलजनाह्लादकारित्वेन नानावर्णमयत्वेन वाग्देवताचरितस्य चित्रत्वेन निरूपणम्। चित्तं च विचित्रकवितारूपमहाधननिधानत्वेन कृष्णकेलिवर्णनादिना संसारतापसंतप्तकविजनविश्रामस्थानत्वेन सद्मतया निरुपितम्। अपरमपि गृहं विविधपुत्रिकाभिरालेख्यैर्मण्डितं भवतीति ध्वनिः। तथा च यद्यपि कृष्णकेलिवर्णनमन्यत्रापि ग्रन्थे वर्तते तथापि पूर्वैर्वर्णितमपि लोकोत्तरापूर्वसत्काव्यरचना-निबद्धमतिचमत्कारं भविष्यति। यथा पुरुषैरभिधीयमान एवार्थोऽन्येषां वाङ्नोवचनभङ्गिमारूढोऽन्यमेव क्षेत्रचमत्कारकारि करोतीति नानार्थको मे प्रयास इति भावः। पुनः कीदृशः कविः? पद्मावती(२) नाम जयदेवपत्नी तस्याश्चरणयोर्यच्चारणं संचारणम्; नर्तनमिति यावत्। तेन चकवर्ती नटसार्वभौम ईत्यर्थः। एतेन कवेः कृष्णभवत्याधिक्यं श्रृङ्गारित्वं च ध्वनितम्। तेन सरसकाव्यकरणेऽधिकारः सूचितः। तदुक्तम्, "शृङ्गारी चेत्कविः काव्यं जातं रसमयं जगत्। स एव यत्राशृङ्गारी सर्वं विरसतां व्रजेत्"।। इति। केचित्तु पद्मा इति संज्ञा विधत्ते। पद्मावती लक्ष्मीस्तस्याश्चरणयो-र्विषयभूतयोश्चारणचक्रवर्ती नटसार्वभौमः। नृत्यादिना सदा लक्ष्म्याराधनपर इत्यर्थः।एतेन दरिद्यराहित्यं सूचितम्। दरिद्रेण हि शृङ्गारादिरसो न ज्ञायत इति भावः। "आलेख्याश्चर्ययोश्चित्रम्" **इत्यमरः**। "गृहं गेह्योदवसितं वेश्म सद्म निकेतनम्" इति च। "चारणास्तु कुशीलवाः" इत्यपि ।।२।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२।।अथ जयदेवकविः स्वकविताया वीजशुद्धिं सूचयन् चिकीर्षितं निर्दिशति, वाग्देवतेति। वाचाभिमानिनी देवता वाग्देवता। वाग्रूपा देवता वाग्देवता सरस्वती तस्याश्चरितं विहरणं तेन चित्रितं संजातचित्रं "तारकादित्वादितच् प्रत्ययः।" अथवा

चित्रितं चित्रवत्कृतं, चित्रशब्दात्तत्करोति "णिचि कर्मणि क्तः", पक्षद्वयेऽपि चरितालंकृतमित्यर्थः। तादृशं चित्तसद्म चेतो मन्दिरं यस्य तादृशः निरन्तरसरस्वती-नर्त्तनरङ्गमानस इत्यर्थः।

यथा लोके कयाचित्कामिन्या विविधैः शिलैश्चित्रितं गृहं सर्वानन्दकरं भवति तद्वत्पठितेऽपीति द्योतयितुं चित्रितमित्युक्तमिति ज्ञेयम्। अनेन वक्ष्यमाणप्रबन्धानुग्राहकः समग्रः सरस्वतीप्रसादः सूचितः। इयमेव कविताया बीजशुद्धिर्नाम।

किं च पद्मावती नाम जयदेवस्य निजनायिका। तदुक्तमनेनैव कविना दशमसर्गे; "जयति पद्मावतीरमणजयदेवकवि भारती भणितमिति गीतमिति।" तस्याश्चरणौ पादौ तयोश्चारणा नृत्यविशेषाः तेषां चक्रं समूहस्तस्य वर्त्ती प्रवर्त्तकः। अथवा चारणेषु चक्रवर्त्ती सार्वभौमः तत्रातिप्रवीण इत्यर्थः। अथवा चारणचक्रमिव चारणचक्रम्। "उपमितमित्यादिना समासः"। चक्राकारनृत्यविशेष इत्यर्थः। तत्र वर्त्ती चारणस्य कुण्डलिनृत्यभेदत्वात्तस्य चक्राकारत्वमवगन्तव्यम्। चारणलक्षणं तु **रामदेवीये**,

उद्यत्सु वाद्यचक्रेषु हा हा हूंकारभूषितम्।
सरसान्दोलनास्तानप्रसादगुणगुम्फनात्।।
सौराष्ट्रा देशजा यत्र चारणा गणकाकुभिः।
तत्तद्रसोचितै रागैर्गायन्त्यो बहुभङ्गिभिः।।
करतालैरनुगतैः पादन्यासैः समुद्धतम्।
भ्रमणैरपि यन्नृत्यं शून्यनृत्यं वितन्यते।।
नार्य्यश्चेन्मण्डलावर्त्त्या प्रविशन्त्यवगुण्ठिताः।
भवेच्चारणनृत्यं तु तत्सौराष्ट्रपतेः प्रियम्।।इति।।

अत्र ताम्बूलमप्यभिसमर्थ्य सुवाद्यनृत्यगीतैः सुतृप्तमभिपूजयतां पुरावदिति। क्रमदीपिकायां भगवतः पुरुषोत्तमस्य नित्यपूजाप्रतिपादकचतुर्थपटले प्रतिपादितं पूजाविधानम्। संस्त्वया धर्मश्च कर्त्तव्यः सोऽनया सहेति वचनार्थं चावकलय्य भगवद्भक्ताग्रणिर्जयदेवः स्वकान्तां पद्मावतीमेव स्वेष्टदेवतायाः कृष्णस्याग्रे प्रतिदिनं पूजान्ते नर्त्तयतीत्यनुसन्धेयम्। एतादृशो जयदेवकविः वर्णयिता।

श्रिया युक्तो वासुदेवः श्रीवासुदेवः। राक्षसवधार्थं वसुदेवसूनुत्वेन आविर्भूतः। वसुदेवस्यापत्यं पुमान्। यत्रेञ् प्रत्ययः, ऋष्यान्धकवृष्णिकुरुभ्यश्चेति प्रतिषेधावत्ता। वसन्त्यस्मिन् भूतानीति वासुः अथवा अन्तर्य्यमित्वेन सर्वत्र वसतीति वासुः। तदुक्तं **श्रीविष्णुपुराणे**,

सर्वत्रासौ समस्तं च वसत्यत्रेति वै यत:।

तत: स वासुदेवेति विद्वद्भि: परिपठ्यते ।।इति।।

वसतेरूणादयो बहुलमिति तन् प्रत्यय:। स चासौ देवश्चेति विग्रह:।श्रीग्रहणं तेन सह लक्ष्म्या अनपायिनीत्वादवगन्तव्यम्। एतादृशस्य वासुदेवस्य या रतिकेलय: श्रृङ्गारचेष्टास्तासां कथाप्रबन्धानुरूपत्वेन लोकप्रख्यापनं तया समेतं वासुदेवश्रृङ्गारचेष्टा-वर्णनात्मकमित्यर्थ:। अथवा श्रीश्च वासुदेवश्च तयो: रतिकेलिकथासमेतमेतम्। एतच्च ‘‘पद्मापयोधरेत्यत्र श्रितकमलाकुचमण्डलेत्यादौ’’ तत्स्पष्टम्। यद्वा श्रोशब्देन तत्कल्पा राधा कल्प्यते। तस्य वासुदेवस्य च रतिकेलिकथासमेतमिति वा। अनेन प्रबन्धस्य साफल्यं सूचितम्। तदुक्तं **हरिभक्तिसुधोदये,**

सा पङ्क्त्यपि कवेर्वाणी हरिनामाङ्किता यदि।

सा वाणी सफलाज्ञेया विफलान्यसमाश्रया।।

एतं वक्ष्यमाणप्रबन्धं चतुर्द्धातु समेतं षडङ्गभासुरं वृत्तमानं ताण्डवनामधेयं वाक्सन्धिमित्यर्थ:। तदुक्तं **गीतचूड़ामणौ,**

चतुर्भिर्धातुभि: षड्भिश्चाङ्गैर्यस्मात्प्रयुज्यते।

तस्मात् प्रबन्ध: कथित प्रतापपृथ्वीभूभुजा।।

उद्ग्राह्याद्यास्तु चत्वार: स्वरादीनि च षट् तथा।।

वसन्ति यत्र तज्ज्ञेय: प्रबन्धो वस्तुसंज्ञया।।

उद्ग्राह: प्रथमो भागस्तथा मेलापकध्रुवौ।

आभोगश्च प्रबन्धस्य चत्वारो धातवो मता:।

पदतेनौ च विरुदपाटौ तालस्वरौ तथा।

अङ्गान्येतानि षट् प्राहु: प्रबन्धस्य यथाक्रमम् ।।इति।।

“एतत्स्वरूपं” **सङ्गीतरत्नाकरे** द्रष्टव्यम्। विस्तरभयान्नात्र लिख्यते। वृत्तलक्षणं,

छन्द:शास्त्रे न केनापि तालेनेष्टेन गीयते।

स्वरैर्युक्तं वियुक्तं वा वृत्तं गायन्ति तद्विद:।।

नियमोऽन्त्यादिवर्ण्णानां छन्दो जातिप्रसिद्धत:।

गणानां मात्राणां तत्र प्रबन्धकैरुदीरितम्।।

त्रिप्रकारमिदं वृत्तं सममर्द्धसमं तथा।

विषमं चेति विज्ञेयं छन्द:शास्त्रविशारदै:।।

समवृत्तं समैः पादैर्विषमं विषमैर्पदैः ।।इति।।

अत एवात्र गीतगोविन्दे क्वचिच्च 'वहति मलयसमीर' इत्यत्र पञ्चमसर्गे विषमपदप्रयोगो पपत्तिरवगन्तव्या। **तालार्ण्ण**वलक्षणप्रबन्धलक्षणं तु,

रागेनैकेनकेनापि गद्यपद्यैर्यदृच्छया।
तालैश्च बहुभिर्युक्तस्तालार्ण्णव इतीरितः ।।इति।।

चम्पूरूपमित्यर्थः। तदुक्तं—

गद्यं पद्यं च मिश्रं च त्रिविधं काव्यमुच्यते।
पद्यं तु छन्दसा बद्धं गद्यं काव्यकदम्बकम्।।
गद्यपद्यात्मकं मिश्रं चम्पूरित्यमिधीयते ।।इति।।

पदमालेत्यपरे। चम्पू एतादृशं प्रबन्धं करोति। करिष्यति निर्मास्यतीत्यर्थः। वर्त्तमानसामीप्ये वर्त्तमानवद्वेत्ति भविष्यति लट्। अथवा एतस्यापि शब्दस्य प्रबन्धान्तर्गतत्वेनारब्धपरिसमाप्ति प्रतिपादक- रूपलट्प्रयोगोपपत्तिर्वा। अत्र करोतीति प्रथमपुरुषः रामः करोतीतिवत् कञ्चनातिशयं द्योतयति। पद्यं गीतात्मकं प्रबन्धं रचयितुं जयदेव एव समर्थो नान्य इति भावः।

यत्करोषि यदश्नासि यद्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्।

इति भगवद्वचनानुरोधेन क्रियाफलस्य कर्त्तृगामितामीश्वराधीनतां च सूचयितुं परस्मैपदप्रयोग इतिभावः। अत्र च्छेकानुप्रासोऽलङ्कारः। वसन्ततिलकं वृत्तम्। "उक्ता वसन्ततिलका तभजाजगौ ग" इति लक्षणात्।।२।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२।। स्वकीर्त्त्यर्नुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रतिज्ञां करोति। जयदेवकविः जयदेवनामा कविः पण्डितः एतं गीतगोविन्दाभिधानं प्रबन्धं करोति निष्पादयति। कीदृशं प्रबन्धम्? श्रोवासुदेवरतिकेलिकथासमेतम्। श्रीश्च वासुदेवश्च। श्रीर्लक्ष्मीरूपा राधा, वासुदेवः कृष्णः। तौ श्रीवासुदेवौ। तयोः रतिः श्रृङ्गारः। तत्र केलिः हास्यपरिहासादिः। तस्य कथा कथनं प्रतिपादनमिति यावत्। तेन समेतं युक्तम्। कीदृशो जयदेवकविः? वाचां देवता वाग्देवता सरस्वती। तस्याश्चरितेन विविध-वाग्विलासेन चित्रितं चरितं चित्रितमिव चित्तसद्म मनोगृहं यस्य। अन्यदपि गृहं देवताचरितचित्रितं क्रियत इति समुचितम्। एतेन पाण्डित्यं सत्कवित्वञ्च प्रतिपादितम्। अपि किम्भुतः? पद्मा लक्ष्मीः, सा विद्यते अस्येति पद्मावान् कृष्णः, तस्य भार्य्या

पद्मावती। पुंयोगादाख्यायामीति। तस्याश्चरणयो: चारणा: सेवका:, तेषु चक्रवर्ती सेवकश्रेष्ठ इत्यर्थ:। एतेन सेवकश्रेष्ठत्वकथनेन लक्ष्म्या: स्वविषयककृपाप्रतिपादनेन नानागुणवत्त्वं सूचितम्। तथा च 'स श्लाध्य: स गुणी धन्य: स कुलीन: स बुद्धिमान्। स शूर: स च विक्रान्तो यस्त्वया देवि वीक्षित:।।' यद्वा पद्मावती तस्यैव भार्य्या। तस्याश्चरणे नर्त्तने चारणचक्रवर्ती नटराज इव। भगवदग्रे निजवधूं नर्त्तयतीति वार्त्ता। एतेनात्मन: श्रृङ्गारित्वं सङ्गीतकलाकुशलत्वं भगवद्भक्तिपरत्वञ्च दर्शयता स्वकीयकाव्यस्य शृङ्गाररसशालित्वं तालादिशुद्धत्वम् ईश्वरवियत्वञ्च सूचितम्। सेवायां चारणं प्रोक्तं नटसेवकयोरपी'ति **विश्व**:।।२।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।२।। ननु जयदेवस्य पुरुषत्वाद् गोप्यकेलिकथने कथमधिकार इत्याक्षिप्य स्वस्य[१] तत्त्वं निराकुर्वन् अभिसाराख्यं प्रबन्धं २प्रौढिनिरूपणेनैव विस्तारयति, श्रीराधाऽनुग्रहं च प्रार्थयते-वाग्देवतेति। जय: श्रीकृष्ण ३एव देवो यस्य स एव कवि: काव्यकर्ता [४]एतं प्रबन्धं करोतीत्यन्वय:। प्रबन्धचिह्नं **भोजे**,

शृङ्गारैकप्रधानो यो गीततालादि५संयुत:।
अभिसारार्थनिपुण: प्रबन्ध: ६सम्प्रकीर्तित:।।

प्रकर्षेण बन्धोऽन्योन्या७सक्तिरूपो [८]नायिकानायकयोर्यत्र स प्रबन्ध:। [९]एतं कीदृशम्? श्री: शृङ्गारशोभासम्पत्ति: [१०]रूढित: कान्तिरूपा, राधा चात्र प्रस्तुता। तथा [१]चोक्तं श्रीभागवते, य उत्तराननयत्कोशलान् दिवं द्यौ रूढित: स्वर्गो ज्ञायते [२]द्योतत इति द्यौ: वैकुण्ठस्तद्वदत्रापि श्रीराधैव [३]ज्ञायते। वसुस्वष्टासु दीव्यतीति वसुदेवो नन्दो तस्य अपत्यं पुमान् वासुदेवस्तया राधया सहित: श्रीवासुदेव:। तस्य या रतिकेलय: स्नेहक्रीडाप्रकारा:, तासां या: कथाश्चतुष्षष्टिबन्धत्मिकास्ताभि: समेतं युक्तम्। कीदृशम्? वाचांदेवता श्रीकृष्ण: [४]तस्य चरितं रसात्मिका लीला, [५]वैदग्ध्यं वा तया तेन वा चित्रितं मण्डितं कामोद्बोधकप्रकारान्वितं वा चित्तमन्त: [६]करणमेव सद्म गृहं यस्य स:। तच्चोक्तं श्रीभागवते-सा [७]वाग् या तस्य गुणान् गृणीते इत्यनेनान्यत्र वाग्देवत्वं निरस्तम्। गृहमपि विविधोपकरणैश्चित्रितं भवति। तद्वदत्रापि भगवद्गुणचित्रैरलंक्रियते[८]। प्रवेशमात्रेण पवित्रीकृतं वर्धमान[९]स्नेहेनालिखितम्। विविधकेलिप्रदर्शनेन [१०]प्रकाशनेन वा चित्रितमिति भाव:। कीदृश:? पद्मावती नाम स्वस्य प्रमदा, इ: कामो वाऽस्या: तस्य वा चरणयोश्चारणे [११]नृत्यनिपुणतारूपे नर्तने चक्रवर्ती [१२]नृपराजो नटराजो वा,

[१३]सदा [१४]शृङ्गारित्वात्। एतेन कवेः शृङ्गारित्वं सूचितम्। पद्मानि क्रीडार्थं यत्र सा पद्मावती। [१५]अथ वा सौन्दर्यसौभाग्यद्योतकं सामुद्रिकशास्त्रोक्तं पद्मं वा हस्ते यस्याः सा पद्मावती श्री राधा। तस्याश्चरणयोश्चारणं [१६]सेवकतया आत्मनिवेदनम्, तत्र चक्रः [१७]सेवकसमूहस्तद्वद्वर्तितुं शीलं यस्य सः। [१८]तच्चरणलालनेन चक्रवर्तित्वमात्मनोऽभिमन्यमानः चक्रोऽस्याङ्गस्तत्प्रण (य) वानिति वा[१९]। उक्तं च- शृङ्गारी चेत्कविः काव्ये तदा रसमयं जगत्। [२०]स एव चेदशृङ्गारी तदा विरसतां व्रजेत्।।(स.कं.५.३) इति। [१]लोकोक्तिरलङ्कारः। आलेख्याश्चर्ययोश्चित्रम् **इत्यमरः** (३.३.१८९)। [२]कविः [३]काव्यकरे च इति **विश्वः** (१०९.२४)। [४]चक्रः कोके व्रजे पुंसि क्लीबे सैन्यरथाङ्गयोः इति[५]मेदिनी (२७.३१)। [६]गृहं गेहोदवसितं वेश्म सद्म निकेतनम् **इत्यमरः** (२.२.४)। [७]सद्मा पद्मेत्याद्यनुप्रासार्थम्[८]। इः कामः इत्येकाक्षरे (४)।।२।।

१.तच्चोक्तम्-फ.ग.ह.ज. २.द्योत्यते-फ. ३.ज्ञातव्या-इ.फ.ग.ह.ज. ४.तच्चरितम्-ग. ५.वेदध्यम्-ब. ६.करणमेव-ब. ७.वाग्यया-फ.वाग् तया-ग. ८.क्रियेत-ब.क्रियतो-इ. ९.स्नेहेन लिखितम्-इ.फ.ग.ह.ज. १०.प्रकाश वा-ब.नास्ति-फ.ग.ह.ज. ११.नृपनिपुणतारूपेणर्तनेन-ब. १२.नास्ति-ब. १३.तदा-ग. १४.शृंगारितात्-अ. १५.यद्वा-ग. १६.-१७.चारणं-चक्रःनास्ति-अ.ब. १८.तच्चरण-वा नास्ति-इ.फ.ग.ह.ज. २०.स एव वेद शृङ्गारी-अ. १.स्तब्धत्वम्-इ.ग.ह.ज. तद्वत्वम्-फ. २.प्रोटि-ब. ३. नास्ति-फ.ग.ह.ज. ४. एवं-अ. ५. संयुगः-ब. ६. स्स प्रकीर्तितः-इ.फ.ग.ह. ७. शक्ति-अ.ब. ८. नायकनायिकयोः-ग.ह.ज. नायकः नायिकयोः-अ. ९. नास्ति-अ.ह. १०. रूढिरूपा कान्तिः-अ.ब.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।२।। [९]इदानीं [१०]कविः सरस्वतीलक्ष्म्योः कीर्तनपूर्वकं कृष्णस्य सुरतक्रीडावर्णनं कर्तुमाह वाग्देवतेति। [११]जयदेवकविरेतं प्रबन्धं[१२]कृष्णकेलिकथाप्रतिपादकं ग्रन्थं करोतीत्यन्वयः। कथम्भूतो जयदेवकविः? [१३]वाग्देवताचरितचित्रितचित्तसद्मा वाग्देवतायाः सरस्वत्या[१४]श्चरितेन [१५]रचनाविशेषण चित्रितं मण्डितं चित्तसद्म मनोगृहं यस्य [१६]सः। पुनः कथम्भूतः? पद्मावत्याः लक्ष्म्याश्चरणयो [१७]श्चारणे संवाहने चक्रवर्ती [१८]नृप इव। [१९]लक्ष्मीसेवया हि चक्रवर्तित्वप्राप्तिरिति। [२०]कीदृशम्? श्री वासुदेवेति श्री राधारूपा वासुदेवः श्रीकृष्णस्तयो रतिकेलिकथया [२१]सुरतक्रीडाकथनेन [२२]समेतं [२३]युक्तं, [२४]तत्प्रतिपादकमित्यर्थः।।२।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।२।। वाचां देवता सरस्वती तस्याः चरितैः भक्तानुग्रहकवितारूपप्रसादादिभिः काव्यनाटकादिवाग्विलासैर्वा चित्रितं व्याप्तं चित्तमेव सद्म यस्य सः। सरस्वत्या

निवासगृहीभूतचित्तवानित्यर्थ:। पद्मावती नाम जयदेवोपास्यदेवता, तस्याश्चरणयो: चारण: परिचारका:, तेषां चक्रवर्ती श्रेष्ठ:, भगवत्याराधक इत्यर्थ:। विशेषणद्वयेन स्वस्य कविताकरणसामर्थ्यं भगवद्भक्तिमत्त्वैश्वर्यं च सूचितम्। जयदेव इति कवि: श्री: राधारूपा, वसुदेवाङ्गजरूपो विष्णु: तयो रतिकेलि: सुरतक्रीडा तस्या: कथा कीर्तनं तेन समेतं युक्तम्। प्रतिपादकमिति यावत्। एतं हृत्स्थं वक्ष्यमाणप्रबन्धं गीतगोविन्दसंज्ञकं करोति कुरुते इत्यर्थ:। वर्तमानसमीपत्वाल्लट्। अत्र चकारादेरनेकावृत्त्या वृत्त्यनुप्रास:। चरण चारणचक्रेति मेतमेतमिति व्यञ्जनयुगस्यासकृदावृत्त्या छेकानुप्रास: शब्दालङ्कार:। चित्तसद्मेत्यत्र रूपकम्। एषां निरपेक्षतया परस्परं संसृष्टि:। वसन्ततिलका वृत्तम्। प्रबन्धकल्पनाकथा **इत्यमर:** (१.६.६)। प्रबन्धशब्देन कल्पितत्वमयोनेरनुत्तमत्वात्।।२।।

१.श्लोकोक्तिरलंकार:-अ.ब.श्लेषोक्तिरलंकार:-फ.ग.ह.ज.२.नास्ति-ब.३.काव्यकरे स्तरे श्चेति-अ.काव्यकरे शूरे-फ.ग.ह.ज.४.चक्र:कोके पुमान् क्लीबं वज्रं सैन्यरथांगयो:-**मेदिनी** ५.नास्ति-अ.ब.इत्यपि-इ.ग.ह.६.गृहं गेहादवसितं वेष्म सद्म निकेतनम्-**इत्यमर**:-अ.गृहा गेहो पदना पदनेत्यादिवदेसितं वेश्म सदन निकेतन **इत्यमर**:-ब.गृहं गेहोदवसिते वेश्म सदन निकेतनम् **इत्यमर**:-ह.ज.७.गृहं ८.प्रासार्थम् नास्ति-फ.९.सद्मासद्मेतिअनुप्रासार्थं-अ. अनुप्रासार्थं-ब.सद्मा पद्मेत्यादि बंधानुप्रासार्थमिति-ह.सद्म पद्नेत्यादि बंधानुप्रासार्थमिति-ज.बंधानुप्रासार्थमिति-इ.ग.१०.११.न स्त-ल.म.१२.जयदेव कवि रचितं प्रबंधं गीतगोविंदवर्णनमित्यन्वय:-ल.म.१३.नास्ति-क.१४.नास्ति-ड.१५.चरितेन वचसा चित्रितं चित्तसद्म-ल.म.१६.वचनरचनाविशेषण-क.१७.नास्ति-ड.१८.चारणेन संवाहनेन-क.ल.म.१९.नृपश्रेष्ठ:-ल.म.२०.अलंप्राप्तमिति-ल.म.२१.कथंभूतं प्रबंधम्-क.ल.म.२२.सुरतलक्षण कथाया:ल.म.२३.२४.तत्प्रातिपादक-मित्यर्थ: नास्ति:-इ.ल.म.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२।। पूर्वं तावद् भगवत: केलिगाथाजातमभिधेयत्वेन सूचितम्। इदानीमस्मिन् प्रबन्धे प्रेक्षावतां प्रवृत्तये तदभिधेयं प्रयोजनं तेन स्पष्टं दिदर्शयिषु: स्वस्य प्रबन्धकर्तृत्वं कवि: कथयति - वाग्देवतेति । जयदेवनामा कवि: एतं प्रबन्धं श्रीगीतगोविन्दाख्यं करोति। ''भाविष्यति वर्तमानसामीप्ये लट्।'' ''इह स्वरितञित: कर्त्रभिप्राये क्रियाफले'' इति आत्मनेपदे प्राप्ते एतस्य काव्यस्य परार्थत्वेन नात्मप्रयोजनत्वात् परस्मैपदं सिद्धमेव। किंविधम्? श्रीवासुदेवेति। श्रीयुक्तवासुदेवस्य रतौ सुरतविषये या: केलय: क्रीडा: परिहासविशेषा: तदाश्रिता: या: कथास्ताभि:। रतिश्च केलिश्च क्रीडा च, तयोर्या कथा वाक्यप्रबन्ध इति यावत्। तेन वा समेतं समन्वितम्। अनेनाभिधेयं स्फुटमुपदर्शितम्। किंविधम्? वाग्देवता सरस्वती तस्याश्चरितं सच्चरणं चेतसि तथा तथा परिस्फुरणमिति

यावत्। तेन चित्रितं कृतालेख्यं चित्तसद्म चेतोमन्दिरं यस्येति विग्रहः। एतेन स्वकवित्वप्रकर्षो दर्शितः। आश्रयणयोग्योताप्रतिपादनार्थं चित्तस्य सद्मतयारोपणम्। साध्वेव सद्म चित्र्यते, तेन सद्मनः साधुताप्रतिपादनार्थं चित्रितशब्दोपादानम्। पुनः किंविधः ? पद्मावतीति। लक्ष्मीस्तस्याश्चरणयोश्चारणचक्रवर्ती सेवकश्रेष्ठः। किं वा चारणाः स्तुतिपाठकास्तेषु प्रधानभूताः। ''चारणः कथितो भृत्ये नर्त्तके स्तुतिपाठके'' इति। अनेन लक्ष्म्यां भक्त्यतिशयात् कवेर्दारिद्र्यापगमः सूचितः। अवश्यं कविना दारिद्र्यापगमाय यतनीयम्, दरिद्रकवित्वस्य जनाश्रद्धेयत्वात्। यदुक्तं विष्णुपुराणे, ''सद्यो वैगुण्यमायान्ति शीलाद्याः सकलाः गुणाः। पराङ्मुखी जगद्धात्रि! यस्य त्वं हरिवल्लभे!।।'' इति।

पद्मावतीति। पद्मामस्या अस्तीति ''उगितश्च'' इति ङीपि संज्ञायामित्यनुवृत्तौ ''शरादीनाञ्च'' इति दीर्घः। छलात् पद्मावतीशब्देन स्वप्रियानामोपादानं कवेः शृङ्गारित्वसूचनेन काव्येऽपि शृङ्गारोत्कर्षः आक्षिप्तः। यदुक्तम्- ''शृङ्गारी चेत्कविः काव्यं जातं रसमयं जगत्। स एव चेदशृङ्गारः नीरसं सर्वमेव तत्।।'' इति।।२।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।२।। एवमाद्यैकपदसूचितकेलिस्फुरणोपस्थापिता नन्दपूरप्लावितान्तःकरणतया उद्यत्कारुण्येनाधुनिक- भक्तजनानुग्रहपरवशः सन् कविरेतद्व्यक्तीरणा-प्रबन्धेनानुसंदधदात्मनस्तत्सामर्थ्यं समर्थयन्नाह बाग्देवतेति । जयं सर्वोत्कृष्टं देवयति द्योतयति स्वभक्त्या प्रकाशयतीति जयदेवः, अतः स एव कविस्तद्वर्णनकृती। एतत् श्रीगीतगोविन्दाख्यं प्रबन्धं प्रकर्षेण विध्यते श्रोतॄणां हृदयमस्मिन्निति प्रबन्धस्तं करोति प्रकाशयति। श्रोतृहृदयवन्धनशक्तिरस्य कथं स्यात् इत्याह-श्रीरत्र राधा, वसुवंशेन दिव्यतीति वसुदेवः हि श्रीनन्दः, ''द्रोणो वसूनां प्रवर'', इत्युक्ते, तस्यापत्यं वासुदेवः श्रीकृष्णः तयोः याः केलिकथाः ताभिः सहितं तल्लीलाविशेषरूपवर्ण्णनमित्यर्थः। एवं चेत् तत् कथम् अयं तत्कर्त्तुं शक्नुयात् अतः आह-वाचां वक्तव्यत्वेनोपस्थितानां तत्केलिमयीनां देवता वक्ता प्रवर्त्तकश्च श्रीकृष्णस्तच्चरितेन चित्ररूपेण लिखितं चित्तरूपं सद्म मनोगृहं यस्य सः, इन्द्रियशक्तिर्देवताधीना निजेष्टदैवतं वागदेवतात्वेन निरूपितम् अतएव तत्कर्त्तृत्वं तत्रैव पर्यवस्यैत्। तथा च चित्तस्य फलकत्वेन चरित्रस्य चित्रविशेषत्वनिरूपणाद् यथा चित्रविशेषः फलकमधिष्ठाय स्वयमेव प्रकाशयति तथात्रापीत्यर्थः। एवं वाचां मनसश्च माधवपरतोक्ता। एतावतापि कथं तच्छक्तिरतः कायिकवृत्तेः श्रीराधायाः परत्वमाह-पद्मं करे विद्यते यस्याः सा पद्मावती श्रीराधा 'शरवत्यादीनामित्यादिग्रहणाद्दीर्घः', तस्याश्चरणयोर्निमित्तभूतयोरेव चारणचक्रवर्त्ती

नर्त्तकश्रेष्ठः नृत्यादिना सदा तदाराधनतप्तर इत्यर्थः। अनेन तत्प्रधानोपासनात्मनो दर्शिता।।२।।

## (१२) लक्ष्मणकृत -रसिकरङ्गदा

।।२।। एवमाद्यैकपद्यसूचितकेलिस्फुरणप्रबलितोत्साहः कविः तद् व्यक्तीकरणायात्मनः सामर्थ्यं समर्थयन्नाह; वाग्देवतेति। जयं सर्वोत्कृष्टश्रीकृष्णं देवयति स्वभक्त्या वशीकरोति, क्रीडयति वा जयदेवः, स एव कविरलौकिकचमत्कारतद्गुणलावण्यादिवर्णननिपुणः, एनं वक्ष्यमाणं गीतगोविन्दाख्यं प्रबन्धं करोति। स्वहृदयात् बहिः प्रकाशयतीत्यर्थः। प्रबन्धलक्षणन्तु[२] यथा **सङ्गीतशास्त्रे,**

चतुर्भिर्धातुभिर्विद्धस्त्वङ्गैः षड्भिश्च कल्पितः।
वाचां प्रकृष्टो बन्धो यः स प्रबन्धो निगद्यते।।
प्रबन्धोऽवयवो धातुः स चतुर्धा प्रकीर्त्तितः।
उद्ग्राह मेलापकौ च ध्रुवाभोगाविति क्रमात्।।
उद्ग्राहः प्रथमो भागः ततो मेलापकः स्मृतः।
ध्रुवत्वाच्च ध्रुवः पश्चादाभोगस्त्वन्तिमो मतः।।
यत्रैव कविनाम स्यात् स आभोग इतीरितः।
प्रबन्धस्य षडङ्गानि स्वरश्च विरुदं पदम्।।
तेन कः पाटतालौ च स्वराः सरिगमादयः।
गुणोल्लेखतया यत्तद् विरुदं परिकीर्त्तितम्।।
ततोऽनुवाचिकं यत्तु तत्पदं समुदाहृतम्।
तेनेति शब्दस्तेनः स्यात् मङ्गलार्थेऽवधारितः।
धां धां धुरा धुगित्याद् वा पाटवात् वाऽक्षरोत्करः।।
आदियत्यादयस्ताला'' इति।
तालेनैकेन वा द्वाभ्यां त्रिभिर्वा बहुभिस्तथा।
प्रबन्धान् सुकविर्नूनं यथेच्छमुपकल्पते।।
बहुतालाः प्रबन्धास्तु रागैर्बहुभिरेव च।
भेदा बहुतरा स्तेषां कस्तान् कात्स्र्न्येन वक्ष्यति'' इति।

सङ्गीतपरिभाषया विविधछन्दोमयतया च वृत्तनामाऽयं प्रबन्धः। तदुक्तं **शार्ङ्गधरदेवेन,**

''छन्दसा येन केनापि तालेनेष्टेन गीयते।
स्वरैर्युक्तमयुक्तं वा वृत्तं गायन्ति तद्विदः।।'' इति।

व्युत्पत्तिस्तु; प्रकर्षेण वद्ध्यते सहृदयानां हृदयं यस्मिन् इति प्रबन्धः।

सहृदयहृदयहारिवाक्सन्दर्भः, तं करोति। ननु भगवल्लीलादिग्रथनं विना अन्यत्र सहृदयबन्धनं न सम्भवतीति आशंक्याह, कीदृशं, श्रीवासुदेवेति। श्रीरत्र राधैव सर्वलक्ष्मीमयत्वात्। श्रीकृष्णाशक्तविषयत्वाच्च। वसुष्वष्टासु अंशेन दीव्यतीति वसुदेवो नन्दः। 'द्रोणो वसूनां प्रवर' इति। 'व्रजे द्रोणो महायशा जज्ञे नन्द' इति **श्रीशुकोक्तेः**। तस्यापत्यं पुमानिति वासुदेवः, श्रीकृष्णः। तयोर्या रतकेलिकथा बहुविधपरिकरोपेत-सम्भोगवर्णनं तया समेतं सहितं तादृशरहस्यलीलानुवर्णने कथमस्य शक्तिरित्यत आह वाग्देवतेति वाचां वक्तव्यत्वेन उपस्थापितानां तत्केलिमयीनां देवता श्रीकृष्ण एव न तु वाग्देवी। ''सा वाक् या तस्य गुणान् गृणीत'' इति। ''मृषागिरस्ता ह्यसतीरसत्कथा न कथ्यते यद् भगवानधोक्षजः'' इति । अन्वयव्यतिरेकाभ्यां तद्विना तद् वैफल्यात्। तस्य चरितं श्रीराधया सह विहरणरूपम्, तनाश्रयातिशयाधायकतया चित्ररूपेण चित्रितं सञ्जातचित्रं चित्तं तादृशभक्तिवासनावासितं मनः, तदेव सद्म, तादृशलीलामयकवितानिवासभूततया गृहं यस्य सः। निरन्तरश्रीकृष्णरहस्यलीला-स्फुरणसुधाशिक्तान्तःकरणवृत्तिरित्यर्थः। अत्र चित्तस्य फलकत्वेन चरितस्य चित्रत्वेन निरूपणात् यथाचित्रं फलकमधिष्ठाय स्वयमेव प्रकाशते, तथाऽत्रापि यमाश्रयं प्राप्य तादृशी भारत्यपि अतिशयमवाप्ता, तस्य तादृक् शक्तित्वं किं वक्तव्यमिति भावः। अनेन वाचां मनसश्च वृत्तेस्तदेकतानत्वं दर्शितम्। ननु 'अनाराध्य राधापदाम्भोजरेणुं कथं तेऽस्ति सिन्धोः रसस्यावगाहः' इति श्रीराधाचरणाराधनं विना कथमेतावताऽपि तत्सिद्धिः। अत आह पद्मेति। पद्मं लीला कमलं सौभाग्यद्योतकरेखारूपं वा विद्यते करे यस्याः सा पद्मावती, श्रीराधा ''शरावत्यादीनां'' इत्यादिग्रहणाद् दीर्घः। तथा च ब्रह्माण्डपुराणे, ''राधा पद्मावती पद्मा पद्महस्ता च विस्तृता'' इति । तस्याश्चरणयोनिमित्त-भूतयोः तत्सन्तोषार्थमित्यर्थः। चारणचक्रवर्त्ती, नर्त्तकसार्वभोमः विचित्रनृत्यादिना तदाराधनपर इत्यर्थः। अनेन कायिकवृत्तेश्च तदेकपरत्वं सूचितम्। आभ्यां विशेषणाभ्यां श्रीजयदेवस्य तादृशप्रबन्धरचनोपयोगिसाहित्यसङ्गीतपारङ्गमता च दर्शिता। ''चारणास्तु कुशीलवाः'' **इत्यमरः**।।२।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। वागदेवतेति; वाग्देवता सरस्वती तस्याः चरित्रं हृदये निधाय पद्मावत्याः लक्ष्म्याः सेवया श्रीवासुदेवस्य श्रीकृष्णस्य पूर्वसम्बन्धितां रतिकेलीं श्रीजयदेवः प्रबन्धरूपेण लिखति। अत्र प्रबन्धो नाम काव्यबन्धस्य पदबन्धस्य वा रचना प्रस्तूयते।

यथा **सुबन्धुना** स्वस्य काव्ये वासवदत्तानामधेये प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्य-निधिनिर्बन्धम्। १/१ ३। इत्यादिना सर्गबन्धेन महाकाव्यस्य लक्षणं फलति। फलत: प्रकृष्टकाव्यबन्ध: प्रबन्धोऽपि भवति। अथ च संगीतशास्त्रदृष्ट्या रसिकरङ्गदाटीकायां लक्षणमुद्धृतम्। तद्यथा,

चतुर्भिर्धातुभिर्विद्धस्त्वङ्गैः षड्भिश्च कल्पित:। वाचां प्रकृष्टो बन्धो य: स प्रबन्धो निगद्यते।। इति । एतद्धि: काव्यवृत्तनामधेय: प्रबन्ध:। तस्य लक्षणन्तु **शार्ङ्गधरदेवेन** प्रदर्शितम्। तद्यथा; ''छन्दस येन केनापि तालेनेष्टेन गीयते। स्वरैर्युक्तमयुक्तं वा वृत्तं गायन्ति तद्विद:''। इति । अत: प्रकृष्टने श्लोकेन गीतेन सहृदयहृदयं बघ्नातीति प्रबन्धस्य व्युत्पत्तिर्भवितुमर्हति। क्षुद्रगीत: प्रबन्ध: चित्रकलाप्रबन्धश्चेति उत्कलीया: संगीतज्ञा आमनन्ति। अत्र पद्मावत्या लक्ष्मीं राधिकाञ्चाववोध्य ध्वनिना स्वभार्याया: नामस्मरणं करोति।

गीतानां प्रकार: १-शुद्धं - २- क्षुद्रगीतम् (छायालग)। ३ - क्षुद्रम् पुन:

क्षुद्रगीतं- १ -चित्रपदा- २ -चित्रकला - ३ -पाञ्चाली-४-ध्रुवम्। इत्येव गण्यते।

तद्यथा संगीतनारायणे; उदग्राहाभोगयोर्मात्रा समान्यूना ध्रुवे यदि। त्र्याद्यष्टाविधपादाढ्या ज्ञेया चित्रकला हि सा। ४८५-पृ६९ ।।श्रीवासुदेवरतिकेल्या: देवादिविषया रतिर्भावो भवेत्। परन्तु नायिकानायकविचारेण सर्वाङ्गसुन्दरकृष्णस्य तथा सर्वाङ्गसुन्दरीराधाया: चिरन्तननायकनायिकाव्यवहारनिष्ठया: शृङ्गाररसस्य प्रसङ्ग: तन्निष्ठप्रबन्धेन प्रपञ्चितमिदं काव्यम्। अत्र वसन्ततिलकावृत्तम्।।२ ।।

**३-यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम्।**
**मधुरकोमलकान्तपदावलीं श्रृणु तदा जयदेवसरस्वतीम् ।।३ ।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।३ ।। सिद्धेऽपि प्रतिपादितार्थे हृदयाह्लादकत्वाभावात्कदाचिज्जना: श्रद्धेयुरित्याह यदीत्यादि। हे वैष्णवजन! हे विलासिजन! यदि हरिस्मरणे सरसं मनस्तिष्ठति, यदि विलासकलासु कुतूहलमस्ति, तदा जयदेवसरस्वतीं श्रृणु इति वाक्यार्थ:। केवलं हरिस्मृतौ वैष्णवजनस्यैव श्रद्धा, केवलं विलासकलासु विलासिजनस्यैव श्रद्धा इत्युभयोरुपादानम्। कीदृशीं सरस्वतीं, मधुरकोमलकान्तपदावलिं, मधुरा रसवती, कोमला सुकुमारा, कान्ता लौकिकार्थापदावलि: यस्या इति विग्रह:, उक्तं च **काव्यादर्शे**;

''मधुरं रसवद्वाचि वस्तुन्यपि रस: स्थित:।

येन माद्यन्ति धीमन्तो मधुनैव मधुव्रता:।।" १/५१

"अनिष्ठुराक्षरप्रायं सुकुमारमिहेष्यते।

बन्धशैथिल्यदोषोऽपि दर्शित: सर्वकोमल:।।"१/६९

कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमादिति विलासकलेति, विलासश्च कलाचेति द्वन्द्व: कलाश्चतु:षष्टिरूपा:, क्रीडोपभोगशालित्वं विलास:, यदुक्तं **नाट्यलोचने**;

स्थानासनगमनानां वक्त्रभ्रूनेत्रकर्मणां चैव।

उत्पद्यते विशेषो य: श्लिष्ट: स तु विलास: स्यात्।।इति स्त्रीविलास:।।३।।

स्थितपूर्व: प्रियालाप: सुखदुखे च तुल्यता।

धीरा दृष्टि: गतिश्चित्रा विलास: परिकीर्त्तित:।।

इति पुंविलास: द्रुतविलम्बितं नाम वृत्तम्। द्रुतविलम्बितमाह नभौभरौ।।३।।

## (२) राणाकुंभकृत-रसिकप्रिया

।।३।। कविरिदानीं स्वप्रबन्धस्य प्रयोजनमाविष्करोति; यदीति। हे श्रोतरित्यध्याहार्यम्। तदा तर्हि जयदेवसरस्वतीं प्रबन्धरूपां वाणीं शृणु। किं लक्षणाम्? मधुरकोमलकान्त-पदावलीम्। मधुरा कोमला कान्ता पदानामावलिर्यस्यां सा। एतेन माधुर्योज:प्रासादाद्या दशापि गुणा उक्ता भवन्ति। तदेति किम्? यदि हरिस्मरणे मन: सरसं एकाग्रं सरागं वर्तते। अपरं च, यदिविलासकलासु कुतूहलम्। विलासिनां शृङ्गारिणां कलास्तासु। विलासो गमनादि: स्याच्चेष्टा श्लिष्टाङ्गया कृता इति। एतेनास्य प्रबन्धस्य प्रयोजनाभिधेयसंबन्धाधिकारिण उक्ता भवन्ति। विलासकलाशिक्षा अवान्तरप्रयोजनम्। हरिस्मरणं परमं प्रयोजनम्। स्मार्यस्मारकलक्षण: संबन्ध:। वैष्णवा अधिकारिण:। दीपकमलंकार:। द्रुतविलम्बितं वृत्तम्। "द्रुतविलम्बितमाह नभौ भरौ"। पाञ्चाली रीति:। कैशिकी वृत्ति:।। अत्र मधुरकोमलकान्तपदावलीत्यादिपदैर्विलासकलासु कुतूहलस्यौचित्योद्भावनेन शृङ्गाररसस्वरूपानुरूपो वाक्यार्थ उन्निद्रो भवति। तथा चोक्तम् **(औ.१२)** "औचित्यरचितं वाक्यं सन्ततं समतं सताम्। त्यागोदग्रमिवैश्वर्यं शीलोज्वलमिव श्रुतम्"।।३।।

## (३) जगद्धरकृत- सारदीपिका

।।३।। अथ कवि निजग्रन्थप्रयोजनमाह द्रुतविलम्बितेन वृत्तेन यदीति हे कृष्णभक्त तदा तर्हि जयदेवसरस्वतीं शृणु इत्यन्वय:। यदा यर्हि हरिस्मरणे कृष्णचिन्तने सरसं सानुरागं तव मन: अस्तीत्यध्याहार: यदि तर्हि विलासकलासु विलास: श्रीकृष्णविलास: कला चतु:षष्टिस्तासु कुतूहलमस्तीति। कथंभूतां जयदेवसरस्वतीं मधुरा सरसा अर्थत:

कोमलाः शब्दतः अतएव कान्ता मनोहरा पदावली पदसमूहो यस्यां सा ताम् ।।३ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।३ ।। संप्रति प्रेक्षावत्प्रवृत्यर्थमितरकाव्यापेक्षया स्वकाव्यस्योत्कर्षं कथयन्नेव प्रकृतकाव्यस्याधिकारिप्रयोजनमाह यदीति। हे सज्जनगण! यदि हरिस्मरणे कृष्णानुचिन्तने मनः सरसं सानुरागम्। यदि विलासकलासु[४] विलासः स्त्रीणां हावविशेषस्तत्संबन्धिनीषु कलासु कुतुहलं कौतुकं तदा जयदेवस्य कवेः सरस्वतीं शृणु। कीदृशीम्? मधुरकोमलकान्तपदावलीम्। मधुरत्वं द्विविधं, शब्दाश्रितमर्थाश्रितं च। तत्र शब्दमधुरत्वं पृथक्पदत्वं; अर्थमधुरत्वं चोक्तिवैचित्र्यं तद्युक्ता मधुरा। तथा कोमलत्वमपि द्विविधम्। तत्र शब्दकोमलत्वं बन्धस्यापरुषत्वम्। अर्थ कोमलत्वं परुषेऽप्यर्थेऽपरुषत्वं तदुभययुक्ता कोमला। कान्तात्वमपि द्विविधम्। तत्र शब्दगतमुज्वलवन्ध- विशेषादिना मनःश्रोत्रप्रीतिप्रदत्वं, अर्थगतं च दीप्तरसवत्वं तदुभययुक्ता कान्ता रमणीया एतादृशी पदावली पदपरम्परा यत्र तादृशीम्। "शृङ्गारादौ रसे वीर्ये गुणे रागे द्रवे रसः "**इत्यमरः**। विलासलक्षणं **दशरूपके** (२ ।३८), "तात्कालीको विशेषस्तु विलासोऽङ्गक्रियास्विति"। कला चन्द्रकलायां स्यात्कीडनात् इति कोषः। शब्दमाधुर्यादिलक्षणानि तु **वामनेन** लिखितानि "बन्धे पृथक्पदत्वं च माधुर्यमुदितं बुधैः। अनेनैव पदन्यासः कामं धारामधुच्युतः।। बन्धस्यजरठत्वं च सौकुमार्यमुदाहृतम्। एतेन वर्जिता वाचो रूक्षत्वान्न श्रुतिक्षमाः।। औज्ज्वल्यं कान्तिरित्याहुर्गुणं गुणविपश्चितः। पुराणचित्रस्थानीयं तेन वन्द्ययं कवेर्वचः २ ।।" **(का.सू. ३ ।१ ।२५)**इति। अर्थमधुरत्वादिलक्षणं तु **वामने**। तथा च तत्सूत्राणि (३ ।२ ।.११,१२,१५) उक्तिवैचित्र्यं माधुर्यं अपारुष्यं सौकुमार्यं परुषेऽर्थेऽप्यपारुष्यम्। यथा मृते यशःशेष इत्यर्थः। "दीप्तरसत्वं कान्तत्वम् इति ।।३ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३ ।। जयदेवकविः स्ववाग्वैभवस्य लोकोपादेयतासामग्रीमाह यदीति। अत्र श्लोके शृणु मनः शब्दयोः सामर्थ्याज्जन तवेति पदद्वयमपाहर्त्तव्यम्। हे जन! तव मनः हरिस्मरणे उपासकस्याविद्या तत्कार्याणि पापानि वा हरतीति हरिः, तस्य स्मरणे चिन्तनरूपे तृतीयभक्तौ उक्तं च।

श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनम्।
अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।।इति।।

यदि सरसं सरागं साभिलाषमिति यावत्, "शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः" **इत्यमरः**। भवेदितिशेषः। अस्ति भावयोः साधारणत्वात्। तथा विलासेषु

बिभ्रमेषु शृङ्गारचेष्टास्विति यावत्। कलासु कामकलासु च। तव मनो यदि कुतूहलं कौतुकि स्यात्। कुतूहलशब्दादर्शआदित्वादच् प्रत्ययः। आमुस्मिकैहिक सैख्यापेक्षं यदि स्यादिति पादद्वयसमुदायार्थः। अत्र ननु लोकोपादेयत्वं सूचितम्। तदा तर्हि हे जन मधुराणि माधुर्यगुणयुक्तानि, कोमलानि प्रसादगुणसम्पन्नानि, कान्तानि ओजोगुण-घटितानि, यानि पदानि, तेषामावलिः समूहो यत्र, तादृशीं मधुरेत्यादि पद्यावलिविशेषणं वा अत्रैवं बोद्धव्यम्। दशगुणा इति केचित्, श्लेषादयश्चतुर्विंशति गुणा इत्यन्ये। माधुर्यादयस्त्रय एव गुणा इति **काव्यप्रकाशकारः**, तदुक्तं "माधुर्य्यौजः प्रसादाख्यास्त्रयस्तत्पुनर्दशेति" इदमोजादिगुणत्रयेण यत्र जयदेवेन गुणसम्पत्तिरुक्तेति, गुणत्रयलक्षणं तु **भारतीये**,

आनन्दकत्वं माधुर्य्यं गलितत्वस्य कारणम्।
सम्भोग-शान्त-करुण-विप्रलम्भेषु सोत्छ्रयम्।।
गलितत्वं नाम चित्तस्य द्रवीभावः,
ओजश्चित्तस्य दीप्त्या सविस्तारस्य च कारणम्।
वीरवीभत्सरौद्रेषु क्रमेणातिशयान्वितम्।
वस्त्रं जलमिव स्वच्छं तृणराशिमिवानलः।।
यश्चित्तं व्यश्नुते तूर्णं स प्रसादोऽखिलाश्रयः।।इति।।

तथा च एतादृशगुणसंपन्नां जयदेवसरस्वतीं जयदेवकृतां प्रबन्धरूपां वाणीं श्रृणु आकर्ण्णय। श्रुवः श्रृचेति श्रृणोतेः श्नुप्रत्ययः शृभावश्च। प्रत्ययादसंयोगपूर्वादिति हेर्लुक्। अस्यैवार्थान्तरम्। हे मनः हरेः स्मरणेऽसरसमितिच्छेदः असरसं विरसम्? यदि भवेः, तदा तर्हि असारस्य निवृत्तये, भक्तविशेषणविशिष्टां जयदेवसरस्वतीं श्रृणु। तच्छ्रवणे तदसारस्य निवृत्तिद्वारा हरिस्मरणप्रावण्यं भविष्यतीतिभावः। यदि वा कामुकस्य कुतूहलं मनः केन निमित्तेन, कदाचित् विलासकलासु असरसंस्याः यद्वा यदि मनः विलासकलासु वाह्याविभ्रमकलास्वेव कुतुहलं कौतुकि स्यात् तन्निवृत्तये भक्तविशेषणविशिष्टां जयदेवसरस्वतीं श्रृणु। तदाऽसारस्य निवृत्तिद्वारा विलासकला-प्रावण्यं तन्निवृत्तिर्वा तव भविष्यतीति भावः। यद्वा यदि बाह्यविषयलीलालालसं स्यात् हरिविलासकलासु असरसं तदापि तन्निवृत्तये जयदेवसरस्वतीं श्रृणु। तत्र हरिविलासप्रवणं स्यादितिभावः। शेषं समानम्। अत्र मनोमात्रसम्बोधनम्। आस्वाददशायां कवेरपि सहृदयत्वमेवेति **काव्यप्रकाशकार**वचनात्। कवेः सतोऽपि जयदेवस्य मनसोऽपि

सम्बोधनत्वमविरुद्धमिति भाव:। अथवा तद्व्यतिरिक्तजनमनो वा सम्बोधनम् ।।३ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।३ ।। कविरिदानीं निजग्रन्थगुणकीर्त्तनेन विरक्तानुरक्तसाधारणश्रोतृजनानभिमुखीकरोति। हे लोक! यदि हरिस्मरणे कृष्णस्मरणे मन: सरसं सानुरागम्, यदि विलासकलासु श्रृङ्गारादिचतु:षष्ठिकलासु कुतूहलं कौतुकं जिज्ञासेति यावत्, तदा जयदेवसरस्वतीं जयदेववाणीं शुणु आकर्णय। किम्भूतं जयदेवसरस्वतीम्? मधुरकोमलकान्तपदावलीम्। मधुरा अर्थद्वारा सरसा, कोमला सुबोधा कान्ता श्रवणानन्दजनिका, एवम्भूता पदावलीं पदपंक्तिर्यत्र। मधुरं रसवद्वाचि वस्तुन्यपि रसस्थिति:। येन माद्यन्ति धीमन्तो मधुनेव मधुव्रता:।। 'सुखप्रयोज्यैर्यच्छब्दै-र्युक्तमस्पष्टसन्धिभि:। सुकुमारान्तसंयुक्तं कोमलं नाम तद्विदु:।।'* 'यन्मन:श्रोत्रविषयं प्रह्लादजनकं भवेत्। शब्दबन्धानुयोगेन तत्कान्तमिति कीर्त्तितम्।।' अत्र श्लोके सम्बोधनाभावात् दैप शोधने दायन्त इति दा, पचाद्यच्, हे दा: शुद्धा: जयदेवसरस्वतीं शृणुत इत्यपि व्याचक्षते। तेषां मते 'न चिरं मम तापाय तव यात्रा भविष्यति। यदि यास्यसि यातव्यमलमाशङ्कया च ते।।' इत्यादिदर्शनात् यत्तदोर्न्नित्याभिसम्बन्धाद् तदेत्यनिबन्धनेऽपि न दोष इत्यवधेयम्। 'शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रस' इति **विश्व**:। 'कला चन्द्रकलायाञ्च कला स्यात्क्रीडणादिषु' ।।३ ।।

*सुखप्रयोज्यैर्यच्छन्दैर्युक्तं सुश्लिष्टसन्धिभि:। सुकुमारार्थसंयुक्तं सुकुमारं तदिष्यते।।
इति पाठान्तरं **काव्यादर्शे** दृश्यते।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।३ ।। एवं तावद्विद्वज्जनप्रवृत्त्यर्थमन्यकाव्यापेक्षया [१]स्वकाव्योत्कर्षं प्रथयन् गीतगोविन्द[२]श्रवणे श्रोतृगणं प्रोत्साहयति; यदीति। हे[३] दा: बहुपुण्यप्रदा:। यदि हरिस्मरणे [४]कृष्णस्मरणे मनश्चित्तं सरसं भगवत्प्रणययुक्तम्। रस: शृङ्गाररस:। तत्सहितं वा साभिलाषं वा। तदा जयदेवसरस्वतीं गीतगोविन्दरूपां वाचं[५] शृणुतेत्यन्वय: मनस्तत्कर्तुमभिवाञ्छा तदाऽत्यादरेण शृणुत[६] धारयत।[७] तद्धारणमेव[८] तदिति करिष्यतीति भाव:।[९] किञ्च यदि विलास: स्त्रीणां[१०] प्रतितिथिकेशाद्यधोङ्गस्पर्शश्चरणोर्ध्वं च[११] **रतिकोशोक्त**स्तस्य [१२]कलासु चतुष्षष्टिक्रीडासु कुतूहलं कौतुकम्। विलासलक्षणं **रतिकोशोक्तं** ग्रन्थविस्तरभयान्न लिखितम्। कीदृशम्? मधुरामिष्टाम्।[१] श्रीराधाशृङ्गारप्राधान्यात्। कोमला मृदुला। प्रणयपूर्वकश्रीकृष्ण वचनसंयुक्तत्वात्। कान्ता कमनीया[२] स्निग्धसाहचर्यवचनयुक्तत्वात्। तत्पदानामावली

परम्परा यस्यास्ताम्। कर्मधारय: समास:। (मधुरं यथा-)

[3]मधुरं रसवद्वाचि वस्तुन्यपि रसस्थिति:।
[4]मासि माद्यन्ति मधुनो मधुनेव मधुव्रता:।। इति दण्डी (काव्यादर्श: १.५१।)

सुकुमारं यथा,

सुप्रयोगैर्महोत्कृष्टैर्युक्तमस्पष्टसन्धिभि:।
सुकुमारार्थसंयुक्तं [5]सुकुमारं प्रचक्षते।।

कान्तं कथा,

यन्मन: श्रोत्रविशदं प्रह्लादजनकं भवेत्।
शब्दबन्धानुयोगेन तत्कान्त [6]मभिचक्ष्यते।।

इत्यपि। ७तत्र मधुरं द्विविधम्; अक्षराश्रितमर्थाश्रितं च। तत्राक्षरमधुरत्वमपृथक्पदत्वम्। अर्थमधुरत्वं वचनवैचित्र्यम्। कोमलत्वमपि द्विविधम्। बन्धस्यापरुषत्वमपि कोमलत्व-८मर्थकोमलत्वं ९वा। तत्सर्वमन्यकवीनां काव्ये साधारणम्। अत्र त्वसाधारणं राधाकृष्ण १०दूतीनामेतत्सर्वम्। अतो जयदेवसरस्वतीं सर्वश्रेष्ठां११शृणुतेति। १२कला स्याच्चन्द्रकलायां कला स्यात्क्रीडनादिषु इति "**विश्व:**"(१०४-४३)। दीपकोऽय-मलङ्कार:। तल्लक्षणं **शिशुबोधे**,

[1]प्रस्तुतौचित्य[2]संबद्धैर्यद्वाक्यै: सह सङ्गतिम्।
दधानं दीपयत्यर्थान् दीपकं तदुदाहृतम्।।

एवमेतै: शब्दैर्विषयप्रयोजनसंबन्धाधिकारिणो दर्शिता:। तत्र रह: केलय इति विषय:। यमुनाकूल[3] इत्यधिकरणम्। राधामाधवयोरिति वसन्तकाल: समय: सद्भक्तिरिति प्रयोजनम्। [4]प्रतिपाद्यप्रतिपादकभाव: संबंध। श्रीराधाकृष्णरसभावितान्त: [5]करण एवाधिकारीत्येवं सर्वाणि क्रीडा[6]साधनानीति रहस्यम्।।३।।

१.त तत्काव्योत्कर्षम्-ग. २.श्रयणे-अ.श्रवयो-ब.श्रवण-ज.३.महावग्दु-ब देहा:-ग.४.नास्ति-ब.५.शृण्वतत्यन्वय:-ब.६.धारयतेति-ज.७.तद्धारणम्-ज.८.तदेव-इ.फ.ग.ह.ज.९.किन्तु-अ.ब.१०.प्रतितिथिकेस्याद्यधोगस्यस्पचिरणोर्द्धंचरति-अ.प्रतितिथिकेशाद्यधोङ्गस्पर्शा चरणोध्दं चरसि-ब.११.चरतीति रति कोशोक्त:-ज.१२.रतिकलासु-ग.

१.श्रीराधा-वचनं नास्ति-ग.२.स्निग्धसहचर्यादि-इ.फ.ह.ज.३.मधुरं यथावत् रसवत्वासु वस्तुन्यपि रसस्थितिम्। मासु माद्यन्ति मधुनो मधुने च वधुवता इति दण्डी-अ.ब.४.येन माद्यन्ति धीमन्तो मधुनेव मधुव्रता: **काव्यादर्श**:(१-५१)-इ.फ.ग.ह.ज.९.पदमिदं नास्ति-ब.१०.इति नास्ति तत्सर्वम्-अ.ब.कृतीनामेतत्सर्वम्-इ.११.शृणुतेति भाव: फ.ग.ह.ज.१२.कला स्यान्मूलविवृध्दौ शिल्पादावंश-मात्रके। षोडशांशे च चन्द्रस्य कलना कालयो: कला।। (**विश्व**:१०४.४३) कला स्यात् क्रीडनादिषु-

ज.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।३ ।। [7]अथ कवि: निजग्रन्थप्रयोजनमाह, [8]यदीति हे कृष्णभक्त [9]तदा तर्हि जयदेवसरस्वतीं शृणु इत्यन्वय:। यदि यर्हि हरिस्मरणे [10]कृष्णचिन्तने [11]सरसं सानुरागं तव मनोऽस्तीत्यध्याहार:। [12]यदि विलासकलासु[4] [13]विलासकला: चतुष्षष्टि:, तासु कुतूहलमस्तीति।[14]कथम्भूता जयदेवसरस्वतीम्? मधुरा सरसा अर्थत: कोमला शब्दत: [15]कान्ता मनोहरा पदावली [16]पदसमूहो[17]यस्याम्।।३ ।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।३ ।।अधिकारिण: प्राह-यदीति। हे जनेति सम्बोधनाध्याहार:। हरे: विष्णो: स्मरणं तस्मिन् मन: सरसं यदि, सरसं सरागं सादरमित्यर्थ:। यदि वा विलासा श्रृङ्गारचेष्टा: [18]तद्वन्तो विलासिन: तेषां कलासु कुतूहलं कुतुकयुक्तं यदि भवति। विशेषणद्वयेन शान्तशृङ्गारयो: [19]प्रतिपाद्यत्वात् प्रवृत्तिमार्गा निवृत्तिपन्थानश्चाधिकारिण:। उभयोस्तदा मधुरा च सा कोमला च सा कान्ता च सा पदानां आवलि: यस्यां सा तां जयदेवसरस्वतीं वाणीं गीतगोविन्दरूपां शृणु। माधुर्यसौकुमार्यकान्तिरूपगुणवैशिष्ट्यं श्रवणीयत्वकारणं न तु श्रुतिकटुत्वादिदोषयुक्तमित्यर्थ:।

माधुर्यं पुनरुक्तस्य वैचित्र्यं चारुतावहम् ४/ ६

सौकुमार्यमपारुष्यं पर्यायपरिवर्तनात् ४/ ८

शृङ्गारे च प्रसादे च कान्त्यर्थं व्यक्तिसंग्रह:। इति **चन्द्रालोके** (४,१०)।।३ ।।

१.प्रस्तुतौचित्यसंवर्धि-फ.ग.ह.प्रस्तुतौचित्य संबंधि-ज.२.सम्बन्धि:-अ.३.इत्यधिकारिण:-अ.ब. ४.प्रतिपाद्यप्रतिपादकरूप: सम्बन्ध:-फ.प्रतिपादक प्रतिपाद्य रूप: सम्बन्ध:-ग.ह.ज.५.करणोऽत्राधिकारी-फ.६.साधनानि निरूपितानि-इ.फ.ग.ह.ज.७.कथम्-ल.म.८.नास्ति-क.ल.म.९.कथा तदा-क.१०.नास्ति-ल.म.११.सरसं सरागम्-ल.म. सानुरागं सरसम्-क.१२.यदि यर्हि-क.ल.म. १३.विलास: कृष्णविलासस्तस्य कलाश्चतुष्षष्टि:-क.ल.म.१४.किं विशिष्टाम्-ल.म.१५.अत: कान्तामनोहरा-ल.म. अत: करणात् मनोहरा-क.१६.नास्ति-ल.१७.यस्यां सा-ल.म.१८.जयन्ती व्याख्यानुरोधेन मूल पाठ: विलासिकलासु कुतूहलम् इति।१९प्रतिपादकत्वात्-च.

## (१०) धनञ्जय-धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३ ।।सिद्धेऽपि प्रतिज्ञार्थे हृदयाह्लादकत्वाभावात् कदाचिज्जनानामश्रद्धेत्याह; यदीति। हे वैष्णवजन! यदि हरिस्मरणे श्रीकृष्णानुचिन्तने मन: सरसं सानुरागं तिष्ठति। ''शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रस:'' **इत्यमर**:। यदि विलासकलासू च कुतूहलमस्ति; यद्वा कुतूहलमिति ''अर्शआदित्वादच्'' कुतूहलयुक्तं मन इति, तदा जयदेवसरस्वतीं

जयदेवस्य गीतरूपां वाणीं शृण्विति वाक्यार्थः। केवलं हरिस्तुतौ वैष्णवजनस्यैव श्रद्धा, केवलविलासकलासु विलासिजनस्यैव श्रद्धा इत्युभयोरुपादानम्। विलासश्च कलाश्चेति द्वन्द्वः। ''विलासः शृङ्गारभावजा क्रिया'' इति। ''लीला केलिर्विलासश्च क्रिया शृङ्गारभावजा'' इति **कुमुदाकर**ः। तत्र विलासलक्षणमाहुः। यदुक्तं **मध्यलोचने**, ''स्थानासनगतिहस्तभ्रूलोचनकर्मभिश्चैव। उत्पद्यते विशेषो यः शिष्टः सन् सः विलासः स्याद्'' इति स्त्रीविलासः। ''स्मितपूर्वप्रियालापः सुखे दुःखे च तुल्यता। धीरा दृष्टिर्गतिश्चित्रा विलासः परिकीर्तितः।।'' इति पुंविलासः। कलालक्षणमाह। यदुक्तं **गान्धर्वविवेके**, ''यया सर्वविषयत्वेन कालोऽयं परिमीयते। कला क्रियात्मिका सा तु कथ्यतेऽपूर्वधा बुधैः।।'' इति । विष्णुचरितस्य नान्तरीयकत्वादास्तां वैष्णवजनप्रवृत्तिः। विलासकलासु कौतुकिनः कथं प्रवर्त्स्यन्तीत्यत आह - सरस्वतीति। किंविधाम्? मधुरेत्यादि। मधुरा कोमला कान्ता पदावलिः पदपङ्क्तिर्यस्यामिति विग्रहः। मधुरेत्यनेन रसवत्त्वम्। उक्तञ्च **काव्यादर्शे**, ''मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः'' इति। कोमलाऽनिष्ठुराक्षरसन्दर्भः, एतेन सौकुमार्यगुणयोगित्वमुक्तम्। यदाह **दण्डी**, ''अनिष्ठुराक्षरप्रायं सौकुमार्यमिहेष्यते'' इति। कान्ताऽलौकिकार्थरहिता। तथा च ''कान्तं सर्वजगत्कान्तं लौकिकार्थानतिक्रमाद्'' इति। यद्वा मधुरा माधुर्यगुणयुक्ता, अनेनात्र शृङ्गाररस एवास्वाद्य इत्युक्तम्। यदाह **ध्वनिकार**ः, ''शृङ्गार एव मधुरः परः प्रह्लादनो रसः। तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति।।'' इति। कोमलेत्यनेन प्रसादगुणः उक्तः। तथा हि कोमला मृद्वी सुबोधा प्रसादगुणयुक्ता इत्यर्थः। यदाह **ध्वनिकार**ः, ''समर्पकत्वं काव्यस्य यत्तु सर्वरसान् प्रति। स प्रसादो गुणो ज्ञेयो कविकर्णसुखावहः'' , ''सर्वसाधारणक्रियः।'' इति। **दण्डी** च, ''प्रसादवत् प्रसन्नार्थः'' इति। कान्ता कर्णमनोरमा काव्यगुणानपेक्ष्य सौष्ठवयुक्ताः इति यावत्। गेयरूपत्वात् एतदुक्तं **सुबन्धुना**, ''अविदितगुणाऽपि सत्कविभणितिः कर्णेषु वमति मधुधाराम्। अनधिगतपरिमलाऽपि हि हरतीदृशं मालतीमाला।।'' इति। द्रूतविलम्बितं नाम वृत्तम्। ''द्रूतविलम्बितमाह नभौ भरौ'' इति।।३।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।३।। एवमात्मनस्तद्योग्यतामापाद्य सिद्धेपि प्रतिज्ञाते ह्यर्थे चित्तविनोदनकत्वाभावात् कदाचिन्मन्दजनाः श्रद्धां न दध्युरित्यधिकारिणाऽपि निश्चिन्वन्नाह यदीति। भो भक्तजन! यदि हरिस्मरणे श्रीकृष्णानुचिन्तने मनः सरसं स्निग्धं यदि च विलासस्य रासकुञ्जादिलीलायाः कलासु वैदग्धीचारुचेष्टासु कुतुहलं कौतुकमस्ति, तदा जयदेवकवेः

सरस्वतीं बाणीं शृणु। केषांचित् सामान्यस्मरणमात्रे केषांचिद्विशिष्टरासकुञ्जादिलीलावलोकने इत्युभयोरुपादानम्। कीदृश्यसौ यस्या एवाधिकारिणोऽपि निश्चिनोषीत्याह शृङ्गाररसप्राधान्यान्मधुरा झटित्यर्था वगतेः कोमला गेयत्वात् कान्ता कमनीयपदावली पदश्रेणी यस्यास्ताम्। एभिः पद्यैः सम्बन्धाभिधेयप्रयोजनाधिकारिणोऽपि दर्शिताः। राधामाधवयो रहःकेलयः अत्राभिधेयाः, प्रतिपाद्यप्रतिपादकभावः सम्बन्धः। तत्केलीनामनुमोदनजनितानन्दानुभवः प्रयोजनं एतद्रसभावितान्तः करणोऽधिकारी।।३ ।।

## (१२) लक्ष्मणकृत -रसिकरङ्गदा

।।३ ।। एवमात्मनो योग्यतामापाद्य प्रतिज्ञातस्य ग्रन्थस्य सर्वगुणालंकृततया स्पृहणीयतमत्वाविष्कारेण भक्तजनं प्रति प्रोत्साहयति; यदिति। अत्र श्लोके शृणु मनः श्चेति शब्दयोः सामर्थ्यात् हे भक्तजन! तवेति पदद्वयमध्याहर्त्तव्यम्। भो भक्तजन। यदि हरेः सर्वचित्तहरस्य श्रीकृष्णस्य स्मरणे चिन्तने तव मनः सरसं साभिलाषं, यदि च विलासकलासु तस्य शृङ्गारप्रचुरभावाभिव्यञ्जकचारुचेष्टासु कुतूहलं कौतुकमस्तीति शेषः, तदा जयदेवस्य सरस्वतीं शृङ्गाररसाश्रितनृत्यगीतादिविविधपरिकरोपेतां नर्मादिकाङ्गसहितकैशिकीवृत्तियुक्तां गीतगोविन्दाख्यप्रबन्धरूपां भारतीं शृणु। श्रवणद्वारा चित्तविषयी कुरु इत्यर्थः। हरिस्मरणे इति केषांचित् सामान्यस्मरणमात्रे विलासकलास्विति केषांचिल्लीलाविशेषावकलने इत्युभयोरुपादानं सामान्यविशेषतया भक्तानां द्वैविध्यात् इति बोद्धव्यम्। उपादेयतां सूचयन् विशिनष्टि, कीदृशीम् मधुरा च कोमला च कान्ता च पदावली यस्यां तादृशी शृङ्गाररसप्राधान्यात्। किंवा वाक्ये पृथक्पदत्वरूपमाधुर्यगुणयुक्तत्वान्मधुरा, झटित्यर्थावगतेः। किं वाऽनिष्ठुराऽक्षररूपसौकुमार्यगुणयुक्तत्वात् कोमला। कोमलाशयत्वात् कान्ता कमनीया, किंवा अर्थौज्ज्वल्यरूपकान्तियुक्तेत्यर्थः। एवं श्लोकत्रयेण सम्बन्धाभिधेयप्रयोजनाधिकारिणोऽपि दर्शिताः। प्रतिपाद्यप्रतिपादकभावः सम्बन्धः। राधामाधवयो रहः केलयः अभिधेयः। तल्लीलानुमोदनजनितानन्दानुभवः प्रयोजनम्, एतद्रसभावितान्तः करण अधिकारी।।३ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३ ।। यदि हरिस्मरणेति; यत्र हरिस्मरणं नास्ति, तर्हि तत्र किमपि महत्तरं कर्म न वर्तते। अतः मनसो सरसतापादानहेतु हरिस्मरणं करणीयमिति विवक्षितमपि च उच्यते, ''हरिरेव जगत् , जगदेव हरिः हरितो जगतो नहि भिन्नतनु इति यस्य मतिर्भवति तस्य परमार्थगतिः।'' यस्य सहृदयस्य रसरासपूर्णहृदयस्य भक्तस्य किञ्च हरिचरणशरणजन्यपरमार्थगतिस्तथा विलासकलाव्यसनिनः ब्रह्मानन्दः रसानन्दः

सहोदरवत् रसानन्दसागरे निमज्जनमपि भूयात् सहृदयस्य। अतः सव्येतरविषाणयोः युगपदुत्पत्तिवत् गीतगोविन्दपाठजन्य उभयत्र प्राप्तये जयदेवसरस्वतेः नाम काव्यस्य याथार्थ्यं युज्यते। अत्र विलासकलायाः प्रपञ्चनं टीकाकृद्भिः संसाधितम्। पिष्टपेषणन्यायेन न किमपि कर्त्तुमीहते। चतुष्षष्ठीकलासु काव्यकला खलु सुकुमारतमा सूक्ष्मकोटिका कलारूपेण प्रसिद्धोऽस्ति। अतः विलासकला तत्र तासु अर्न्तभवति। दीपकालंकारसंयोगस्तथा द्रुतविलम्बितं वृत्तम्। पाञ्चालीरीतिरस्ति। कैशिकीवृत्तिरपि गणिता। माधुर्य्यं शृङ्गाररसत्वात् मधुरत्वं कोमलत्वं शृङ्गाररसवर्णनाप्रसङ्गे सम्भवति। हरिस्मरणे देवादिविषयारतिर्भावं निरस्य राधाकृष्णयोः चिरन्तननायिकानायकभावात् शृङ्गाररसस्य प्रबन्धनमित्यत्र नास्ति संशयः। विषयेऽस्मिन्नारायणधनञ्जयराणाकुम्भकर्णादिभिः निश्चप्रचतया तैस्तैः मान्यैः पूर्वाचार्यैः सप्रपञ्चं विहितम्। जयदेवः स्वकीयां पदावलीं वर्णयितुं स्वस्य ग्रन्थस्य च आशयं विवृणोति सरलवाक्येन। परं वाचपल्लवयति इति श्लोके स्वस्य पदस्य महिमानमुक्त्वा श्लोकेऽस्मिन् काव्यप्रयोजनं सहृदयानामानन्दवर्धनाय काव्ये रुच्यधिकं प्रयोक्तुमिह प्रयत्नः। अत्र श्रेय-प्रेयसोः एकरूपमस्ति।।३।।

**४- वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां**
**जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते।**
**श्रृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धन-**
**स्पर्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः।।४।।**

## (१) नारायणदाशकृत-सर्बाङ्गसुन्दरी

।।४।। सम्प्रति कवीनां प्रशंसाव्याजेन निन्दां कुर्वन्नात्मनः प्रौढिमाह वाच इति। उमापतिधर नामा सान्धिविग्रहिको वाचः पल्लवयति विस्तारयतीत्यर्थः। एतेनास्य व्याख्याशक्ति दर्शिता, निन्दा तु पल्लवग्राहित्वात्। यदुक्तं

पल्लवग्राहिपाण्डित्यं क्रयक्रीतं च मैथुनम्।
भोजनं च परायत्तं तिस्र पुंसां विडम्बनाः।।इति।।

शरणः श्लाध्यो दुरूहद्रुते इति, दुरूहे प्रमेये समस्यादौ द्रुते शीघ्रत्वे च श्लाध्यो द्रुतकविरित्यर्थः। द्रुतदुःखोह्य पक्वे वा, निन्दा दुरूह द्रुत एव श्लाध्यो नान्यत्रेत्येव धारणात् तु वेद्या। श्रृङ्गारोत्तरसत्प्रमेयरचनैराचार्य्यगोवर्द्धनस्पर्द्धी कोऽपि न विश्रृत इति श्रृङ्गारप्रधानसत्प्रमेयग्रथनायामाचार्य्यगोवर्द्धनं स्पर्द्धितुमभिभवन्तं कोऽपि न शक्त इत्यर्थः।

अत्रापि अवधारणेन अभिभवितुमिति रसान्तरानभिप्राया निन्दा ज्ञेया श्रुतिधरो धोयी कविक्ष्मापतिरिति धोयी नामा कविराजः श्रुतिधरः श्रवणमात्रादेव गृहीतग्रन्थ इत्यर्थः। निन्दा तु श्रुतिधरतया हेयोपादेयबुद्धिरहितत्वात्पशुत्वापत्तेः। यदुक्तं,

उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति चोदिताः।

अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः।।इति।।

अतएव ते गिरां सन्दर्भशुद्धिग्रन्थविशेषं न जानीते। कस्तर्हि जानातीत्याह जयदेव एवेति। शार्दूलविक्रीडितं वृत्तम्।।४।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। इदानीं कविः कविगणनायां परैरपि कविभिरहं परिगणित इति स्वप्रशंसार्थं क्षेपकमपि तत्कृतं श्लोकं स्वप्रबन्धस्य कुर्वन्नाह, वाच इति। तानेव परिगणितान्कवीन्स्व स्व गुणेनोपश्लोकितानाह; उपमापतिधरनामा कविः वाचोवाणीः पल्लवयति विस्तारयति। साकूतैर्विशेषणैर्गद्यादिप्रबन्धे चतुरः। अपरं च,गिरां वाचा संदर्भशुद्धिं गुम्फवैशद्यं जयदेव एव जानीते। शरण संज्ञः कविः दुरूहद्रुतेः श्लाघ्यो दुर्विचारपदपदार्थज्ञानात्प्रशस्यः। शृङ्गारप्रधाननिर्दोषार्थनिर्माणैराचार्यगोवर्धनस्पर्धी कोऽपि न। एतेन तस्य सर्वाधिक्यमुक्तं भवति।। अपरं च, श्रुतिधरनामा कविविश्रुतो विख्यातः; स तु तस्य गुणैरेव प्रसिद्धः। अपरं च, धोयीनामा कविः कविक्ष्मापतिः। कविराज इत्यर्थः। धोयीति तस्य नाम देशरूढ्या व्युत्पन्नं प्रातिपदिकम्। इति षट् पण्डितास्तस्य राज्ञो लक्ष्मणसेनस्य प्रसिद्धा इति रूढिः। शार्दुलविक्रीडितं छन्दः। समुच्चयोऽलंकारः।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। कविरन्यग्रन्थेभ्योः मद्ग्रन्थे बहवो गुणाः सन्तीति द्योतयन् शार्दूलविक्रीडितेनाह वाच इति। उमापतिधरः नाम कविवाचः वचनानि पल्लवयति विस्तारयति। न तु गुणान् सन्दर्भशुद्धितः शब्दतश्च ग्रन्थविशुद्धिं जयदेव एव परं जानीते नान्य इत्यर्थः। शरणः नाम कविः दुरुहद्रुतेः विषमग्रन्थस्य शुद्धोच्चारतः श्लाघ्यः स्तुत्यः शृङ्गारेति शृङ्गारोत्तराणि शृङ्गारप्रधानानि सन्ति उत्कृष्टानि प्रमेयानि सन्निरचनैः प्रबन्धैः आचार्यगोवर्द्धनः स्पर्धीकोऽपि न विश्रुतः। आचार्यगोवर्द्धनः कविः शृङ्गारप्रधानमेव प्रबन्धं करोति न पुनरर्थादिग्रहणे प्रवीणः इति राजपदेन महाहङ्कारकथनम्।।४।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।४।। तद्गुणविशिष्टापि सरस्वती लक्ष्मणसेनमहाराजसभासु महाकविनामुमापतिधरादीनामस्ति सा किं श्रोत्राणां न सुखावहेत्यत आह; वाच इति। उमापतिधरनामा

लक्ष्मणसेनामात्यो वाचः पल्लवयति विस्तारयति। तथा चोमापतिधरस्य वाङ्माधुर्यशून्यं शब्दार्थगुणशून्यं सच्चित्राख्यमधमकाव्यं न सहृदयहृदयाह्लादजनकमिति भावः। शरणनामा कविर्दुरूहस्य काव्यस्य शीघ्ररचने श्लाघ्यः स्तुत्यः तथा च शरणकवेरपि काव्यं गूढार्थत्वादिदोषयुक्तं प्रसादादिगुणरहितं चेति तदापि न विदग्धमनोविनोदास्पदमिति भावः। तथा शृङ्गारोत्तरेति शृङ्गाररस एवोत्तरः श्रेष्ठो यत्र, शृङ्गारेणोत्तरं प्रधानं वा यत्सत्प्रमेयमुत्तमं वस्तु तस्य रचनैः कवितायां ग्रन्थनैराचार्यगोवर्धनस्पर्धी गोवर्धनाचार्येण सह स्पर्धावान्कोऽपि न विश्रुतो न ख्यातः। अत्र शृङ्गारेत्यादिना शृङ्गाररसप्रधानकाव्यरचनायामेव तस्य सामर्थ्यम्। रसान्तरवर्णने तु सोऽप्यप्रौढ एवेति तत्काव्ये वर्णनीयार्थस्य शुद्धत्वेऽपि माधुर्यगुणसंपन्नपदरचनायां सोऽप्यशक्तश्चेति ध्वनितम्। इतरविद्याध्ययनादिनाचार्यत्वं सत्काव्यरचनायामप्रयोजकमिति सोपहासमुक्तमाचार्येति। तथा च स न सत्कविर्नापि सत्कविहृदयं तस्येति भावः। धोयी कविक्ष्मापतिः धोयीनामा कविराजः। श्रुतिधरः श्रुतिः श्रवणं तन्मात्रादेव ग्रन्थग्राही। तस्योच्चरितमात्रग्रहित्वमेव न सत्कवितायां कौशल्यमिति भावः। महाहंकारकथनाय राजोपमा। तथाऽहंकारादेव स्वस्य कविराजपदवीमानीतवान्। सत्कविमध्ये तु तस्य गणनापि नेतिभावः। गिरां वचसां संदर्भशुद्धिं गुणालंकारसंपन्नग्रन्थरचनाविशेषं जयदेव एव जानीते, नान्यः। अतोऽन्यकाव्यश्रवणे तथा न संतोषो यथा जयदेवकविताश्रवणेनेत्येतदेव श्रोतव्यमिति भावः। "पल्लवः किसलये षिङ्गे विटपे विस्तरे बले" इति विश्वः। "लघु क्षिप्रमरं द्रुतम्"। "उत्तरं प्रतिवाक्ये स्यादूर्ध्वे दिव्ये भ्रमेऽन्यवत्" इति च।।४।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।४।। ननु जयदेवसरस्वत्येव हरिस्मरणप्रवणैर्विलासकुतूहलिभिश्च किमिति श्रोतव्या। उमापतिधरप्रभृतीनां तत् समानं कवीश्वराणां विद्यमानत्वात्। तद्वाण्यपि श्रूयतामित्याशङ्क्य तेषां दोषाविस्करणपूर्वकं स्वस्य सारस्यं प्रकटयति। वाच इति। उमापतिधरनामान्वर्थसंज्ञः कविः। तादृशोऽपि स कविः वाचः पल्लवयति करोतीति। केवलं मृदुपदवतीं कवितां करोति। न तु रसगुणालङ्काररसम्पन्नामित्यर्थः। पल्लवशब्दान्नतुवन्तात्तत्करोति णिचि "विन्मतोर्लुगिति" मतुपो लुक्। तथा शरणो नाम कश्चन कविः सोऽपि गिरां वाचां सन्दर्भशुद्धिं पदघटनापाटवं जानीते जानाति। केवलपदघटनाघटितां कवितां रचयति न त्वलङ्कारालङ्कृतामित्यर्थः। तथा च श्रुतिधरो नामान्वर्थसंज्ञः कश्चन कविः कोऽपि भक्तकविद्वयादत्यन्ताप्रसिद्ध इत्यर्थः। अतएव कोऽपीत्युक्तं, तथा धोयी नाम कश्चन कविः स तु न विश्रुतः न प्रसिद्धः स्वजनैरेव

कविरिति व्यवह्रियते। न तु दिगन्तविश्रुत इत्यर्थ। अत: दुरूहादृते कुतर्कं विना "अन्यारादित्यादिना पञ्चमी"। शृङ्गारोत्तराणि शृङ्गाररसप्रधानानि यानि सत्प्रमेयरचनानि शृतिकटुत्वादि दोषरहितानि निर्माणानि तैर्हेतुभिराचार्य्यगोवर्द्धनस्पर्द्धि।

आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि।
स्वयमाचरते यस्तु तमाचार्य्यं प्रचक्षते।।

इत्युक्तलक्षणलक्षितो लोकगुरुर्जयदेव एव नान्य इत्यर्थ:। अतएवात्र जयदेवेऽयोगान्य-योगव्यवच्छेदेन सकलापि कविता सामग्री वर्त्तत इति सूचयितुमेवकार प्रयोग इति भाव:। तथा च जयदेवस्यैव सरस्वती श्रोतव्या न तूमापतिधरप्रभृतीनामितिभाव:। अन्वयान्तरं वा, उमापतिधर: वाच: पल्लवयति, शरण: दुरूहाद्रुते शृङ्गारोत्तरसत्प्रमेय रचनै: श्लाध्य: अर्थनिर्माणे चतुर: नत्वलङ्कारादिनिर्माणे। "गोवर्द्धनस्पर्द्धी विरोधी श्रुतिधर: तत्रापि धोयीकवि: न विश्रुत:" सन्दर्भस्य रसगुणालङ्कारवाक्यधर्मसंघस्य शुद्धिं सम्यक्काव्यघटनासामग्रीं जयदेव एव जानीते नान्य इत्यभिप्राय:। अतश्च तस्यैव वाणी श्रोतव्या नान्येषामितिभाव:। अत्र जयदेवकवेरुमापतिधरप्रभृतिभि: कविभिरौ-पम्याक्षेपपूर्वकं व्यतिरेकप्रतिपादनाद्व्यतिरेकालंकार:।

शाद्धे वार्थेऽथवाक्षिप्ते औपम्ये वस्तुनोर्द्वयो:
यद्भेदकथनं सोऽयं व्यतिरेक उदाहृत: ।।इति।।

अत्र कविप्रसङ्गादिदं बोद्धव्यम्।

शुचिर्दक्ष: शान्त: सुजनविनुत: सुनृ:
कलावेदी विद्वान् किल मृदुपद: काव्यचतुर:।
कृतज्ञो दैवज्ञ: सदयहृदय: सत्कुलभव:
शुभारागछन्दो गुणगणविवेकी स हि कवि:।।

कायिकादिस्वरूपं तु,

कायिको वाचिकश्चार्थ: शिल्पिको मार्दकानुग:।
विवेकी भूषणार्थी च कवय: सप्तकीर्त्तिता: ।।१।।
आवापोद्धारकृद्यावन्मनसो रुचिरात्मन:।
कायिको वाचिक: शुद्धवागाडम्बरकारक: ।।२।।
अर्थोऽभिधेयश्चित्रार्थी शिल्पिको द्वयचित्रकृत्।
शब्दार्थ मार्द्दवापेक्षी कवि: स्यान्मार्दवानुग: ।।३।।
शास्त्रालङ्कारसंस्कारी विवेकी कविपुङ्गव:।
अलङ्कारैकनिष्ठो यो भूषणार्थीबुधैर्मत: ।।४।।

उदात्तादि स्वरूपं तु अस्मत्कृत**प्रसन्नराघवव्याख्याने** निपुणमुपपादितं द्रष्टव्यम्।।४।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।४।। लक्ष्मणसेनसभासदां स्वरूपकथनेन निजोत्कर्षप्रतिपादनेन स्वकाव्यमाहात्म्यं सूचयति। उमापतिधरनामा कश्चित् कविः वाचः पल्लवयति विस्तारयति न तु गुणादिकं वेत्तीत्यर्थः। गिरां वाणीनां सन्दर्भशुद्धिं मूलशुद्धिं जयदेव एव जानीते नान्यः कविरिति। मूलशुद्धिश्च शब्दार्थवैशिष्टयम्, तच्च निर्द्दोषगुणवत्तालङ्कारादियोगित्वे सति रसवत्त्वम्। तदुक्तं **सरस्वतीकण्ठाभरणे**, 'निर्द्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्। रसान्वितं कविः कुर्व्वन् कीर्त्तिं प्रीतिञ्च विन्दति।।' शरणनामां कविः दुरूहद्रुते दुरूहस्य दुःखेनार्थप्रतिपादकस्य द्रुतिः तरा, तया श्लाध्यः। तथा च दुःखेनार्थप्रतिपादकं काव्यं त्वरया करोति न तु सुबोधम्। श्रृङ्गारोत्तरसत्प्रमेयरचनैः श्रृङ्गारप्रधानः सन् प्रमेयोऽर्थो यत्र तस्य काव्यस्य रचनैः निर्माणैः आचार्य्यगोवर्द्धनस्पर्द्धी न कोऽपि न विश्रुतः न ख्यातः। स तु खृङ्गाररसं प्राधान्येन वर्णयति, न तु भगवच्चरितानुसङ्गितयेति भावः। धोयी नामा कविक्ष्मापतिः कविनृपःश्रुतिधरः श्रवणमात्रेणैव ग्रन्थं गृह्णाति न तु स्वतःकर्त्तुं समर्थः इति। अत्र स्वरुपकथनप्रसङ्गेन निजोत्कर्षकथनं न दोषाय तथा च दण्डी, स्वगुणाविष्क्रियादोषो नात्र भुतार्थसंशिनामिति। **भगिरथ**स्तु उमापतिधरःवाणीं पल्लवयति तस्य गिरां सन्दर्भशुद्धिमेव जयदेवो जानिते। एवं शरणादावपि व्याख्येयम्। स्वस्य गुणमात्रग्राहित्वं दर्शितमित्याहः। वस्तुतस्तु लक्ष्मणसेनसभासदां वर्णनं कुर्वन्नैव स्वकाव्योत्कर्षप्रतिपादनाय लक्ष्मणसेननृपेणेवाहं परीक्षित इत्याह इति। कविश्चासौ क्ष्मापतिस्चेति कविक्ष्मापतिः। लक्ष्मणसेनः, जयदेव एव जयदेवविषय एव गिरां सन्दर्भशुद्धिं जानीते। किमन्ये कवयः तत्सभायां न सन्तीत्यत आह, उमापतिधरो वाचः पल्लवयति सम्यक्प्रकारेण वाचः पल्लवयति विस्तारयीतीति शब्दचित्रनाना-काव्यकरणेन स तु महान्। एवं शरणादावपि उत्कर्षपरतयैव व्याख्येयमिति ब्रुमः। 'उत्तर' प्रतिवाक्ये च प्रधाने च नपुंसकम्। उत्तरादिशि कौवेर्य्यां पश्चात्कालेऽपि चोत्तर' इति।।४।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।४।। इदानीं सरस्वतीप्रामाण्योत्कर्षाय केनचिद्भागवतोत्तमेन कविराजसभायां वर्णितं पद्यं सङ्गृह्यते कविना। नन्वेतन्नानागुणसंयुक्ताऽपि सरस्वती [३]लक्ष्मणसेनमहानृपतिवर-सभायामुमापतिधरादीनां कवीनामप्यस्ति। सा किं न श्रोतृणां[४]श्रवणरतिजनकेत्याह, वाच इति। उमापतिधरसंज्ञो लक्ष्मणसेनमन्त्री वाचः [५]वाणीः पल्लवयति [६]विस्तारयति।

तथा तस्यापि काव्यं व्यङ्ग्यार्थशून्यं शब्दवि[७]चित्रार्थशून्यमधमं च। [८]न रसज्ञचतुर-हृदयाह्लादजनकमिति भावः। तथा च राजसभायां शरण इति नामा कश्चित्कवि र्दुरूहस्य गूढार्थस्य द्रुतेः शीघ्रोच्चारणतः श्लाघ्यः स्तुत्यः। तथा चास्य कवेः काव्यं गूढार्थत्वादिदोषसहितं प्रसादानुग्रह १रहितं चेति अत एव न [२]विद्वज्जनमनोरतिजनकमिति ध्वनितम्। तथा शृङ्गारोत्तरस्य सत्प्रमेयस्य शृङ्गाररस एव उत्तरः श्रेष्ठो तत्र; शृङ्गारेणोत्तरं मुख्यं वा; सत्प्रमेयमुत्तमं वस्तु तस्य रचनैः कवितायां मुख्यप्रकथनैः। ३आचार्यगोवर्धनेन गोवर्धनाचार्येण सह ४स्पर्धी स्पर्धावान्न कोऽपि विश्रुतो५विख्यातः। ६शृङ्गाररस ७रचनायामेतस्य ८प्रौढत्वम्। रसान्तरकथने सोऽप्यसमर्थ एव।९अत एव तत्कवित्वं न सज्जन १०हृदयगमकमिति भावः। ११आचार्यपदमुपहासार्थम्। धोयी नामा कविक्ष्मापतिः कविराजः श्रुतिधरः श्रवणमात्रग्राही श्रुतार्थधरो वा। न तु तस्य १२काव्यरचनायां स्वकौशल्यम्। उच्चारितमात्रग्राहक इति भावः। १३क्ष्मापतिः; शब्देनाहङ्कारकथनाय १४राजोपमा न तु कविगणना तस्येत्यर्थः गिरां वचसां १५सन्दर्भशुद्धिं[५] गुणालङ्कारादिग्रथनविशेषं जयदेवकविरेव जानीते ; नान्यः कश्चित्कविः। अत एव जयदेवकृत गीतगोविन्दकाव्यश्रवणे सन्तोषः, तथा नान्यत्र काव्ये। अत १६एव श्रोतव्यमिति भावः। १७''पल्लवः स्यात्किसलये विटपे विस्तरे जले'' इति **विश्वप्रकाशः** (११०.३१) ''लघुक्षिप्रमरं द्रुतम्'' **इत्यमरः** (१.१.६४)। ''उत्तरं प्रतिवाक्ये स्यादूर्ध्वे दिव्योत्तमेन्यव'' दिति च (**विश्वः**१०१.-९९)। उदात्तनामाऽयमलङ्कारः। तल्लक्षणं **शिशुबोधे**,

''उच्चैः समृद्धिमद्वस्तुवर्णनं स्यादुदात्तता।
सामर्थ्यं जायते यत्र[१]चरमोत्कर्षचित्रिता।।इति।।४।।''

१.नास्ति-ब.२.दुरूहद्रुमे-अ.ब.दुरूहाहृते-ड.३.लक्षणसेन-अ.४.रतिजनकेत्याह-ग.५.नास्ति-अ.ब. ६.नास्ति-ब.७.विचित्रार्थगुणशून्यम्-फ.ह.ज.चित्रार्थगुणशून्यम्-ग.८.नवरसज्ञ-ग.

१.रचितं-अ.ब.२.विद्वज्जनमोरति-अ.३.आचार्यगोवर्धनाचार्येण सह-अ.ह.४.नास्ति-अ.फ.ग.ह.ज. ५.न विख्यातः-फ.ह.ज.६.शृङ्गाररसमुख्य-इ.फ.ग.ह.ज.७.रचनायातस्य-ब.८.प्रौढ्यम्-इ.फ.ग.ह.-ज.प्रौढं च-अ.९.अतस्तत्कवित्वम्-इ.फ.ग.ह.ज.१०.गृह्यदयगमक-अ.११.आचार्यमुपहा- सार्थम्-ब.१२.कविरचनायां स्वकौशलम्-अ.इ.फ.ग.ह.ज.१३.क्ष्मापति-शब्देन-इ.फ.ग. १४.राजोपमानं तु-ब.१५.संशुद्धिम्-ग.१६.एतदेव-इ.फ.ग.ह.ज.१७.पल्लवः किसलये पिङ्गे विटपे विस्तरे चले इवि विश्वः-इ.फ.ग.ह.ज.किसलये पिङ्‌विटपे विस्तरेचल इलपूति विश्वप्रकाशः-ब.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।४।। [२]कविरन्यग्रन्थेभ्यो मद्ग्रन्थे बहवो गुणाः सन्तीति द्योतयन्नाह[३]वाच इति।

उमापतिधर: कविर्वाच:, [४]वचनानि परं पल्लवयति विस्तारयति [५]न तु गुणादिकम्। [६]गिरां [७]सन्दर्भशुद्धि[५]मर्थत: शब्दतश्च ग्रन्थेन विशुद्धिं जयदेव [८]एव परं जानीते नान्य इत्यर्थ:। शरण: कवि[९]र्दुरूहद्रुते: [१०]विषयस्य ग्रंथस्य शीघ्रोच्चारणत: श्लाध्य: स्तुत्य:। शृङ्गारेति। शृङ्गारोत्तराणि शृङ्गारप्रधानानि[११]सन्ति उत्कृष्टानि प्रमेयानि वाक्यानि तेषां रचनै: प्रबन्ध:आचार्यगोवर्धनस्पर्धी कोऽपि न विश्रुत:। [१२]आचार्यगोवर्धन: कवि: [१३]शृङ्गारप्रधानमेव प्रबन्धं [१४]करोति। धोयी नामा कविक्ष्मापति: कविराज: श्रुतिधर: [१५]श्रुत्या श्रवणमात्रेणैव धारयति न पुनरर्थादिग्रहणे प्रवीण इत्यर्थ:। राजपदेन महाहङ्कारकथनम्।।४।।

१.चमोत्कर्ष-ब.परमोत्कर्ष-इ.२.इदानीं कवि:-क.अथान्यसर्व कविभ्य: पदलालित्ये द्योतयन्नाह-ल.अथान्यसर्वकविभ्य: पदलालित्य द्योतयन्नाह-म.३.वाच:-पल्लवयतीति-क.४.वचनपरं पल्लवयति-ल.म.वचनानि पल्लवयति-क.५.नान्य:-ल.म.६.नास्ति-ड.७.सन्दर्भशुद्धिं वचनरचना-विशुद्धिम्-ल.म.८.नास्ति-ड.९.र्दुरूह्यद्रुते:-ड.१०.विषयग्रन्थस्य-क.११.नास्ति-क.१२.त:-१५.पर्यन्तो भागो नास्ति-ल.म.१३.शृङ्गारप्रधानमेवा-प्रधानमेवाप्रबन्धं करोति-ड. १४.करोतीत्यर्थ:-क.

## (९) कृष्णपण्डितकृत-जयन्ती

।।४।। ख्यात्यर्थं कविं स्तौति, (वाच इति)। उमापतिधर: तन्नामको मण्यालोकव्या-ख्याता कवि: वाच: पल्लवयति विस्तारयति। तत्कवितायां समासव्यासरूपगुण इत्यर्थ:। जयदेव एव गिरां वाचां सन्दर्भस्य घटनाया शुद्धिं[५] दोषरहितत्वं प्रतिकूलवर्णत्वादिराहित्यं जानीते। जयदेवतुल्यो यथोचितार्थसन्दर्भकर्ताऽन्यो नास्तीत्यर्थ:। दुरूहात् कष्टात् १ क्लिष्टार्थात् ऋते दुरूहं विनेत्यर्थ:। शरण: शरणसंज्ञक: श्ल्याघ्य:; अक्लिष्टकाव्यकर्त्तेत्यर्थ:। शृङ्गारो रतिस्थायिक: प्रथमरस: उत्तरं अधिक: यस्मिन् तच्च तत् सत् सत् निर्दुष्टं प्रमेयं कल्प्यमानवस्तु तस्य रचनानि काव्यरूपाणि तै:। कोऽपि कवि: आचार्यश्चासौ गोवर्धन: गोवर्धनाचार्य इत्यर्थ: ; तत्स्पर्धी तत्सदृश: न विश्रुत: नाकर्णित: न ज्ञात एवेत्यर्थ:। धोयी; एतत्संज्ञक: कवीनां क्ष्मापति: राजा श्रेष्ठ इति श्रुतिधर आकर्णित:। यद्वा श्रुतिधर: सकृत्श्रुतस्य शास्त्रस्य धर इति।।४।।

१.दुरूहादृते इति पाठानुसारिणी व्याख्येयम् २.अत: परं गुरुकविपितृवर्णननि इति दृश्यते-ड.च.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।४।। सम्प्रति कवीनां प्रशंसाव्याजेन निन्दां कुर्वन् आत्मन: प्रौढिमाह; वाच इति। उमापतिधरनामा कश्चित् कवि: वाच: पल्लवयति बहुवर्णनया विस्तारयतीत्यर्थ:। "पल्लव: किसलये षिङ्गे विटपे विस्तरेऽचले।" इति। शृङ्गारे (ल)अ[न]न्त-

रागोऽस्तीति। एतेनास्य व्याख्याशक्तिः दर्शिता। निन्दा तु पल्लवग्राहित्वात्। यदुक्तम, ''पल्लवग्राहिपाण्डित्यं क्रयक्रीतञ्च मैथुनम्। भोजनं च पराधीनं तिस्रः पुंसां विडम्बनाः।।'' इति। शरणः श्लाघ्यो दुरूहद्रुते इति। शरणनामा कविः दुःखेन ऊह्यते तर्क्यते इति। दुरूहं प्रमेयं, तस्मिन् यद् द्रुतं शीघ्रत्वं, तस्मिन् श्लाघ्यः समस्यादौ द्रुतकविरित्यर्थः। द्रुतं दुःखो उपदज्ञो वा। किं वा दुस्तर्क्ये शीघ्रे च श्लाघ्यः। निन्दा तु दुरूहद्रुत एव श्लाघ्यः। नान्यत्रेत्यवधारणाद्वेद्या। शृङ्गारेति। शृङ्गारोत्तराणि शृङ्गाररसप्रधानानि यानि सत्प्रमेयरचनानि ग्रथितानि; तैः कारणभूतैः आचार्यगोवर्द्धनं स्पर्धितुं प्रतिनिधिर्भवितुं कोऽपि कविर्नविश्रुतः न ख्यातः न शक्त इत्यर्थः। ''सत् प्रशस्ते विद्यमानेऽभ्यर्हिते साधुसत्ययोः'' इति **कुमुदाकरः**। अत्रापि अवधारणे नरस्यान्तरा अभिन्नतया निन्दा ज्ञेया। श्रुतिधरो धोयी कविक्ष्मापतिरिति। धोयीनामा कविराजः श्रुतिधरः श्रवणमात्रादेव ग्रन्थग्रहीतेत्यर्थः। क्ष्मापतिशब्दोऽत्र राजमात्रपरः। निन्दा तु श्रुतिधरतया हेयोपादेयबुद्धिरहितत्वात् पशुत्वापत्तेः। यदुक्तम, ''उदीरितार्थः पशुनापि गृह्यते, हयाश्च नागाश्च वहन्ति चोदिताः। अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफलानि बुद्धयः।'' इति। अत एव एते गिरं सन्दर्भशुद्धिं सन्दर्भग्रथनं तत्तद्रसानुगुणपदैर्विलास इति यावत्। तस्य शुद्धिं परिपाटीम्; तेन शुद्धिं[५] दोषरहितत्वं वा न जानते। कस्तर्हि जानीते इत्याह, जयदेव एवेति। ''अनुपसर्गात् ज्ञः'' इति कर्त्रभिप्राये क्रियाफले जानातेरात्मनेपदम्। अयमेव रसालङ्कार उक्त इत्यर्थः। यदुक्तम् ''निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्। रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति।।'' इति। तदिदं तात्पर्यं यस्येदृशः प्रकर्षः सोऽयं जयदेवकविः रसप्रबन्धं करोतीति वाक्यान्तरसङ्गतेन कवेर्नाम्नैव प्रबन्धस्य वैशिष्ट्यं प्रतीयते इति कृत्वा प्रेक्षावन्तः प्रवर्त्स्यन्तीति सर्वमवदातम्।।४।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।४।। अथैतदावेशेनैवान्यत्र प्राकृतवर्ण्णनप्रायतामालोक्यात्मनः प्रौढ़िमाविष्कुर्वन्नाह वाच इति। उमापतिधरनामा कविः वाचः पल्लवयति मात्रं, न तु काव्यगुणयुक्ताः करोति, पल्लवयति विस्तारयति मात्रं, न तु काव्यगुणयुक्ताः करोति, पल्लवग्राहिता दोषोऽस्य। शरणनामा कविः दुरूहस्य दुर्ज्ञेयस्य काव्यस्य द्रुतेः शीघ्रवचने श्लाघ्यः, न तु प्रसादादिगुणयुक्ते। शृङ्गार एवोत्तरः श्रेष्ठो यत्र तस्य सत्प्रमेयस्य सामान्यनायक-नायिकावर्णनस्य रचनैराचार्यगोवर्द्धनस्य स्पर्द्धावान् कोऽपि न विश्रुतः, न रसान्तरवर्णनैः। धोयीनामा कविराजः श्रुतिधरः प्रसिद्धः श्रवणमात्रेण ग्रन्थाधिकारी, न तु स्वयं कवितया।

गिरां शुद्धिं शोधनप्रकारं जयदेव एव जानीते, केवलं भगवद्गुणवर्णनरूपं तद्वाचादिसर्गो जनताघविप्लव इत्युक्तेः। अथवा दैन्योक्तिरियं यथा गिरां सन्दर्भशुद्धिं किं जयदेव एव जानीते न जानीत एव। यत्र उमापतिधरः वाचः पल्लवयति, शरणो दुरूहद्रुते श्लाघ्यः, गोवर्द्धनाचार्यस्य तुल्यो नास्त्येव, धोयी तु कावीनां राजा श्रुतिधरश्च। यद्यपि स्वयं दैन्यैन एवमुक्तं तथापि सरस्वती पूर्वार्थमेव प्रमाणयति।।४।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।४।। ननु उमापतिधरप्रभृतीनां कविवराणामपि एतादृशी भारती, साऽपि श्रोतव्या इत्याशंक्य तत्र व्यतिरेकगुणप्राकृतरसवर्णनप्रायतामालोक्यात्मप्रौढ्याविष्कारेण तच्छ्रवणं निराकरोति। वाच इति उमापतिधरसंज्ञः कविः वाचो वचांसि पल्लवयति, विस्तारयतिमात्रम्। न तु रसगुणालङ्कारयुक्ताः करोति। अतोऽस्य पल्लवग्राहित्वदोषः। शरणनामा कविः दुरूहस्य दुर्बोधस्य काव्यस्य द्रूते शीघ्ररचने श्लाघ्यः, स्तुत्यः। न तु प्रसादादिगुणयुक्तस्य। शृङ्गार एव उत्तरः प्रधानं यस्य सत्प्रमेयस्य रचनैः कल्पनैः आचार्यगोवर्द्धनेन स्पर्धी स्पर्धावान् कोऽपि न। न च विविधरसमयभगवल्लीला-बाहुल्यवर्णनचातूर्यः। अंतस्तत्कवित्वं सज्जनहृदयाह्लादकं न भवतीति भावः। आचार्यपदोपन्यास उपहासार्थम्। धोयीनामा कविक्ष्मापतिः कविराजः श्रुतिधरो विश्रुतः प्रसिद्धः। श्रवणमात्रेणैव ग्रन्थादिधारी, न तु स्वकवितया। विपरीतलक्षणयैव कविक्ष्मापतिः नितरां गिरां वाणीनां यः सन्दर्भः शब्दार्थप्रथनौचित्यचातुरी तस्य शुद्धिं श्रीभगवल्लीलादि-विचित्रवर्णनैः शोधप्रकारं जयदेव एव जानीते, न त्वन्यः। कर्त्तृसमभिव्याहृतेनैव कारेणान्ययोगव्यवच्छेदादयं नान्यगामिगुणः। जयदेवे तु योऽन्यत्र सोऽप्यस्तीति सूचितम्। अतो जयदेवस्य एव सरस्वती श्रोतव्या नत्वन्येषां कुकवीनामिति भावः।

''नूनं दैवेन निहता ये चाच्युतकथासुधाम्।
हित्वा शृण्वन्त्यसद्गाथाः पुरीषमिव विड्भुजः।।'' इति।
''काव्यालापांश्च वर्जयेत्'' इति।

ग्राम्यगीतं न शृणुयादित्यादिनिषेधश्रवणात् सर्वथा तेषां तादृशी वाणी परिहार्यैव। किञ्च ''अवैष्णवमुखोद्गीर्णं पावनं भगवद्गुणम्। जीवन्मुक्तो न शृणुयात्सर्पोच्छिष्टं यथा पयः।।'' इति। भगवद्गुणनामाद्यङ्किता भक्तमुखात् उद्गता भारती तु नित्यं श्रोतव्या एव। तत्र **श्रीमद्भागवते,**

''यस्मिन् महन्मुखरिता मधुभिच्चरित्र पीयूषशेषसरितः परितः स्रवन्ति।

ता ये पिबन्त्यतितृषो नृप गाढकर्णैस्तान्नो स्पृशन्त्यतनुभृद् भयशोकमोहाः।।'' इति।

अपि च सततप्रेमपरायणजनमुखविगलितकथामाध्वी श्रुतिपुटकेन निपीता जनयति कृष्णेऽमलं प्रेम' इति। किं वा जयदेवस्य भक्तस्वभावदैन्योक्तिरियम्। गिरां सन्दर्भशुद्धिं किं जयदेव एव जानीते। न जानीते इत्यर्थः। यतः उमापतिधरः वाचो वचनानि पल्लवयति। नूतनयति। शरणो दूरूहद्रूते श्लाघ्यः। गोवर्द्धनाचार्यतुल्यः कोऽपि नास्त्यैव। धोयी तु कवीनां राजा श्रुतिधरश्चेति। यद्यपि स्वयं दैन्येन एवमुक्तं तथापि सरस्वती तु तदसहमाना पूर्वार्थमेव प्रमाणयति।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। वाच पल्लवयतीति; वाक्पल्लवनं विस्तारः उमापतिधर नाम्ना लक्ष्मणसेनस्य सभाकविना कृतः। नारायणदासस्य सर्वाङ्गसुन्दरी टीकायां वाचं पल्लवयति, विस्तारयति इत्युक्त्वा पल्लवग्राहि पाण्डित्यम् उपन्यसति तदहं मन्ये न युज्यते। पल्लवनं न खलु भवति पल्लवग्राहित्वमिति। जयदेवः खलु सन्दर्भरचनायां शुद्धतामाधाय काव्यरचनां करोतीति आत्मख्यातिसम्भावना। परन्तु विषयेऽस्मिन् स्वस्य समकालकवीनामौत्कर्षमाख्याय स्वस्य तेषु वैशिष्ट्यं प्रतिपादयति। शरणनामधेयः कविः प्रशंशनीयोऽभूत्। आर्यासप्तशतीकारः गोबर्धनाचार्यः शृङ्गारकाव्यकदम्बरचनायां निश्चप्रचतया स्पर्द्धाहीनश्चासीत्। अपि च धोयीकविः श्रुतिधरः स्मरणशीलश्चासीत्। प्रसङ्गेऽस्मिन् टीकाकाराः वाच्यार्थं विहाय वाच्यान्तरसंक्रमितध्वनिं स्वीकुर्वन्ति। विशेषतः रसिकरङ्गदाटीकाकारानुसारं श्लोकेऽस्मिन् कवेः जयदेवस्य विवक्षास्ति यत्र उमापतिधरः केवलं वाचः पल्लवनं नाम विस्तारं करोति। तत्र काऽपि सारवत्ता नास्ति। तथैव शरणःखलु दूर्बोधश्लोकरचनां झटित्येव कुरुते। अतः तत्र तत् काव्यं सारल्याभावात् नैवापादनीयम्। तदनु आचार्यः गोवर्धनः इत्येवापरप्रश्नः शृङ्गाररसं विहाय किमप्यधिकं न कर्त्तुं समर्थः। धोयीकविरन्यस्य काव्यं श्रुत्वा तदनु काव्यं करोति। तत्र स्वकीयता नास्ति! अनेन प्रकारेण कवीनां तेषां तेषां महत्वमवगणय्य स्वीयां महत्तां ध्वनयति कविर्जयदेवः। जयदेवः खलु समसामयिककवीनां काव्यकलां प्रति कटाक्षनिक्षेपेण स्वीयरचनायाः महत्तां प्रतिपादयत्यपि। अपरञ्च यत्र भगवतो परमेश्वरस्य लीला न वर्णिता सा कथं सहृदयैः हृद्या भविष्यतीत्येवापरप्रश्नः। अत्र आत्मप्रशंसा। चारणस्य स्तुतिपाठकार्थे प्रयोगः। व्याजस्तुत्यलंकारः।।४।।

।। प्रथमः प्रबन्धः / गीतम् १ ।।

।। मालवराग-रूपकतालाभ्यां गीयते ।।

**१-प्रलयपयोधिजले धृतवानसि वेदम्।**
**विहितवहित्रचरित्रमखेदम्।।**
**केशव! धृतमीनशरीर जय जगदीश! हरे! ।।१ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी टीका

।।१ ।। संप्रति भगवतो दशावतारान् वर्णयितुमाह। मालवरागेण गीयते। तस्य ध्यानम्,

नितम्बिनीचुम्बितवक्त्रपद्मशुकद्युतिः कुण्डलवान् प्रमत्तः।
सङ्गीतशालां प्रविशन् प्रदोषे मालाधरो मालवरागराजः।।

हे केशव! हे जगदीश! हे हरे! जयजयेत्याशीः। 'केशव केशिकः नः केशीत्युक्तेः' प्रशस्तकेशोऽपि केशवः स्यादिति। हरिशब्दोपादनम्। ''यमानिलेन्द्रचन्द्रार्ककादिसिंहाशुविष्णुष्विति'' वचनात् यमादिरपि हरिः स्यादिति केशवशब्दोपादानं, किमभीष्टप्राप्तिविषये आशीरित्याह प्रलयेत्यादि। प्रलयपयोधिजले त्वमखेदं यथा स्यात्तथा वेदं धृतवानसि वेदधृतौ त्रैलोक्यरक्षा स्यादिति उपयुक्ताशीः। विहितो वहित्रचरित्रमित्यपि(६) क्रियाविशेषणम्। विहितं वहित्रचरित्रं नौकायाः चरित्रं यत्रेति विग्रहः। ''वहित्रं मानभेदे स्यान्नौकायां पुंनपुंसकम्''। वरुणाश्रमवत् पयोधिशब्दोपादानम्।।१ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१ ।। इदानीं केलिं विवर्णयिषुर्नायकस्य वर्णनेन तद्गुणाकर्णनप्रवीणाञ्श्रोतृन्विधातुं तदवान्तरकेलीरपि वर्णयितुं श्रीकृष्णं नायकं दशभिरवतारैस्तास्ताः केलीः कुर्वाणमुपश्लोकयति।। आदितालेन गीयते। लघ्वादितालः। मालवरागेण, प्रलयेति। हे हरे! धृतमीनशरीर! केशव! जगदीश! असीति। त्वं अखेदं विहितविहित्रचरित्रं(६) यथा स्यात्तथा प्रलयपयोधिजले कल्पान्तसागरवारिणि वेदं धृतवान्। अतो जय।। अत्र "जय" शब्देन सर्वोत्कृष्टत्वम्। तेन सर्वदाऽसाधारण्येन जगत्पाहीति योजना। एवं सर्वत्रासीति तिङन्तप्रतिरूपकं पदं युष्मदर्थेऽव्ययम्। अखेदं। अनु च। विहितवहित्रचरित्रमित्युभयमपि साधारणक्रियाविशेषणम्। तेन पोतचेष्टितमङ्गीकृत्यापि मनागप्यायासं नाप्तवानित्यर्थः। इति प्रथमं पदम्। केशव हरे जगदीश इति संबोधनत्रयमादरातिशयद्योतनार्थम्। अत्र "केशव धृतमीनशरीर जय जगदीश हरे" इति पाठः।। इति

ध्रुवपदम्।। गानवेलायां केशव केशव इति द्विरुक्तिः।। अत्रार्धमागधी रीतिः।। अत्र केशवस्य केवलशब्दवाच्यत्वं हरिशब्दमहितकेशवशब्दवाच्यत्वम् इति व्याख्यानम्। तत्पाठमात्रमप्यजानतां प्रमादेन क्रियाविशेषणानां कर्मसंज्ञा नपुंसकता च। "धृतमीनशरीर" इति मत्स्यावतारः। अत्रोपमातिशयोक्ती अलंकारौ। उत्साहस्थायिभावो वीरो रसः। दशस्वापि पदेषु धीरललितो नायकः।।१ ।।

## (३) जगद्धरकृत-सारदीपिका

।।१ ।। कविरधुना भक्तानुग्रहार्थं विघ्नाभावार्थं च दशावतारवर्णनमाह। प्रलयेत्यादि जगदीश इत्यतः अस्य गीतस्य मालवरागः रूपकतालः तल्लक्षणं "नितम्बिनीचुम्बित-वक्त्रपद्मः शुकद्युतिः कुण्डलवान्किरीटी संगीतशालां प्रविशन् प्रदोषे मालाधरो-मालवरागराजः''। रूपके स्याद्द्रुतंलघुरिति हे केशव !धृतं मीनस्य शरीरं वेदोद्धारणार्थं येन सः हे जगदीश! हे हरे जय उत्कर्षेण वर्द्धस्व कस्मादित्यत आह त्वं प्रलयपयोधिजले कल्पान्तसमुद्रजले निमग्नं वेदं धृतवानसि कथम् अखेदं अपरिश्रमं यथा भवति तथा पुनः कथं यथा स्यात्तथा विहितेति विहितं कृतं चरित्रं समुद्रतरणकारणनौकाचेष्टितं यत्र क्रियायाम्।।१ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१ ।। भक्तजनमनोरथपूरणाय भगवतः सदावतारपरिग्रह इतीहापि मम मनोऽभिलाषिते भगवत्केलिवर्णनरूपे कर्मणि, संभावितवहुप्रत्यूहनिराकरणं स एव करिष्यतीत्याशयेन भगवतोऽवताराणामसंख्यत्वेऽपि प्रधानतया दशावतारपुरस्कारेणैव कृष्णस्तुतिं करिष्यतीत्यादौ मीनरूपं स्तौति प्रलयेति। गीतस्यास्य मालवरागः। रूपकतालः। "काललक्षणं रूपके स्यात्" इति संगीतरत्नाकरः। गीतार्थस्तु, हे केशव! जय सर्वोत्कर्षेण वर्तस्व। ननु मे सर्वोत्कर्षेण वर्तने कुतः सामर्थ्यमित्यत आह; जगदीशेति। जगतां चतुर्दशभुवनानामीशः प्रभुः। तथा च चतुर्दशभुवननाथस्य कथं न सामर्थ्यमिति भावः। तत्र हेत्वन्तरमाह; हे हरे इति। हरति भक्तानां क्लेशमिति हरिस्तादृश! पुनः कीदृश ? धृतं परिगृहीतं स्वेच्छया मीनशरीरं येन तादृश। एतदृध्रुवपदं प्रतिपदमनुवर्तमानम्। तदुक्तम् "ध्रुवत्वाच्च ध्रुवो ज्ञेयः" इति। अत्र यद्यपि क्वचित्तनुसंधारणमात्रमेवानित्यं ततोऽपि तिर्यग्योनिमीनादिशरीरमयं किमिति ग्राह्यमित्यत आह, प्रलयेति। त्वं प्रलयपयोधिजले प्रलयकालीनाः परस्परमिलिता ये पयोधयः समुद्रास्तेषां जले निमज्जन्तं वेदं मीनशरीरमुपादाय धृतवानसि। कथम्? अखेदं यथा स्तात्तथा विहितं कृतं वहित्रस्य पोतस्य चरितं यत्र तत्तथा। अत्र पयोधिपदेनैव जलत्वे प्राप्ते पुनर्जलपदोपादानमन्त-र्धामादिरहितत्वेन विश्रामस्थलाभावं सूचयितुम्। तथा च निरालम्बे पयोधौ वेदं धृतवानसीति

वेदधारणार्थमेव तच्छरीरपरिग्रह इति भावः। "पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः"।।१।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१।। रसेषु श्रृङ्गाररसप्रधानं हरेरधिष्ठानममुं वदन्ति।

उद्दीपनं तस्य च गीतमाहुस्तस्मात् प्रशस्तं प्रवदन्ति गीतम्।।

श्रीविष्णुरूपः खलु सामवेदस्तस्मात्समुत्पन्नमिदं हि गीतम्।

तद्देवतानां पुरतः प्रगीतं भक्ता बुधाः पर्वदमामनन्ति।।

ताम्बूलमप्यसमर्प्य सुवाद्यनृत्यगीतैः सुतृप्तमभिपूजयतात्पुरावदिति।।

सङ्गीतमन्त्रशास्त्रोक्तवचनैर्गीतस्य सर्वेश्वरप्रीतिहेतुत्वात् स्वर्गादिफलदायकत्व-प्रतिपादनात्पद्मावतीचरण चारणानुकूलं श्रोतृचित्तानुरञ्जकगीतमुदाहरति। प्रलयेत्यादि। अत्रेदं बोद्धव्यं गीतलक्षणं तु,

रञ्जकस्वरसन्दर्भो गीतमित्यभिधीयते।
श्रुत्यनन्तरभावी यः स्निग्धोऽनुरसनात्मकः।।
स्वतो रञ्जयति श्रोतुचित्तं स स्वर उच्यते।

**सङ्गीतरत्नाकरे**

नृत्तं वाद्यानुगं प्रोक्तं वाद्यं गीतानुवर्त्ति च।
अतो गीतं प्रधानत्वादत्रादावभिधीयते।।
गीतेन प्रीयते देवः सर्वज्ञः परमेश्वरः।
गोपीपतिरनन्तोऽपि वंशीध्वनिरतिं गतः।।

अत्रत्यानि गीतानि प्रबन्धमध्ये गाथारूपाणीति केचित्। तदुक्तं **सङ्गीतरत्नाकरे** (३४-२३)

प्रबन्धपरिगणनस्थले एलाकरण ढेङ्किभिरित्यारभ्य-

चक्रबालः क्रौञ्चरदः स्वरार्थोऽध्वनि कुट्टनी।
आर्य्या गाथाद्विपथकः कलहंसश्च तोटकम्।।इति।।

अष्टपद्यारूपाणीत्यपरे, तदुक्तं विप्रकीर्णप्रबन्धपरिगणनस्थले -

पञ्चाननोमातिलकौ त्रिपदी च चतुष्पदी।
षट्पदी वस्तुसंज्ञश्च तथाचाष्टपदी स्मृता।।

गतिस्वरगीतस्य नृत्यस्य च प्रतिष्ठाङ्गभूतस्तालः, तदुक्तम्,

तालस्तलप्रतिष्ठायामिति धातोर्घञि स्मृतः।
गीतं वाद्यं तथा नृत्तं यतस्ताले प्रतिष्ठितम्।।
तकारस्तु शिवः प्रोक्तो लकारः शक्तिरुच्यते।
शिवशक्ति समायोगात्ताल इत्यभिधीयते।।

अन्यत्राप्युक्तम्,

संयोगे च वियोगे च तालयोरुभयोर्यदा।
वर्त्तते व्याप्तिमान् कालः स तालः परिकीर्त्तितः।।
अनुद्रुतो द्रुतश्चैव लघुर्गुरुरतः परम्
प्लुतश्चेति क्रमेणैव तालाङ्गानि तु पञ्चधा।।
अनुद्रुताभ्यां विन्दु स्याद्विन्दू द्वौ च लघुर्भवेत्।
लघुद्वयं गुरुश्चैकस्त्रिलघुः प्लुत उच्यते।।
पञ्चलघ्वक्षरोच्चारमितामात्रेह कथ्यते।
मात्रार्द्धया कुर्य्यादिह लध्वादिप्लुत कल्पनम्।।
द्रुताशयं तु कथितं चतुरङ्गुलविस्तरम्।
लघुरष्टाङ्गुलं प्रोक्तं गुरोः स्यात्षोडशाङ्गुलम्।।
प्लुते त्यृष्टाङ्गुलं प्रोक्तं तालघाते मनीषिभिः।।

एतादृशस्य तालस्य दशप्राणाः,

कालो मार्गः क्रियाङ्गानि ग्रहो जातिः कलालयः।
यतिः प्रस्तारकश्चेति तालप्राणाः दश स्तृताः।।

एतेषां स्वरूपं तु **सङ्गीतरत्नाकरे** द्रष्टव्यम्। ग्रन्थविस्तरभयान्नात्र लिख्यते। अत्र गीतगोविन्दे गीतानि शूलादितालैरेव प्रायशो गीयन्ते। अत्र शूलादिस्त्रिप्रकारः शुद्धशूलादिः शालिकशूलादिर्देशशूलादिश्चेति। तदुक्तं **रामदेवीये**,

एलाकरणते सीडं वर्त्तिनाजोम्बलस्तथा।
रजोरभा चैकतालेत्यष्टौ सूडक्रमाश्रिताः।।
अयं तु शुद्ध शूलादिर्मुनिना परिकीर्त्तितः;
एलादेकरण वर्त्तिनि का च ते ङकी
चित्राकजोम्बलरसोत्सबमण्डनाः स्युः।
लालक्ष्मलिम्य पुत्रका च एकताली।
शूलक्रमे रविमिताः शमिताः प्रबन्धाः।।

रविमिता: द्वादशसंख्याका:;

अयं शालिक शूलादि: कीर्त्तितो **भरत**र्षिणा।
ध्रुवा अथो रूपकश्च त्रिपुटो झम्प एव च।।
अट्टताल्येकताली च शूलुरित्यभिधीयते।
अयं च देश शूलादिर्मुनिना परिकीर्त्तित: ।।इति।।

अत्र यद्यपि वाग्गेयकारचातुर्य्याद्गीते तालनियतिर्नास्ति, तथापि येन तालेन गीयमाने श्रोतृचित्तानुरञ्जनं भवति तेनैव तालेन गेयम्।

तथा चात्र गीतगोविन्दे गीतानि ध्रुवादिभि: सप्तभिर्देशशूलादितालैरेव प्रायशो गायका: गायन्ति। तन्मध्येऽट्टतालीतालतोऽयम्। गीतमुदाहरति प्रलयेति अट्टताली लक्षणं तु "लघुर्द्रुतौ लघुश्चैक: सा भवेदट्टतालिका"।

अत्रावतारा: सन्त्येऽन्ये सरसिजनयनस्य सर्वतो भद्रा:।
कृष्णादन्य: को वा प्रभवति गोपगोपिकामुक्त्यै ।।

इति वचनार्थं मनसि निधाय दशावतारमध्ये स्वकृतिनायकत्वेन कृष्णमेवातिशयेन वर्णयितुनाम आदौ आद्यावतारान् प्रस्तौति। प्रलयेत्यादि। मालवरागेण गीयते इत्युक्तम् तस्यायमभिप्राय:। मालवरागस्य रागराजत्वात् तद्विरहीणां सायंकालत्वात्तदुपोद्घातपातस्यापि सायं कर्त्तव्यत्वान्मालवरागस्य सायंकाले प्रशस्तत्वात्। मालवरागेण गीयत इत्युक्तमित्यवगन्तव्यम्। तदुक्तम्;

नितम्बिनीचुम्बितवक्त्रपद्म: समुज्वलत्कुण्डलवान् प्रमत्त:।
सङ्गीतशालां प्रविशन् प्रदोषे मालाधरो मालवरागराज: ।।इति।।

अयं राग: पुंराग:। तस्य भार्य्यास्तु गुणक्रियागुज्जरीगोलीचेति। तदुक्तं **रागविवेके,**

भैरवश्चापि भूपाल: श्रीरामपदपञ्जर:।
वसन्तो मालवश्चैव वङ्गालो नाटकस्तथा।।
एतेऽष्टरागा: कथिता: पुंरागा इति सूरिभि:।
वेलाबली मलहरी गौली भूपालयोषित:।।
देवक्रिया मेघरञ्जी कुरञ्जी भैरवस्त्रिय:।
श्रीरागपत्न्य पञ्चाली भल्लारी साहलीति च।।
देशी च ललिता तोडी पदपञ्जरयोषित:।
रामक्रिया वराली च कौशीवासन्तयोषित:।।
गुणक्रिया गुज्जरी तु गौली च मालवस्त्रिय:।।इति।।

कालनियमस्तु,

प्रातर्गुण्डकिरी सदा सलहरी देशाक्षिका गुज्जरी
मध्याह्नेऽपि च रामकृद्वयमथो कर्णाटगौलान्वयः।
सायं मालविका कृतेति सुधियो गायन्ति सायन्तने
सारङ्ग पुनरेव गौलमपरं प्रत्यूषतो भैरवी ।।इति।।

तथा **नीतिरत्नमालाया**मपि,

देशाक्षी भैरवी शुद्धा शारङ्गी या च भैरवी।
देवक्री रक्तहंसी च माहुलीरागरञ्जिता।।
एते सूर्य्यां शतो जाता सायंकाले तु निन्दिताः।
प्रभाते गीयते येन स नरः सुखमेधते।।
शुद्धा नटा च सारङ्गा शुद्धनट्टावरालिका।
वरालिका द्राविला च देशीनां च वरालिका।।
छाया गौली तथा चान्या साहुल्य दोलिके तथा।
मलाहरीकातच्छा च गौरी कर्ण्णाटकाह्वया।।
गौलो मालवगोलश्च रामक्री च तथैव च।
छायारामकृतेरञ्जी छाया सर्व वराटिका।।
कर्ण्णाटाह्वयवङ्गाला इत्येते चन्द्रमेंऽशुजाः।
एते रागा विशेषेण प्रातः काले तु निन्दिताः।।
सायमेषां प्रगानेन ह्युन्नतां श्रियमाप्नुयात्।
तान् विपर्य्यासतः कृत्वा गीता यदि नराधमः।।
पातकव्याधिभेदादि दारिद्र्यादि लभेन्नरः।
उक्तेतराणां रागाणां न वेलानिर्ण्णयः क्वचित्।।
अवेलारागमाकर्ण्य तद्जदोषप्रशान्तये।
ईशानं च हरिं स्तुत्वा मध्यमादिमनन्तरम्।
गायेद्वा श्रृणुयाद्वाऽपि सर्वपापैः प्रमुच्यते।। इति।।

अत्र चतुर्विंशतिगाथानां मध्ये एकैकगाथात्रयत्रयस्य क्रमेणैक पुरुषरागः तत्पत्नीद्वयस्यायं मनसि निधाय चतुर्विंशतिगाथाः कृतवानिति केचिद्वदन्ति। अष्टभिः पुरुषरागैरष्टभिः स्त्रीरागैरष्टभिर्नपुंसकरोगैर्गाथा गातव्या इति विवक्षितत्वाच्चतुर्विंशति

गाथाः प्रोक्तवानित्यन्ये। मया तु बहुपुस्तकपाठानुसारेण तत्र रागसङ्गतिः कथ्यत इत्यलमिति प्रपञ्चेन। प्रकृतमनुसरामः। प्रलयेति। तत्र केशवेत्यादि हरे इत्यन्तं ध्रुवपदमित्यन्वर्थसंज्ञा अष्टपदमनुसूतत्वेन सर्वफलभागपूर्वकत्वात्। तदुक्तं **सङ्गीतचूडामणौ**;

प्रबन्धेषु ध्रुवत्वेन ध्रुव इत्यभिधीयते।
स्वयं गीतप्रबन्धे स्याद्यदनेनैव पूरणम्।।इति।।

एवं धृवपदेष्ववगन्तव्यम्। एतदान्ध्रभाषया पल्लवीति बदन्ति। धृतं मीनशरीरं मत्स्यगात्रं येन स तथा। तस्य सम्बुद्धिः। एतादृश हे केशव! अत्र केशवोऽन्यतरस्यामिति प्रशंसार्थमत्वर्थीय व प्रत्ययान्तेन केशवशब्देन कृष्णसम्बोधनम्। तस्य गुडाकेशेत्याख्या पुरुषोत्तमत्वलक्षणसूचनार्थम्। तेन च मत्स्यादिशरीराणामौपाधिकत्वं व्यज्यते। अथवा कश्च इशश्च केशौ तौ वाति गच्छतेति केशवः। नियामकत्वेन तत् प्राप्तवानित्यर्थः। तस्य सम्बुद्धिः। अनेन देवोत्तमत्वं सूच्यते। अतएव जगदीशत्वं तस्येति भावः।

प्रकर्षेण लयो यस्मिन्निति प्रलयः। पयांसि धीयन्तेऽस्मिन्निति पयोधिः समुद्रः। कर्मण्यधिकरणे चेति कप्रत्ययः। प्रलयश्चासौ पयोधिश्च, तस्य जले एकार्ण्णवीभूत-समूद्रतोय इत्यर्थः। अथवा, प्रलयः संहारः तत्र पयोधिजलधिः तस्य जले तद्रूपजले वा, अधिकरणे शङ्खासुरेण सह मग्नमितिशेषः। किंच ऊह्यन्ते प्राप्यन्ते परतीरमेभिरिति वाहित्राणि संसारजनतारकाणि "वहतेः करणादित्रगिति" क प्रत्ययः। तादृशानि च तानि चरित्राणि कर्माणि विहितानि विधानकर्मीकृतानि विहितचरित्राणि येन तादृशं सुगतप्रापक- कर्मविधायकमित्यर्थः। उक्तंच "गुरुदेवद्विजातीनां निःश्रेयसकर परः" इति अथवा विहितं वहित्रं वहित्रस्य तारकभूतनौकादेश्चरित्रमिव चरित्रं येन तादृशं विहितमित्यत्र "दधातेर्हिरिति निष्ठायां हिरादेशः"। "विहितमहित-चरित्रमिति" क्वचित्पाठः नाम नौकादिनेतादर्व्याकारो दण्डविशेषः। तस्य चरित्रमिव चरित्रं यस्येति विग्रहः। "नौकादण्डः क्षेपणी स्यादरित्रके निपातनमि**त्यमरः**"। कर्ण्णश्रोत्रमरित्रं चेत्यमिधानान्तरम्। अन्यच्च,

अस्य वाहन संयुक्तां कर्णग्राहवतीं शुभाम्।
सुप्रतारां दृढां तीर्थे शीघ्रं नावमुपाहरेत्।।

इत्ययोध्याकाण्डे द्वादश सर्गस्थितलोकव्याख्या तदा हरीव्याकृतम्। ऊह्यते प्राप्यते परतीरमनेनेति वाहनम्। अरित्रादि। कर्णादीनि अरित्राणि गृह्णातीति कर्णग्राह इति व्याख्यातम्। तथाच, यथा अरित्रस्य समुद्रतारकत्वं तथा वेदस्य संसारतारकत्वम्।

अतएव विहितं विशेषेण हितमित्यर्थः। अत्र यद्युक्तं तद्ग्राह्यम्। विशेषं सुगमम्। किं न विद्यते खेदो यस्मात् अखेदं सर्वक्लेशापहमित्यर्थः। तस्य श्लोकापहत्वं च निःश्रेयससाधनत्वात्। निःश्रेयसस्य क्लेशनिवृत्ति विनाऽभूतत्वादवगन्तव्यम्। एतादृशं वेद निरपेक्षवृत्तकरणं ज्ञानकाण्डकर्मकाण्डात्मकं निगमकदम्बकम्। वेदमिति "जातावेकवचनम्"। ज्ञानकाण्डेऽत्युपासनाश्रवणादि विधीनां सम्भवात्तत्रापि विहितचरित्रत्वमविरुद्धम्। धृत्वानुद्धतवानसि। वेदान् कुक्षौ निक्षिप्य सिन्धौ निमग्नं शंखासुरं हत्वा पुनर्वेदान् ब्राह्मणे प्रादाः खल्वित्यर्थः।

यदा उक्तविशेषणबिशिष्टं वेदं जले धृतवानित्यन्वयः। तथा च श्रुतिः "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति उक्तं च;

ॐकारादिसमस्तगन्त्रपदवीगम्यः पुरा दानवं<br>
सिन्धौ मग्ननिमग्नदैत्यसहितं वेदापहं शङ्खकम्।<br>
जित्वा तज्जठरे निमग्ननिगमात् यो दत्तवान् ब्राह्मणे<br>
पायाद्वः कमलामुखाब्जमधुपो मत्स्यावतारो हरिः ।। इति।।

ततश्च हे जगदीश! जगन्नाथ! जगन्नियामकेति यावत्। हरे! स्मर्त्तृणामुपासकानां च पापान्यविद्या तत्कार्य्याणि हरतीति हरिः तस्य सम्बुद्धिः। हे हरे! अनेन प्रलयकाले हरेर्वेदोद्धरणं सूच्यते।

सकललोकानन्दनिर्वहणपटीयसस्तस्य तदुद्धरणस्य सूकरत्वादित्यभिप्रायः।

जयदुष्टनिग्रहं शिष्टपालनं च कुर्वन् सर्वोत्कर्षेण वर्त्तस्वेत्यर्थः। अखेदं धृतवानसीति क्रियाविशेषणं वा। अत्र च्छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिः।।१ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१ ।। गौडमालवरागः। रूपकतालः। तल्लक्षणम्, 'नितम्बनीचुम्बितवक्त्रपद्मः शुकद्युतिः कुण्डलवान्प्रमत्तः। सङ्गीतशालां प्रविशन्प्रदाषे मालाधरो मालवरागराजः।।' गौडदेशोद्भवमालवराग इत्यर्थः। अधुना गीतेनापि दशावतारस्तुतिरूपमङ्गलमाचरति ध्रुवम्। तत्र प्रथमं मत्स्यावतारं स्तौति। हे केशव हे जगदीश जगतामीश हे हरे! त्वं जयजय। गायतां गुणवतां विघ्ननिवारणं कुरु, यथा श्रुते मादृशामीश्वरजयाशंसनस्या-नौचित्यात्। कीदृश? धृतमीनशरीर धृतमत्स्यदेह प्रलयकालीनसमुद्रसलिले वेदं घृतवानसि। अखेदम् अपरिश्रमं यथा स्यादेवं वेदम्। कीदृशम्? विहितं वहित्रस्य चरित्रं येन। वेदस्य नित्यनैमित्तिककर्म्मप्रतिपादनतया संसारसारगरतारकत्वेन पोतस्य साम्यम्। स्तुतित्वादत्यादरेण बहुधा सम्बोधनम्। तदुक्तम्, 'अत्यादरे सम्भ्रमे च

पुनरुक्तिर्नदुष्यत' इति। पयोधिपदेन मूर्त्तिमतोऽपि कदाचिल्लाभ इति मन्दाशङ्कानिरासार्थं जलपदोपादानम्। प्रकृष्टो लयः प्रलयः ब्रह्मसायुज्यम्, परमविज्ञस्य कवेस्तदेवोद्देश्यमिति तत्स्मारकप्रलयपदस्य नाम मङ्गलत्वमिति ध्येयम्।।१।।

## (७) वनमालिभट्टकृत- सञ्जीवनी

।।१।। एवं तावत्पूर्वलोकोक्ता राधामाधवयोः रहःकेलयस्ता एव श्रीकृष्णचन्द्र [२]सम्भोगपुष्ट्यर्थं भगल्लीलाविलासानां प्रतापसौभाग्यादीनाञ्च श्रीकृष्णचन्द्राधीनत्वं वदन् दशावतारप्रस्तावे [३]श्रीकृष्णचन्द्रस्य नायकचूडामणित्वं च संयोग[४]रसपुष्ट्यर्थं विप्रयोगरसमाह प्रलयेत्यदिना। यथा;

संयोगरसपुष्ट्यर्थं विप्रयोगनिरूपणम्।
[५]कषायिते हि वस्त्रादौ भूयान् रागो हि जायते।।

[६]गीतस्यास्य गौडमालवरागो रूपकतालः। ध्रुवपदं च। गीतलक्षणम्;

स्वरतालग्रामभेदरागरागाङ्गभूषितम्।
[७]संस्कृतं प्राकृतं वाऽथ गीतं गीतविदो विदुः।।इति।।

रागलक्षणम्,

नितम्बिनीचुम्बितवक्त्रपद्मः [८]शुकद्युतिः कुण्डलवान्[९]प्रमत्तः।
[१०]सङ्केतशालां प्रविशन् प्रदोषे मालाधरो मालवरागराजः।।

१.मालवगौडरागेण यतितालेन गीयते-च. २.भोग-ब. ३.श्रीकृष्णनायकं-अ.ब.श्रीकृष्णचन्द्र-नायकं-फ.ज. ४.रूपपुष्ट्यर्थं-इ. ५.काव्या हि ते हि शास्त्रादौ-अ.ब.कारवायिते हि वस्त्रादौ-इ.ग. कखायिते हि वस्त्रादौ-फ.ज. ६.गीतस्या गौडमालवरागे-ब. ७.सत्कृतं-ब. ८.शुष्कद्युतिः ज. ९.ममप्तः-ब. १०.सेकेत-अ.

तालक्षणम्,

रूपके स्याद्द्रुतं लघु इति **सङ्गीतरत्नाकरः**। षोडशध्रुवकास्तल्लक्षणं ग्रन्थविस्तर [१]भयान्न लिखितम्। [२]पदस्य पुनः पुनरावृत्तिः ध्रुवपदम्। हे केशब! सुखशायिन् प्रशस्तचिकुर [३]इति वा। धृतमीनशरीर, धृतं मीनस्य [४]शरीरमिव शरीरं येन। धृतमीनबन्ध इत्यर्थः। स च विपरीत [५]रतौ भवति।

तत्स्वरूपम्,

प्रसार्य हस्तचरणौ पुमान्यत्राङ्गनायते।
नायिकामुपरिस्थाप्य मीनबन्धः प्रकीर्तितः।।

[६]किञ्च, मीनो हि[७]रसवेदी मकरकेतनस्तोय [८]प्रेमनिर्वाहकश्च मङ्गलार्थश्च। तद्वदत्रापि धृतमीनबन्ध एव मङ्गलम्। हे देव! क्रीडाकर्तः! हे हरे! भक्तजनसन्तापहारिन्!

[९]सर्वमङ्गलहारिन् वा। [१०]युवतिकामतापनाशन इति वा। जय जयेति [११]वीप्सायाम्। अतिशयेन सर्वोत्कर्षेण वर्तस्व। [१२]जय जगदीश इति वा पाठः। [१३]गच्छतीति जगद्युवतिवृन्दं तस्येश [१४]नायक सकलचूडामणेः। प्रथमं मीनबन्धकेलिमाहं प्रलयेति। प्रकर्षेण मनसो लय [१५]स्तदाकारता यत्र [१६]सुरते स प्रलयः। स यथा

सुरते च समाधौ च मनो [१७]यत्र न लीयते। किं तेन सुरतेनार्थः किं तेन च समाधिना।।इति।।

[१८]तत्रानन्द [१९]श्रमजनितपयोधौ [२०]यत् जलं तस्मिन् वेदं **वात्स्यायन**शास्त्रप्रतिपाद्यं मीनबन्धादिकुशलत्वं, वेद्यते [२१]ज्ञायते [१]रतिकोशोक्तकेशस्पर्शादि [२]लीला च [३]नानाशृङ्गाररसमापद्यते तत्[४]। अखेदं यथा स्यात्तथा [५]लीलया धृतवानसि। त्वं पोषितवानसीत्यर्थः। कीदृशं वेदम्? [६]विहितं [७]कृतं वहित्रस्य पोतस्य चरित्रं केलि, [८]जलधिपारप्रापकरूपं येन। एतेन नायकचूडामणित्वं सूचितम्। पक्षे मीनरूपं स्तौति। प्रलयकालीना ये[९] पयोधयो जलधयस्तेषां जले मज्जन्तं [१०]वेदं मीनशरीरं लीलया धृतं आदाय, न तु कर्मवशेन, अखेदं यथा स्यात्तथा धृतवानसि त्वम्। अल्पजलनिवासो [११]मत्स्यानभीष्टः। सुतरां जलधौ। तथा च श्रुतिः - - यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं देवात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये। (**श्वेताश्वतरउपनिषद्** ६.१८) इति। [१२]कश्च ईशश्च तौ केशौ (वसौ) सेवकोत्तमौ यस्येति हे केशव। धृतं मीनशरीरं [१३]येने(ति), तत्सम्बोधने। जय सर्वोत्कर्षेण वर्तस्व। ननु सर्वोत्कर्ष [१४]वृत्तौ किं सामर्थ्यम्? तत्राह, हे जगतां चतुर्दशभुवनानां ईश नियन्तः। हे हरे[१५]! हरति भक्तानां [१६]क्लेशं भजनानुसारेणेति [१७]तथा। तच्चोक्तं **श्रीभागवते,** हृद्यन्तःस्थो [१८]ह्यभद्राणि विधुनोति सुहृत्सताम् इति। एतेन [१९]दुर्घटकार्यशीघ्रकारित्वेन [२०]दक्षिणालक्षणो नायकगुण उक्तः [२१]प्रलयो नष्टसंज्ञता **इत्यमरः** (१.६.३३)।।१।।

१.भयात्तु न लिखितम्-ग. २.यदा तु पुनराकृतिर्ध्रुवम्-ग. ३.इति पाठे-फ. ४.नास्ति-ह. ५.रते ग. ६.नास्ति-अ.ब.फ.ग.ह.ज. ७.रणवेदी-ग. ८.प्रेमानिर्वाहकश्च-ब. ९.पदमिदं नास्ति-इ. १०.युवतीजनकामतापनाशनं इति वा-फ. ११.वीप्सया-इ.फ.ग.ह.ज. १२.जय जय-ज. १३.गच्छति जगत्-अ.ब.गच्छतीति नानाशृङ्गाररसमापद्यते तत्-इ.फ.ग.ह.ज. १४.नायकस्य-अ.ब.नायकचूडामणे-इ.फ.ग.ह.ज. १५.स्तदाकारः ता यत्र-ब. १६.सुरतैः-अ.ब. १७.यत्र च लीयते-अ.ब.यस्य न लीयते-फ. १८.त्रंनन्द जनिरतययोधौ-ब. १९.भ्रम-इ. २०.जलम्-अ.ब. २१. ज्ञायतेरिति-अ.ब.ज्ञायते स वेद-ह.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।१।। कविरधुना भक्तानुग्रहार्थं विघ्नाभावार्थञ्च दशावतारवर्णनमाह, प्रलयेत्यादि [२२]जगदीश इत्यन्तम्। अस्य गीतस्य मालवरागः। [२३]रागलक्षणम्, " नितम्बिनीचुम्बित-

वक्त्रपद्म: शुकद्युति: कुण्डलवान् प्रमत्त:। सङ्केत [१]शालां विशति प्रदोषे मालाधरो मालवरागराज:”।।

**(काललक्षणम् - - -)**

[२]लघुयुग्माभिघातेन रूपक: कथितो दृढ:।

हे केशव! धृतं मीनशरीरं वेदोद्धरणार्थं येन।।

हे जगदीश! हे हरे! जय उत्कर्षेण [३]वर्धस्व। [४]कस्मादित्यत आह[५]। त्वं प्रलयपयोधिजले कल्पान्तसमुद्रजले वेदं धृतवानसि। [६]कथम्? अखेदं अपरिश्रमं यथा। पुन: कथम्? विहितेति। विहितं कृतं वहित्रचरित्रं [७]समुद्रतरणनौका [८]चेष्टितं यत्र क्रियायाम्।।१ ।।

१.रसकोषोक्त-फ.२.लीनां च-अ.ब.लीलां वा-इ.फ.ग.ह.ज.३.त:४.पर्यन्तं नास्ति-इ.फ.ग.ह.ज.५.नास्ति-इ.फ.ग.ह.ज.६.नास्ति-अ.ब.७.नास्ति-ह.८.जलधिकार-ब.९.पयोधयस्तेषाम्-अ.ब.१०.वेदं अखेदं यथा स्यात्तथा धृतं आदाय न तु कर्मवशेन। अखेदं धृतवानसि त्वम्-अ.ब.११.मत्स्याभीष्ट:अ.ब.इ.ग.ह.ज.१२.क: ब्रह्माच ईश: शिवश्च तौ वसौ सेवकोत्तमौ-इ.फ.ग.ह.ज.१३.येन तत्सम्बोधम्-इ.फ.ग.ह.ज.१४.वर्तने-फ.१५.नास्ति-अ.ब.ज.१६.कुशम्-ब.१७.यथा-ब.नास्ति-ग.सारेण नाशकेति तथा-फ.१८.ह्यभप्राणि-अ.ह्यभदणि-ब.१९.दुष्कर-इ.फ.ग.ह.ज.२०.दक्षतालक्षणो-इ.ग.दक्षिपतोलक्षणो-फ.दक्षिताक्षणो-ह.दक्षतालक्षणो-ज.२१.प्रलयो नष्टसंज्ञेत्यमर:-अ. प्रलयो नष्टसंङ्गेत्यमर:-ब. प्रलयोनष्टचेष्टता-अमरकोश:२२.जगदीश हरे इत्यतन्म्-क.ल.म.

## (९) कृष्णपण्डितकृत- जयन्ती

।।१ ।। षड्जादिस्वरै रञ्जयतीति राग: मालवगौडदेशीयो राग: तेन, तालकालक्रिययोर्मानं समत्वेन लयत्वात् [९]चञ्चूत्पुटादि: तद्विशेषो यतिसंज्ञक: तेन (च) गीयते वक्ष्यमाणदशावताराष्टपदी। (प्रलयेति।) प्रलयकाले जगत्संहारकाले पयोधि: समुद्र: तस्य जले अखेदं दु:खरहितं यथा स्यात्तथा विहितानि रचितानि वहित्रस्य मत्स्यपुच्छस्य चरित्राणि परिवर्तनानि यथा स्यात्तथा विचरन् वेदं श्रुतिगणं धृतवानसि। शङ्खासुरं वेदचोरं हत्वा वेदोद्धरणं कृतमिति मत्स्यावतारप्रयोजनं कथितम्। ध्रुवा नाम पुन: पुनारञ्जनार्थं गीतान्ते पठ्यन्त इति ध्रुवा। तल्लक्षणं **सङ्गीतरत्नाकरे**। है केशव! धृतमीनशरीर! मत्स्यरूप! जगदीश! जगतामुत्पत्तिस्थितिलयकर्तृत्वादीश्वर! हे हरे! जय सर्वोत्कर्षेण वस। ईश्वरत्वादेव मामवेति भाव:। वेदोद्धारकत्वाद्धर्मरक्षक इति भाव:। अथ वा विहितानि वहित्रस्य नौकाया: चरित्राणि आकर्षणरूपाणि यस्मिन् कर्मणि तथा। अस्मिन् पक्षे सर्वबीजपूरितां मनुनाधिष्ठितां नौकां मुखरोमाग्रे बद्ध्वा मूलमत्स्यो मेरुशृङ्गं अनयदिति कथाऽनुसन्धेया।।१ ।।

१.शाली-ड.२.पङ्क्तिरियं नास्ति-ड.ल.म.३.वर्तस्व-क.४.तः५.पर्यन्तं नास्ति-क.६.कथम्भूतम्? अपरिश्रमं यथा अखेदम्-ल.म.७.समुद्रतरणकारणनौकाचेष्टितलक्षणं यस्य क्रियायाम्-ल.म.८.येष्टितम्-ड.९.चञ्चूपुटादिः-च.

## (१०) धनञ्जय-धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१।। सम्प्रति श्रीभगवतो दशावतारान् विवर्णयिषुराह; मालवरागेण गीयते इति। अस्य स्वरूपं यथा, ''नितम्बिनीचुम्बितवक्त्रपद्मः शुकद्युतिकुण्डलवान् प्रमत्तः। सङ्गीतशालां प्रविशन्प्रदोषे मालाधरो मालवरागराजः।।'' इति। प्रलयेति। हे केशव! हे जगदीश! हे हरे! त्वं जयेत्याशीः। किमभीष्टप्राप्तिविषये आशीरित्याह; प्रलये महाप्रलये पयोधिरर्णवस्तस्य जले विहितवहित्रचरित्रमखेदं च यथा स्यात्तथा वेदं धृतवानसि। वहित्रं यथा समुद्रजले नानावस्तूनि अखेदं धरति, तथा त्वमपि वेदं धृतवानसीत्यर्थः। वेदोद्धृतौ त्रैलोक्यरक्षा स्यादिति च प्रयुक्ताशीः। धृतमीनशरीरेति सम्बोधनम्। धृतं स्वीकृतं मीनशरीरं येनेति विग्रहः। वरणाग्रामवत् पयोधिशब्दोपादानम्। तथापि प्रलयसमये जलधेरुच्छलितत्वात् त्रैलोक्यव्यापकत्वप्रतिपादनार्थं जलशब्दोपादानम्। पुराकल्पे ब्रह्मणः सकाशात् वेदान् अपहृत्य प्रलयपयोधिमग्नं शङ्खनामकमहासुरं मीनरूपेण विष्णुना निहत्य वेदा उद्धृता इति पुराणम्।।१।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।१।। अर्थ तत्केलीनां सर्वोत्कर्षप्रतिपादनायादौ सर्वरसाश्रयस्य श्रीकृष्णस्य मत्स्याद्यवतारत्वेन सर्वरसाधिष्ठातुरखिलनायकशिरोरत्नतां प्रतिपादयन् सर्वोत्कर्षाविर्भावनं प्रार्थयति प्रलयेत्यादिना बसन्ते बासन्तीत्यन्तेन । गीतस्यास्य मालवरागो रूपकताल इत्याह मालवेति। तस्य लक्षणं यथा, ''नितम्बिनीचुम्बितवक्त्रविम्बः शुभ्रद्युतिः कुण्डलवान् प्रमत्तः। सङ्गीतशालां प्रविशन् प्रदोषे मालाधरो मालवरागराजः।।'' विरामान्तद्रुतं द्वन्द्वं रूपकः स्याद्विलक्षण इति। केशव इति केशिदैत्यनिसूदन! श्रीकृष्ण! जय सर्वोत्कर्षमाविष्कुरु, तदाविस्कुरणसामर्थ्यहेतुः हे जगदीश! जगतां प्रकृतीनामीश! तथाविधत्वेऽपि कारुण्यमाय हरे! हरति भक्तानामशेष क्लेशमिति हरिः। हे तथाविध! तत्क्लेशहरत्व तदेक प्रयोजनमात्रावतारत्वेन प्रतिपादयति। धृतं स्वेच्छयाविष्कृतं मत्स्याकारं शरीरं येन हे तथाविध! जय जय जगदीशहरे इत्येव ध्रुवपदं प्रतिपदवर्त्तमानत्वात् । यथोक्तं, ध्रुवत्वाच्च ध्रुवः प्रोक्तः आभोगश्चान्तिमे मत इति। तदाकर्षण प्रकारमाह, प्रलयकालीनाः ये समुद्रास्तेषामेकीभूते जले मग्नं वेदं अखेदं यथा स्यात्तथा धृतवानसि। तत्प्रकारमाह; कृतं नौकायाश्चरित्रं

यत्र तत् इत्यपि क्रियाविशेषणं सत्यव्रतं प्रलयक्लेशादपादित्यर्थ:। अनेनैव मीनस्य बीभत्सरसाधिष्ठातृत्वं ज्ञापितम्।।१ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१ ।। अथ कवि: ''नायकानां शिरोरत्नं कृष्णस्तु भगवान् स्वयम् यत्र नित्यतया सर्वे विराजन्ते महागुणा:'' इति अनुस्मरन् श्रीकृष्णस्य सर्वावतारित्वं सकलनायक गुणाधारत्वं दर्शयितुं तत्प्रकाशितानां मत्स्याद्यवताराणामेकैकासाधारणकार्यकर्त्तृत्वेन तमेव स्तुवन्नाह; प्रलय इत्यादिना गीतेन। मालवगौडरागेण गीयते । मालवेति, रागेषु मालव: श्रेष्ठ: इति प्रथमत: एव तं प्रयुक्तवान्। अस्य स्वरूपं यथा,

नितम्बिनीचुम्बितवक्त्रपद्म: समुज्ज्वलत् कुण्डलवान् प्रमत्त:।
सङ्गीतशालां प्रविशन् प्रदोषे मालाधरो मालवरागराज:।। इति ।

गीतलक्षणं तु,

''रञ्जक: स्वरसन्दर्भे गीतमित्यभिधीयते।''

स्वरलक्षणं च-

''श्रुत्यनन्तरभावी य: स्निग्धोऽनुरणनात्मक:।
स्वतो रञ्जयति श्रोतु: चित्तं स स्वर उच्यते ।।'' इति ।

श्रुतिलक्षणं च,

''प्रथमश्रवणात् शब्द: श्रूयते ह्रस्वमात्रक:।
सा श्रुति: सपरिज्ञेया स्वरावयवलक्षणा'' इति।।

वृत्तलक्षणोऽयं प्रबन्ध:। वृत्तलक्षणे तु तालनियमो न निश्चित:। ''तालेनेष्टेन गीयते'' इत्युक्ते:। अतो यथेष्टतालेन गातव्यम्। तत्र प्रसिदशतालानां लक्षणं यथा **सङ्गीतनारायणे**;

''लिश्चादौ ललदौ यतौ द्रुतयुगाल्लोझम्पकोदत्रयं
सारामं त्रिपुटे विरामिदयुगं रूपे तु मण्ठे गुरु:।
नि:सारौ सविरामदद्वयलघू सारामा दौलोभुके
देनोपाभ्रमथैकताल्वपि तथा दौलौ कुतुक्केऽपि च।।''

मत्स्यावतारेण स्तौति; तत्रादौ ध्रुवं व्याख्यायते ध्रुवस्य प्रतिपदमनुवर्त्तमानत्वात्। ''प्रबन्धेषु ध्रुवत्वेन ध्रुव इत्यभिधीयते'' इति लक्षणम्। अत्र केशवेत्यारभ्य हरे इति यावत् ध्रुवपदम्। तत्र मध्ये मध्ये वर्णितस्य अवतारस्य नाममात्रं भिन्नतया प्रयुक्तं भवति। हे केशवेति प्रशंसार्थकमत्वर्थीय 'व'प्रत्ययान्तेन स्निग्धनीलकुटिलवत्त्वादाभिरूप्यं सूचितम्। अनेनास्य सदा किशोरवयसि एव स्थितिर्व्यञ्जिता। अतो

नित्यविलासित्वमुक्तम्। ''किशोर एवात्र नित्यनानाविलासवान्'' इति उक्तेः। हे धृतमीनशरीर! धृतं लीलयाङ्गीकृतं, न तु कर्मवशात् प्राप्तं मीनशरीरमिव शरीरं येन तादृश। ननु कुतो न कर्मवशादत आह; हे जगदीश! गच्छति कर्मवशात् नानात्वमापद्यत इति जगत्। तस्येश। कर्त्तुमकर्त्तुमन्यथाकर्त्तुं समर्थ। अतः त्वदधीनफलसिद्धानि कर्माणि कथमिव त्वां वशीकुर्युरिति भावः। ननु कर्मवशाभावेऽपि प्रलये वेदोद्धरणस्य अन्यथाकर्त्तुमशक्यत्वात् तत्कार्यार्थं तथाशरीरधारणात् कथं लीलया इति अत आह; हे हरे! हरत्यविद्यां तत्कार्यमतो हरिरिति स्मृतः इति निरुक्तेः। सकलानर्थनिराकरण-निदानभूतसंस्करणमात्रस्य तव प्रलयः कियान् लक्ष्यः इति भावः। त्वं जय। सकलाश्चर्यमाधुर्यैश्वर्याविष्कारेण सर्वोत्कर्षमाविष्कुरु इति प्रार्थना। एवमुत्तरत्रापि योजनीयम्। ईदृशावतारप्रयोजनमाह; प्रलयेति। प्रकर्षेण लयो भूतानामस्मिन्निति प्रलयः। पयांसि धीयन्तेऽस्मिन्निति पयोधिः। प्रलयकालीना ये पयोधयः समुद्रास्तेषां जले एकार्णवीभूते पयसि वेदं वेदकदम्बं 'जातावेकवचनम्' अखेदं खेदरहितं यथा स्यात्तथा धृतवानसि। वेदान् कुक्षौ निक्षिप्य सिन्धौ निमग्नं सोमकासुरं निहत्य तान् पुनः ब्रह्मणे दत्तवानसि इत्यर्थः। तथा च श्रुतिः, ''यो ब्रह्माणं विदधाति पूर्वम्, यो वै वेदांश्च प्रहिणोति तस्मैः इत्यादि।" प्रलयेति महामत्स्यस्य भगवतः स्वच्छन्दविहारास्पदयोग्यत्वं सूचितम्। वेदमिति धर्माधर्मप्रमाणत्वेन निजरूपप्रकाशकतया तस्य अवश्योद्धरणीयत्वं युक्तमिति भावः। कथं खेदं विना वेदधारणम्। तत्राह विहितं कृतं बहित्रस्य नौकाविशेषस्य चरित्रमाचरणं यत्र तद् यथा तथा। अखेदमिति वेदविशेषणं वा। नास्ति खेदो यस्मात् स तथा तम्। वेदस्य श्रेयः साधनोपदेशकत्वात्। विहितेत्यपि तद्विशेषणं वा। बहित्रचरितं हि तदाश्रयिणां तीरप्रापकमेव, तथा वेदावलम्बकानां संसारपार प्रापणमित्यर्थः। अत्र वेदोद्धरणरूपदुष्करकार्यक्षिप्रकारितया दक्षतालक्षणो नायकगुणः सूचितः। दुष्करे क्षिप्रकारी यः तं दक्षं परिचक्षत'' इति **दक्षलक्षणम्**। संवर्तः प्रलयः **इत्यमरः**।।१ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

१-प्रलयेति; प्रलयः प्रकृष्टः लयः नाम लीनं , पृथिव्याः जले मज्जनं जलस्य तेजसि लयः तेजसः पवने लयः पवनस्य आकाशे लयः आकाशस्यापि परब्रह्मणि लय इति महाप्रलयः। तदुक्तं **विष्णुपुराणे,** जगत्प्रतिष्ठा देवर्षे! पृथिव्यप्सु प्रलीयते। तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते।। वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते। अव्यक्तं पुरुषे ब्रह्मन्! निष्कले संप्रलीयते।। इति। अपि चोच्च्यते **वाचस्पतिमिश्रेण,** "निःश्वसितमस्य वेदाः वीक्षीतमेतस्य पञ्चभूतानि स्मितमेतस्य चराचरमस्य च सुप्तं महाप्रलयः।" अत्र पृथिव्याः जले प्रलयदशां विवृणोति कविः। शंखासुरस्य वेदापहरणे

भगवता मीनरूपेण शंखासुरं निहत्य वेदोद्धारः विहितः इति प्रसिद्धा पौराणिकी कथा अस्ति। परं लक्ष्मणः रसिकरङ्गदा टीकायां सोमकासुरस्यावतारणं कथं करोति इति हेतुं न विद्म। अपि च वहित्ररूपमत्र प्रपञ्चितम्। वहित्रं नाम पोतः। तेन रूपेण प्रलये नावरूपेण जीवान् धारयित्वा तारयामास इति पौराणिकी कथा अस्ति। श्लोकेऽस्मिन् वहित्ररूपस्य भगवतः विष्णोः मत्स्यावतारे वेदोद्धाररूपं विहितम्। परन्तु नौकारूपस्य लीला नैव विशेषतया वा नौकारूपेण समग्रस्य लोकस्योद्धरणं प्रलयप्रयोधिजले केन प्रकारेण मत्स्यावतारे संसाधितं तत्खलु मनुमत्स्योपाख्याने **श्रीमद्भागवते** वर्णितमस्ति। अतः अत्र शंखासुरस्य वेदापहरणं, मत्स्यरूपेण भगवता अतलस्पर्शिसमुद्रे तस्मात् वेदोद्धरणं संसाधितम्। वेदोद्धरणं नामातिप्रसिद्धं विवरणं कविना दत्तम्। प्रबन्धान्ते वेदानुद्धरते इति श्लोके पुनः सारांशतया दत्तम्। पयोधिः; सागरः, धृतवान् - उद्धृतवान्। वेदः - वेदस्तु श्रुतिविज्ञेय धर्मशास्त्रं तु वै स्मृतिः। तस्योद्धारकस्य देवस्य जयगानं करोति स्तौति कविः। गीतगोविन्दनामधेये प्रबन्धकाव्ये कविः गीतेन साकं पुनः श्लोकानां विवरणं प्रस्तौति। संगीतशास्त्रदृष्ट्या अत्र प्रबन्ध एव स्वीकृतः। राणाकुम्भकर्णः रसिकप्रियाटीकायां तथा दीपिकाकारादयश्चान्ये टीकाकाराः रागलक्षणं निर्णयामासुः। अस्य स्वरूपं यथा,

नितम्बिनीचुम्बितवक्त्रपद्मः समुज्ज्वलत् कुण्डलवान् प्रमत्तः।
सङ्गीतशालां प्रविशन् प्रदोषे मालाधरो मालवरागराजः॥ इति।

गीतलक्षणं तु, ''रञ्जकः स्वरसन्दर्भे गीतमित्यभिधीयते।''

स्वरलक्षणं च- ''श्रुत्यनन्तरभावी यः स्निग्धोऽनुरणनात्मकः।
स्वतो रञ्जयति श्रोतुः चित्तं स स्वर उच्यते॥'' इति।

श्रुतिलक्षणं च, ''प्रथमश्रवणात् शब्दः श्रूयते ह्रस्वमात्रकः।
सा श्रुतिः सपरिज्ञेया स्वरावयवलक्षणा'' इति॥ तस्मिन् च संन्दर्भे अत्र किञ्चित् वर्ण्यते समासतः। अत्र रागश्च मालवः। नायकः युद्धवीरः॥१॥

**२- क्षितिरतिविपुलतरे तव तिष्ठतिपृष्ठे।**
**धरणिधरणकिणचक्रगरिष्ठे॥**
**केशव! धृतकच्छपरूप! जय जगदीश! हरे!॥२॥**

## (१) नारायणदाश कृत-सर्वाङ्गसुन्दरी

॥२॥ कूर्मरूपं स्तुवन्नाह। अत्र पूर्ववन्मुखबन्धयोजना। तव पृष्ठे क्षितिस्तिष्ठति इत्येवंरूपापरा। कीदृशे, अतिविपुलतरे अतिमहतीत्यर्थः। पुनः कीदृशे धरणिधरणकिण-

चक्रगरिष्ठे धरण्याः धारणेन यत्किणचक्रं शुष्कब्रणसमूहः तेन गुरुतम इत्यर्थः। किणः शुष्कब्रणेऽपि चेति त्रिकाण्डशेषः। ननु क्षितिधरणिशब्दयोरेकत्वात् पौनरुक्त्यदूषणमत्र वर्त्तते। यदुक्तं **व्यक्तिविवेके,**

सर्वनामपरामर्श योग्यार्थः स च यः पुनः।
स शब्देनाभिधादोषः स वाच्यो वचनाभिधः।।इति।।

क्षितिशब्देनात्र हस्तपादाद्यवयवशालिनी भूरिति साधारणी प्रतीयते। धरणिशब्देन तु पृथिवी मृत्तिकामयीति नास्ति पौनरूक्त्यम्। धृत कच्छपरूपेति सम्बोधनम्। धृतं कच्छपरूपं येन इति विग्रहः।।२।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२।।अथ कूर्मः। केशवेत्यादि ध्रुवपदं पूर्ववत्। "धृतकच्छपरूप" इति कूर्मावतारकथनं विशेषः।। तवेति। तवातिविपुलतरे विशाले अतिक्रान्तं विपुलतरं तास्मिंश्च धरणीधरणेन हेतुना जातं यत्किणचक्रं तेन गरिष्ठे गौरवयुक्ते पृष्ठे क्षितिस्तिष्ठति इति भवप्रवाहस्यानादित्वादनेकवारं धरणीधरणे चिह्नहुत्वम्। इति द्वितीयपदम्।।२।।

## (३) जगद्धरकृत-सारदीपिका

।।२।। पूर्ववत् तव पृष्ठे क्षितिः पृथ्वी तिष्ठतीत्यन्वयः। कथंभूते पृष्ठे अतिविपुलतरे अतिक्रान्तः विपुलतरपदार्थो येन पुनः कथंभूते धरण्याः क्ष्मायाः धरणेन वहनेन यत्किणचक्रं मृतपिण्डस्तेन गरिष्ठे दृढे।।२।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।२।। कच्छपरूपं स्तौति; धृतकच्छपेति। हे केशव! धृतकच्छपरूप धृतं कच्छपस्य रूपं येन तादृश! जय। ननु कच्छपरूपं मया कस्य हेतोर्धृतमित्यत आह, क्षितिरिति। तव पृष्ठे क्षितिः पृथ्वी तिष्ठति। तिष्ठतीति वर्तमानकालनिर्देशेनाधुनापि तव पृष्ठे क्षितिस्तिष्ठतीति कच्छपावतारप्रयोजनं सर्वलोकप्रसिद्धमेवेति भावः। ननु पञ्चपञ्चाशत्कोटियोजनविस्तृता पृथ्वी मम पृष्ठे कथं स्थितेत्यत आह, अतिविपुलतर इति। अतिशयेन पृथिव्यपेक्षयाऽधिकविस्तीर्णे। पुनः कीदृशे ? धरणीति। धरण्याः पृथिव्या धारणेन यत्किणचक्रं रक्ताकृति मृतरुधिरमण्डलं तेन गरिष्ठे गौरवयुक्ते। कूर्मे कमठकच्छपौ "व्रणचिह्ने घुणे किणः" इति **हारावलिः**।।२।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२।। क्रमप्राप्तमवतारान्तरं प्रस्तौति। क्षितिरति। धृतकच्छपरूपं कमठशरीरं येन तस्य सम्वुद्धिः। एतादृशकेशव, अतिविपुलतरेऽत्यन्तविशाले, अतिक्रान्त विपुलतरं

येन, तस्मिन् विपुलादपि विपुलतर इत्यर्थः। अत्यादय क्रान्ताद्यर्थे द्वितीयेति समासः। किं च धरणि धरणेन भूधरणेन जातो यः किणः ग्रन्थ्याकारः शुष्कव्रणः तृतीया तत्कृतेत्यादिना समासः। चक्रमिव चक्राकारकिण इत्यर्थः। उपमितमित्यादिना समासः। तेन गरिष्ठेऽत्यन्तगुरौ वर्त्तुलधरणीमण्डल सन्ततधरणसञ्जात किणाक्रान्त इत्यर्थः। अथवा धरणिधरः पर्वतः कृत्यल्युटो बहुलमित्यलुक्। तेन समुद्रमन्थनकाले जाते किणास्तेषां चक्रं समूहः शेषं समं भ्राम्यन्मन्दराचलाघात-संजात-किणाक्रान्त इत्यर्थः। एतादृशे तव पृष्ठे गात्रस्य पश्चाद्भागे क्षितिर्भूमिस्तिष्ठति अक्लेशं निवसतीत्यर्थः। अत्र तिष्ठतीति वर्त्तमानप्रयोगेणाङ्गीकृतार्थ-परित्यागरूपदृढप्रतिज्ञत्वं गम्यते। उक्तं च,

पृष्ठभ्राम्यदमन्दमन्दरगिरिग्रीवाग्रकण्डूयनै-
र्निद्रालोः कमठाकृतेर्भगवतः श्वासनिलाःपान्तु वः।
यत्संस्कारकलानुवर्त्तिनवशोद्वेगोद्वलेनाम्भसा
यातायातनियन्त्रिणे जलनिधिर्नाद्यापि विश्राम्यति।।

गरिष्ठमित्यत्रातिशयेन तमविष्टनाविष्टनप्रत्ययेऽपि प्रिय स्थिरेत्यादिनारोर्षरा-देशः। अत्र किण गरिष्ठत्वरूपवस्तुना भगवतः पुरुषोत्तमस्य धरणिधरणकिणाङ्कित-सर्वपुरुषातिशयरूपवस्तु व्यज्यत इति वस्तुना वस्तुध्वनिः। तेन च सर्व पुरुषसेव्यत्वरूपं वस्तु व्यजत् इत्यनुरणनध्वनिः। अथवा, भूधारणाङ्कितत्ववस्तुना एतस्य एतादृश-सर्वपुरुषव्यतिरेको व्यज्यत इति वस्तुना वस्त्वलङ्कारध्वनिः। तेन च सर्वसेव्यत्वं वस्तु व्यजत इत्यलङ्कारेण वस्तुध्वनिः।।२।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२।। कूर्म्मावतारं स्तौति क्षितिरिति। हे केशव धृतकच्छपरूप गृहीतकूर्म्मदेह जयजय। तव पृष्ठे क्षितिस्तिष्ठति पृथ्वी वसति। कीदृशे पृष्ठे? अतिविपुलं ते अतिमहत्तम इत्यर्थः। पुनः कथम्भूते? धरणिधरणकिणचक्रगरिष्ठे धरणीधरणेन भूमिवहनेन यः किणः मृतशोणितं तस्य चक्रं समूहः तेन गरिष्ठे परमोत्कर्षयुत्ते। यद्यपि धरणीधरणं पूर्वपदेनैव प्राप्तं तथापि किणचक्रगरिष्ठ इत्यनेन सततं धारणां दर्शितम्। अथवा धरणी ध्रियत इत्यनेन धरणीधरणो मन्दरः, तेन सागरमथनेन यः किणः स एव चक्र' चक्राकारत्वात्, तेन गरिष्ठे महोत्कर्षशालिनीत्यर्थः। 'किणः स्यान्मृतशोणित' इति धरणिः।।२।।

## (७) वनमालिभट्टकृत- सञ्जीवनी

।।२ ।। कच्छपसदृशबन्धान्तरमाह; क्षितिर[१]तीति। हे धृतकच्छपरूप ! स्वीकृतकच्छपबन्ध। तल्लक्षणम्,

''हस्तौ पादौ च [२]सङ्कोच्य कान्तामुपरि वल्लभः।
स्थापयेत्सुरते यत्र कच्छपः स प्रकीर्तितः।।''

तव पृष्ठे [३]पृष्ठभागे क्षितिर्बृन्दा[४]वनभूमिस्तिष्ठति वर्तत इत्यन्वयः। कीदृशे पृष्ठे ? अतिविपुलतरे। अतिशयेन विपुलयति विशेषेण महत्त्वं रसस्य प्राप्नोति तथा। 'पुल महत्वे' (धा.पा. ८४१) धातुः। अनेन नायकस्य श्रान्तोद्वहनत्वं सूचितम्। पुनः कीदृशे [५]पृष्ठे ? धरणिधरणकिणचक्रगरिष्ठे। [६]पूर्वोक्तबन्धधारणेन किणं कुंकुमादिचिह्नं यच्चक्रं चक्राकृतिकङ्कणं तेन गरिष्ठे प्राप्तगौरवेऽनर्घ्य इत्यर्थः। अन्यद्धि रत्नं अचिह्नमव्रणमे- वानर्घ्यमिदं पुनस्त्वच्छरीररत्नं [७]प्रियानखचिह्नित - मप्यमूल्यमिति श्रीराधोक्तिरत्र सर्वत्र ज्ञेया। तद्यथा,

''सर्वस्यापि हि रत्नस्य [८]व्रणेऽर्घः परिहीयते।
दयिताधररत्नं तु व्रणितं [९]यात्यनर्घताम् ।।इति।।''

तिष्ठतीति फलपर्यन्तकार्यनिर्वाहकतया [१०]स्थिरतालक्षणो नायकगुण उक्तः। ''[११]क्षितिःसहनशीला स्याद्विस्तीर्णे च धरास्वपि'' इति **महोदधिः**। ''[१२]पृष्ठं पृष्ठप्रदेशे स्यात् पृष्ठः स्याद्धि बिलाशये'' इति "**मेदिनीकारः**" (१०.७)। पक्षे कच्छपरूपं स्तौति। हे [१]केशव! हे धृतकच्छपरूप धृतं कच्छपस्य रूपं येन तादृश। [२]जय [३]स्वोत्कर्षमाविष्कुरु। ननु [४]निन्द्यं कच्छपरूपं मया कस्य हेतोर्धृतमित्यत आह,क्षितिरिति। तव पृष्ठे क्षितिः पृथ्वी तिष्ठति। कच्छपपृष्ठं [५]अत्यन्तकठिनतरं क्षोण्या [६]धारणमपसारणं च जात्यनुकरणार्थमिति भावः। ननु [७]पञ्चाशत्कोटियोजनविस्तीर्णा पृथ्वी मम पृष्ठे कथं स्थितेत्यत आअतिविपुलतरे (इति)। अतिशयेन धरापेक्षयाऽप्यधिकविस्तीर्णे। पुनः कीदृशे ? [८]धरणिधरणकिणचक्रगरिष्ठे, धरण्या धराया धरणेन यज्जातं किणचक्रं [९]चक्राकृति [१०]मृतरुधिर [११]मण्डलं तेन गरिष्ठे गौरव [१२]युक्ते। एतेन [१३]पीनत्वं गौरवं चोक्तम्। ''किणः स्यान्मृतरक्तके'' [१४]इति विश्वप्रकाशः। ''[१५]घुणा चिह्ने व्रणकिणौ'' इति **हारावली**। [१६]''कूर्मे कमठकच्छपौ'' **इत्यमरः**(१.१०.२१)। [१७]''चक्रं चक्रे च निर्दिष्टं [१८]रसचक्रेऽरिचक्रके'' इति वैजयन्ती। [१९]यथा, ''रतिचक्रे प्रवृत्तस्य न च शास्त्रं न च क्रमः'' [२०]इति। धरा ''[२१]धरित्री धरणी'' **इत्यमरः** (२.१.२)। ''कच्छपः कमठे प्रोक्तस्तद्बन्धेऽपि रतिप्रियैः'' इति **भोजे**। ''विस्तीर्णे विपुलः प्रोक्तो विपुलत्वप्रदेऽपि च'' इति **कोशसमुच्चये**।।२ ।।

१.इति नास्ति - अ.ब.२.सङ्गोप्य - ग.३.पृष्ठविभागे - इ.फ.ग.ह.ज.४.वननिकुञ्जभूमिः - इ.फ.ग.ह.ज.५.पृष्ठे नास्ति - अ.ब.इ.ग.ह.६.पूर्वोक्तकच्छपबन्ध - फ.ज.७.प्रियानशं - अ. ८.व्रणेद्वः - अ. व्रणेद्धः - ब. व्रणेऽर्धः - फ.ग.ह.ज.९.यात्यनर्घ्यताम् - अ.ब.इ.फ.ग.ह.ज. १०.स्थिरतालक्षणे अ.ब.११.क्षितिःसहनशीला। अस्य विस्तीर्णे च धरास्वपिति महोदधिः - अ.ब. क्षिति सहनशीलेस्याद्विस्तार्णे च धरास्वपीति महोदधिः - इ.फ.ग.ह.ज.१२.पृष्ठं परमगात्रेऽपि देहस्यावयवान्तरे-मेदिनीकोशः - अ. ''पृष्ठं तु पृष्ठेदेशे स्यात् पृष्ठं स्याद्धि बिलाशये'' इति मेदिनीकारः - फ.ज.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।२।। क्षितिरिति। हे केशव! धृतं कच्छपरूपं येन हे जगदीश हरे जय। तव पृष्ठे क्षितिः पृथ्वी [२२]तिष्ठतीत्यन्वयः। [२३]कीदृशे पृष्ठे? [२४]अतिविपुलतरे अतिक्रान्तो विपुलतरः पदार्थो येन। पुनः [२५]कीदृशे? धरण्याः [२६](पृ)थिव्यायाः धरणेन वहनेन यत्किणचक्रं [२७]मृतरक्तपिण्डस्तेन गरिष्ठे [२८]दृढे ।।२।।

१.नास्ति-इ.फ.ग.ह.ज.२.जय जय-अ.फ.ह.ज.३.सर्वोत्कर्ष-ग.४.निन्द्यकच्छपस्य रूपं-फ.ह.ज. कच्छपस्य निन्द्यकरूपम्-ग.५.अत्यन्तं-इ.फ.ग.ह.ज.६.धारणं च-फ.ग.७.पञ्चाशत्कोटि-विस्तीर्णा-फ.८.पदमिदं नास्ति-अ.ब.९.रक्ताकृति-फ.ग.ह.ज.१०.मृति-अ.ब.११.मण्डले-ब. १२.युक्तै-ब.१३.पीनरसं-अ.ब.पीननगौरवत्वं-ग. पीनरसगौरवं-फ.ह.ज.१४.विश्वप्रकाशे नोपलभ्यते।१५.व्रणचिह्नं-फ.ज. किणः चिह्ने-ग.कणचिह्ने-ह.१६.कूर्मः-इ.ग.ह.ज.१७.चक्रं चक्रेऽथ-फ.ग.ह.ज.१८.रथचक्रे-फ.ज.१९.तथा-अ.ब.२०.नास्ति-अ.ब.२१.नास्ति-फ.ग.२२.तिष्ठति-ल.म.२३.कथम्भूते-क.ल.म.२४.अतिविमलतरे-ल.२५.कथम्भूते-ल.म. कथम्भूतम्-क. २६.पृथिव्याः-ल.म.२७.नास्ति-क.२८.नास्ति पदमिदं-ल.म.२८.ददे-ड. अतिदृढे-ल.म.

## (९) कृष्णपण्डितकृत-जयन्ती

।।२।। (क्षितिरिति) अतिविपुलतरे अतिविस्तृते सर्वलोकाधारत्वात् धरण्याः पृथिव्याः धरणेन वहनेन जातेनेति करणे तृतीयातत्पुरुषः पञ्चमी वा। किणानि वहनसञ्जातत्वक्काठिन्यरूपाणि तेषां चक्राणि समुदायाः तैः गरिष्ठे श्रेष्ठे। अतिकठिन इत्यर्थः। तव पृष्ठे उपरितनभागे क्षितिः तिष्ठति निश्चलतया वसति। पृथिवीरक्षकस्य तव मद्रक्षणं कियदिति व्यङ्ग्यम्। हे (धृतकच्छपरूप!) धृतं कच्छपस्य रूपं आकृतिर्येन तत्संबोधनम्। शेषं प्राग्वत्।।२।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२।। कूर्मरूपं स्तुवन्नाह, क्षितिरतीति। अत्र पूर्ववन्मुखबन्धयोजना। तव पृष्ठे क्षितिस्तिष्ठतीत्येवंरूपापरा। किंविधे? अतिविपुलतरे इति। अतिमहीयसीत्यर्थः। पुनः किंविधे? धरणीधरण इति। धरण्या धरणेन यत् किणचक्रं किणसमूहस्तेन गरिष्ठे गुरुतम इत्यर्थः। किणस्वरूपमाह, ''कठिनद्रव्यसमर्दजनितोपचयस्तु यः। अङ्गैकदेशः

कृतिभिः स किणः परिकीर्तितः ।।" इति **बिन्ध्यवासी**। भगवता कूर्मेण महिमातिशयात् प्रतिकल्पमनादरेण धारणात् पृथिव्या एकत्रैव पृष्ठदेशे स्थितिनियमाभावात्। अनेन किणाः सन्तीति किणचक्रेण पृष्ठस्य गरिष्ठता कथिता। ननु क्षितिधरणीशब्दयोरेकत्वात् पौनरुक्त्यदूषणमत्र वर्तते। यदुक्तं **व्यक्तिविवेके**, "सर्वनामपरामर्शयोग्यस्यार्थस्य या पुनः। स्वशब्देनाभिधा दोषः स वाच्यवचनाभिधः।।" इति। क्षितिशब्देनात्र हस्तपादाद्यवयवः शाकिनीभूता धरणी च प्रतीयते। धरणीशब्देन तु पृथिवी मृत्तिकामयीति नास्ति पौनरुक्त्यम्। धृतकच्छपरूपेति सम्बोधनम्।।२ ।।

## (११) पूजारीगोस्वामीकृत-बालबोधिनी

।।२ ।। न केवलं तदाकर्षणमात्रेण अपि तु तद्धारणपूर्वकस्थित्यपीत्याह क्षितिरिति। सर्वत्र पूर्ववन्मुखबन्धयोजना। हे धृतकच्छ्रपरूप! तव पृष्ठे क्षितिस्तिष्ठति। ननु पञ्चाशत्कोटियोजनविस्तीर्णायाः कथं मम पृष्ठे स्थितः कथं स्यादित्याह, अतिशयेन विपुलतरे पृथिव्यपेक्षाप्यधिकविस्तीर्णे। पुनः कीदृशे ? धरण्याः धरणेन यत्किणचक्रं शुष्कव्रणसमूहस्तेन कठिने। अनेनैव कूर्मस्याद्भुतरसाधिष्ठातृत्वं विज्ञापितम्। किणः शुष्कव्रणेऽपिचेति **त्रिकाण्डशेषः**।।२ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२ ।।श्रीकूर्मरूपेण स्तौति। क्षितिरति; हे धृतकच्छपरूप! पूर्ववदर्थः। हे केशव! तव पृष्ठे क्षितिः पृथ्वी तिष्ठति। अक्लेशं वसतीत्यर्थः। ननु पञ्चाशत् कोटियोजनविस्तीर्णा सा कथं निश्चलाऽऽस्ते तत्राह; अतिविपुलतरे क्षित्यपेक्षयाऽधिक विस्तीर्णे इत्यर्थः। पुनः कीदृशे, धरणिधारणेन यत् किणचक्रं शुष्कव्रणसमूहः तेन गरिष्ठे गौरवयुक्ते। किणचक्रेति यत्र यत्र धरण्यवस्थानं ततस्ततोऽन्यत्रापसारणात् कूर्मजात्यनुकरणं व्यनक्ति। किं वा धरणिधारणो मन्थाचलः, "कृत्यल्युटो बहुलमिति ल्युट्"। क्षीरोदधिमथनसमये तत्तत् भ्रमणजनितकिणचक्राक्रान्त इत्यर्थः।"चिह्ने व्रणकिणाविति" हारावली। अत्र फलपर्यन्तकार्यनिर्वाहकतया स्थिरतालक्षणो नायकगुणः सूचितः। "आफलोदयकृत्स्थिर" इति लक्षणात्। अङ्गीकृतार्थापरित्यागरूपदृढव्रतत्वं च। "प्रतिज्ञानियमौ यस्य सत्यौ स सुदृढव्रतः" ।।२ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

**२- क्षितिरतीति -** इत्यत्र भगवतः कुर्मावतारं स्तौति कविः। हे जगदीश्वर! तुभ्यं वन्दे। तव जयजयकारो भवतु। किमर्थमिति जाते प्रश्ने, तवातिविपुलतरे नाम अतिव्यापिते पृष्ठदेशे क्षितिः नाम धरित्री तिष्ठति। तेन तव पृष्ठदेशे चक्राकारकस्य

किणस्य नाम शुष्कव्रणस्याकारेण चिह्नं चक्रवद्दृश्यते। **श्रीमद्भागवते** सन्दर्भेऽस्मिन्नुच्च्यते;

पृष्ठे भ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयना
न्निद्रालो:कमठाकृतेर्भगवत: श्वासानिला: पान्तु व:।
यत्संस्कारकलानुवर्तनवशाद्वेलानिभेनाम्भसां
यातायातमतन्द्रितं जलनिधेर्नाद्यापि विश्राम्यति।। इति। (१२/१३/२)

भगवत: पृष्ठे यदा मन्दरगिरिं समुद्रमन्थनसमये अनन्तसर्परज्जुना देवासुरा: ममन्थु: तदानीं पर्वतस्य कठिनास्तरणं तस्य कूर्मपृष्ठे घृष्ट:सन् चक्राकारस्य कठिनं व्रणाङ्कं सर्जयामास। अत्र भगवान् अनन्तमूर्त्तिधर: रज्जुरूपेण तथा मन्थननिमित्तं स्वस्य पृष्ठदेशं न्यवेदयत्। अहो भार: भगवत: परमेश्वरस्य। एवं भूतस्य कूर्मावतारस्य सुतरां जयो भवतु। श्लोकेऽस्मिन् महर्षि **श्रीअरविन्दस्य** कविता **गड्स लेवर्** अन्वेष्टव्या। तस्मात् दयावीरत्वम्।।२।।

**३-वसति दशनशिखरे धरणी तव लग्ना।**
**शशिनि कलङ्ककलेव निमग्ना।।**
**केशव! धृतशूकररूप! जय जगदीश! हरे!।।३।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३।। वराहरूपं स्तुवन्नाह। अत्र पूर्ववन्मुखबन्धयोजना। तव दशनशिखरे धरणी वसतित्येवंरूपापरा। कुत्र केनेत्याह। शशिनि कलङ्ककलेव निमग्ना इति। दशनेन साम्यानुपपत्ते: पूर्णचन्द्रेण न उपमानं, किं तर्हि, अर्द्धचन्द्र: तत्र या कलङ्ककला सा अस्तंगतरूपैवेति निमग्ना सदृशोपन्यास:। वाक्यार्थोपमेयम्

वाक्यार्थे नैव वाक्यार्थ: कोऽपि यद्युपमीयते।
एकानेकवशद्वत्वे सा वाक्यार्थोपमा द्विधा।।

धृतशूकररूपेति सम्बोधनम्। धृतं शूकररूपं येनेति विग्रह:। "शिरोऽग्रं शिखरं श्रृङ्गमित्**यमर:**" ।।३।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।३।। अथ वराह:। वसतीति। धृतशूकररूपेति ध्रुवे विशेष:। धरणी पृथ्वी तव दशनशिखरे द्रंष्ट्राग्रभागे लग्ना संसक्ता वसति। केव ? शशिनि चन्द्रमसि मग्ना अस्तगता कलङ्ककलेव। अनेन दंष्टाया महत्वं तदपेक्षया धरण्या अतिसूक्ष्मत्वं द्योतितम्। अत्रोपमालंकार:। इति तृतीयम्।।३।।

## (३) जगद्धरकृत- सारदीपिका

।।३ ।। वसतीति हे केशवेत्यादि पूर्ववत् धृतं शूकरस्य रूपं येन तव दशनशिखरे दन्ताग्रभागे धरणी पृथ्वी लग्ना संबद्धा वसति तत्र दृष्टान्तः केवलशशिनि चन्द्रे निमग्ना अन्तःस्थिता कलङ्करेखेव इव।।३ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।३ ।। वराहरूपं स्तौति, धृतशूकररूपेति। हे केशव! धृतशूकररूप धृतं शूकरस्य रूपं येन तादृश! जय। क्रोडावतारपरिग्रहप्रयोजनमाह, वसतीति। तव दशनशिखरे दन्ताग्रे लग्ना संश्लिष्टा धरणिः पृथ्वी वसति। कुत्र केव ? शशिनि चन्द्रे निमग्ना कलङ्ककलेव लाञ्छनलेश इव। अत्र "निमग्ना" पददानेन बालचन्द्रस्य सादृश्यं प्राप्तम्। अतस्तत्रैव कलङ्कलेशस्य निमग्नत्वाद्बालचन्द्रस्य दीर्घतया सादृश्यमपि संगच्छते। अत एव "निमग्ना" पदवैयर्थ्यमपि। "रदना दशना दन्ताः" **इत्यमरः**। "अग्रं शिखरमित्याहुरद्रिशृङ्गे च तन्मतम्" इति **धरणिः**। "कला स्यान्मूलके वृद्धौ शिल्पादावंशमात्रके। षोडशांशेऽपि चन्द्रस्य कलनाकालयोः कला" इति **विश्वः**।।३ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।३ ।। अवतारान्तरं वर्णयति। वसतीति उक्तं च,

पातुं त्रीणि जगन्ति सन्ततमकूपाराच्चिरादुद्वहं
लीलाक्रोडकलेवरः स भगवान् यस्येकदंष्ट्राङ्कुरे।
कूर्मः कर्द्दति चालति भूरसति न सन्ति दिग्दन्तिनो
मेरुः कोषति **मेदिनी** जलजेति व्योमाति रोलम्बति।।

हे देव! दशन शिखरे दंष्ट्राग्रे लग्ना सक्ता मध्ये निमग्नेत्यर्थः एवं रूपधारिणी नीलरूपा **मेदिनी**, तस्याः नीलरूपत्वं च विचित्ररूपत्वादवगन्तव्यम्। शशिनि चन्द्रमसि निमग्ना कलंककलेव कलङ्करेखेव सती तिष्ठति। यथा चन्द्रमसि कलङ्करेखावभासते तथा तव दंष्ट्राग्रे धरणी राजतीत्यर्थः। कलवेत्येक पदम्। "इवेन सह नित्यसमासो विभक्त्यलोपश्च वक्तव्यः।" अत्रोपमानोपमेय साधारणधर्मादिनां चतुर्णामुपादानात्समासगा पूर्णोपमा। तदुक्तम्,

स्वतः सिद्धेन वाक्येन सम्मतेन च धर्म्मतः।
सामान्येन च वर्णस्य वाच्यं चेदेकदोपमा।।इति।।

तेन शशिनि दशनयोरौपम्यं गम्यत इत्यलङ्कारेणालङ्कारध्वनि। एकदेशविवर्त्तिन्युपमा वा। तेन च सर्वेश्वरस्य दंष्ट्राग्रेणैव धरणिधारणसामर्थ्यमलोकरूपं वस्तु व्यज्यत इत्यलंकारेणानुरणितवस्तुध्वनिः।।३ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।३।। वराहावतारं स्तौति। हे केशव धृतशूकररूप गृहीतवराहावतार त्वं जय जय। तव दशनशिखरे दन्ताग्रे धरणी लग्ना सती वसति तिष्ठति। अत्र तदानीन्तनवर्त्तमानत्वेनैव वसतीति प्रयोगः, चिन्तनेऽपि तद्रूपसाक्षात्कारेण वा। एवमपरत्रापि। कुत्र केशव? शशिनि चन्द्रे निमग्ना कलङ्कस्य कलेव लेखा इव। चन्द्रखण्डेन दशनस्य साम्यात्तत्र कलङ्कोऽपि स्वल्प एव इति युक्तं कलङ्ककलोपादानम्। एतेन दशनस्यातिमहत्वं सूचितम्। शिरोऽग्रं शिखरं प्राहुरद्रिशृङ्गेऽपि तन्मतमिति **विश्वः**।।३।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।३।। एवंविधात्मिककेलिमुदितं तदङ्ग [१]सौन्दर्यं वर्णयन्त्या(न्ना)ह; वसतीत्यादिना। हे [२]केशव! धृतशूकररूप। शूकरोति तनूकरोति [३]कन्दानिति शूकरः। [४]अत्र तु मानकन्द [५]खनने तथात्वं तस्योच्यते। उक्तं च,

> ''कामिनीनयनकज्जलपङ्कादुत्थितो मदनमत्तवराहः।
> कामिमानसवनान्तरचारी कन्दमु[६]त्खनति[७]मानलतायाः।।इति।।''

तव दशनशिखरे धरणी लग्ना तिष्ठतीत्यन्वयः। धत्ते रसं प्रेयसीं वा धरणी। [८]तच्छीला सा तव दशनशिखरे दन्ताग्रे दशनक्षत[९]विभागे वसति। कस्मिन् केव? शशिनि परमानन्दजनके चन्द्रे निमग्ना कलङ्कलेखेव। सा यथा विद्यमानाऽपि न शोभातिरस्करिणीति। एतेन नायकस्य गुणप्रकर्षो दर्शितः। पक्षे वराहावतार[१०]माह स्तौति च। हे [११]केशव। [१२]धृतशूकररूप; धृतं शूकरस्य [१]वराहस्य रूपं येन। [२]जय जय। वराहप्रयोजनमाह; वसतीत्यादिना । तव दशनशिखरे दन्तस्याग्रे लग्ना [३]सक्ता [४]धरणी [५]वसुन्धरा वसति। अत्र [६]निमग्नपदोपादानेन बालचन्द्रस्य [७]सादृश्यं कार्यते। [८]अनेनानायासेन दंष्ट्रया धरण्यु[९]द्धरणेन बलातिशयनिरूपणेन महासत्त्वतालक्षणो नायकगुण उक्तः। शेषं समानम्। ''रदना दशना दन्ताः ''**इत्यमरः**(२.६.९१)। [१०]''कला स्यादंशमात्रके'' इति [११]**हलायुधः**। ''अग्रं शिखरमित्याहुरद्रिशृङ्गे च'' इति **धरणिः**[१२]। ''शूकरः शूकरे प्रोक्तस्तनूकारिणि वस्तुनि'' इति **भोजे**। (उत्)प्रेक्षागर्भितोपमालङ्कारः।।३।।

१.सौन्दर्यमित्याह - ग. २.केशव नास्ति - इ.फ.ग.ह.ज. ३.कन्दानीति -इ.फ. ४.अत्रत्वमानकन्दशमने - ब. ५.षणने-फ.ग.ज. ६.त्पणति - इ. त्वणति-ग. त्षणति -ज. ७.कन्दलतायाः - ग. ८.तच्छीला नास्ति - ग. ९.विधाने - इ.फ.ग.ह.ज. १०.माह। स्तौति - धृतशूकररूपेति - ब. ११.नास्ति - इ.फ.ग.ह.ज. १२.नास्ति - ग.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।३ ।। वसतीति। केशवेत्यादि [१३]पूर्ववत्। [१४]धृतं सूकररूपं येन। तव दशनशिखरे [१५]दन्ताग्रभागे धरणी पृथ्वी लग्ना [१६]सम्बद्धा वसति।[१७]तत्र दृष्टान्तः [१८]शशिनि चन्द्रे निमग्नाऽन्तः स्थिता कलङ्ककलेव कलङ्करेखेव।।३ ।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।३ ।। (वसतीति।) धरणी पृथिवी तव दशनस्य दंष्ट्रायाः शिखरे प्रान्तभागे लग्ना वसति। हे केशव! शशिनि चन्द्रे निमग्ना एकदेशवर्तित्वात् ज्योत्स्नायाः अनावरकत्वात् निमग्ना कलङ्कस्य चिह्नस्य कलेव अंश इव। कलङ्कांशोपमानेन पञ्चाशत्कोटियोजन-परिमितधरण्याः दंष्ट्राग्रनिवासेन अतिवैपुल्यं अनायासेन पृथिव्युद्धरणेन व्यज्यत इति अलङ्कारेण वस्तुध्वनिः। धृतसूकररूप! वराहावताः। शेषं प्राग्वत् ।।३ ।।

१.नास्ति - अ.ब.इ.ग.ह. २.जय जयेति पूर्ववत् - फ.ज.जय - ह. ३.शक्ता - ब. ४.५.न स्तः - ग. ६.निमग्नेति पदोपादेन - फ.ज. पादा पदनेव - ब. ७.नास्ति - अ.ब. ८.अनेनामायासेन - अ.ब. ९.द्धरणे बलातिशयनिरूपणे - ग. १०.तः ११.पर्यन्तोभागो नास्ति - अ.ब. १२.नास्ति - हलायुधे. १३.पूर्ववत् नास्ति - ड. १४.नास्ति - ल. १५.तव दन्ताग्र - क. १६.नास्ति - ल.म. १७.तत्रोत्प्रेक्षते - ल.म. १८.शशिनि स्थिता कलङ्ककलेव कलङ्करेखेव निमग्ना - क. केशव शशिनि चन्द्रे निमग्नाऽन्तः स्थिता कलङ्ककलेव कलङ्करेखेव - ल.म.

## (१०) धनञ्जय-धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३ ।। वराहरूपं स्तुवन्नाह; वसतीति। अत्रापि पूर्ववन्मुखबन्धयोजना। तव दशनशिखरे दन्ताग्रे लग्ना सती धरणी वसतीत्येवंरूपापरा। कुत्र किमिवेत्याह; शशिनीति। विशेषणबलात् पूर्णचन्द्रेणोपमानम्। नह्यत्र कलङ्कलेखा निमज्जति, किं तर्हि अर्थापत्त्या बालचन्द्रः। तत्र या कलङ्ककला सास्तंगतरूपैव। एवं सति दशनेन साम्यमपि घटते। एतेन दन्ताग्रस्य विस्तीर्णता कथिता। वाक्यार्थोपमेयम्। ''वाक्यार्थेनैव वाक्यार्थः कश्चिद् यदुपमीयते। एकानेकेवशब्दत्वात् सा वाक्यार्थोपमा द्विधा'' इति। धृतशूकररूपेति सम्बोधनम्। धृतं शूकररूपं येनेति विग्रहः। ''शिरोऽग्रं शिखरं चाङ्गम्'' **इत्यमरः**। समुद्रमग्नां महीं वराहरूपी भगवान् दन्ताग्रे (खो) [क्व] चिज्जहार इति पुराणकथा।।३ ।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।३ ।। नचैतावतैवोद्वहनपूर्वोद्गमनेनापीत्याह। हे धृतशूकररूप! तव दन्ताग्रे धरणी लोकधारणकर्त्र्यपि लग्ना वसति। कुत्र केव ? शशिनि चन्द्रे निमग्ना कलङ्कस्य कलेव।

अत्र दशनस्य वालचन्द्रेणोपमा धरण्या: कलङ्ककलया, अतएव निमग्नशब्दोपादानात्। अनेनैव बराहस्य भयानकरसाधिष्ठातृत्वं ज्ञापितम्।।३।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३।।श्रीवराहरूपेण स्तौति; हे धृतशूकररूप! आविष्कृतवराहमूर्त्ते। तव दशनशिखरे दन्ताग्रे धरणी लोकधारकत्वेऽपि लग्ना, संसक्ता वसति । कस्मिन् केव, शशिनि बालचन्द्रे निमग्ना कलङ्ककलेव। धरण्या: श्यामलत्वात् कलङ्कसाम्यम्, दशनस्य शौक्ल्यात्वक्रत्वाच्च बालेन्दुसाम्यम्। तत्र कलेव निमग्नेत्यनेन दशनस्य महत्त्वातिशय: सूचित:। ''कला स्यादशंमात्रक:'' इति **हलायुध:**। ''अग्रं शिखरमित्याहुरिति'' **धरणी**। अत्र दशनेनानायासं धरण्युद्धरणसूचनात् बलातिशयनिरूपणेन बलीयस्त्वलक्षणो नायकगुण: सूचित:। लक्षणं तु, ''प्राणेन महता पूर्णो वलीयान्'' इति कथ्यते । इति।।३।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।।वसतीति; वसति तिष्ठति दशनशिखरे दन्तस्योपरि धरणी पृथ्वी लग्ना संश्लिष्टा भवति। तस्य तुलना क्रियते तद्यथा चन्द्रस्य धवलकिरणाभ्यन्तरे यदा कृष्णकलङ्करेखा लेखा वर्तते तथैव श्वेतदन्तस्योपरि धूसरधरित्र्या: लग्नता तथैव भातीति उपमीयते कविना। अत्र बालचन्द्रस्य सादृश्यं दशने प्राप्यते। बालचन्द्रस्य दीर्घत्वेन सादृश्यम्। महावराहरूपेण जगदीशेन पृथीव्या उद्धरणं कृतमिति **श्रीमद्भागवते** दृष्टमस्ति। प्रलयजलात् पृथीव्या उद्धरणं सुतरां पुन: धरित्र्यां स्थिते: रक्षणं द्योतयति। तदाह **श्रीमद्भागवते,**

तमालनीलं सितदन्तकोट्या क्ष्मामुत्क्षिपन्तं गजलीलयाङ्ग।।इति।(३/१३/३३)

**विष्णुसहस्रनामस्तोत्रे**ऽपि महावराह इति उक्तमस्ति। **ऋग्वेदे** (९/९७/९)ऽपि उल्लेखोऽस्ति परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर्ददृशे नक्तमृज्र:।

अतिव्यापनशील: तेज:पुञ्जोऽपि पृथिवीमुधृत्य दन्ताग्रे धत्ते। सोऽपि वराहरूपेण हिरण्याक्षस्य वधं सम्पादितवान् इत्यपि तस्य लीलायां संघटितमस्ति। अत्र भयानकरसस्य वर्णनम्।।३।।

**४-तव करकमलवरे नखमद्भुतशृङ्गम्।**
**दलितहिरण्यकशिपुतनुभृङ्गम्।।**
**केशव! धृतनरहरिरूप! जय जगदीश! हरे! ।।४।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।४।। नरसिंहरूपं स्तुवन्नाह। अत्र पूर्ववन्मुखबन्धयोजना। तवकरकमलवरे नखमद्भुतश्रृङ्गमस्तीत्येवंरूपापर। करः कमलेषु वर इति सप्तमीयोगविभागात् समासः। नखमद्भुतशृङ्गं नखमित्यसमस्तरूपकम्, अद्भुतं च तत् शृङ्गं चेति कर्मधारयः। कथमद्भुतशृङ्गनखमित्याह। दलितो हिरण्यकशिपोस्तुनुभृङ्गो येनेति विग्रहः। अन्यद्धि कमलाश्रं भृङ्गेण दल्यत इदं दन्तुरकरकमलाग्रं भृङ्गं व्यदालीदित्यद्भुतशृङ्गत्वं नखस्येत्यभिप्रायः। ननु कमलस्योपरि भृङ्गपतनस्य दृष्टत्वादियं न घटते वर्णना। हिरण्यकशिपुं नखैर्बिदार्य भगवानुत्तोलितवानित्यस्ति पौराणिकी कथा। तेनैषा वर्णनायोग्या ज्ञेया। धृत नरहरिरूपेति सम्बोधनम्। धृतं नरहरिरूपं येनेति विग्रहः। ''शृङ्गमग्रे प्रभुत्वे च विषाणोत्कर्षयोरपि'' ।।४।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। अथ नृसिंहः। धृतनरहरिरूप इति ध्रुवे विशेषः।। तव करोति। तव करकमलवरे नखमद्भुतशिखररूपं मति। किंलक्षणम्? हेतुगर्भाविशेषणमाह, "दलितहिरण्यकशिपुतनु-भृङ्गम्" दलितो विदारितो हिरण्यकशिपोस्तनुभृङ्गस्तनुरेव भृङ्गो येन तत्तथा। तनुभृङ्ग इत्यत्र रूपकमलंकारः। करकमलवर इत्यत्रापि करस्य कमलत्वेन कमलाग्रत्वारोपः। भृङ्गः किल कमलाग्रं विदारयति; अत्र कमलाग्रेण भृङ्गविदारणमित्यद्भुतोत्पत्तिः। इति चतुर्थम्।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। तवेति, हे धृतं नरहरेः रूपं नरसिंहस्य स्वरूपं येन तत्संबोधनं तव करकमलवरे हस्तपद्मश्रेष्ठे नखमस्तीत्यध्याहारः। कथंभूतं नखम् अद्भुतशृङ्गम् आश्चर्यकरं शृङ्गमग्रभागो यस्य अद्भुतत्वे हेतुमाह दलितः विदारितः हिरण्यकशिपोर्दैत्यस्य तनुरेव भृङ्गो भ्रमरः येन अन्यत्र भ्रमरेण कमलोदल्यते इह तु वैपरीत्येनाश्चर्यम् ।।४।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४।। नृसिंहरूपं स्तौति, धृतनरहरिरूपेति। धृतं नरहरेर्नृसिंहस्य रूपं येन तादृश! जय। नृसिंहावतारस्य प्रयोजनमाह, तवेति। तव करकमलवरे करो हस्तः स एव कमलवरं कमलश्रेष्ठं तत्र नखं तिष्ठति। कीदृशम्? अद्भुतशृङ्गम्। अद्भुतमाश्चर्यं श्रृङ्गमग्रभागो

यस्य तत्तादृशम्। अद्भुत्वमेवाह, दलितेति। दलितो विदारितो हिरण्यकशिपोर्दैत्यस्य देहः स एव भृङ्गो भ्रमरो येन तादृशम्। अन्यत्र, तन्मकरन्दपानादिना भृङ्गाणां तृप्तिर्भवति, अत्र तु नृसिंहकरकमलाग्रभागेन भृङ्ग एव विदारित इत्यद्भुतत्वम्। अथवा, अन्यत्र कमलपत्राणि भृङ्गेण विदार्यन्ते, अत्र तु कमलेनैव भृङ्गो विदारित इत्यद्भुतम्। अत्र नृसिंहकरस्य कमलत्वनिरूपणेन हिरण्यकशिपोर्दैत्यस्य देहस्य भृङ्गत्वनिरूपणेन च बृहतोऽपि हिरण्यकशिपोः कायस्य नृसिंहकराम्बुजापेक्षयाऽतिसूक्ष्मत्वं ध्वनितम्। "पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम्" **इत्यमरः**। "शृङ्गं प्रभुत्वे शिखरे चिह्ने कोदाम्वुपत्रके। विषाणोत्कर्षयोश्चाग्रे सृङ्गः स्यात्कूर्चशीर्षके इति **विश्वः**। तनुः काये कृशे चाल्पे विरले चाप्यवाच्यवत्"। द्विरेफपुष्पलिङ्भृङ्गषट्पदभ्रमरालयः" ।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। अवतारान्तरं वर्णयति। तव करेति। उक्तं च,

यस्तम्भादुदयादहोबलमिति प्रस्तूयमानोऽमरै-
भर्क्तोक्तेः परिपालनाय भगवांल्लीलानृसिंहाकृतिः।
सद्योदारितदैत्यरागविगलद्रक्तोरसि प्रोल्लस-
त्पात्यश प्रसवोपमाननखरो देवः स वो रक्षतु।।

धृतं नरहरिरूपं नृसिंहशरीरं येन तादृशं हे केशव! कर एव कमलवरं नीररुहश्रेष्ठं तस्मिन्नधिकरणे अद्भुतमयमाश्चर्य्यकरं शृङ्गमग्रभागो यस्य तत्तादृशम् अथवा, शृङ्गवच्छृङ्गं वनमहिषविषाणकल्पमित्यर्थः, अतएवाश्चर्य्यकरत्वम् अथवा, व्यस्तरूपकम्। किञ्च दलितो विदारितः हिरण्यकशिपोः प्रह्लादजनकस्य तनुरेव भृङ्गश्चञ्चरीको येन तत्तादृशं भृङ्गसमानहिरण्यकशिपुशरीरविदारकमित्यर्थः। नखं नखानि। "जातावेकवचनम्"। वसतीति पूर्वगीतस्थ क्रियापदेनान्वय। अत्र करस्य कमलत्वरूपणान्नखानां दलत्वरूपणं हिरण्यकशिपुतनोर्दलान्तरवर्त्तिभृङ्गत्वरूपणं चेत्येकदेशविवर्त्ति रूपकम्। तेन च भगवतो नृसिंहस्यालौकिकपराक्रमशालित्व-रूपवस्तु व्यज्यते इत्यलङ्कारेण वस्तुध्वनिः।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। नरसिंहावतारं स्तौति। हे केशव धृतनरहरिरूप गृहीतनरसिंहदेह त्वं जय जय। तव करकमलवरे नखमद्भुतम् आश्चर्यजनकं शृङ्गमग्रमस्ति। कीदृशं शृङ्गम्? दलितहिरण्यकशिपुतनुभृङ्गं दलितो विदारितो हिरण्यकशिपोः तनुभृङ्गः शरीरभ्रमरो येन, अत एवाद्भुतम्। अन्यत्र भ्रमरेण कमलाग्रं दल्यते, अत्र तु कमलाग्रेण भ्रमरो

दलित इति अद्भुतत्वव्याघातः। जगद्धरादयस्तु तव कमलवरे नखमस्ति। कीदृशम्? अद्भुतमाश्चर्य्यजनकं शृङ्गं यस्येति व्याचक्षते। तम्मते नखस्य कमलाग्रत्वेनानिरूपणात् कमलाग्रेण भृङ्गो दलित इति अद्भुतत्वव्याघातः। शृङ्गं प्रभुत्वे शिखरे काले क्रीड़ाम्बुजाग्रके। विषाणोत्कर्षयोश्चापि शृङगं स्यात् कूर्च्चशीर्षक' इति **"धरणिः"** ।।४।।

## (७) वनमालिभट्टकृत- सञ्जीवनी

।।४।।[१]पुनः कोकशास्त्रप्रदर्शितां नखक्षतादिरूपां लीलां चतुरा नायिका प्रकारान्तरेणाह; [२]तवेति। क्रीडायां प्रवर्तमानस्याग्रपश्चाद्भावो नास्ति। [३]तत्तदवसरजन्यत्वात्। [४]नखक्षतनिर्दयत्वकथनाय रतिसमये नृसिंहरूप इत्युक्तम्। तव [५]करकमलवरे तव हस्तकमलवरे श्रेष्ठेनखमस्ति। कीदृशम्? [६]अद्भुतशृङ्गम्। अद्भुतमाश्चर्यजनकमग्रभागो यस्य तत्तथा। रक्तत्वकथनेन कञ्जसाम्यम्। पुनः कीदृशम्? दलितहिरण्यकशिपुतनु [७]भृङ्गम्। दलितो विदारितो हिरण्यकशिपौ स्वर्णशय्यायां तनुरेव भृङ्गो यत्र तत्। अन्यत्र भ्रमरेण कमलं विदार्यते ; अत्र [८]तु स एव दलित इत्यनेन शृङ्गाररसपूर्तिरुक्तेति भावः।[९]केशवेत्यादि पूर्ववत्। पक्षे[१०]नरहरिरूपं स्तौति। हे [११]केशव! हे धृतनरहरिरूप, धृतं नरहरिरूपं येन तत्संबोधनम्। [१२]जय जय। श्रीनृसिंहावतार- प्रयोजनमाह तवेति। तव करकमलवरे करो हस्तः स एव कमलवरः कमलश्रेष्ठस्तत्र नखं तिष्ठति। [१३]कीदृशम्? अद्भुतशृङ्गम्, अद्भुतमाश्चर्यरूपं शृङ्गं अग्रभागो यस्य तादृशम्। अद्भुतत्वमेवाह दलितेत्यादिना[१४]। दलिता विदारिता हिरण्यकशिपोर्दैत्यस्य तनुर्देहः स एव भृङ्गो भ्रमरो येन तादृशम्। [१५]अन्यत्र कमले तन्मकरंदपानादिना भृङ्गानां तृप्तिर्भवति। इह तु नृहरिकरकमलाग्र[१६]भागेन भृङ्ग एव विदारित इत्यद्भुतत्वम्। नरहरिरूपेत्यनेनातिविकटशौर्यबलातिशयेन नायके साहसिकत्वातिशयगुणः [१]सूचितः। ''माणिक्ये शिखरे [२]शृङ्गं [३]भूभृतां च विषाणके'' इति **वैजयन्ती**। ''पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम्" **इत्यमरः** (२.६.८३)। ''शृङ्गं प्रभुत्वे शिखरे चिह्ने [४]क्रीडाम्बुजे" इति **"विश्वप्रकाशः"** (१४.२१)। ''[५]तनुः काये कृशे [६]चाल्पे विरलेऽपि च वाच्यवत्" (इति **विश्वप्रकाशः** (७०.१८)। ''[७]द्विरेफः पुष्पलिड्-भृङ्गषट्पदभ्रमरालयः" **इत्यमरः**(२.५.३०)। ''[८]हिरण्यकशिपुर्दैत्ये शयने स्वर्णनिर्मिते" इति **भोजे**[९] ।।४।।

१.नास्ति - अ.ब.फ.ग.ह.ज. २.तवेत्यादि - इ.फ.ग.ह. ३.तत्तदिवसरज्यत्वान् - अ. तत्र दिवसरजन्यत्वात् - ब. ४.नखक्षता - अ.ब. ५.कमलवरे - फ. ६.नास्ति -फ.ग.ह.ज. ७.भृङ्गे

- ब.८.सुत एव - ब.९.जय जयेति केशवेत्यादि पूर्ववत् -फ.ज.१०.जय जय श्रीनरहरिरूपं स्तौति - ब.११.केशव नास्ति-इ.फ.ग.ह.ज.१२.जय जयेति - फ.ज. जय -ग.१३.त: १४.पर्यन्तं नास्ति - फ.ग.ज.१५.अन्यत्र कमले तन्मकरन्दपादिनो तादृशं अन्यत्र कमले तन्मकरन्दपानादिना भृं कर कमलाग्रभागेन भृङ्ग एव - ब.१६.भागे - अ.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।४।।तवेति।[१०]हे धृतं नरहरिरूपं नरसिंहरूपं येन, तत्सम्बोधनम्। तव करकमलवरे हस्तपद्मश्रेष्टे नखमस्तीत्यध्याहार:। कथम्भूतं नखम्? [११]अद्भुतशृङ्गम् अद्भुतमाश्चर्य-कारकं शृङ्गमग्रभागो यस्य। अद्भुतत्वे हेतुमाह। दलितो विदारितो हिरण्यकशिपो: दैत्यस्य तनुरेव भृङ्गो भ्रमरो येन। अन्यत्र भ्रमरेण कमलं दल्यते। इह तु [१२]वैपरीत्येनेत्या-श्चर्यम्।।४।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।४।।(तवेति।) तव कर एव कमलवरं उत्कृष्टपद्मं तस्मिन् अद्भुतं आश्चर्यजनकं शृङ्गं शिखरं यस्य तत्। दलित: छिन्न: हिरण्यकशिपु: हिरण्याक्षानुज: तस्य तनुरेव भृङ्गो भ्रमरो येन तत्। नखं वसतीति शेष:। धृतनरहरिरूप! नरश्च हरिश्च नरहरी तयो रूपे मुखकायौ यस्य स:। हे नृसिंह इत्यर्थ:। अत्र करस्य कमलारोपणेन निमित्तेन दैत्यतनोर्भृङ्गत्वनिरूपणमिति पारम्परितरूपकम्। शृङ्गं नखस्य अर्थत: केसररूपत्वमा-पततीति एकदेशविवर्तितं रूपकम्। अनयोरङ्गाङ्गिभावेन सङ्कर:। तेन च कमल-केसरतुल्य मृदुनखाग्रेण दैत्यसंहारस्यात्यनायासजन्य त्वमित्यद्भुतरसो वीररसाद्व्यज्यत इति।४।।

१.स्वचित:-अ.२.शृङ्गे-अ.इ.फ.ज.भृगे-ब.३.प्रभूतांचविषाणके-अ.प्रभृतां च विशाणिके-ब.भूभृतां च विषाणकेऽपीति-फ.ज.४.क्रीडाम्बुयन्त्रके-विश्वप्रकाश:।५.तनुस्काये कृते वाल्पे विरले वापि चान्यवत्-अ.ब.६.वाल्पे विरले चापि चान्यवत्-फ.ग.ज.वाऽपि विरले चापि चान्यवत्-इ.७.द्विरेफ: पुष्पलिट्भृङ्गयद्वदभ्रमरानय इति विश्व:-अ. द्विरेफ: पुष्पट्भ्रमरो भृङ्गा इति विश्व:-ब.द्विरेफ:;पुष्पमधुलिट् भ्रमरो भृङ्ग इति विश्व:-फ.ग.ज.द्विरेफ; पुष्पलिट् भ्रमरो भृङ्ग इति विश्व:-ह.८.त; ९.पर्यन्तो भागो नास्ति-अ.ब.१०.हे हरे-क.११.अद्भुत शृङ्गमग्रभागो-ड.१२.वैपर्येणेत्याश्चर्यम्-क.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।४।। नरसिंहरूपं स्तुवन्नाह, **तवेति**। अत्रापि पूर्ववन्मुखबन्धयोजना। तव करकमलवरे नखमद्भुतशृङ्गम्। नखरूपाद्भुताग्रमस्तीत्येवंरूपापरा। करकमलेषु वर इति सप्तमीयोगविभागात्समास:। नखमद्भुतशृङ्गमित्यसमस्तरूपकम्। अद्भुतं च तत् शृङ्गं चेति कर्मधारय:। कथमद्भुतशृङ्ग(नख)मित्याह। किंविधम्? दलित इति।

दलितो विदारितो हिरण्यकशिपोः तनुभृङ्गो येनेति विग्रहः। तनोः श्यामत्वाद्भृङ्गत्वारोपः। अन्यद्धि कमलाग्रं भृङ्गेण दल्यते। इदं करकमलाग्रं भृङ्गन्य(म)दालीदित्यद्भूताग्रत्वं नखस्येत्यभिप्रायः। ननु कमलस्योपरि भृङ्गपतनस्य दृष्टत्वादियं न घटते वर्णना। हिरण्यकशिपुनखैः विदार्य भगवानुत्तोलितवानित्यस्ति इति **पुराणम्**। तेनैषा वर्णना योग्या ज्ञेया। धृतनरहरिरूपेति सम्बोधनम्। ''शृङ्गमग्रे प्रभुत्वे च विषाणोत्कर्षयोरपि'' इति।।४।।

## (११) पूजारीगोस्वामीकृत- बालवोधिनी

।।४।। नात्मनः क्लेशसहनमात्रेण परपीड़यापीत्याह, हे धृतनरहरिरूप! तव करकमलवरे नखमस्ति। कीदृशम्? आश्चर्याद्भुतं शृङ्गमग्रभागो यस्य तादृशम्। अद्भुतत्वमेवाह विदारिते। हिरण्यकशिपोर्दैत्यस्य तनुरूपभृङ्गो येन तत्। अन्यत् हि कमलाग्रं भृङ्गेण दल्यते इदं तु कमलाग्रं भृङ्गं व्यदालीदित्यद्भुतशृङ्गत्वं नखस्य इत्यर्थः। विषाणोत्कर्षयोश्चाग्रे शृङ्गं स्यादिति **विश्वः**। अनेनैव श्रीनृसिंहस्य वत्सलरसाधिष्ठातृत्वं विज्ञापितम्।।४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४।।श्रीनृसिंहरूपेण स्तौति; तवेति। हे धृतनरहरिरूप! तव कर एव कमलवरः पद्मश्रेष्ठः तस्मिन् यन्नखमस्ति तदद्भुतशृङ्गम्। अद्भुतमाश्चर्यकरं शृङ्गमग्रभागो यस्य तादृक्। नखमिति जातावेकवचनम्। अद्भुतत्वमाह दलितो विदारितो हिरण्यकशिपोः महादैत्यस्य तनुरेव भृङ्गः स येन तत्। अन्यकमलाग्रं हि भृङ्गेण दल्यते, इदं तु कमलाग्रं भृङ्गं व्यदालीदित्यद्भुतत्वम्। अत्र तेजस्वितारूपो नायकगुणः। तेजोधामप्रभावश्चेत्युच्यते द्विविधं बुधैः। इति एतौ तु श्रीनृसिंहे अतिस्पष्टौ दृश्येते।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

४-तवकरकमलेति, हे केशव! तव सुशोभने हस्तकमले यन्नखं तथा च विस्मयाभिभूतं विषाणमस्ति। येन हिरण्यकशिपुः नखेन भ्रमर इव दलितं तस्य विशालशरीरं भगवतः नरसिंहस्य जंघस्योपरि संस्थाप्य नखेन विदारितम्।। **श्रीमद्भागवते** वर्णितमस्ति- दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षः स्थलमल्पमध्यमम्। चन्द्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधम्।।इति।(७/८/२२)। तथा च, विष्वक् स्फुरन्तं ग्रहणातुरं हरिर्व्यालो यथाऽऽखुं कुलिशाक्षतत्वचम्। द्वार्यूर आपात्य ददार लीलया नखैर्यथाऽहिं गरुडो महाविषम्।। इति।(७/८/२९)

अत्र वीभत्स-भयानकरसौ अङ्गाङ्गिभावेन स्त। अत्र महादानवः हिरण्यकशिपुः भगवतः श्रीनरसिंहस्य शरीरे नखेन भृङ्ग इव अनायासेन संगण्य भ्रमरकीट इव दलितः। भगवतः शक्तिस्तु बलवतीत्येव नास्ति संशयलेशः। सामान्यतः कमलवरे नखाग्रं कमलं भ्रमर:विदीर्यः बहिर्गछति। अत्र नखकलमेन भ्रमररूपस्य विदारणं भगवतः अयोनिसम्भूतस्य विष्णोः महानरसिंहरूपस्य महिम्ना विरोधस्य परिहारः भगवतः स्वतन्त्रत्वात् परमत्र कमलं भृङ्गः विदारयति इति अद्भूतोत्पत्तिः।।४।।

**५-छलयसि विक्रमणे बलिमद्धुतवामन।**
**पदनखनीरजनितजनपावन।।**
**केशव! धृतवामनरूप! जय जगदीश! हरे!।।५।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५।। वामनरूपं स्तुवन्नाह। अत्रापि पूर्व वन्मुखबन्धयोजना। विक्रमणे त्रिविक्रमावस्थायां वलिं दैत्येशं छलयसीत्येवंरूपापरा। छलछद्मगतौ। वृषादित्वात्कलच्। यद्धा छलअत्। अद्भुतवामनरूपेति सम्बोधनम्। अद्धुतश्चासौवामनश्चेति विग्रहः। कथमुद्धुतत्वं वामनस्येत्याह पदनखनीरजनितजनपावनेति पदस्य नखानां जलेन जनित, जनानां पावनं पवित्रता येनेति विग्रहः। वामनस्य पदनखेन ब्रह्माण्डभेद इत्यद्भुतत्वम्। विष्णुः किलैकपादेन पृथिवी व्याप्यापरेण बलिं पातालं नीत्वा परेण चाभ्युद्यतेन ब्रह्माण्डं भित्वा गङ्गामवतारयतीत्यस्ति **पौराणिकी** कथा।।५।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५।।अथ वामनः। "धृतवामनरूप" इति ध्रुवे विशेषः।। छलयसीति। हे अद्धुतवामन! त्वं बलिं दानवं छलयसि वञ्चयसे। अत्र भूतेऽप्यद्यापि बलिसमीपे वर्तमानत्वात्, छलं कुर्वन्नसीति वर्तमानसामीप्याद्वा प्रवाहनादित्वेन प्रतिवामनावतारं छलनप्रारम्भपरिसमाप्तत्वाद्वर्तमानापदेशः। वामनस्याकारेण सर्वत्वात्प्रभाप्राग्भारेणाविभाव्यस्वरूपत्वादद्धुतत्वम्। क्व ? विक्रमणे विक्रमत्रयकरणे। अत्र हेतुगर्भविशेषणम्। पदेति। पदनखनीरेण जनितं जनपावनं येन। इदमत्राकूतम् बलिना वामनस्य चरणार्धे क्रियमाणे सहसा वृद्धिमाप्ते चरणार्थे यदुदकं गृहीतं तन्नखमात्र एव पर्याप्तम्। अतः पदनीरे वक्तव्ये पदनखनीर इत्युक्तिः। अथवा, तृतीये पदविन्यासे चरणाग्र एव ब्रह्मलोकमितो झटिति ब्रह्मणा दीयमानार्घजल-जनितविष्णुपादाग्रसंभवजलेन पावन इति। अत्राद्धुतो रसः। अतिशयोक्तिरलंकारः। इति पञ्चमम्।।५।।

## (३) जगद्धरकृत- सारदीपिका

।।५ ।। छलयसीति। धृतं वामनस्य रूपं येन हे अद्भुतवामन आश्चर्यहेतुवामनत्वं विक्रमणे पादविक्षेपे कर्त्तव्ये बलिम् असुरं छलयसि प्रवञ्चयसि कीदृशस्त्वमिति सम्बोधन पदेति पदनखनीरेण पदनखाग्रसम्बन्धिजलेन गङ्गारूपेण जनितं कृतं जनपावनं लोकपावित्र्यं येन।।५ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५ ।। इतो वामनरुपं स्तौति-धृतेति। हे केशव! धृतवामनरूप धृतं वामनस्य खर्वस्य रूपं येन तादृश! जय। वामनावतारप्रयोजनमाह छलयसीति। हे अद्भुतवामन आश्चर्यवामन! विक्रमेण पराक्रमेण वलिं दैत्यं छलयसि वञ्चयसि। भगवानुपेन्द्रो वासनरूपं कृत्वा वलेः सकाशात्पदत्रयपरिमितां भूमिं प्रार्थ्य पश्चाद्बृहद्रूपं प्रकटीकृत्य चतुर्दशभुवनं पदत्रयेणापूर्य तदपराधेन तं वद्ध्वा चाधः क्षिप्तवानिति पुराणप्रसिद्धिः। अद्भुतत्वमेवाह; पदनखेति। पदनखसंवन्धि यन्नीरं गङ्गाजलं तेन जनितमुत्पादितं जनानां पावनं पावित्र्यं येन तादृश। अत्रापि प्रवर्धमानस्य भगवतस्त्रिविक्रमस्य चरणाङ्गुष्ठनखाग्रेण विदीर्णे ब्रह्माण्डस्य प्रथमे पार्थिवावरेणे तेनैव वर्त्मना तच्चरणारविन्दप्रक्षालनादेवागतं द्वितीयावरणजलं ब्रह्मादत्तार्घेण जलेनैकीभूतं क्रमेण मर्त्यलोकमागतं गङ्गेति प्रसिद्धं लोकान्पावयतीति पुराणप्रसिद्धिः। अत एव भूलोकस्थितेनापि ब्रह्माण्डजलस्यानयनादाश्चर्यम्। "अम्भोऽर्णस्तोयपानीयनी-रक्षीराम्बु शम्बरम्" **इत्यमरः**।।५ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५ ।। अवतारान्तरं वर्णयति छलयसीति।

उर्ध्वाधश्चक्रदण्डः शतधृतिभवनाम्भोरुहो नालदण्डः
क्षोणी नौ कूपदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः।
ज्योतिश्चक्राक्षदण्डस्त्रिभुवनविजयस्तम्बदण्डो ऽघ्रिंदण्डः
श्रेयस्तेर्विक्रमस्ते वितरतु विवुधद्वेषिणां कालदण्डः।। दण्डी दशकुमारचरितम्

अद्भुतयन्तीऽत्यद्भुताः, स्वप्रतापेन सर्वाश्चर्य्यकारिण इत्यर्थः अद्भुतशब्दात्त-त्करोति "ण्यन्तात्पराद्यचिणेर्लोपः।" तादृशानप्यसुरान् वामनयति नीचभाव गमयतीत्यद्भुतवामनः। मत्तराक्षसशिक्षक इत्यर्थः। अद्भुतवामनेति पदद्वयं वा, अद्भुतकारित्वं च तस्त सर्वेश्वरस्य वामनीभावानन्तरमेव त्रिलोकीव्याप्त-पादत्वादवगन्तव्यम्। किञ्च, पदनखानां यन्नीरमुदकं ब्रह्मकृतक्षालनेन नखेभ्यो गलितं गङ्गाकारं यज्जलं तेन जनितमुत्पादितं जनानां लोकानां पावनं शुद्धीकरणं येन तादृशस्य

पादोदकेन सकलजनपातकनिवर्त्तकेत्यर्थः। उक्तं च **भागीरथीस्तवे-**

"आदावादि पितामहस्य नियम व्यापार पात्रीजलं
पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम्।"

अत्र निषद्धस्यापि नखोदकस्य सकलजनपावनत्व प्रतिपादनं भगवतः श्रीकृष्णस्यालौकिक मतिमहसूचनार्थमवगन्तव्यम्। किञ्च, धृतवामनरूपं येन स तथा। एतादृशत्वे केशवविक्रमणे विशेषण पादक्षेपे त्रिलोकीव्याप्त पादन्यासे सतीत्यर्थः। बलि बलिनामधेयं राक्षसं चलयसि स्वस्थानाद्भ्रंशयसि, राज्यभ्रष्टं कृत्वा पातयसीत्यर्थः। अनेन भगवतः स्वभक्तसन्ततावत्यन्तानुग्रहः सूचितः। उपाय पराक्रमाभ्यां दानव दमनत्वमेतसैव नान्यस्येत्यस्य सर्वोत्कृष्टत्वमितिभावः। एतादृशं सामर्थ्यं सर्वदा हरेः वर्त्तत इति सूचयितुं चलयसीति वर्त्तमानप्रयोग इत्यवगन्तव्यम्। अनेन महापराधकार्य्योपि दाता संरक्षणीय इति द्योत्यते। चलयसीत्यत्र चल कम्पने चलिरिति घटादिषु कम्पनार्थस्य चलितः पाठान्नोपधावृद्धिः।।५।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५।। वामनावतारं स्तौति। हे केशव धृतवामनरूप गृहीतवामनशरीर जयजय। कीदृश ? अद्भुतवामन अद्भुतमाश्चर्यजनकं वामनं वामनत्वं यत्र तादृशम्। विक्रमेणेति विक्रमावस्थायां बलिं बलिनामानमसुरराजं छलयसि वञ्चयसि। छलछर्युगतौ चुरादिः। पुनः कीदृशः ? पदनखनीरेण गङ्गाजलेन जनितं जनानां पावनं पावित्र्यं चरणनखेन ब्रह्माण्डभेदनात् अद्भुतत्वम्। 'खर्व्वो ह्रस्वश्च वामन' **इत्यमरः**।।५।।

## (७) वनमालिभट्टकृत- सञ्जीवनी

।।५।। [१]आलिङ्गनरूपां क्रीडामाह, छलयसीत्यादिना। हे [२]केशवा धृतवामनरूप। [३]वामयति नामयति आलिङ्गनादिभिर्वा मानादिना वा यः स वामनः, तत्सम्बोधनम्। [४]तेन मानन त्वं [५]विक्रमणे [६]सुरतविक्रमे[७] सुरतपराक्रम इत्यर्थः। वलिं त्रिवलिं छलयसि वञ्चयसि। विपरीत विधानेन [८]जात्यान्नमयसीति सूचितम्। हे अद्भुत [९]वामन! [१०]आश्चर्य[११]वामन पदनखेति सम्बोधनम्। [१२]विपरीतसुरतेन तत्र [१३]यत्पदनखं तत्क्षालनाय यत् नीरं तेन जनितं जनस्य [१४]नन्दनन्दनस्य पावनं [१५]चित्तप्रसादो येन तत्सम्बुद्धिः। चित्तप्रसादकारिन्। एतेन [१६]नायकोत्कर्षः पावनत्वञ्च नायक स्योक्तम्। ननु नखदानं [१७]करनखेनैव जन्यते, न पदनखेनेति। सत्यम्, एतत्तु विपरीतरतौ नायिकापदनखक्षताभिप्रायेण [१८]ज्ञातव्यम्। पक्षे वामनरूपं स्तौति। [१९]हे केशव। धृतवामनरूपेति। [२०]अद्भुताश्चर्यरूप [२१]वामन अद्भुतमदृष्टपूर्वं दैत्यानां दर्पं नाशयतीति

वामनः। अद्भुतत्वमेवाह[२२]पदनखेति। पदनखसम्बन्धि यन्नीरं गङ्गाजलं तेन जनितं जनानां [२३]पावित्र्यं येन तादृश। जय केशवादिपूर्ववत्। वामनावतारप्रयोजनमाह छलयसीत्यादि। विक्रमणे पराक्रमे बलिं दैत्यं छलयसि वञ्चयसि। श्रीकृष्णो वामनरूपं विधाय बलेः [१]पदत्रयपरिमितां भूमिं याचयित्वा पश्चाद्बृहद्रूपं प्रकटीकृत्य बलिमधः क्षिप्त्वा चतुर्दशभुवनानि गृहीतवानिति पुराणप्रसिद्धेः। छलयसीत्यनेन नायकस्य अनुनयचातुरी सूचितेति भावः। ''बलिस्त्रिवल्यामसुरे बलिः पूजोपहारके। बलिर्बलिष्ठः'' इति वैजयन्ती। ''[२]अम्भोर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम्'' **इत्यमरः** (१.१०.४)। वामनः कर्षके [३]विष्णौ वामनो नतिकारकः ''छलन्तु कौतुके प्रोक्तं छलं केलिकलास्वपि'' इति **रत्नकोशः** [४]।।५।।

१.हिरण्यकशिपुआलिङ्गनरूपां - अ.ब. २.केशव नास्ति - फ.ग.ह.ज. ३.वामयति नामयति आलिङ्गनादिना यः स वामनः - इ. वामयति भामयति आलिङ्गनादिना वा गनादिना यः स वामनः - ज. ४. येन - ब. ५. विक्रमे - अ.ब.इ.ग.ह. ६.सुरतविक्रमे नास्ति - अ.ब.इ. ७.सुरतरप्तपराक्रम - ब. ८.जात्यान्न वामयसीति - ग.जात्या भ्रामयसीति - फ. ९.वामनः - अ. १०.आश्चर्यवामन नास्ति - फ. ११.वामनः - अ.ब. १२.विपरीतेन - ग. १३.यं पदनखम् - अ.ब. १४.नन्दनन्दन्यपावनं - अ.नन्दनन्दन्ययावनं - ब. १५.चित्तप्रसादो नास्ति - अ. १६.नायिकोत्कर्षः - इ.फ.ग.ह.ज. १७.करन खैर्नैव - अ. १८.दातव्यम् - ज. १९. हे धृतवामनरूपेति - ब.इ.फ.ग.ह.ज. २०.अद्भुतवामनआश्चर्यरूपवामन - फ.ज. २१.वामनः - अ.ब. २२.पदनषेति - अ. २३.पवित्रं येन तादृशम् - ब.

## (८) नारायणपण्डितकृत- पदद्योतनिका

।।५।। छलयसीति। धृतं वामनरूपं येन। [५]अद्भुत[६]वामनश्चाश्चर्य हेतुः वामनत्वं [७]विक्रमेण पादविक्षेपे कर्तव्ये बलिमसुरं छलयसि वञ्चयसि।[८] कीदृशस्त्वं इति सम्बोधनम्। पदेति। पदनखनीरेण पदनखाग्रसम्बन्धिजलेन गङ्गारूपेण जनितं कृतं जनपावनं लोकपावित्र्यं [९] येन।।५।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।५।। (छलयसीति।) हे (अद्भुतवामन।) अद्भुतः आश्चर्यकरः स चासौ वामनः खर्वः तत्सम्बोधनम्। पदनखस्य चरणनखस्य नीरेण सलिलेन जाह्नवीरूपेण जनितं उत्पादितं जनानां सगरसुतादीनां पावनं पुण्यं येन, तत्सम्बुद्धिः। विक्रमणे पदविक्षेपे बलिं विरोचनसुतं छलयसि वञ्चयसि। त्रिलोकाक्रमणार्थं त्रिपाद्याञ्चछलं कृतम्। अन्यार्थप्रयुक्तवाक्यमर्थान्तरप्रकाशनं छलम्। त्रिपादाभिप्रायवाक्यं त्रिलोकाक्रमणेन प्रकटितमिति छलम्। नवकम्बलवाक्यवत्। अत्रापि वामनेन[१०]अत्युच्च सत्यलोकातिक्रमणात्। ब्रह्माण्डकटाहभेदेन बाह्यजलाप्लुतनखोदकत्वं जाह्नव्यास्तेन सकललोकपवित्रीकरणं विरुद्धकार्यकरणमाश्चर्यं नखोदकस्य निषिद्धत्वात्। हे वामनरूप उपेन्द्रावतार। (शेषं प्राग्वत्)।।५।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५।। वामनरूपं स्तुवन्नाह, छलेति। अत्रापि पूर्ववन्मुखबन्धयोजना। विक्रमणे त्रिविक्रमावस्थायां बलिं दैत्येशं, छलयसि वञ्चयसीत्येवंरूपापरा। ''छर(ल) छद्मगतौ'' कपिरिकात्वाल्ल(व)त्वम्। अद्भुतवामनेति सम्बोधनम्। अद्भुतश्चासौ वामनश्चेति विग्रहः। कथमद्भुतत्वं वामनस्येत्यादि, पश्चाद् अवामनीभावात्। तथा च **हरिवंशे** - ''पाणौ तु पतिते तोये वामनेऽभुद्वामनः'' इति। पुरा किल भगवता कश्यपाज्जन्म गृहीत्वा वामनरूपेण भूमिपादत्रयं याचित्वा प्रतिगृह्य च त्रिविक्रमरूपेण बलिः पातालं प्रवेशित, इति बलिच्छलं पुराणेतिहाससिद्धम्। तमेव(तदेव) विक्रमरूपं सम्बोधनपदेन विशिनष्टि, पदनखेत्यादि। पदस्य ऊर्ध्वं गतस्य चरणस्य यो नखः तत्प्रतिबन्धनीरेण त्रिपथगामिना जलेन जनितं जनानां पावनं पवित्रीकरणं येनेति विग्रहः। त्रिविक्रमक्रमणप्रस्तावे ब्रह्मलोकपर्यन्तमुद्गते तदीये पादे ब्रह्मणा[ख्य](क्ष)यमर्घ्यं दत्वा पूजा कृता। तच्च पाद्यं नखसन्धौ लीनं भगवन्निपीडितादधः पतमानं गङ्गाभिधानम् अद्यापि त्रिलोकीं पुनातीति **पुराणकथा**। तदुपरोधान्नखनीरेत्युक्तम्। धृतवामनरूपेति सम्बोधनम्। धृतं वामनरूपं येनेति विग्रहः। ''बलिर्दैत्यप्रभेदे स्यात् करचामरदण्डयोः। उपहारे पुमान् स्त्री च जरया श्लथचर्मणि।।'' इति।।५।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।५।। अपि च कपटदैन्यादिनापीत्याह हे धृतवामनरूप! हे अत्यदद्भुतवामनरूप! विक्रमणे पदाक्रमणनिमित्तमुपादाय वलिं वंञ्चयसि। पदनखनीरेण जनितं जनानां पावित्र्यं येन हे तादृश! जय। एतदद्भुतत्वम् अनेनैव वामनस्य सख्यरसाधिष्ठातृत्वं विज्ञपितम्।।५।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५।।श्रीवामनावतारेण स्तौति; छलयसि। हे धृतवामनरूप! आविष्कृतह्रस्वाकृति-वटुशरीर। त्वं विक्रमणे विशेषेण क्रमणे पादविक्षेपे, क्रमु पादविक्षेपे धातुः, बलिं बलिनामानं प्रह्लादस्य पौत्रं छलयसि, वञ्चयसि। अत्र हेतुगर्भविशेषणम्, पदेति पदनखनीरेण चरणनखसम्बन्धिना जलेन गङ्गारूपेण जनितमुत्पादितं जनानां लोकानां पावनं पावित्र्यं येन हे तथाविध। प्रथममतिलघुपाददर्शनजनितजातकुतूहलो बलिः चरणत्रयपरिमितप्रदेशयाचनानन्तरं बालोऽयं किं प्रार्थितवानिति विस्मितः। प्रथमपादे समाक्रान्ता सकलभूमण्डले, द्वितीये च ब्रह्मलोकमाप्नुवति ससम्भ्रमायातब्रह्म-विरचितार्घ्यजलप्रवाहजनितमन्दाकिनीके, तृतीये चानन्यगतिकत्वेन स्वशिरसि

विन्यासिते। याचनव्यपदेशेन तदात्मसमर्पणरूपशुद्धभक्तिवशीभूत स्तमनुगृह्णासीति भावः। अत एव हे अद्भुतवामन वामनो भूत्वा त्रिलोकीव्याप्तपादत्वात् अद्भुतत्वम्। अद्भुतं यथा स्यात् तथा। महादैत्यान् वामनयतीति हे तथाविध। इति वा। अत्र विनयितारूपो नायकगुणः। ''औद्धत्यपरिहारी यः कथ्यते विनयीत्यसौ'' इति लक्षणम्।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। छलयसीति; वामनावतारं स्तौति। बलिमद्भुतवामनवेशेन छलयामास भगवान् विष्णुः। यस्य त्रिपादेषु द्यावा -पृथिवी-अन्तरीक्षाः वर्तन्ते। यथा पुरुषसूक्ते विशिष्यते; **ऋग्-१०.६०.४** त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत्पुनः। अपि च; **विचक्रमाणस्त्रेधोरुगायः (ऋग्-१.१५४.१)** यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा **(ऋग्–१.१५४.३)** अद्भुतशक्तिसम्पन्नः वामनरूपो विष्णुरिति। तस्य वामनस्य पादनखजलेन गङ्गा प्रवहति। या खलु त्रिपथगा स्वर्गमर्त्यपातालं पवित्रीकरोति। **वामनपुराणस्य** प्रसङ्गोऽत्र हास्याद्भुतयोः स्थितिः। पुराणस्येयं कथा **विष्णुपुराणे श्रीमद्भागवते**ऽपि वर्तते।।५।।

**६-क्षत्रियरुधिरमये जगदपगतपापम्।**
**स्नपयसि पयसि शमितभवतापम्।।**
**केशव! धृतभृगुपतिरूप! जय जगदीश! हरे!।।६।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६।। परशुरामरूपं स्तुवन्नाह। अत्रापि पूर्ववन्मुखबन्धयोजना। क्षत्रियरुधिरमये पयसि रामह्रदाख्ये तीर्थे अपगतपापं यथा स्यादेवं जगत् स्नपयसि इत्येवंरूपापरा। शमितभवतापमित्यपि स्नपनक्रियाविशेषणम्। शमितो भवस्य संसारस्य आधि-दैविकाधिभौतिकाध्यात्मिकस्तापो येनेति विग्रहः। इह स्नानमात्रेण एव अपगत पापत्वं पश्चात्पुनर्जन्मखण्डनात् शमितभवतापमिति तात्पर्य्यार्थः। परशुराम किल पितृबधोद्यत-क्रोधः क्षत्रियान् निहत्य तदीयरुधिरैः कुरुक्षेत्रे पञ्चह्रदान् कृत्वा पितृतर्पणमकार्षीदिति **पौराणिकी** कथा। धृतभृगुपतिरूपेति सम्बोधनम्। धृतं भृगुपतिरूपं येनेति विग्रहः। भृगोरपत्यानि भृगवः, अत्रिभृगु-कुम्भ-वशिष्ट-गौतमाङ्गिरेभ्यश्च इत्यतः लुक् भृगूनां पतिः भृगुपतिः परशुरामः इत्यर्थः।।६।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६।। अथ परशुरामः। "धृतभृगुपतिरूप" इति ध्रुवं विशेषः। क्षत्रियेति। एतत्पदस्य पुराणकथासापेक्षा व्याख्या। हे राम! जगत्स्नपयसि। क्व? पयसि जले। किंभूते जले? क्षत्रियरुधिरमये क्षत्रक्षतजविकारे। परशुरामः किलः क्षत्रक्षयं कृत्वा कुरुक्षेत्रे रामह्रदतीर्थे क्षत्रशोणितजलेन पितृनताप्र्सीदिति पौराणिकाः। तत्राद्यापि जगत्स्त्राति, अपगतपापं च भवति। तदेव कविराह। अत्रापि स्नानं प्रति रामशब्दस्यैव प्रवृत्तिनिमित्तत्वात्स्नपयसीति पदान्तराध्याहारेण भूतार्थालंकारस्थाने लये गतिश्चिन्तनीया। यस्त्वं स्नपयसि स जयेति वा। किंभूतं जगत्? अपगतपापमिति हेतुगर्भं विशेषणम्। अत एव शमितभवतापं शमितो भवतापोऽपगतभवतापत्वादाध्यात्मिकादिदुःखत्रयं येनेति तत्तथा। अत्र भाविनि भूतवदुपचारन्यायेन पापहानिः। तथा च दुःखत्रयाभिघातः। उभयमपि क्रियाविशेषणं वा। स्नपयसीति "ग्लास्ना" "(ग. ५९०) इति मित्वाद्ह्रस्वत्वम्। रुधिरमये इति विकारेमयट्। स्वभावोक्तिरलंकारः। अत्र बीभत्सो रसः। प्रलयेत्यादिपदषटेक धिरोद्धतो नायकः। तल्लक्षणं **सङ्गीतराजे रसरत्नकोशे**; मात्सर्यदर्पभूयिष्ठश्छद्मयहंकारवाञ्छली। चण्डो विकत्थनश्चैव धीरोद्धत उदाहृतः।। तद्गुणाः, दार्ढ्यं, तेजस्विता, दक्षता, धार्मिकत्वं चेति। तल्लक्षणं **रसरत्नकोशे** यथा, "व्यवसायादचलनं दार्ढ्यं विघ्नशतैरपि। अधिक्षेपाद्सहनं तेजःप्राणात्ययेष्वपि। दक्षता क्षिप्रकारित्वं धार्मिकत्वं तु तत्कृतिः"।।६।।

## (३) जगद्धरकृत-सारदीपिका

।।६।। क्षत्रियेति हे धृतभृगुपतिरूप धृतपरशुरामरूप क्षत्रियरुधिरमये पयसि जगत् स्नपयसीत्यन्वयः क्षत्रियाणां शोणितविकारे जले जगत्स्नपयसि स्नानेन फलमाह कथंभूतं जगत् अपगतपापं गतकलुषं पुनः कथंभूतं शमितभवतापं दूरीकृतसंसारतापम्।।६।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६।। परशुरामावतारं स्तौति; धृतभृगुपतिरूपेति। हे केशव! धृतं भृगुपतेः परशुरामस्य रूपं येन तादृश! जय। परशुरामावतारप्रयोजनमाह; क्षत्रियेति। क्षत्रियाणां रुधिराणि प्रचुराणि यत्र तादृशे, पयसि कुरुक्षेत्राख्यतीर्थजले जगत्प्राणिजातमपगतपापं यथा स्यादेवं स्नपयसि। यदवधि परशुरामेणैकविंशतिवारं क्षत्रियान्हत्वा तद्रुधिरैः कुरुक्षेत्रे पञ्च ह्रदान्विधाय पितृणां तर्पणमकारि, तदवधि तन्महातीर्थं जातमिति पुराणप्रसिद्धिः। कीदृशं जगत्? शमितभवतापं शमितो भवस्य संसारस्य तापः संतापो येन तादृशम्। प्राणिनां पापसंबन्धादेव संतापः, तत्तीर्थस्नानेन तु सर्वं पापं विलयं गतमिति ततः संतापनाशोऽप्यभूदिति। अस्य दर्शनमात्रेण तापो गच्छति, जले मज्जतः संतप्तस्य तापनाश उचित एवेति ध्वनिः।

"रुधिरोऽङ्गारके प्रोक्तो रुधिरं कुङ्कुमासृजोः" इति **विश्वः**। "भवः संसारसंतापश्रेयः-शंकरजन्मसु" इति च ।।६ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६ ।। अवतारान्तरं प्रस्तौति। क्षत्रियेति। उक्तं च,

यस्य श्री जमदग्निजस्य परशुस्त्रिः सप्तकृत्वो नृपपान्
हत्वा संप्रति कार्त्तवीर्य्यनृपतेर्दोर्मण्डलीखण्डनः।
निक्षत्त्रां सकलामदाद्वसुमतीं यः कश्यप ब्रह्मणे
पायाद्वः कमलामुखाब्जमधुपो रामावतारो हरिः ।।इति।।

भृगुपतिर्जमदग्निस्तस्य यस्य स तथोक्तः। तस्य सम्वुद्धिः। धृतपरशुरामावतारेत्यर्थः। भृगुपतिरूपत्वं च तस्य। ''आत्मा वै पुत्रनामासीति'' **श्रुतेः**। एतादृश हे केशव! क्षत्रियाणां जमदग्निद्रोहिजातीयबाहुजानां यद्रुधिरं रक्तं तन्मये तत्स्वरूपे ''स्वरूपार्थे मयडिति केचिद्वचनात्'' स्वरूपार्थे मयट्। पयसि तोये पापमेषामस्तीति पापाः पापकर्माणो जमदग्निवधकारिणः क्षत्रिया इत्यर्थः। ''पापशद्बादर्श आद्यच्प्रत्ययः'' अपगतानि पापानि यस्मिन् कर्मणि तद्यथा भवति तथा, किंञ्च, शमितः शान्तिं गमित इति यावत्।

भवतापः क्षत्रियबाधाजनितजनसंसारतापो यस्मिन् कर्मणि तद्यथा तथा। अथवा, भवत्यस्मात्परशुराम इति भवः परशुरामपित्रादिः शमितस्तत्पित्रादितापो यस्मिन् कर्मणीति वा। विरोधिक्षत्रियनाशे पितृलोक- वासितत्पित्रादितापापगतेरितिभावः। अथवा भवः सदाशिवः ''व्योमकेशो भवो भीम'' **इत्यमरः**। तस्य तापः मत्प्रियशिष्यः परशुरामः पितरं मुनिं जमदग्निं निष्कारणमेव हतवानिति यः सन्तापः शमितस्तादृशो-भवतापो यस्मिन् कर्मणीति वा। जगद्भूलोकं स्नपयसि अभिषेचयसि। अत्रापगततापं शमितभवतापमिति पदद्वयं जगद्विशेषणपरत्वेन कैश्चिद् व्याकृतं तदसरसं, स्नपनात् पूर्वं विशेषणद्वयस्यार्थाघटनात् अत्र रुधिरमये स्नपयसीति वस्तुना अस्य सर्वोत्कृष्टप्रतापशालित्वं रूपं वस्तु व्यज्यत इति वस्तुना वस्तुध्वनिः। अपराधकारिणः शिक्षणविधाविदानीमपि हरेः सामर्थ्यमस्तीति, सूचयितुं वर्त्तमानप्रयोगः।।६ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६ ।। परशुरामावतारं स्तौति। केशव भृगूणां भृगुवंश्यनां पतिः श्रेष्ठः परशुरामः धृतभृगुपतिरूप गृहीतपरशुरामदेह जय जय। क्षत्रियरुधिरमये राजन्यशोणितविकारे पयसि जले जगत् स्नपयसि स्नानं कारयसि। अपगतपापं विनष्टकलुषं शमितभवतापं

नाशितसंसाराध्यात्मिकाधिभौतिकाधिदैविकरूपदु:खत्रयञ्च यथा स्यात्। स्नानेन हि पापतापोपशान्तिर्भवतीत्युचितमेव। पुरा हि परशुराम: प्रतिज्ञापूरणाय सकलक्षत्रियात् हत्वा तेषां शोणितै: समन्तपञ्चकदेशे पञ्चह्रदान् निर्मितवान्। निर्मितवान् तत्र जगत् संसारिजातं स्नपयसीति नन्तस्यार्थ:।।६।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।६।। अतिदुस्सह [१]तापोपशमनीं क्रीडामाह; क्षत्रियेति। बिभ्रति रसमिति [२]भृगवो रसिका:, रसिकानां पति: [३]प्रभु: प्रशस्तो भृगुपतिरूप:। प्रशंसार्थे [४]रूप:। रसिकचूडामणे।[५] जय जगदीशेत्यादिपदं पूर्ववत्। क्षत्रियरुधिरसदृशे पयसि जगदपगतपापं स्नपयसि। श्रीकालिन्दी जलक्रीडायां कुङ्कुम [६]किर्मीरितायां गच्छतीति [७]जगन्नायिकासमूहं[८] स्नपयसि स्नानं [९]कारयसीत्यन्वय:। कीदृशंजगत्? व्रजयुवति[१०] समूहम्। [११]अपगतपापं स्नानमात्रेण नष्टसंसार [१२] कलुषम्। पुन: कीदृशं [१३] जगत्? शमितभवतापम्। शमित: शान्तिं प्रापित: भवस्य कामस्य विरहोत्पन्न: तापो येन। भवोऽत्र कामवाचक:। भीमो भीमसेन इतिवत्। पक्षे[१४] परशुरमावतारं स्तौति। हे [१५] केशव। हे [१६] धृतभृगुपतिरूप। धृतं भृगुपते: [१७]परशुरामस्य रूपं येन तादृश जय। परशुरामावतारप्रयोजनमाह, (क्षत्रियेति।) क्षत्रियाणां रुधिराणि प्रचुराणि यत्र पयसि [१८]कुरुक्षेत्राख्यतीर्थवरजले जगत् प्राणिजातं अपगतपापं नष्टपातकं यथा भवति तथा [१९] स्नपयसि स्नानं कारयसीति। कीदृशं जगत्? [२०] शमितभवतापं शमितो [२१] नाशितो भवस्य [१]संसारस्य तापो यत्र तादृशम्। अनेन[२] तेजस्वितालक्षणो नायकगुण [३] उक्त:। ''[४] रूधिरोऽङ्गारके प्रोक्तो रुधिरं कुङ्कुमा[५]सृजो:'' इति "**विश्व:**" (१०.१.१२१)। ''पय: स्यात्क्षीर[६]नीरयो:'' [७]इत्यपि मेदिनीकोश: (३२.२८)। ''भव: संसारतापे [८]स्यात्तथा सङ्करजातिषु'' इति "[९]**धरणि:**"। ''भवो जन्मनि च प्रोक्तो [१०]भव: कामोऽपि कीर्त्यते'' [११]इति **मेदिनीकार:** [१२] (१५९.२०)।।६।।

१. तापोपमाम् - फ. २. भ्रगु: - अ. भगु: - ब. ३. प्रभु: नास्ति - ह. ४. रूपप् - ग. ५. जय जगदीशादिपदं पूर्ववत् - अ.ब.फ.ग.ह. जय जगदीशपदं पूर्ववत् - ज. ६. कीर्मिता - अ. किर्मिरिता - ब. कर्मिरितायां - इ.फ.ग.ह.ज. ७. जगन्नायका - अ.ब. ८. स्नपयसीत्यन्वय: - फ.ग. ९.कारसी - अ. १०. वृन्दम् - ब.इ.फ.ग.ह.ज. ११. अपगतपाप - अ. अपगतपनृपो - ब. १२. क्लेशम् - फ. १३. जगत् युवतिवृन्दम् - ब. १७. परशुरामस्वरूपं येन तादृश। जय इत्यादि पूर्ववत् - ज. १८. कुरु क्षेत्राक्षतीर्थ - अ. कुरुक्षेत्राख्यतीर्थ: - ब. १८. स्नापयति - अ. २०. शमितभवातापं नास्ति - ग. २१. नाशितो नास्ति - ब.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।६।।क्षत्रियेति ।हे [१३]धृतभृगुपतिरूप [१४]धृतं भृगुपतिरूपे (येन) धृतपरशुरामरूपे। क्षत्रियरुधिरमये पयसि [१५] जगत् स्नपयसि इत्यन्वयः। क्षत्रियशोणितविकारे जले [१६]जगत् स्नपयसि स्नानं कारयसि। स्नाने फलमाह। [१७] कीदृशं जगत्? [१८]अपगतपापं गतकलुषम्। पुनः [१९] किम्भूतम्? शमितभवतापं दूरीकृत [२०] संसारतापम्।।६।।

## (९) कृष्णपण्डितकृत-जयन्ती

क्षत्रियेति। क्षत्रियाणां रणहतानां कुरुक्षेत्रे रूधिरमये शोणितरूपे शमन्तपञ्चकद्वन्द्वरूपे पयसि मनुष्यादिजङ्गमरूपं कर्म अपगतं नाशितं पापं यथा स्यात्तथा शमितः भवतापः संसाररूपः आध्यात्मिकादिसन्तापः यथा स्यात्तथा स्नपयसि। तत्र स्नानात्पापक्षयः मुक्तिश्च भवतीति भावः।अत्रापि शोणितस्यास्पृश्यत्वात् तत्स्पर्शने पुनः स्नानविधिना तत्रैव निमज्जनात्पुण्यं भवतीति बह्वाश्चर्यकरं तव चरित्रमिति भावः। (हे) भृगूणां भार्गवाणां पतिः श्रेष्ठः तद्रूप परशुरामावतार।।६।।

१.संसारस्य नास्ति-ब.२.तपस्विकलक्षणोक्त-अ.ब.३.उक्तः नास्ति-फ.४.रुधिरमं-गायके प्रोक्तं रुधिरं कुंकुमासृजोरिति-फ.५.श्रजोः-अ.ब.६.नीरयोरपि-ग.नीरयोरिति-फ.७.इति विश्वप्रकाश इत्यपि-ब.इत्यपि नास्ति-फ.ग.८.स्यादथ-फ.९.धरणिः नास्ति-फ.१०.भवः काम इति-फ.भवः प्रकीर्त्यत इति-ज. भवः काम इति कीर्त्यत इति-ह.११.इति **मेदिनी**-ग.१२.भवः क्षेमेशसंसारे सत्तायां प्राप्तिजनमनोः -**मेदिनी**।१३.नास्तीयं सम्बुद्धिः-ड.हे केशव धृतभृगुपतिरूप-क.१४.धृतं भृगुपतिरूपं नास्ति-क.ल.म.१५.जगत्तर्पयसीत्यन्वयः-क.१६.जगत्स्नानं कारयसि-क.१७.कथम्भूतं जगत्-क.ल.म.१८.नास्ति-ड.१९.कथम्भूतम्-क.ल.म.२०.संसारे तापम्-ड.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६।।परशुरामरूपं स्तुवन्नाह, क्षत्रियेति। अत्रापि पूर्ववन्मुखबन्धयोजना। क्षत्रियाणां रुधिरमये रक्तविकारे पयसि रामह्रदाख्ये तीर्थे अपगतपापं यथा स्यादेवं जगत् संसारस्थलोकमित्यर्थः। स्नपयसीत्यादि। स्नानं कारयसीत्येवंरूपापरा। शमितभवताप-मित्यपि स्नपनक्रियाविशेषणम्। शमितता भवस्य संसारस्य तापः, आधिदैविकादितापो यत्रेति विग्रहः इति। स्नानमात्रेणैव अपगतपापत्वं पश्चात् पुनर्जन्मखण्डनात् शमितभवतापत्वमिति तत्पर्यार्थः। परशुरामः किल पितृवधोद्धतक्रोधः क्षत्रियान्निहत्य तदीयरुधिरैः कुरुक्षेत्रे पञ्चह्रदान् कृत्वा पितृतर्पणमकार्षीत् इति **पुराणम्**। धृतभृगुपतिरूपेति सम्बोधनम्। भृगोरपत्यं भार्गवः। ''अत्रिभृगुकुत्सवसिष्ठगोत-माङ्गिरोभ्यश्च'' इति अणो लुक्। भृगूणां पतिः भृगुपतिः परशुराम इत्यर्थः। अत्र परशुरामस्य स्नानप्रयोजकत्वं तीर्थनिमित्ततयैव सम्पन्नम्। यथा रवेः प्रकाशमात्रनिमित्त-त्वेन लोकचेष्टाप्रेरकत्वात् सवितृत्वं 'षुञ् प्रेरण' इत्यस्माद्धातोः प्रयोगात्।।६।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।६।। न सकृन्मात्रपरपीड़याऽसकृत्तत्पीड़यापीत्याह हे भृगुपतिरूप ! क्षत्रियाणां यद्रुधिरं तन्मये पयसि जले जलरूपे कुरुक्षेत्रतीर्थे जगत् प्राणिमात्रं अपगतपापं यथा स्यात्तथा स्नपयसि। कीदृशं ? तेन स्नपनेन शमितः संसारतापो यस्य तादृशम्। तत्स्नानेन पापक्षयात् ज्ञानोत्पत्त्या भवतापशान्तिरित्यर्थः। अनेनैव परशुरामस्य रौद्ररसाधिष्ठातृत्वं विज्ञापितम्।।६।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६।।श्रीपरशुरामरूपेण स्तौति; क्षत्रियेति। भृगुपतिः परशुरामः। हे धृतपरशुरामरूप। त्वं क्षत्रियरूधिरमये स्वपरशुखण्डितदुष्टक्षत्रियशोणितरूपे पयसि तीर्थो कृते जले जगत्प्राणिमात्रमपगतपापमपगतानि नष्टानि पापानि दुष्कृतानि यत्र कर्मणि तद्यथा स्यात् तथा। अत एव शमितः शान्तिं प्राप्तः निवृत्त इत्यर्थः। भवतापः भाविजन्ममरणादिरूपो यत्र तच्च यथा तथा स्नपयसि अभिषेचयसि। किं वा अपगताः पापस्वरूपाः क्षत्रियधामानः यस्मात् तादृशम्, अत एव शमितो भवतापः तापत्रयं यस्मात्तादृशं च, जगत् स्नपयसीति। श्रूयते हि विष्णुपुराणे; यथा किल परशुरामः कार्त्तवीर्यकोपेन पृथ्वीं निःक्षत्रियां कृत्वा तेषां रुधिरेण स्वनाम्ना तीर्थं विरचितवानिति। तादृशी रौद्रलीलाऽपि तव जगत् कृतार्थयति, किं पुनरन्येति भावः। अत्र प्रतापित्वलक्षणो नायकगुणः। लक्षणम्, ''प्रतापी पौरुषोद्धुतशत्रुतापिप्रसिद्धिभाक्'' इति।।६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६।। क्षत्रियरुधिरेति; क्षत्रियाणामुत्पातं शमयितुं शान्तयितुं परशुरामरूपं धारयामास भगवान्। यदा क्षत्रियाः शस्त्रधारिणः ब्राह्मणानां तथा अन्येषामुत्पीडनं चक्रुः तदानीं जमदग्नेः पुत्ररूपेण समजनि परशुधारी रामेति। तस्य मातुः अवमाननं कृतमासीत् कार्त्तवीर्येण। फलतः मातृवधार्थमसहायः यमदग्निरवोचत्। तेन क्रुद्धः स्वस्य मातृवधेन साकं क्षत्रियाणां दुष्टानां दलनमसौ चकार। येन क्षत्रियरुधिरतर्पणेन पृथिव्याः तापः शमितो बभूव। तत्खलु सत्यत्रेतायुगसन्धिकालः। अत्र वीभत्स-वीर-शान्तानां प्रसंगानामाशयोऽस्ति।।६।।

**७-वितरसि दिक्षु रणे दिक्पतिकमनीयम्।**
**दशमुखमौलिवलिं रमणीयम्।।**
**केशव! धृतरघुपतिरूप! जय जगदीश! हरे!।।७।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी ७।।

।।७।। श्रीरामस्वरूपं स्तुवन्नाह। अत्रापि पूर्ववन्मुखबन्धयोजना। रणे दिक्षु दशमुखमौलिबलिं ददासीत्यर्थः। इत्येवं रूपापरा। दशमुखमौलिरेव बलिरिति विग्रहः। ननु न दिशश्चेतनावत्यः, तत्कथं तासु बलिं ददातीत्याह। दिक् पतिकमनियमिति दिक्षु बलिप्रदानात् दिक्पतितुष्टिः स्यादित्यभिप्रायः। ननु कथं दिक् पतिभिः शक्राद्यैरेष बलिराकांक्षते इत्याह,रमणीयमिति भूवनपरिभावि त्वाद्रावणस्याकांक्षणीयः शिरो बलिप्राप्तपूर्व त्वान्मनोरमतां विभर्त्तीत्यभिप्रायः।

"मौलिः शिरसि चूडायां किरीटे संकटे कचे।
बलिर्दैत्यप्रभेदश्च करचामरदण्डयोः।।"
"उपहारे पुमान् स्त्री तु जरया श्लथचर्मणि।
गृहदारुप्रभेदे च जठरावयवेऽपि च।।"

इति **मेदिनी**। धृतरामशरीरेति सम्बोधनम्। धृतरामशरीरं येन इति विग्रहः।।७।।

### (२) राणाकुम्भकृत-रसिकप्रिया

अथ रामः। धृतरामशरीर इति ध्रुवे विशेषः। वितरसीति। हे राम! त्वं वितरसि ददासि। दशमुखमौलिबलिं रावणस्य मौलय एव बलिः। "मौलि" शब्दः शिरोवाची। अथवा, "मौलि" शब्दः किरिटे वर्तते। "चूडाकिरिटकेशाश्च संयता मौलयस्त्रयः" इत्याभिधानात्, तथापि बलेर्मांससाध्यत्वान्मौलिशब्देन तास्थ्याच्छिरांसि लक्ष्यन्ते। शिरांसि छेदं छेदं दिक्पतिभ्यो बलिदानं कृतवानित्यर्थः। जगतां रक्षोपलक्षणोपद्रवोपशान्त्यै रक्षःशिरांस्येव बलित्वेनोपहृतवानिति। कुत्र? दिक्षु। किंभूतं बलिम्? दिक्पतिकमनीयमभिलषणीयम्। पुनः किंभूतम्? रावणवधद्वारा लोकाभिरामत्वाद्रमणीयम्। अत्र यावन्तो दिक्पतयस्तावन्त्येव शिरांसिति कमनियत्वे हेतुः। अत्रापि वितीर्णवानिति वक्तव्ये तत्कालापेक्षया वर्तमानापदेशो वा। यो वितीर्णवान् स त्वं जय इत्यादि कल्पनीयम्। अत्र जातिरलंकारः। वितरसीत्यत्र धीरोदात्तो नायकः। तल्लक्षणं **रसरत्नकोशे** कृपावानतिगम्भीरो विनीतश्चाविकत्थनः। धीरोदात्तः स विज्ञेयो रामो दाशरथिर्यथा"।।७।।

## (३) जगद्धरकृत-सारदीपिका

।।७।। वितरसीति हे धृतरामशरीर ! त्वं रणे संग्रामे दशमुखमौलिबलिं रावणमस्तकोपहारं दिक्षु दिशासु[२२] वितरसि ददासि कीदृशम् दिक्पतिकमनीयम् इन्द्रादीनां काम्यम् इच्छाविषयमित्यर्थः रमणीयमित्यर्थः रमणीयं मनोहरं दिक्षु दशदानात्।।७।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।७।। अथ रामावतारं स्तौति; धृतरघुपतिरूपेति । हे केशव ! धृतं रघुपतेः रामचन्द्रस्य रूपं येन तादृश ! त्वं जय। श्रीरामावतारपुरुषार्थमाह; वितरसीति। रणे संग्रामे दिक्षु हरित्सु दसमुखमौलिबलिं रावणस्य ये मौलयो मस्तकानि समुकुटानि तान्येव वलिमुपहारं वितरसि ददासि। कीदृशम्? दिक्पतिकमनीयं दिशा ये पतय इन्द्रादयस्तेषां कमनीयमभीष्टम्। तत्र हेतुः रमणीयम्। "किरीटमूर्धचूडासु मौलिः केशे च संयते"। करोपहारयोः पुंसि बलिः प्राण्यङ्गजे स्त्रियाम्" **इत्यमरः**।।७।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।७।।अवतारान्तरं वर्णयति। वितरसीति। उक्तं च;

एतौ तौ दशकण्ठकण्ठकदलीकान्तारकान्तिच्छदौ
वैदेहीकुचकुम्भकुङ्कुमरजःपङ्कारुणालङ्कृतौ।
लोकत्राणविधानसाधुसदनप्रारम्भयूपौ भुजौ
दद्यास्तामुरुविक्रमौ रघुपतेः श्रेयांसि भूयांसि वः।।
रमन्ते योगिनोऽन्ते सत्यानन्द चिदात्मनि।
इति रामपदेनासौ परंब्रह्माभिधीयते।।

इति लक्षण लक्षितस्य रामस्याभिमानास्पदं नीलोत्पलसमानवर्णं यच्छरीरं धृतं तादृशं रामशरीरं येन धृतं रामावतारेत्यर्थः। एतादृश हे केशव ! दिक्पति कमनीयम् अभिलक्षणीयम्। अतएव रमणीयं सर्वेषां मनोहरम् अवाप्तसकलकामानिमिषाभिलाष गोचरत्वादेवाखिलामास्यत्वं तस्य युक्तिमित्यर्थः। एतादृशं दशमुखस्य रावणस्य मौलिबलिः शिरपरम्परारूपोपहारः। ''बलिपूजोपहारयो'' रित्यमरः। रणे संग्रामे दिक्षु अष्टदिशासु वितरसि ददासि त्रिलोकीकण्टकदशकण्ठनिधनेन तद्वाधितान् दिक्पतीन् सन्तोषयसीत्यर्थः। उक्त वाञ्छितार्थवितरणसामर्थ्यं सर्वदास्तीति सूचयितुं वर्त्तमानप्रयोग इति भावः विशेषणतौल्येनाप्रस्तुतार्थप्रतीतेः समासोक्तिरलङ्कारः।।७।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।७।।श्रीरामावतारं स्तौति। केशव धृतरामशरीर गृहीतरामचन्द्रदेह त्वं जय जय। रणे संग्रामे दशमुखस्य रावणस्य मौलयो मस्तकाः, तत्र वलयः पूजोपहारद्रव्याणीव,

त्वं दिक्षु दशदिक्षु वितरसि ददासि। कीदृशम्? दिक्पतिकमनीयं दिक्पतीनामिन्द्रादीनां कमनीयं वाञ्छनीयम् तेन। तेभ्य एव वलिं ददासीति दर्शितम्। कीदृशम्? रमणीयं मुकुटाद्यलंकृतत्वात्। अन्योऽप्यभिमतसिद्धये देवताभ्यो वलिं ददातीत्युचितमेव। वितरसीति विपूर्वस्तरतिर्दाने।।७।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।७।। सुप्रसन्नात्मिकां क्रीडामाह; वितरसीत्यादिना। हे [१]केशव। धृतरघुपतिरूप [२]जय; [३]राघवा एकपत्नी[४]पतयस्तेषां पतिः श्रेष्ठः ; [५]तत्सम्बुद्धिः। एतेन [६]बहुयुवतिष्वासक्तिर्निवारिता। दिक्षु रतिविहार[७]दिशासु रणे स्मरसंङ्ग्रामे [८]दशमुखो दशप्रकारो यो मैलिः केशपाशः, तेन बलिं पूजां वितरसि [९]विस्तारयसि यद्वा दशमुखाय कामाय मौलिना किरीटरत्नेन बलिं पूजां वितरसि [१०]ददासि इति केचित्। कीदृशम्? दिक्पतिकमनीयम्। दिशां पतयः इन्द्रादयस्तेषां कमनीयं मनोहरं तदभीष्टं वा, तदगोचरमिति वा पुनः किम्भूतम्? रमणीयं रतिजनकम्। [११]शेषं पूर्ववत्। पक्षे रामावतारं स्तौति - [१२]धृतरघुपतिरूपेति। हे[१३]केशव धृतरघुपतिरूप जय [१४]जय श्रीरामपुरुषार्थमाह; [१५]वितरसीत्यादिना रणे सङ्ग्रामे दिक्षु आशासु दशमुखस्य [१६] रावणस्य ये मौलयो मस्तकानि किरीटानि वा तान्येव बलिं उपहारं वितरसि ददासि। [१७]कीदृशम्? दिक्पतिकमनीयं [१८]दिशां ये पतयः इन्द्रादयस्तेषां कमनीयं अभीष्टदम्। तत्र हेतुः रमणीयं मनोहरम्। अनेन दिक्पालाकाङ्क्षितेन [१९]रावणवधेन गाम्भीर्यलक्षणो नायकगुण उक्तः। किरीट [२०] तल मूर्धासु मौलिःकेशे च संयते। करोपहारयोः पुंसि बलिः [२१]प्राण्यङ्गतो स्त्रियाम् **इत्यमरः**(३.३.१६५/२०१)।।७।।

१.केशव नास्ति - इ.फ.ग.ह.ज. २.जय नास्ति - अ.ब. ३.राघव वा एक - अ.फ.ग., राघवा एकएक - ब.४.वृतयः - फ. ५.तत्सम्बोधने - फ. ६.बहुयुवति तथासक्तिः - ग. ७.दशासु - अ. ८.दशविधो - अ. ९.तः १०.पर्यन्तोभागो नास्ति - ब. ११.केशकवपूर्ववत् - ब. १२.नास्ति- अ.ब.इ.फ.ग.ह.ज. १३.केशव नास्ति - इ.फ.ग.ह.ज.१४.नास्ति - इ.फ.ग.ह.ज. १५.वितरसीति - ग. १६.रावणस्य नास्ति - अ.ब. १७.कीदृशे - अ. १८.दिशां पतयः - अ.ब. दिशां पतयो ये - फ. १९.रावणेन - ह. २०.रत्न - फ.ग.ह. रव - इ. रक्त-ज. २१.प्राण्यङगजे - अमरः

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।७।। वितरसीति। हे धृतरामशरीर त्वं रणे सङ्ग्रामे दशमुखमौलिबलिं रावणमस्तकोपहारं दिक्षु दिशासु वितरसि [१]ददासि। कीदृशम्? दिक्पतिकमनीयं इन्द्रादीनां काम्यं इच्छाविषयमित्यर्थः। रमणीयं मनोहरं दश दिक्षु [२]दश दानात्।।७।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।७।। (वितरसीति।) दिक्पतिभि: इन्द्रादिभि: कमनीयं अभिलषणीयं, कमु कान्ताविति अभिलाषार्थकत्वात्। दशमुखस्य मौलिभि: देवतोद्देशेन विशस्यमान: पशु:, तं रमणीयं श्लाघ्यं पौलस्त्यकुलीनत्वात्। मुखानामपि दशत्वात् दिक्षु प्रतिदिशं तत्पालप्रीत्यर्थं दत्तवानिति भाव:। रणे दशापि मुखानि विकीर्णानीति तेषां बलित्वेन परिणाम:। हे [३]धृतरामशरीर। राघवरूपेत्यर्थ:।।७।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।७।। रामरूपं स्तुवन्नाह; वितरेति । अत्रापि पूर्ववन्मुखबन्धयोजना। रणे दिक्षु इति। दशसु दशमुखस्य मौलय एव बलिरुपहारस्तं वितरसि ददासीत्येवंरूपापरा। ननु किमर्थमसौ बलिं ददातीत्याह, दिक्पति कमनीयमिति। दिक्षु प्रदानात् दिक्पति: तुष्टि: स्यादित्यभिप्राय:। ननु कथं दिक्पतिभिरेष बलिराकाङ्क्ष्यते इत्याह, रमणीयमिति। भुवनपरिभवित्वाद्रावणश्चाकाङ्क्षणीय:। शिरोबलिरप्राप्तपूर्वत्वाच्छिरसां दश-सङ्ख्याकत्वेन यथास्थानं भागसम्भवाच्च मनोरमतां बिभर्ति इत्यभिप्राय:। ''मौलि: शिरसि चूडायां किरीटे सङ्कटे कचे'' इति। धृतरामशरीरेति सम्बोधनम्। धृतं रामशरीरं येनेति विग्रह:।।७।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।७।। नचैतावता प्रियावियोगादिदु:खसहनेनापीत्याह हे धृतरघुपतिरूप ! संग्रामे दशसु दिक्षु रावणस्य ये मस्तका: ते एव उपहार: तं ददासि । किम् इति अचेतनासु दिक्षु वलिदानं दिशां पतीनाम् इन्द्रादीनाम् अभीष्टं तै: अपि कथं स वलि: कांक्ष्यते, रमणीयं परोद्वेजकस्य रावणस्य मौलिवलि: तेषां रतिजनक इत्यर्थ:। अनेनैव श्रीरामस्य करुणरसाधिष्ठातृत्वं बिज्ञापितम्।।७।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७।।श्रीरामचन्द्रावतारेण स्तौति; धृतं प्रकाशितं रघुपतिरूपं येन हे तथाविध ! रणे संग्रामे दिक्षु दशदिशासु दशमुखस्य रावणस्य मौलय: दशमस्तका एव वलिरूपहार: तं वितरसि ददासि। किमित्यचेतनासु बलिदानं तत्राह दिक्पतीनामिन्द्रादिदशदिक्-पालकानां कमनीयमभिलषणीयम् तैरपि किमर्थं तादृशो बलि: काम्यते, तत्राह; रमणीयं तद्बाधितानां तेषां रुचिजनकमित्यर्थ:। सत्यपि देवसमूहे दशमौलीनां दशदिक्पालेषु वितरणविभागसौकर्यात् इति भाव:। अत्र दिक्पालाकाङ्क्षितस्य रावणवधरूप-महाकार्यस्य तत्पूजारूपतयाऽनायासेन सम्पादनात् गाम्भीर्यलक्षणो नायकगुण:। लक्षणम् ''दुर्विबोधाशयो यस्तु स गम्भीर इतीर्यते'' इति।।७।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।७।। वितरसीति; रामशरीरेण त्वं रावणस्य दशशिरसः दशसु दिक्षु बलिरूपेण इन्द्रादिदशदिक्पालेभ्यः ददासि इव। रमणीयो सुशोभनः दशशिरसः समुकुटवली शोभते। मानवर्द्धनार्थं तव जयगानं करोमि। अत्र वीररसः।।७।।

**८-वहसि वपुषि विशदे वसनं जलदाभम्।**
**हलहतिभीतिमिलितयमुनाभम्।।**
**केशव! धृतहलधररूप! जय जगदीश! हरे! ।।८।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।८।। बलभद्रं स्तुवन्नाह। अत्रापि पूर्ववन्मुखबन्धयोजना। विशदे शुक्ले वपुषि वसनं जलदाभं बहसीत्येवं रूपापरा उतप्रेक्षते। हलहतिभीतिमिलितयमुनाभमिति, हलहतेर्भीत्या मिलितेव यमुनाया आभा यत्रेति विग्रहः। हलिना किल वृन्दावनगतेन कादम्बरीं पीत्वा मत्तेन यमुनास्नानार्थमाहूता सा च मत्तेयमित्यवज्ञया तत्समीपं नागता। ततोऽसौ क्रोधात्तां हलेनाचकर्षेत्यस्ति **पौराणिकी** कथा। धृतहलधररूपेति सम्बोधनम्। धृतं हलधररूपं येनेति विग्रहः।।८।।

**(२)राणाकुम्भकृत-रसिकप्रिया**

।।८।। अथ बलदेवः। धृतहलधररूप इति ध्रुवे विशेषः। वहसीति। अत्र यद्यपि रामो रामश्च कृष्णश्च इति कृष्णचरित्रं वर्णनीयं तथापि कृष्णस्यैवैते दशापीति कृष्णस्य नायकत्वेन वर्णनीये बलदेवोऽपि दशसु गणितः। तथा चोत्कम्; वनजौ वनजौ खर्वस्त्रिरामो सतपोऽतपः इति। हे राम! त्वं नीलं वसनं वहसि धत्से। किंलक्षणम्? जलदाभं मेचकम्, क्व? विशदे शुभ्रे वपुषि। तच्च यमुनयोपमीयते। हलहतिभयेन त्वामेव सेवितुमागता यमुनेव। तदिवाभातीति तदाभम्। धवलमेचकसंगत्या प्रयागत्वे तन्मुर्त्तेः पापहारित्वं कामदत्वं च व्यञ्जितम्। वहसीत्यत्र धीरललितो नायकः। तल्लक्षणम्, "कान्तापरवशो धीरललितो निश्चितो मृदुः"। अथवा, शृङ्गारी नायकः। तल्लक्षणं **सङ्गीतराजे रसरत्नकोशे** ; "श्रृङ्गारी नायकस्त्वन्यः पञ्चमः कथ्यते यथा। विलासवाक्कायशीलः सुभगः स्थिरवाग्युवा। गतिः सधैर्या दृष्टिश्च सविलासस्मितं वचः"।।८।।

**(३) जगद्धरकृत- सारदीपिका**

।।८।। वहसीति हे धृतहलधररूप! धृतवलभद्ररूप त्वं वपुषि वसनं वस्त्रं धारयसि कथंभूतम् वपुषि विशदे शुभ्रे कथंभूतं वसनं जलदाभं सजलमेघसदृशं पुनः कथंभूतं

हलहतिभीत्या लाङ्गलघातभयेन मिलिता उपस्थिता या यमुना तद्वत् आभा दीप्तिर्यस्य तद्भयेनातिश्यामत्वं भवति ।।९ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।८ ।। अथ बलभद्रावतारं स्तौति; धृतहलधरेति। हे केशव! धृतं हलशधरस्य बलभद्रस्य रूपं येन तादृश! जय। बलभद्रावतारस्य प्रयोजनमाह; वहसीति। त्वं विशदे शुभ्रे वपुषि देहे जलदाभं सजलमेधस्य दिप्तिमिव नीलं वसनं वस्त्रं वहसि धारयसि। कीदृशम्? हलेन हतिर्हननं तद्भीत्या तद्भयेन मिलिता या यमुना तस्या इवाभा दीप्तिर्यस्य तादृशम्। इयं च मलयानिलवशात्कम्पमानस्य वस्त्रस्य भययुक्तयमुनाया उत्प्रेक्षा। भीरूणां हि कम्प उचित एवेति भावः। कदाचिद्वारूणीं पीत्वा वृन्दावने गोपिभिः सह विहरता वलभद्रेण जलक्रीडार्थमाहूतां मत्तप्रलापोऽयमिति मत्वा गर्वेणान्तिकमनागच्छन्तीं कालिन्दीं रोषतो हलाग्रेण कृष्टवानिति **पुराणप्रसिद्धिः**। हलधर "पदेन दुष्टनिग्रहार्थमेव हलं धृतवानित्य-वतारप्रयोजनं ध्वनितम्। "गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः" **इत्यमरः**। शुक्लशुभ्रशुचिश्वेतविशादश्वेतपाण्डुराः" इति च। "वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम्" इति। "भीतिः साध्वसकम्पयोः" इति **विश्वः**।।८ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।८ ।। अवतारान्तरं वर्णयति। बहसीति। उक्तं च,

यः कृष्णाग्रभवो हरिः सिततनुर्नीलाम्बरो रेवती-
भर्त्तामुष्टिगजप्रलम्बदमनः कालिन्दिकाभेदनः।
तालाङ्को मुषली बलि (ल) यदुवरः सङ्कर्षणः कामपः
पायाद्वः कमलामुखाव्जमधुपो रामावतारे हरिः।।

धरतीति धरः, पचाद्यच्। हलस्य लाङ्गलस्य धरो बलभद्रः धृतं हलधररूपं येन तादृश हे केशव! अत्र हलधरपदेन बलभद्रकथनं हलहतिभीत्येतत् स्फुटार्थमित्यव-गन्तव्यम्। जलदाभं नीलमेघश्यामं, किञ्च, हलेन हतिराकर्षणं तस्माद् या भीतिस्तया मिलिता स्वयमेवागत्य कटिप्रदेशे या यमुना तदाभं तत्कल्पं हलहतिभीत्या कटिदेशमावृत्य यमुनेव कृतावभासमित्यर्थः। एतादृशं वसनं नीलाम्बरं विशदे निर्मले शरत्पार्विकचन्द्रबद्धबल इत्यर्थः बपुषि शरीरे बहसि धरसि, अत्र वर्त्तमानसम्भवात् प्रयोगोपपत्तिः। अत्र गम्योत्प्रेक्षोपमाभेदयोः सृष्टिः।।८ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।८।। बलभद्रावतारं स्तौति। हे केशव धृतहलधररूप गृहीतवलभद्रदेह त्वं जय जय। विशदे शुभ्रे वपुषि शरीरे वसनं वस्त्रं वहसि धारयसि। कीदृशम्? जलदाभं जलदस्य मेघस्येव आभा कान्तिर्यस्य तादृशम्। अत्रोपमानमाह, हलहतिभीतिमिलित-यमुनाभमिति। लाङ्गलाघातभीत्या मिलितयमुना सदृशमित्यर्थः। शरीरसम्बद्धवस्त्रस्यो-पमेयत्वात् यमुनामात्रस्यैव सादृश्यसम्भवेऽपि पौरुषदर्शनार्थं हलहतिभीतिमिलिते-त्युक्तम्। अत्रोपमेयोपमानभावान्न पौनरुक्त्यम्। पुरा हि मधुपानमत्तेन बलभद्रेण यमुना स्नानार्थमाहूता। सा च मत्तोक्तमिति कृत्वा न याता। ततः सकोपेन यमुनाकर्षणं कृतमिति **श्रीभागवतम्**। 'सदृक् समसदृक्षाभाप्रतीकाशाः समार्थका' इति।।८।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।८।। एवं रतिविहारगर्वितं प्रत्याह,[४]वहसीत्यादिना। हे [५]केशव। धृतहलधररूप। हल [६]विलेखने धातुः। हलनं हलः। [७]विलेखनं नखक्षताधरक्षतरूपं रतौ धत्ते इति हलधरः। सुरतकेलिप्रशस्तो हलधररूपस्तत्सम्बुद्धिः। [८]धृतनानानखाधरक्षतप्रद [९]रूपत्वं विशदे निर्मले वपुषि शरीरे वसनं वस्त्रं वहसि। स्वाङ्गसुन्दरस्य वसनधारणं [१०]भारमतो धारयसीत्युक्तम्। कीदृशम्? जलदाभं जलदानां [११]मेघानां [१२]नीलमेघवृन्दानां [१३]आभा शोभा [१४]यस्य तत्। जलदपदस्याभिप्रायोऽयम्, [१]यथा जलदाः स्वजीवनं दत्वा विश्वजीवनं [२]कुर्वन्ति तथा त्वमपि वेदोक्तं हित्वा विहारं कुरू। न हि वेदोक्तमर्यादापालनेन सर्वोऽपि रसः [३]साधयितुं शक्यः। पुनः कीदृशम्? [४]हलहतभीतिमिलितयमुनाभम्। हलेन [५]यत् हननं [६]भीत्या तद्भयेन मिलिता या यमुना तस्या आभेवाभा दीप्तिर्यस्य तत्। हलहतीति पाठे (ऽपि) स एवार्थः। हलधरपदेन [७]धीरललितलक्षणो नायकगुण उक्तः। पक्षे हलधरावतारं स्तौति; [८]वहसीति। हे केशव। [९]हे धृतहलधररूप; धृतं हलधरस्य रूपं येन; तादृश [१०]जय जय। बलदेवस्य लीलामा[११]वहसीत्यादिना। [१२]विशदे कर्पूरपरागगौरे वपुषि [१३]शरीरं जलदाभं सजलनीलमेघ [१४]स्निग्धं मेचकं वसनं वस्त्रं वहसि [१५]धारयसीत्यन्वयः। हलहतीत्यादि पूर्ववत्। भीरूणां हि कम्प [१६]उचित एवेति भावः। कदाचित् श्रीवृन्दावने वारूणीं पीत्वा व्रजाङ्गनाभिस्सह विहरता बलभद्रेण यमुना [१७]जलकेल्यर्थ [१८]माकारिता। मत्तोऽयमिति श्रीकृष्णज्येष्ठो [१९]वेति [२०]मत्वाऽन्तिकं नायान्तीं कृष्णां क्रोधेन हलाग्रेण कृष्टवानिति **पुराणश्रुतेः**। हलधरशब्देन [२१]दुष्टनाशसाधुरक्षणार्थं हलं धृतवानसीति सूचितम्। गात्रं वपुः संहननं [२२]शरीरं वर्ष्म विग्रहः [२३]**इत्यमरः** (२.६.७०)। शुभ्रशुक्लशुचि [२४]श्वेतविशद [२५]श्येतपाण्डराः

[२६]**इत्यमर:** (१.५.१२)। विशदं निर्मले प्रोक्तं विशदं कनकप्रभे। विशदं प्रकटार्थेऽपि विशदं विमलाशये इति [२७]**कोशचूडामणि:**। [२८]वस्त्र [२९]माच्छादनं [३०]वासश्चेलं वसनमंशुकम् **इत्यमर:** (२.६.११५)। कर्षके स्याद्धलधर: प्रलम्बघ्ने च नीरसे। विकर्षणे स्मरकृते दारुण्यपि विकर्षणे इति **भोजे**[३१]। [३२]भीति: साध्वसकम्पयो: इति **विश्व:** (५४.५६)। उत्प्रेक्षापूर्वकोपमालङ्कार:।।८।।

१.नास्ति - क.ल.म. २.दशासु वितरसि - ल.म. ३.केशव धृतरामशरीर इतिमलपाठ: एतद्व्याख्यानुसारी। ४.वहसीति - ग. ५.केशव नास्ति - ब.फ.ग.ह.ज. ६.विलेषणे - अ.विशेषणं - ब.फ. ७.विलेषनं - अ. विलैखम् - ब. ८.नखाधृतप्रदरूपत्वविषदे - अ. नधरक्षत पद्रूपत्वं विशदे - ब. ९.रूप: - ग. १०.भारतमो - ग. ११.मेघानां नास्ति - इ.फ.ग.ह.ज. १२.मेघवृन्दानां - अ. १३.आभा नास्ति - अ.ब.इ. १४.यस्मात्तत् - अ.ब.इ.फ.ग.ह.ज.

१.जलदो यथा-ब.इ.फ.ग.ह.ज.२.करोति-ब.इ.फ.ह.ज.३.साधयितुमशक्य:-फ.४.हलतर्मिति-मिलितियमुनाभम्-ब.५.यद्धनं-ब.६.तस्य भीत्या-ज.७.वीर-इ.फ.ग.ह.ज.८.नास्ति-अ.ब.९.हे हलधररूप-ब.१०.जय-ग.नास्ति-फ.११.वहसीति.-इ.ग.ह.ज.वहसीत्यादि१२.विषदे-अ.१३.शरीरे नास्ति-फ.१४.स्निग्धमेचकं-इ.फ.ग.ह.ज.१५.धारयसि इत्वय:-अ.१६.उचित इति भाव:-अ.१७.केल्यर्थं-अ.ब.१८.कामारिता-ब.१९.वेत्ति-ब.२०.मा त्वन्तिकं नायान्तीङ्-अ.मां त्वांतिकं नायाती-ब.२१.दुष्टनासु-अ.दुष्टनाशन-फ.२२.पादोऽयं नास्ति-अ.२३.अमर: नास्ति-फ.२४.स्वेत-अ.२५.स्वेत-अ.ब.२६.अमर:नास्ति-फ.२७.कोशचूडामणि नास्ति-फ.२८.त: २९.माच्छदनं-ब.३०.वासनमित्यर्थ:-ह.३१.पर्यन्तो भागो नास्ति:-फ.३२.उद्धरणमिदं नास्ति-अ.ब.फ.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।८।। वहसीति। [२]हे धृतहलधररूप धृतबलभद्ररूप त्वं वपुषि वसनं वस्त्रं वहसि धारयसि। [३]कीदृशे वपुषि? विशदे शुभ्रे। [४]कीदृशम्? जलदाभं सजलमेघसदृशम्। पुन: [५]कीदृशम्? हलहतिभीत्या लाङ्गलघातभयेन मिलिता उत्थिता या यमुना [६]तद्वदाभा दीप्तिर्यस्य। भयेनातिश्यामत्वं भवति।।८।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।८।। (वहसीति।) विशदे स्वच्छे शुभ्रे वपुषि शरीरे जलदाभं मेघस्य आभेव आभा दीप्तिर्यस्य तत; नीलवर्णमित्यर्थ:। वसनं वस्त्रं वहसि परिधानं करोषि। कीदृशं तत्? हलस्य लाङ्गलस्य हत्या प्रहारेण भीति: भयं तेन मिलिता यमुना कालिन्दी तस्या इव आभा यस्य तत्। लाङ्गलाकृष्टयमुनात्वेनोत्प्रेक्ष्यते वसनमिति उत्प्रेक्षालङ्कार:। वाचकाप्रयोगाद् गम्या। सादृश्यवाचकभावादस्य सम्भावनावाचकत्वाद् गमकम्। यद्वा, हलहतिभीतिमिलितयमुनाया: स्वत: सिद्धत्वादुपमैवालङ्कार:। तेन यमुनाकर्षण-रूपचरित्रेण वीररस एव व्यज्यते। हे हलधररूप बलरामरूप।।८।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।८।। हलधररूपं स्तुवन्नाह, वहसीति। अत्रापि पूर्ववन्मुखबन्धयोजना। विशदे शुक्ले वपुषि जलदाभं जलदस्याभा कान्तिस्तद्वदाभा यस्य। एवंविधं वसनम्, अर्थान्नीलं वासः वहसीत्येवंरूपापरा। किंविधम् ? हलहतीति। हलसंज्ञकस्य शस्त्रस्य हलेन वा या हतिः प्रहतिः अतो या भीतिस्तया मिलितेति या यमुना तस्या इवाभा यस्मिन् वसने इति गमकत्वात् समासोऽयमुत्प्रेक्षागर्भः। यद्वा हले हते भीत्या मिलिता या यमुना तस्या इवाभा यत्रेति उपमोपक्रमोत्प्रेक्षा। अत्र आभाशब्दस्य उपमा वा केन प्रसिद्ध्या उपक्रमे उपमापर्यवसाने तु बलभद्रे यमुनामिलनस्य सम्भवोपपत्तेः सम्भावनोत्थापन-मित्युत्प्रेक्षा। इदं नीलं वसनं भयान्मिलितयमुनेवेत्युत्प्रेक्षार्थः। तथा च, एतद्विषये **साहित्ये**ऽप्युदाहृतम्, ''प्रतिक्षणोत्कूलितशैवलाभा'' इत्यत्र शैवलाभा यथा। धृतहलधर-रूपेति सम्बोधनम्। हलिना कादम्बरीं पीत्वा यमुनास्नानार्थमाहूता सा च मल्लोऽयमित्यवज्ञाय तत्समीपं नागता। ततोऽसौ क्रोधात्तां हलेन च कर्षतीति **पुराणम्**।।८।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।८।। नैतावन्मात्रं स्वप्रेयसीश्रमरूपक्लेशापनोदनायात्मभक्त यमुनाकर्षणादिनाप्याह हे धृतहलधररूप! त्वं शुभ्रे वपुषि जलदवन्नीलं वसनं धारयसि। तत्रोत्प्रेक्ष्यते; हलेन हतिर्हननं तद्भीत्या मिलिता यमुना तद्वदाभा यस्य तत्। अनेनैव श्रीहलधरस्य हास्यरसाधिष्ठातृत्वं विज्ञापितम्।।८।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।८।। श्रीहलधररूपेण स्तौति; वहसीति। हे धृतहलधररूप! त्वं विशदे शरत्पार्वणसुधांशुवद् धवले वपुषि गात्रे जलदाभं स्निग्धनीलमेघसदृशमेकवसनं वहसि परिदधासि। कीदृशम्, हलेन हलाकृतिनायुधेन हतिराकर्षणं तस्मात् भीतिर्भयं तथा मिलिता कटिदध्नं स्थिता या यमुना तदाभं तत्कल्पं, हलाघातभयेन शरणमागतया यमुनया सेवित इव दर्शनीय इति भावः।

अत्र गम्योत्प्रेक्षा उपमाभेदयोः संसृष्टिः। अत्र रुचिरत्वलक्षणो नायकगुणः। ईश्वरतालक्षणश्च। ''सौन्दर्येण दृगानन्दकारी रुचिर उच्यते'' इति लक्षणम्। ''द्विधेश्वरः स्वतन्त्रश्च दुर्लङ्घ्यकश्च कीर्त्तितः'' इति **ईश्वर-लक्षणम्**।।८।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।। वहसीति; हे बलराम! त्वं शरीरे मेघसदृशं नीलाभं वस्त्रं धारयसि। अनेन उत्प्रेक्ष्यते यत् तव हलेन क्षताक्तभिया त्वदीयनीलाभवस्त्रसदृशा सा यमुना संगुप्ताऽस्ति। तव जयो भवतु। अत्र वीररस:। अत्रापि रौद्ररस: भयस्थायिभावात्।।८।।

**९-निन्दसि यज्ञविधेरहह श्रुतिजातम्।**
**सदयहृदयदर्शितपशुघातम्।।**
**केशव! धृतबुद्धशरीर! जय जगदीश! हरे!।।९।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।९।। बुद्धरूपं स्तुवन्नाह। अत्र पूर्ववन्मुखबन्धयोजना। यज्ञविधे: श्रुतिजातं वेदसमूहं निन्दसीत्येवं रूपापरा। धृतबुद्धशरीरेति सम्वोधनम्। धृतं बुद्धशरीरं येनेति विग्रह:। अहहेत्यद्भुतम्। स्वयं वेदान् प्रकाश्य स्वयमेव निन्दसीत्यद्भुतम्। कीदृशं श्रुतिजातं दर्शितपशुघातम्। दर्शित: पशुघात: पशुमारणं येन। कथं निन्दसीत्याह। सदय हृदयेति। सदयंहृदयं यस्येति विग्रह:। अहिंसा परमो धर्म इति बौद्धागमात्। "अहहेत्यद्भुते खेदे"। **वेदे** श्रवसि च श्रुति:।।९।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।९।। अथ बुद्धावतार:। केशव धृतबृद्धशरीर इति ध्रुवे विशेष:। निन्दसीति। हे सदयहृदय! त्वं यज्ञविधे: श्रुतिजातं क्रतुविधानसंबन्धि वेदवाक्यसमुहं निन्दसि। किंभूतम्? दर्शितपशुधातमुपदिष्टगवाश्वादिमारणम्। अहहेत्यद्भुते। परमेश्वरास्यैवोपदेष्टृत्वा-दिज्यत्वात्तत्फलदातृत्वाञ्च किमपि प्रयोजनमभिसंधाय तन्निन्दा नाश्चर्यम्। निन्दसीत्यत्र धीरशान्तो नायक:। तल्लक्षणम्; शान्तो विनीतो धीरश्च धीरशान्तो द्वेजो वणिक्।।९।।

### (३) जगद्धरकृत- सारदीपिका (टीकानोपालब्धा)

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।९।।अथ बुद्धावतारं स्तौति, धृतबुद्धेति। धृतं बुद्धस्य शरीरं येन तादृश! जय। ननु बुद्धावतारस्य वेदनिन्दकस्य मे कथं स्तुति: क्रियत इत्यत आह; निन्दसीति। यज्ञविधे: श्रुतिजातं यज्ञस्य विधानबोधकं वेदसमूहं निन्दसि, न तु सर्वमित्यर्थ:। सोऽपि किमिति निन्द्यत इत्यत आह, दर्शितेति। अहह कष्टम्। दर्शितो बोधित: पशुघातो येन तादृशम्। वेदोऽपि पशूनां घातं बोधयतीत्यहह कष्टमित्येवं निन्दसीति भाव:। एतादृशनिन्दायामपि हेतुमाह; सदयहृदयेति। दया कृपा तत्सहितं हृदयं यस्य तादृश!। अयं भाव:;

रागवशान्निरतहिंसाञ्जनान्दृष्ट्वा "अग्नीषोमीयं पशुमालभेत" इत्यादिविधिवाक्यै: स्वर्गादिफलदर्शनपुरस्कारेण गुडजिह्विकया वैदिकमार्गे प्रवर्त्य पश्चान्नश्वरस्वर्गादिफलकं निरपराधिबहुप्राणिवधसाध्ययागादिकं मुक्तिविरोधित्वाच्च तेषामत्यन्तमहितमिति विचार्य परमपुरुषार्थमोक्षसाधने निवृतिमार्गे तान्प्रवर्तयितुं न हिंस्यात्सर्वा भूतानि इत्यादिना यज्ञादिबोधकवेदस्य निन्दां करोषि, न तु सर्वथा वेदनिन्दायामेव तवावतारतात्पर्यम्। अत एव गूढं तवेमं व्यवहारमज्ञात्वा दुरात्मनां वैदिकमार्गे विश्वास इति संमोहनायैव तवैतदवतारपरिग्रह इत्यवतारप्रयोजनमुक्तमिति। "अहहेत्यद्भुते खेदे" इति **विश्व**:। "म्लेच्छ: पापरते जातिमेदे स्यादल्पभाषिणि" इति **विश्व**:।।९ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।९ ।।अवतारान्तरं प्रस्तौति। निन्दसीति। उक्तं च,

निन्दन् पाशविधानदेवमखिलं स्वछन्दलोकत्रयी
सञ्चारी त्रिपुरे पुरारिरमणीचित्तभ्रमोत्पादक:।।
सर्वज्ञो भगवान् मुनिर्द शवल: शास्ता घन:श्रीघन:।
पायाद्व: कमलामुखाब्जमधुपो बौद्धावतारो हरि:।।

धृतबुद्धशरीरं वौद्धमत प्रवर्त्तक मुनिवेशधारिगात्रं यस्य तादृशं, किञ्च, सदयं कृपापरतन्त्रं सर्वप्राणीहिंसा पराङ्मुखमित्यर्थ:। एतादृशं हृदयं चेतो यस्य, तादृशं हे केशव:! दर्शित: अग्निष्टोमीयं पशुमालभेतेत्येवमादिवाक्यैरुपदिष्ट: पशुघातं गवादिपशुमारणं येन तादृशम्।

किञ्च, यज्ञविधे: यागजन्यापूर्वस्य यागरूपेषु साधनस्य वा बोधकमितिशेष:। अथवा विधेरिति सम्बन्धे षष्ठी, तत्सम्बन्धीत्यर्थ:। एतादृशं **श्रुतिजातं** वायव्यं श्वेतमालभेतेत्यादि वाक्यकदम्बकम्।

अहह धिक् धिगिति निन्दसि "अहिंसा परमो धर्मस्त्वधर्म: प्राणिनां वधम्" इत्यादि वाक्यकल्पनयाहिंसापूर्वकत्वनुष्ठानप्रतिपादकवाक्यजातमप्रमाणमिति कांश्चिन्मन्दबुद्धीन् बोधयसीत्यर्थ:।

अथवा अहहेति खेदविस्मयद्योतकं। कविवाक्यं वा किम्बा "अहहेत्यद्भुतेखेदे" इत्यमत:। खेदस्तु यागाद्यनुष्ठापकवेदप्रणेतुयदीदृशस्य तद्विरुद्धाचारवोधनमयुक्तमिति आश्चर्यं तु, अपांशुलशिरोमणित्रिपुरकामिनीपातिब्रत्यपराकरशेवे कथमियमुपाय-चातुरीति। परवञ्चना चातुर्यमिदानीमप्यस्तीति द्योतयितुं वर्त्तमानप्रयोग: इतिभाव:। अत्र हिंसापूर्वक यागाद्यनुष्ठानप्रतिपादकवेदप्रणेतृत्वेन सर्वपुराणप्रसिद्धस्य तस्यैव भगवत:

सर्वेश्वरस्य तादृशश्रुतिनिन्दापूर्वकतद्विरोधाचारोपदेष्टृत्वप्रतिपादनरूपवस्तुनास्यालौकिकमहिमसमान्नस्वरूपं वस्तु ब्यज्यत इति वस्तुना बस्तुध्वनिः।।९।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।९।। बुद्धावतारं स्तौति। हे केशव धृतबुद्धशरीर जय जय। हे सदयहृदय करुणामयमानस। तन्मते दयाया एव परमधर्मत्वात्। अहह आश्चर्ये, यज्ञविधेर्यज्ञविधानस्य वोधकं श्रुतिजातं निन्दसि दूषयसि। स्वयमेव वेदं प्रतिपाद्य स्वयमेव बुद्धशरीरेण निन्दसीत्याश्चर्य्यम्। निन्दायां हेतुगर्भविशेषणमाह; वेदं कीदृशम्? दर्शितः ज्ञापितोऽग्नीसोमीयं 'पशुमालभेत' इत्यादिना पशुधातो येन एतादृशम्। 'अहहेत्यद्भुते खेद' **इत्यमरः**।।९।।

## (७) वनमालिभट्टकृत- सञ्जीवनी

।।९।। [७]वेदोक्तमर्यादाग्रहं त्यक्त्वा विहरेतिपूर्वोक्तं [८]तद्वादाचरन्तं प्रत्याह [९]निन्दसीत्यादिना। हे [१०]केशव। धृतबुद्वशरीर। बुद्धं ज्ञातं [१]श्रीवृषभानुजास्वरूपायत्तं [२]धृतं [३]स्वरूपं येन तादृश। [४]जय जगदीशेत्यादि पूर्ववत्। [५]हे सदयहृदय। त्वं यज्ञविधेः मकरध्वजयज्ञविधेः। अहहेति खेदे। श्रुतिजातं तत्प्रतिपादक [६]मर्यादाभागं [७]निन्दसि। मर्यादाभूतं भागं न मन्यसे। न वेदस्त्वन्नियामक इत्यर्थः। उक्तञ्च; "[८]रतिचक्रे [९]प्रवृत्तस्य नैव शास्त्रं न च क्रमः" इति [१०]**भोजे**। [११]कीदृशम्?दर्शितः पशुघातो येन। पक्षे बुद्धावतारं स्तौति [१२]धृतबुद्धशरीरेति। हे [१३]केशव। [१४]धृतबुद्धशरीर धृतं [१५]बुद्धशरीरं येन त्वं जय। ननु बुद्धावतारे वेदनिन्दकस्य बुद्धस्य मम [१६]कथमिति श्लाघाप्रसङ्गः क्रियत इत्यत आह[१७] निन्दसीत्यादि। त्वं यज्ञविधेः [१८]यज्ञविधानस्य प्रवर्तकं श्रुतिजातं श्रुतिविभागं निन्दसि। न तु सर्वमित्यर्थः। एतदर्थाविर्भावात्। यदा यदा हि धर्मस्य इति वचनात्। किमर्थं सोऽपि निन्द्यत [१९]इत्याह; दर्शितेति। [२०]अहहेति। [२१]कथम्? दर्शितो बोधितः पशूनां घातो येन तथाभूतम्। वेदोऽपि पशूनां घातं [२२]प्रथयति; [२३]कथं त्वं निन्दसीति भावः। तथा निन्दायां कारणमाह सदयेति। [२४]दया कृपा तत्सहितं हृदयं यस्य तादृशः सम्बोधनम्। यद्वा, सदयहृदया ब्राह्मणास्तेषां दर्शितः पशुघातो हननं [२५]येन। कथं निन्दसि? [२६]गवादि पशुघातं धिगिति। तथा बौद्धशास्त्रे अहिंसा परमो धर्म इति। अयमर्थः; [२७]रागवशादज्ञान [२८]विलोक्याग्निष्टोमीयं पशुमालभेतेत्यादि [२९]स्वर्गादिफलविधिवाक्यैः प्ररोचनया तान् गुड १ लड्डुकवत् २ प्रवर्त्य पश्चान्निरपराधवध ३ साध्यनानाप्रणिवधं स्वर्गादिफलं ४ नश्वरं विचार्य परमपुरुषार्थे श्रीकृष्णभजने तान् प्रवर्तयितुं ५ न हिंस्यात्सर्वाभूतानि इत्यादिना यज्ञबोधकस्य वेदस्य निन्दां करोषि। न

तु ६सर्वथा वेदनिन्दायां ७प्रवर्तत इति। ८तात्पर्यराद्धान्तमज्ञात्वा ९दुरात्मनां वेदमार्गे श्रीवृष्णभजने वा१० विश्वास:। तेषां मोहनाय तवावतारप्रयोजनमिति। ११जगदीशेत्यादि पूर्ववत्। बुद्धशरीरेत्यनेन दयालक्षणो नायकगुण उक्त:। **वेदे** १२श्रवसि च श्रुति: **इत्यमर**: (३.३.७४) जातं १३जात्योघजन्मसु इति विश्व: १४(५१.१४)।।९।।

१.अर्धमिं नास्ति - अ. २.हे हलधररूप - ल. हे केशव धृतहलधररूप - क. ३.कथम्भूते - क.ल.म. ४.कथम्भूतं वसनम् - क.ल.म. ५.कथम्भूतम् - क.ल.म. ६.तद्वदाभाति श्यामत्वं भवति - ल. ७.वेदोक्तमर्यादासंङ्ग्रहं त्यक्त्वा - ह. वेदोक्तमर्यादामत्यक्त्वा - फ. ८.तद्वदाचारं - अ. ९.निन्दसीत्यादि - फ. निन्दसीति - ग.ह.ज. १०.केशव नास्ति - इ.फ.ग.ह.ज.

१.श्रीवृषभानुजास्वरूपं यत्त–ब.२.धृतं नास्ति-अ.ब.फ.ह.३.स्वस्वरूपं वा-फ.४.जय जगदीशादि-अ.ब.इ.फ.ग.ह.ज.५.हे सहृदय-ब.हे सदय-ग.६.मयदि भागं-ब.७.निन्दसे मर्मादाभूतं भागं न मन्यसै न वेद: त्वन्नियामक इत्यर्थ:-ब.८.इतिचक्रे-अ.९.प्रवर्तस्य-ब.१०.भोजे नास्ति-अ.ब.फ.११.कीदृशं बुद्धशरीरम्-फ.१२.नास्ति-अ.इ.फ.ग.ह.ज.१३.नास्ति-इ.फ.ग.ह.ज. १४.नास्ति-अ.ब.फ.१५.बुद्धस्य शरीरम्-इ.फ.ग.ह.ज.१६.कथमतिश्लाघाप्रसङ्ग: -इ.फ.ग.ह.ज. १७.निन्दसीति-इ.ग.ह.ज.१८. यज्ञविधानप्रवर्तकं-ग.१९.इत्यत आह-ग.ज.२०.अहहेति खेदे-ज. २१.नास्ति-ज.२२.प्रथम इति-अ.२३.अतस्त्वं-ज.२४.सदया-अ.ब.२५.नास्ति-ब.२६.पशुघातं-ब.२७.रागवशादुविलोक्य-ग. रागवशादज्ञानादविलोक्य-फ.२८.विलोकाग्नीषोमीयं-ब.२९.वर्गादि -अ.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।९।। निन्दसीति। हे धृतबुद्धशरीर १५बुद्धावतार। हे सदयहृदय १६दयासहितान्त: करण। अहह इति खेदानुकारे दयायां वा। त्वं यज्ञविधे: क्रतुविधानस्य श्रुतिजातं वेदसमूहं निन्दसि दूषयसि। कथं भूतं १७श्रुतिजातम्? १८दर्शितपशुघातम्; दर्शित: प्रतिपादित: १९पशूनां घातो वधो यत्र।।९।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।९।। (निन्दसीति।) यज्ञविधे: ज्योतिष्टोमेन स्वर्गकामो यजेत इत्यादिविधे: समस्तवेदं निन्दसि। अहहेति खेदे। वेदोद्धारकस्त्वं कथं निन्दसि स्ववचनं स्वेन? निन्दाकरणे प्रयोजनमाह; सदयेति। दयया करुणया सहितं सदयं हृदयं अन्त: करणं यस्य तत्सम्बुद्धि:। अग्नीषोमीयं पशुमालभेत इत्यादिना दर्शित: प्रकटित: पशो: अजादे: घातो येन तत्। पशुघातकश्रुतिनिन्दाया: सदयहृदयत्वस्य हेतोर्वचनात्काव्यलिङ्गम्। हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्। श्रुतिजातं वेदसामान्यजातिजातम्। जातिर्जातं

च सामान्यम् **इत्यमरः** (१.५.३१)। यज्ञविधेः वेदमात्रं निन्दसि। अहह; स्वर्गादेरप्रत्यक्षत्वा[२]दहहेति भावः। प्रत्यक्षातिरिक्तप्रमाणानङ्गीकारात् तत्साधनार्थं हिंसाकरणं व्यर्थमिति किल निन्दा। हे धृतबुद्धरूप जिनस्वरूप। अत्र वेदवचन-प्रतिपादनाद्धास्यो रसः।।९।।

१.लडूक-अ.ब.लडक-ग.लडुक-फ. २.प्रवृत्तपश्चान्नास्ति-फ.ब.प्रवृत्तिः पश्चान्निरपराध-फ.प्रवृत्पश्चा-न्निरपराध-ग.प्रवृत्त्य पश्चानिरपराध-अ. ३.साध्यं-फ.ग.ह.ज. ४.नस्वरं-अ.नखरं-ब.अनवरतं-ज. ५.मा हिंस्यात्-इ.फ.ग.ह.अहिंस्यात्-ज. ६.सर्थवेद-ब.फ. ७.प्रवर्तयति-अ.ब.प्रवर्त इति-इ.प्रवर्तत इति-फ.ग. ८.तः १४.पर्यन्तो भागो नास्ति-फ. ९.दुरात्मनं वेदमार्ग-अ.ब. १०नास्ति-ज. ११.जगदीशादिपदं-अ.ब.इ.फ.ह.ज. १२.यशसि-अ.शवशि-ब. १३.जातौ स्वजन्मसु-अ.ब. १५.धृतबुद्धावतार-ल.म. १६.सर्वहितान्तः-करण-क. १७.नास्ति-ड. १८.नास्ति-क.ल.म. १९.पशुघातः पशुवधो यत्र-क.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।९।। बुद्धरूपं स्तुवन्नाह, निन्दसीति। अत्रापि पूर्ववन्मुखबन्धयोजना। यज्ञविधेः सम्बन्धिश्रुतिजातं वेदसमूहं निन्दसीत्येवंरूपापरा। ''वेदे श्रवसि च श्रुतिरिति।'' ''जातं व्यक्तौघजन्मसु'' इति **मेदिनी**। अहहेत्यद्भुतम्। स्वयं वेदान् प्रकाश्य स्वयमेव निन्दसीत्यद्भुतम्। श्रुतिजातं किंविधम्? दर्शितपशुघातमिति। दर्शितो विहितः पशूनां घातो मारणं यस्मिन्निति विग्रहः। कथं निन्दसीत्याह - सदयहृदयेति। सदयं दयासहितं हृदयं यस्येति विग्रहः। ''अहिंसा परमो धर्मः'' इति **बौद्धागमात्**। धृतबुद्धशरीरेति सम्बोधनम्। ''अहहेत्यद्भुते खेदे'' **इत्यमरः**।।९।।

## (११) पूजारीगोस्वामीकृत- बालवोधिनी

।।९।। किं च निजाज्ञारूपवेदविरुद्धवादप्रवर्त्तनेनापीत्याह। त्वं यज्ञविधेर्यज्ञविधायक-वेदवाक्यसमूहं निन्दसीत्यहहेत्यद्भुतं स्वयं वेदान् प्रकाश्य स्वयमेव निन्दसीत्यद्भुतत्वम्। दर्शितः पशूनां घातो यत्र तद्यथा स्यात्तथा। कथं निन्दसीत्याहपशुषु सदयं हृदयं यस्य हे तादृश! 'अहिंसा परमोधर्मः' इत्यादिना दैत्यमोहनाय पशुषु दया सहित इत्यर्थः। अहेः पयःपोष इव दैत्यानां यज्ञकरणमनुचितमिति तन्मोहनं युक्तमित्यर्थः। अनेनैव बुद्धस्य शान्तरसाधिष्ठातृत्वं बिज्ञापितम्।।९।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।९।।श्रीबुद्धोवतारेण स्तौति; निन्दसीति। हे धृतबुद्धशरीर! धृतं बुद्धमतप्रतिपादकमुनि-शरीरं येन तादृश। प्रयोजनमाह त्वं यज्ञविधेः श्रुतिजातं ''वायव्यं श्वेतमालभेत'' इत्यादि यज्ञविधायकवेदवाक्यकदम्बं निन्दसि, दूषयसि। कीदृशं दर्शितोऽग्नीषोमीयं पशुमालभेतेत्यादिवाक्यैरुपदिष्टः पशुघातो गवादिमारणं यत्र तादृशम्, क्रियाविशेषणं

वा। दर्शितः पशुघातो यत्र यथा स्यात् तथा निन्दसीति। स्वयं वेदान् प्रकाश्य स्वयमेव निन्दसीत्यहह खेदेऽद्भुते वा। अहहेत्यद्भुते खेदे'' **इत्यमरः**। कुतो निन्दसीत्यत्र आह; सदयं हृदयं यस्य हे तादृश! अहिंसा परमो धर्मस्त्वद्धर्मः प्राणिनां वधः ''इति करुणार्द्रचित्तेत्यर्थः। वस्तुतो दैत्यमोहनार्थमयमवतारः। अहेः पयः पोष इव तेषां यज्ञकरणमनुचितमिति अभिप्रायः। भगवतो दुष्टनिग्रहस्यावश्यकरणीयत्वात्। अत्र करुणत्वलक्षणो नायकगुणः। ''परदुःखासहः यस्तु करुणः स निगद्यते'' इति लक्षणम्।।९।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

९- निन्दसीति; वेदोक्तस्य यज्ञविधानस्य निन्दनं करोसि। मीनावतारे यः वेदोद्धारकः स कथं वेदं निन्दतीति वैपरीत्यं प्रतिभाति। यत्र सहृदयतया पशुमारणं कर्मदारुणं न सोढुं समर्थोऽसि। बुद्धशरीरेण त्वं करुणावतारोसि तव जयो भवतु। अत्र हिंसारूपस्य पशुघातस्य निन्दने दयारूपेण शान्तभावेन शान्तरसो दर्शितः। वेदस्य निन्दा न भवति अपितु वैदिके यज्ञे कृतपशुहिंसा निन्द्यते।।९।।

**१०-म्लेच्छनिवहनिधने कलयसि करवालम्।**
**धूमकेतुमिव किमपि करालम्।।**
**केशव! धृतकल्किशरीर! जय जगदीश! हरे!।।१०।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१०।। कल्किरूपं स्तुवन्नाह। अत्रापि पूर्ववन्मुखवन्धयोजना। म्लेच्छनिवहनिधन इति। म्लेच्छसमूहस्य मारणनिमित्तं करवालं खड्गं कलयसीत्येव रूपापरा। धृतं कल्किशरीरेति सम्बोधनम्। धृतं कल्किशरीरं दाम्भिकतनुर्येनेति विग्रहः। कीदृशं धूमकेतुमिव करालमुत्पातसूचकग्रहमिव भीषणं केचित्। अत्र खड्गस्य नीलवर्णतया धूमसाम्यात् तन्मुष्टेः सुवर्णमयत्वात् अग्निसाम्याद्धूमकेतुशब्देन धूमकेतुमाहुः। म्लेच्छनिवहनिधन इति निमित्तात्कर्मयोगे सप्तमी। ''समूह निबहव्यूह सन्दोह विसरब्रजाः'' **इत्यमरः**। अस्योत्पाते धूमकेतुः। करबालः कृपाणवत्,

''करालो भीषणो तुङ्गे निधनं मृतिन : स्वयोः।
कल्कोऽस्त्रीघृततैलादिशेषे दम्भे विभीतके''।। इति **मेदिनी** ।।१०।।

## (२) राणाकुम्भकृत-रसिकप्रिया

अथ कल्कयवतार:। धृतकल्किशरीर इति ध्रुवे विशेष:। म्लेच्छेति। हे हरे! म्लेच्छनिवहनिधने म्लेच्छसमूहवधनिमित्तम्। अपि निश्चये। त्वं करवालं खड्ग कलयसि इति वितर्कयामि। "किं" वितर्के। अन्यथा चक्रादिषु सत्सु कथं खड्गस्यैव धारणम्। किंभूतं करवालम्? भीषणम्। किमिव? धूमकेतुमिव। म्लेच्छानामुत्पातशंसिनं धूमकेतुं ताराविशेषमिव। अथवा, धूम: केतुश्चिह्नं यस्य स तम्। म्लेच्छकुलविनाशपिशुनमिव। उत्पाते हि वह्निर्धूमशिखो भवति, स तु प्रायेण रत्नमयो भवति। खड्गतेजो हि नीलभास्वरं भवति, अत उभयसाम्येनोपमा। म्लेच्छेत्यत्र धीरोद्धतो नायक:। तल्लक्षणमुक्तं प्राक्।।१०।।

## (३) जगद्धरकृत- सारदीपिका

।।१०।। हे धृतकल्किशरीर! धृतकल्क्यवतारशरीर तच्चेष्टितमाह त्वं म्लेच्छनिवहनिधने म्लेच्छानां निवहा: समुहास्तेषां निधने नाशनिमित्तो किमपि अनिर्वचनीयं करवालं खड्ग कलयसि कथंभूतं करवालम् धूमकेतुमिव औत्पातिकतारकापातमिव करालं भयानकम् अथवा धूमकेतुरग्निस्तम्।।१०।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।१०।। अथ कल्किनोऽवतारं स्तौति; धृतकल्किशरीरेति। हे केशव! धृतकल्किशरीर धृतं कल्किन: शरीरं येन तादृश! त्वं जय। ननु पूर्वं मम सदयत्वमुक्तं, कल्क्यवतारे तु प्राणिवधनिरतस्य मे विरुद्धमित्यत आह; म्लेच्छनिवहेत्यादि। त्वं म्लेच्छनिवहनिधने म्लेच्छसमूहमारणे करवालं खड्ग कलयसि धारयसि। कीदृशम्? किंमपि करालमतिशतेन भयंकरम्। कमिव? धूमकेतुमिव औत्पातिकग्रहविशेषमिव। रणे उदितं तत्करवालं पश्यतां म्लेच्छानां नाशो भवतीति करवालस्य धूमकेतुसाम्याम्। अन्यस्मिन्नप्युदिते धूमकेतौ औत्पातिकग्रहविशेषे तं पश्यतां प्राणिनां विपदो भवन्तीति भाव:। यद्वा, धूम: केतुश्चिह्नं यस्य स धूमकेतुर्वह्निस्तमिव। अत्रास्य खड्गस्य नीलत्वाद्धूमसाम्यम्। मुष्टेश्च सुवर्णमयत्वादग्निसाम्यम्। म्लेच्छनिधनेत्यत्र "चर्मणि द्वीपिन हन्ति" इतिवन्निमित्तात्कर्मसंयोगे सप्तमी। समूहे निवहव्यूसंदोहसरव्रजा: **इत्यमर**:। "निधन: स्यात्कलेर्नाशे" इति **विश्व**:। "खडगे तु निस्त्रिंशचन्द्रहासासिरिष्टय:। कौक्षेयको मण्डलाग्र: करवाल: कृपाणवत् **इत्यमर**:। धूमकेतु: स्मृतो वह्नावुत्पातग्रहभेदयो:" इति विश्व:। करालो भीषणोऽन्यवत् इति।। १०।।

## (५) लक्ष्मणकृत-श्रुतिरञ्जनी

।।१०।।अवतारान्तरं प्रस्तौति। म्लेच्छेति। धृतं कल्किशरीरं येन तादृशं। हे केशव। म्लेच्छानां मूर्खाणां देवब्राह्मणवाधकानामित्यर्थः, तेषां निवहः समूहस्तस्य निधने मरणविषये करालमतिक्रूरमतिभयङ्करमिति यावत्। करवालं खड्गं धूमकेतुर्नाम रात्रौ गगने परिदृश्यमान औत्पातिकस्तालाकारः कश्चन केतुविशेषः तमिव, अथवा धूमः केतुश्चिह्नं यस्य सोऽयं धूमकेतुः प्रलयकालवह्निज्वालाजातमिव केनाप्यत्याश्चर्यं यथा स्यात्तथा कलयसि, "वर्त्तमानसामीप्ये वर्त्तमानवदेति भविष्यति लट्" धर्मसंस्थापनार्थाय दुष्टशिक्षणमधुनापि करोतीति सूचयितुं वर्त्तमानप्रयोग इति भावः। किमपीत्येतदव्ययं करवालविशेषणं वा। तदा किमपि एतादृशमपि वक्तुमशक्यमित्यर्थः।

म्लेच्छैधर्मे मन्दीकृते दुष्कृते च प्रवर्द्धिते सति तादृङ् म्लेच्छनिधनपूर्वकं धर्म स्थापनाय दुष्टशिक्षणमधुनापि करोतीति सूचयितुं बर्त्तमानप्रयोग इति भावः। किमपीत्येतदव्ययं करवालविशेषणं वा। तदा किमपि एतादृशमपि वक्तुमशक्यमित्यर्थः। म्लेच्छैर्धर्मे मन्दीकृते दुष्कृते च प्रवर्द्धिते सति तादृङ् म्लेच्छनिधनपूर्वकं धर्मस्थापनाय कल्क्यवतारो भविष्यतीति समुदायार्थः। धूमकेतुमिवेत्येकं पदम्। पूर्णोपमा। युगान्तरापेक्षया वा धृतेर्भूतार्थप्रयोगोपपत्तिः।।१०।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१०।। कल्क्यवतारं स्तौति। हे केशव धृतकल्किशरीर गृहोतकल्किदेह त्वं जय जय। म्लेच्छानां यवनादीनां निवहः समूहः, तस्य निधने मरणनिमित्तं धारयसि। 'कलिबलि कामधेनौ निधन' इति। 'निमित्तात् कर्मयोगे' इति सप्तमी। कीदृशम्? धूमकेतुमिव धूमयुक्तौत्पातिकतारकमिव, सकलम्लेच्छमरणहेतुत्वात् अथवा धूमः केतुः चिह्नं यस्य स वन्हि तमिव मुष्टेः सुवर्णनिवदुप्वात् खड्गस्य श्यामवर्णत्वात्* सधूमवह्निसाम्यम्। 'कौक्षेयको मण्डलाग्रः करवालः कृपाणवत्' **इत्यमरः**। 'करालो दन्तुरे तुङ्गे भीषणे चाभिधेयव'दिति धरणिः।।१०।।

## (७) वनमालिभट्टकृत- सञ्जीवनी

।।१०।। पूर्वोक्तविहार [३]पुष्टं प्रत्याह, [४]म्लेच्छेत्यादिना। हे [५]केशव। हे धृतकल्किशरीर धृतं सापराधशरीरं येन तादृश जय[६]जय। शेषं समानम्। त्वं [७]म्लेच्छनिवहनिधने करवालं कलयसि। म्लेच्छ अव्यक्ते शब्दे। म्लेच्छस्या[८]व्यक्तकूजनस्य निवहः समूहस्तस्य निधने विरामे खड्ग खड्गवदतिकरालं तीक्ष्णं [९] नखं कलयसि ददासि। पक्षे कल्क्यवतारं स्तौति। [१०]हे [११]केशव। [१२]धृतकल्किशरीर; धृतं कल्किनः शरीरं

येन, तत्सम्बुद्धिः। त्वं जय जय। [१३]जगदीशेत्यादिपदं सर्वत्र योज्यम्। ननु पूर्वं [१४]मम सदयत्वं कथितं [१५]तद्विपरीतप्राणिवधे [१६]प्रवृत्तस्येत्यत आह म्लेच्छेति। म्लेच्छसमूह [१७]मारणार्थं किमपि करालमतिभयङ्कर [१८]करवालं खड्गं कलयसि धारयसि। एतेन धर्मसंरक्षणपरिपालनेन दृढत्वलक्षणो नायकगुण उक्तः। कमिव? धूमकेतुमिव औत्पातिक; ग्रहमिव। औत्पातिकमुदितं ग्रहं म्लेच्छानां नाशो (नाशाय) भवतीति करवालस्य धूमकेतुसाम्यम्। [१]औत्पातिकग्रह उदिते प्राणिनां दुःखं स्यादिति भावः। यद्वा, धूमः केतुः चिह्नं यस्य सः [२]धूमकेतुर्वह्निः तमिव। खड्गस्य नीलत्वाद्धूम [३]सादृश्यम्। मुष्टेश्च कनक मयत्वादग्निसाम्यम्। [४]म्लेच्छनिवहनिधन इति [५]निमित्ते सप्त(मी) चर्मणि द्वीपिनं हन्तीतिवत्। [६]म्लेच्छः [७]पापरते जातिभेदे [८]स्यादल्पभाषिणि इति **विश्वः** (२५.४)। हर्षापहारके चैव [९]सदाचारोज्झितेऽपि च इति **कोशचूडामणिः**। कल्की तु सापराधः स्यात्कल्की विष्णु [१०]र्मलान्विते इति [११]**भोजे**। धूमकेतुः स्मृतो वह्नावुत्पात [१२]ग्रहयोरपि इति [१३]**विश्वः** (५३.२.३)। [१४]समूहनिवहव्यूह **इत्यमरः** (२.६.४०)। निधनं स्यात्कुले नाशे इति **विश्वप्रकाशः**(७१.३४)। [१५]खड्गे[१६]तु निस्त्रिंश[१७]चन्द्रहासाऽसिरिष्टयः। कौक्षेयको मण्डलाग्रः करवालः [१८]कृपाणवत् **इत्यमरः** (२.८.८९)। करालो भीषणोऽन्यवत् इति च। (प्रति) वस्तूपमालङ्कारः[१९] ।।१०।।

१.कारम् - अ. २.दहहभावः - ग. ३.पुष्ट्यर्थ - ग. ४.म्लेच्छेत्यादि - फ. म्लेच्छेति - ग. ५.नास्ति - इ.फ.ग.ह.ज. ६.नास्ति - इ.फ.ग.ह.ज. ७.म्लेच्छनिधने - ग. ८.स्याव्यक्तकजनस्य - अ ९.नास्ति - ग. १०.धृतकल्किशरीरेति। हे केशव - ब. ११.नास्ति - इ.फ.ग.ह.ज. १२.नास्ति - फ.ह. १३.जगदीशादिपदं - अ.इ.फ.ग.ह.ज. १४.मम नास्ति - अ.ब. मम सदयहृदयत्वं - ज. १५.तद्विपरीतं - ज. १६.प्रवृत्तस्यात आह - फ. १७.मारणार्थे - ब. १८.नास्ति - फ.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।१०।। म्लेच्छेति। हे धृतकल्किशरीर [२०]धृतकल्क्यवतार त्वं [२१]म्लेच्छनिवहनिधने म्लेच्छसमूहमारणे निमित्तं किमप्यनिर्वचनीयं करवालं खड्गं कलयसि धारयसि। कथम्भूतं करवालम्?[२२]धूमकेतुमिव औत्पातिकतारकापातमिव करालं भयानकम्। यद्वा, धूमकेतुरग्निः।।१०।।

## (९) कृष्णपण्डितकृत- जयन्ती

।।१०।। (म्लेच्छेति।) म्लेच्छानां वेदप्रामाण्येन क्रियाभ्रष्टानां निवहनिधने मारणे; निमित्तसप्तमी। तत्किमपि ईषत् अनिर्वचनीयत्वेनात्यन्तं करालं भयङ्करं धूमकेतुमिव अत्यर्थं करालं मरणसूचकत्वाद् धूमकेतोः। करवालं खड्गं कलयसि धारयसि।

खड्गेनैव दुष्टसंहारः कल्किना अग्रे [२३]करिष्यत इति वक्तव्ये बुद्धिस्थत्वेन वर्तमानताध्यवसायः। हे धृतकल्किशरीर कल्किकलेवर।।१०।।

१.उत्पातिक-अ.२.धूमकेतुचिह्नः-अ.३.सारस्यम्-अ. साम्यम्-फ.४.इत आरभ्यापदसमाप्ति व्याख्याभागो नास्ति-अ.५.निमित्तसप्तमी-ज.६.लिछः-ब.७.पापतरे-**विश्वः**८.स्यादपभाषिणि-**विश्वः**९.आचारोष्टज्ञतेऽपि च-ब.नास्ति-अ.आचारेति-ग.अेयरोद्धितेपिवेति-इ.१०.र्मालान्विते-ब.११.नास्ति-फ.१२.ग्रहभेदयोः-**विश्वः**१३.नास्ति-फ.समूहे अमरः१४.तः१५.खड्गेतु खड्गनिस्त्रिंश-ज.१६.त-ब.१७.चन्द्रहासास्यरिष्टयः-ब.१८.कृपाणे चेदित्यमरः-ब.१९.पर्यन्तो भागो नास्ति-फ.२०.धृतावतार-ड.धृतकल्क्यवतारशरीर-ल.म. नास्ति-क.२१.नास्ति-ड.२२.धूमकेतुं औत्पातिक-ड.२३.करिष्यसीति-च.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१०।। कल्किरूपं स्तुवन्नाहम्लेच्छेति। अत्रापि पूर्ववन्मुखबन्धयोजना। म्लेच्छनिवहनिधने इति। म्लेच्छसमूहः मारणनिमित्तं किमप्यनिर्वचनीयं करवालं खड्गं कलयत्येवंरूपापरा। ''म्लेच्छः पामरभेदे स्यात्पापरक्तेऽपभाषणे'' इति **मेदिनी**। ''अनिर्वाच्ये मनागर्थे किमपीति प्रयुज्यते'' इति हट्टचन्द्रः। ''समूहनिवहव्यूहः'' **इत्यमरः**। ''निधनं मृतिनिःस्वयोः'' इति। किमपीति स्वल्पार्थे क्रियाविशेषणं वा। तथा च **रघौ**, ''किमप्यहिंस्य तव चेन्मतोऽहम्'' इति। एतेन म्लेच्छानां निधने नातियत्न इत्यर्थः। करवालं किंविधम्? करालमिति। करालं भीषणम् उन्नतं वा? ''करालो दन्तुरे तुङ्गे भीषणे चाभिधेयवत्'' इति **मेदिनी**। किमिव करालमित्याह, धूमकेतुमिवेति। धूमकेतुर्नाम ग्रह उदितो यथा बहुजनविपत्तिहेतुत्वात् करालस्तथा करवालः इत्युपमार्थः। केचिदत्र खड्गनीलवर्णयोः धूमसाम्यात् तन्मुष्टेः सुवर्णमयत्वादग्नि-साम्याद् धूमकेतुशब्देन धूमविशिष्टाग्निमाहुः। ''अग्न्युत्पातौ धूमकेतू'' **इत्यमरः**। धृतकल्किशरीरेति सम्बोधनम्। धृतं कल्किशरीरं दाम्भिकतनुर्येनेति विग्रहः। ''कल्कोऽस्त्री घृततैलादिशेषे दम्भे विभीतके'' इति **मेदिनी**। 'म्लेच्छनिवहनिधने' इति ''निमित्तात् सप्तमी।'' इह कर्मसंयोगो नापेक्ष्यते अन्तर्धौ येनादर्शनमिच्छतीतिवत्।।१०।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।१०।। युद्धधर्मं विना प्राणिवधेनापीत्याह। हे धृतकलकिशरीर! त्वं मेच्छनिवहस्य नाशनिमित्तं करबालं खड्गं कलयसि, कलिहल्योः कामधेनुत्वाद्धारयसि। कीदृशं? किमपि अनिर्वचनीयं अतिशयमित्यर्थः। करालं भयङ्करं किमपि धूमकेतुनामा य औत्पातिको ग्रहस्तमिव। अनेनैव कल्किनो वीररसाधिष्ठातृत्वं विज्ञापितम्।।१०।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१०।। श्रीकल्क्यवतारेण स्तौति; म्लेच्छेति। धृतमाविर्भावितं कल्किशरीरं दुष्टसंहारणरूपं येन हे तादृश। त्वं जय। तत्प्रयोजनमाह। म्लेच्छानां पापरतानां च जातिविशेषाणां निवहस्य समूहस्य निधने मारणे विषये करवालं खड्गं कलयसि, धारयसि, कीदृशं किमप्यनिर्वचनीयम्, ईदृशमिति वक्तुमशक्यमिति अर्थः। करालमतिभयङ्करम्। किमिव धूमकेतुर्नाम गगने रात्रौ परिदृश्यमान औत्पातिकस्तारा-सहितधूमरेखाकारस्तमिव । किमपीत्यनेन "साधूनां सुखदं विपक्षशलभव्यूहस्य दाहोद्धुरम्" इत्यद्भुतत्वम्। धूमकेतुमिव इति पक्षद्वयेऽपि खड्गस्य श्यामलवर्णत्वेन धूमसाम्यम्। हीरकादिजटितस्वर्णमयमूलत्वेन तारकाग्निसाम्यम्। धर्मरक्षाप्रवर्त्तनाद्धार्मिकत्वरूपो नायकगुणः। लक्षणन्तु, "कुर्वन् कारयते धर्मं यः स धार्मिक उच्यते" इति ।।१०।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१०।। म्लेछेति; म्लेछानां वधार्थं करवालं खड्गं धारयसि। धूमकेतुमिव अर्थात् धूमः पताका यस्य स संहारात्मकाग्निः उत्पाते हि अग्निः धूमशिखो भवति। म्लेछशब्दस्य निदिष्टमर्थं टीकाकारैः नैव स्पष्टिकृतम्। म्लेछशब्दमव्यक्ते शब्दे इति **बनमालि भट्टे**नोक्तम्। **शुक्लध्वजः** म्लेच्छयवनादीनामिति व्यपदिश्यति। **लक्ष्मण**स्तु **श्रुतिरञ्जन्यां** म्लेछं नाम मूर्खः देवब्राह्मणवाधकत्वेन निदिशति। म्लेच्छाः धर्म दुष्कृतिनाः इति पुनः **लक्ष्मणः**। म्लेच्छ शब्देन पापरतानां व्यपदेशः रसिकरंगदायां दर्शितम् इति **राणाकुम्भः**। व्यवस्थारहितं देशं म्लेच्छदेश इति कथ्यते। **अमरकोषो**पि इमं मतं समर्थयति। भारतस्य पश्चिम सीमा प्रदेशः समानार्थकः प्रत्यंतः म्लेच्छदेशः। २/१/७/२२

चतुवर्णाचारोरहितदेशे म्लेच्छदेशः प्रकीर्तित। मनुनाप्रोक्तः २/२३

कृष्णसारस्तु चरन्ति मृगो यत्र स्वभावतः स ज्ञेय यज्ञियोदेशो म्लेच्छदेश स्ततःपरम्।।

चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते।

म्लेच्छदेशः स विज्ञेय आर्यावर्त्तस्ततः परम्।। इति **वाचस्पत्यम्**।

दुष्टानां विनाशकः कल्कं, पापं हार्य्यतया अस्ति अस्य। कल्क + इन्। स तु कलिशेषे सम्भलग्रामे भविष्यति। यथा, सम्भल ग्रामे मुख्यस्य व्राह्मणस्य महात्मनः। भवने विष्णुयशसः कल्किःप्रार्दुभविष्यति इत्यादि **श्रीमद्भागवते** निश्चप्रचतया वर्णितम्। अतः दुष्टानां विनाशाय करालरूपं धारितं त्वया हे कल्किशरीर तव जयो भवतु।

इत्यत्र वीररसोः भयानकश्च।।१०।। इतः प्राग् पशुघाते सदयहृदयः सन् निन्दति यज्ञविधिम् श्लोके मेच्छान् प्रति दया कुत्र ?

**११-श्रीजयदेवकवेरिदमुदितमुदारम्।**
**श्रृणु सुखदं शुभदं भवसारम्।।**
**केशव! धृतदशविधरूप! जय जगदीश! हरे!।।११।।**

### (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

दशावतारवर्ण्णनां संकलयन्नाह।

"सारो बले स्थिरांशे च न्याय्ये क्लीवं वरे त्रिषु"।

"उदारो दातृ महतोरित्यमरः।"

धृत दशविधरूप इति सम्वोधनम्। धृतं दशविधरूपं येनेति विग्रहः। "सम्प्रति गीतार्थमेकेन श्लोकेन निवध्नाति"।।११।।

### (२) राणाकुंभकृत-रसिकप्रिया

।।११।। इदानीं दशभिरवतारैः कृतविस्तारभेदेन श्रीकृष्णापरत्वेनोपसंहरन्नाह। तथा च वक्ष्यति वेदानुद्धरत इत्यादि। केशव धृतदशविधरूप, "जय जयदीश हरे" इति ध्रुवे विशेषः।श्रीजयदेवकवेरिति। हे धृतदशविधरूप! जयदेवकवेर्मम इदं स्तोत्ररूपं उदितं भणितं शृणु मामकीनोऽयं मां स्तौतीति बुद्धयावधारय। किं भूतम्? उदारम्। झटिति पदार्थर्पकम्। पुनश्च भवसारम्।भवे संसारे सारं साररूपम्। अथवा; भवोच्छेदकहेतुमध्ये सारम्; मध्यमपदलोपित्वात्। अत एव सुखदम्; सद्यः परनिर्वृतिहेतुत्वात्। अत एव शुभदम्; शिवेतरक्षतिहेतुत्वात्। अत्र शान्तो रसः। पर्यायोक्तिरलंकारः।।११।।

### (३) जगद्धरकृत-सारदीपिका

।।११।। धृतवानसीत्यादिभिर्वर्तमानप्रयोगैरवताराणां भगवतश्च लीलायाः नित्यत्वं दर्शितम् एवं तत्तदवतारगुणैः स्तुतिं कृत्वासंप्रत्यवतारिणः स्तुवन्प्रार्थयते श्रीजयदेवेति हे केशव! धृतानि दशविधानि रूपाणि येन तत्सम्बोधनं श्रीजयदेवकवेः इदं गीतम् उदितं भाषितं श्रृणु आकर्णयेति भक्तजनं प्रत्युक्तिः कीदृशम् उदारं मनोहरं सुश्राव्यत्वात् शुभदं कल्याणदायकं भवसारं संसारे धनरूपम्।।११।।

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।११।। प्रत्येकावतारपुरस्कारेण भगवतः स्तुतिं कृत्वा संप्रति समुदितदशावतार-पुरस्कारेण श्रीकृष्णं स्तौति; धृतदशविधेति। धृतानि दशविधानि रूपाणि येन तादृश! त्वं

जय। संप्रति जयदेवकविः संप्रदायगतत्वेन गीते स्वनाम निबन्धन् कृतां भगवतः स्तुतिं कृपयान्यानपि श्रावयितुमाह, श्रीजयदेवेति। इदं जयदेवकवेरुदितं भाषितं श्रुणु। किंभूतम्? सुखदं श्रोत्रम्मनःसुखप्रदम्। पुनः कीदृशम्? शुभदं मङ्गलप्रदम्; कृष्णकीर्तनत्वात्। अत एव भवसारं श्रेष्ठमहाधनरूपं वा। अत एवोदारं महत्। विधा विधौ प्रकारे च **इत्यमरः**। उक्तं भाषितमुदितम इति च। उदारो दातृमहतोः इत्यपि। कल्याणं मङ्गलं शुभम् इति च।।११।।

## (४) लक्ष्मणकृत-श्रुतिरञ्जनी

।।११।। भक्तगीतं भगवते समर्पयति। श्रीजयेति। धृतानि दशविधरूपाणि येन तादृश, धृतदशावतारेत्यर्थः। एतादृश हे केशव! उदारं ध्वनिगुणालङ्कारादिसम्पत्त्या गम्भीरमित्यर्थः। अतएव सुखदं सरसचित्ताकर्षकं शुभदं उचिततालरागादिसम्पत्त्या श्रुतिकट्वादिदोषराहित्येन च श्रोतृणां नेतुश्च कल्याणप्रदम्। अथवा त्वदङ्किततया मङ्गलदायकम्। अतएव भवस्य संसाररूपदुःखस्य सारोऽपसारणं यस्मात्, तादृशं, संसारदुःखावहमित्यर्थः। अथवा, भवत्यस्माद्भक्तिदानादिकमिति भवो नाम भक्त्यादिसाधनं तन्मध्ये सारं सारभूतं क्षिप्रमेव भगवद्भक्त्यादिसम्पादनमित्यर्थः। अथवा जन्मसाफल्यकरं वा एतादृशं श्रीजयदेवकवेः इदं पूर्वोक्तं दशावतारवर्ण्णना उदितं गीतमिति यावत्, श्रृणु आकर्णयेत्यर्थः।।११।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।११।। कविरधुना श्लोकेन दशावतारनतिरूपमङ्गलमाचरति। कृष्णाय तुभ्यं नमः अस्तु। कीदृशाय? वेदानुद्धरते रक्षते, जगन्ति प्राणिगणान् वहते, भूगोलं भूमण्डलम् उद्बिभ्रते उत्तोल्य बिभ्रते दैत्यं हिरण्यकशिपुं दारयते विदारयते, बलिं छलयते वञ्छयते, क्षत्रक्षयं राजन्यविनाशं कुर्वते, पौलस्त्यं रावणं जयते विनाशं कुर्वते, हलं कलयते लाङ्गलं धारयते, कारुण्यं दयाम् आतन्वते 'अहिंसा परमो धर्म' इत्यादिप्रतिपादनेन विस्तारयते, म्लेच्छान् मूर्च्छयते नाशयते। अत एव वेदोद्धरणादिप्रयोजनार्थं दशाकृतिकृते मत्स्यादिदशावतारान् कुर्वते। कृष्णायेत्यनेन कृष्णस्य प्राधान्यप्रतिपादनेनावतारित्वं मत्स्यादीनामवतारत्वमिति दर्शितम्। तथा च भागवतम्, 'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयमि'ति। केचिदत्र सम्बोधनपदाभावाद् हे कृष्ण आय वासुदेवाय तुभ्यं नमः 'अकारो वासुदेवः स्यादि'त्येकाक्षरकोषदर्शनाद् व्याचक्षते। 'गोला गोदावरोसख्योः कुलटावत्सयोः स्त्रियाम्। पत्राञ्जने मण्डले च क्लीवमञ्जनके द्वयोः।। वत्सरार्द्धे च गोलः स्याद्विधवायाः सुतेऽपि चे'ति **विश्वः**।।११।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।११ ।। सर्वलीलाकर्तारं [१]पूर्णं [२]श्रीकृष्णं स्तौति, श्रीति। हे रसिक। श्रीजयदेवकवेः इदं[३]गीतं[४]उदितं स्वतः प्रेम्णा स्फुटी[५]भूतं शृणु। कीदृशम्? उदारं [६]महद्रसमयत्वात्। अथ वा उदारं अतिरमणीय; [७]श्रीराधाकेलिनिरूपणत्वात्। [८]पुनः कीदृशम्? सुखदं सकलानन्दपूर्णत्वात्[९]। पुनः कीदृशम्? शुभदं [१०]समस्तशुभप्रदम्। [११]यद्वा,शुभं ददाति यः श्रीकृष्णस्तत्प्रदम्। भवसारं भवा [१२]सारं सारभूतम्। यद्वा, भवो मनोभवः कामः तस्य सारं शृङ्गाररसपूर्णम्। यद्वा, भवत्यस्माद्विश्वमिति स भवः श्रीकृष्णस्तस्य [१३]सारं सारभूतं [१४]सुरतविस्तारकम्। हे [१५]केशव। धृतदशविधरूप धृतानि दशविधानि [१६]दशप्रकाराणि मीनबन्धादिशरीराणि येन तादृश जय जय। [१७]पक्षे कृतदशावतारं श्रीकृष्णं स्तौति। हे [१८]केशव। हे धृतदशविधरूप धृतानि दशविधानि [१९]दश प्रकाराणि मीनाद्यवताररूपाणि येन तादृश त्वं जय जय [२०]। अथ वा दशविधैरवतारै [२१]र्निरूप्यत इति। शेषं समानम्। उदारं [२२]सुन्दरं प्रोक्तमुत्कृष्टं पूजितं तथा इति [२३]त्रिलोचनः। रूपं प्रशस्ते [२४]रम्ये च इति चूडामणिः।।११ ।।

१.पूर्वं - ब. २.नास्ति - अ. ३.नास्ति - फ. ४.नास्ति - ग. ५.कृतं - अ.फ.ज. ६.मरुद्रस - अ. ७.श्रीराधाकृष्णकेलि - इ.फ.ह.ज.श्रीराधा - श्रीनन्दकुमारकेलि - ग. ८.तः. ९.पर्यन्तं नास्ति - अ.ब. १०.नास्ति - इ.फ.ग.ह.ज. ११.अथ वा शुभं दायितः श्रीकृष्णतत्पदं - ब.इ.फ.ग. अथ वा शुभं ददाति यः श्रीकृष्णस्तत्प्रदं - ह.ज. १२.नास्ति - फ. १३.नास्ति - ग.ह.ज. १४.श्रुति विस्तारकम् - ग. १५.नास्ति - इ.फ.ग.ह.ज. १६.दश प्रकाश प्रकाराणि - ब. २१.रूप्यत इति - फ.ग.ह.ज. २२.सुन्दरे - फ. २३.नास्ति - फ. २४.रम्ये रम्येचेति - अ.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।११ ।।श्रीजयदेवेति। हे धृतदशविधरूप धृत[१]दशप्रकारशरीर। श्रीजयदेवकवे-रिदमुदितं भाषितं [२]शृणु आकर्णय इति [३]भक्तजनं प्रत्युक्तिः। कीदृशं[४] जयदेवकवेरुदितम्[५]? उदारं मनोहरम्।[६] पुनः कथम्भूतम्[७]? सुखदं सुश्राव्यत्वात्। [८]पुनः [९]कीदृशम्? शुभदं कल्याणदायकम्। [१०]पुनः [११]कीदृशम्? [१२]भवसारं संसारे [१३]धनरूपम्।।११ ।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।११ ।। ख्यापनापूर्वकं फलमाह श्रीजयदेवेति। श्रीमान् जयदेवाख्यः कविः; तस्य इदं दशावतारस्तोत्ररूपं उदितं च वचनं उदारं चतुरतारूपगुणयुक्तम्। उदारताऽति-वैदग्ध्यमग्राम्यत्वात्पृथकङ्गता। इदमुपलक्षणं च [१४]सत् ज्ञातमाधुर्यं सौकुमार्यकान्तिभिरपि युक्तम्। सुखदं आनन्दप्रदं मङ्गलप्रदम्। भवे संसारे सारं भगवत्स्तुतिरूपं शृणु।

मध्यमपुरुषेण भगवद्भक्तो जनः श्रोता आक्षिप्यते इति त्वमित्यध्याहारः। अतो नापृष्टपरिभाषणदोषः। हे धृतदशविधरूप उक्तमत्स्याद्यवतारवहनशीलः माधव। एतेन अवताराणां दशात्मकत्वं कृष्णस्य पूर्णविष्णुत्वं सूचितम्। अष्टपदसमुदायत्वेन प्रवृत्तत्वादष्टपदीत्वं दशपद्याः ध्रुवायाः एकादशे मीनशरीरेत्यादिपरिवर्तनेऽपि न ध्रुवत्वभङ्गः। परिवर्तनमपि चमत्काराय। केशवस्थाने माधवयादवमुकुन्दादि-पदवत्।।११।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।११।। दशावतारवर्णनां सङ्कलयन्नाह, **श्रीजयेति**। किञ्चिद् वैष्णवजनमभिप्रेत्य कविर्ब्रूते। हे वैष्णवजन! जयदेवकवेः उदितमिदं शृणु गीतमिदमाकलयेत्यर्थः। कीदृशं सुखदं श्रुतिसुखदं गानमात्रेण सद्यो निवृत्तिकरत्वात्। किं च शुभदं विष्णुस्तवत्वादतीव उदारं भवसारं सर्वभवसारापेक्षया इदमुत्कृष्टं संसारसारभूतम्। ''सारो बले स्थिरांशे च। न्याय्ये क्लीबं वरे त्रिषु'' इति। ''उदारो दातृमहतोः'' **इत्यमरः**। धृतदशविधरूपेति सम्बोधनम्। धृतं दशविधं रूपं येनेति विग्रहः।।११।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।११।। एवं प्रत्येकैकाङ्गरसाधिष्ठातृपुरस्कारेण निवेद्य समुदिताङ्गरसाधिष्ठातृपुर-स्कारेण निवेदवयति। हे दशविधरूप श्रीकृष्ण। जय। जयदेवकवेः ममेदमुदितं शृणु। कीदृशं? शुभदं जगन्मङ्गलप्रदं यत्तदवतारणां जन्मनः सारं आविर्भावरहस्यं यत्र तत्, अतएवोदारं परमं महत्ततः सुखदं परमानन्दप्रदं जन्मगृह्यमिति **श्रीसूतोक्तेः** ।।११।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।११।। एवमेकैकेन स्तुत्वा पुनः समुदायेन स्तुवन् प्रार्थयते। श्रीजयदेवेति। धृतानि दशविधानि रूपाणि मत्स्यावतारादीनि येन हे तादृश! हे केशव! हे जगदीश! हे हरे! त्वं जय ।श्रीरत्र भक्तिसम्पत्तिः। तद्भक्तस्य जयदेवकवेर्मम इदं दशावतारवर्णन-रूपमुदितं कथितं गीतं शृणु। श्रुत्वा अनुगृहाणेति भावः। प्रार्थनायां लोट्। कीदृशम्। उदारमुत्कृष्टम्। उत्कृष्टत्वे हेतूनाह; यतः शुभदं जगन्मङ्गलप्रदं, सुखदं प्रेमानन्दप्रदायि, भवसारं, भवे, संसारे सारभूतं किं वा भवस्य त्वदवताराणामुद्भवस्य सारं रहस्यं यत्र तादृशम्। जन्मगुह्यमिदमिति **श्रीसूतोक्तेः**। सर्वत्र वर्त्तमानक्रियाप्रयोगेण श्रीमत्स्यादी-नामभेदसूचनात्तेषां नित्यता दर्शिता। उक्तं च,

''सर्वे नित्याः शाश्वताश्च देहास्तस्य महात्मनः।
हानोपादानरहिता नैव प्रकृतिजाः क्वचित्।।'' इति।।११।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।११।। श्रीति ; श्रीजयदेवकवे: मोदमानं दशविधरूपं वर्णितम् । अत: तत् खलु शुभाय, सुखाय भवसागरतरणाय भवतु ।। अत्र कीर्त्तिधवलच्छन्द: ध्रुवपदेन भ्रमरो नाम च्छन्द: । लक्ष्यलक्षणयो: समन्वय: राणाकुम्भेन साधितमस्ति । अयुजि पदे द्वादशैव युजि तु यस्य हि दश वाष्टमात्राश्चेत्। परमपि पदयुगमेवं तं कीर्त्तिधवलमिह धीरा: प्राहु: । ध्रुवपदे, षताषचौ भ्रमर: बालभुजङ्गमललितमिति **च्छन्दचुडामणि**रपिच्छन्दसा कीर्त्तिपूर्वेण धवलेन विनिर्मित: । पदान्तभोगरूचिरस्तत: पाटश्वराञ्चित: । दशावतार-कीर्त्याढ्यो धवलोऽयं प्रबन्धराट्। रागोऽत्र मध्यमादि: स्यादादिताले विलम्बित: । लय स्यान्मागधी रीति: शृङ्गारोत्र रस: स्मृत:। कीर्त्तनं वासुदेवस्य विनियोगो नृपोत्सवे ।।११ ।।

**५- वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते**
**दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते।**
**पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते**
**म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नम: ।।५ ।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५ ।। सम्प्रति गीतार्थमेकेन श्लोकेन निवध्नाति। दशाकृतिकृते कृष्णाय तुभ्यं नमोऽस्त्विति वाक्यार्थ: । दशाकृतिं कृतवानित्यर्थे क्विप्। दशाकृतिकृत्यं प्रकटयन्नाह। वेदानुद्धरत इति मीनरूपायेत्यर्थ: । जयन्ति बहते कूर्मरूपायेत्यर्थ: । भूगोलमुद्विभ्रत इति वराहरूपायेत्यर्थ: । दैत्यं दारयत इति नरसिंहरूपायेत्यर्थ: । बलिं छलयत इति वामनरूपायेत्यर्थ: । क्षत्रक्षयं कुर्वत इति परशुरामरूपायेत्यर्थ: । पौलस्त्यं जयत इति रामरूपायेत्यर्थ:। हलं कलयत इति हलधररूपेण हलमुषलौ धृतायेत्यर्थ:। कारुण्यमातन्वत इति बौद्धरूपायेत्यर्थ: । म्लेच्छानमूर्च्छयत इति कल्किरूपायेत्यर्थ: ।

गोला गोदावरी सख्यो: कुनटी दुर्गयो: स्त्रियाम्।
पात्राञ्जने मण्डले च क्लीबं वा कुञ्जरे द्वयो: ।।इति **मेदिनीकार** : ।।५ ।।

### (२) राणाकुंभ कृत-रसिकप्रिया

।।५ ।। इदानीं दशानामप्यवताराणामभेदं निरूप्य तत्तद्रूपं श्रीकृष्णं प्रणमति, वेदानुद्धरत इति। हे हरे ! तुभ्यं कृष्णाय नम: । वेदानुद्धरत इत्यादि मीनावतारादिपदव्याख्यानेनैव निगदव्याख्यातम्। वृतमिदं शार्दूलविक्रिडितम्। दीपकोऽलंकार: । वेदानुद्धरते" इत्यत्र

पदेषूक्ता नायका:। अत्र प्रलयपयोधीत्याद्येकादशस्वपि पदेषु कीर्तिधवलं नाम च्छन्द:। तल्लक्षणं यथा, अयुजि पदे द्वादशैव युजि तु यस्य हि दश वाष्ट मात्राश्चेत्। परमपि पदयुगमेवं तं कीर्तिधवलमिह धीरा: प्राहु:।। "ध्रुवपदे तुषताषचौ भ्रमर:" इति भ्रमरो नाम छन्द:। बालभुजङ्गमललितम् इति **छन्दश्चूडामणि**रपि। छन्दसा कीर्तिपूर्वेण धवलेन विनिर्भित:। पदान्तभोगरुचिरस्तत: पाटस्वराञ्चित:।। दशावतारकीर्त्याढ्यो धवलोऽयं प्रबन्धराट्। रागोऽत्र मध्यमादि: स्यादादितालो विलम्बित:।। लय: स्यान्मागधी रीति: शृङ्गारोऽत्र रस: स्मृत:। कीर्तनं वासुदेवस्य विनियोगो नृपोत्सवे।।५।।

इति दशावतारकीर्तिधवलो नाम प्रथम: प्रबन्ध:।।

## (३) जगद्धरकृत-सारदीपिका

।।५।। उक्तानेवावतारान्पुन: संक्षेपेण कीर्त्तयति वेदानिति तुभ्यं कृष्णाय नम: अस्तु इत्यन्वय: कथंभूताय मीनरूपेण वेदानुद्धरते। कूर्मरूपेण पुन: कथंभूताय जगन्निवहते धारयते। वराहरूपेण भूगोलं पृथ्वीचक्रम् उद्बिभ्रते ऊर्ध्वं धारयते। नृसिंहरूपेण दैत्यं हिरण्यकशिपुं दारयते। वामनरूपेण बलिं दैत्यं छलयते वञ्चयते। क्षत्रक्षयं क्षत्रियनाशं कुर्वते। रामरूपेण पौलस्त्यं रावणं जयते। बलरामरूपेण हलं लाङ्गलं कलयते धारयते। बुद्धरूपेण कारुण्यं दयाम् आतन्वते विस्तारयते। म्लेछान् अन्त्यजान्मूर्छयते नाशयते कल्किरूपेण अत एव दशाकृतिकृते दशविधरूपधारिणे।।५।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५।। अंशावतारान्स्तुत्वा संप्रति दशावतारिणं कृष्णं स्तौति; वेदानिति। कृष्णाय परिपूर्णस्वरूपिणे श्रीकृष्णरूपधारिणे तुभ्यं नम:। ननु मीनाद्यवतारवानीश्वरस्तस्य स्तुतिं कृता चेदिदानीं गोपालं मां किं स्तौषीत्यत आह; दशाकृतिकृते इति। मीनादिदशरूपधारीणे तुभ्यं नम:। तथा च तत्तदवतारवानीश्वरस्त्वमेव, न त्वदन्य इत्यर्थ:। ननु ईश्वरश्चेदहं तदाऽनित्यमीनाद्याकृतय: किमिति मया धृता इत्याशङ्क्य अवताराणां प्रयोजनमाह - वेदानुद्धरते इति। वेदानुद्धरते मीनरूपेण वेदोद्धारं कुर्वते। पुन: कीदृशाय ? जगद्भुवनं निवहते कच्छपरूपेण धारयते। पुन: भूगोलं भूमण्डलमुद्बिभ्रते धारयते वराहरूपेणोर्ध्वं प्रापयते। पुन: कीदृशाय ? दैत्यं हिराण्यकशिपु नरसिहरूपेण दारयते विदारयते। पुन: किंभूताय ? बलिं दैत्यं छलयते वामनरूपेण वञ्चयते। पुन: कीदृशाय ? क्षत्रक्षयं कुर्वते परशुरामरूपेण दुर्वृत्तक्षत्रियाणां नाशं कुर्वते। पुन: कीदृशाय ? पौलस्त्यं रावणं श्रीरामचन्द्ररूपेण जयते। पुन: कीदृशाय ? हलं कलयते दुष्टनिग्रहायायुधत्वेन बलभद्ररूपेण कलयते। कारुण्यं कृपामातन्वते वुद्धरूपेण विस्तारयते। म्लेच्छान्कल्किरूपेण मूर्च्छयते नाशयते। आकृति: कथिता रूपे सामान्यवपुषोरपि इति विश्व:।।५।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५ ।। एवमवतारान् प्रस्तुत्त्यानन्तरकृत्त्यं दशावतारिरूपकृष्णनमस्कारमाचरति। वेदानुद्धरत इति। हे देव! शङ्खासुरापहृत निगमान् उद्धरते उद्धर्त्ते, तमसुरं तज्जठरे निमग्न निगमान पूर्वब्रह्मणे प्रदात इत्यर्थः। जगन्ति लोकान् बहते सर्वलोकभर्त्त्रे इत्यर्थः। भूगोलं सप्तद्वीपसागरपर्वतादि सहितं भूमण्डलमुद्विभ्रते। प्रलयकाले दंष्ट्राग्रेण महार्णवमग्नमेदिनी समुद्धरणायेत्यर्थः। दैत्यं हिरण्यकशिपुं दारयते भेत्त्रे, हिरण्यकशिपुविदारणं कुर्वाणायेत्यर्थः।

बलिं च बलिचक्रवर्त्तिनं चलयते भ्रंसयते, बलेर्निजभक्तसन्ततित्वेन स्थानभ्रंशमात्रं कृत्वा पातालं प्रतिष्ठापयित्रे इत्यर्थः। क्षत्रियाणां जमदग्निघातुकजातीय-बाहुजानां क्षयं नाशं कुर्वते कुर्वाणाय सकलक्षत्रियान्तकायेत्यर्थः।

पुलस्तस्यापत्यं पुमान् पौलस्त्यो रावणः तं जयते, विजयमानाय, हलं लाङ्गलं कलयते, आयुधत्वेन हलं बिभ्राणायेत्यर्थः। अतन्वत इति पदद्वयी कारुण्यं करुणा चातुवर्णादित्वात् स्वार्थे ष्यञ्। अथवा करुणा अस्यास्तीति करुणः। अर्श आदित्वादच्। तस्य भावः कर्म वा कारुण्यं ''गुणवचनेत्यादिनाष्यञ्''। आतन्वते तन्वानाय भूतमात्रहिंसा न कर्त्तव्येति सर्वप्राणिषु दयां कुर्वत इत्यर्थः।

आतन्वत इति पदद्वयम्। म्लेच्छान् सर्वधर्मविप्लावकक्रूरकर्मणः। पापिष्ठान् मूर्च्छयते नाशयते एवं दशाकृतिकृते दशावतारकर्त्त्रे दशाकारधरायेत्यर्थः। दशाकृतिकृत इत्यत्र दशत्वयुक्ता आकृतय इति विग्रहः। अथवा,

तद्धितार्थेत्यादिना उत्तरपदसमासः। अथवा दिक्संख्ये संज्ञायामिति संज्ञात्वात्समासः। कृत इत्यत्र करोतेः कर्त्तरि क्विप्। ह्रस्वस्येत्यादिना तुगागभः। एवं विधाय ''कृषिर्भूवाचकः शब्दोणश्च निर्वृत्तिवाचकः। तयारैक्यं परंब्रह्म कृष्ण इत्यभिधीयते'' इत्युक्त लक्षण लक्षिताय कृष्णाय तुभ्यं नमः। दशावतारिरूपं त्वां नमस्करोमीत्यर्थः। सर्वत्र नमःस्वस्तीत्यादिना चतुर्थी। अत्र भावः प्रतिपाद्यः। यदुक्तं, रतिर्देवादि विषयोभाव इत्यभिधीयत इति।।५ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५ ।। कविरधुना श्लोकेन दशावतारनतिरूपमङ्गलमाचरति। कृष्णाय तुभ्यं नमोऽस्तु। कीदृशाय? वेदानुद्धरते रक्षते, जगन्ति प्राणिगणान् वहते, भूगोलं भूमण्डलम् उद्बिभ्रते उत्तोल्य बिभ्रते दैत्यं हिरण्यकशिपुं दारयते विदारयते, बलिं छलयते वञ्चयते, क्षत्रक्षयं राजन्यविनाशं कुर्वते, पौलस्त्यं रावणं जयते विनाशं कुर्वते, हलं कलयते लाङ्गलं

धारयते, कारुण्यं दयाम् आतन्वते 'अहिंसा परमो धर्म' इत्यादिप्रतिपादनेन विस्तारयते, म्लेच्छान् मूर्च्छयते नाशयते। अत एव वेदोद्धरणादिप्रयोजनार्थं दशाकृतिकृते मत्स्यादिदशावतारान् कुर्वते। कृष्णायेत्यनेन कृष्णस्य प्राधान्यप्रतिपादनेनावतारित्वं मत्स्यादीनामवतारत्वमिति दर्शितम्। तथा च **भागवतम्,** 'एते चांशकला: पुंस: कृष्णस्तु भगवान् स्वयमिति। केचिदत्र सम्बोधनपदाभावाद् हे कृष्ण आय वासुदेवाय तुभ्यं नम: 'अकारो वासुदेव: स्यादि'त्येकाक्षरकोषदर्शनाद् व्याचक्षते। 'गोला गोदावरोसख्यो: कुलटावत्सयो: स्त्रियाम्। पत्राञ्जने मण्डले च क्लीवमञ्जनके द्वयो:।। वत्सरार्द्धे च गोल: स्याद्विधवाया: सुतेऽपि चेति **विश्व:**।।५।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।५।। पूर्वकथितं लीलासमूहं श्रीकृष्णचन्द्रविषयं प्रथयन् प्रणमति, वेदानित्यादिना। श्रीकृष्णाय दशाकृतिकृते तुभ्यं नम इत्यन्वय:। [१]पूर्वोक्तां दशविधां दशप्रकारां मीनबन्धादिलीलाकृतिं करोति तस्मै दशाकृतिकृते [२]कृष्णायेति पूर्णाय [३]नराकृतिपरब्रह्मणे वा। उक्तञ्च,

कृषिर्भूवाचक: शब्दो[४]नश्च निर्वृतिवाचक:।।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते।।[५]इति।।

[६]किंभूताय ?[७]वेदान् वात्स्यायनादिशास्त्रोक्तबन्धादिकामप्रकारानुद्धरते लोकेषु विस्तारयते। अन्यथा वात्स्यायनशास्त्रं निष्फलमेवात्र स्यात् पुन: कीदृशाय ? जगत् युवतिसमूहं निवहते विगतसन्तापं [८]कुर्वते। पून: कीदृशाय ? भवति इति भू: [९]कामस्तस्य गोल: समूहस्तं [१०]उद्बिभ्रते धारयते। [११]रासे व्रजवधूमण्डलं वा। रासलीला [१२]प्रतिबन्धकं त्वत्समीपमागतं [१३]शङ्खचूडाख्यं दैत्यं दारयते [१४]विदारयते। अनेन [१५]रसैकप्राधान्य-मुक्तम्। पुन: (कीदृशाय) ? बलिं [१६]त्रिवलिं छलयते [१७]व्रजयुवतीनां कामजनितनख [१८]क्षतादि [१९]प्रदानेन वञ्चयते। पुन: कीदृशाय ? क्षत्रक्षयं कुर्वते। [२०]क्षत्रशब्देनात्र [२१]सहचरितो वीररसो [२२]लक्ष्यते। तस्य क्षत्रस्य क्षयं [२३]विनाशं कुर्वते। एतेन सुरतशूरत्वं [२४]ध्वन्यते। पुन: कीदृशाय ? पौलस्त्यं जयते। पुल महत्वे धातु:। पुलनं [२५]पुल: महत्वं [२६]तस्य समूह: पौलं, [२७]तस्य समूह इत्यण्। पौलं [२८]स्त्यायते [२९]संहतं भवत्यस्मिन्निति पौलस्त्यो बह्मानन्द:। स्त्यै ष्ट्यै शब्दसङ्घातयो: **(धा.पा.९१०)** इति धातु:। तमपि जयते[३०]तं न्यक्कुर्वते। [१]हलं [२]कलयते। हल [३]विलेखने **(धा.पा. ८३७)** धातु:। हलनं हल: [४]विलेखनं नखक्षतादि[५] तत् कुर्वते। कारुण्यमातन्वते। [६]भक्तेषु कृपां [७]विस्तारयते। म्लेच्छमव्यक्तभाषणम्। म्लेच्छ अव्यक्ते शब्दे

(**धा.पा.२०५**)[८] इति धातु:। [९]अव्यक्तश्वाससीत्कारान् मूर्छयते [१०] वर्द्धयते। '[११]मूर्छा मोहसमुच्छाययो: (**धा.पा. २१२**) इति धातु: [१२]। पक्षे श्रीकृष्णकृतां बन्धादिलीलां [१३]नुत्वा दशावतारिणं सच्चिदानन्दरूपं परिपूर्णविग्रहं श्रीकृष्णचन्द्रं गीतार्थश्लोकसङ्ग्रहेण स्तौतिवेदानित्यादिना। कृष्णाय नराकृतिपरब्रह्मणे तुभ्यं नम [१४] इत्यन्वय:। नमस्कारोऽस्तु। ननु मीनाद्यवतारेण [१५] तस्य [१६] पूर्णस्य [१७]स्तुति: कृत्वैव इदानीं [१८] नन्दगोपबालकं मां कथं स्तौषीत्यत आह, दशाकृतिकृते (इति)। आकृति: कथिता रूपे सामान्यवपुषोरपि इति **विश्व**: (५५.१६६)। मीनादिदशाशरूपकर्त्रे। अंशावतारवानीश्वरस्त्वमेवेत्यर्थ:। ननु कुतोऽहमीश्वर: कुतो ममांशा एते [१९]तत्राह, पूर्णत्वात्। उक्तञ्च **श्रीभागवते**, [२०] एते चांशकला: पुंस: कृष्णस्तु भगवान् स्वयम् इति किञ्च कृषिर्भूवाचक: [२१] शब्द इति। ननु पूर्णश्चेदहं कुत्सितमीना (द्या) कृतय: (ती:) किमिति स्वीकृता इत्याशयेनावतारप्रयोजनमाहवेदानुद्धरते (इति)। [२२]वेदोद्धारणं कुर्वते मीनशरीरेण। पुन: कीदृशाय ? जगन्निवहते। [२३]भुवनं [२४] धारयते कच्छप [२५] रूपेण। [२६] पुन: कीदृशाय ? भूगोलं धरामण्डलं उद्बिभ्रते ऊर्ध्वं प्रापयते [२७] वराहावतारेण। पुन: कीदृशाय ? दैत्यं हिरण्यकशिपुं दारयते [२८] विदारयते नृसिंहरूपेण नखै:।

(पुन: कीदृशाय ?)बलिं दैत्यं छलयते [१]प्रवञ्चयते [२]वामनावतारेण। (पुन: कीदृशाय ?) क्षत्रक्षयं कुर्वते दुष्टक्षत्रियाणां विनाशं कुर्वते परशुरामा[३]वतारेण। (पुन: कीदृशाय ?) [४]पौलस्त्यं जयते, पुलस्त्यवंशे भव: पौलस्त्य: रावणस्तं जयते श्रीरामचन्द्ररूपेण। (पुन: कीदृशाय ?) हलं [५]कलयते। दुष्टनाशाय हलं धारयते [६]बलदेवरूपेण। (पुन: कीदृशाय ?) कारुण्यमनुग्रहमातन्वते विस्तारयते [७]बुद्धरूपेण। (पुन: कीदृशाय ?) म्लेच्छान् मूर्च्छयते [८]नाशयते कल्किरूपेण। एतेन श्रीकृष्णदेवस्यांशावतार-प्रयोजनान्युक्तानि। [९]दीपकालंङ्कार:।।५ ।।

[१०]इतिश्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालि भट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां दशावतारवर्णनं नाम प्रथम: प्रबन्ध:।।५ ।।

१.दशविधप्रकारशरीर - क.ल.म. २. नास्ति - ल.म. ३.भक्तान् प्रत्युक्ति: - क. भक्तानां प्रत्युक्ति: - ल.म. ४.त: ५.पर्यन्तं नास्ति - क.ल.म. ६.त: ७.पर्यन्तं नास्ति - क.ल.म. ८,९.न स्त: - क.ल.म. १०,११. न स्त: - क.ल.म. १२.भवसारेऽनुरूपम् - ल.म. १३. धनरूपमित्यर्थ: - ल.म. १३.धनरूपमित्यर्थ: - क. १४.सति - च. १५.वेदानिति - इ - फ.

१.पूर्वोक्ता दशविधा दशप्रकारा-अ.ब.इ.ह. पूर्वोक्ता दशविधा दर्शयते-फ. पूर्वोक्ता दशविधा दशप्रकारा मीनबन्धादिलीला तदाकृतिं-ज. २.कृष्णाय-ज. ३.नराकृतिपूर्णाय ब्रम्हणे बा-ग.४.णश्च-

ज.५.नास्ति-अ.ग.६.किंभूताय ?वेदानुद्धरते-ग.७.वेदे-अ.८.कुरुते-अ.९.कामः नास्ति-फ.१०.बिभ्रते-अ.११.रासव्रज-अ.ब.१२.प्रतिबन्धकत्वसमीपमागतं-अ.ब.प्रतिबन्धकत्वं समीपमागतं-इ.प्रतिबन्धकतया-समीपमागतं-फ.१३.शङ्खचूडं दैत्यं-अ.१४.नास्ति-अ.१५.नासौकप्राधान्यं-ग.१६.पूजां-अ.ब.१७.युवतीनां-अ.१८.क्षतप्रदानेन-ग.१९.प्रधानेन-ब.२०.शब्देन-अ.२१.क्षत्रसहचरितो-ह.ज.२२.लक्षते-अ.ब.२३.नाशं-फ.२४.ध्वनितम्-ज.२५.पुनः-अ.२६.तस्य समूहः पौल नास्ति-ग.ह.२७.तस्य समूह इत्यण् नास्ति-अ.२८.स्त्यायतं संहतं-ह.फ.स्त्यायते संहते-ज.२९.नास्ति-ब.३०.अन्यकुर्वते-ब.अन्यं तत्कुर्वते-ग. अन्यत्कुर्वते-फ.ज. अत्पलं कुर्वते-ह. वाक्यमिदं नास्ति-अ.

१.२.न स्तः-ब.३.विशेषणे-अ.फ.विलेषणे-ब.४.विलेषणं-अ. विलेशणं-ब.५.नास्ति-फ.६.सद्भक्तेषु-ब.इ.फ.ज.सद्भक्ते-ह.७.विस्तारते-अ.८.नास्ति-इ.फ.ग.ह.९.अव्यक्तान् श्वाससीत्कारान्-फ.ग.ह.ज.९.तः१२.पर्यन्तं नास्ति-इ.१०.नास्ति-ग.ज.११.मूघ्रणंययोरिति धातुः-ब.१३.स्तुत्वांशावतारिणं-इ.फ.ग.ह.ज.१४.नास्ति-ब.इ.फ.ग.ह.ज.१५.तस्य पूर्णस्तुतिः-ह.१६.नास्ति-ब.१७.नास्ति-अ.१८.ननु नन्दगोप-ग.१९.तत्राहुः-फ.२०.अन्ये-ब.इ.फ.ग.ह.ज.२१.नास्ति-ब.इ.फ.ग.ह.ज.२२.वेदान् उद्धरणं क्रियते-ग.२३.२४.न स्तः-ग.२५.देहेन-ब.इ.फ.ह.ज.२६.पुनः कीदृशाय पदं सर्वत्र योज्यम्-ब.इ.फ.ग.ह.ज.२७.शूकररूपेण-ब.इ.फ.ज.२८.नास्ति-ग.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।५।। उक्तानेवावतारान् पुनः सङ्क्षेपेण कीर्तयति, [११]वेदानिति। तुभ्यं कृष्णाय नमोऽस्त्वित्यन्वयः। कथम्भूताय कृष्णाय ? वेदानुद्धरते मीनरूपेण। पुनः जगन्निवहते धारयते कूर्मरूपेण। भूगोलं [१२]पृथ्वीचक्रं उद्बिभ्रते [१३]ऊर्ध्वं धारयते वराहरूपेण। दैत्यं हिरण्यकशिपुं दारयते नृसिंहरूपेण। बलिं दैत्यं छलयते वञ्चयते वामनरूपेण। क्षत्रक्षयं क्षत्रियनाशं कुर्वते परशुरामरूपेण। [१४]पौलस्त्यं [१५]रावणं जयते [१६]रामरूपेण। हलं लाङ्गलं कलयते धारयते बलभद्ररूपेण। कारुण्यं दयामातन्वते विस्तारयते बुद्धरूपेण। म्लेच्छानन्त्यजान्मूर्च्छयते [१७]नाशयते [१८]कल्किरूपेण। अत एव दशाकृतिकृते दशविधरूपधारिणे [१९]श्रीकृष्णाय तुभ्यं नमः ।।१२।।

[२०]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितकृतायां दशावतारवर्णनं नाम प्रथमः प्रबन्धः।।५।।

१.प्रपञ्चयते-अ.२.वामनावताररूपेण-ज.३.रूपेण-ब.इ.फ.ग.ह.ज.४.पौलस्त्यं रावणं जयते श्रीराम रूपेण-फ.ज. पौलस्त्यं रावणं जयते श्रीरामचंद्ररूपेण-ग.ह.५.हलयते-अ.६.श्रीबलभद्ररूपेण-फ.ग.७.बुद्धिरूपेण-ब.८.नास्ति-अ.९.दीपिकालङ्कारः-अ.१०.इति श्रीजयदेववर्णिते दशावतारवर्णनो नाम प्रथमः प्रबन्धः-अ.इति श्रीजयदेववर्णितदशावतारवर्णनो नाम-फ.ह.ज.११.अयं श्लोकः सव्याख्यः द्वितीयप्रबन्धारम्भे दृश्यते-ड.१२.पृथ्वीरूपं चक्रं-क.१३.उद्धारयते-क.१४.पौलसिंत-ड.१५.नास्ति-ड.१६.दाशरथिरामरूपेण-क.१७.नास्ति-क.१८.नास्ति-ड.१९.नास्तीदं वाक्यम्-ड.ल.म.२०.इति प्रथमाष्टपदी-ल.म. नास्ति-क.

## (९) कृष्णपण्डितकृत-जयन्ती

।।५।। उक्तार्थं सङ्गृह्य प्रमाणयति; वेदानिति। वेदान् श्रुतिगणान् उद्धारकर्त्रे मत्स्याय। जगन्ति चतुर्दशलोकान् निवहते कूर्माय। भूगोलं उद्बिभ्रते पातालादूर्ध्वं नयते वराहाय। दैत्यं हिरण्यकशिपुं दारयते छिन्दते नृसिंहाय। बलिं छलयते वञ्चयते वामनाय। क्षत्रस्य क्षत्रियकुलस्य कार्तवीर्यादेः क्षयं संहारं कुर्वते परशुरामाय। पौलस्त्यं रावणं जयते संहारेण जयते दाशरथिरामाय। हलं लाङ्गलं प्रलम्बादिसंहाराय कलयते धर्त्रे बलरामाय। कारुण्यं दुर्जनमोहनार्थं कृपां आतन्वते बुद्धाय। म्लेच्छान्मूर्च्छयते इन्द्रियप्रलयसाम्यात् मारयते कल्कये ते। इत्थं दशाकृतीन् वेषान् कृते बिभ्रते कृष्णाय तुभ्यं नमः। अत्र क्रमेण तत्तदवतारप्रचरित्रप्रकटनात् क्रमेण कथनाद्रत्नावल्यलंकारः। क्रमिकाणां पदार्थानां क्रमेण गुम्फनं रत्नावलिः इति लक्षणात्। तुभ्यं नम इत्यस्य वेदानुद्धरत इत्यादौ पृथग्योजनायां दीपकालंकारः। मत्स्यादीनां वेदोद्धारकत्वादि[४] भङ्ग्या कथनात् पर्यायोक्तम्। अत्रापि सर्वात्मकत्वं कृष्णस्य दशाकृतिकृत इतिपदेन दर्शितम्।।५।।

[५]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां दशावतारवर्णनं नाम प्रथमः प्रबन्धः।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५।। दशभिर्गीतपदैरुक्तान् भगवतो दशावतारानेकेन श्लोकेन निबध्नन्नाह; वेदानिति, भो भगवन्! तुभ्यं नमः। किंविधाय? कृष्णायेति। परंब्रह्मस्वरूपाय। तथा च **महाभारते**; ''कृषिर्भूवाचकः शब्दो णश्च निवृत्तिवाचकः। तयोरैक्यं परंब्रह्म कृष्ण इत्यभिधीयते।।'' इति। अथ च दशाकृतिकृते लोकानुग्रहार्थं दशानामवतारशरीराणां ग्रहीत्रे दशाकृतीः करोतीत्यर्थे क्विप्, तस्मै। एतेन परमार्थतः परंब्रह्मस्वरूपो लोकानुग्रहनिमित्तं मायया मीनकूर्मादिलीलाविग्रहशालिपरमेश्वरो नित्यमविकृतरूपं इति दर्शितम्। तथा चाहुः, ''स भगवान् देहवानेव जात इति लोकानुग्रहं कुर्वन् लक्ष्यते'' इति **भगवद्गीताभाष्ये** शङ्कराचार्याः स्वयं च भगवतोक्तम्, ''जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः। त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन।।'' इति। एतदुक्तं भवति यस्त्वयं परंब्रह्मस्वरूपोऽपि सन् मीनकूर्मादिरूपेण प्रथसे, तस्मै दशाकृतिकृते कृष्णाय तुभ्यं नम इति। ''आकृतिस्तु स्त्रियां रूपे सामान्यवपुषोरपि'' इति **मेदिनी**। दशाकृतिकृत्त्वं क्रमेण प्रकटयन् विशेषणैराह, नमस्कारभूयस्त्वप्रतिपादनार्थं वेदानुद्धरते इत्यादि। तथाहि, मीनरूपेण वेदानां शङ्खासुरापनीतानामुद्धरणं कुर्वते तुभ्यं नमः इति सर्वत्र योज्यम्। 'उद्धरते' इति ''शक्त्यर्थे शतरि चतुर्थ्यन्तम्।'' एवमितरत्रापि जगन्ति भुवनानि वहते।

कूर्मरूपेण पृथ्वीवहनात् भूगोलं भूमण्डलं समुद्रमग्नमुद्बिभ्रते। वराहरूपेणार्थात्। ''गोलं स्यान्मण्डले जाराद्विधवायाः सुते पुमान्'' इति **हैममाली**। दैत्यं हिरण्यकशिपुनामानं दारयते, नृसिंहरूपेणार्थात्, बलिं बलिनामानं दैत्यं छलयते, वामनरूपेणार्थात्, क्षत्रक्षयं कुर्वते, परशुरामरूपेणार्थात्, पौलस्त्यं जयते रामरूपेण रावणस्य वधात्, हलं कलयते, बलभद्ररूपेण हलनाम्न आयुधस्य ग्रहणात्, कारुण्यमातन्वते, बुद्धरूपेण, प्राणिषु करुणावितरणात्। म्लेच्छान्मूर्च्छयते, कल्किरूपेण म्लेच्छानां मोहोत्पादनात्।।५।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।५।। अथ वर्त्तमानप्रत्ययैरवताराणां तत्तल्लीलानामपि नित्यत्वं प्रतिपादनेन श्रीकृष्णस्य नित्यं तत्तदवतारलीलत्वं वक्तुं उक्तगीतार्थमेकश्लोकेन निवध्नन्नाह, वेदानिति। दशावतारान् कुर्वते श्रीकृष्णाय सर्वाकर्षणानन्दाय तुभ्यं नमोऽस्तु। दशाकृतित्वं प्रकटयन्नाह। मीनरूपेण वेदोद्धारणं कुर्वते, कूर्मरूपेण भुवनानि वहते, बराहरूपेण पृथिवीमण्डलमुद्ध्वं नयते, नृसिंहरूपेण हिरण्यकशिपुं दारयते, बामनरूपेण बलिं छलयते छलेन छद्मनात्मसात् कुर्वते, परशुरामरूपेण दुष्टक्षत्रियाणां नाशं कुर्वते, श्रीरामरूपेण रावणं जयते, बलभद्ररूपेण दुष्टदमनाय हलं धारयते, बुद्धरूपेण कारुण्यं विस्तारयते, कल्किरूपेण म्लेच्छान्नाशयते। एतेषामवतारित्वेन श्रीकृष्णस्य सर्वरसत्वं सिद्धम् । मल्लानामशनिर्नृणामित्याद्युक्ते अतएव एकादशभिः पदैः समाप्तिः।।

बुद्धो नारायणोपेन्द्रो नृसिंहो नन्दनन्दनः।
बलः कूर्मस्तथा कल्की राघवो भार्गवः किरिः।।
मीन इत्येताः कथिताः क्रमाद्द्वादशदेवताः।
इति भक्तिरसामृतसिन्धौ रसाधिष्ठातारः।।५।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

अथ गीतार्थमेव श्लोकेनोपनिबध्नन् उत्तरग्रन्थपरिपूरणाय नमस्करोति। वेदानिति। कृष्णाय, परमाद्भुतमत्स्याद्यवतारलीलाविष्कारेण सर्वचित्ताकर्षकाय तुभ्यं स्वयं भगवते नमः। नमस्करोमि। अद्भुतलीलाविष्कारकत्वमाह दशानां दशविधावताराणां श्रीमत्स्यादीनामाकृतीः करोतीति कृत्, तस्मै। तदेव प्रपञ्चयति। मत्स्यरूपेण वेदानुद्धरते, कच्छपरूपेण जगन्ति भुवनानि पृष्ठे वहते, वराहरूपेण भूगोलं पृथ्वीमण्डलं उद्बिभ्रते, दन्ताग्रेण ऊर्ध्वं नयते, नृसिंहरूपेण दैत्यं हिरण्यकशिपुं दारयते विदारयते, वामनरूपेण बलिं छलयते, परशुरामावतारेण क्षत्राणां क्षत्रियाणां क्षयं नाशं कुर्वते, रामचन्द्ररूपेण पौलस्त्यं जयते, बलभद्रावतारेण हलरूपायुधं दुष्टनिग्रहाय कलयते धारयते बुद्धरूपेण

पशुषु कारुण्यमातन्वते, विस्तारयते, कल्किरूपेण म्लेच्छान् मूर्च्छयते, नाशयते, सर्वत्र वर्त्तमानार्थकशतृप्रत्ययान्तेन कृष्णस्य नित्यतल्लीलत्वं नित्यनायकगुणशालित्वं सूचितम्। नायकगुणा यथा **श्रीभक्तिसामृतसिन्धौ**,

अयं नेता सुरम्याङ्गः सर्वसल्लक्षणान्वित:।
रुचिरस्तेजसा युक्त: बलीयान् वयसान्वित:।।
विविधाद्भुतभाषावित् सत्यवाक्य: प्रियंवद:।
वावदूक: सुपाण्डित्यो बुद्धिमान् प्रतिभान्वित:।।
विदग्धश्चतुरो दक्ष: कृतज्ञ: सुदृढव्रत:।
देशकालसुपात्रज्ञ: शास्त्रचक्षु: शुचिर्वशी।।
स्थिरोदात्त: क्षमाशीलो गभीरो धृतिमान् सम:।
वदान्यो धार्मिक: शूर: करुणो मान्यमानकृत्।।
दक्षिणो विनयी ह्रीमान् शरणागतपालक:।
सुखी भक्तसुहृत्प्रेमवश्य: सर्वशुभङ्कर:।।
प्रतापी कीर्त्तिमान् रक्तलोक: साधुसमाश्रय:।
नारीगणमनोहारी सर्वाराध्य: समृद्धिमान्।।
वरीयानीश्वरश्चेति गुणास्तस्यानुकीर्त्तिता:।
समुद्रा इव पञ्चाशत् दुर्विगाह्या हरेरमी।।
जीवेष्वेते वसन्तोऽपि विन्दुविन्दुतया क्वचित्।
परिपूर्णतया भान्ति तत्रैव पुरुषोत्तमे।।
अथ पञ्चगुणा ये स्युरंशेन गिरिशादिषु।
सदा स्वरूपसम्प्राप्त: सर्वज्ञो नित्यनूतन:।।
सच्चिदानन्दसान्द्राङ्ग: सर्वसिद्धिनिषेवित:।
अथोच्यन्ते गुणा: पञ्च ये लक्ष्मीशानुवर्त्तिन:।।
अविचिन्त्यो महाशक्ति: कोटिब्रह्माण्डविग्रह:।
अवतारादी बीजं हतारिगतिदायक:।।
आत्मारामगणा: कर्षन्त्यमी कृष्णे किलाद्भुता:।
उक्ता: षष्टिमिता: वक्ष्ये साधारणचतुष्टयम्।।
सर्वाद्भुतचमत्कारलीलाकल्लोलवारिधि:।
अतुल्यमधुरप्रेममण्डितप्रियमण्डल:।।

त्रिजगन्मानसाकर्षी मूरलीकलकूजितः।
असमानोद्र्ध्वरूपश्रीविस्मायितचराचरः।।
लीलाप्रेम्णा प्रियाधिक्यं माधुर्यवेणुरूपयोः।
इत्यसाधारणं प्रोक्तं गोविन्दस्य चतुष्टयम्।
एवं गुणाश्चतुर्भेदाश्चतुःषष्टिरुदाहृताः इति।।

एषां गुणानां कतिचित् मात्रं श्रीमत्स्यादिषु वर्णितम्। अन्ये च सर्वे तथोन्नेयाः। अथ स पुनश्चतुर्विधः स्यात्। धीरोदात्तश्च धीरललितश्च धीरप्रशान्तनामा तथैव धीरोद्धतः कथित इति।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। वेदानुद्धरतेति; वर्त्तमानप्रत्ययेन भगवतः श्रीकृष्णचन्द्रस्य लीलावताराणां नित्यत्वं प्रतिपाद्यते, हे कृष्ण! तुभ्यं नमः। मीन-कच्छप-वराह-नृसिंह-वामन-परशुराम-राम-बलराम-बुद्ध-कल्कीरूपावतारि- श्रीकृष्णस्य विजयो भवतु। अत्र दशानामवताराणाम-भदेप्रतिपादनं दर्शितम्। छन्दः शार्दूलविक्रीडितं दीपकोऽलंकारः। मागधीरितिः देवादिविषया रतिर्भावः।।५।।

।। द्वितीयः प्रबन्धः / गीतम् २ ।।

।। गुर्जरीराग निःसार तालाभ्यां गीयते ।।

**१-श्रितकमलाकुचमण्डल धृतकुण्डल ए,**
**कलितललितवनमाल, जय जयदेव हरे।।१।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१।। ग्रन्थारम्भे विध्नविघातार्थं पुनरपि मङ्गलप्रीत्या हरिं स्तुवन्नाह।। मङ्गलगुज्जरी-रागेण गीयते।। ध्यानम्।

श्यामासुकेशी मलयद्रुमाणां
मृदूल्लसत्पल्लव तल्पयाता।
श्रुतेः स्वराणां दधीती विभागं
तन्त्रीमुखाद्दक्षिणगुज्जरीयम्।।

हे हरे! हे देव! जयजयेति सर्वत्र वाक्यार्थः। सम्मतौ द्विरुक्तिः। धृतकुण्डलत्वे कलितललित वनमालत्व च कारणमाह। श्रितकमलाकुचमण्डल इति सकामो हि सर्वेशः स्यादित्यभिप्रायः। धृते कुण्डले येन, कलिता धृता वनमाला येन। श्रित कमलाकुचमण्डलं येनेति विग्रहः।

"स्यान्मण्डलं द्वादशे राजके च
देशे च कम्पे च कदम्बके च।
कुष्ठप्रभेदेऽप्युपसूर्य्यकेऽपि
भुजङ्गभेदे शुनि मण्डलः स्यात्" ।। इति **विश्वः**।
'ललितं हारभेदे स्यादीप्सिते च मनोहरे' ।।१ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१ ।। इदानीं वर्ण्यमानं श्रीकृष्णं स्वरूपनिरूपणद्वारा मङ्गलगीतेन स्तौति। तत्रेदमाद्यं पदं ललितरागेण लघ्वादिताल इति आदिताले गीयते।। गीतमुद्राह्यते येन स उद्ग्राहः प्रकीर्तितः। आभोगस्त्वन्तिम इति ध्रुवत्वाच्च ध्रुवः स्मृतः।।"उद्ग्राहादिधातूनां विश्रामभूमित्वात्। अन्यानि च उद्ग्राहादिप्रतिरूपकाणि पदानीति प्रतिबोद्धव्यम्। एवमन्यास्वष्टपदीषु ज्ञेयम्।। श्रितकमलेति। अत्र ए "काराद्यालापो ज्ञेयः। जय जय देव हरे" इत्यत्र ध्रुवः। श्रितं कमलायाः कुचमण्डलं येनं स तथा तस्य संबोधनम्। धृते कुण्डले येन स तथा तस्य संबुद्धिः। "इति एतदन्ते रागपूर्त्यै गानवेलायां प्रतिपदं एतावत्पदम्। जय जय देव हरे" इति सर्वत्र ध्रुवपदम्। कलिता धृता ललिता मनोहरा आर्द्रा क्लिन्ना वनमाला पुष्पदाम येन। वनमभसि कानने इति तज्जन्यत्वात्पुष्पाणि कमलानि वा तेषां माला।।१ ।।

## (३) जगद्धरकृत-सारदीपिका

।।१ ।। कविरिदानीं गुर्जरीरागेण कृष्णं स्तौति रागलक्षणं श्यामासुकेशीमलयद्रुमाणां मृदूल्लसत्पल्लवतल्पयन्तीं श्रुतेः स्वराणां दधतीं विभांगतंत्रिमुखाद्दक्षिणगुर्जरीयम् इति श्रीतेति हे देव! हे हरे! जय जय स्वभक्तपक्षपाते सर्वोत्कर्षेण! वर्तस्व श्रितेत्यादीनि सप्तपद्यानां पदानि सम्बोधनानि ज्ञातव्यानि ए इति पदं हे इत्यर्थे हे श्रितकमलाकुचमण्डल श्रितम् आश्रितं कमलायाः लक्ष्म्याः कुचमण्डलं स्तनमण्डलं येन हे धृतकुण्डल! धृते कुण्डले येन तस्य सम्बोधने कलितेति कलिता धृता ललिता सुन्दरवनमाला पुष्पदाम येन।।१ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१ ।। पूर्वं केलयो जयन्तीत्युक्त, केलिश्च नायकोत्कर्षं विनां न संभवति। तस्मात्समस्तनायकचूडामणेर्भगवतः श्रीकृष्णदेवस्य लोकोत्तरगुणान्वर्णयन्नेव मङ्गलान्तम्माचरति; श्रितेति। गीतस्यास्य गुर्जरी रागस्तालश्च प्रतिमंठः। गीतार्थस्तु; हे हरे! जय। जय जयेत्यादरे द्विर्वचनम्। इदं तु ध्रुवपदम्। नायकगुणानाह, श्रितेति। श्रितमाश्रितं

कमलायाः कुचमण्डलं येन। लक्ष्मीप्रियत्वेन धनाढ्यत्वमपि सूचितम्। प्लुतमात्रे प्रवृतिः स्याद्यत्र ताले निरन्तरम्। प्रतिमंठः "स विज्ञेयो ह्यद्भुते गीयते तु सः"।। कीदृश ? एतद्विशेषणद्वयेन सेव्यत्वमुक्तम्। कमला श्रीर्हरिप्रिया **इत्यमरः**। "कुचौ स्तनौ" इति च। "आपादलम्बिनी माला वनमालेति तां विदुः" विश्वः। "पत्रपुष्पमयी माला वनमाला प्रकिर्तिता"।।१।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१।। एवं दशावतारानुपवर्ण्य तन्मध्ये स्वकृतिनायकं श्रीकृष्णं विशेषेण वर्णयति। श्रितेति। अटताली। गुज्जरीरागेण गीयते। इत्युक्तः तस्यायमभिप्रायः। मालवरागानन्तरं तत्कलत्रभूतायाः गुज्जर्य्याः सन्निधानं युक्तमिति। यदुक्तं,

श्यामा सुकेशी मलयद्रुमाणां
मृदूल्लसत्पल्लवकल्पमात्रा।
श्रुतेः स्वराणां दधती विभागं
तन्त्रीमुखी दक्षिणगुज्जरीयम्।। इति ।।

तत्र जयेत्यादि ध्रुवपदम्। कमला लक्ष्मीः "कमला श्रीर्हरिप्रिये**त्यमरः**"। तस्याः कुचौ तयोर्मण्डलं प्रदेशः अग्रभाग इत्यर्थः। श्रितं सेवितं गृहीतमित्यर्थः। आहिताग्न्यादिष्विति निष्ठायाः पूर्वनिपातः। लक्ष्मीकुचप्रसारितकराग्रभाग इत्यर्थः किं च धृते कुण्डले कर्ण्णाभरणे येन तस्य सम्बुद्धिः। हे तादृश केशव! जय भक्ताभोष्टदायकः सन् सर्वोत्कर्षेण वर्त्तस्वेत्यर्थः भक्त्यतिशयद्योतनार्थ द्विरुक्तिः सम्भ्रमेण वा अत्र सकृदेकवर्णावृत्तिलक्षणश्छेकानुप्रासो नाम शब्दालङ्कारः।।१।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१।। गुर्जरीरागः प्रतिमठतालः। रागलक्षणम्, 'श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसतपल्लवतल्पजाता।श्रुतेः सुराणां दधती विभागं तन्त्रीमुखाद्दक्षिणगुर्जरीयम्।।' पुनरपि मङ्गलगीतेन हरिं स्तौति, हे देव स्वप्रकाशकरूप हरे बन्धहारिन्! जय जय, संसारसमुद्रपतितजनोद्धारेण सर्वोत्कृष्टो वर्धस्वेति सर्वत्रान्वितम्। आदरेण वीप्सा, यथा नमो नमस्ते शिवायेत्यादि। ग्रन्थस्य श्रृङ्गाररसप्राधान्यप्रतिपादनाय प्रथमं श्रृङ्गारित्वेन हरिं स्तौति श्रितेति। श्रितम् आलिङ्गनमर्दनादिना सेवितं कमलाकुचमण्डलं लक्ष्म्याः स्तनविम्बं येन। अन्योऽपि द्वादशराजकरूपं मण्डलं सेवित एवेति। पुनः कीदृश ? धृतकुण्डल धृते परिधृते कुण्डले येन एतादृशः। पुनः कीदृशः ? कलिता धृता ललिता

मनोहरा वनमाला येन एतादृश इति विशेषणद्वयेन नागरवेशो दर्शितः। 'स्वान्मण्डलं द्वादशराजकेऽपि देशे च विम्बे च कदम्बके चे'ति **विश्वः**। 'आपादप्रबलां मालां वनमालेति तां विदुरिति शाश्वतः।।१ ।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।१ ।। एवं पूर्वोक्तकेलिप्रतापवर्णनेन [६]दशाकृतिकृते कृष्णायेति यत्प्रोक्तं तदेव गोप्यन्तरक्रीडाकथनेन दर्शितम्। इदानीं सकलनायकचूडामणेः [१]श्रीकृष्णचन्द्रस्य समस्तनायककलाविशेषान् वर्णयितुमपि च [२]व्रजवध्वः स्वयूथकेलिं कारयितुं [३]श्रीकृष्णं नायकं देवत्वेन स्तुवन्तीति मङ्गलान्तरं श्रितकमलेति गीतेन दर्शयति। गीतस्य गुर्जरीरागः [४]रागलक्षणम्, श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसत्पल्लवतल्प[५]याना। [६]श्रुतेः स्वराणां दधती विभागं [७]तन्त्रीमुखाद्दक्षिणगुर्जरीयम्।। इति।। [८]ग्रन्थबाहुल्यभयात्तालक्षणं नोक्तम्। गीतस्यायमर्थः। हे देव! कन्दर्पद्योतक हे हरे! सकलजनमनोहर जय जय। [९]केल्यर्थं नायकोत्कर्षमाविष्कुरु। आदरे [१०]द्विर्वचनम्। इदं ध्रुवपदम्। नायकगुणानाह; श्रितेति। पुनः कीदृश ? हे श्रितकमलाकुचमण्डल! श्रितं आश्रितं [११]स्वसौभाग्यसौन्दर्य-माधुर्यातिशयार्थं वरस्त्रीः लक्ष्मीर्वा [१२]या सा कमला; वरस्त्रीः श्रीराधा, तस्याः [१३]कुचयोर्मण्डलं समग्र कुचप्रदेशो येन तत्सम्बुद्धिः श्रितं राधाया कुचमण्डल यस्येति वा [१४] कमु कान्तामिति वा। कान्तिं लाति आददाति सा कमला राधा[१५]। गौरपीनस्निग्धवर्तुलत्वात् तत्सौभाग्यशोभाप्राप्त्यर्थं यां लक्ष्मी [१६]र्वरस्त्री [१७]श्च सेवत इति भावः अनेनालौकिको वरनायकगुण उक्तः। [१८]पुनः कीदृशः ? धृतकुण्डल ए। धृते स्वीकृते [१९]कुण्डले कर्णाभरणे येन; सत्सम्बोधनम्। ए इत्यतिहर्षे। अनेन पूर्वक्रीडायां ताद्विस्मृतमित्युक्तम्[२०]। पुनः कीदृश ? कलितेति। कलिता कण्ठे धृता अतिमनोहरा वनमालाऽऽपादलम्बिनी रत्नमयी वा येन। यद्वा कलितानि [१]ललितानि मनोहराणि शृङ्गाररसचेष्टितानि यस्यां [२]सा; [३]ईदृग्विधा वनमाला यस्येति। [४]अथ [५]वा कलिता धृता राधासखीनां स्वेदोत्पन्ना वनस्य जलस्य माला पङ्क्तिर्यस्मिन्। [६]अथ वा कलिता प्रक्षिप्ता [७]रासरसमहोत्सवे[८]व्रजवल्लवीभि[९]र्ललिता[१०]कुङ्कुमकर्पूररासगन्धादिभिर्मनोहरा वनमाला यस्य। [११]अतो नृत्यखेदोत्पन्नश्रमजल [१२]बिन्दुक्लिन्नामपि मालां प्रेयसीभिर्दत्तेयं (इति) मत्वा [१३]अतिवल्लभत्वात् न त्यजतीति भावः। उक्तं च,

प्रियेण [१४]सङ्ग्रथ्य विपक्षसन्निधावुपाहितां वक्षसि पीवरस्तने।
[१५]स्रजं न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुनि।।

इति **भारविः**। **(किरा-८.३७)** [१६] अनेन नायकस्याखिलविलाससम्पत्प्रिया-कौशलञ्चोक्तम्। पक्षे श्रितमाश्रितं कमलायाः लक्ष्म्याः कुचयोर्मण्डलं कुचाग्र [१७]भागो येन तत्सम्बुद्धिः। अनेन लक्ष्म्याः [१८]केलिकौशलेन रतिकेलिकौशलरूपो नायकगुण उक्तः। लक्ष्म्याश्रयत्वेन धनाढ्यगुणः सूचितो [१९]नायकस्य। धृतकुण्डल कलितललित-वनमाल[७] इति पदद्वयेन नायकस्य [२०]भव्यत्वं सौभगत्वं च सूचितम्। शेष समानम्। मण्डल राजचक्रे स्याद्विम्बे च स्वरमण्डले। [२१]कान्ताकुचप्रदेशे च मण्डलं वर्तुलेऽपि च। इति **विश्वः** [१](१०५.८१) कुचौ स्तनाविति वा। आपादलम्बिता माला वनमालां [२]जगुर्बुधाः इति [३]"**विश्वः**"। [४]कमलाश्रीवरस्त्रियों इति "**विश्व**": (१०५. ५३)।।१।।

१.गुर्जरीरागेण मङ्गलवृत्तेन मण्टतालेन गीयते-च. २.प्रतिमण्ठताले-ब.प्रतिमण्ठताले-ब. परिमण्ठताले-फ.ह.ज. ३.शृत-अ.ब. ४.भङ्ग्यकथनात्-च. ५.नास्तीयं पुष्पिका-च.ब.दशावतारक्रति-ग.

१.कृष्णस्य-ग. २.वृजध्वःस्वप्रथकेलिं-फ. ३.श्रीकृष्णं नायकगुणकदम्बत्वेन-इ.फ.ग.श्रीकृष्णनायक-गुणकदम्बत्वेन-ह.ज. ४.താललक्षणम्-अ. ५.याता-इ.फ.ग.ह.ज. ६.श्रुतिः-अ.ब. ७.तन्त्रीमुखा दक्षिणगुर्जरीयम्-ग.ह.ज.तन्त्रोन्मुखा दक्षिणगुर्ज्जरीयम्-फ. ८.ग्रन्थबाहुल्यात्तालक्षणं-अ.ब. ९.स्वकेल्यर्थं-फ.स्वल्पार्थ-ग. १०.वीप्सा-ग.द्विवचनम्-ह. ११.स्वसौभाग्यातिशयार्थं-अ.स्वसौभाग्यसौन्दर्यतिशयार्थं-फ. १२.यया सा-अ.ब. १३.कुचप्रदेशो-अ.ब.कुचमण्डलाश्रितो यो मण्डलसमग्रकुचप्रदेशो-ज. १४.तः. १५.पर्यन्तो भागो नास्ति-ग.फ. १६.वरस्त्री सेवत इति भावः-फ. १७.स्वसैव। कुण्डले कर्णाभरणे-अ.ब. १८.तः २०.पर्यन्तं नास्ति-ग. १९.पुष्पनिर्मितकुण्डले-इ.फ.पुष्पनिर्मिते कुण्डले-ह.ज.

१.धृतानि ललितानि-ह. २.नास्ति-इ.फ.ग.ह.ज. ३.तादृग्विधा-इ.फ.ग.ह.ज. ४.यद्वा-ग. ५.अदोत्पन्नवनमालापङ्क्तिर्यस्मिन्-अ. ६.यद्वा-ग. ७.रासावसरे समहोत्सवे-ग. ८.ब्रजवधूभिः-इ. ९.वलिता-फ. १०.कुङ्कुमकर्पूरागरुसुगन्धा-इ.फ.ग.ह.ज.कुङ्कुमकर्पूरागरुगन्धा-ग. ११.अत्यानृत्य-त्खेदोत्पन्न-ग. १२.बिन्दुनामुपमालां-अ.बिन्दुभिन्नामपि-फ.श्रमजलस्य बिन्दुक्लिन्नामपि-ज. १३.नास्ति-ब. १४.सङ्ग्रथ्यवुपक्ष-अ.सङ्ग्रभ्यविपक्ष-ब. १५.श्रजं-अ. १६.अनेननायिकाखिलविलास-सम्पत्प्रियाकौशलञ्चोक्तम्-ब.इ.फ.ग.अनेननायकाखिलविलाससम्पत्प्रिया- कौशलञ्चोक्तम्-ह.ज. १७.तः१९.पर्यन्तं नास्ति-फ. १८.केलिकौशलरूपो-अ.ब.ह.ज. २०.भव्यत्वं सूचितमिति-फ.भव्यत्वं सौभगत्वं च सूचितमिति-इ.ग..ह.ज. २१.कन्याकुच-फ.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।१।।[५]इदानीं गुर्जरीरागेण कृष्णं स्तौति। [६]रागलक्षणम्-

श्यामा सुकेशी[७]मलयद्रुमाणां मृदूल्लसत्पल्लव [८]तल्पयोगात्।
श्रुतेः स्वराणां दधती विभागं तन्त्रीमुखा दक्षिणगुर्जरीयम्।।इति।।

(तालक्षणम्-)

[९]प्लुतमात्रप्रवृत्तिः स्याद्यत्र ताले निरन्तरम्।
प्रतिमण्ठःस शृङ्गारे सानन्दो गीयते रसे।।

श्रितेति। हे देव! हे हरे! जय जय स्वपक्षपाते सत्वो(र्वो)त्कर्षेण[१०]वर्धस्व। श्रितेत्यादीनि [११] सप्तपदीपदानि सम्बोधनानि ज्ञातव्यानि; [१२]ए इति पदं हे इत्यर्थे। हे श्रितकमलाकुचमण्डल श्रितमाश्रितं कमलायाः लक्ष्म्याः कुचमण्डलं [१३]स्तनमण्डलं येन। हे धृतकुण्डल धृते [१४]कुण्डले येन। [१५]हे कलितेति। कलिता [१६]धृता [१७]ललिता सुन्दरी वनमाला पुष्पदाम येन।।१ ।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।१ ।। प्रवर्जितारिग्रहांशन्यासा षाडविका मता।
कदाचिदवरोहे सा पयुता गुर्जरी भवेत्।।
दिनस्य प्रथमे यामे गेया सा गानकोविदैः।।

ध्रुवः प्रथमं व्याख्यायते। हे देव! हे हरे! जय जय। वीप्सायां सन्तोषोत्कर्षेण वसेति सूचितम्। दशमात्रात्मकमिदम्। पदानि त्रिंशन्मात्राणि। एकं दलमष्टादशमात्रकम्। अन्यद्द्वादशमात्रकम्। ए इति रागपूर्त्यर्थम्। श्रितं आश्लिष्टं कमलायाः लक्ष्म्याः कुचमण्डलं येन तत्सम्बुद्धिः धृते कुण्डले येन तत्सम्बुद्धिः। कलिता पिनद्धा ललिता विचित्रतया गुम्फिता वनमाला आपादप्रसृतपुष्पमाला येन तत्सम्बुद्धिः।।१ ।।

१.स्यान्मण्डलंद्वादशराजके च देशे च बिम्बे च कदम्बके च। कुष्ठप्रभदेऽप्युपसूर्यकेऽपि भुजङ्गभेदे शुनि मण्डलःस्यात्-विश्वः २.विदुर्बुधाःइ.फ.ग.ह.ज.३.नास्ति विश्वकोशे४.कमला श्रीर्हरिप्रिया **इत्यमर**ः-ग.५.कविरिदानीं-क.ल.म.६.तत्र लक्षणम्-क.७.मदन-ल.म.८.ताल्पयाताम्-ल.म.नास्ति-ड.१३.नास्ति-ड.१४.मकराकारकुण्डले-क.१५.नास्ति-क.ल.म.१६.नास्ति-ड.ल.म.१७.नास्ति-ड.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१ ।।इदानीं ग्रन्थकरणारम्भे विघ्नविनाशाय मङ्गलगीत्या पुनरपि हरिं स्तौति। मङ्गलं गुर्जरीरागेण गीयते। तल्लक्षणं यथा, ''श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसत्पल्लव-तल्पमध्ये।श्रुतेः स्वराणां दधती विभागं तन्त्रं मुखाद्दक्षिणगुर्जरीयम्।।'' **श्रितेति**। हे देव! त्वं जय जय। शरणागतजनरक्षकत्वेन सकलोत्कृष्टतया वर्तस्वेति सर्वत्र पदे पदे योजनीयम्। जय जयेति उक्त्यतिशयप्रतिपादनार्थं द्विरुक्तिः। यथा गोविन्दाय नमो नमः।आदरद्योतनाय वा तद्विशेषणानि यानि सम्बोधनद्वारा निर्दिशति। धृतकुण्डलत्वे

कलितललितवनमालत्वे[७] च कारणमाह, **श्रितकमलाकुचमण्डलेति**। सकामो हि सुवेश: स्यादित्यभिप्राय:। धृते कुण्डले येन, कलिता धृता ललिता मनोहरा ईप्सिता वा वनमाला येन; श्रितम् आश्रितं कमलाकुचमण्डलं येनेति विग्रह:। मण्डलाकारत्वात् मण्डलम्। ''स्यान्मण्डलं द्वादशराजके च। देशे च बिम्बे च कदम्बके च।। कृष्ण(कोष्ठे) प्रभेदेऽप्युपसूर्यके च'' इति विश्व:। ''ललितं हावभेदे स्यादीप्सिते च मनोहरे'' इति **विश्व**:।।१।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।१।। अथ तनैव सर्वोपास्यत्वेऽपि ध्येयविशेषत्वं वदनभूम्न: श्रीकृष्णस्य सर्वनायकशिरोरत्नताप्रतिपादनाय धीरोदात्तत्वाादिचतुर्विध-गुण-समन्वयेन सर्वोत्कर्षा-विर्भावनं प्रार्थयते श्रितकमलेत्यादिभि:। गीतस्यास्य गुर्ज्जरीरागोनि:सारताल:। तल्लक्षणं यथा, 'श्यामा सुकेशी मलयद्रुमाणां मृदुल्लसत्-पल्लवतल्पजाता। श्रुते: स्वराणां दधती विभागं तन्त्रीमुखाद्दक्षिणगुर्ज्जरीयम्।' द्रुत द्वन्द्वालघुद्वन्द्वं नि:सारं स्यादिति। तत्र परमव्योमनाथत्वेन धीरललितत्वमाह। श्रितमाश्रितं लक्ष्म्या: कुचमण्डलं येन हे तादृश! अनेन विदग्धत्वपरिहासविशारदत्वप्रेयसीवशत्वनिश्चिन्तत्वानि सूचितानि। अतएव धृते कुण्डले येन हे तादृश ! धृता सुन्दरी वनमाला येन हे तादृश! अनेन विशेषणद्वयेन नवतारुण्यं तेनैव वेशविन्याससिद्धे:। हे देव! हे हरे! जय उत्कर्षमाविष्कुरु। इति सर्वत्र योजना निष्पाद्याह विशेषेण जय जय देवहरे इति ध्रुवपदम्। 'विदग्धो नवतारुण्य: परिहासविशारद:। निश्चिन्तो धीरललित: स्यात् प्राय: प्रेयसीवश:।' इत्यपि तत्रैव धीरललितलक्षणम्।।१।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१।। चतुर्विधनायकगुणसमन्वयेन सकलनायकशिरोमणिं तमेव श्रीकृष्णं स्तौति, श्रितकमलेत्यादिना गीतेन। गुज्जरीरागेण गीयते। अत्र मालवस्य प्रियाभूताया: गुज्जरीरागिण्यास्तत्सन्निधानावस्थानं युक्तमिति कवेरभिप्राय:। तथा चोक्तं ''गुण्डक्रिया गुज्जरी च गौरी मालवयोषित:'' इति। तस्या: स्वरूपं यथा,

श्यामा सुकेशी मलयद्रुमाणां मृदुलसत्पल्लवतल्पयाता।
श्रुतिस्वराणां दधती विभागं तन्त्रीमुखी दक्षिणगुज्जरीयमिति।।

तत्र प्रथमं निजोपास्यं श्रीव्रजेन्द्रनन्दनं धीरललितत्वेन स्तुवन्नाह श्रितेति। हे देव! विविधाश्चर्यक्रीडापरत्वेन द्योतमान: अत एव हे हरे। सर्वचित्तहर। त्वं जय, जय, सर्वोत्कर्षमाविष्कुरु। अत्यादरेण वीप्सा। क्रीडापरत्वमाह श्रितेति। अत्र कमला श्रीराधैव। सर्वलक्ष्मीमयीत्युक्ते:, वरस्त्रीत्वेन वा ''कमला श्री वरस्त्रियो'' रिति **विश्व**:।

श्रितमाश्रितं मकरिका लेखनादिना सेवितं राधाया: कुचमण्डलं येन हे तथाविध। अनेन विदग्धत्वं परिहासविशारदत्वं प्रेयसीवशत्वं निश्चिततत्वं च सूचितम्। कीदृश। धृते कुण्डले मकराकृतिमणिमयकर्णभूषणे येन हे तादृश। कलिता वक्षसि धृता ललिता सौन्दर्यसौगन्ध्यादिगुणै: मनोहरा वनमाला येन हे तादृश। आभ्यां विशेषणाभ्यां नवतारुण्यं च तदवस्थायामेवाङ्गमण्डनस्य औचित्यात्। ''पत्रपुष्पमयी माला वनमाला पदावधि:'' इति वनमाला लक्षणम्। धीरललितलक्षणं तु;

''विदग्धो नवतारुण्य: परिहासविशारद:।
निश्चिन्तो धीरललित: स्यात् प्राय: प्रेयसीवश:।।'' ।।१।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१।। श्रितकमलाकुचमण्डलेति; अत्र मङ्गलगीतेन भगवन्तं स्तौति। राणाकुम्भ-कर्णमतानुसारं ललितरागेण लघ्वादिताल इति आदिताले गीयते।। गीतमुद्ग्राह्यते येन स उद्ग्राह: प्रकीर्तित:। आभोगस्त्वन्तिम इति ध्रुवत्वाच्च ध्रुवस्मृत:। उद्ग्राहादि धातूनां विश्रामभूमित्वात्। अन्यानि च उदग्राहादि प्रतिरूपकाणिपद्यानीति प्रतिबोद्धव्यम्। एवमन्यास्वष्टपदीषु बोद्धव्यम्। ए इत्यत्र आलाप इति ज्ञेय:। जयजयदेवहरे इति ध्रुव:। श्यामा सुकेशी मलयद्रुमाणां मृदुलसत्पल्लवतल्पयाता।

श्रुतिस्वराणां दधती विभागं तन्त्रीमुखी दक्षिणगुज्जरीयमिति।।

हे देव तव जयोऽस्तु। त्वं कमलाया: कुचमण्डलं स्तनपर्यन्तमाश्रित्य कुण्डलादिपरिधाय सुन्दर: दृश्यसे। सुवासित: वनमालां त्वद्वक्षसि प्रलम्बिता अस्ति। ललिता तु आर्द्रा क्लिना च। राणाकुम्भस्य वनमालाशब्दस्य वनमभसिकानेनेति तज्जन्यत्वात् पुष्पाणि कमलानि वा तेषां माला। परन्तु "आजानुलम्बिता माला वनमाला प्रकीर्त्तिता " इति कोषवचनात् भगवत: श्रीकृष्णस्य प्रलम्बितां मालां व्यपदिशति एव।।१।।

**२-दिनमणिमण्डलमण्डन भवखण्डन ए।**
**मुनिजनमानसहंस जय जयदेव हरे ।।२।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२।। दिनमणिमण्डलमण्डत्वेन हरे: परमपुरुषत्वम्। यदुक्तं,"ध्येय: सदा सवितृमण्डल मध्यवर्त्तीति" परमपुरुषश्च सुजनैरेव चिन्तयितुं शक्य इत्याह। मुनिजनमानसहंस इति रूपकमिदम्, यथा मानस-सरोवरे सदा हंसस्तिष्ठति, तथायं मुनिजनहृदये तिष्ठतीत्येदर्थप्रतिपादनार्थं शिष्टार्थस्य मानसशब्दस्योपादानम्। कथमयं मुनिजनैश्चिन्त्य इत्याह। भवखण्डनेति। भवं पुनर्जन्म खण्डयतीत्यर्थे नन्द्यादित्याल्यु: मुक्तिप्रद इति कृत्वा मुनिजनैरसौ सर्वदा चिन्त्यत इत्यर्थ:।।२।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२।। दिनमणीति अत्रालापो बोद्धव्यः। मुनिजनेति। हे दिनमणिमण्डलमण्डन भानुमण्डलालंकरण! सवितृमण्डलमध्यवर्तित्वात्। तस्य संबुद्धिः। हे भवखण्डन संसारच्छेदक। **नन्दिग्रहि- (पा. ३/१/१३४)** इत्यादिनां ल्युः। ए इति नागपदम्। मुनिजनेत्यादि ध्रुवः। मुनिजनानां मानसानीव मानसानि तेषु हंस इव हंसः। अथः मुनीनां मानसे ध्येयत्वाद्धंसः परंब्रह्म। मुनिमानस इति वक्तव्ये जनग्रहणं लोकपर्यायः। जनो लोक इति पर्यायेत्यभिधाने यावन्तो मुनय इति।।२।।

## (३) जगद्धरकृत-सारदीपिका

।।२।। दिनमणीति हे दिनमणि! मण्डलमण्डन सूर्यमण्डलालङ्कार हे भवखण्डन! भक्तानां संसारनाशक हे मुनिजनमानसहंस मुनिजनानां मानसहंस! इव मानसे सरसि हंसोऽस्ति जय जयेति पूर्ववत्।।२।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।२।। पुनः किद्दश ? दिनमणीति। दिनमणेः सूर्यस्य यन्मण्डलं तस्य मणडन हारभूत!। तथा च ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसंनिविष्टः इति पुराणोक्तवचनात्। एतेन स्थिरसखित्वमुत्कम्। पुनः कीद्दश ? भवं संसारं खण्डयतीति भवखण्डनः प्रलयकर्ता ताद्दश!। अनेन सामर्थ्यरूपो नायकगुण उक्तः। पुनः किंभूतः ? मुनिजनानां मानसं चितं तदेव मानसं सरोवरविशेषस्तत्र हंसो मराल!। अत्र मुनिजनमानसं स्वच्छत्वाद्धंसाश्रयत्वेन च साधारणधर्मेण मानससरोवरत्वेन निरूपितम्। भगवतश्च मुनिजनमानसेषु समुचितस्थिति मत्वा साधारणधर्मेण हंसत्वेन निरूपणम्। मानसं सरसि स्वान्ते इति विश्वः।।२।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।२।। धृतेति। धृते कुण्डले कर्णाभरणे येन तादृशः पुनः कीद्दशः ? कलिता धृता लम्बिता वनमाला मनोहरा चरणपर्यन्तावलम्बिनी पुष्पमाला येन ताद्दश!

दिनमणीति। दिनमणिः सूर्य्यः। "प्रद्योतनो दिनमणिरि**त्यमरः**" तस्य मण्डलं विम्बं "विम्बोऽस्त्री मण्डलं त्वि**त्यमरः**", तत्कल्पं मण्डनमाभरणं यस्य स तादृशः। दिवाकरवद्दीप्यमानभूषण इत्यर्थः। अथवा दिनमणिमण्डलस्य स्वावासभूत सूर्य्यमण्डलस्य मण्डनमलङ्कारः। स्वावासभूतसूर्य्यमण्डलप्रकाशक इत्यर्थः। तदावासत्वं च। "ध्येयः सदा सवितृमण्डलमध्यवर्त्ती नारायणः सरसिजासन सन्निविष्ट" इति वचनादवगन्तव्यम्। तस्य सम्बुद्धिः। अतएव भवस्य संसारस्य खण्डन, ज्ञानप्रदानेन

भक्तजनसंसारनिवर्त्तक, इत्यर्थः। अथवा भवस्य बाणासुरविजयसमये तन्मन्दिरावस्थित महादेवस्य खण्डन जृम्भशस्त्रप्रयोगेण तदङ्गविनिर्वापकेत्यर्थः। अथवा,

भवो भक्तजनस्य पुनर्जन्म तस्य खण्डन स्वभक्तानां पुनर्जन्मनिवारकेत्यर्थः। अतएव मुनिजनस्य मानसमन्तःकरणं मानससरश्च तत्र हंसः मरालः स इव विहारमाण इत्यर्थः। अथवा मुनीनां जनानां चेति वा विग्रहः। अथवा भवो भक्तः। मानसमिति श्लिष्टरूपकम्। अथवा मुनिजनमानसेषु हृदयेषु दिप्यमानेत्यर्थः। अत्र च्छेकानुप्रासरूप-कोपमाभेदानां संसृष्टिः।।२।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२।। मोक्षदायकत्वेन परमात्मस्वरूपं स्तौति। दिनमणिमण्डलं सूर्यविम्बः, तस्य मण्डन अलंकाररूप। मोक्षप्रदो विष्णुः सूर्यमण्डले वसतीति योगिभिश्चिन्त्यते। यदाह, 'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्ट' इत्यादि। पुनः कीदृश ? भवखण्डन ध्यायतां संसारदुःखखण्डन, अत एव मुनिजनमानसहंस मुनिजनानां नारदादीनां मानसे हृदये हंस परमात्मरूप। अन्योऽपि हंसो मानसे सरसि वसतीति युक्तरूपकम्। 'हंसो विहङ्गभेदे स्यात्परमात्मनि योगिनीति **विश्वः**।।२।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।२।। कर्तव्यव्रजयुवतिकदम्बलीला [१]प्रवर्तकान् नायकगुणानाह; दिनमणीत्यादिना। ए इति सादरसम्बुद्धौ। [२]दिनस्य मणिः प्रकाशकस्सूर्यः। मणेः [३]प्रकाशबहुलत्वं सिद्धमेव। तस्य यन्मण्डलं प्रकाशसमूहः [४]तस्य यन्मण्डनं श्रीराधासौन्दर्यं यस्य तादृशः श्रीराधाऽलङ्कारभूतः। एतेन [५]नायिकापक्षपातो ध्वनितः। पुनः कीदृशः ? हे भवखण्डन! भवस्य कन्दर्पस्य [६]खण्डनो [७]नाशकस्तत्सम्बोधनम्। कीदृशः ? मुनिजनमानसहंस[८] मुनिजनास्त्वच्चरणकमलसुभगसौन्दर्यमाधुर्यविचारशीलाः गोपीजनास्तेषां मानसमेव सरस्तत्र हंस मराल। [८]प्रसिद्धं मानससरसि हंसतुल्य इति भावः अनेन मनोहारित्वं प्रोक्तम्। पक्षे दिनमणेः सूर्यस्य मण्डलं [९]तेजस्समूहः तस्य मण्डन अलङ्कारभूतः। भवं संसारं खण्डयति [१०]नाशयतीति तादृश। एतेन नायकस्य गुणसामर्थ्यं ध्वनितम्। [११]पुनः मुनिजनानां ऋषीणां मानसं चित्तमेव सरः सरोवरस्तस्य हंसः। [१]अनेन नायकस्य [२]धूर्तत्वादिरहितत्वं स्वच्छहृदयप्रकाशकत्वञ्चोक्तम्। शेषं जयादिपदं समानम्। मानसं सरसि स्वान्ते इति **विश्वः** (१२१.२१)। हंसो विहङ्गमेऽपि स्यात्परमात्मनि योगिनि [३]इति च (**विश्वः** १२०.८)। मणडलं तु समूहे स्यान्मण्डलं राजमण्डले। मण्डलं

वर्तुले चैव तेजस्यपि च मण्डलम् इति **मेदिनीकार:**[४] (२८.१२१)। [५]परम्परित-रूपकालङ्कार:। तद्रूपम्,

नियतारोपणोपाय: स्यादारोप: [६]परस्य य:।
[७]तत्परम्परितं श्लिष्टे वाचके भेदभाजि च ।।इति।।२।।

१.प्रवर्तनाय नायकगुणानाह-ग.२.दिनस्य मणि: प्रकाशक:। सूर्यमणे: प्रकाशबहुलत्वं सिद्धमेव-ज.३.प्रकाशकबहुलत्वं-फ.प्रकाशबाहुल्यं-ग.४.तन्मणडलं-अ.ब.तस्य यन्मण्डलं-ग.५.नायका-अ.६.नास्ति-अ.७.नाशक-अ.ब.८.प्रसिद्धे मानससरसि हंसास्तिष्ठन्ति-ब.इ.फ.ग.ह.ज.९.नास्ति-अ.१०.नास्ति-ग.११.पुन: कीदृश-फ.ज.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।२।। दिनमणीति हे [८]दिनमणिमण्डलमण्डन! सूर्यमण्डलालङ्कारभूत। हे [९]भवखण्डन! भक्तानां [१०]संसारनाशक। हे [११]मुनिजनमानसहंस! मुनिजनानां मानसे [१२]मनसि हंस इव। मानसे सरसि हंसोऽस्ति। जय जयेति पूर्ववत्।।२।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।२।। (दिनमणीति।) दिनमणि: सूर्य: तस्य मण्डलवत् मण्डनानि भूषणानि ग्रैवेयादीनि यस्य तत्सम्बुद्धि:। भास्वरत्वरूपसादृश्यधर्मवाचक-पदाभावाल्लुप्तोपमालङ्कार:। यद्वा सूर्यमण्डलस्य मण्डनं भूषणम्;, तस्मिन् स्थितत्वात्। ध्येयस्सदा सवितृमण्डलमध्यवर्ती इति वचनात् भवस्य संसारस्य खण्डन: छेदक:, तत्सम्बुद्धि:। मुनिजनानां मानसमेव अन्त:करणमेव मानससर: तस्य हंस:, तत्सम्बुद्धि:। तेषां मनस्सु स ध्येयत्वेन विद्यमानत्वात् अन्त: करणस्य सरस्त्वारोपनिमित्तकहंसत्वारोप: श्लेषसंवलित इति श्लिष्टपरम्परित- रूपकालङ्कार:।।२।।

१.इति अनेन-ग.२.धूर्तादि-अ.ब.इ.फ.ग.अनेन नायक धूर्तादि-ह.अनेन नायके धूर्तादि-ज.३.हंसो विहङ्ग मेदे स्यादर्के विष्णौ हयान्तरे। योगिमन्त्रादि भेदेषु परमात्मनि मत्सरे।। विश्व:४.मण्डलं परिधौ कोठे देशे द्वादशराजसु। क्लीबेऽथ निवहे बिम्बे त्रिषु पुसिं तु कुक्करे।। **मेदिनी** ५.परंपरिचितरूपकालंकार:-अ.ब.इ.फ.ग.ह.ज.६.परस्पर:-फ.७.परंपरिचितो-अ.तत्परं-परिचितो-ब.ज.तत्परंपरितोक्तिष्टे-फ.ह.तत्परंपरिक्लिष्टे-ग. तत्परं परिचितो क्लिष्टे-इ.८.नास्ति-ड.दिनमणिमण्डल-ल.म.९.नास्ति-ड.१०.बन्धनाशक-ल.११.नास्ति-ड.१२.सरसि हंसोऽस्ति;जय जयेतिपूर्ववत्-ल.मनसि हंस इवा मानसे सरसि हंसोऽस्ति;जय जयेति पूर्ववत्-म.मनसि हंसोऽसि। जय जयेति-क

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२।। दिनेति । दिनमणि: सूर्य:, तस्य मण्डलं मण्डयतीति। ''क्रुधमण्डार्थेभ्यश्च'' इति युच्। दिनमणिमण्डलस्य मण्डन इति वा। ''सूर्योगभस्तिहस्तश्च हेलिर्दिनमणिर्मत:''

इति **संसारावर्त्तः**। दिनमणिमण्डलमण्डनत्वेन हरेः परमपुरुषत्वम्। यदुक्तम्; ''ध्येयस्सदा सवितृमण्डलमध्यवर्त्ती'' इति। परमपुरुषश्च सुजनैरेव चिन्तयितुं शक्य इत्याह; मुनिजनमानसहंस इति मुनिजनानां मानसं मनः, तदेव मानसं सरः निर्मलत्वात् तत्र भगवान् हंस इव हंसः। यथा मानसे सरसि सदा हंसस्तिष्ठति तथायं मुनिजनहृदये चिन्त्यमानः हंसरूपेण तिष्ठत्येतदर्थं शिलष्टार्थस्य मानसशब्दस्योपादानम्। परम्परितरूपकमिदम्। ''नियतारोप-णोपायः(पणप्रायः)स्यादारोपः परस्य यः। तत्परम्परितश्लिष्टेऽर्थः तेन भेदभाजि वा।।'' इति। ''मानसं सरसि स्वान्ते'' इति **मेदिनी**। ''हंसः स्यान्माननौकसि, निर्लोभनृपविष्ण्वंके परमात्मन्यमत्सरे'' इति च। कथमयं मुनिजनैश्चिन्त्यते इत्याह; खण्डनेति। खण्डनः भवस्य पूनर्जन्मनः खण्डनो मोक्षप्रद इति कृत्वा मुनिजनैरसौ सर्वदा चिन्त्यते इत्यर्थः। दिनमणिमण्डलमण्डनेत्यस्य दिनमणिमण्डलमिव मण्डनमाभरणं यस्येति व्याख्या कैश्चिदभिधीयते, मण्डनस्य रत्नमयत्वाभास्वरत्वाच्च।।२।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।२।। अथ सूर्यमण्डलान्तर्धेयत्वेन धीरशान्तत्वमाह। सूर्यमण्डलं पूज्यत्वोपपादनेन मण्डयति भूषयतीति हे तथाविध! जय इति क्लेशसहनत्वं विनयादिगुणोपेतत्वं च। अतएव मननशीलानां मानसहंस। मानसे सरसि हंस इव सदा तच्चित्ते स्थित इत्यर्थः। अतएव समप्रकृतिकत्वं विनयादिगुणोपेतत्वं च। तेन तत्संसारं नाशयतीति हे तादृश इति विवेचकत्वम्। धीरशान्त लक्षणं च तत्रैव समप्रकृतिकः क्लेशसहनश्च विवेचकः। विनयादिगुणोपेतो धीरशान्त उदीर्यते।।२।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२।। धीरप्रशान्तत्वेन स्तौति। दिनमणीति। दिनमणिः सूर्यः तन्मण्डलस्य तेजः पुञ्जीभूतस्य मण्डन। अलङ्कारभूत। त्वयैव सूर्यः शोभितः इति भावः। अनेन क्लेशसहनत्वम्। पुनःकीदृश। मुनिजनानां मननशीलयोगिनां मानसमेव मानसं मानससरः, तस्मिन् हंस(८)। हंस इव विहरसि। ते सदा त्वां ध्यायन्तीत्यर्थः। उक्तं च-

'ध्येयः सदा सवितुर्मण्डलमध्यवर्त्ती, नारायणः...' इत्यादि। अनेन शमप्रकृतिकत्वं विनयादिगुणोपेतत्वं च। तत्र ध्येयत्वे हेतुः भवमण्डन। ध्यानवतां तेषां जन्ममरणादिक्लेशस्य ध्वंसनेत्यर्थः। अनेन विवेचकत्वम्। लक्षणन्तु;

''शमप्रकृतिकः क्लेशसहनश्च विवेचकः। विनयादिगुणोपेतः धीरशान्त उदाहृतः।।'' इति ।।२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। दिनमणीति; हे दिनमण्यां सूर्यमण्डलस्य शोभाय ! विष्णुः सूर्यमण्डलमध्यमणि-विराजितः।

धेयः सदा सवितृमण्डलमध्यवर्त्ती नारायणः सरसिजासनसन्निविष्टः।

केयूरवान्मकरकुण्डलवान् किरिटीहारी हिरण्मयवपुधृतशंखचक्रः।।

अत्र आदित्यरूपनारायणः मध्ये मणि इव विराजमानोऽस्ति। यतो हि नारायणः विष्णुरादित्यरूपेणापि विष्णुसूक्तेऽपि प्रपञ्चितम्। **गीतायामपि**, आदित्यानामहं विष्णुः(१०/२१ )इत्युक्तमस्ति। मुनयः खलु तेषां त्रिसन्ध्यायां सूर्यनारायणाय स्तुवन्ति। स सूर्यः हंस इव वियन्मध्ये सन्तरति। स एव विष्णुः। सूर्यस्य सवितारूपः विष्णुरूपश्च, ऋग्वेदे

आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च। हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन्।।१/३५/२इति।

अपि वैदिके सूक्ते दधिक्रा अघमर्षणसूक्तप्रसंगे उक्तमस्ति। **ऋग्**-४/४०/१ अपि च ४/४०/५ मन्त्रे

हंसः शुचिषद् वसुरन्तरिक्ष सद्धोता वेदिषदतिथिर्दूरोणसत्। तद्वद् विष्णोरवतारवर्णने सूर्यस्य तेजः वीर्यमोजः प्रभृतयः मन्त्रेऽस्मिन् वर्तते।। अतः मुनीनां मानसाकाशे हंस इव सन्तरति सः। यस्य स्मरणमात्रेण मृत्युसंसारसागरादिति वचनात् भवभयस्य विनाशाय सम्भवति। अत्र ए इति आलाप इत्युक्तम्, ए इति विस्मयसूचकमव्ययम्। कुत्रचित् ए स्थाने हे इति पाठान्तरमप्यस्ति।२।।

**३-कालियविषधरगञ्जन जनरञ्जन ए।**

**यदुकुलनलिनदिनेश जय जयदेव हरे ।।३।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३।। कालियनामा विषधरः सर्पस्तस्य गञ्जनेन जनरञ्जनता यमुनाजलस्य स्वेच्छयाऽवगाहनात्। यदुकुलनलिनदिनेश इति ययातिशापेनास्तंगतस्य यदुवंशस्य प्रकाशनात् यदुकुलमेव नलिनं तस्य प्रकाशत्वात्।। कृष्णो दिनेश एव इति रूपकमिदम्। यदुक्तं,"उपमैव तिरोभूतभेदा रूपकमुच्यते"।।३।।

कालियेति। कालियाख्यस्य विषधरस्य सर्पस्य गञ्जनं भञ्जन हिंसकेति यावत्। गजि हिंसायामित्यस्मान्नन्द्यादिना ल्यु प्रत्ययः। अतएव जनानां रञ्जन आल्हादकर

अतएव यदुकुलमेव नलिनं कमलं तस्य दिनेश: सूर्य्य:, यदुकुलकमलोल्लासहेतु-भूतेत्यर्थ:। दुष्टनिग्रह शिष्टपरिपालनमस्य वंशकेतुत्वादितिभाव:।।३ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३ ।। कालियेति। अत्रालापो यदुकुलेति। हे कालियाभिधसर्पदमन! तद्धातिस्वाज्जन-रञ्जन! बालेन महाबलेन महाविषधरदमनाज्जनानामाह्लादोऽभूत्। हे यदुकुलनलिनादिनेश! यदुकुलं नलिनीमिव तत्प्रकाशकत्वात्सूर्य इव। अत्र पूर्वपूर्वस्योत्तरोत्तरं प्रति हेतुभाव इति ध्रुव:।।३ ।।

## (३) जगद्धरकृत-सारदीपिका

।।३ ।। कालियेति कालियनाम्न: सर्पस्य गञ्जनं हिंसक हे जनरञ्जन! यदुकुलेति यादवकुलकमलसूर्य।।३ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।३ ।। पुन: कीदृश: ? कालियेति। कालियनाम्नो विषधरस्य गञ्जन: तिरस्कारक!। अनेनातिसामर्थ्यमुक्तम्। पुन: कीदृश: ? जनरञ्जनेति। जनान्मधुरवचनादिना रञ्जयतीति जनरञ्जन!। अनेन शुभवचनत्वं नायकगुण उक्त:। पुन: कीदृश: ? यदुकुलेति। यदुकुलमेव नलिनं कमलं तस्य दिनेश: सूर्य:, प्रकाशकत्वात्। एतेन कुलीनत्वं नायकेऽप्युक्तम्। आशीविषो विषधरश्चेको व्याल: सरीसृप: **इत्यमर:**। वा पुंसि पद्मं नलिनम् इति च।।३ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।३ ।। कलियेति। कलियस्य बिषधरस्य सर्पस्य भञ्जन हिंसन इति यावत्। अत एव जनानां रञ्जन आह्लादकर। अत एव युदकुलमेव नलिनं कमलं तस्य दिनेश सूर्य। यदुकुलकमलोल्लासहेतुभूतेत्यर्थ:। दुष्टनिग्रहशिष्टपालनक्षमस्य वंशहेतुत्वादिति भाव:।।३ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।३ ।। सर्वलोकोपकारित्वं दर्शयन् कालियदमनरूपिणं स्तौति; हे कालियविषधरगञ्जन जनरञ्जन जनानामानन्ददायक, दु:खनिवारकत्वात्, हे यदुकुलनलिनदिनेश यदो: कुलं यदुकुलम्, तदेव निर्मलत्वात् नलिनमिव, तत्र दिनेश प्रकाशकत्वात् सूर्यवदिति रूपकालंकार:।।३ ।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।३।। अन्यदप्याहु: कालियेत्यादिना। कालिय: सर्प [१]स्तदाकृति: कुण्डलीभूतो बन्धस्तस्य गञ्जन [२]सम्मर्दक। बन्धलक्षणञ्चोक्तम्,

यत्रोपरि स्थिता पुंस: कान्ताऽऽलिङ्गनलालसा।
वेष्टयत्य [३]ङ्गमङ्गेन भोगिबन्ध: स कथ्यते।।इति।

हे जनरञ्जन जनान् [४]भक्तान् स्वकौशलादिना रञ्जयति। एतेनालौकिक गुणो नायकस्य लक्षित इति। न हि [५]सर्वजनोऽत्यल्पसामथ्येन रज्यते। [६]अथ वा जन: श्रीराधासखीजन:। [७]वाङ्माधुर्यादिना रञ्जन [८]रतिप्रद। एतेन [९]नायिकादृढप्रवणत्वमनुकूलत्व [१०]ञ्चोक्तम्। हे यदुकुलनलिन [११]दिनेश यदुकुलं नाम गोपकुलमेव; [१२]गोपकुलमेव नलिनं तस्य दिनेश सूर्य। एतेन कुलीन [१३]सर्वप्रकाशनायकगुणो लक्षित:। उक्तं च पद्मपुराणे यादवानां हितार्थाय [१४]धृतो गोवर्धनाचल इति। पक्षे पुन: कीदृश ? हे कालियविषधरगञ्जन कालियनाम्नो विषधरस्य [१५]सर्पस्य गञ्जन गर्वनाशक। [१६]अनेन [१७]क्लेशहारित्वमुक्तम्। हे जनरञ्जन जनान् गोवर्धनोद्धरणादिना मधुरसम्भाषणादिना च रञ्जन सुखप्रद। अनेन [१८]क्लेशरक्षणत्वं शुभवचनत्वं [१९]च नायकगुण उक्त:। यादवानां कुलमेव नलिनं कमलं तस्य दिनेश सूर्य एतेन कुलीनत्वं यादव[२०]सौभाग्यञ्चोक्तम्। आशीविषो विषधरश्चक्री व्यालस्सरीसृप: **इत्यमर**: (१.७.७)। वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् [३]**इत्यमर**: (१.९.४०)। उत्प्रेक्षाऽयमलङ्कार:। [४]अन्यत्समानम्।।३।।

१.तद्वदावृ़ति:-इ.फ.ग.ह.ज. २.मर्दक-ज. ३.अङ्गसङ्गेन-इ. ४.नास्ति-ग.भक्तजनान्-ज. ५.सर्वजनमल्पं-इ.ग.ह.ज. ६.यद्वा-ग. ७.तेषां वाङ्माधुर्यादिना-ज. ८.प्रद:-ब. ९.नायका-अ. १०.च प्रोक्तम्-इ.फ.ह.ज.प्रोक्तम्-ग. ११.दिनेस-अ. १२.नास्ति-अ.ब.ग.ज. १३.सर्वत्र-ब. १४.धृतं गोवर्धनाचलमिति-ग. १५.नास्ति-अ. १६.अनेनाऽपि-इ.फ.ग.ह.ज. १७.क्लेशापहारित्वमुक्तम्-ग. १८.क्लेशापहारित्वं क्षणत्वं शुभवचननायकस्य गुणोक्त:-ग. १९.नास्ति-अ.ब. २०.सौभाग्यत्वं-अ.ब.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।३।। कालियेति। कालियनाम्न: सर्पस्य गञ्जन हिंसक। जनरञ्जन भक्तरञ्जक:। यदुकुलेति। यादवकुलकमलसूर्य।।३।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।३।। (कालियेति।) कालियविषधर: सर्पस्तस्य गञ्जन: मर्दक: तत्सम्बुद्धि:। अत एव जनरञ्जन। कालियनि:सारणेन यमुनाह्रदस्य जन सेव्यत्वं कृतमिति पदार्थहेतुककाव्यलिङ्गालङ्कार:। यदुकुलमेव नलिनं कमलं तस्य प्रकाशकत्वाद्दिनेश: सूर्य:, तत्सम्बुद्धि:। अश्लिष्टपरम्परितरूपकालङ्कार:।।३।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।३।। कालियेति। कालियनामा कालिन्दीह्रदनिवासी कश्चित्सर्पस्तस्य गञ्जनेन जनरञ्जनता। यमुनाजलस्य स्वेच्छयावगाहनात्। यदुकुलनलिनदिनेशेति ययातिशापेनास्तंगतस्य यदुवंशस्य प्रकाशनात्। यदुकुलमेव नलिनं तस्य प्रकाशकत्वात् कृष्णो दिनेश एवेति रूपकम्। यदुक्तं,''उपमैव तिरोभूतभेदा रूपकमिष्यते। तच्च परंपरितरूपकं विज्ञेयं दिनेशशब्दस्य भेदभाक्त्वात्।।३।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।३।। निजोपास्यत्वेनापि ध्येयविशेषत्वेन धीरोद्धतत्वमाह द्वाभ्याम्। कालियनामा विषधरः सर्पस्तस्य गञ्जनेन, 'विना मत्सेवनं जनाः' इतिवत् जनान् ब्रजजनान् रञ्जयतीति हे जनरञ्जन! किमिति तान् रञ्जयामीत्याह-यदुकुलनलिनं तस्य दिनेश सूर्य इव। यादवानां 'हितार्थाय धृतो गिरिवरो मया' इत्यादि वचनाद्गोपा एव यादवा, अतो गोकुलप्रकाशक इत्यर्थः। कालियेति मात्सर्यवत्त्वं जनरञ्जनेति यदुकुलेति च अहंकारित्वं अहन्तया ममतया च जनरञ्जनादिसिद्धेः। धीरोद्धतलक्षणं च मात्सर्यवानहङ्कारी मायावी रोषणश्च यः। विकथतश्च विद्वद्भिर्धीरोद्धत उदाहृतः।।३।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।३।। धीरोद्धतत्वेन स्तौति। कालियेति द्वाभ्याम्। कालियसंज्ञो विषधरः सर्पस्तस्य गञ्जन। अहं महाविषधर इति तस्य यो गर्वः तस्य निर्वापण इत्यर्थः। अनेन मात्सर्यवत्त्वं चलत्वं च। पुनः कीदृशजनानां नृत्यकलाद्यभिज्ञनिजवयस्यजनानां रञ्जन। तत्फणामण्डलनिःशङ्कनर्त्तनचातुरीकौशलदर्शनेन तेषां पूर्वतोऽप्यधिकतमं त्वयि मनोऽनुरक्तं जातमित्यर्थः। अनेनाहंकारित्वम्। अहन्तया विना रञ्जनासिद्धेः। पुनः कीदृश। यदुकुलं श्रीनन्दादिगोपसमूहः तदेव नलिनं पद्मं तस्य दिनेश। सूर्यः। तस्य उल्लासकेत्यर्थः।।३।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।। कालियविषधरेति; कालियनामधेयस्य विषधरसर्पस्य उपद्रवविनाशकस्तथा गोपजनस्यानन्दवर्द्धकः नन्दनन्दनः यदुवंशस्य सूर्य इव विजयताम् पक्षान्तरे भयङ्कर रूपस्य कालिय नाम कालान्धाकारस्य विनाशकः सूर्यरूपस्य कृष्णस्येति अपरार्थः।।३।।

**४-मधुमुरनरकविनाशन गरुडासन ए।**

**सुरकुलकेलिनिदान जय जयदेव हरे ।।४।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४।। गरुड़मारुह्य दैत्यान् विनाश्य देवताक्रीड़ां विष्णु प्रावर्त्तयदिति वस्त्वर्थः। मधुमुरनरकान् विनाशयतीति। गरुड़ आसनं यस्येति विग्रहः। सुरकुले केलीनां निदानमादिकारणमिति विग्रहः।।४।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। मधुमुरेति। अत्रालापःसुरेति। मधुमुरनरकान्विनासयति यस्तस्य संबोधनं; हे सुरकुलकेलिनिदान असुरवधात्तत्कारणत्वम्।। इति ध्रुवः।।४।।

## (३) जगद्धरकृत-सारदीपिका

।।४।। मधुमुरेति। मधुमुरनरकसंज्ञानां दैत्यानां नाशन! गरुडाशन! गरुड एव अशनं यस्य सः। सुरकुलेति। सुरकुलानां देवसमूहानां केलेः क्रीडायाः सुखस्येति यावत् निदान! आदिकारण!।।४।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।४।। पुनः कीद्दश ? मधुमुरेति। मधुनाम्नो मुरनाम्नो नरकनाम्नो दैत्यस्य विनाशन विनाशकारिन्! अनेनापि सामर्थ्यमुक्तम्। पुनः कीद्दश ? सुरकुलकेलीनां देवसमूहक्रीडानां निदान आदिकारण! अनेनापि सामर्थ्यमुक्तम्। सुरो देवः इति **विश्वः**। "सजातीय गणे गोत्रे देहेऽपि भणितं कुलम्" इति च। "निदानं त्वादिकारणम् **इत्यमरः**" ।।४।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।४।। मध्विति। मधुमुरनरकासुरविशेषास्तेषां विनाशन, अथवा नरकशब्दस्तन्त्रवृत्त्या नरकासुरनिरयावाचष्टे सकृदाचरितमनेकोपकारकं तन्त्रमिति तद्विदः। तथा चायमर्थः। मधुमुरनरकाणां नरकस्य देवर्षिवाधया भविष्यतो निरयस्य नाशन निवर्त्तकः। कृष्णकृतनिधनेनैव तेषां नरकपात निवर्त्तनात्तस्य तन्निवर्त्तकत्वमवगन्तव्यम्।

किं च गरुड़ः सुपर्णः स एवासनं वाहनं यस्य तस्य सम्बुद्धिः। एतच्च मध्वादिनाशन सामर्थ्यसूचनार्थमवगन्तव्यम्। अतएव सुराणां देवानां कुलं समूहस्तस्य केलयः श्रृङ्गारचेष्टास्तासां निदानमादिकारणं "निदानं त्वादिकारणमित्यमरः"।

पूर्वं सुरकामिनीषु सुरविरोधिभिर्वन्दीकृतासु सुराणां शृङ्गारचेष्टाभावात्पश्चा-द्भगवता गरुडबाहनेन कृष्णेन तेषु सुरविरोधिषु निःशेषं निर्वापितेषु सुराणां निर्विघ्नचेष्टानां

सम्भवात्तस्य तन्निदानत्वमितिभावः। निधानेति केषुचित् पाठः। तदा निधीयन्तेऽत्रेति निधानं सुराः स्वपदमनित्यमिति मत्वा नित्यपदसिद्ध्यर्थं सर्वं परित्यज्य हरावेव क्रीडन्तीति तस्य निधानं त्वमिति भावः। अनेन देवेन्द्रादिसकलदेवतासाम्राज्य परिपालकत्वमुक्तमिति ज्ञेयम्। अत्र देशान्तरे शमयोरभेदादनुप्रासोपपत्तिरवगन्तव्या ।।४ ।।

### (६) शुक्लध्वजनृपतिकृत-सारवती

।।४ ।। अस्मदादिविघ्ननिवारणे ईषत्करत्वं सूचयन् मधुमुरनरकविनाशं स्तौति; हे मधुमुरनकविनाशन ! मधुश्च मुरश्च नरकश्चेति मधुमुरनरकाः, तेषां विनाशन घातक। तेषां विनाशे सामग्रीमाह; गरुडासनः गरुडः पक्षिराजः आसनं वाहनं यस्य तादृश। गरुडमारुह्य तान् हतवान् इत्यर्थः। अत एव सुरकुलकेलिनिदान सुराणां देवानां कुलं समूहः, तस्य केलिः हासपरिहासादिः, तस्य निदान आदिकारण। द्रवकेलिपरिहासाः क्रीडा खेला च नम चे'त्यमरः। 'निदानत्वादिकारणमि'ति च।।४ ।।

### (७) वनमालिभट्टकृत-सञ्जीवनी

।।४ ।। [५]अपरमप्याहुः, मधुमुरेत्यादिना। [६]ए इति सर्वत्रानन्दसम्बोधनं ज्ञातव्यम्। मधौ वसन्ते [७]मुराः, मुर वेष्टने धातुः, अभिमतार्थप्रदा वृक्षाः। नराणां कं सुखं याभ्यस्ता लताश्च, ये वयः पक्षिणस्तानपि न आशयति व्यापारयतीति [८]नाशनः तादृश। [९]अश भोजने, अशु व्याप्तौ, निषेधार्थं[१०] नकारः। समासत्वा[११] न्नलोपाभावो वेति केचित्। स्ववंशी-[१२]स्वरं श्रृण्वतां [१३]वृक्षलतापक्षिणां [१३]भोजनभोगतृष्णाव्यापारं हतवान्। [१४]किं पुनर्मनुष्याणामिति भावः। हे[१५]गरुडासन। [१६]एतेन गरुडबन्ध उक्तः। काम **सर्वस्वे कोकशास्त्रे** तल्लक्षणम्,

पक्षवद्बाहयुगलं विपरीतरते प्रिया।
धुनोति यत्र कूजन्ती [१]स प्रोक्तो गरुडाकृतिः।।इति।।

हे सुरकुलकेलिनिदान देवानां कुले केलीनां निदान आदिप्रवर्तक। नितरां [२]रसप्रद इति वा। [३]यमपेक्ष्य सुरकुलस्य केलौ स्पृहा भवतीति भावः। पक्षे मधु नाम्नो मुरनाम्नो नरक [४]नाम्नो [५]दैत्यस्य [६]विनाशक। सुरकुलकेलीनां देवकुलसमूहक्रीडानां निदान आदिकारण। तदुद्भव [७]कारण इति यावत्। अनेन नायकस्य देवक्रीडाविशिष्टसौन्दर्य-कुशलादयश्च गुणा उक्ताः। [८]मधुर्वसन्ते मधुनि मधुरेऽप्यसुरेऽपि च इति मेदिनीकारः। मुरोऽसुरेऽथ [९]स्वजनाभिमतार्थ[१०]प्रदेऽपि च इति [११]**विश्वः**। कं ब्रह्मणि सुखे वाऽपि जले ब्रह्माण्डकेऽपि च। [१२]त्रिदशा विबुधाः सुराः**इत्यमरः** (१.१.७.)। निदानं

त्वादिकारणं चेति (अमर:-१.३.२८) निदानं कारणे प्रोक्तं विनाशे निश्चयेऽपि च इति [१३]भोजे।।४।।

१.सुर-अ.२.गरुडशन-अ.३.इति च-इ.फ.ग.ह.ज.४.शेषं-इ.५.अपरमथाहु:-ग.६.यदुस्तातिसर्वत्र-ब.७.नास्ति-फ.८.नाश-अ.ब.नाशन-फ.ह.ज.९.अश् भोजने असूङ् व्याप्तौ-ग. असुभोजने अशङ्व्याप्तौ-ह.असुभोजने अशुङ्व्याप्तौ-फ.असुभोजने अशुञ्व्याप्तौ-ज.असुभोजने अशुन् व्याप्तौ-इ.१०.नलोपाभावोनैकधेतिवत्-ब.इ.फ.ग.ह.ज.११.स्वं-इ.फ.ग.ह.ज.१२.तलसलता-ब. तरुलता-इ.फ.ग.ह.ज.१३.भोजनं भोगतृष्णाव्यापारं-फ.भोगतृष्णा व्यापारं-अ.ब.१४.किं पुनर्मनुष्याणामिति-ग.१५.नास्ति-अ.ब.१६.त:

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।४।। मध्विति। मधुसुरनरकसंज्ञिकानां दैत्यानां नाशक। गरुडासन गरुड एव आसनं यस्य। सुरकुलेति। सरकुलानां देवसमूहानां केल्या: क्रीडाया: सुखस्येति यावत्; निदान आदिकारण।।४।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।४।। (मध्विति।) मधुदैत्यश्च मुरश्च नरकश्च तेषां विनाश घातुक:। मधोस्संहारे पूर्वावतारे कृतेऽपि कृष्णावतारे कथनं वेगवद्गरुडेऽपि निश्चलतारोहणव्यञ्जनार्थम्। सुराणामिन्द्रादीनां केलि: क्रीडा तस्या निदानं आदिकारणं तत्सम्बुद्धि:। तत्परिपन्थि मध्वादिदैत्यसंहारकत्वात्। अत्रापि पूर्ववत्काव्यलिङ्गम्।।४।।

१.पर्यन्तं नास्ति-ग.२.रसप्रदे-ब.३.यमप्रक्ष-अ.यमपैक्ष-ब.४.नास्ति-फ.५.नास्ति-इ.फ.ग.ह.ज.६.नाशस्य-अ.७.कारक-इ.प.ग.ह.ज.८.मधुर्वसन्ते मधुरे मधुन्यपिति सुखैति-ब.९.सुजना-ग.१०.प्रदेति च-अ.११.वैजयन्ती-इ.फ.ग.ह.ज.१२.सुरो देव **इत्यमर**:-इ.फ.ग.ह.नास्ति-ज.१३.नास्ति-इ.फ.ग.ह.ज.१४.निदानमादिकारणम्-क.ल.म.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।४।। मध्विति। मधुमुरनरकान् असुरान् विनाशयतीति नन्द्यादित्वात् ल्यु:। गरुड एव आसनं यस्येति विग्रह:। सुरकुलस्य देवव्यूहस्य या केलि: क्रीडा तस्या: निदानमादिकारणमिति विग्रह:। ''निदानं त्वादिकारणम्'' **इत्यमर**:। गरुडमारुह्य दैत्यान् विनाश्य देवताक्रीडां विष्णु: प्रावर्तयदित्यत्र वस्त्वर्थ:।।४।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।४।। तस्यैव द्वारकाद्युपास्यत्वेनाप्याह। मधुमुरनरकान् विनाशयतीति हे तथाविध! गरुड: पक्षिराज: स एव आसनं यस्य हे तादृश! सुरकुलकेलीनां निदानं आदिकारणं हे तादृश! एतैर्मायावित्वादिचतुष्टयम्।।४।।

**(१२) लक्ष्मणकृत-रसिकरङ्गदा**

।।४।। आदौ कालियह्रदपतनदर्शनेन मूर्च्छितानां श्रीनन्दादीनां पुनः तत् तत् फणानर्त्तनादिना तद्गञ्जनं दर्शयित्वा तेषामानन्दजनकेत्यर्थः। गोपानां यदुत्वं यथा **पाद्मे;** ''यादवानां हितार्थाय धृतो गिरिवरो मया'' इति। मधुश्च मुरश्च नरकश्च इति नामभिः प्रसिद्धा येऽसुराः तेषां विनाशक। अनेन मायावित्वं रोषणत्वं विकत्थनत्वं च । एतैः विना तेषां मारणस्यासम्भवात्। पुनः कीदृशः। गरुडः, पक्षिराजः, स एवासनं वाहनं यस्य, हे तादृश! अत एव सुरकुलस्य इन्द्रादिदेवतासमूहस्य केलीनां निदान। आदिकारणभूत। मध्वादि असुरेषु विनासितेषु देवानां नैश्चिन्त्येन केलिसम्पादनात्। 'निदानं त्वादि कारणम्' इति **अमरः**। लक्षणं यथा-

''मात्सर्यवानहंकारी मायावी रोषणश्चलः ।
विकत्थनश्च विद्वद्भिर्धीरोद्धत उदाहृतः।।'' इति।।४।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।४।। मधुमुरेति; मधु-मुर-नरकेति दानवत्रयस्य विनाशकारिन्। हे गरुडारोहिन्! त्वम् एतेषामसुरनिधनेन देवानामानन्दवर्धकोऽसि। तव जयोऽस्तु।।४।।

**५-अमलकमलदललोचन भवमोचन ए।**
**त्रिभुवनभवननिधान जय जयदेव हरे ।।५।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।५।। विष्णुः पुण्डरीकाक्षः इत्यमलकमलदललोचन इत्युक्तम्। स च नित्यत्वाद्भवमोचनो भवति। भवं मुञ्चतीति कृत्वा, त्रिभुवनाश्रयोऽप्यसौ भवतीति त्रिभुवनभवननिधानेत्युक्तम्। त्रिभुवनं भवनं गृहं येषां तत्र जनप्रभृतयस्तेषां निधानं यः।।५।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।५।। अमलेति। अलापः; त्रिभुवनेति। अमलकमलदले इव लोचने यस्य स तस्य संबुद्धिः। अपरं च, हे भवमोचन हे संसारमोचन! अथवा, भवं जन्म तस्मान्मोचनरूप जीवनत्रातः। हे त्रिभुवनभवननिदान हे त्रिलोकीसमुत्पत्यादिकारण। इति ध्रुवः।।५।।

**(३) जगद्धरकृत-सारदीपिका**

।।५।। अमलेति। अमलकमलवत् निर्मलपद्मपत्रवत् लोचने यस्य भवमोचन संसारभञ्जक त्रिभुवनेति त्रिभुवनमेव भवनं गृहं तत्र निधानमिव निधिरिव ।।५।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५।। पुन: कीदृश ? अमलेति। भवमोचन भवो जन्म तस्मात्प्रपन्नान्मोचयतीति तादृश! मोक्षप्रदेत्यर्थ:। अत एव भवखण्डनेत्यनेनापौनरुक्त्यम्। यतस्तत्र भवपदस्य जगत्परतया प्रलयकारित्वमुक्तम्। अत्र तु भवपदस्य जन्मपरतया मोक्षप्रदत्वमुक्तमेव। अनेन मोक्षप्रदत्वेन परमानन्दरूपो नायकगुण उक्त:। पुन: कीदृश ? त्रिभुवनेति। त्रिभुवनमेव भवतं गृहं तदेव निधानं वासस्थानं यस्य तादृश!। यद्वा, त्रिभुवने निधानमिव महाधनम्। "दलं पर्णं छद: पुमान्" **इत्यमर**:। "भवनं भाववेश्मनो:" **इत्यमर**:। "निधानं त्वालये निधै" इति विश्व:।।५।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५।। अमलेति। अमलं निर्मलं संकोचादि दोषरहितं यत्कमलं पुण्डरीकं तस्य दलं पर्णं छद: पुमानित्यमर:। तद्वल्लोचने यस्येति मध्यपदलोपी समास:। कमलपत्रविशालपुण्डरीकाक्षेत्यर्थ:। किंच, भवस्य संसारस्य मोचन निवर्त्तक, भक्तानां सकलसंसारदु:खनिवर्त्तकेत्यर्थ:। अथवा भवशब्दस्तन्त्रेणोपात्त:। हलन्त्यमितिवत्। तथा च स्वभक्त महादेवस्य भव: कन्था करिधानादि संसारस्तस्य मोचन निवर्त्तक, अनेन भगवत: श्रीकृष्णस्य सकलाराध्यत्वमउक्तं, महादेवस्य विष्णुभक्तत्वं च "प्रह्लादश्चाम्बरीषश्च वसुर्वायुसुत: शिव:।"

विश्वक्सेनोद्धवाक्रूरा: शुकाद्या: सनकादय:।
महाविष्णुप्रसादोऽयं सर्वे गृह्णन्तु वैष्णवा: ।। इति वचना,

दवगन्तव्यम्। अथवा भवत्यस्मादिति व्युत्पत्त्या भवौ जनकजनन्यौ "पुनान् स्त्रियेत्येकविशेष:।" तयो मोचनजनकजनन्यो: कंसकृतनिरोधनिबर्त्तकेत्यर्थ:। अथवा भवस्य जनकरूपवसुदेवस्य वा निर्बन्धनिवारकेत्यर्थ:। अत्र सर्वत्र पौरुषाधिक्यं गम्यते। किं च, त्रयाणां भुवनानां समाहारस्त्रिभुवनं "पात्रादित्वान्नङीप्।" त्रिभुवनस्य भवनमुत्पत्तिस्तस्यनिदान। भवनशब्दस्थितिलययोरप्युपलक्षणम्। तथाच, त्रयाणां मूलकारणमित्यर्थ:। अथवा त्रिभुवनमेव भवनं गृहं "भवनागारमन्दिरमि**त्यमर**:।" तस्य निदानं त्रिभुवनाख्यगृहनिर्मातेत्यर्थ:। निधानेति केषुचित् पाठ:। तदा त्रिभुवनस्य भबनमुत्पक्त्यिर्यस्मादिति त्रिभुवनभवन: ।। निधानवन्निधान:। यथा निक्षेप:। सर्वाशास्यो भवति तथाचायमपीत्यर्थ:। त्रिभुवनश्चासौ निधानश्चेति तस्य सम्बुद्धि:।।५।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५।। विश्वम्भररूपिणं स्तोति; हे अमलकमलदललोचन निर्मलपद्मपत्राक्ष। हे भवमोचन भवस्य जन्मन: मोचन नाशन! त्रयाणां भुवनानां समाहार: त्रिभुवनम्, तदेव भवनं

विविधजनाश्रयत्वाद् गृहमिव। तस्य निधानम् आश्रयः। अथवा तत्र निधानं निधिमिव आनन्दजनकत्वादिति केचित्। 'निधानं निधिरूपे स्यान्निवासे स्नानपानयोः' ।।५ ।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।५ ।।[१]अपरमप्याहुः; अमलकमलेत्यादिना। अमलं यत्कमलस्य दलं पत्रं तद्वल्लोचने यस्य तादृश। निर्मलकमल [२]कोशारक्तपत्रलोचन इत्यर्थः। अनेन [३]नायिकान्तर-सम्भोगमालिन्यं निरस्तम्। भवमोचन कामसन्तापनाशक। त्रिभुवनभवननिधान त्रिभुवनं भवनं यस्य [४]श्रीराधारत्नस्य तस्य निधान निधिविशेष। एतेन नायकगुणोत्कर्षः प्रतिपादितः। पक्षे अमलं यत्कमलं [५]तस्य [६]यद्दलं पत्रं तद्वल्लोचने यस्य। [७]अनेन मनोहरत्वं प्रोक्तम्। [८]भवस्य संसारस्य मोचन९निस्तारका [१०]यद्वा भवं जन्म [११]तस्माद्भक्तान् मोचयतीति तादृश। अनेन त्यागरूपो नायकगुण [१२] उक्तः। त्रिभुवनमेव भवनं मन्दिरं तदेव [१३] निधानं वसतिस्थानं यस्य तादृश। जयादिपदमुभयत्र समानम्। [१४]निधानं [१५] त्वालये प्रोक्तं निधानं तु निधावपि इति विश्वः। भवनं भाववेश्मयोः इति च (**विश्वः**-७५.२५)। पत्रं पलाशं छदनं दलं पूर्णं छदः पुमान् **इत्यमरः** (२.४.१४)। निधानमाकरे प्रोक्तं निधिभेदे स्थितावपि इति कोशसमुच्चये। अत्र स्तुतिरलङ्कारः।।५ ।।

१.अपरमथाहुः-इ.ग. २.कोशरक्तपत्रे-ग. ३.नायकान्तरमालिन्यं-अ. नायकान्त-रसम्भोगमालिन्यं-फ. ४.श्रीराधायत्नस्य तस्य निधानं इति विशेषः-अ.श्रीराधारलस्य तस्य तख्यनिधाननिधिविशेषे-ब. ५.६.न स्तः-अ.तस्य यत्पत्रं-ग.तद्दलं पत्रं-फ. ७.अनेनापि मनोहारित्वं प्रोक्तम्-ब.इ.फ.ह.ज.अनेनापि हारित्वं प्रोक्तम्-ग. ८.भोवस्य-अ. ९.विस्तारक-फ. १०.अथवा-ब.इ.फ.ग.ह.ज. ११.तस्मान्मोचयतीति-ग. १२.नास्ति-ग. १३.निदानं-ब. १४.निधानंत्वालये निधावपि-इ.ग.ह.ज. निधानं त्वालये निधाविति-फ. १५.त्वाभये-अ.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।५ ।।अमलेति। [१] अमलकमलदलवत् निर्मलपद्मपत्रवत् लोचने यस्य। भवमोचन संसार [२]भञ्जक। त्रिभुवनेति। [३]त्रिभुवनमेव भवनं गृहं तत्र निधानमिव निधिरिव।।५ ।।

## (९) कृष्णपण्डितकृत- जयन्ती

।।५ ।। (अमलेति।) अमलं निर्मलं कमलं पद्मं तस्य [४]दले इव लोचने यस्य तत्सम्बुद्धिः। भवमोचन संसारच्छेदक। त्रयाणां भुवनानां स्वर्ग[५]मर्त्यपाताललोकानां समाहारः तदेव भवनं गृहं तत्र निधानं सर्वाभिलाषविषयत्वात् तत्सम्बुद्धिः।।५ ।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५।। अमलेति। विष्णु: पुण्डरीकाक्ष इति। अमलकमलदललोचनेत्युक्तम्। दलयते: ''पचाद्यच्।'' यद्वा अमलं निर्मलं सद्यो जातमित्यर्थ:। यत् कमलदलं पद्मपत्रं तद्वत् लोचने यस्येति विग्रह:। स च नित्यत्वाद् भवमोचनो भवति। भवं मुञ्चतीति कृत्वा संसारव्यतिरिक्त इत्यर्थ:। यद्वा भवस्य संसारस्य मोचनो मोचयिता, भक्त जनं मोचयति संसारमिति (संसारादिति)। त्रिभुवनं स्वर्गमर्त्त्यपातालरूपं तदेव भवनं गृहं, तस्य निधानं निधायतेऽस्मिन्निति आधार इत्यर्थ:। त्रिभुवनाश्रयोऽप्यसौ भवति। किं वा त्रिभुवनस्य भवनम् उत्पत्तिस्तस्य निधानम्। ''निधानं निधिरूपे स्यात्, न्यासे च स्थानमानयो:'' इति पदसागर:। त्रिभुवनमिति। त्रयाणां भुवनानां समाहारस्त्रिभुवनम्। अकारान्तोत्तरपदो द्विगु:। ''स्त्रियां भाष्यत'' इति द्विगुसमासे स्त्रीत्वप्रतिपादनाय ङीपि प्राप्ते पात्रादित्वात् प्रतिषेध: इति।।५।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।५।। सर्वतापोपशमनपूर्वकसर्वाभीष्टपदतया देवसहायकरूपेण धीरोदात्तत्वमाह द्वाभ्याम्। निर्मलकमलदले इव तापशमके लोचने यस्य हे तादृश! जय इति। तादृशलोचनोपलक्षितगम्भीरत्वं कथं तापशमकत्वम्। अत आह; भवं संसारं मोचयतीति हे तादृश! इति करणत्वं तदपि कुत: त्रिभुवनानां भवनस्य निधानं निधिरिव कारणं जनक इत्यर्थ:। इति विनयित्वम्। धीरोदात्तलक्षणं यथा 'गम्भीरो विनयी क्षन्ता करुण: सुदृढ़व्रत:। अकत्थनो गूढ़गर्वो धीरोदात्त: सुसत्त्वभृत्।'।।इति।।५।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५।। धीरोदात्तत्वेन स्तौति, अमलेत्यादि द्वाभ्याम्। अमलं सद्यो विकसितं यत् कमलं तस्य दले पत्रे इव लोचने यस्य हे तादृश। अनेन विनयित्वं क्षन्तृत्वं च। हृदयस्थितभावस्य नेत्रादिना लक्ष्यत्वात्। पुन: कीदृश ।भवो महादेव:, तस्य मोचन। वृकासुरादिभ्यो रक्षकेत्यर्थ:। अनेन करुणत्वं गूढगर्वत्वं च। पुन: कीदृश, त्रिभुवनानां भवनं, उद्भव: तस्य निधानं निधिरिव जनकेत्यर्थ:। किं वा त्रिभुवनमेव भवनं मन्दिरं तदेव निधानं वसतिस्थानं यस्य तादृश 'भवनं गृहवेश्मनो'रिति विश्व:। अनेन गभीरत्वमिति।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। अमलेति; सद्यप्रस्फुटितपद्ममिव नयनं यस्य तव हे देव त्वं संसारबन्धनान्मोचकोऽसि। त्वमपि ब्रह्माण्डस्योत्पत्तिकारणोऽसि। तव जयोऽस्तु।। ५।।

**६-जनकसुताकृतभूषण जितदूषण ए।**
**समरशमितदशकण्ठ जय जयदेव हरे ।।६।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६।। सीतायाः कृतभूषण इति षष्ठी समासः। कथं सीतायाः कृतभूषणो राम इत्याह। जितदूषण समरे शमितदशकण्ठ इति जितमभिभूतं दूषणं सीताद्विषो येन इति विग्रहः। रावणं समरे हत्वा सत्यसती वेति किम्वदन्ती दूषणं सीताया वह्निविशोधनया व्यपसार्य्य जितदूषणो रामः इत्यभिप्रायः।।६।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६।। जनकेति। अत्रालापः समरेति। हे जनकसुताकृतभूषण जनकसुतायाः कृतं भूषणं येन। जितो दूषणो राक्षसो येन इति पदम्। हे समरशमितदशकण्ठ संहारितो रावणो येन इति ध्रुवः।।६।।

## (३) जगद्धरकृत- सारदीपिका

।।६।। जनकेति जनकसुतायाः सीतायाः कृतभूषणः कृतालङ्कारः जितो दूषणो नाम राक्षसो येन समरेति समरे संग्रामे शमितो मारितो दशकण्ठो रावणो येन।।६।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६।। पुनः कीद्दश ? जनकसुतेति। जनकसुताकृतभूषण जनकसुतायाः सीतायाः कृतानि भूषणानि मकरिकापत्रादीनि येन तादृश! अनेन सकलकलाकौशलरुपस्तारुण्यरूपश्च नायकगुण उक्तः। पुनः कीदृश ? समरे संग्रामे शमितो नाशितो दशकण्ठो रावणो येन सः।अनेन परमाभिमानिनो रावणस्य वधेनाभिमानरूपो नायकगुण उक्तः। रामावतार-पौरुषवर्णनेन रामगतक्षमारूपोऽपि नायकगुणः सूचितः। अस्त्रियां समरानिकरणाः **इत्यमरः**।।६।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६।। जनकेति। जनकसुताय कृतं भूषणं येन। असदृशप्रेमातिशयात् स्वस्य बालकर्त्तृत्वमवगन्तव्यम्। अथवा, जनकसुताया आकृतमाकारः भावे क्तः। तदेव भूषणं यस्य तादृश, वामाङ्कस्थितजनकसुताकारैकभूषणेत्यर्थः। अथवा, जनकसुतायै कृतं ब्रह्मणाचरितं तादृशं च भूषणं च तद्रूपब्रह्मणा जनकसुताभूषणत्वेन कल्पितेत्यर्थः उक्तं च बुधैः, ''पतिर्हि भूषणं स्त्रीणां भूषणादपि भूषणम्'' इति अथवा जनकसुताया कृतं चरितं भूषणं यस्मिन् तादृशं जनकसुतालङ्कृतालाङ्गेत्यर्थः। अथवा जनकसुतैवकृतं

भूषणं यस्य तादृश, जनकसुतैव भूषणेत्यर्थः तस्य सम्बुद्धिः। जितः दूषणाख्यो राक्षसो येन तादृश, अथवा जितं पराजितं दूषणं लोकसम्भावितं पित्राज्ञालंघनादि येन स तथा। अथवा, जितं दूषणं जनापवादादिकं येन स तथा। सर्वदा निष्कलङ्केत्यर्थः। समरे युद्धे शमितः मारितः दशकण्ठो रावणो येन तादृश, अथवा दशकण्ठ-शब्दस्तन्त्रेणोपात्तः। तथा च समरे शमिताश्छिन्ना दशकण्ठस्य दशकण्ठा दशकन्धरा येन तादृश, अस्मिन्पक्षे पौरुषाधिक्यं गम्यते।।६।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६।। श्रीरामचन्द्ररूपिणं स्तौति; हे जनकसुताकृतभूषण जनकसुतायाः कृतं भूषणम् अलंकरणं येन, जनकसुतया वा कृतं भूषणं यस्य। पुनः कीदृश ? जिनदूषण जितो दूषणनामा राक्षसो येन निष्पापेति वा। अपि किम्भूत ? समरशमितदशकण्ठ समरे युद्धे शमितो मारितो दशकण्ठो रावणो येन।।६।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।६।। [६]अपरमप्याहुः, जनकेत्यादिना। जनकसुताकृतभूषण जनानां कं सुखं जनयतीति जनको [७]वृषभानुस्तस्य सुता श्रीराधा तया तस्यां वा कृतानि [८]मकरिकापत्रतिलकादीनि भूषणानि यया येन वा। जनानां स्वसखीजनानां कं सुखं[९]सुतनोतीति[१०]जनकसुता राधा तया वा। [११]षूञ्प्राणिप्रसवे। जितानि [१२]स्वगुणश्लाघाकथननायिकोपरतिप्रभृतीनि दूषणानि येन। हे [१३]समरशमितदशकण्ठसमरे [१४]रतिसङ्ग्रामे शमिता नाशिता दशकण्ठा सुखशून्यदशावस्था येन तादृश। [१]तद्यथा,

> [२]चक्षूरागः प्रथमं [३]चित्तासङ्गस्ततोऽथ सङ्कल्पो
> निद्राच्छेदस्तनुता विषय [४]निवृत्तिस्त्रपानाशः।।
> उन्मादोऽप्यथ मूर्च्छा मृतिरप्येता दशावस्थाः।।

[५]एतेन सकलकला [६] प्रवीणादयश्च नायकगुणा उक्ताः। पक्षं पुनः क्रीदृश ? जनकसुताकृतभूषण जनकसुतायाः [७]सीतायाः कृतानि भूषणानि येन। [८]यद्वा जनकसुतया कृतं भूषणं यस्मिन्। एतेन तारुण्यसकलकलाप्रवीणनायकगुण उक्तः। पुनः कीदृश ? (जितदूषण) जितो दूषणो नाम राक्षसो येन। अथ वा जितानि स्वस्मिन् श्लाघातिरस्कारादीनि दूषणानि येन। अनेन नायकस्य शूरगुणो लक्षितः। पुनः (कीदृश ? समरशमितदशकण्ठ) समरे सङ्ग्रामे शमितो नाशितो दशकण्ठो रावणो येन [९] तथा। अनेना[१०]भिमानो नायकगुण [११] उक्तः। ''जनकः स्यात्तु पितरि सुखदे मिथिलेश्वरे'' इति **त्रिलोचनः**। ''दूषणो राक्षसे प्रोक्तो दूषणं खण्डनेऽपि च।'' [१२]''समरानीकरणाः कलहविग्रहौ'' **इत्यमरः**(२.८.१०४)।।६।।

१.नास्ति-ड.अमल-कमलवत्-ल.म.२.भर्जक-क. बन्धक-म.३.भुवनमेव-क.ल.म.४.दलेव - च.५.मृत्यु-च.६.अपरमथाहु:-इ.७.वृषभानुस्तत्करोतियवादत्वात्-ब.इ.ग.वृषभानुस्तत्करोतीति पचादित्वात्-फ.ह. वृषभानुस्तत्करोतीति यचादित्वात्-ज.८.कस्तूरिकापत्र-ग.९.सुतोतीति जनकसुता सीतया वा-अ.१०तनोतीति-ग.सुनोतीति-ह.ज.११.पुत्र प्राणिप्रसवे-ब.ज. षुतणि प्रसवे-फ.षुञ्प्राणि प्रसवे-इ.१२.गुण-अ.१३.शमर-अ.ब.१४.रतिरति-अ.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।६।। जनकेति। जनकसुताया: कृतभूषण कृतालङ्कार। जितदूषण जितराक्षस। यद्वा जितपाप। समरेति। [१३]समरे सङ्ग्रामे शमितो[१४] मारितो दशकण्ठो रावणो येन।।६।।

## (८)कृष्ण पण्डित-जयन्ती

।।६।। जनकसुतेति। जनकसुताया: कृतं भूषणं येन तत्सम्बुद्धि:। जित: दूषणाख्यखलमन्त्री येन तत्सम्बुद्धि:। समरे शमित: ध्वंसित: दशकण्ठो रावणो येन तत्सम्बुद्धि:।।६।।

१.तापुनदशा:-अ.ब.ता: पुनर्दश-फ.ह.ज.२.चतूराग:-अ.ब.३.चिन्ता-ब.फ.ग.४.निद्राप्ति-अ.ब.५.एतै:-इ.फ.ग.ह.ज.६.प्रवीणवीरादयश्य-इ.फ.ग.ह.ज.७.नास्ति-ग.८.जनक सुतया वा-इ.फ.ग.ह.ज.९.तत्तथा-ह.ज.१०.अभिमानि-ग.अभिमानी-अ.ब.इ.ह.ज.११.प्रोक्त:-ब.इ.फ.ग.ह.ज.१२.समरानीक **इत्यमर**:-ब.इ.फ.ग.ह.ज.१३.नास्ति-ड.१४.नास्ति-क.ड.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६।। जनकेति। कृतं भूषणं येन स कृतभूषण:। जनकसुताया: कृतभूषण इति षष्ठीसमास:। कथं सीताया: कृतभूषणो राम इत्याह, **जितेत्यादि**। जितमभिभूतं दूषणं सीतादोषो येनेति विग्रह:। रावणं समरे हत्वा सत्यसतीवेति किम्वदन्ती दूषणं सीताया: वह्निशोधनया व्यवसार्य जितदूषणो राम इत्यभिप्राय:। किं वा जितदूषणो यस्य जितराक्षसविशेषणोऽर्थ:।।६।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।६।। जनकसुतया कृतं भूषणं यस्य हे तादृश! जय इति सुदृढ़व्रतत्वम्। जितो दूषणस्तन्नामा राक्षसो येन हे तादृश! इत्यकत्थनत्वम्। संग्रामे शमित: रावणो येन हे तादृश: इति क्षन्तृत्वगूढ़गर्वत्वसुसत्त्वभृत्त्वानि।।६।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६।। जनकेति। जनकसुता श्रीसीता तयैव कृतं भूषणमेकपत्नीव्रतत्वरूपं यस्य हे तादृश। किं वा तदर्थमेव कृतं भूषणमङ्गाभरणं येन, अथवा तस्या एव कृतो विधिना घटितो भूषणरूप:, तत् 'पतिर्हि भूषणं स्त्रीणा' मित्युक्ते:। यद्वा तस्यामेव कृतं आत्मना

विहितं भूषणं मकरिकालेखनादिरूपं येन हे तादृश। अनेन दृढव्रतत्वम्। जितो नाशितो दूषणस्तन्नामा राक्षसो येन यद्वा जितमभिभूतं दूषणमविहिताचरणरूपं निजश्लाघा-कथनादिरूपं वा येन हे तादृश। अनेनाविकत्थनत्वम्, पुनः समरे युद्धे शमितो दशकण्ठो रावणो येन हे तादृश। अनेन सुसत्यभृत्त्वम्। लक्षणं तु,

''गभीरो विनयी क्षन्ता करुणः सुदृढव्रतः।
अकत्थनो गूढगर्वो धीरोदात्तः सुसत्त्वभृत्'' इति।।६।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।६।। जनकेति; त्वं मिथिला राजकुमार्याः शोभावर्द्धकोऽसि तस्याः पतिरसि। युद्धेन दशशिरसः विनाशः साधितः त्वया। हे हरि तव जयोऽस्तु।।६।।

**७-अभिनवजलधरसुन्दर धृतमन्दर ए।**
**श्रीमुखचन्द्रचकोर जय जयदेव हरे ।।७।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।७।। अभिनवेति। कृष्णो हि नूतनमेघच्छबिरित्यभिनवजलधरसुन्दर इत्युक्तम्। स च धृतमन्दरो भवति। रुक्मिण्याः परिग्रहात्। चकोरः पक्षिविशेषस्तस्य चन्द्रकिरणे प्रीतिः। यदुक्तं ''ज्योस्नापानं चकोराणामिति'' **कविकल्पलतायाम्**।।७।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।७।। अभिनवेति। अत्रालापः, हे अभिनवजलधरसुन्दर, हे धृतमन्दर! निगदव्याखानम्। इति पदम्। हे श्रीमुखचन्द्रचकोर! श्रीमुखं चन्द्र इव तत्र चकोर इव; तन्मुखाधरसुधापान-करत्वात्। इति ध्रुवः।।७।।

**(३) जगद्धरकृत-सारदीपिका**

।।७।। अभिनवेति अभिनवजलधरः नूतन मेघमाला तद्वत् सुन्दरः। धृतमन्दर धृतोमन्दराचलं येन सः। श्रीमुख लक्ष्मीमुखमेव चन्द्रस्तत्र चकोर इव।।७।।

**(४) शंकरमिश्रकृत- रसमञ्जरी**

।।७।। पुनः कीदृश? अभिनवेति। अभिनवो नूतनो यो जलधरः सजलमेघस्तद्वत्सुन्दरः। अनेनापि भव्यत्वमुक्तम्। पुनः कीदृश? धृतः क्षीराब्धिमन्थनावसरे मन्दरो गिरिविशेषो मन्थानदण्डभूतो येन तादृश! अनेन सामर्थ्यमुक्तम्। पुनः कीदृश? श्रियो लक्ष्म्याः मुखमेव चन्द्र आह्लादकारित्वात्तस्य चकोर। अत्र लक्ष्मीमुखचन्द्राधर सुधापरमोत्कण्ठत्वेन

भगवतश्चकोरत्वानिरूपणम्। अनेनापि रतिकौशलमेवोक्तम्। "प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः" **इत्यमरः**। अनया सप्तपद्यापिनायकगुण उक्तः। नायकगुणस्तु (**शृं० ति० १/२३**)- त्यागी कुलीनः कुशलो रतेषु विज्ञः कलावित्तरुणो गुणी धनाढ्यः। भव्यः क्षमावान्सुभगोऽभिमानी स्त्रीणामभिष्टस्त्विह नायकः स्यात्।।इति।।७।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।७।। अभिनवेति। धरतीति धरः। जलस्य धरः पचाद्यच्। अभिनवो नूतनः स चासौ जलधरश्च स इव सुन्दरः। नूतनजलधर इव मोहन इत्यर्थः। अनेन ग्रीष्मकल्पस्मर-कृतगोपकामिनीमनस्तापनिर्वापणसामर्थ्यं सूच्यत। सुन्दरशब्दस्य कर्ण्णाटभाषायां ग्राम्यत्वदोषः प्रयोगबाहुल्यात्परिहर्त्तव्यः। धृतो मन्दराख्यो गिरिर्येन स तथा गोवर्द्धनधारकेत्यर्थः अनेन देवता सार्वभौमत्वं गम्यते। मुखं चन्द्र इव मुखचन्द्रः तत्र चकोर इव चकोरः। यथा चकोरः सादरेण चन्द्रमसं तत्किरणान् वा पिवति, तथायमपि श्रीमुखं मुखसौन्दर्यं वा पिवन् वर्त्तमान इत्यर्थः। अनेन वक्ष्यमाण गोपकामिनीकेल्यनुगुणं शृङ्गारित्वं सूचितम्।।७।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।७।। क्षीरोदमथनरूपिणं स्तौति; हे अभिनवजलधरसुन्दर नवीनमेघवन्मनोहर! कीदृश? धृतमन्दर क्षीरोदमथने धृतो मन्दरनामा गिरिवरो येन। अपि किम्भूत? श्रीमुखचन्द्रचकोर। पक्षिविशेषः चकोरोऽपि चन्द्रज्योत्स्नामृतं पिवति, तद्वत् कृष्णोऽपीति भावः।।७।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।७।। अपरमप्याहुः; अभिनवेत्यादिना। हे अभिनवजलधरसुन्दर नूतनप्रकटितस्निग्ध-नीरदद्युते। जलदो यथा ग्रीष्मसन्तापहारकः सकलानन्दप्रदश्च तथा त्वम्। धृतमन्दर[१] धृतो गोवर्धनो येन सः। गोपसंरक्षणार्थाय [२]धृतोऽयं मन्दराचल इति **पद्मपुराणे**। किञ्च मन्दराचल इति[३] तन्नामान्तरम्। अथ वा धृतपर्वतबन्ध। तल्लक्षणम्,

"बाहुनैकेन वनितां कान्तो यत्रानुरागिणीम्।
दधात्यूर्ध्वं गिरिमिव गिरिबन्धः स कीर्तितः"।।इति

श्रीमुखचन्द्रचकोर श्रीसंयुक्तं यत् श्रीराधामुखं तदेवानन्दजनकत्वेन चन्द्रस्तस्य चकोर; तदापन्नजीवन। अत्र श्रीराधाधरचन्द्रामृत[४]पानत्वेन श्रीकृष्णचन्द्रस्य चकोरपक्षित्वं[५] सूचितम्। श्रीमद्बृन्दावने श्रीराधामुखमेव [६] चन्द्रो [७] नापरश्चन्द्रो विराजत इति। अनेन

श्रीमद्बृन्दा[८]वने नायिकानामुत्कर्षः। पक्षे पुनः कीदृश? [९] अभिनवेति। अभिनवो नूतनो जलधरो मेघस्तद्वत्सुन्दर सुभग। अनेन नायकस्य रतिगम्भीरस्निग्धभव्यत्वं चोक्तम्। (धृतमन्दर) धृतः क्षीराब्धिमथनावसरे [१०] मन्दरनामा पर्वतो येन। [११]अनेन नायकसामर्थ्यं [१२] प्रोक्तम्।श्रीमुखेति। श्रिया लक्ष्म्या राधाया [१३]वा मुखमेव चन्द्रः आह्लादकारित्वात्; तस्य चकोर। अत्रेन्दिरावदनचन्द्राधर [१४]पानेन भगवतश्चकोरत्वं निरूपितम्। एतेन नायकस्य रतिकौशलमेवोक्तम्। प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः [२]**इत्यमरः** (३.१.७७)। धाराधरो जलधर इत्यपि (अमरः-१.३.७)। मन्दरो मन्दरे प्रोक्तो [३] बन्धभेदेऽपि मन्मथे इति [४] मेदिनीकारः नायकगुण [५] लक्षणम्,

त्यागी कुलीनः कुशलो रतेषु कल्यः कलावित्तरुणो धनाढ्यः।
भव्यः क्षमावान् सुभगोऽभिमानी स्त्रीणां मता [६]मूर्तिधरः स कामः॥

इति **श्रृङ्गाररतिलके**। अत्र स्तुतिरेवालङ्कारः॥७॥

## (८) नारायणपण्डितकृत- पदद्योतनिका

॥७॥ अभिनवेति। सजलमेघसुन्दर। [७]धृतमन्दरपर्वत। श्रीमुखमेव चन्द्रस्तत्र चकोर इव॥७॥

१.धृतगोवर्धन-इ.फ.ग.ह.ज. २.धृतोऽहं-अ. ३.नामान्तरम्-ज. ४.पानं श्रीकृष्णचन्द्रस्य-ह. ५.निरूपितम्-ब.इ.फ.ह.ज. ६.चन्द्रो विराजत इति-अ.ब. ७.नास्ति-फ. ८.वननायिकानां-इ.फ.ह.ज. ९.नास्ति-अ. १०.मन्दरोनाम-अ.मन्दराख्यः-इ.फ.ग.ह.ज. ११.अनेनापि-फ.ग.ह.ज. १२.चोक्तम्-ब.इ.फ.ग.ह.ज. १३.नास्ति-अ. १४.पाने-ग.

## (९) कृष्णपण्डितकृत-जयन्ती

॥७॥ अभिनवेति। अभिनवश्चासौ जलधरः, स [८]इव सुन्दर मेघश्याम। अत्रापि लुप्तोपमा। धृतः मन्दरो येन तत्सम्बुद्धिः। समुद्रमथनकाले मन्दराचलस्य मथनत्वात्। श्रियाः लक्ष्म्याः मुखमेव चन्द्रः तस्य चकोरः पक्षिविशेषः ज्योत्स्नापायी (तत्सम्बुद्धिः)। अत्रापि परम्परितरूपकालङ्कारेण तन्मुखस्मितानन्दसुखास्वादनं व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः॥७॥

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

॥७॥ **अभिनवेति**। श्रीकृष्णो हि नूतनमेघच्छविरिति अभिनवजलधर-सुन्दरेत्युक्तम्। स च धृतमन्दरो भवति, गोकुलरक्षणार्थं गोवर्द्धनस्य छत्रीकृतत्वात्। अत्र मन्दरशब्दो गोवर्द्धनवाची। ''गोष्ठा तिलो गोष्ठपतिः शक्रस्पर्धी च मन्दरः, गोवर्द्धनश्च गिरिराट् छत्राद्रिर्द्रुमलाचलः'' इति **वैष्णवपर्यायावलिः**। श्रीमुख-चन्द्रचकोरोऽप्यसौ भवति।

श्रीरुक्मिणी, ''राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि'' इत्यादिवचनात्। तस्याः मुखचन्द्रस्य चकोर इव चकोरः। चकोरनामा पक्षी चन्द्रदर्शनात् अतितरां प्रीतो भवति। चन्द्रिकाहारत्वात् लोकप्रीतिचकोरपारगपटज्योतिष्मतीचन्द्रानन(लोचने) इति। अयमपि श्रीमुखाधरसुधापानं करोतीति भावः।।७।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।७।। अस्मिन् धीरललितमुख्यत्वप्रतिपादनाय अजितरूपत्वेन संपुटितमेव पुनस्तमेवाह अभिनवेति । हे नवीनमेघवत्सुन्दर! जय। धृतो मन्दरस्तन्नामा गिरिः येन हे तादृश! क्षीराब्धिमथन इत्यधिगन्तव्यम् । आभ्यां नवतरुणत्वं तदधिगमश्च। कुतः? श्रियः समुद्रमथनाविर्भूताया मुखचन्द्रे चकोर इव सलालस इति प्रेयसीवशत्वम्। एतेषु केचिद्गुणा अंशेन श्रीकृष्णस्य सर्वएव परिपूर्णतया विराजन्त इति सर्वोत्कर्षत्वम् । अतोऽत्रापि नवपद्यैः समाप्तिः।।७।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७।। पुनश्च धीरललितत्वेन निजेष्टदेवं स्तुवन् उपसंहरति । अभिनवेति । अभिनवो नूतनो यो जलधर आषाढनवघनः तद्वत् सुन्दर। अनेन स यथा जनानां ग्रीष्मतापहारी तथा त्वमपि व्रजसुन्दरीणां स्मरतापहर इति व्यज्यते। मन्दर इति गोवर्द्धनस्यापरपर्याय इति केचित्। रुष्टेन्द्रवृष्टिसंत्रस्तगोकुलरक्षणाय धृतः सप्ताहं छत्राकारतया वामकरेण उद्धृतो गोवर्धनो येन तादृश। तवैव निकटस्थितायाः श्रियः श्रीराधाया मुखमेवानन्द-जनकतया चन्द्रस्तस्य दर्शनेन चकोर इव लालसेत्यर्थः।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। अभिनवेति; नवमेघवर्णशोभिन्! हे त्वया मन्दरपर्वतधृतोऽऽसीत्। सदैव लक्ष्म्याः मुखं चकोर इव पश्यसि। तव जयोऽस्तु ज्योस्नापेया चकरिति **साहित्यदर्पणः**।।७।।

**७ (क)-तव चरणं प्रणता, वयमिति भावय ए।**
**कुरू कुशलं प्रणतेषु, जय जय देव हरे।।७-क।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७-क।। तव इत्यादि। तव चरणे वयं प्रणता इति भावय जानीहि इत्यर्थः। ज्ञात्वा किं कर्त्तव्यमित्याह-अस्मासु प्रणतेषु कुशलं विधेहीत्यर्थः। तव चरणे इत्यत्र मूलपाठो नास्ति। अभिनव जलधरमित्यनन्तरं तवचरणे इति पाठो युक्तः।।७-क।।

## (२)राणाकुम्भकृत-रसिकप्रिया

।।७-क।। तवचरणे इति। उपसंहरति हे उक्तस्वरूप श्रीकृष्ण! वयं तव चरणे प्रणताः तव चरणे कृतनमस्कारा इति भावय चिन्तय। इति पदम्। प्रणतेष्वस्मासु कुशलं कुरु। जयेत्यादि ध्रुवः। शुद्धिचिन्तामिश्रणेषु" चुरादिः परस्मैपदी। तस्य प्रयोगो भावयेति"।।७-क।।

## (३) जगद्धरकृत-सारदीपिका

।।७-क।। तवेति एवम्भूत हे हरे! जय जयेति तव चरणे वयं प्रणताः अतीवनम्राः भावय जानीहि प्रणतेषु मादृशेषु कुशलं कल्याणं कुरु।।७-क।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।७-क।। कविः सर्वनायकोत्कृष्टं श्रीकृष्णं स्तुत्वा सर्वभक्तानां स्वस्यापि चाभीष्टं प्रार्थयतेतवेति। वयं तव चरणे पतिता इति भावय जानीहि। ननु मया तज्ज्ञातमेव, तादृशां भवतां किमिष्टं कर्तव्यमित्यत कुरु इति। प्रणतेषु कुशलं विघ्नराहित्यं कुरु।।७-क।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी (टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत-सारवती (टीकानास्ति)

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।७-क।। सकलकलाप्रवीणत्वेन श्रीकृष्णं स्तुत्वा साम्प्रतमभिमतमाहुः अभीष्टञ्च[१] प्रार्थयन्तेतवेत्यादिना। हे कृष्ण! वयं तव चरणं प्रणता इति भावय स्मर जानीहि[२] इति [३] यावत्। ननु मया किमिति भवत्यः स्मर्तव्याः, अयमर्थः, स्मरणं चित्तधर्मस्तस्य त्वन्निष्ठत्वात्त्वयैव तद्विधेयमिति सूचितम्। अथ वा[४]त्वमेव निजचरणप्रणतान् स्वभक्तान् भावय कुर्वित्यर्थः। प्रणतेष्वनुरागिष्वस्मासु कुशलं कुरु। त्वय्यनुरागोऽन्यत्र विरतिश्चेति भावः। तव[५]चरणस्मरणमेवास्मासु [६]कुशलं [७]तदितरमकुशलमेवेति सूचितम्। पक्षे वयं तव चरणे [८] प्रणता इति भावय जानीहि। ननु मया तत् ज्ञातमेव भवतां किमिष्टं कर्तव्यमितयत आह कुर्विति। प्रणतेषु शरणागतेषु कुशलं कुरु।।७-क।।

१.तव चरणे श्रुतिविमृग्ये ब्रह्मादिसम्पूजिते कर्मपाशशतैर्बद्धा वयमिति भावय ए। कुरु कुशलं प्रणतेषु जय जय देव हरे ।। क. २. नास्ति-फ.३.मन्दभेदेऽपि-अ.ब.बन्धभेऽपि मन्दरः-ह.४.मन्दरस्तु पुमान् मन्थशैले मन्दारपादपे-**मेदिनी**.५.लक्षणानाह-अ.ब.६.कुण्डलीकृतो भागः-ज पुस्तके एव लभ्यते। ७.धृतमन्दर धृतमन्दराचल-क.म.धृतमन्दराचल-ल.८.एव-च

**(८) नारायणपण्डितकृत-पदद्योतनिका**

।।७-क।। [१]तव चरणेति। हे देव! शरणागतप्रिय तव चरणे वयं पतिताः शरणं याता इति भावय दयां कुरू। कथम्भूते चरणे? श्रुतिभिर्विमृग्ये शोधिते। पुनः कथम्भूते? ब्रह्मादिभिर्देवैः सम्पूजिते। कथम्भूता वयम्? पाशशतैर्बद्धाः।।७-क।।

**(९) कृष्णपण्डितकृत-जयन्ती**

।।७-क।। तवेति। वयं तव कृष्णस्य चरणयोः प्रणता इति भावय जानीहि। प्रणतेषु अस्मासु कुशलं क्षेमं कुरु। त्वद्भक्तानस्मान् पालयेति भावः।।७-क।।

**(१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)(टीका नास्ति)**

**(११) पूजारीगोस्वामीकृत-बालवोधिनी**

।।७-क।। अथ स्वहितेषु तत्रशोतृवक्तृषु प्रसादं प्रार्थयते। हे श्रीकृष्ण! तवचरणे वयं प्रणता इति भावय जानीहि। ज्ञात्वा किं कर्त्तव्यम्? प्रणतेषु आस्मासु कुशलं तल्लीलानुभव सामर्थ्यं कुरु देहि। तल्लीलानुभवस्य तत्प्रसादं विनानुपपत्तेः परमानन्दरूपत्वादित्यर्थः।।७-क।।

**(१२) लक्ष्मणकृत- रसिकरङ्गदा**

।।७-क।। एवं तस्य प्रणतदयालुतामालक्ष्य प्रार्थयते। तवेति। भावय, स्मर, स्मृत्वा किं करोमि, तत्राह कुशलं भक्तिरसानुभवसामर्थ्यं कुरु, विधेहि। त्वत् प्रसादं विना तदनुभवस्य वा सिद्धेः। अन्यत् स्पष्टम्। एतत् पदं न सार्वपौस्तिकम्।।७-क।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।७-क।।तवचरणेति; हे देव! तवचरणे वयं प्रणामं कुर्मः। अत्र अस्मादृशानां भक्तानां सकलं मङ्गलं कुरुसे हे देव तव जयोऽस्तु।।।७क।।

**८-श्रीजयदेवकवेरिदं कुरुते मुदम्, ए।**
**मङ्गलमुज्ज्वलगीतं, जय जयदेव हरे।।८।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।८।। इदं जयदेवकवेर्मङ्गलं गीतं मङ्गलरूपं मुदं कुरुते कीदृशम् उज्वलगीतं गानदोषरहितं, यदुक्तं, शङ्कितं भीतमुद्धृष्टमब्यक्तमनुनासिकम्।

काकस्वरं शिरःकम्पं तथा स्थानविवर्ज्जितम्।।
विस्वरं विरसं चैव विशिष्टं विषमागतम्।
व्याकुलं तालहीनं च गीतदोषाश्चतुर्द्दश ।। इति ।।

श्रितकमलेत्यभिप्रायस्य श्रीमुखेन प्रकटयति।।८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।८।।श्रीजयेति। अत्रालाप:;मङ्गलेति। हे हरे! इदं मङ्गलं नाम गीतं गीतविशेषो मुदं प्रीतिं कुरुते। कस्य ? ते तव। इति अनुप्रयुज्यमानस्यान्यापेक्षया। अथवा, इदं गीतं मे तव मुदं कुरु। कुरु ते इत्यर्थ:। अथवा, इदं मङ्गलं मङ्गलगीतं जयदेवस्य मुदं कुरुते। अमुदं मुदं ददातीति मुदं वा। ते इति काकाक्षिगोलकन्यायेनोभयत्र संबध्यते। अथवा, इदं गीतं गायतां श्रृण्वतां मुदं कुरुते। अथ ते गीतं त्वत्संबन्धिगीतं गायतां शृण्वतां च मुदं कुर्वित्याशी:। तस्य श्रीजयदेवस्य कवे:। किंभूतम्? उज्ज्वलम्। रम्यगानाद्यखिलैर्गीत-गुणैर्युक्तं भीतशङ्कितादिदोषरहितम्। श्रितकमलाकुचेत्यादि। मङ्गलं नाम छन्द:। तल्लक्षणम्, "मङ्गलं मङ्गलाख्येन छन्दसा तालसंयुतम्। विलम्बितलयोपेतमुत्सवे गीयते जनै:", "एकारगणै: प्रतिपदगतैश्चैव। मङ्गलमाहुरिदं सुधिय: खलु युक्तम्"। तथा च **संगीतराजे** छन्दसा मङ्गलाख्येन खननं गद्यपद्ययो:। आलापश्च प्रतिपदं नानागमकपेशल:।। ध्रुव: "प्रतिपदं रागो ललितस्ताल उच्यते। आदिमाल: स्वरास्त्वेता: प्रबन्धे ते प्रतिष्ठिता:।। स हरिविजयाढ्यश्च मङ्गलाचार उच्यते"। इति हरिविजयमङ्गलाचारनामाष्टम: प्रबन्ध:।। श्रितेत्यष्टपद्यां धीरललितो नायक: शृङ्गारी वा। लक्षणमुक्तं प्राक्। जयदेवस्य रतेर्भाव:।।८।।

## (३) जगद्धरकृत-सारदीपिका

।।८।। श्रीजयदेवेति हे देव हे हरे जय जयेति प्रार्थयते श्रीजयदेवकवे: इदमुदितं मङ्गलगीतविशेषं मुदं हर्षं कुरुते। शृण्वतां भक्तानामितिशेष: कथंभूतम् इदं मङ्गलम् उज्वलं गीतं तदनुगमने रम्यं गीतं गानं यस्मिन्।।८।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।८।।श्रीजयदेवेति। श्रीजयदेवकवे: इदं उदितम्। पदमिति शेष:। कुशलं विघ्नरहित्यं उज्ज्वलं गीतं गानं यस्य तादृशम्। "शङ्कितं भीतमुत्सृष्टमव्यक्तमनुनासिकम्। काकस्वरं शिरसिगतं तथा स्थानविवर्जितम्।। विस्वरं विरसं चैव विस्पष्टं विषमाहतम्। व्याकुलं तालहीनं च गीतदोषान्विदुर्बुधा:"।।८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।८।।श्रीजयदेवेति। मङ्गलं मङ्गलहेतुकल्याणस्वरूपं वा उज्वलं ध्वनिगुणालङ्कार-भास्वरम् जयदेवकवेतिदं गीतं श्रृण्वतां श्रोतृणां च मुदं सन्तोषं कुरुते करोति यदा यदा श्रूयते, गीयते च तदा मङ्गलं करोतीति द्योतयितुं वर्त्तमानप्रयोग इत्येवमन्तव्यम्। सारस्य त्वाशी: प्रयोगेनेत्यवगन्तव्यम्।।८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।८।।श्रीजयदेवकवेरिदं मङ्गलसहितं गीतं मुदं कुरुते, अर्थाद् गायतां श्रृण्वतां च। कीदृशम्? उज्ज्वलगीति उज्ज्वला दोषरहिता गीतिर्गानं यस्य तदुज्ज्वलगीति। दोषान् आह च, 'शंकितं भीतवद्दुष्टमव्यक्तमनुनासिकम्। काकस्वरि शिरस्कम्पि तथा तालविवर्जितम्।। विस्वरं विरलञ्चैव विश्लिष्टं विरलाक्षरम्। व्याकुलं तालहीनञ्च गानदोषाश्चतुर्दश।।८।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।८।। एवमुक्त्वाऽभीष्टमाशास्ते, श्रीजयेति। [१०]इदं श्रीजयदेवकृतं व्रजयुवति[१] गीतिमङ्गलविधानं [२] सद्भक्तेषु मुदं कुरुते। कुरुतामिति वक्तव्ये -कुरुते इति साक्षादनुभवाद्वर्तमानतोक्ता। कीदृशं मङ्गलम्(९) [३]सुरतमङ्गलप्रदम्। कीदृशम्? [४]उज्ज्वलगीति उज्ज्वला दोषरहिता गीतिर्गानं यस्य तत्तथा। श्रीराधाकृष्णसुरत-केलिकथनेनोज्ज्वलत्वम्। तदितरकेलिवर्णने मलिनत्वमेव। श्रृङ्गारस्यापि तथैवेति भावः। पक्षे श्रीजयदेवकवेः इदं गीतं श्रुण्वतां पठतां वा [५] मुदं आनन्दं करुते। कीदृशम्? मङ्गलं मङ्गलप्रदम्। उज्ज्वलगीति उज्ज्वलाऽलङ्कारादिदोषरहिता गीतिः कवित्वं यस्य। गीतिदोषास्तु भरते-

''शङ्कितं[६] भीतमुद्भ्रान्तमव्यक्तमनुनासिकम्।
काकस्वरं शिरः कम्पं तथा स्थानविवर्जितम्।।
[७]विस्वरं विरसञ्चैव विश्लिष्टं[८]विषमाहतम्।
व्याकुलं तालहीनञ्च गीतदोषान्विदुर्बुधाः।।''

''मुत्प्रीतिः प्रमदो हर्ष'' **इत्यमरः** (१.४.२४)। ''शृङ्गारः शुचिरुज्ज्वलः''इति च (अमरः १.७. १७)।।८।।

१.प्रार्थयन्ति-अ.२.३.न स्तः-अ.४.त्वमेवेति तव चरणे-ग.५.चरणमेवास्मासु-ग.६.कुशलमिति सूचितम्-अ.७.न हीतरमकुशलमेवेति-ज.८.पतिता-ब.ग.ह.ज.९.तव चरणं प्रणता इत्येतस्याष्टमपदस्य मूलं व्याख्या च-क.ग्रन्थे परं दृश्यते। १०.श्रीजयदेवकवेःइदं-इ.फ.ग.ह.ज.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।८।।श्रीजयदेवेति। हे देव! हे हरे! जय जयेति प्रार्थयते। श्रीजयदेवकवेरिदमुदितं मङ्गलं[९] गीतविशेषः मुदं हर्षं कुरुते कुरुताद्भक्तानामिति शेषः। कथम्भूतमिदं मङ्गलम्? उज्ज्वलगीतं[१०]तवानुगमेन रम्यं गीतं गानं यस्मिन्[११] ।।८।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।८।।श्रीजयेति। जयदेवकवे: इदं मङ्गलसंज्ञकमुज्ज्वलगीतं[१] मुदं सन्तोषं कुरुते। अत्र श्रीपदप्रयोगे मात्राधिक्यं भवति। अत्र सर्वत्र पूर्वदलादष्टादश मात्रा: ; द्वादशयति:। अन्त्ये एकादश मात्रा:। सप्तसु च यति: इति मङ्गलाष्टपदी।।९।।

१.गीतं-ग.२.मद्भक्तेषु-फ.ज.३.त:.४.पर्यन्तं नास्ति-अ.ब.५.नास्ति-ग.६.भीतिमुद्रां तामव्यक्तमनुनासिकम्-अ.ब.ग.७.विश्वरं-अ.ब.ह.८.विश्वमाहतम्-ग.९.इत्यपि-इ.फ.ग.१०.नानानुगमनेन-ड.तानानुगमनेन-क.११.इत्यष्टपदी द्वितीया-ल.म.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।८।।श्रीजयेति। इदं श्रीजयदेवकवेरुज्ज्वलगीतं जनानां मुदं कुरुते। किंविधम्? मङ्गलमिति। मङ्गलहेतुत्वान्मङ्गलस्वरूपम्। यद्वा इदं मङ्गलगीतरूपं कर्तृ मुदं कुरुते। किंविधम्? उज्ज्वलगीतमिति। विशदम् अर्थात् गानदोषरहितं यथा स्यादेवं गीतं भणितम्। यदुक्तम् ,''शङ्कितं भीतमुत्सृ(द्धु)ष्टमव्यक्तमनुनासिकम्। काकस्वरं शिर:कम्पं तथा स्थानविवर्जितम्। विस्वरं विरसं चैव विश्लिष्टं विषमागतम्। व्याकुलं तालहीनं च गीतदोषाश्चतुर्दश।।'' इति। ''उज्ज्वलो दीप्तशृङ्गारविशदेषु विकाशिनी'' इति **मेदिनी**।।८।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।८।।अत्र स्वानुभवं प्रमाणयति। जयदेवकवेर्मम मुदं करोति। इदमिति किं मङ्गलं मङ्गलाचरणमात्रम्। कीदृशं? उज्ज्वलरसस्य गीतिर्गानं यत्र तत्। एवं चेत् किमु केलीनामित्यर्थ:।।८।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।८।। अथ कवि: स्वानुभवप्रमाणेन गीतस्य उपादेयतामाह; श्रीति । इदं श्रितेत्यादिपदकदम्बं श्रीजयदेवकवेर्मम मुदमानन्दं कुरुते ।कुरुत इति वर्त्तमानप्रयोग: साक्षादनुभवं व्यनक्ति ।कवेरित्युपलक्षणम् ।अन्येषामिति भाव: ।कीदृशमुज्ज्वलं दोषरहितं गीतं गानं यत्र तादृशम्, भावे क्त:।इदमुज्ज्वलगीतं इति वा ।किञ्च मङ्गलं मङ्गलाचरणरूपम्।अहो! मङ्गलाचरणमात्रस्यापि एतादृशानन्दजनकत्वम्, किमुत वर्णयिष्यमाणापरमरहस्यस्थालीलानुवर्णनमयप्रबन्धस्य इति भाव:।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।।श्रीजयदेवेति; श्रीजयदेव: कवि: आनन्दमङ्गलगीतं रचयति। तेन आनेन्देनैव मङ्गलगानं करोति। हे देव तव जयोऽस्तु। इति हरिविजनामाष्टमप्रबन्धे: धीरललित: नायक:। सम्भोगशृङ्गार: रस:। जयदेवस्य देवादिविषयारतिर्भावश्च।।८।।

**६-पद्मापयोधरतटीपरिरम्भलग्न-**
**काश्मीरमुद्रितमुरो मधुसूदनस्य।**
**व्यक्तानुरागमिव खेलदनङ्गखेद-**
**स्वेदाम्बुपूरमनुपूरयतु प्रियं वः ।।६ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६ ।। मधुसूदनस्य हरेरुरो वक्षो वो युष्माकं प्रियमनुपूरयत्विति योजना। पद्मापयोधरतटी परिरम्भलग्नकाश्मीरमुद्रितम्। पद्मा लक्ष्मीः तस्याः पयोधरौ स्तनौ तयोस्तटी प्रान्तदेशस्तस्य परिरम्भेण लग्नं यत्काश्मीरं कुङ्कुमं तेन मुद्रितं मुद्रां प्रापितमित्यर्थः। लग्नं च तत्काश्मीरं इति समासे केचिन्न कर्मधारय-वहुब्रीहयोः प्रतिपत्तिकर इति दूषणमाचक्षुः। तदसमीक्षिताभिधानं मुद्रितशब्दस्य सम्बन्धाभावात्। तटस्थत्वात् वहुव्रीहि प्रतिपत्त्यनुदयात्।

पुनः कीदृक्, खेलदनङ्गखेदस्वेदाम्बु पुरम्, खेलदनङ्गखेदेन स्वेदाम्बुनः पूरो यत्रेति व्यधिकरणे वहुब्रीहिः। "पूरो जलप्रबाहे स्यात्"। स्वेदाम्बु घर्मजलम् उत्प्रेक्षते। व्यक्तानुरागमिवेति। लक्ष्मी प्रत्युद्गतानुरागप्राचुर्य्यादिव बहिर्भूत इवेत्यर्थः।

अन्यर्थव स्थिता वृत्तिश्चेतनस्येतरस्य वा।
अन्यथोत्प्रेक्षते यत्र तामुत्प्रेक्षां विदुर्बुधाः।

इति **काव्यादर्शे**।

न विना विप्रलम्भेन सम्भोगः स्फुटमर्हति।
कषायितेहि वस्त्रादौ भूयान्रागोऽनुरज्यते ।।६ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६ ।। इदानीं श्रीकृष्णं क्रीडानिदानं वसन्तं दर्शयन्भक्तानभिनन्दति स्वङ्गादिकेन पूर्णेन वसन्तरागेणपद्मापयोधरतटीति; अनुपूरयतु पूर्तिं नयतु। किम्? प्रियं वाञ्छितम्। केषां? वो युष्माकम्। किं कर्तृभूतम्? उरो वक्षः। कस्य? मधसूदनस्य। किंभूतम्? पद्मायाः पयोधरौ तयोस्तटी भृगू तयोः परिरम्भेण लग्नं शक्तं काश्मीरं कुङ्कुमं तेन मुद्रितं कृतमुद्रम्। एतेन स्तनयोः शैलत्वात्तच्छिखरलिङ्गनेन तयोरतिशयालिङ्गनव्याजेन जाता मुद्रा यास्मिंस्तत्। अत एव व्यक्तानुरागामिव प्रतीयमानानुरागमिव। अस्यानुरागो माऽन्यस्यां स्यादिति लक्ष्म्या मुद्रा दत्ता। अथवा, नेदं कुङ्कुमं; किंतु हृदिस्थोऽनुरागो बहिर्भूत इव। किंभूतम्? खेलन् अनङ्गखेदजातः सुरतश्रमजातः स्वेदाम्बुपूरो यत्र तत्तथा।।

अत्रैदमाकूतम्-अयमालिङ्गति मां परं त्वनुरागो राधायामेवेति मुद्रार्थः। तदसूचि कविना- "राधामाधवयोः" इति पूर्वपद्ये। अत्र मुग्धा नायिका। कुशलो नायकः। वसन्ततिलका वृत्तम्। आशीर्वर्णानुप्रासालंकारौ उत्प्रेक्षा च। शृङ्गारो रसः। अत्र मधुसूदनस्य परमप्रेमास्पदकान्तोरःस्थलोपगूहनेन व्यक्तानुरागरूपकाश्मीरसंवलितस्य परमप्रीति-भाजनरसाद्यद्भक्तानां श्रियानुपूरणमाशीर्वचनमुक्तं ततः सुतरामौचित्यमावहति। यदुक्तम्; पूर्णार्थदातुः काव्यस्य संतोषितमनीषिणः। उचिताशीर्नृपस्येव भवत्य-भ्युदयावहा।।६।।

## (३) जगद्धरकृत-सारदीपिका

।।६।। अधुना कविः कामोद्दीपकत्वात् वसन्तस्य व्याजेन कृष्णक्रीडां वक्तुं भक्तान्प्रति आशिषं ब्रुते। पद्मेति मधुसुदनस्य उरो वक्षस्थलं वः युस्माकं प्रियमभीष्टमनुपूरयतु सम्पूर्णं करोतु कथंभूतं मधुसूदनस्य उरः, पद्मेति पद्मायाः लक्ष्म्याः पयोधरतटी स्तनपरिसरस्तस्य परिरम्भणेन आलिङ्गनेन लग्नं यत्काश्मीरं कुङ्कुमं केशरं तेन मुद्रितं चिह्नितं ममैवेदं वक्षस्थलं नान्यस्य इति भावः। पुनः कथं भूतमिव व्यक्तानुरागमिव पुनः कथंभूतं उरः, खेलदिति खेलन् खेलनगतिं कुर्वन्योऽनं गस्तस्य खेदेन सुरताया सेनस्वेदाम्बु पयाधरधर्मजलप्रवाहो यत्र।।६।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६।। श्रीकृष्णनायकसामान्यगुाणनुक्त्वा संप्रति नायकगुणान्कथयन्नाशीरूपं मङ्गलमाचरति; पद्मेति। मधुसूदनस्य उरो हृदयं वो युष्माकं वाञ्छिंतफल मनुपूरयतु संपूर्ण करोतु। कीदृशमुरः ? पद्माया लक्ष्म्याः पयोधरतटी स्तनप्रान्तरस्य परिरम्भे आलिङ्गने लग्नं यत्काश्मीरं कुङ्कुमं तेन मुद्रितमिव मुद्रा चिह्नविशेषस्तद्युक्तमिव। इदं मधुसूदनहृदयं ममैव, न त्वत्यस्येति ख्यापनाय लक्ष्म्या निजस्तनतटे लिप्तकाश्मीरमुद्रेव दत्तेति भावः। पुनः कीदृशम्? खेलति क्रीडा कुर्वति अनङ्गे कामदेवे सति यः खेद आयासस्तेन यत्खेदाम्बु प्रखेदजलं तस्य पूरः प्रवाहो यत्र तादृशम्। एतेन चिरलिप्तस्य काश्मीरस्य शुष्कत्वेपि स्वेदसम्बन्धेन तस्य मुद्रायोग्यत्वमिति ध्वनितम्। कीदृशमिव ? व्यक्तानुरागमिव। व्यक्तः प्रकटीभूतोऽनुरागः स्नेहो यत्र तादृशमिव। अत्र लक्ष्मीविषयानुरा-गाधिक्यादभ्यन्तरे समावेशाभावात्कुङ्कुमरागव्याजेन बहिर्निःसृत इति भावः। मुद्रा संजाता अस्येति तारकादित्वादितच्। "लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया" **इत्यमरः**। "स्त्रीस्तनाब्दौ पयोधरौ" इति च। "परिरम्भः परिष्वङ्गः संश्लेष उपगुहनम्" इति च। "काश्मीरं कुङ्कुमं प्रोक्तं टङ्कपुष्करमूलयोः" इति विश्वः। अनेन सर्वदा लक्ष्म्या

दृढानुरागकथनेन दाक्षिण्यरूपो नायकगुण उक्तः। तदुक्तं शृङ्गारतिलके(१।२६), "यो गौरवं भयं प्रेमं सद्भावं पूर्वयोषिति। न मुञ्चत्यन्यचित्तोऽपि ज्ञेयोऽसौ दक्षिणो यथा।।" ।।६।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६।। एवं सर्वेश्वरं प्रस्तुत्य तस्य भगवतः श्रीकृष्णस्य राधाप्रमुखवल्लवाङ्गना-विषयश्रृङ्गारं वर्णयितु काम आदौ प्रधाननायिकारूपलक्ष्मीविषयश्रृङ्गारवर्णनापूर्वक-माशीर्वादेन श्रोतृजनानभिनन्दयति। पद्मेति।। पद्मायाः लक्ष्मीदेव्याः पयोधरतटीकुचतटं तत्परिसरप्रदेशः स्तनमण्डलमिति यावत् तस्य परिरम्भ आलिङ्गनं तेन लग्नमाशक्तं यत् काश्मीरं कुचकुङ्कुमं तेन मुद्रितं चिह्नितम् अलङ्कृतमिति यावत्। अतएव व्यक्तः बहिरवभासमानोऽनुरागः हृदयान्तः स्थितः लक्ष्मीविषयानुवृत्तो रागो यस्य तादृशमिवस्थितमिति शेषः। अथवा अनुरागो नाम रतेर्भोगाख्यः षष्ठावस्थाविशेषः तदुक्तं रतिकल्पलतायाम्,

अङ्कुर पल्लवकलिका प्रसून फलभोगभागियं क्रमशः।
प्रेमामानः प्रणयः स्नेहो रागोऽनुरागश्चेति।।

अयं शब्दः प्राकरणिकत्वाद्रतिपरः। अत्र काश्मीरानुरागयोः सवर्णत्वं न तथोत्प्रेक्षितमवगन्तव्यम्। तदुक्तं भावप्रवाशे,

सुखदुःखात्मकं भोग्यं सुखत्वेनाभिमन्यते।
येन रागः स इत्युक्तो रञ्जनाद्धियात्मनः।।
नीली कुसुम्भमञ्जिष्ठारागौपम्येन स त्रिधा।
क्षालितो यश्चनापैति यश्चनातीव शोभते।।
नीलरागः स एवेति कथितो रङ्गवेदिभिः।
योऽपैति क्षालितः क्षिप्रमध्यगे यो न शोभते।।
कुसुम्भराग इत्येष भणितो रागवेदिभिः।
अतीव शोभते यस्तु नापैति क्षालितोऽपि सन्।।
एषैव कविभिः सर्वैर्माञ्जिष्ठो राग उच्यते।
ज्येष्ठा माञ्जिष्ठराग स्यान्नीलीरागस्तु मध्यमः।।
कुसुम्भरागः कविभिरधमोऽथेति कीर्त्तितः।
रागोऽनुवृत्तोऽविच्छिन्नमनुराग उदाहृतः।।
अनुरूपोऽथवा राग इति वा निर्वहो भवेत्।
स तु प्राय स्वसंवेद्यो यूनोरन्योऽन्यरक्तिमा।। इति ।।

व्यक्तानुरागमिवेत्येकं पदम्। अतएव खेलन् युवयुवतीचित्तचाञ्चल्य निष्पादनार्थं सर्वत्र क्रीडमानो योऽनङ्गस्तेन। खेदः रतिजननद्वारा तन्निष्पादिताया स तेन हेतुना स्वेदाम्बुपूर। श्रमजलप्रबाहो यत्र तत्तादृशम्। अनेनाभ्यन्तरः शृङ्गारः सूचितः। अत्र सर्वत्रतृतीया तत्कृतेत्यादिना समासः। अथवा खेलदित्यत्रान्तर्भावित ण्यर्थः। तदा खेलन् विहरयन्नित्यर्थः। उक्तं च माधे-

इदमिदमिति भूरुहां प्रसूनैर्मुहु-
रभिलोभयत्रा पुरः पुरोऽन्या।
अनुरभसमनायि नायकेन
त्वरयति रन्तुमहो जनं मनोभूः।। इति ।।

अन्तर्भावितण्यर्थप्रकारस्तु उवाच इति सूत्रव्याख्यानावसरेऽन्तर्भावितो बुद्ध्या प्रकाशितो ण्यर्थ इत्यादिना ग्रन्थसन्दर्भेण न्यासकरेण प्रतिपादितो द्रष्टव्यः। यद्वा खेलदित्युरो विशेषणम्। तदा खेलत् बिहरत् अतएवानङ्गखेदस्वेदाम्बु पूरमित्यन्वयः। यद्वा, खेलन् सर्वाङ्गेषु विहरन् सर्वाङ्गीणतया भासमान इत्यर्थः। एतादृशानङ्गखेदेनेति वान्ये जना, एतादृशं मधुसूदनस्य भगवतः श्रीकृष्णस्य, अत्र मधुसूदनपदेन कृष्णाभिधानम् उद्दीपकपौरुषाधिक्यद्योतनार्थं दुष्टनिग्रहपूर्व कशिष्टपरिपालकत्वसूचनार्थं वा उरो वक्षस्थलम्। वो युष्माकम्। सर्व एते वेस्मादानन्वादेशे वक्तव्या इत्यनादेशेऽपि वसादेशः। प्रियमपेक्षितं वस्तुजातम्। अथवा पुत्रपौत्रधनधान्यबाहनादिजनित सन्तोषम्। अनुपूरयतु, पुनः पुनः परिवर्द्धयतु संसारिणः दुःखापसारणद्वारा सुखमेव प्रयच्छ-त्वित्यर्थः। अत्र भावः प्रतिपाद्यः। उत्प्रेक्षालङ्कारः,

यत्रान्यधर्मसम्बन्धादन्यत्वेनोपतर्कितम्।
प्रकृतं हि भवेत् प्राज्ञास्तामुत्प्रेक्षां प्रचक्षते। ।इति लक्षणात्।।६ ।।

### (६) शुक्लध्वजनृपतिकृत-सारवती

।।६ ।। गीतान्ते लोकानामाशिषमाह; मधुसूदनस्य उरो वक्षःस्थलं कर्त्तृ वो युस्माकं प्रियम् अभीष्टम् अनुपूरयतु पूर्णं करोतु। अनुशब्दो धात्वर्थमेव द्रढयतीति भगीरथः। कीदृशं वक्षः ? पद्माया लक्ष्म्याः पयोधरयोः स्तनयोस्तटी परिसरः, तस्य परिरम्भेण आलिङ्गनेन लग्नं यत् काश्मीरं कुङ्कुमं तेन मुद्रितं चिह्नितम्। ममैवेदमुरो मुरारेर्नान्यिस्थेति कृत्वा लक्ष्म्या मुद्रितमिति भावः। पुनः कीदृशम् ? खेलता क्रीडता अनङ्गेन कामेन हेतुना यः खेदः सुरतश्रमः तेन स्वेदाम्बुपूरो धर्मजलप्रवाहो यत्र। अन्यत्रापि जलपूरवता अपूर्णपूरणमुचितमेव। अत्र श्लोके उत्प्रेक्षालंकारः। यथा दण्डी, 'अन्यथैव स्थिता

वृत्तिश्चेतनस्येतरस्य वा। अन्यथोत्प्रेक्ष्यते यत्र तामुत्प्रेक्षाम्विदुर्बुधाः।' 'पूरो जलप्रवाहे स्यात् प्राणसंशुद्धिराद्ययोरि'ति* विश्वः।।६।।

*'...संशुद्धिचाद्ययोः' इति पाठ। मेदिन्यां तु 'पूरो जलसमूहे स्याद् व्रणसंशुद्धिस्वाद्ययो-रिति पठ्यते।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।६।। एवं पूर्वोक्तप्रकारेण श्रीराधाकृष्णयोः रहःक्रीडा वर्णिता। इदानीं तत्पुष्टिकारिणीं लीलाभूमिकामाह[१]। [२]सम्भोगरसपुष्ट्यर्थं विप्रयोगनिरूपणम् इति पूर्वमुक्तमेव।

''विप्रयोगात्मिका केलिः प्रथमे[३]सा निरूप्यते।
सम्भोगरसपुष्ट्यर्थं प्रेमवाक्यैर्वयस्यया।।''

तत्रापि श्रीराधोत्कर्षकथनाय यूथलीलामाह; पद्मेत्यादिना। मधुसूदनस्य [४]श्रीराधाधरामृत-पानकर्तुः; [५]षुञ् [६]अभिषवे; उरः वक्षःस्थलं वो युष्माकं प्रियं मनोभीष्टं अनुपूरयतु सम्पूर्णं करोतु। कीदृशम्? पद्मानि क्रीडार्थं विद्यन्ते यस्या [७]सा [८]पद्मवर्णा वा पद्माङ्किता सामुद्रिकशास्त्रोक्ता महासौभाग्यवती वा पद्मा श्रीराधा, तस्याः पयोधरतटी कुचाग्रं तस्य [९]परिरम्भेणालिङ्गनेन लग्नं [१०] यत्काश्मीरं कुङ्कुमं तेन मुद्रितं चिह्नितं सञ्जातमुद्रं वा।श्रीराधया स्वप्रेमदर्शनाय निजस्तनाग्रलिप्त[११]काश्मीरमुद्रैव दत्तेति भावः। खेलनेन विनोदेन [१२] अनङ्गक्रीडायां यः [१३] खेदः सुरतायासस्तेन यत्स्वेदाम्बु [१४] प्रस्वेदजलं तस्य पूरः प्रवाहो यत्र तादृशम्। कीदृशमिव? व्यक्तानुरागमिव व्यक्तः प्रकटीभूतोऽनुरागः स्नेहो यत्र तादृशमिव। अनेन श्रीराधानु- रागाधिक्यात्स्नेहः [१५]कुङ्कुमव्याजेन बहिर्निर्गत इति भावः। पक्षे पद्मा लक्ष्मीः, मधुसूदनो मधुदैत्यहन्ता। शेषं समानम्। पद्मा लक्ष्मीः स्मृता पद्मा पद्मचिह्नाऽपि कामिनी। ''काश्मीरं [१६]कुङ्कुमे प्रोक्तम्'' इति। अनेन दाक्षिण्यरूपो नायकगुण उक्तः। तल्लक्षणं शृङ्गारतिलके-''न मुञ्चत्यन्यचित्तोऽपि ज्ञेयोऽसौ दक्षिणो यथा''।। इति ।। यो गौरवं भयं प्रेम सद्भावं पूर्वयोषिति। शेषोक्तिरलङ्कारः।।६।।

[१]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां उत्कर्षवर्णनं नाम द्वितीयः प्रबन्धः।।२।।

१.पद्मेत्यादिना-फ.ज. २.वाक्यमिदं नास्ति-इ.फ.ग.ह.ज. ३.सन्निरूप्यते-इ.फ.ग.ह.ज. ४.श्री राधामृत-ग. ५.६.न स्तः-अ.ब. ७.नास्ति-इ.फ.ग. ८.नास्ति-फ. ९.परिरम्भणेन-अ.ब. १०.यत्काश्मीरकुङ्कुमं-अ.ब. ११.काश्मीरेण मुद्रैव-इ.ह.ज. १२.अनङ्गस्य क्रीडायां-फ.ज. १३.स्वेदः-अ. १४.स्वेदजलं-फ.ज. १५.कुङ्कुमरागव्याजेन-फ.ग.ह. १६.कुङ्कुमं-फ.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।६।। अधुना कवि: कामोद्दीपकत्वात्[२] वसन्तस्य वर्णनव्याजेन कृष्णक्रीडां व्याकर्तुं भक्तान् प्रत्यशिषं ब्रूते;[३] पद्मेति। मधुसूदनस्य कृष्णस्य उरो वक्ष:स्थलं व: युष्माकं प्रियं[४] अभिलाषं अनुपूरयतु इत्यन्वय:। कथम्भूतमुर: ? पद्मेति। पद्माया: लक्ष्म्या: पयोधरतटी स्तनपरिसरस्तस्य परिरम्भणेन आलिङ्गनेन लग्नं[५] यत्काश्मीरं कुङ्कुमकेसरं तेन मुद्रितं चिह्नितम्। ममैवेदं वक्ष:स्थलं[६] नान्यस्या इति भाव:।[७] कमिव ? व्यक्तानुरागमिव प्रकटानुरागमिव। पुन: [८]कीदृशमुर: ? खेलदिति। खेलत् खेलगतिं कुर्वन् योऽनङ्ग: कन्दर्पस्तस्य खेदेन सुरतायासेन[९] स्वेदाम्बुपूरो घर्मप्रवाहो यत्र। इति श्रीगीतगोविन्दटीकायां नारायणपण्डितकृतायां उत्कर्षवर्णनं नाम द्वितीय: प्रमन्ध:।।६।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।६।। अथ रासक्रीडार्थं मङ्गलमातनोति; पद्मेति। पद्माया: लक्ष्म्या: पयोधरयोस्तटयो: कुचतटयो: कुचपरिसरदेशयो: परिरम्भेण आलिङ्गनेन लग्नं काश्मीरकुङ्कुमं तेन मुद्रितं लक्ष्मीकुचाङ्गलिप्तं, अत एव व्यक्त: प्रकटीभूतोऽनुराग: प्रीतिविशेषो यस्मिन् तदिव। खेलन् क्रीडंश्चासावनङ्ग: मन्मथस्तस्य खेदेन आयासेन जात: स्वेदाम्बुपूर: घर्मोदकसङ्घो यस्मिन् तत्। मधुसूदनस्य माधवस्य उर: वक्ष:स्थलं व: युष्माकं प्रियं अभीष्टं आरोग्यैश्वर्यादिरूपं अनुपूरयतु वर्धयतु। आशिषि लोट्। अनुरागशब्देन प्रीतिवाचकेन शक्तिमत्त्वमपि प्रतीयत इति प्रीतेरकृत्रिमत्वम्। माधवस्य काश्मीरोल्लेपानुरक्तवक्ष:स्थलं बहि: प्रकटितानुमानत्वेन सम्भाव्यत इत्युत्प्रेक्षा। सा चानुरक्ता धर्मोत्प्रेक्षेत्युपगम्यते। काश्मीरलेपननिमित्तोपादानादुत्पादित[१] निमित्तता इवशब्दस्योत्प्रेक्षावाचकत्वाद्वक्तव्या। [२]तल्लक्षणन्तु,

मन्ये शङ्के ध्रुवं नूनं प्राय इत्येवमादिभि:।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृश:।।

अत्र रतान्तरं व्यज्यते। वसन्ततिलका वृत्तम्।।६।। [३]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्या- ख्यायां उत्कर्षवर्णनं नाम द्वितीय: प्रबन्ध:।।

१.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज. २.वसन्तवर्णनव्याजेन-क.वसन्तवर्णनं कृष्णक्रीडां कर्तुं-ड.वसन्तवर्णनव्याजेन कृष्णक्रीडां कर्तुं-ल.म. ३.श्लोकोऽयं सव्याख्यस्तृतीयप्रबन्धारम्भे दृश्यते-ड. ४.अभिलषितं-क. ५.यत्काश्मीर-ड. ६.नान्यस्य इति भाव:-क. ७.पुन: कथम्भूतमिव-ल.म.पुन:किम्-क. ८.कथम्भूतमुर:-क.ल.म. ९. स्वेदाम्बु घर्मजलप्रवाहो यत्रक. स्वेदाम्बुपूरो घर्मजलप्रवाहो यत्र-ल.म.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६।। पद्मेति। मधुसूदनस्य उरो वक्षः कर्तृ वो युष्माकं प्रियमीप्सितम् अनुपूरयतु इति योजना। अनुशब्दोऽत्र सादृश्यार्थः। युष्माकं भक्त्याद्यनुरूपं प्रियस्य पूरणं करोत्वित्यर्थः। यद्वा अनुरयं समीपार्थः पूरणस्य विलम्बाभावं द्योतयति तदा शीघ्रं पूरयत्विति व्याख्येयम्। ''अनु हीने लक्षणाझसहार्थे पश्चात्सादृश्ययोरपि। आयामे(से) च समीपे च।।'' इति। उरः किंविधम्? पद्मा लक्ष्मीस्तस्याः पयोधरौ स्तनौ, तयोस्तटी प्रान्तदेशः, तस्याः परिरम्भेण आश्लेषेण लग्नं यत् काश्मीरं कुङ्कुमं, तेन मुद्रिता मुद्रा प्रापिता। मुद्रासङ्केत(वृन्दः) सा सञ्जाता अस्येति तारकादित्वादितच् प्रत्ययः। लग्नं च तत् काश्मीरं चेति समासे केचित् ''न कर्मधारयः बहुव्रीहिरप्रतिपत्तिकरः'' इति दूषणमाचख्युः। तदसम्यक्। मुद्रितशब्दस्य सम्बन्धाभावात् तटस्थत्वाद् बहुव्रीहिप्रति-पत्त्यनुदयात्। यद्वा परिरम्भेण लग्नं काश्मीरं यत्र उरसि तल्लग्नकाश्मीरम्। अत एव मुद्रितमिव मुद्रितमित्युत्प्रेक्षागर्भलग्नकाश्मीरं च तत् मुद्रितं चेति समासः। अत्रोत्प्रेक्षते। व्यक्तानुरागमिव व्यक्तः, प्रस्फुटः कुङ्कुमव्याजनार्थादनुरागो लक्ष्म्याः प्रेम यत्र तत्तथा, कुङ्कुमस्य रक्तत्वात् अनुरागस्यापि कविसम्प्रदाये रक्तत्वेन वर्णितत्वात्। इवशब्दोऽत्र उत्प्रेक्षाव्यञ्जकः। तथा च दण्डी, ''मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः।।'' इति। ''अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा। अन्यथोत्प्रेक्षते यत्र तामुत्प्रेक्षां विदुर्बुधाः।।'' इति च। अत्र मुद्रितत्वं हेतुरुत्प्रेक्षायाम्। तद्यथा; लोके यस्य कस्यचिन्मुद्रिते वस्तुनि व्यक्त इव रागोऽनुमीयते। मुद्रितत्वात् प्रेक्षायां पुनः को हेतुरिति चेत्, उच्यते; अनुरक्तेन विष्णुना सखीभिर्वा लक्ष्मीस्तनतटे मकराद्याकारेण (मकर्याद्याकारेण) विन्यस्तं कुङ्कुमं निर्भरपरिरम्भात् भगवदुरसि सङ्क्रान्तमिति कृत्वा लग्नकुङ्कुमत्वमेव हेतुर्मुद्रितोत्प्रेक्षायां मुक्तायां (मुद्रायां) यत्किञ्चिद्रूपं सङ्केतार्थः तिष्ठति। कृष्णस्यन्दितनारीपरिभोगं मुद्राभङ्गं लिङ्गेन जानीयामिति परिलम्भलग्नकुङ्कुमव्याजेन लक्ष्म्या कृतसङ्केतं विष्णोर्वक्ष इति मुद्राभिसन्धिः। ममैवेदं नत्वन्यस्याः इत्यभिप्रायेण वा। पुनः किंविधम्? खेलदित्यादि[१०]। अनङ्गकृतखेदः अनङ्गखेदः सुरतश्रमः, तेन यः स्वेदाम्बुपूरः सः खेलन् विलसन् क्षरन् अनङ्गं खेदः स्वेदाम्बुपूरो यत्रेति व्यधिकरणबहुव्रीहिः। खेलन्निति अनङ्गं विशेषणं वा। ''पूरो जलसमूहे स्याद्(व्र)[गु]णसंशुद्धिखाद्ययोः'' इति **मेदिनी**। एतेन सुरतावसाने खिन्नं लग्नकुङ्कुमं भगवद्वक्षो वर्णितम्।

केचित् पुनरित्थं व्याचक्षते। भगवत उरो युष्माकं प्रियं पूरं व्रणसंशुद्धिः च अनुपूरयतु। किंविधम्? पद्मेत्यादि व्याख्यानं पूर्ववत्। मुद्रितं मण्डितमिति विशेषः। यथा कन्दर्पदीर्घकायाम्, ''प्रियमण्डनैः किमन्यैर्नामा(र्ममा)भरणेन मुद्रितं हि मुखं कन्दलयतीति कन्दर्पं मुनेर्मनसि।'' इति। एतेन लक्ष्म्याः स्तनाभोगादुरसि सङ्क्रान्तं कुङ्कुमं तत् प्रीत्या तथैव रक्षितं भगवता न तु प्रोञ्छितमिति विशेषणाभिप्रायः। अत एव प्रियासङ्गवशात् कामोद्रेकेण सात्त्विकविकारोऽपि समजनीत्याह; खेलदित्यादि। खेलता क्रीडता अनङ्गेन यः खेदो मनस्तापस्तेन स्वदाम्बुः यस्मिन्नुरसीति व्यधिकरणबहुव्रीहिः। यद्वा खेलद्वेपमानमित्युरसो विशेषणम्। अनेन वेपथुना सविकारः संवृत्त इति कथ्यते। तथा च भरतः, ''स्मरणे सङ्गमे चैव प्रियस्यालोकने तथा। हेतुत्रयं समासाद्य सात्त्विकः सम्प्रवर्त्तितः।।'' इति। सात्त्विकप्रकारमाह, ''स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः।।'' इति। उत्प्रेक्षते। व्यक्तानुरागमिव व्यक्तः कुङ्कुमव्याजेन स्फुरन् अनुरागो भगवतो लक्ष्मीविषयकप्रेम यत्रोरसि रागस्य मनोधर्मत्वादव्यक्तोऽपि स्वानुरागो वक्षसि कुङ्कुमरागव्याजेन भगवता लक्ष्म्या किं व्यक्तीकृत इत्युत्प्रेक्षार्थः।।६।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।६।। एवं प्रार्थ्य श्रोत्थन् प्रत्याशिक्षमातनोति पद्मेति। मधुसूदनस्य बक्ष्यमाणरीत्या श्रीकृष्णस्य उरो वो युष्माकं प्रियं वाञ्छितं अनु निरन्तरं पूरयतु। कीदृशं? पद्मा श्रीराधा तस्याः पयोधरप्रान्तभागपरिरम्भलग्नकुङ्कुमेन मुद्रितं मुद्रां प्रापितमित्यर्थः। अत्रान्या मा विशतु इत्यभिप्रायणैवेति भावः। अतएव खेलता अनङ्गेन यः खेदस्तेन स्वेदाम्बुनां पुरः प्रवाहो यत्र तत्। तत्रोत्प्रेक्ष्यते। व्यक्तः प्रकटीभूतोऽनुरागो यत्र तदिव। अन्तरूच्छलितः प्रियानुरागो बहिः काश्मीररूपेण उरसि आविर्भूत इत्यर्थः।।६।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६।। एवं स तुष्टः श्रोतृन् प्रति आशिषं कुर्वन्नाह; पद्मेति। मधुसूदनस्य श्रीकृष्णस्य उरो वक्षःस्थलं वो युष्माकमभीष्टमनु निरन्तरं पूरयतु पूर्णं करोतु। अत्र मधुसूदनपदेन कृष्णाभिधानं शृङ्गारोपयोगिपौरुषवीर्यद्या-तनार्थम् उर इति कुण्ठितबलवत् दैत्यास्त्रतया सकलविघ्ननिराशकत्वं सूचितम्। कीदृशम्, पद्मा श्रीराधा, श्रीकृष्णरतिविषयत्वात्, पद्माकारसौभाग्यरेखाङ्कितत्वात् वा। ''पद्मा लक्ष्मीः स्मृता पद्मा पद्मचिह्ना च कामिनी'' इत्यभिधानम्। तस्याः पयोधरतटी स्तनाग्रभागः, तस्य परिरम्भेणालिङ्गनेन यत् काश्मीरं कुङ्कुमं तेन मुद्रितं सञ्जातमुद्रम्। महाकामुकस्यास्य हृदयमन्यासु मा यातु, न चात्र

काप्यन्या प्रविशतु इति परमप्रेयसी सा स्वकुचाग्रलिप्तकाश्मीरेण किं मुद्रितं कृतवतीति भावः। अत एव व्यक्तः प्रकटीकृतः अनुरागो यत्र तत्। इवेत्युत्प्रेक्षायाम्। अन्तरुच्छलितप्रियानुरागो बहिः काश्मीररूपेण वक्षसि आविर्भूतः किमित्यर्थः। ननु प्रियानुरागोन्मत्तस्य कथं त्वत् प्रार्थनाश्रवणावकाशः, कथं वा अभीष्टपूरण सावधानतेति चेत् तत्राह खेलदिति। खेलता सर्वाङ्गीणतया सञ्चरताऽनङ्गेन हेतुना यः खेदः सुरतसम्पादनायासः, तेन स्वेदाम्बुपूरः घर्मजलप्रवाहः यत्र तत्तथा। अतः प्रियासम्भो-गजनितनिरतिशयानन्दसम्भृततयाऽवश्यं सफलयिष्यति मदभ्यर्थनामिति भावः। स्वयं भगवतस्तस्य सर्वेषामपि अङ्गानामेकैकं सर्वकर्त्तृत्वसामर्थ्येऽपि उरः प्रति प्रार्थनं तस्य शृङ्गारमयरसविशेषाभिज्ञत्वात् तत्कृतमिति ज्ञेयम्। अङ्गानां सर्वकर्त्तृत्वं यथा ब्रह्मसंहितायाम्,

> ''अङ्गानि यस्य सकलेन्द्रियवृत्तिमन्ति,
> पश्यन्ति पान्ति कंलयन्ति चिरं जगन्ति'' इत्यादि।।६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६।। पद्मापयोधरेति; पद्मावत्याः लक्ष्म्याः स्तनयुगलमालिङ्गनेन केशरविमृष्टवक्षसो रागेण श्रीकृष्णस्य वक्षसि लिप्तम्। अनेन वक्षरञ्जितेन श्रीकृष्णस्यानुरागोऽभिव्यज्यते। अपि चानेनानङ्गखेलं कन्दर्पकेलिरपि व्यज्यते। यथा भूतस्य रतिखेलजन्य-घर्माक्तक्लान्तता भवतां भक्तजनानां प्रियवाञ्छां परिपूरयतु।। श्रीकृष्णोऽत्र धीरललितनायकः शृङ्गारःरसः जयदेवस्य देवादिविषयारतिर्भावश्च। अत्र लक्ष्म्याः हृदि स्थितस्य रागस्य नाम शृङ्गारभावस्याभिव्यक्तिः श्रीकृष्णस्य हृदयं साक्षात् सञ्चरति। अर्थात् भगवतो रागेण लक्ष्म्या मुद्रा दत्ता नाम सम्मतिं च दत्ता। अर्थात् नेदं कुंकुमं परं हृदिस्थोऽनुरागः बहिर्भूत इव। कथमिति चेत् खेलदनङ्गखेदजातः सुरतश्रमजातः स्वेदाम्बुः। अत्र आलिङ्गने लक्ष्म्यामनुरागस्तु श्रीराधायाम् इति कुम्भनृपतिः। तेनावोचि श्रीराधामाधवयोः इति पूर्वपद्ये। अत्र मुग्धानायिका। कुशलो नाम शृङ्गारक्रीडायां दक्षः नायकः। अतः सम्भोगशृङ्गारः। वसन्ततिलकावृत्तम्। उत्प्रेक्षा आशीर्वर्णानु-प्रासालंकारौ च। अत्र कुम्भेनोच्यते; मधुसूदनस्य परमप्रेमास्पदकान्तोरःस्थलोपगूहनेन व्यक्तानुरागरूपकाश्मीरसंवलितस्य परमप्रीतिभाजन रसाद्यभक्तानां लक्ष्म्यानुपूरण-माशीर्वचनमुक्तं ततः सुतरामौचित्यमावहति । यदुक्तम्; पूर्णार्थदातुः काव्यस्य संन्तोषित मनीषिणः। उचितार्शीर्नृपस्येव भवत्यभ्युदयावहा।। इति।। ६।।

**७-वसन्ते वासन्तीकुसुमसुकुमारैरवयवै**
**भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम्।**
**अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया**
**वलद्बाधां राधां सरसमिदमूचे सहचरी ।।७।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७।। विरहिणीराधां विवर्णयिषुराह। वसन्ते राधामिदं वक्ष्यमाणं सरसं यथा स्यादेवमूचे सहचरीति वाक्यार्थः। वासन्तीकुसुमसुकुमारैरवयवैरुपलक्षितां "इत्थंभूतलक्षणे" इति तृतीयाः। कीदृशीं, कान्तारे भ्रमन्तीं "कान्तारं वर्त्मदुर्गमित्यमरः"। ननु कथं कान्तारे भ्रमन्तीमित्यर्थः। बहुविहितकृष्णानुसरणाम् अति बहुविहित कृष्णानुसरणं ययेतिविग्रहः। कथमसौ श्रीकृष्णमनुसन्दधातीत्याह। अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया[११] बलद्धाधामिति बलन्ती वर्द्धमाना बाधा पीडा यस्याः इति विग्रहः।।

अत्रापि कन्दर्प ज्वरजनिता असौ चिन्ता चेति समासेन कर्मधारय वहुव्रीहिः। प्रतिपत्तिकर इति दूषणं न कर्त्तव्यम्। आकुलता पदस्य केनचित् सम्बन्धाभावात् तटस्थत्वात् न वहुब्रीहि प्रतिपत्यानुदयात्। "पीडावाधाव्यथा दुःखम्" "वासन्ती माधवीलता" इत्यमर। शिखरिणीनामवृत्तम्।।७।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। इदानीं भणितेषु मरिचावचूर्णना सा (नूनं) कटुरपि स्पृहावहेति योगमाश्रित्य विप्रलम्भपूर्वको हि संभोगो रसिकजनरसनीयतामापद्यत इति कविना आद्यपद्ये कथावीजत्वेन संभोगस्य यद्विप्रलम्भपूर्वकत्वं सूचितं तदेव प्रकटीकुर्वन्कृष्णोत्कण्ठितां राधां काप्युत्तम्भितमुखेन हरिकथाया प्रोत्साहयन्त्याह; वसन्ते वासन्तीति। काचन सहचरी इदं वक्ष्यमाणं सरसं रसवत् राधामूचे उक्तवती। किंभूताम्? वसन्ते ऋतौ अमन्दं यथा स्यात्तथा कन्दर्पहेतुज्वरजनितचिन्ताकुलतया(११) चलद्वाधाम्। कन्दर्पहेतुज्वरजनित-चिन्ताकुलत्वेन चलन्ती यातायातं कुर्वाणा बाधा यस्याः। चिन्ताकूले हि चेतसि बाधा यात्यायाति चेति प्रसिद्धम्। किंभूताम्? बहु अनेकधा दूत्यादिना विहितकृष्णानुसरणां तदर्थमेव कान्तारे भ्रमन्तीम्। किंभूताम्? वासन्तीकुसुमवन्माधवीलताकुसुमवत्सु-कुमारैरवयवैरुपलक्षिताम्। वसन्ते हि माधवीकुसुममुद्रिक्तं भवति। अतः कामोद्रेकसौकुमार्ये च साम्यम्। अत्र लुप्तोपमालंकारः। दक्षिणो नायकः। तल्लक्षणम्; स्नेहलौल्यमवैषम्य-वशतस्तुल्यतामिषम्। नायिकास्वप्यनेकासु दक्षिणः स स्मृतो यथा। विरहोत्कण्ठिता नायिका। उक्ता भवति सा यस्याः संकेतं नागतः प्रियः। तस्याऽनागमने हेतुं चिन्तयत्याकुला

यथा।। (शृं. ति. १।७५) तस्या अभिलाषो नाम दशाविशेषो यथा, व्यवसायो भवेद्यत्र बाढं तत्संगमाशया। संकल्पाकुलचित्तत्वात्सोभिलाषः स्मृतो यथा।। वासन्तीकुसुम-सुकुमारैरित्यत्र लुप्तोपमालंकारः, वादेर्लोपे समासे वा कर्मधारक्वचि क्यङि। कर्मकर्त्रोर्णमुली इति। वृत्त्यानुप्रासः, एकस्याप्यसकृत्परः इति। शिखरिणीछन्दः; रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी। वैदर्भीरीतिः। तस्या अत्रोपनागरिकेति संज्ञान्तरम्। यथा माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकेष्यते इति। वलद्बाधाम् इति पाठे वलङ् सृतिसंवरणयोः इत्यात्मनेपदी। वलङः परस्मैपदत्वं चिन्त्यम्।।७।।

## (३) जगद्धरकृत-सारदीपिका

अधुना विरहोत्कण्ठितायाः राधायाः काचित्सखी कृष्णवार्त्तां वक्तुमाह वसन्ते इति । वसन्तकाले काचित्सहचरी सखी सविलासं वक्ष्यमाणां राधां प्रत्यूचे अवदत् कथंभूता राधा वासन्तीकुसुमसुकुमारैर्माधवीपुष्पकोमलैरवयवैरङ्गैरुपलक्षिताम् "उपलक्षणे तृतीया" कथंभूतां राधां कान्तारे दुर्गमे वर्त्मनि भ्रमतीं पुनः कथंभूतां बहुविहितं वारं वारं दूतिद्वारेण कृतं कृष्णानुसन्धानं यया पुनः कथंभूताम् अमन्दम् उत्कण्ठ्यं यथा स्यात्तथा कन्दर्पज्वरेण जनिता उत्पादिता या चिन्ता तत्कृताया आकुलता तया कृत्वा चलन्ती उद्गच्छन्ती बाधा पीडा यस्याः।।७।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।७।। एतावग्रन्थेभिधेयप्रयोजनकेलिवर्णनोपयुक्तनायकगुणप्रतिपादनपुरःसराणि मङ्गलानि विधाय कविः शृङ्गाररसप्रधानभगवत्केलिवर्णनं चिकीर्षुस्तत्संभोगापेक्षया विप्रलम्भस्यो-त्कृष्टत्वादादौ विप्रलम्भशृङ्गारवर्णनाय विरहोत्कण्ठितराधायाश्चरितानि वर्णयितुं प्रस्तावयति; वसन्त इति। संभोगापेक्षयात्र विप्रलम्भस्योत्कर्षं प्रति त्वालंकारिकाः "संभोगो विप्रलम्भेन न विना पुष्टिमश्नुते। कषयिते हि वस्त्रादौ भूयान्रागोऽभिजायते"। इति। श्लोकार्थस्तु; काचित्सहचरी सखी वसन्ते सरसं यथा स्यादेवं राधामिदं वक्ष्यमाणमूचे उवाच। कीदृशम्? अवयवैरुपलक्षिताम्। कीदृशैरवयवैः? वासन्तीकुसुमसुकुमारैर्माधवीलतापुष्पवत्कोमलैः। पुनः कीदृशम्? कान्तारे महारण्ये भ्रमन्तीम्। तत्र हेतुगर्भविशेषणमाह; बहुविहितेति। बहु वारंवारं विहितं कृतं कृष्णानुसरणमन्वेषणं यया तादृशीम्। अत्र हेतुगर्भविशेषणमाह; कंदर्पेति। कंदर्पज्वरेण जनिता या चिन्ता तत्कृता या आकुलता तया अमन्दमधिकं यथा स्यादेवं चलद्बाधां प्रवर्धमानपीडाम्। "अवयवैः" इत्यत्र जटाभिस्तापस इतिवत् इत्थंभूतलक्षणे तृतीया। "वासन्ती माधवीलता" **इत्यमरः**। "कान्तारं वर्त्म दुर्गमम्" इति च। "पीडा बाधा व्यथा दुःखम्" इत्यपि।।७।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।७।। एवं प्रधाननायिकामुपवर्ण्य कृत्यङ्गभूतं राधामाधवविहारं प्रतिज्ञातं सख्युक्तिव्याजेन प्रस्तौति। वसन्त इति। वसन्तसमये, वलन्ती वर्द्धमाना बाधा विरहवेदना यस्यास्तादृशीम्। वसन्तस्योद्दीपकत्वादाधाया वृद्धिरितिभावः। वलते वृध्यर्थत्वं च।

निपाताश्चोपसर्गाश्च धातवश्चेत्यमी त्रयः। अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शकः।।

इति अवगन्तव्यम्। अथवा बलन्तो चलन्ती बाधा यस्यास्ति बाधायाश्चाञ्चल्यं नाम सर्वाङ्गीणत्वम्, अतएव बहु अनेकप्रकारं विहितमाचरितं कृष्णस्य स्ववल्लभरूपस्य माधवस्यानुसरणमन्वेषणं यया तादृशं विरहवेदना निवृत्तेर्वल्लभलाभ साध्यतया तदर्थं तन्मार्गणमिति भावः।

किं च, कन्दर्पज्वरः(११) बिरहवेदनाजनितो मन्मथज्वरस्तेन जनिता उत्पादिता या चिन्ता मनःपीडा तयाकुलता व्याकुलीभावः कार्य्याकार्य्यविचारणा-भाबमित्यर्थः। तया हेतुना कान्तारे कण्टकपाषाणादिसंकीर्णदुर्गमपथे "कान्तारं वर्त्मदुर्गमित्यमरः"। वासन्तीकुसुमानि माधवीलताप्रसूनानि "वासन्ती माधवीलते-त्यमरः" तद्वत् सुकुमारैरत्यन्तकोमलैर्भ्रमणासमर्थैरिति यावत्। एतादृशैरप्यवय-वैश्चरणादिभिः करणैरमन्दं शीघ्रं यथा भ्रमन्तीम्। अनेन कृष्णान्वेषणेऽत्यादरः सूचितः। यथा लोके कश्चिदतिकोमलाङ्गोऽपि रागादिना संजातचित्तभ्रमः सन्नङ्गापाटवं मार्गाद्यसौष्ठवमप्यविचार्य्य वृथैव सर्बत्र वनं भ्रमतीति तथा विरहरागात् सर्वत्राटन्ती-मित्यर्थः। एतादृशीं राधां सहचरीति सहचरी सखीचरेषु इति टः। टित्वाङ्ङीप्।

सरसं मनोहरं यथा तथा इदं वक्ष्यमाणम् उचे उवाच, वचिरिति ब्रुवो वतिरादेशः, न तु वचे रूपम्। परस्मैपदप्रसङ्गात्। विरहातुराणां पुनस्तन्निवर्त्तकवचनोपन्यास एव न्याव इति मनीषया सरसमित्युक्तमि तिज्ञेयम्। यद्यप्याद्यश्लोके त्वमेव गृहं प्रापयेत्यनेन राधाया एव कृष्णेन सह प्रयाणं मध्ये मार्गं विहारश्च प्रतीयते न त्वन्यावस्थानप्। तथापि तत्तस्याः प्राधान्यं सूचयितुं न त्वन्यनिवृत्त्यर्थम्। तथा च राधायाः सहचरीलाभः। कृष्णस्य वक्ष्यमाणयुवतिजनविहारलाभश्च न विरुद्ध इत्यवगन्तव्यम्। वलदित्यत्रानुदात्ते तामात्मने पदस्यान्नित्यत्वाच्छत्रादेशः। तदनित्यत्वं च। क्षिङ्येङित्करणादवगन्तव्यम्। अथवा बलवतीति बलः। पचाद्यच्, स इवाचरतीत्याचार क्यवन्ताच्छत्रादेशः। उक्तं च, वामनेन, वलतेरात्मनेपदमनित्यं ज्ञापकादिति।।७।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।७।। कविरधुना कृष्णस्य वसन्तवनविहारवर्णनमारभमाणस्तत्प्रसङ्गम-वतारयति। काचित् सहचरी सखी सरसं सविलासं शृङ्गाररससहितं वा यथा स्यात्तथेदं वक्ष्यमाणं वाक्यं राधामूचे उक्तवती। किम्भूतां राधाम्? अमन्दं यथा स्यात्तथा कन्दर्पज्वरेण(११) कामजनितसन्तापेन जनिता चासौ चिन्ता चेति सा तथा, तया आकुलतया वैयग्र्यविशेषेण बलन्ती प्रकाशमाना बाधा पीडा यस्यास्ताम्। भगीरथादयस्तु आकुलतया दुःखेन वलन्ती बर्धमाना बाधा पीड़ा यस्या इति व्याचक्षते। तत्तु पौनरुक्तया उपेक्षितम्। पुनः किम्भूताम्? वासन्तीकुसुमसुकुमारैरवयवैर्लक्षिताम्। इत्थम्भूतलक्षणे तृतीया। पुनः किम्भूताम्? बहुविहितकृष्णानु-सरणाम्। पुनः कीदृशीम्? वसन्ते कान्तारे दुर्गमवर्त्मनि भ्रमन्तीम्। अत्र हरिविरहाकुलाया राधाया वसन्तसमये कान्तारभ्रमणे-नातिदुष्करकारित्वं दर्शितम्। वासन्ती माधवीलते'त्यमरः।।७।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।७।। [४]पूर्वश्लोकेन केलिरससान्द्र(ता) [५]मुक्त्वा तद्विधायिनी वासन्ती नाम्नी [१] कामुका प्रि(य) सहचरी सरलमिति [२] शृङ्गाररससहित - मनुनयसहितं वा यथा [३] भवति तथा वसन्तसमये राधामिदमूचे।

सहचरीलक्षणम्,

''स्वात्मनोऽप्यधिकं[४]स्नेहं कुर्वाणाऽन्योन्यमक्षयम्।
विस्रम्भिणी वयोवेषादिभिस्तुल्या सखी मता''।।इति।।

वासन्ती माधवी लता तत्कुसुमवत्सुकुमारैः कोमलैरवयवैरुपलक्षिता। पुनः कीदृशी? कान्तारे वने भ्रमन्ती इतस्ततो गच्छन्ती।[५] श्रीराधाविशेषणं[६]वा। भ्रमन्तीमित्यत्र हेतुगर्भविशेषणम्। बहु वारं[७] वारं कृतं श्रीकृष्णस्यानुसरणमन्वेषणं यया ताम्; अन्वेषणे हेतुः [८]पुनः[९]कीदृशी? अमन्दं अधिक यथा स्यात्तथा कन्दर्पस्य कामस्य ज्वरस्तापस्तेन जनिता उत्पादिता चिन्ता तया आकुलतया [१०] आकुलत्वेन। [११]वलद्बाधां [१२] वलन्ती [१३] प्रसरन्ती बाधा दुःखं यस्यास्ताम्। श्रीकृष्णविरहातुरत्वेन न च जीविष्यतीति भावः। [१४] महारण्ये दुर्गपथे [१५]''कान्तारः [१६]पुंनपुंसकम्'' **इत्यमरः** (३.३१७२)। ''पीडा बाधा व्यथा दुःखम्'' [१७]**इत्यमरः**(१.१०.३)। अवयवैरित्यत्र ''जटाभिस्तापस'' इतिवत्। ''वासन्ती माधवी लता'' **इत्यमरः** (२.४.७२) ।।७।।

१.निमित्ता-च. २.तल्लक्षणन्तु इति मन्य इत्यादिश्लोकान्ते दृश्यते-च. ३.नास्तीयं पुष्पिका-च ४.इतःपूर्वं ग ग्रन्थे दृश्यते चैवम्-कीदृशे? मधोर्वसन्तस्येयं माधविका। वसन्तो नायकः। माधविका वासन्ती नायिका

च; तस्या:परिमलेन सौरभेन ललिते मनोहरे। यद्वा मधुर्वसन्त: श्रीराधाधरामृतं वा, तत्प्रियत्वान्माधव: श्रीकृष्णो मधुप्रिया माधविका श्रीराधा, तस्या अङ्गपरिमलेन सौरभेण मुखपरिमलेन वा ललिते सुन्दर इति ध्वनि:। नान्यथेदृशी सौरभसम्पत्तिर्वसन्त (स्य) इति भावा:।।५.मउक्ता-अ.ब.फ.ग.

## (७) नारायणपण्डित-पदद्योतनिका

।।७।। अधुना विरहोत्कण्ठिताया: राधाया: काचित्सखी[१८] कृष्णवार्तामाह वसन्त इति। वसन्ते वसन्तकाले काचित्सहचरी सखी[१९] सरसं विलासं वक्ष्यमाणं राधां प्रत्यूचे अवदत्।[२०] कीदृशीं राधाम्? वासन्तीकुसुमसुकुमारै: माधवीपुष्प[२१]सुकोमलैरवयवैरङ्गै-रुपलक्षिताम्। उपलक्षणे तृतीया।[२२] पुन: कीदृशीम्? कान्तारे [२] दुर्गमे वर्त्मनि भ्रमन्तीम्।[३] पुन: कीदृग्विधाम्?[४] बहुविहितं वारं वारं दूतीद्वारा कृतं कृष्णानुसन्धानं यया। पुन:[५] कीदृशीम्? अमन्दमुत्कटं यथा स्यात्तथा कन्दर्पज्वरेण[६] जनितया चिन्तया आकुलता तया कृत्वा चलन्ती उद्गच्छन्ती बाधा पीडा यस्या:।।७।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।७।। वसन्तवर्णनोपयोगिनीं कथामारचयति, वसन्तेति। सहचरी सखी वसन्ते चैत्रवैशाखरूपे ऋतौ वासन्ती मल्लिका तस्या: कुसुमानीव सुकुमारा: कोमलास्तै: अवयवै: करचरणादिभि: रूपलक्षितेत्यर्थ:। कान्तारे दुर्गमार्गे भ्रमन्तीम्। बहु अनेकवारं विहितं कृष्णस्यानुसरणं मार्गणं यया ताम्। अमन्दं अत्यर्थं कन्दर्प: काम: तस्य ज्वर: ताप: तेन जनिता उत्पादिता चिन्ता कृष्णप्रापणोपायविचार: तया, आकुलस्य भाव: आकुलता विह्वलता तया वलन्ती वृद्धिमाप्नुवन्ती बाधा पीडा यस्यां ताम्। सरसं रागसहितं यथा स्यात्तथा इदं वक्ष्यमाणं अष्टपदीरूपं ऊचे उक्तवती। अत्रानुप्रासो वाचकलुप्तोपमालङ्कार:। शिखरिवृत्तम्।।७।।

१.कामुक्यपि सहचरी-इ.फ.ग.ह.ज.२.शृङ्गारसहितं-ग.३.स्यात्-ग.४.नास्ति-ग.५.६.न स्त:-इ.फ.ग.ह.ज.७.नास्ति-इ.फ.ग.ह.ज.८.९.न स्त:-ग.ह.ज.१०.व्याकुलत्वेन-इ.फ.ग.ह.ज. ११.चलद्बाधां-इ.ज.१२.वलती-अ.चलन्ती-इ.ज.१३.नास्ति-अ.ब.१४.अरण्ये दुर्गमपथे कान्तार **इत्यमर**:, कान्तारं वनदुर्गमित्यमर: ग.१५.कान्तार इति अमर:-ब.१६.नास्ति-इ.फ.ग.ह.ज.१७.इति च-ग. इत्यपि-इ.फ.इत्यपि च-ह.ज.१८.त:१९.पर्यन्तो भागो नास्ति-क.ल.म. २०.कथम्भूतां राधाम्-क.ल.म.२१.सुकुमारै:-ल.२२.कथम्भूतां राधाम्-क.ल.म.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।७।। इत्थामियता सन्दर्भेण भगवत: स्तात्रं कृतम्। अथेदानीं तस्यैव विलासकथां प्रवर्त्तयितुम् उत्तरप्रबन्ध:। ''न विना विप्रलम्भेन संम्भोग: पुष्टिमर्हति। कषायिते हि वस्त्रादौ भूयान् रागोऽनुरज्यते ।'' इति राधां विरहिणीं विवर्णयितुमाह। वसन्त इति।

वसन्ते ऋतौ सहचरी राधासखी राधामिदं वक्ष्यमाणम् ऊचे उक्तवती। ब्रूञः कर्त्तरि लिट्। यदूचे तत् कीदृशम्? सरसं रससहितम्। सरसमिति क्रियाविशेषणं वा। कीदृशीं कन्दर्पज्वरजनितचिन्ताकुलतया[११] अमन्दं यथा स्यादेवं बलद् राधां कन्दर्प एव ज्वरः दाहहेतुत्वात्, कन्दर्पज्वरः कामकृततापो वा तेन जनिता या चिन्ता किं कर्त्तव्यमिति विचारणा कृष्णानुस्मृतिर्वा तया या आकुलता व्याकुलीभावस्तया हेतुभूतया बलन्ती बाहुल्यमुपगच्छन्ती बाधा पीडा यस्या इति विग्रहः। बलनं नाम क्रमेणोपचयः स चावस्थितस्य वस्तुनो भवति कथं च प्रागवस्थानं राधाबाधाया इत्याकाङ्क्षायां विशेषेण द्वारेण तत्सिद्धिमवगमयति। पुनः किदृशीं? कान्तारे दुर्गमे वर्त्मनि महारण्ये वा वासन्ती माधवी लता तस्याः कुसुमैरिव सुकुमारैरसहनैरङ्गैर्भ्रमन्तीमितस्ततश्चलन्तीं सतीं बहु यथा स्यादेवं वा विहितं कृतं कृष्णस्यानुसरणं ययेति विग्रहः। वासन्तीकुसुम-सुकुमारैरवयवैरिति विशेषणे तृतीया वा।। ''कान्तारोऽस्त्री महारण्ये विले दुर्गमवर्त्मनि इति'' **मेदिनी**। कन्दर्पज्वरजनितचिन्ताकुलतया इत्यत्र कन्दर्पज्वरेण जनिता चिन्ता यस्याः इति बहुव्रीहिः। कन्दर्पज्वरजनितचिन्तात्वेन आकुला कन्दर्पज्वरजनित-चिन्ताकुला तस्या भावस्तत्ता तया तृतीयासमासे गतार्थत्वाद्भावप्रत्ययो वृत्तौ न प्रवृत्तः। यथा सधीरं वाति मरुत इति। किं वा कन्दर्पज्वरजनिता चासौ चिन्ता चेति विग्रहः। आकुलतयेत्यत्र त्वतलोर्गुणवचनस्येति गुणवचनस्य सामान्योपक्रमात् पुंवद्भावः।।७।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।७।। तदेवं मङ्गलसङ्गमेनैव माधवोत्कर्षमाविष्कृत्य उपक्रमोक्त श्रीराधामाधवरहः-केलिवर्णनोत्कलिकोच्छलितचित्तः कविः दक्षिणधृष्टशनायकगुणसमन्वयेन श्रीराधिकायाः श्रीकृष्णस्यानुकूलनायकताप्रतिपादनार्थं सूचीकटाहन्यायेन श्रीशुकोक्तिवत् साधारण्ये-नान्याभिस्तद्विहरणं समासे न समापयितुकामस्तेनैव श्रीराधिकायाः सर्वोत्कर्षमाविष्कर्त्तुं तत्र तस्याः अष्टनायिकावस्थां वर्णयन् सम्भोगपोषकविप्रलम्भशृङ्गारवर्णनाय प्रथमं विरहोत्कण्ठितामाह वसन्ते इति। विस्तृतिभयात्ते न विवृत्ताः। उत्कण्ठितालक्षणं यथाः-''उद्दाममन्मथमहाज्वरवेपमानां रोमाञ्चकण्टकितमङ्गकमावहन्तीम्। संवेदवेपथुघनोत्-पुलकाकुलाङ्गीमुत्कण्ठितां वदति तां भरतः कविन्द्रः।'' इति। वसन्त समये तत्सहचारिणी सखी श्रीराधिकां सरसं यथा स्यात्तथा इदं वक्ष्यमाणमूचे श्रीकृष्णाभिप्रायं ज्ञापयितुमिति ज्ञेयम्। कीदृशीं? माधवीपुष्पतोऽपि कोमलैरङ्गैरूपलक्षितां युक्तामित्यर्थः। तादृशीमपि दुर्गमे वर्त्मनि भ्रमन्तीम्। ननु कान्तारे कथं भ्रमति बहु यथा स्यात्तथा कृतं कृष्णान्वेषणं यया ताम्। अमन्दं यथा स्यात्तथा कन्दर्पेण कामेन

तत्प्राप्त्यभिलाषेण यो ज्वरस्तेन जनितया चिन्तयाकुलतया वलन्ती पीड़ा यस्यास्ताम्। अत्र तां विहाय अन्याभिस्तद्विहरणेनेदं गम्यते शारदीयराकारात्रौ प्रथमरासमहोत्सवे श्रीराधिकाया असमाबोर्ध्वं रूपगुणमनुभूय तस्यां सर्वविजयिस्वानुरागं सफलं मन्यमानस्य श्रीकृष्णस्य क्वचित् कदाचित् कथंचित् तत्सादृश्यं भवेन्नवेति स्थूणानिखननन्यायेन तद्विवित्सायां चिरमत्युद्भूतायां दिनकतिपयानन्तरं लीलेयमिति। अथवा तद्विवित्सायामत्युद्भूतायां तदिच्छानुसारिण्या योगमायया कंसानुज्ञाताक्रूरागमने कृते तदर्थमेवानेकनारीसंकुलां श्रीमथुरामसौ गतवान्। गत्वा च तत्र नारीप्रभृतिषु ब्रजसुन्दरीणामिव रूपगुणादिमनुभूय श्रीद्वारावतीं प्रति तदाशया जगाम। तत्र नेरन्द्रकन्या विवाह्यापि नरकासुराहृतगन्धर्वयक्षनागनरकन्यानां शताधिक षोड़शसहस्राणि विवाह्य तासु तास्वपि तासां सादृश्यं न लब्धं ततो दन्तवक्त्रवधानन्तरं पुनर्व्रजागमने जाते सत्येव लीलोयमिति। यथा पाद्मोत्तरखण्डे कृष्णोऽपि तं दन्तवक्त्रं हत्वा यमुनामूत्तीर्य नन्दव्रजं गत्वा सोत्कण्ठौ पितरौ अभिवाद्याश्वास्य ताभ्यां साश्रुकण्ठमालिङ्गितः सकलगोपवृन्दान् प्रणम्याश्वास्य बहुवस्त्राभरणादिभिस्तत्रस्थान् सर्वान् सन्तर्पयामासेति गद्येन। 'स्फुटं चमत्कारितया वत्सलं च रसं विदुः। स्थायी वत्सलता स्नेहः पुत्राद्यालम्बनं मतम्।' इति रसामृतसिन्धौ। तथा हि भागवते च प्रथमस्कन्धस्थ द्वाराकावचनम् 'यर्ह्यम्वुजाक्षापससार भो भवान् कुरून् मधून् वाथ सुहृद्दिदृक्षया। तत्राद्दकोटिप्रतिमः क्षणो भवेद् रविं विनाक्ष्मोरिव नस्तवाच्युत' इति। अत्र मधून् मथुरां च इति स्वामीटीका च सुहृदस्तदा तत्र श्रव्रजस्था एव। केशिमथनमिति हरिः कुवलयापीड़ेन सार्द्धमित्या-दिवक्ष्यमाणत्वात् प्रोषितभर्त्तृकाङ्गीकाराच्च।।७।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७।। एवं मङ्गलसङ्गमनेन श्रीकृष्णस्य नायकगुणाधारतया सर्वोत्कृष्टतामाविष्कृत्य सम्प्रति सकलप्रेयसीभ्यः श्रीराधायाः सर्वोत्कृष्टत्वं दर्शयितुं श्रीकृष्णस्यान्याभिः साधारणवसन्तोचितक्रीडां समासेनोद्घाटयन् तेन च तस्या विविधां नायिकावस्थां वर्णयितुकामः कविः,

''न विना विप्रलम्भेन सम्भोगः पुष्टिमर्हति।
कषायिते हि वस्त्रादौ भूयान् रागः प्रसज्यते।।''

इति न्यायानुरोधेन तथा-

''विप्रयोगात्मिका केलिः प्रथमे तु निरूप्यते।
सम्भोगरसपुष्ट्यर्थं प्रेमवाक्यैर्वयस्यया'' इति।।

रसवर्णनक्रमानुसारेण च प्रथमं तस्याः विरहोत्कण्ठावस्थामाह, वसन्तेति। वसन्ते वसन्तसमये, सहचरी सखी, तल्लक्षणन्तु,

''स्वात्मनोऽप्यधिकं स्नेहं कुर्वाणाऽन्योन्यमच्छलम्।
विश्रम्भिणी वयो वेशादिभिस्तुल्या सखी मता'' इति।।

सरसं सानुनयं यथा स्यात्तथा राधामिदं वक्ष्यमाणवृत्तान्तमूचे, अवभाषेति अन्वयः। श्रीराधाया गृहनिर्गमनसमय एव श्रीकृष्णवृत्तान्तीजिज्ञासार्थं पुरः प्रेषिता सखी परावृत्त्य तस्मै तद्वृतान्तं कथयामासेति विवेचनीयम्। कीदृशम्, अमन्दं वसन्तप्रभावात् पूर्वतोऽपि अधिकतमं यथा स्यात्तथा। कन्दर्पज्वरेण[११] प्रियविरहोद्भुत- कामसन्तापेन जनिता या चिन्ता, कथं तु प्राप्स्यामीति भावना, तया या आकुलता व्याकुलीभावः, तया बलन्ती प्रतिक्षणविलक्षणतया वर्धमाना बाधा दुःखं यस्यास्तादृशीं, सखी प्रेषणानन्तरं समाधायकासम्बिधाने उद्वेलन्मन्मथव्यथाकृताभिः, किमागतो भविष्यति, नैष्यति वा दुर्ल्लीलः, विचारयिष्यति वा मद्विषये किञ्चित् इत्यादिविविधचिन्ताभिः आकुलीकृता सा इति न, किन्तु आकुलतैव सम्पन्नेति भावप्राधान्यं प्रतिपादयता 'तल्' प्रत्ययेन बाधास्फुरणानामतिदुरन्तत्वं सूचितम्। अत एव कान्तारे कण्टकपाषाणादिसङ्कीर्णतया दुर्गमे पथि 'कान्तारं वर्त्म दुर्गमम्' **इत्यमरः**। वासन्ती कुसुमसुकुमारैर्माधवी-पुष्पतोऽप्यतिकोमलैरवयवैरङ्गैर्भ्रमन्ती- मनवस्थितचित्ततया इतस्ततो गच्छन्तीमित्यर्थः। किमर्थमेवं भ्रमन्तीत्यत आह, बहु, बहुवारं विहितं प्रतिकारान्तरादर्शनेनावश्यतया कृतं कृष्णस्य स्वचित्ताकर्षकस्यानुसरणमन्वेषणं यया ताम्। परमोत्कण्ठार्त्ति- भरेण सखीगमनकालबिलम्बमसहमानतया क्वचित् स्थातुमपारयन्त्याः कृष्णावस्थानवर्त्मान-भिज्ञतया दुर्गमेऽध्वनि किञ्चित् तत्सादृश्यभ्रान्त्या तत्र ततोपसृत्य पुनर्विशेष-दर्शनेनात्मभाग्यं निन्दन्त्याः तस्याः समुचितमेव तथा भ्रमणमिति भावः। ननु अतिधीराया विवेकिन्याश्च राधायाः कथं यावत् सखीप्रत्यागमनं स्थातुमशक्तिः, कथं वा सादृश्यदर्शननिबन्धनेन इतस्ततः कान्तारभ्रमणमित्याशङ्क्यावयवैरित्युक्तम्। द्रक्षावस्तद्वदनारविन्दमिति नयनयोः, श्रोष्यावस्तदुक्तिमाधुरीमिति कर्णयोः, घ्रास्यावस्तदङ्गसौरभमिति घ्राणयोः पास्यामि तदधरामृतमिति रसनायाः, आलिङ्गिष्यावस्तदङ्गलतिकामिति बाह्वोः गमिष्यावस्तदन्तिकमिति चरणयोरित्यादि-सहृदयहृदय साक्षिकाभिलाषपरतन्त्रतया सर्वेषामप्यवयवानां कृष्णैकतानत्वेन स्याधीनताऽभावात् यथा यथा ते नयन्ति तथा तथा गच्छन्त्यास्तस्याः क्व धैर्यं क्व वा विवेक इति भावः। वासन्तीत्युपमया वासन्तीकुसुमेषु इव निजाङ्गेषु अपि असहता

अभूत् तस्या विरहेण इति वस्तुध्वनिः। पचादिवत् पाठात् सुप्सुपेति समासाच्च सहचरीति साधु। बलदित्यत्र ''चक्षिङ् मङित्वेन अनुदात्ते विनिबन्धनात्मनेपदस्य नित्यत्वात् शत्रादेशः साधुः। 'ऊचे' इति ब्रुवो वचिरिति वचिरादेशः। न तु वचेरूपम्। परस्मैपदप्रसङ्गात्। विरहोत्कण्ठितालक्षणं यथा,

''उद्दाममन्मथमहाज्वरवेपमानाम्, रोमाञ्चकञ्चुकितमङ्गमलं वहन्तीम्।

संमोहवेपथुघनोत्कलिकाऽकुलाङ्गीमुक्तण्ठितां वदति तां भरतः कवीन्द्रः'' ।।

इति ।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। वसन्तेति; श्लोकेऽस्मिन् वसन्तकालस्य पुष्पसम्भारे वासन्तीकुसुमवत् माधवीलताकुसुममिव श्रीराधायाः सुकुमारावयवैः कोमलशरीरमुपमितम्। वासन्ती माधवी लता **इत्यमरः**, लुप्तोपमालंकारः। यतो हि वसन्ते माधवी लताकुसुमस्योद्रिक्तत्वात् कामोद्रेकेन सौकुमार्येण च साम्यं दर्शितम्। तस्मिन् समये श्रीकृष्णरनेकनारी सम्भोगार्थं बहुनारीपरिवेष्टितेन वने भ्रमति। तस्य नाना प्रकारेणान्वेषणं कुर्वता श्रीराधा इतस्ततः भ्रमणेन क्लान्ता। अस्यां विरहोत्कण्ठितदशायां श्रीराधा सखीमुवाच। श्रीराधायाः विरहोत्कण्ठितदशाद्वारा विप्रयोगेण भविष्यत् सम्भोगपुष्टिकरणार्थं यतते कविरिति। न विना विप्रलम्भेन शृङ्गारः पृष्टिमश्नुते इति वचनात्। नैके टीकाकाराः विषयेऽस्मिन् वदन्ति। विरहोत्कण्ठितालक्षणं **साहित्यदर्पणे** यथा;

आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत् प्रियः।

तदनागमदुःखार्त्ता विरहोत्काण्ठिता तु सा।।३/८६ इति।

तदपि **शृङ्गारतिलके** दर्शयामास **भोजः**, उक्ता भवति सा यस्याः संकेतं नागतः प्रियः ।तस्याऽनागमने हेतुं चिन्तयत्याकुला यथा।।१/७५ अपि च विरहदाशायां तस्या अभिलाषा दशा वर्णिताऽस्ति। तद्यथा **साहित्यदर्पणे**; अभिलाषः स्पृहाचिन्ता प्राप्त्युपायादि चिन्तनम्॥३/१९१ **शृङ्गारतिलके** यथा,

व्यवसायो भवेद्यत्र बाढं तत्संगमाशया। संकल्पाकुलचित्तत्वात्सोभिलाषः स्मृतो यथा।।

लुप्तोपमालंकारः वृत्यनुप्रासश्च ।शिखरिणीछन्दः। उपनागरिकवृत्तिः यथा; माधुर्यव्यञ्जकैर्वणैरुपनागरिकेष्वतः।। इति।।

अत्र कन्दर्पज्वर इव ज्वर पीडा अमन्दमधिकं कष्टंमनुभवति। तया चिन्तया व्याकुलता वर्धते।।७।।

।। तृतीयः प्रबन्धः / गीतम् ३ ।।

।। वसन्तरागण यतितालाभ्यां गीयते ।।

**१-ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे।**
**मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे।।**
**विहरति हरिरिह सरसवसन्ते**
**नृत्यति युवतिजनेन समं सखि! विरहिजनस्य दुरन्ते।। ध्रुवम्।।१ ।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।१ ।। ललितेति। वसन्तरागेण गीयते। रागध्यानम् -

शिखण्डिवर्होच्चयबर्द्धचूड़ः पुष्णन् पिक चूतलताङ्कुरेण।
भ्रमन्मुदा वाममनङ्गमूर्त्तिर्मतो मतङ्गस्य वसन्तरागः।।

किमाह सहचरीत्याह। हरिः इह सरसवसन्ते[१२] श्रीवृन्दावनविपिने विहरति युवतिजनेन समं, नृत्यति चेति वाक्यार्थः। विनापि चकारेण, चार्थोपगम्यते। यथा गामश्वं पुरुषं पशुमहरहर्नीयमानो वैवस्वतस्तृप्तिं नोपयातीति स्मरस्य तद्वदुक्तम्। अविदग्धश्चात्रयुवतिजनः प्रतिपत्तव्यः, विदग्धस्य सहावद्धावादिमन्तरेण नर्त्तनस्यानौचित्यात्, अतएव तेन समं हरेः क्रीडोत्कोर्त्तनं राधायाः न द्वेषजनकं सपत्न्याः सदोषसुरतोत्कर्त्तनस्य नार्य्या हर्षोत्पादकत्वात्, सरसोऽप्ययं वसन्तों विरहिणां दुःखदः।

यदाह विरहिजनस्य दुरन्त इति। संभोगिनां सुखदो यद्वक्षति तरुणाकारणबन्धाविति, त्वं चेत्, राधे! विरहिणी तस्मात् संभोगार्थं श्रीकृष्णसंकाशं ब्रजेदिति। गमनायप्रोत्साहनम्। कीदृशे वसन्ते, वृन्दावनविपिनेवेत्याह। ललितलवङ्गेत्यादि। अत्रापि ललिता चासौ लवङ्गलता चेति समासे न कर्मधारयो वहुब्रीहिः। प्रतिपत्तिकर इति दूषणं न वाच्यम्। परिशीलनशब्दस्य केनचित्सम्बन्धाभावात्तटस्थत्वाद्वहुब्रीहि प्रतिपत्यनुदयात्। ललितलवङ्गलतापरिशीलने कोमलो मलयसमीरो यत्रेति विग्रहः। अथान्यः कश्चित्पुनः कठिनोऽपि ललितनारीसम्पर्कान्मृदुतां प्राप्नोतीत्यभिप्रायः। अत्र कोमलपदोपन्यासान्मान्द्यं पुष्पसम्वन्धात्सौरभ्यं स्निग्धलतायोगाच्छैत्यं वायोर्ज्ञेयम्। मधुकरनिकरेण करम्विता मिश्रिता ये कोकिलास्तैः कूजितः। कुञ्जकुटीरो येनेति विग्रहः, ''करम्वितस्तु खचितं ऋषितं त्ववगुण्ठितम्। ह्रस्वा कुटी कुटीरः स्यात् स्तोमौघनिकरव्रजाः''।।१ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१ ।। अन्यत्रापि प्रयोगोऽप्यस्ति तथा सावेवोत्तरत्रोदा दूष्णवान् पुनर्बलः (?)। केवलादिति। अमुमेवार्थं विशदयति झम्पातालेन द्रुतद्वयेन विरामान्तेन, ललितेति। विशेषणसौकर्यार्थं पूर्वं ध्रुवपद व्याख्यायते; विहरतीति। इह राधासखी सबाधां राधां विनोदार्थं श्रीकृष्णं प्रति प्रेरयति; हे सखि राधे! सर चल। यं हरिं त्वं विलोकयसे स हरिरिह वृन्दावने वसन्ते वसन्तसमये विहरति। क्व सति ? शमं सशोभं साकं युवतिजने नृत्यति सति। किंभूते वसन्ते ? चलनार्थहेतुगर्भविशेषणम्। विरहिजनस्य दुरन्ते न इति नपि तु दुरन्ते एवेति काक्वोभयदर्शनम्। अथवा, जनो जीवनं तेन समं दुरन्ते। जीवनं वसन्तश्चोभयं विरहिणां दुःखप्राप्यं तस्मिन्। अथवा, सरसवसन्त इति पदम्। सरसः साभिलाषः स चासौ वसन्तश्च तस्मिन्। विहरति युवतिजनेन समं नृत्यति च। चकारोऽध्याहार्यः। इति ध्रुवपदम्।। ललितेति। ललितलवङ्गलतापरिशीलनेन कोमलनेन कोमलो मलयमारुतो यत्र वसन्त इति। एतेन शीतो मन्दः सुरभिश्चेति वायोस्त्रैविध्यमुक्तम्। अत्र लवङ्गलतासमीरयोर्नायि कात्वनायकत्वेनोद्दीपनविभावत्वमुवक्तम्। पुनः किंभूते वसन्ते ? मधुकरनिकरेण करम्बितैर्मिश्रितैः कोकिलैः कूजितः शब्दतः कुञ्ज एव कुटीरोऽल्पा कुटी यत्र वसन्ते।।१ ।।

## (३) जगद्धरकृत-सारदीपिका

।।१ ।। पूर्वोक्तमर्थं गीतेनाह ललितेति एतस्य वसन्तरागः रूपकतालः तल्लक्षणं शिखण्डवर्होन्वयबद्धचुडः पुष्णन्तिकं चूतलताङ्कुरेण भ्रमन्मुदावासमनङ्ग मूर्तिमत्तोमतङ्गस्य वसन्तरागः इति हे सखि! हरिः इह सरसवसन्ते विहरति, युवतिजनेन समं नृत्यति चेति ध्रुवगीतपदेनान्वयः। हे राधे ! हरिः कृष्ण इह अस्मिन् मनोहरवसन्तसमं ये क्रीडन्ति कामिनीसमूहेन सह नर्त्तनं करोति च कुत्र स्थले इत्यपेक्षायां सप्तमपद्ये स्थितं वृन्दावनविपिनशब्देनान्वयः। कीदृशे वसन्तसमये ललितेत्यादि सप्तपदिपदानि वसन्तसमय विशेषणानि ललितायाः मनोहरायाः लवङ्गलतायाः लवङ्गशाखायाः परिशीलनेन सम्पर्केण कोमलो गन्धमनोहर मलयसमीरो मलयानिलो यत्र अनेन वायोः सुगन्धत्वेन शीतत्वादीन्युक्तानि मधुकरेति मधुकरनिकरेण भ्रमरसमूहेन करम्बितैर्मिश्रितैः कोकिलैःर्कूजितः शब्दितः कुञ्ज एव लतागृहमेव कुटीरोऽल्पाकुटी यत्र ।।१ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१ ।। किमुचे इत्यतआह, ललितेति। गीतस्यास्य वसन्तरागः रूपकताल। गीतार्थस्तु, हे सखि! इह सरसवसन्ते शृङ्गारराप्रधाने हरिः कृष्णो विहरति क्रीडति। क्रीडाप्रकर्षमाह,

नृत्यतीति। युवतिजनेन सह नृत्यति। कीदृशे वसन्ते ? विरहिजनस्य वियोगिनो जनस्य दुरन्ते दुःखेनान्तः समाप्तिर्थत्र स तास्मिन। अथं वसन्तो विरहिणीदारूणौ न तु युवतीभिः सह क्रीडतः कृष्णस्य। त्वं विरहिणी यदि कृष्णं नानुसरिष्यसि तदा स तवापि दुरन्तो भविष्यतीति भावः। इदं च ध्रुवपदम्। "समं सह" **इत्यमरः**। वसन्तस्य सरसतामाह, ललितेति। ललिता मनोहरा या लवङ्गलता तस्याः परिशीलने संपर्केण कोमलो मृदुलो मलयसमिरो मलयाचलसंबन्धी वायुर्यत्र तादृशे। पुनः कीदृशो ? मधुकरनिकरेण भ्रमरसमूहेन करम्बिता मिश्रिता ये कोकिलास्तैः कूजितः शब्दयुक्तेः कृतः कुञ्च एव कुटीरेऽल्पकुटी यत्र तादृशे। स्तोमौघनिकरव्रातसंचयाः" "इत्यपि। मिश्रितेऽपि करम्बितम्" इति विश्वः। "अल्पा कुटी कुटीरः स्यात्" इति च।।१ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१ ।। सहचरी ऊचे इत्युक्तम्। तत्प्रकारमेव स्फुटयति ललितेत्यादि। अष्टताली। वसन्तरागेण गीयते इत्युक्तम्। अत्र हिन्दोल वसन्तो ग्राह्यः, न तु शुद्धवसन्तो हिन्दोलवसन्तस्येव क्रीतोपयोगित्वेन परिगणनात्। तदुक्तमृतुक्रीडाविवेके,

वसन्ते चूर्णविक्षेपो व्यात्याक्षी मन्मथार्च्चनम्।<br>
हिन्दोलरागगानं च पुष्पोपाचय एव च।।<br>
दोलाकेलिर्विवाहश्च माधवीसहकारयोः।<br>
अशोकवकुलादीनां तरूणां दोहदक्रिया।।

इति वसन्तराग स्वरूपं तु,

शिखण्डिबर्हेण निबद्धचूडः पुष्णन् पिकचूतलताङ्कुरेण।<br>
समं मुदा वासमनङ्गमूर्त्तिर्मतो मतङ्गस्य वसन्तरागः।।

तत्र विहरतीत्यादिना दुरन्त इत्युक्तम्। ध्रुवपदमिदम्। तत्रादौ ध्रुवपदं व्याक्रियते। अत्र कृष्णं मृगयमाणायै राधायै सखी कृष्णचेष्टितं कथयति।

हे सखि ! राधे ! "सखिशब्द सख्याशिश्वीतिभाषायामिति" (४।१।६२) निपातनात्साधुः। विरहिजनस्य प्रियेण प्रियया वा वियुक्तस्य जनस्येत्यर्थः। इदं स्त्रीपुरुषसाधारणम्। दुरन्ते निरवधिके यापयितुमशक्य इत्यर्थः। वसन्तस्य तटस्योद्दीपकत्त्वाद्विरहिजनं प्रति तस्य दुरन्तत्वमिति भावः। इहास्मिन् सरसः सकलकुसुममकरन्दसहितः अथवा श्रृङ्गारादिसमेतो वा, "श्रृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवेरसे" **इत्यमरः**। स चासौ वसन्तश्च तस्मिन्, अथवा, सरसः युवयुवतिघटना-चतुरः तादृशश्चासौ वसन्तश्च तस्मिन्निति वा घटनाचातुर्य्यं च। तस्योद्दीपकत्वादव-

गन्तव्यम्। हरि: पत्यादीन् परित्याज्यागतगोपिकाजनविहारी श्रीकृष्ण: युवतिजनेन तरुणीजनेन समं सह विहरति चूर्ण्णविक्षेपादिना क्रीडतीत्यर्थ:। चूर्ण्णविक्षेपादयस्तु समनन्तरमेवोक्ता:।

न केवलं क्रीडामात्रं अपितु तेन समं नृत्यति। क्रीडाजनितसन्तोषेण पताकप्रमुखश्चतुर्विंशदसंयुक्तहस्तै: अङ्गुल्यादिभि: संयुक्तहस्तै: चतुरस्त्रो वृत्तस्वस्तिकादिभि: संयुक्तहस्तैवा युवतिजनेन सह नृत्यमभिनयतीत्यर्थ:। इदमत्र वोद्धव्यम्, नर्त्तनं त्रिविधम्। तदुक्तं भावप्रकाशे,

तदपि त्रिविधं नाट्यं नृत्यनृत्तप्रभेदत:।
सुखदु:खात्मकं यत्र लोकवृत्तं निरूप्यते।।
आङ्गिकाद्यैरभिनयैर्वाक्यावर्याभिनयात्मकम्।
रसभाव समायुक्तं नाट्यं च परिचक्षते।।
भावादिभावसुभगं पदार्थाभिनयात्मकम्।
गात्रविक्षेपणं यत्र तन्नृत्यमिति गीयते।।
तन्नृत्तं स्याद्गीतवाद्यमिलत्तालयाश्रयम्।
उदिताभिनयं यत्र गात्रविक्षेपणं यदि।।
इदं देशीति कथितं तत्तद्देशजनेच्छया।
खङ्गकन्दूकवस्त्रादिदण्डकाच्चामरस्त्रज:।।
वीणादि वृत्वा यत्कुर्य्युर्नृत्तंतद्देशिकं भवेत्।
एतत्त्रयं द्विधा भिन्नं लास्यताण्डवसंज्ञया।।
सुकुमारं तयोर्लास्यमुद्धतं ताण्डवं विदु:।
चतुर्विधं लोकलास्यं कुण्डली दण्डरासकम्।।
प्रेरणा प्रेरणंचैव तत्तद्देशानुसारत:।

नृत्याङ्गभूताभिनय हस्तास्तु :-

पताकस्त्रिपताकश्चार्द्ध चन्द्र: कर्त्तरीमुख:।
अराल मुष्टिशिखरा कपित्थ: कटकामुख:।।
शुकतुण्डश्च लाङ्गुल: पद्मकोषोऽरपल्लव:।
सूचीमुख: सर्पशिराश्चतुरो मृगशीर्षक:।।
हंसास्यो हंसपक्षश्च भ्रमरो मुकुरस्तथा।
ऊर्ण्णनाभश्च सन्दर्शस्ताम्रचूडोऽपर:क्रर:।।

अञ्जलिश्च कपोताख्य: स्वस्तिक: कटकस्तथा।
दोलापुष्पपटोत्सङ्ग: कटको वर्द्धमानक:।।
जगदन्तश्चावहित्थो निषधो मकरध्वज:।
बन्धनश्चेति हस्ता: स्यु: संयुक्तास्तु त्रयोदश:।।
एतेऽभिनयहस्ता: स्यु: सप्तत्रिंशन्मुनेर्मता:।

असंयुक्ताभिनय हस्तलक्षणानि तु;

अङ्गुष्ट: कुञ्चिताकारस्तर्जनी मूलमाश्रित:।
सपताक इति ख्यात: पताकाकारधारणात्।।
पताकानामिका नम्ना त्रिपताक: स उच्यते।

त्रिपताक: :

पताकाङ्गुलय: किञ्चिन्नम्ना दूरेण विच्युता।
अङ्गुष्ठा यदि विद्वद्भिरर्द्ध चन्द्रोऽर्द्धचन्द्रवत्।।

अर्द्धचन्द्र: :

तर्जनी त्रिपताकस्य मध्यमा पृष्ठदर्शिनी।
यदा भवेत्तदा तज्ज्ञै: ज्ञातव्य: कर्त्तरीमुख:।।
अङ्गुष्ठ: कुञ्चितो नम्नश्चन्द्ररेखेब तर्जनी।
पराभिन्नार्थ बलिता यत्र सोऽयमरालक:।।
अङ्गुष्ठं पिण्डरोन्मध्यं शेखरस्य करस्य चेत्।
मुष्टिहस्तस्तु संप्रोक्तो नाट्यविद्याविशारदै:।।
प्रदेशे न कपित्थ: स्यातलस्था प्रासमुन्नत:।
अङ्गूष्ठो यदि विद्वद्भिर्ज्ञातव्य: शेखर: क्रर:।।
भवेत्युत्कटकाख्यस्य मध्या नाम कनिष्ठिका:।
तलमध्ये स्थिता स्वाग्रै: कपित्थोऽयमुदाहृत:।।
यदा प्रदेशिनी मुद्रा मुखेऽङ्गुष्ठेन पीडिता।
तले मध्ये तु नमिता शेषो वक्त्रेऽध्वगे तथा।।
कटकामुख हस्तोऽयमुच्यते नृत्यकोविदै:।
भ्रूलतेव यदा वक्रा तर्जन्यङ्गुष्ठसङ्गता।।
नमिताऽनामिको शेष कुञ्चितोदञ्चिते यदा।
शुकतुण्डक तं प्राहुराचार्य्या भरतादय:।।

अङ्गुष्ठतर्जनीमध्या विरलाग्रत्रिकोणवत्।
हंसस्य स्वनतानामि तदा लाङ्गुल इष्यते।।
आसन्नाग्रास्तदाङ्गुल्य: विशिष्टा परितोऽध्वगा:।
पद्मकोषस्तदा ज्ञेय किञ्चिद्विकसिताब्जवत्।।
तलेऽङ्गुल्य: पृष्ठ गास्तु कथिता विरला: क्रमात्।
कनिष्ठा पूर्विका यत्र स भवेदरपल्लव:।।
सकटामुखहस्तस्य तर्जनी स्याद् यदायता।
सूचीमुखकरं प्राहुर्नृत्यविद्याविशारदा:।।
यदि निध्नं पताकस्य तलं सर्बशिरा भवेत्।
कनीयस्योन्नता यत्र परिश्लिष्टा प्रसारिता।।
स्यातां सर्वकराङ्गृष्ठ कनिष्ठे ऊर्ध्ध्वगे यदा।
तदा मृगशिरा: प्रोक्त पण्डितैर्नृत्य कोविदै:।।
संगताग्रमुखा यत्र तर्जन्यङ्गुष्ठमध्यमा:।
उन्नते विरले शेषे हंसास्यं तदुदीरितम्।।
कनीयसी पताकस्य पश्चादपसरेद्यदि।
अन्याङ्गूल्यत्रयं मूले मनाच्चावनतं तदा।।
हंसपक्षकरं प्राहुराचार्य्या भारतवेदिन:।
मध्याङ्गुष्ठौ सङ्गताग्रौ कुञ्चिता तर्जनी मनाक्।
परिकरस्थले स्यातां विरले ताम्रचूडके।।
सङ्गताभ्यां पताकाभ्यामञ्जलि: परिकीर्त्तिता।।

शेषं संयुक्तलक्षणानि सङ्गीतरत्नाकरे द्रष्टब्यानि। ग्रन्थगौरवभयान्न लिख्यन्ते। शिष्टानृत्योपयोगिप्रक्रिया तरङ्गलक्ष्मीविलासे द्रष्टव्या। प्रकृतमनुसराम:। कीदृशे वसन्ते विहरतीत्याकाङ्क्षायामाह। ललितेति। ललिता रमणीया लवङ्गलता देवकुसुमवल्ली वलङ्गदेवकुसुममित्यभिधानम्। तया परिशीलनं सम्पर्क: तेन कोमल: कुमार: अथवा तया परिशीलनं सम्पर्को यस्य तादृश:। अनेन सौरभ्यं सूचितम्। कोमल: मन्दसञ्चार: अनेन मान्द्यं सूचितम्। निश्वासम्भृतत्वादेव तस्य शैत्यं मन्दसिद्धि:। एवं विधो मलयसमीरश्चन्दनानिल: यस्मिन्। तादृशे, किंच मधुकराणां मधुव्रतानां निकर: समूह तेन करम्बिता: मिलिता: ये कोकिलास्तेषां कूजितमव्यक्तशब्दो येषु तानि मधुपझङ्कारै: कोकिलरवैर्मुखरितानीत्यर्थ:। एवं विधानि कुञ्जकुटीराणि लतागृहरूप स्वप्नमन्दिराणि यस्मिन्, तादृशे, एवंविधे वसन्ते हरिर्विहरतोत्यन्वय:।।१ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१ ।। वसन्तरागः। रूपकतालः। रागलक्षणम्; शिखण्डिबर्होच्चय बद्धचूडः पुष्णन् पिकं चूतलतांकुरेण। भ्रमन्मुदा वाममनङ्गमूर्त्तिर्मतङ्गमत्तः स वसन्तरागः[ऽ]’।। सरसमिदमूचे सहचरीति यदुक्तं तत् कथयति; हे सखि राधिके! इह सरसे लोकानुरागसहिते वसन्ते मधुसमये युवतिजनेन समं हरिर्विहरति क्रीडति नृत्यति च। यद्वा वसन्ते मधुसमये विहरति सति हरिः युवतिजनेन समं नृत्यतीति योज्यम्। कीदृशे वसन्ते? विरहिजनस्य दुरन्ते भगवद्विश्लिष्टस्य जनस्य दुरन्ते, दुःखेनान्तो यस्य एतादृशे। पुनः कीदृशे? ललिताया लवङ्गलतायाः परिशीलनेन सम्बन्धेन कोमलो मृदुः मलयसमीरो यत्र एतादृशे।

अत्र स्वभावात् मन्दगतेर्वायोः लवङ्गलतापरिशीलनं न तु लवङ्गलतापरिशीलनेन मान्द्यम् तथापि लवङ्गलताऽत्र नायिकात्वेन निरूपिता, मलयसमीरश्च नायकत्वेन निरूपित इति नायिकासम्बन्धेन नायकस्य मृदुत्वं सूचितमेवेति उत्प्रेक्षालङ्कारः। तथा चोक्तम्, ‘अन्यथैव स्थिता वृतिश्चेतनस्येतरस्य च। अन्यथोत्प्रेक्ष्यते यत्र तामुत्प्रेक्षाम्विदुर्बुधाः।।’ अत्र लवङ्गलतासम्पर्केण मन्दत्वप्रतिपादनेन अर्थवशप्राप्ततद्वनोद्भूतपुष्पादिसम्पर्केण शीतलत्वसुरभित्वप्रतिपादनेन वायोस्त्रैगुण्यं वर्णितम्। पुनः किम्भूते? मधुकराणां निकरः समूहः, तेन करम्बितो मिश्रितश्चासौ कोकिलश्चेति मधुकरनिकरकरम्बित-कोकिलः, तेन कूजितः शब्दायमानः कुञ्ज एव कुटीरोऽल्पकुटी यत्र। ‘अल्पा कुटी कुटीरः स्यात् मिश्रितेऽपि करम्बित’ इति **शाश्वतः**।।१ ।।

[ऽ]‘......मूत्तिर्मतो मतङ्गस्य वसन्तरागः’ इति पाठ।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।१ ।। वसन्तरागे यतिताले। रागरूपम्-

“ शिखण्डिबर्होच्चयबद्धचूडः पुष्णन् पिकं चूतलताङ्कुरेण।”

“भ्रमन्मुदा वासमनङ्ग[१]मूर्ति-र्मत्तो मतङ्गस्थवसन्तरागः।।”

ताललक्षणम्; लघुद्रुतौ यत्र [२] ताले यतितालस्स कथ्यते। सरसमिदमूचे इति श्लोकोक्तं प्रपञ्चयति - ललितेत्यादिना [३] गीतेन। हे सखि [४] राधे इह राधे [५] वैशाखे वा [६] हरिर्मनोहरो नन्दसूनुर्विहरति विहारं [७] करोति। इह [८] विहरतीति समक्षं दर्शयति। [९] न हि विरहे परतो दर्शनं सम्भवति तथा विरहातुरा न सम्भवतीति भावः। [१०]तत्राप्येको न विहरति किन्तु युवतिजनेन [११]समं [१२]व्रजयुवतिसमूहेन समं [१३]सह

नृत्यति नृत्यं करोति। अनेन [१४] व्रजयुवतियूथलीला प्रोक्तेति भावः। कीदृशं इह? सरसवसन्ते[१२]। शृङ्गाररस[१५]सहितवसन्तसमये। पुनः कीदृशे? विरहिजनस्य दुरन्ते[१६]विरहिणो जना गोपीजनाः यस्य श्रीकृष्णस्य दुःसहे; त्वां विनेत्यर्थः। [१७]अथ वा [१८] विरहिजनस्य दुरन्ते [१९]दुःखेनान्तः समाप्तिर्यस्य तादृशे। [२०]वियोगिजनानां दारुणो न तु विहरतां युवतिभिस्सह। यदि [२१]श्रीकृष्णं नानुव्रजिष्यसि तदाऽयं [२२]वसन्तस्तवापि दारुणो भविष्यतीति भावः। ध्रुवपदम्। वसन्तसरसतामाह; ललितेति। ललिता कमनीया या लवङ्गानां लता तस्याः परिशीलनेनालिङ्गने न कोमलो[२३]मृदुलो [२४]मलयस्य चन्दन; पर्वतस्य वा समीरो वायुर्यत्र। अनेन वायुस्त्रिविधो वर्णितः। कोमलेति मन्दत्वम्; लवङ्गेति सुगन्धित्वम्; ललितेति शीतलत्वम्। पुनः कीदृशे? मधुकरा मधुकर्तारो ये न तु तत्पानकर्तारस्तेषां निकरेण समूहेन करम्बिताः संयुक्ताः ये कोकिलास्तैः कूजितं शब्दितं कुञ्जकुटीरं अल्पकुञ्जमन्दिरं यत्र। त्वां विना बृहत्कुञ्जमन्दिरमपि कुटीकृतं तुच्छमिति भावः मधुकरयुक्ताः कोकिलाः [१]त्वद्विरहखेदेनैव कूजन्तीति ध्वनिः। [२]''अल्पा कुटी कुटीरं स्यात्'' **इत्यमरः**। [३]''समूहनिकरव्यूह'' इत्यपि (**अमरः**-२.५.३९१) ''करम्बितं तु सयुंक्ते समूहार्थे[४] उत्सुकेऽपि च'' इति **भोजे**। ''समीरमारुतमरुज्जगत्प्राणसमीरणाः'' **इत्यमरः** (१.१.६२)। [५]''मधुव्रतो मधुकरो मधुलिण्मधुपालिनः'' इति च (**अमरः**-२.५.२९)। [६]''स्तोमौघनिकरव्रातवारसङ्घातसञ्चयाः'' इति च [७](**अमरः**-२.५.३९)। [८]स्वभावोक्तिरलङ्कारः।।१।।

१.वसन्तरागेण रूपकतालेन गीयते-च. एतस्य वसन्तरागः रूपकतालः-ड. २.दुर्गमवर्त्मनि-क.ल. ३.पुनः कथम्भूताम्-क.ल.म. ४.नास्ति-क. ५.कथम्भूताम्-ल.म.कथम्भूतां राधाम्-क. ६.जनितया उत्पादितया चिन्तया या-क.जनितया उत्पादितया चिन्तया-ल.म.

१.मूर्तिमतो मतंगस्थ-ग. मूर्तेर्मत्तो मतंगस्थ-ज २.तालौ-अ.ब.इ.फ.ग.ह.ज. ३.नास्ति-अ.ब. ४.नास्ति-अ.ब.ह. ५.चत्रे वैशाखे वा-ह. ६.मनोहरो-अ. ७.करोति समक्षं दर्शयति-ग. ८.विहरइति-अ.विहरसीति-ब. ९.न हि विरहे पुरतो दर्शनं भवतीति भावः-इ.ग.ह.ज. न हि विरहे पुरतो दर्शनं सम्भवतीति भावः-फ. १०.तत्रापि नैको विहरति-ब.इ.फ.ग.ह.ज. ११.नास्ति-इ.फ.ग.ह.ज. १२.व्रजवधूसमूहेन-ब.इ.फ. १३.नास्ति-अ.ब. १४.व्रजयुवतिलीला-ग. १५.सहिते-ज. १६.तः १९.पर्यन्तो भागो नास्ति-अ.विरहिणोऽपि न गोपीजना न तु विहारो यस्य गोपीजनस्य दुःखहेच्छां विनेत्यर्थः-ब. १७.यद्वा-ग. १८.विरहिजनस्य बियोगिनो जनस्य-इ.फ.ग.ह.विरहिजनस्य वियोगिजनस्य-ज. २०.वियोगिनां-फ.ग.ह.ज.वियोगिनो-इ. २१.श्रीकृष्णो नानुव्रजिष्यति-फ.ग. २२.वसन्तोऽपि तव-फ. २३.नास्ति-अ.ब.ग. २४.मलयस्य वा समीरो-ग.मलयस्य पर्वतस्य समीरो-फ.ह.ज.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।१ ।। पूर्वोक्तमर्थं गीतेनाह,[९]ललितेति। [१०] एतस्य वसन्तराग[११] स्तल्लक्षणम्-

''शिखण्डिबर्होच्चयबद्धचूडः पुष्णन् पिकं चूतलताङ्कुरेण।
भ्रमन्मुदा वासमनङ्गमूर्तिर्मत्तो [१२]मतङ्गस्थवसन्तरागः।।''

हे सखि! हरिरिह सरसवसन्ते[१२] विहरति युवतिजनेन समं नृत्यति चेति [१३]ध्रुवगतेनान्वयः। हे राधे! हरिः कृष्णः इहस्मिन् मनोहरवसन्तसमये क्रीडति। कामिनीसमूहेन सह [१४] नर्तनं [१५] करोति। कीदृशे वसन्ते ? विरहिजनस्य वियोगिजनस्य दुरन्ते दुःखेनान्तः समाप्तिर्यस्य तादृशे। कुत्र स्थल इत्यपेक्षायां सप्तमपद्यस्थितेन बृन्दावनविपिनशब्देनान्वयः। कीदृशे वसन्तसमये ? ललितेत्यादिसप्तपदीपदानि वसन्त [१६]समयविशेषणानि। ललिताया मनोहराया [१७]लवङ्गलताया [१८]लवङ्गलताशाखायाः परिशीलनेन सम्पर्केण कोमलो गन्धमनोहरो मलयसमीरो मलयानिलो यत्र। अनेन वायोः सुगन्धित्वमन्दत्व,

१.त्वद्विरहखेदेनेव-फ.त्वद्विरहेणैव-ग. २.अल्पा कुञ्जकुटी स्यात्-ग.ह.ज. ३.तः४.शुकेऽपि च-ब.५.मधुकरो मधुव्रती मधुलिहो मधुपालिन इति च.ब.इ.फ.ह.ज. ६.स्वोमस्वनिकरव्वातवार संघातसंचय इत्यपि-ब. स्तोमश्च निकरव्रातवारसंघातसंचयाः-इ.फ.ग.ह.ज.७.पर्यन्तो भागो नास्ति-अ.८.स्वभावोपमालङ्कारः-अ.ब.९.नास्ति-ड.क.१०.तस्य-ल.म.१३.ध्रुवपदेनान्वयः-ल. ध्रुवपदगतेनान्वयः-म. ध्रुवगतपदेनान्वयः-क.१४.वर्तनं-ड.१५.करोति च-ल.म.१६.समये-ड.ल.म.१७.नास्ति-ल.म.१८.लवङ्गशाखायाः-क.ल.म.

[१]शीतलत्वान्युक्तानि। मधुकरेति। मधुकरनिकरेण भ्रमरसमूहेन करम्बितैर्मिश्रितैः [२]कोकिलैः कूजितः शब्दितः [३]कुञ्ज एव लतागृहमेव [४]कुटीरोऽल्पकुटी यत्र।।१ ।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।१ ।। ललितेति।

रागश्शुशुद्धवसन्तोऽयं सांशन्यासग्रहस्तथा।
पवर्जितषाडवोऽपि ह्यवरोहेऽपि संयुतः।।
एवं लक्ष्ये प्रसिद्धोऽसौ गेयो यामे तुरीयके।।

प्रथमं ध्रुवो व्याख्यायते सर्वत्रानुषङ्गात्। इह पुरोवर्तिनि देशे। सरसः शृङ्गारादिरसेन सहितश्चासौ वसन्तः कालः तस्मिन् हरिः कृष्णो विहरति क्रीडति। युवतीनां वल्लवीतरुणीनां जनेन समुदायेन समं सह नृत्यति। कथम्भूते वसन्ते ? विरहिजनः वियुक्तलोकः तस्य दुरन्ते नेतुमशक्ये। एवमन्यानि विशेषणानि सर्वाणि ललितादीनि

वसन्तवेद्यानि। सर्वाण्यष्टाविंशन्मात्राणि दलानि। ललितेति। ललिता: रुचिरा: लवङ्गलता: देवकुसुमवल्ल्य: तासां परिशीलनं चालनं कम्पनमित्यर्थ:। तेन कोमल: सुकुमार: मलयसमीर: दक्षिणवायु: यस्मिन् तस्मिन्। लवङ्गेन सुरभिकोमलेन मन्द: मलयग्रहणेन शीत इति वायो: सौरभ्यमान्द्यशैत्यानि वर्णितानि। मधुकराणां भ्रमराणां निकरेण समुदायेन करम्बिता: मिलिता: कोकिला: तेषां कूजितं रुतं गुञ्जितं च यस्य तत् तादृशकुञ्जकुटीरं कुञ्जरूपगृहं यस्मिन् स: तस्मिन्।।१ ।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१ ।। वसन्तरागस्य लक्षणमाह, ''शिखण्डिवर्होच्चयबद्धचूड: पुष्णन् पिकं चूतलताङ्कुरेण। भ्रमन् मुदाराममनङ्गमूर्त्तिर्मतो मतङ्गस्य वसन्तराग:।। किमाह सहचरीत्याह ललितेति। हे सखि ! हरि: इह सरसवसन्ते(१ २) रससहितवसन्तसमये श्रीवृन्दावने विहरति। युवतिजनेन समं नृत्यति चेति वाक्यार्थ:। चकारोऽध्याहर्त्तव्य:। युवतिजनेनेति जातावेकवचनम्। अविदग्धश्चात्र युवतिजन: प्रतिपत्तव्यो विदग्धस्य हावभावादिमन्तरेण नर्त्तनस्यानौचित्यात्। अत एवैतेन समं हरे: क्रीड़ोत्कीर्त्तनं राधाया न द्वेषजनकम्। सपत्न्या: सदोषसुरतोत्कीर्त्तनस्य नार्या हर्षोत्पादकत्वात् सरसोऽप्ययं वसन्तो विरहिणां दु:खद:। यदाह विरहिजनस्य दुरन्ते इति संभोगिनां सुखद:। यद् वक्ष्यति तरुणाकारणबन्धाविति। त्वंचेद्राधे विरहिणी तस्मात् संभोगार्थं श्रीकृष्णसकाशं व्रजेति गमनाय प्रोत्साहनं, केचिदत्र सप्तमपदस्य ''वृन्दावनविपिन'' इत्यस्य विशेषणानि कुर्वन्ति। तेषां मते सरसो वसन्तो यत्र वृन्दावनविपिने तद्यथा तस्मिन्। वसन्ते किं विधे ? वृन्दावनविपिने वा ललितेत्यादि ललिता मनोहरा या लवङ्गलता तस्या: परिशीलनेन स्पर्शेन कोमलो मृदुमलयसमीरो यत्रेति विग्रह:। ''कोमलं त्रिष्वभिनवे मृदुले न द्वयोर्जले'' इति **विन्ध्यवासी**। यथा अन्य: कश्चित् पुमान् कठिनोऽपि ललितनारीसम्पर्कात् मृदुतामाप्नोतीत्यभिप्राय:। यद्वा; ललित: ईप्सित: लवङ्गलता-परिशीलनेन कोमलश्च मलयसमीरो यत्र तत्र कोमलपदोपन्यासामन्माद्यं, लवङ्गलतास्पर्शेन सौरभ्यम्। वसन्ते तस्या: पुष्पितत्वात् स्निग्धलतायोगात् मलयसमीरस्य सहजशीतलत्वाद् वा शैत्यं वायोर्ज्ञेयम्। पुन: किंविधे ? मधुकराणां निकरेण करम्बिता मिश्रिता ये कोकिला स्तेषां कूजित: कुञ्जकुटीरो यत्रेति विग्रह:। कूजत्यस्मिन्निति कूजित:। ''ध्रौव्यार्थत्वात्। कूजेरधिकरणे क्त:'' अधिकरणवाचिनश्चेति कर्त्तरि षष्ठीविधानात् कोकिलानां कूजित इति विग्रह:। करम्बितं तु खचितं प्रत्युप्तं गुम्फितं च तत्। इति त्रिलिङ्गाधिकारे **चन्द्रगोमी**। ह्रस्वात् कुटी कुटीर: स्यादि-

त्यमरः। तथा च ह्रस्वाधिकारे सूत्रे कुटी शमी मुण्डादिभ्यो रः। यद्वामधुकर-निकरकरम्बितः। कोकिलकूजितश्च कुञ्जकुटीरो यत्रेति विग्रहः।।१ ।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।१ ।। किमूचे इत्यपेक्षायामाह ललितेत्यादिना। गीतस्यास्य वसन्तरागोयतितालः। तद्यथा, ''शिखण्डिवर्होचयवद्धचूड़ः पुष्णन् पिकं चूतनवाङ्कुरेण। भ्रमन् मुदारामनङ्गमूर्त्तिर्मत्तो मतङ्गो हि वसन्तरागः।।'' लघुद्वन्द्वात्द्रुतद्वन्दो यतिः स्यात् त्रिपुरान्तरा इति। हे सखि! इह वृन्दावनविपिने रसः शृङ्गारस्तत् सहिते वसन्तसमये हरिर्विहरति। केन प्रकारेण? युवतिजनेन समं नृत्यति। कीदृशे? विरहिजनस्य दुरन्ते दुःखेन गमयितुं शक्ये। इत्युभययोः विशेषणम्। हरिर्मनोहरणशीलः अताऽस्य विरहो दुःसहः सरसोऽपि वसन्तोऽयं विरहिणां दुःखदत्वात् दुरन्त इत्यर्थः। तदभिप्रायज्ञानाद्-भावीष्यार्दिकनिवारणाय इदमुक्तं ध्रुवम्। वसन्तस्यैव विशेषणानि वृन्दावनस्यापि सम्भवन्ति कीदृशे? ललिताया लवङ्गलतायाः परिशीलनेन आलिङ्गनेन कोमलो मलयाचलसम्बन्धी समीरो यत्र तस्मिन्। लतानारीसंस्पर्शात् कोमलत्वेन मान्द्यम्, पुष्पसम्बन्धात् सौगन्धम्, यमुनाजलसम्बन्धात् शैत्यम्। अचेतनापि लता कान्तमन्तरेण चेत् स्थातुं न शक्नोति, तर्हि चेतना का कथेत्यर्थः। तथा मधुकराणां समूहेन करम्वितानां मिश्रितानां कोकिलानां कूजितं यत्र स कुञ्जकुटीरो यत्र तस्मिन्। शीलनमालिङ्गने स्यात् करम्वितं तु खचितमिति **विश्वः**।।१ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१ ।। यदूचे तत् विशदयति, ललितेत्यादिना गीतेन, वसन्तरागेण गीयत इत्युक्तम्। वसन्तवर्णनत्वात्। अस्य स्वरूपम्,

''शिखण्डिबर्होच्चयबद्धचूडः, पुष्णन् पिकं चूतलताङ्कुरेण।
भ्रमन् मुदाऽऽराममनङ्गमूर्त्तिर्मतो मतङ्गस्य वसन्तरागः।।''

हे सखि! राधे! इहानतिदूरे वृन्दावने रसः शृङ्गारादिस्तेन सहिते वसन्ते वसन्तसमये हरिर्विहरति। केन समं युवतिजनेन समम्। हन्त कथय कथय, कीदृशोऽसौ विहारः, नृत्यतीति स्वरविशेषसूचितया काक्वा वसन्तोचितसाधारणनृत्यमात्रं करोतीति सूचितम्। अत एव युवतिजनेन सममिति सामान्यनिर्देशः। तासामाग्रहेणैव तथा करोति, न तूत्कण्ठाभावं गमयतीति भावः। एतदपि कुतः करोति इति चेत् तत्र हेतुमाह, वसन्तविशेषणेन। कीदृशः, विरहिजनस्य प्रियेण प्रियया वा विरहितस्य जनमात्रस्य दुरन्ते, दुःखेनान्तःप्राप्तिर्यस्य तादृशे। अतस्तादृशव्यापारं विना क्षणमात्रमतिवाहितुम-

शक्ये इत्यर्थः। हरिरयं रूपलावण्यादिभिः सर्वमनोहरः। अतोऽस्य विरहो दुःसहः। सरसोऽपि वसन्तः अयं विरहिजनेषु दुरन्त एव इति भावीर्ष्यामानादिनिवारणार्थमवगमयतीति भावः। वसन्तस्वरूपं हि मलयानिलभृङ्गकोकिलादीनां वर्णनेनैव लक्ष्यते। तत्रादौ तान्येव वर्णयति। ललितेति। पुनः कीदृशे, ललिता तात्कालिकपुष्पोद्भेदेनातिमनोहरा या लवङ्गलता, तस्याः परिशीलनेन सम्पर्केण मन्दसंचारतया कोमलः सुखस्पर्शो मलयसमीरो मलयाचलसम्बन्धी पवनो यत्र तादृशे। अहो वसन्तस्य प्रभावः, यत्र पवनेनापि लतानारी सम्भुज्यते, इति भावः। अनेन पवनस्य मान्द्यं सौगन्ध्यं शीतलत्वं चायातम्। लतासम्बन्धेन मान्द्यसौगन्ध्ये, मलयसम्बन्धेन शीतलत्वम्। किञ्च मधुकरनिकरेण भृङ्गसमूहेन करम्बितानां मिश्रितानां कोकिलानां कूजितं ध्वनिर्यत्र तादृशानि कुञ्जकुटीराणि यत्र तादृशे। 'अल्पा कुटी कुटीरं स्यात्' **इत्यमरः**। निकृष्टप्रदेशानामेवं चेत् किमुत प्रशस्तदेशानाम्। अतोऽत्र वृन्दावने क्वाऽपि तादृशः प्रदेशो नास्ति, यत्र भृङ्गझङ्कारः कोकिलालापो न श्रूयते इति भावः। अत्र मलयानिलभृङ्गकोकिलानां प्रथमोपन्यासेन अरे! वसन्तपरिकराः! सन्नद्धा भवत। समागतोऽयं मन्मथमहाराजो जगत् जययात्रायै इति भृङ्गकोकिलनिनादै रुद्घोषयन्निवागतोऽयमग्रेसरो मलयानिल इति सूचितम्।।१ ।।

### (१३) प्रफुल्लमिश्रकृत-स्वर्णलता टिप्पणी

।।१ ।। ललितेति; अत्र गीतमिदं वसन्तरागेण यतितालेनावद्धमस्ति। झम्पातालेति कुम्भनरपतिः। वसन्तरागस्य लक्ष्यणम् यथा, शिखण्डिबर्होचयबद्धचूडः पुष्णन् पिकं चूतनवाङ्कुरेण। भ्रमन् मुदा राममनङ्गमूर्त्तिमतो मत्तङ्गो हि वसन्तरागः।। लघुद्वन्द्वात् द्रुतद्वन्दो यतिःस्यात् त्रिपुरान्तरा। इति। अत्र वसन्तकालस्य वर्णना क्रियते। ललितायाः कोमलायाः लवङ्गनामधेयायाः लतायाः परिशीलनेन आलिङ्गनेन कोमलो मलयाचलसम्बन्धी समीरो यत्र तस्मिन्नेव वसन्तकाले मधुमासे लता नारीसंर्स्पशात् कोमलत्वेन मान्द्यम्। पुष्पसम्बन्धात् सौगन्धम्, यमुनाजलसम्बन्धात् शैत्यम्। यदि आपाताचेतस्य लताविशेषस्य यदि कान्तमन्तरेण चेतस्थान्तुं न शक्तोसि अन्यायाः तर्हि का कथा भावोद्वेलितायाः नायिकायाः। तथा च भ्रमराणां पुञ्जेन मिश्रितानां कोलिलानां कूजनं तस्मिन् कुञ्जरूपस्य कुटीरम्। एतस्मिन् वसन्तकाले हे राधे! त्वं भ्रमसि कृष्णस्यान्वेषेणाय? विरहिणां दुःखप्राप्त्यर्थमेषः प्रयत्नः। तस्मिन् समये तरुणीकुलस्य नर्त्तनं हृदये दुःखम् प्रददाति। करम्बितः मिश्रितः। कुटीरम् अल्पाकुटी।।१ ।।

**२-उन्मदमदनमनोरथपथिकवधूजनजनितविलापे।**
**अलिकुलसंकुलकुसुमसमूहनिराकुलबकुलकलापे।। विह० ।।२ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२ ।। उन्मदेति। उद्गतौ मदमदनौ हर्षकामौ यस्य, मनोरथोऽन्यपदार्थः। उन्मदमदन-मनोरथश्चासौ पथिकबधूजनश्चेति कर्मधारय, तेन जनितो बिलापो यत्रेति विग्रहः, पथिकबधूजनलक्षणं यथा,

निर्मण्डना मलिनमंशुकमाबहन्ती हिण्डीरपिण्डपरिपाण्डुरगण्डभित्तिः।
या सर्वदा प्रियवियोगजदुःखतप्ता तां प्रोषितप्रियतमां निगदन्ति सन्तः।।

इति **नागरसर्वस्वे**। अलिकुलेत्यादि। अलिकुलेन संकुलो व्याप्तो यः कुसुमसमूहः तेन निराकुलो वकुलकलापो यत्रेति विग्रहः। यद्यपि वसन्ते वकुलपुष्पासम्भवस्तथापि कवीनां वसन्तवर्ण्णने सम्प्रदायसिद्धत्वमित्त्युक्तम्,

संकुलं वाच्यवद्व्याप्तेर्विस्पष्टार्थ वचस्यपि।
निर्ण्णयेन निषेधे च व्याप्ते त्वप्रगणाकुलौ।।
"कलापो भूषणे बर्हे तूणीरे संहतेऽपि च" **इत्यमरः**।।२।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२ ।। उन्मदमदनेति। किंभूते वसन्ते ? उद्धतौ मदमदनौ हर्षकामौ यत्र। पूर्वं भूतो मनोरथो यस्य पथिक वधूजनस्य स तथा तेन जनितो विलापो यत्र वसन्ते। उद्रिक्तस्मरजनित-मनोरथपथिकवधूजनस्य जनितो विलापो येन। अथवा उत्सुकमदनमनोरथेन पथिकवधूनां जनितो विलापो यत्र वसन्ते। अलिकुलव्याप्तकुसुमसमूहेन निराकुलो बकुलानां कलापः संहतिर्यत्र। बकुला एव कलापस्तूणीरो वा स्मरशरधिः। "कलापो बर्हतूणयोः" **इत्यमरः**।।२।।

## (३) जगद्धरकृत-सारदीपिका

।।२ ।। उन्मदेति उद्धतौ मद मदनो हर्षकामौ यत्र एवं भूतो मनोरथो यस्य एवम्भूतःयः पथिकजनः पान्थस्त्रीजनस्तेनात्पादितो विलापः परिदेवनं यत्र अलिकुलेति अलिकुलैः भ्रमरसमूहैः सङ्कुलो व्याप्तः कुसुमसमूहस्तेन निराकुलोऽस्तव्यस्तः वकुलानां वृक्षाणां कलापः समूहो यत्र।।२।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।२ ।। वसन्तस्य दुरन्ततामाह; उन्मदेति। उन्मद उद्धटो यो मदनः स एव मनोरथदृष्टः पथिकवधूजनानां तैर्जनितः कृतो विलापो यास्मिंस्तादृशो। पुनः कीदृशे ?

अलिकुलैर्भ्रमरसमूहैः संकुलो व्याप्तो यः कुसुमसमूहस्तेन निराकूल निःशेषेणाकुलो बकुलकलापः केसरसमूह यत्र तादृशे। यद्वा, तादृशो बकुल एव कलापो भूषणं यत्र तादृशे। "कलापो भूषणे वर्हे तूणीरे संहतावपि" **इत्यमरः**।।२।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी (टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२।। पुनः कीदृशे वसन्ते तत्राह; उद्गतौ मदमदनौ हर्षकामौ यत्र एवम्भूतो मनोरथोऽभिलाषो यस्य स उन्मदमदनमोरथः, स चासौ पथिकवधूजनश्चेति, तेन जनितः विलापः परिदेवनं यत्र। 'विलापः परिदेवनामि'**त्यमरः**। पुनः किम्भूते ? अलीनां कुलं समूहस्तेन सङ्कुलो व्याप्तो यः कुसुमसमूहः तेन निराकुलो वायुकृतचलनादिव्याकुलतारहितो वकुलकलापो वकुलवृक्षसमूहो यत्र। अत्र निश्चलत्वेन तादृङ्मधुपसमावेशो येन पवनस्यापि नागमनमित्युक्तिरलङ्कारः। जगद्धरादयस्तु अलिकुलसंकुलकुसुममूहेन निःशेषेण आकुलोऽस्तव्यस्ता वकुलकलापो यत्रेति व्याचक्षते। तत्तु निराकुलशब्दस्याऽतिव्याकुलतायामप्रयोगादुपेक्षितम्। 'संकुलं त्रिषु विस्पष्टवाचि व्याप्ते च मस्तके।' 'कलापः संहतौ वर्हे काञ्छयां भूषणतूणयोरिति'।।२।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।२।। वसन्तदुःसहतामेव तनोति; उन्मदेत्यादिना। उन्मद उत्कट [५] उद्धतो वा उद्भटो वा [६] उन्मादावस्थां प्राप्तो वा यो मदनः कन्दर्पस्तादृशो मनोरथो येषां पथिकानां तेषां वधूजनास्तैर्जनितः उत्पादितो विलापो वियोगो यत्र। अनेनोद्वेगावस्था तज्जन्यविलापश्चोक्तः पुनः कीदृशे ? अलिकुलैर्भ्रमरसमूहैः [१] सङ्कुलो व्याप्तः [२] यः कुसुमसमूहः [३]पुष्पवृन्दस्तेन निराकुलः नितरां आकुलो व्याकुलो वकुलकलापो [४] वकुलपुष्पाणां[५]समूहो यत्र[६]। [७]अथ वा वकुल एव कलापो [८]भूषणं यत्र। अनेन त्वद्दर्शनं विना नानुरागोदयः कस्यापीत्युक्तम्। कलापो भूषणे बर्हे तूणीरे [९]संहतेऽपि च **इत्यमरः**(३.३.१२९)। सङ्कुलं [१०] व्यवधाने स्यात्स्पष्टार्थे च वचस्यपि इति **विश्वः** (१०५.८४)। [११]केसरे वकुल इत्यपि (**अमरः** २.४.६४)। केसरः कुङ्कुमे प्रोक्तः केसरो नागकेसरे। वाजिमौलिकरेऽपीह प्रोक्तः [१२] पुष्पादिकेष्वपि इति इरणिः[१३]। हेतूक्तिरलङ्कारः।।२।।

१.शीतलत्वादीन्युक्तानि-क.२.कोमलैः-क.३.कुञ्जमेव-क.४.कुटीरो गुल्मकुटी-ड.५.उद्गतो वा उत्कण्ठावस्थां प्राप्तो वा-ग.६.उन्मादावस्थोच्छ्वासो वा-इ.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।२।। उन्मदेति। उद्गतौ मदमदनौ हर्षकामौ यत्र एवम्भूतो मनोरथो यस्य एवम्भूतो यः पथिकवधूजनः [१४]पथिकस्त्रीजनः तेन जनित [१५] उत्पादितो विलापः परिदेवनं

यत्र। अलिकुलेति। अलिकुलैर्भ्रमरसमूहै: सङ्कुलो व्याप्त: कुसुमसमूहस्तेन निराकुलो[१६]ऽस्तव्यस्तो बकुलानां वृक्षाणां कलाप:समूहो यत्र।।२।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।२।।अलिकुलेति। अलिकुलै: भ्रमरगणै: सङ्कुला: व्याप्ता: यैस्तै: कुसुमसमूहै: निराकुला: अत्यन्तसंवलिता: बकुलानां कलापा: समुदाया: यस्मिन् तस्मिन्। उन्मद: उद्रिक्त: मदन: तस्य मनोरथा: अभिलाषा: यासां तासां पथिकवधूनां विरहिणीनां प्रोषितपतिकानाञ्च जनेन समुदायेन जनित: विलाप: प्रियाणां गमनकारणप्रलापो यस्मिन् तस्मिन्।।२।।

१.त:२.नास्ति-इ.फ.ग.ह.ज.३.नास्ति-अ.ब.४.५.न स्त-अ.६.पर्यन्तो भागो नास्ति-ब.७.यद्वा-ग.८.नास्ति-अ.९.संहतावपि-ब.इ.फ.ग.ह.ज. सङ्गतेऽपि च-अ.१०.व्यवधाने स्यात्स्पष्टार्थेऽस्य वचस्यपि-अ.व्यवधाने स्यादस्पष्टार्थे वचस्यपि-फ.वाच्यवद्व्याप्तेऽविस्पष्टार्थवचस्यापि-विश्व:।११.त:.१२.पर्यन्तं नास्ति-अ.केसरं-इ.ग.केसरो-ह.१३.पुष्पादिष्वपीति-इ.फ.ग.। १४.पान्थस्त्रीजन:-ल.म.नास्ति-क.१५.नास्ति-ड.१६.व्यस्ताव्यस्तो-क.

## (१०) धनञ्जय - धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२।। पुन: किंविधे ? उन्मदेति। उद्गतौ मदमदनौ हर्षकामौ यत्र। किं वा उत्कृष्ट: मदो गर्वो हर्षो वा यस्येति प्रादिसमास:। एवंविध: कामो यत्र मनोरथोऽन्य: पदार्थ:। ''मदो रेतसि कस्तूर्यां गर्वे हर्षेऽभदानयो:'' इति। उन्मदमदनो मनोरथ: प्रियसङ्गमाभिलाषो यस्य। पथिकवधूजनोऽन्यपदार्थ: उन्मदमदनमनोरथश्चासौ पथिकवधूजनश्चेति कर्मधारय:। तेन जनितो विलापो यत्रेति विग्रह:। तस्मिन् जनितो विलापो येन वा। पथिकवधूलक्षणं यथा, ''निर्मण्डनामलिनमंशुकमावहन्ती हिण्डीरपिण्डुपरिपाण्डुरगण्डभित्ति:। या सर्वदा प्रियवियोगजदु:खतप्ता तां प्रेषितप्रियतमा निगदन्ति सन्त:।।'' इति। पुन: किंविधे ? अलिकुलेति। अलिकुलेन भ्रमरसमूहेन सङ्कुलो व्याप्तो य: कुसुमसमूह:, तेन निराकुलोऽव्यस्तो वकुलानां वकुलद्रुमाणां कलाप: समूहो यत्रेति विग्रह:। ''सङ्कुलं त्रिषु विस्पष्टवाचि व्याप्ते'' इति **मेदिनी**। ''निनिर्णये निषेधे चेति व्यस्तत्वे प्रगुणाकुलौ।'' इति। ''कलाप: सम्हतौ बर्हे काञ्च्यां भूषणतूणयो: (क्ति:)।'' इति। यद्यपि वकुलपुष्पासम्भवस्तथापि कवीनां वसन्तवर्णने तस्य सम्प्रदायसिद्धत्वमित्युक्तम्।।२।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।२।। विरहिजनदुरन्ततामाह। पुन: कीदृशे ? उद्गतो मदो यस्य तेन मदनेन मनोरथो येषां तेषां पथिकवधूजनानां जनितो विलापो येन तस्मिन्। यत: अलिकुलेन संकुलेन

व्याप्तेन कुसुमसमूहेन निःशेषेणाकुलः वकुलकलापो यत्र तस्मिन्। संकुलं वाच्यवद्व्याप्त इति विश्वः।।२।।

**(१२) लक्ष्मणकृत-रसिकरङ्गदा**

विरहिजनेषु दुरन्तत्वमेवाह; उन्मदेति। उन्मत्तो मदो विरहिजनविविधदुरवस्थाऽऽपादनरूपो गर्वो यस्य तेन मदनेन हेतुना, मनोरथः प्रियसङ्गमाभिलाषो येषां तेषां पथिकवधूजनानां प्रोषितपतिकानां जनितोत्पादितो विलापो परिदेवनं येन तादृशे। किम्बा सदृशवधूजनैरन्येषां जनितो विलापो यस्मिन् तादृशे। तेषां दुरवस्थादर्शनेन अन्येषां आर्त्तस्वरो जात इत्यर्थः। विलापहेतुमाह, अलिकुलेति। अलिकुले । भृङ्गसङ्घेन संकुलो व्याप्तो यः कुसुमसमूहः पुष्पश्रेणी, तेन निराकुलो निःशेषेण आकुलः संकीर्ण इत्यर्थः। ईदृशो बकुलकलापो वञ्जुललता श्रेणी यत्र तादृशे । किं वा तादृशबकुलेन कलापो भूषणं यस्य तादृशे। 'बकुलो वञ्जुलोऽशोकः' **इत्यमरः**। 'कलापो भूषणे बर्हे तूणीरे संहतेऽपि च' इति च। मधुपचुम्बितबकुलवीथिभिः प्रियकृतचुम्बनमनुस्मारयन् वधूजनानां विलापश्रवणेन कौतुकमाप्नोतीति भावः।।२८।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।२।। उन्मदमदनेति; अपि किम्भूते वसन्ते इति जाते प्रश्ने अत्र उच्यते; यस्मिन् वसन्ततौं पथिकवधूः पथि स्थितः पथिकः। तस्य वधू नाम प्रवासस्थितस्य नायिका तस्याः मधुमासे कन्दर्पपीडा रतीच्छाऽपि उग्रा भवति तीव्रा वा। तेन ताः विलपन्ति। भ्रमरसंकुलः समूहोऽपि कुसुमेषु उड्डीयमानाः पुष्पसंकुलमस्तव्यस्तं कुर्वन्तीत्यर्थः। तेन पुष्पाणि आकुलितानि विकीर्णानि भवन्ति। अत्र वकुला एव कलापस्तुणीरो वा स्मरशरधिः कलापो भूषणे बर्हे तूणीरे संहतावपि **इत्यमरः**। राधायाः रतीछा प्रवलायते इति ध्वनिः।।२।।

**३-मृगमदसौरभरभसवशंवदनवदलमालतमाले।**
**युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले।।३।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।३।। मृगमदेति। मृगमदः कस्तूरी तत्सौरभरभस्य गन्धप्रवाहस्य वशम्बद आयत्त इव नवदलमालस्तमालो यत्रेति विग्रहः। ''रभसो वेग हर्षयोः'' युवजनहृदयबिदारणं यन्मनसिजन्खं तादृशं किंशुकजालं यत्रेति विग्रहः। ''पलाशे किंशुकः पर्ण्णे घातपोथः'' **इत्यमरः**। ''जालं गवाक्षे आनाये क्षिरके जन्मवृन्दयोरिति'' **मेदिनी**।।३।।

## (२)राणाकुम्भकृत-रसिकप्रिया

।।३।। मृगमदसौरमेति। मृगमदत्सैरभस्य रभसेन सहसा वसंवदा अनुकारिणी तद्गन्धा नवदलानां माला येषां तादृशास्तमाला यत्र वसन्ते। वा तदामोदानि नवदलानि मालन्ते धारयन्तीति। युवोजनेति। युवजनस्य हृदयविदरणाय मनसिजस्य नखस्य रुचिरिव रुचियेषां ते तादृशाः किंशुकानां जालानि कोरका यत्र वसन्ते। अत्र कामस्य नखरायुधत्वं कविसमयेऽग्रसिद्धम्।।३।।

## (३) जगद्धरकृत-सारदीपिका

।।३।। मृगमदेति मृगमदस्य कस्तूरिकायाः सौरभरभसवशंवदा सुरभित उत्साह स्वायत्तवादिनी नवा नूतना दलमाला पत्रपङ्क्तिर्येषां इदृशास्तमाला यत्र नूतनपत्रस्तमालो मृगमदगन्धमनुकरोतीति। युवजनानां तरुणजनानां ते हृदयं विदारयन्ति एवं विधो यो मनसिजः कन्दर्पस्तस्य यानि नखानि तद्वत् रुचिर्दीप्तिर्येषाम् एवंभूतानां किंशुकानां पलाशपुष्पाणां जालं समूहो यत्र ।।३।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।३।। पुनः कीदृशे? मृगमदेति। मृगमदस्य कस्तुरिकायाः यः सौरभरभसः सौरभवेगस्तस्य वशंवद आत्मन्यायत्ततावादी नवदलमालतमालो नूतनपत्रपङ्क्तिर्यस्य एतादृशस्तमालो यत्र तस्मिन्। पुनः कीदृशे? युवजनानां तरुणपुरुषाणां हृदयं विदारयन्तीति युवजन हृदयविदारणास्तादृशाः ये मनसिजस्य कामस्य नस्वास्तेषामिव रुचिर्दीप्तिर्येषां तादृशा ये किंशुकाः पलाशकुसुमानि तेषां जालं समुहो यत्र तादृशे। यद्वा, तादृशानि किंशुकजलानि पलाशकलिका यत्र तादृशे। अत्र पलाशपुष्पस्य वक्रत्वेनारक्तत्वेन हृदयविदारणाद्रुधिरलिप्तमिव मनसिजनखस्य सादृश्यं बोध्यम्। "मृगनाभिर्मृगमदः कस्तूरी च" **इत्यमरः**। "रभसो वेगहर्षयोः" इति च। "कामः पञ्चशरः स्मरः। शंवरारिर्मनसिजः" इति च। रूचिर्मयुखे शोभायामाभिष्वङ्गविकासयोः इति विश्वः "पलाशे किंशुकः स्मृतः" इति च। "जालं गवाक्ष आनाये कोरके दृप्तवृन्दयोः" इति **विश्वः**।।३।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।३।। मृगमदेति। मृगमदस्य सौरभं परिमलः तस्य रभसेन वेगेन हर्षेण वा ''रभसोद्वेगहर्षयोरि**त्यमरः**''। वशम्वदानि स्वायत्तानि तत्कल्पानि तद्वत् सुगन्धीनीत्यर्थः। अथवा मृगमदश्च सौरभं च मृगमदसौरभे तयोः रभसमाधिक्यं तस्य वशम्वदानि तद्धन्नीलवर्णानि सुगन्धीनि चेत्यर्थः। अत्र सौरभस्य मृगमदीयत्वं निषादस्थपतिन्यायेनावगन्तव्यम्। तन्त्रो वा मृगमदशद्बः एतादृशाभिर्नवानि नूतनानि

कीटादिभिरनुपहतानि प्रत्यगोत्पन्नानीति यावत्। अदृश्यानि यानि दर्लान तेषां माला नृपरम्परा येषु तादृशः मालाः तापिञ्छतरवो यस्मिन्, तादृशे वशम्वदेत्यत्र प्रियवशेवदः खशिति (३-२-३८) खश् प्रत्ययः। खित्यनव्ययस्येति (६-३-६६) मुमागमः। किं च युवजनानां तरुणपुरुषाणां यानि हृदयानि तेषां विदारणा भेदका ये मनसिजनश्वा कामकरजास्तेषां रूचिः कान्तिश्वि कान्तियेषां तथा विधानि किंशुकजालानि पलाशकुसुमसन्दोहा यस्मिन् तादृशे, अत्र विदारणजनितरुधिररुषितत्वान्नखानामरुणत्वमवगन्तव्यम्। अथवा कन्दर्पस्य श्रीपतिपुत्रत्वेव सौभाग्यसम्पन्नत्वसूचकनखरक्तत्वसंम्भवात्किशुकानां तत्कल्पत्वम्। उक्तं च सामुद्रिके,

पाणि पादतले रक्ते नेत्रान्तौ च नखानि च।
तालु जंघाधरौष्ठं च सप्तरक्तं प्रशस्यते ।।इति।।
एतादृशे वसन्ते हरिर्विहतीत्यन्वयः।।३ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।३ ।। पुनः कीदृशे वसन्ते ? मृगमदः कस्तूरी, तस्य सौरभम्, तस्य रभसः प्रवाहः प्रसरणमिति यावत्, तत्र वशम्वदा आयत्ता नवदलमाला यस्य एतादृशः तमालः तापिच्छवृक्षो यत्र। तमालदलस्य गन्धः कस्तूरीसदृश इति प्रसिद्धिः। 'वशम्वदः स्यादायत्ते चाटुकारेऽभिधेयवत्।' 'उत्साहसहितवेगे प्रवाहे रभसोऽर्थवदि'ति। अपि किम्भूते ? युवजनानां विरहितरुणानां हृदयं विदारयतीति युवजनहृदयविदारणः। नद्यादित्वावाद्यः। एतादृशो यो मनसिजः तस्य नखरुचिरिव रुचिर्यस्य एवम्भूतं किंशुकजालं पलाशकुसुमं वृन्दं यत्र एवम्भूते। पलाशकुसुमानां रक्तत्वादरुणत्वाच्च हृदयविदारक- मनसिजनखसाम्यम् जालमालयवृन्दयोरिति।।३ ।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।३ ।। पुनः कीदृशे ? मृगमदस्य कस्तूरिकायाः [१] सौरभस्य सुगन्धस्य [२]हर्षस्य वा यो रभसो वेगस्तस्यात्मपक्षवादिनी नवदलमाला नूतनपत्रपङ्क्तिर्येषां तादृशाः [३]तमालास्तमालवृक्षा यत्र।[४]पुनः कीदृशे ? [५]युवजनानां तरुण [६] कामिनीजनसमूहानां हृदयं विदारयन्ति ये तादृशाः मनसिजस्य कामस्य ये नखास्तद्वद्रुचिर्दीप्तिर्येषां तादृशा ये [७] किंशुकाः पलाशकुसुमानि तेषां जालानि यत्र। साधारणतरुणपुरुष- हृदयविदारकाः [८]युवतिहृदयविदारकाः सुतरामिति। तासामष्टगुणकामोदयादित्यर्थः। उक्तञ्च- कामश्चाष्टगुणः स्त्रीणाम् इति। एतेन[९]वसन्त[१०]दुःसहतोक्ता। मृगनाभिर्मृगमदः कस्तूरी च **इत्यमरः** (२.६.१२९)। रभसो वेगहर्षयोःइति **विश्वः** (१२१.१४)।

रुचिर्मयूखे[११]शोभायामभिष्वङ्गाभिलाषयोः इति च (विश्वः-१२१.७)। [१२]पलाशः किंशुके [१३] शठ्याम् इत्यपि (**विश्वः**-११५.२३)। करमः पञ्चशरः [१४]स्मरः, शम्बरारिर्मनसिजः [१५]कुसुमेषुरनन्यजः **इत्यमरः** (१.१.२५.२६)। [१६] जालं समूह आनायो गवाक्षक्षारकावपि (इत्यपि अमरः-३.३.२००) । रूपकालङ्कारः ।।३।।

१.नूतनं पत्रं-ड.२.करोतीति-क.ल.म.३.विदारयतीति-क.४.नास्ति-अ.ब.इ.ग.ह.ज.५.कामश्च महीपतिः-फ.६.नास्ति-इ.फ.ग.ह.ज.७.तः८.पर्यन्तं नास्ति-फ.९.अत्रातिव्यधोत्पादकत्वेन-अ.इ.फ.ग.ह.ज.१०.चाम्पेयःकेसरो नागकेसरः काञ्चनाह्वयः-अमरः। केसरो नागकेशे स्यात्केशरः कनकाह्वयः-अ.११.तः

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।३।। मृगेति। मृगमदस्य कस्तूरिकायाः [१७] सौरभरभसवशं[१८]वदा सुरभितोत्साहस्यायत्तत्ववादिनी नवा नूतना दलमाला पत्रमाला येषां ईदृशास्तमाला यत्र। [१] नूतनपत्रस्तमालो मृगमदगन्धं [२] करोति। युवजनाना तरुणजनानां हृदयं [३] विदारयति। एवंविधो यो मनसिजः कन्दर्पस्तस्य यानि नखानि तद्वत् रुचिर्दीप्तिर्येषामेव- म्भूतानां किंशुकानां पलाशपुष्पाणां जालं समूहो यत्र ।।३।।

१.सौरभस्य गन्धस्य-अ.सौरभ्यस्य गन्धस्य-ब.२.नास्ति-ह.३.तालाः-अ.फ.ज.नास्ति-ह.४.नास्ति-फ.५.युवेति-फ.६.कामिसमूहानां-ब.कामिजनसमूहानां-इ.ह.ज.७.नास्ति-अ.८.नास्ति-अ.ब.ज.९.वसन्तस्य-ब.इ.फ.ग.१०.दुःसहत्वमुक्तम्-ग.११.सोमायामभिछंगाभिलाषयोः-ब.सोमायामभिस्वांगाभिलासयोः-अ.१२.पलासः किंशुके मतः-अ.पलाशः किंशुके मतः-ब.इ.फ.ह.ज.१३.नास्ति-ग.१४.स्मर इत्यपि-ज.नास्ति-ह.१५.नास्ति-ब.इ.फ.ग.ह.ज.१६.जालं गवाक्षक्षारकावपीत्यमरः-अ.जालं गवाक्ष इत्यपि-ब.इ.फ.ग.ह.ज.१७.सौरभवशंवदासु सुरभितोत्साहासु यत्कृता वादिनी-क.१८.वद-ड.

## (९) कृष्णपण्डितकृत-जयन्ती

।।३।। मृगमदेति। मृगमदस्य कस्तूरिकायाः सौरभस्य परिमलस्य रभसः उत्कर्षः तस्य वशंवदाः तत्समपरिमलाः नवदलमालाः पल्लवसङ्घाश्च येषाम्। ते तमालाः तापिञ्छवृक्षाः यस्मिन् तस्मिन्। यूनां तरुणानां जनस्य हृदयं विदारयन्तीति विदारणाः मनसिजनखाः तेषां रुचय इव कान्तयो येषां तानि किंशुकपुष्पजालानि यस्मिन् तस्मिन्। पुष्पजातिप्रभृतय इति किंशुकपदेन तत्पुष्पाणि। निदर्शनालङ्कारः पदगतः।।३।।

१.नूतनं पत्रं-ड.२.करोतीति-क.ल.म.३.विदारयतीति-क.४.नास्ति-अ.ब.इ.ग.ह.ज.-५.कामश्च महीपतिः-फ.६.नास्ति-इ.फ.ग.ह.ज.७.तः८.पर्यन्तं नास्ति-फ.९.अत्रातिव्यधोत्पादकत्वेन-अ.इ.फ.ग.ह.ज.१०.चाम्पेयःकेसरो नागकेसरः काञ्चनाह्वयः-अमरः। केसरो नागकेशे स्यात्केशरः कनकाह्वयः-अ.११.तः

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।३।। पुन: किंविधे ? मृगमदेति । मृगमद: कस्तूरी, तस्य सौरभं सुरभित्वं सौगन्ध्यमिति यावत्। तस्य रभस: प्रसरणवेग:। ''रभसो हर्षवेगयो:'' इति "**मेदिनी**"। तस्य वंशम्वदान्यात्तानि, ''प्रियवशे वद: खच्।'' अर्थात् आत्मन: कस्तुरीगन्धवत्तया तदधीनता प्रतिपादनानि यानि नूतनानि दलानि तेषां मालापङ्क्तिर्येषु ईदृशास्तमालास्तापिञ्छवृक्षा: यत्रेति विग्रह:। प्रसरतरमृगमदगन्धेन सम्पर्कात्तादृशगन्धत्वं तमालपल्लवानां न तु स्वत इति कृत्वा तद्रभसाधीनत्वमुच्यते। तमालपत्रे लग्न: निलय: कश्चिद्गन्धोऽप्यचिरेण न गच्छति अभियुक्तानां यदनुभव:। ''माला तु श्रेणिरावलि:'' इति। पुन: किंविधे ? युवजनेति । युवानश्च युवतयश्च, युवान: पुमां स्त्रियेत्येव विशेष:। युवानो ये जना: तेषां हृदयस्य विदारणम्। विदार्यतेऽनेनेति करणे युट्। एवंविधं जन्म मनसिजनख:, तस्य रुचिरिव रुचि: शोभा यस्य ईदृशं किंशुकजालं पलाशकलिका यत्रेति विग्रह:। ''पलाश: किंशुक: पर्ण:'' **इत्यमर**:। ''जालं गवाक्षे आनाये क्षा(को)रके दम्भ(न्त)वृन्दयो:'' इति विश्व:। आभुग्नत्वात् रक्तवर्णत्वाच्च पलाशकलिकानां हृदयविदारकैर्मदननखै: साम्यम्। तादृशं नखानां लग्नरक्तत्वात् प्रकृताभुग्नत्वाच्च।।३।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।३।। पुन: कीदृशे ? कस्तूरिकायां सुगन्धस्य यो रभस: अतिशय: तस्यायत्ता नवदलानां श्रेणी येषु ते तमाला यत्र तस्मिन् । तथा युवजनानां हृदय विदारणा मनसिजस्यय नखास्तदवद्रुचिर्येषां पलाशकुसुमानां तेषां समूहो यत्र तस्मिन्। युवस्वतिनिर्दय इति भाव:।।३।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।३।। न केवलं वधूजनेषु, एवं पुरुषेष्वपीति आह; मृगमदेति। मृगमदश्च तत् सौरभञ्च मृगमदसौरभे। तयो:रभसोवेगोऽतिशय इत्यर्थ:। तस्य वशंवदानि स्वायत्तीभूतानि तद्वन्नीलवर्णानि सुगन्धीनि चेत्यर्थ:। तादृशानि यानि नवदलानि नूतनपत्राणि तेषां माला श्रेणी येषु तादृशास्तमालास्तापिच्छतरवो यत्र तादृशे। अत्र सौरभस्य मृगमदीयत्वं 'निषादस्थपति' न्यायेनावगन्तव्यम्। तत्र वा मृगमदशब्द: तमालपत्रसवर्णेन सौरभ्येणाकृत्या च प्रिया ललाटचित्रकं बुद्धौ सन्निधाप्य यूनोऽपि कदर्थयतीति भाव:। न च एतावता विरमति, किन्त्वधिकमपि करोतीत्याह; युवजनेति। युवजनानां प्रियया रहितानां वियुक्तानां वा तरुणजनानां हृदयानां विदारणा विदारका ये मनसिजनखा

मन्मथस्य नखरास्तेषां रुचिरिव रुचि: कान्ति: येषां तादृशानां किंशुकानां पलाशपुष्पाणां जालानि समूहा यत्र तादृशे। तरुणजनहृद्विदारणोत्थरुधिराक्तमन्मथनखवत् भयङ्कराणि पलाशकुसुमानि दर्शयन् विरहिणां प्राणान्तभयमातनोतीति भाव:। किंशुककुसुमस्य शोणत्वादीषद्वक्रत्वाच्च तत् साम्यम्।।३।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।। मृगमदेति; मृगमदस्य कस्तुरीसुवासस्य वेगेनातिशेयेन वा सुरभिना तीव्रसुगन्ध:व्याप्तो भवति। पुन: तमालतरो: नूतनपत्रेण कुञ्जस्य शोभा सान्द्रतरां पत्रेणाच्छादितां तनोति। अपि च वनभूमिमलंकरोति। यूनां हृदयस्य विदारणा कामना जर्जरितेन सम्भवति। मदनस्य नख इव नखरूचि: नखस्याभा वर्तते किंशुकपुष्पसमूहे। अत्र यूनां हृदयविदारणं कन्दर्पनखवत् किंशुकपुष्प इव रक्तवर्णेन भूत्वा विदारणात् नखेषु रक्तस्य लेपनमपि जातमिति परिणामालंकार:। लक्षणं साहित्यदर्पणे; विषयात्मतयारोप्ये प्रकृतार्थेपि प्रयोगिनि। परिणामो भवेत्तुल्यातुल्याधिकरणे द्विधा। राधाहृदयोऽपि जर्जरित: स्यादिति ध्वानि:।।३।।

**४-मदनमहीपतिकनकदण्डरूचिकेसरकुसुमविकासे।**
**मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे।। विह०।।४।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४।। मदन एव महिपतिरिति विगृह्य मयूरव्यंसकादित्वादुत्तरपदार्थप्रधान: समास: कार्य्य:। यदि पुनरत्र मदनो महीपतिरिव इत्युपमितं व्याघ्रादिभिरित्यनेन समास: क्रियते तदा पूर्वपदार्थप्राधान्यात्, मदने कनकदण्डाभावात्, वर्णनेयमघटमाना स्यात्। मदनमहीपते: कनकदण्डरुचि: केशरस्य नागकेशरस्य कुसुमविकाशो यत्रेति विग्रह:।

"छत्रं कनकदण्ड: स्याद्राज्ञ: काञ्चन निर्मितम्।
चाम्पेय: केसरो नागकेसरकाञ्चनाह्वय:"। **इत्यमर:**।

मिलितेत्यादि:। मिलिता: शिलीमुखा: यत्र पाटलीपटलमद्यपदार्थ: मिलिता: शिलीमुखा: पाटलिपटलेन कृत: स्मरतूणविलासो यत्रेति विग्रह:। पाटलिकुसुमस्य तूणाकारत्वात्। शिलीमुखशब्दस्य शिष्टार्थत्वात्साम्यम्। "समूहे पटलं क्लीवमलिबाणौ शिलीमुखौ।" "तूणोपासङ्ग तूणीर निषङ्गा इषुधिर्द्वयो:" **इत्यमर:**।।४।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। मदनमहीपतीति। अत्रालाप:। कामराजत्य हेमदण्डच्छत्रसंनिभं बकुलकेसरपुष्पं तस्य विकासो यत्र। अत्र केवलकनकदण्डस्य छत्रेऽवाचकत्वान्महीपतिशब्दसाहचर्याद-

विरोध:। अथवा हेमदण्डरुचिनि केसराणीति योज्यम्। महीपतेरग्रे कनकवेत्रधारिणो भवन्ति। मिलितेति। संगतशिलीमुखै: पाटलपटलै: पाटलकुसुमसमूहै:। अथवा पाटलिपटलेति पाठ:। कृत: स्मरशरधिविलासोऽनुकारो यत्र। शीलीमुखा भ्रमरा बाणाश्च। अलिबाणौ शिलीमुखौ" इत्याभिधानात्।।४।।

## (३) जगद्धरकृत-सारदीपिका

।।४।। मदनेति मदनमहीपते: कामनृपस्य कनकदण्डच्छत्रवत् रुचिर्यस्य एवम्भूत: केशरकुसुमविकाशे नागकेशरपुष्पप्राचुर्यं यत्र मिलितेति मिलिता: शिलीमुखा: भ्रमरा: येषु तै: पाटलीपटलै: पाटल पूष्पसमूहै: कृत: स्मरतूणविलास: कामतूणीरप्रेषितं यस्मिन् तस्मिन् ।।४।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।४।। पुन: कीदृशे ? मदनेति। मदन एव महीपती: राजा तस्य य: कनकदण्ड: सुवर्णघटितदण्डयुक्तच्छत्रं तस्यैव रुचिर्यस्यैतादृशस्य नागकेसरपुष्पस्य विकास: प्रकाशो यत्र तादृशे। पुन: किंविशिष्टे ? मिलिता: शिलीमुखा एव बाणा यस्मिस्तादृशं यत्पाटलिपटलं पाटलापुष्पसमूहस्तेन कृत: स्मरतूणस्य कंदर्पतूणीरस्य विलासश्चेष्टितं यत्र तादृशे। अत्र परमर्मव्यथाजनकत्वेन भ्रमराणां बाणसाम्यम्। चाम्पेय: केसरो नागकेसर: काञ्चनाह्वय: **इत्यमर:**। अलिवाणौ शिलीमुखौ इति च। समूहे पटलं स्मृतम् इति च। तूणोपासङ्गतूणीर-निषङ्गा इषुधिदूयो: इति च।।४।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।४।। मदनेति। मदनमहीपते: कन्दर्पभूपालस्य कनकदण्डं कनकमयो दण्डो यस्य तत्कनक दण्डं श्वेतछत्रं तस्य रुचिकान्तिरिव कान्तिर्येषां तानि केसरकुसुमानि देववल्लभाख्य द्रुमकुसुमानि "केसरे देववल्लभ" **इत्यमर:**। तेषां विकाशो यस्मिन् तादृशे, किं च मिलिता: घटिता: शिलीमुखा: द्विरेफा: येषु तानि पाटलानि पाटलिकुसुमानि तेषां पटल: समूहस्तेन कृत: निर्मित: स्मरतूणविलास: मदनतूणीरविभ्रमो यस्मिन् तादृशे, किं च मिलिता: घटिता: शिलीमुखा: द्विरेफा: येषु तानि पाटलानि पाटलिकुसुमानि तेषांपटल: समूहस्तेन कृत: निर्मित: स्मरतूणविलास: मदनतूणीरविभ्रमो यस्मिन् तादृशे "तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोरित्यमर:" अत्र शिलीमुखशव्देन बाणा अपि ग्राह्या: तदा पाटलानां तूणत्वरूपणं समञ्जसं भवति। एतादृशे वसन्ते हतिर्विहरतोत्यन्वय।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। पुन: किम्भूते वसन्ते तत्राह,कनकस्य दण्डो यत्र सम्भवतितत् कनकदण्डच्छत्रम्, मदन एव महीपति: मदनमहीपति:। मदनमहीपतिकनकदण्डस्येव रुचिर्यस्य एतादृश:

केशरकुसुमानां विकाशः प्रकाशो यत्र। यद्वा मदनमहीपतिकनकदण्डरूचि, तत् केशरकुसुमं नागकेशरकुसमञ्चेति, तद्विकाशयतीति कर्मण्यण्, एतादृशे। पुनः किम्भूते ? पिलिताः सङ्गताः शिलीमुखाः भ्रमराः येषु तैः पाटलिपाटलैः पाटलिपुष्पसमुहैः कृतो विहितः स्मरतूणविलासः कामतूणीरचेष्टितं यत्र एतादृशे। अन्यत्रापि तूणीरे शिलीमुखाः स्थाप्यन्त इति परस्पररूपकम्। 'अलिबाणौ शिलीमुखौ' **इत्यमरः**।।४।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।४।। पुनः कीदृशे ? [४] मदनेति। मदनः [५] काम एव महीपतिः सार्वभौमस्तस्य छत्रार्थं [६] धृतो यः कनकदण्डस्तस्येव रुचिर्दीप्तिर्यस्य तादृशस्य केशरस्य नागकेशरस्य कुसुमानां पुष्पाणां विकासः प्रकाशो यत्रा पुनः कीदृशे ? मिलिताः शिलीमुखाः भ्रमरा एव बाणा यत्र तादृशं यत्पाटलपटलं पुष्पसमूहस्तेन कृतः स्मरतूणस्य कन्दर्पतूणीरस्य विलासो लीला सारूप्यं वा यत्र। ननु कामः कुसुमबाणः [७] न तु भ्रमरबाणः[८]; सत्यम् ; इयन्तूत्प्रेक्षा। [९] अत्रातिव्यथोत्पादनेन भ्रमराणां बाणसाम्यम्। [१०]केसरो नागकेसरः [११]कनकाह्वयः **इत्यमरः**(२.४.६५)।

[१] अलिबाणौ शिलीमुखौ इति च (अमरः ३.३.१८)। समूहे पटलं [२] नाले छिद्रे संरोधकेऽपि च [३] इति त्रिलोचनः। तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः **इत्यमरः** [४] (२.८.८८)। एतेन स्मराभिषेकसमर्थो वसन्तगुण उक्तः। [५] रूपक एवालङ्कारः।।४।।

१.नूतनं पत्रं-ड.२.करोतीति-क.ल.म.३.विदारयतीति-क.४.नास्ति-अ.ब.इ.ग.ह.ज.५.कामश्च महीपतिः-फ.६.नास्ति-इ.फ.ग.ह.ज.७.तः८.पर्यन्तं नास्ति-फ.९.अत्रातिव्यधोत्पादकत्वेन-अ.इ.फ.ग.ह.ज.१०.चाम्पेयःकेसरो नागकेसरः काञ्चनाह्वयः-अमरः। केसरो नागकेशे स्यात्केशरः कनकाह्वयः-अ.११.तः

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।४।। मदनेति। मदनमहीपतेः कामनृपस्य कनकदण्डं छत्रं तद्वद्रुचिर्यस्य एवम्भूतः केसरकुसुमविकाशो नागकेसरपुष्पप्राचुर्यं यस्मिन्। मिलितेति। मिलिताः शिलीमुखाः भ्रमराः येषु तैः [६] पाटलिपटलैः पाटलपुष्पसमूहैः कृतः स्मरतूणविलासः कामतूणीरचेष्टितं यत्र ।।४।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।४।। मदनेति। मदन एव महीपतिः राजा तस्य कनकदण्डस्य सुवर्णदण्डस्य रुचय इव रुचयो येषां तानि केसरकुसुमानि तेषां विकासाः व्याकोचाः यस्मिन्। मिलिताः

शिलीमुखाः भ्रमराः येषु ताः पाटलाः पाटलपुष्पाणि येषु। तानि च तानि पटलानि समूहानि। पाटलशब्दः पुष्पवाचकोऽपि स्त्रीलिङ्ग इति एवं व्याख्यातम्। तैः कृतः स्मरतूणस्य मन्मथशराधायितूणीरस्य विलासः आकृतिर्यस्मिन् तस्मिन्। निदर्शनालङ्कार एव। अन्यधर्मस्यान्यत्रासम्भवादुपमापर्यवसायित्वात् ।।४।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।४।। पुनः किंविधे? मदनेत्यादि। मदन एव महीपतिः इति विगृह्य मयूरव्यंसकादित्वादुत्तरपदार्थप्रधानो रूपकसमासः कार्यः। यदि पुनरत्र मदनो महीपतिरिवेत्युपमितं व्याघ्रादिभिरित्यनेनोपमासमासः क्रियते, तदा पूर्वपदार्थप्राधान्यात् मदने कनकदण्डासम्भवात् वर्णनेयमघटमाना स्यात्। मदनमहीपतेः कनकदण्डो राजचिह्नच्छत्रविशेषस्तस्य रुचिरिव रुचिः शोभा यस्य। तथाविधः केसरकुसुमानां नागकेसरपुष्पाणां विकासो यत्रेति विग्रहः, 'कृदभिहितो भावो द्रव्यवत् प्रकाशते' इति न्यायात्। अथवा मदनमहीपतेः कनकदण्डरुचीनि यानि केसरकुसुमानि तानि विकसयति विकासितानि करोतीति कर्मण्यण्। ''छत्रं कनकदण्डः स्यात् राज्ञः काञ्चननिर्मितम्'' इति। स च कामसखेन वसन्तेन केसरकुसुमच्छलादुदित इत्याशयः। ''केसरो हिङ्गुनि क्लीबं किञ्जल्के न स्त्रियां पुमान्। पुन्नागे वकुले सिंहसटायां नागकेसरे।।'' इति **मेदिनी**। पुनः कीदृशे? मिलितेत्यादि। मिलिताः सङ्गताः शिलीमुखाः भ्रमराः शराश्च यत्र। ईदृशेन पाटलिपटलेन पाटलिपुष्पसमूहेन कृतस्मरस्य तूणविलासः तूणीरविभ्रमो यत्रेति विग्रहः। पाटलिपुष्पस्य तूणकारत्वात् शिलीमुखशब्दस्य श्लिष्टार्थत्वाच्च तत्साम्यम्। ''अलिबाणौ शिलीमुखौ'' **इत्यमरः**। ''समूहे पटलं न ना'' **इत्यमरः**।।४।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।४।। पुनः कीदृशे? मदनमहीपतेः सुवर्णछत्रस्य इव रुचिर्यस्य नागकेशरकुसुमस्य विकाशो यत्र तस्मिन्। किं च मिलिताः शिलीमुखा भ्रमरा यस्मिन्। तेन पाटलिपुष्पसमूहेन कृतः तूणीरस्य विलासो यत्र तस्मिन्। पाटलि पुष्पस्य तूणाकारद्वात् शिलीमुखशब्दस्य श्लिष्टार्थत्वात् साम्यम्। छत्रं कनकदण्डं स्यात् राज्ञः काञ्चननिर्मितमितिशेषः।।४।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।४।। ननु अतिकोमलस्य वसन्तस्य कथमीदृशी कठोरतेत्यत आह; मदनेति। मदन एव महीपतिः राजा, तस्य कनकमयो दण्डो यस्य तत् कनकदण्डं श्वेतच्छत्रं, तस्य

रुचिरिव रुचिर्येषां केशरकुसुमानां नागकेशरपुष्पाणां विकाशो यत्र दृश्यते। यो हि वसन्तः केशरकुसुमच्छलेन मन्मथस्य महाराजत्वसूचककनक- दण्डच्छत्रं विभ्राणो दण्डनायकपदवीं प्राप्तस्तस्य लब्धाधिकारस्य राजपुरुषस्य, यादृक् प्रभुः परिजनोऽपि हि तादृगेवेति तादृशकठोरत्वं न चित्रमिति भावः। न केवलं लब्धाधिकारमात्र एव, किन्तु तस्य शस्त्रास्त्रधारितया परमान्तरङ्गश्चेत्याह; मिलितेति। मिलिताः शिलीमुखा भ्रमरा यस्मिन् तेन पाटलपटलेन पुष्पसमूहेन कृतो निर्मितः स्मरतूणस्य मन्मथतूणीरस्य विलासो विभ्रमो यत्र तादृशे। 'तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयो' रि**त्यमरः**। भृङ्गसङ्घटितपाटलकुसुमव्याजेन शरपूरिततूणीरं धारयन्, सन्नद्धस्य स्मरवीरस्य सदा समीपवर्त्तीति भावः। समृद्धिमद्वस्तुवर्णनात् उदात्तालङ्कारः। 'उदात्तं वस्तुनः सम्पत्' इति लक्षणात्।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। मदनमहीपतीति; मदनमहीपतिः राजाकन्दर्पः विजययात्रायां चलति। फलतः नागकेशरपुष्पं सुवर्णदण्डछत्रायते। अर्थात् तस्यागमने नागकेशरपुष्पाणि बाहुल्येन प्रस्फुटितानि भवन्ति। अपि च राज्ञः जययात्रायां दण्डछत्रेण साकं तूणीरमपि तस्य शोभां मण्डयति। अस्मिन् मधुमासे माधवीलतापुञ्जविकासे शिलिमुखाः भ्रमराः कन्दर्पस्य शराणां तूणीरा इव शोभन्ते। अत्र उत्प्रेक्षालंकारः। श्रीराधा राज्ञः कन्दर्पस्यागमनेन भीता।।४।।

**५-विगलित लज्जितजगदवलोकनतरुणकरुणकृतहासे।**
**विरहिनिकृन्तनकुन्तमुखाकृतिकेतकदन्तुरिताशे।। विह०।।५।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५।। विगलिता लज्जा यस्य तत् विगलितलज्जं जगत् ततस्तत्करोतीत्यर्थे णिच, तत्कर्मणि क्तः। विगलितं लज्जितं जगत् वसन्तेन निर्लज्जं विहितं कृतमित्यर्थः। विगलितलज्जितजगदवलोकनेन तरुणैर्नूतनेः करुणेर्वृक्षविशेषैः कृतः पुष्पव्याजेन हासो यत्रेति विग्रहः यूनामेव कामभावाभिज्ञतया हासस्योपयुक्तेः श्लिष्टार्थस्य तरुणशब्दस्योपादानम्।

"तरुणं स्यान्नवे यूनि कुब्जपुष्णोरुवृक्षयोः।
करुणो वृक्षभेदे स्याद्दुःखे च करुणोऽस्त्रियाम्।।"

विरहीत्यादि। विरहिनिकृन्तनाय कुन्तमुखाकृतिर्या केतकी तया दन्तुरिता आशादिक् यत्रेति विग्रहः ''ङयापो संज्ञा छन्दसो बहुलमिति'' केतकीशब्दस्य ह्रस्वः। ''पुष्पे जाती प्रभुतयः'' **इत्यमरः**। निकृन्तनमिति ''कृति च्छेदने'' लुटिर्नुम् दर्शनात्। नूनं जयदेवोऽपि लुटि भ्रान्तनह्यतनुमस्ति शेमुचादीनामिति श एवतद्विधानात्। किन्तु स्थितेर्गतिश्चिन्तनीये गतिश्चिन्तयति पृषोदरादित्वात् नुमत्र कल्पनीयः।।५।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५।। विगलेतेति। लज्जैव लज्जितम्। भावे क्तः। गतलज्जजगदवलोकनेन तरुणैः करुणैः कृतः कुसुमविकासव्याजेन हासो यत्र। विरहिनिकृन्तनकुन्तमुखाकारैः केतकैर्दन्तुरिता विषमीकृता आशा दिशो यत्र। निकृन्तनमिति चिन्त्यम्।।५।।

## (३) जगद्धरकृत-सारदीपिका

।।५।। विगलितेति विगलितस्य शिथिलावयवस्य अत एव लज्जितस्य जगतः अवलोकनेन दर्शनेन तरुणकरुणैः तरुणवृक्षैः पुष्पविकासव्याजेन कृतो हासो हास्यं यत्र विरहीति विरहिणिकृन्तनानि वियोगमारकाणि कुन्तमुखाकृतीनि भल्लमुखाकाराणि यानि केतकीपुष्पाणि तैर्दन्तुरिता व्याप्ता आशा दिशो यस्मिन् तस्मिन्।।५।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५।। पुनः कीदृशे? विगलितेति। विगलितं लज्जितं लज्जा यस्य जगतः प्राणिगणस्यावलोकितेन दर्शनेन तरुणकरुणैर्नवकरुणवृक्षैः पुष्पविकासव्याजेन कृतो हासो यत्र तादृशे वसन्ते। अत्र हास्यरसस्य श्वेतत्वात्पुपविकासेन साम्यम्। यदाह भरतः; श्वेतो हासः प्रकीर्तितः"इति। यद्वा,विगलितलज्जितानां विप्रयोगिजनानामवलोकितैस्तरुणैरर्थादवियोगिभिः करुणं करुणरससहितं यथा स्यादेवं कृतो हासो यत्र एत्र एतादृशो हासे। विरहिणो वराकाः कष्टं प्राप्नुवन्तीति करुणां लज्जां हित्वा विलपन्तीति च हासस्तेषामिति भावः। बाला रसानभिज्ञा एव बृद्धाः परप्रच्यवेऽपि कृतसंवरणाः अतस्तरुणेत्ययुक्तम्। पुनः कीदृसे वसन्ते ? विरहिणां वियोगिनां निकृन्तनाय विदारणाय कुन्तमुखाकृतिः कुन्त आयुधविशेषस्तस्य मुखमग्रभागस्तस्ये- वाकृतिर्यस्य तादृशं यत्केतकं तेन दन्तुरिता व्याप्ता आशा दिशो यास्मिंस्तादृशे वसन्ते। लज्जितेत्यत्रावलोकितेत्यत्रापि च नपुंसके भावे क्तः। करुणस्तु रसे वृक्षे कृपायां करुणा मता" इति विश्वः। प्रासस्तु कुन्तः" **इत्यमरः**। "निम्नोन्नततया व्याप्ते दन्दुरं कथ्यते वुधैः इति धरणिः। "आशा तृष्णादिशोः इति विश्वः। "कृतिछेदने इति ह्रस्वान्तसंज्ञकोऽप्यस्तीति।

प्रयोगः साधुः। क्वचित्तु "केताकिदन्तुरिताशे इति पाठः।" सपाकादौ स्वीकृतो ह्रस्वः क्वापि इत्यत्र कविवचनस्य लज्जानुरोधार्थत्वात्कृतह्रस्वकेतकीशब्देन समर्थनियम्।।५।।

## (५)लक्ष्मणकृत-श्रुतिरञ्जनी

।।५।। विगलितेति। विगलितमपगतं लज्जितं लज्जा येषां ते तादृशाः लज्जितेति भावे क्तः। अतएव जगदवनिजातम् अवलोकयन्तीति जगदवलोकनाः, अस्मिन् समये निर्लज्जानस्मानवलोक्य जनाः किं वदिष्यन्तीति जगदवलोकनाश्च एतादृशा ये तरुणा युवजनास्तेषु विषये करुणैः करुणकुसुमैः कृतः हासो येन तादृशे, विकसितकरुणकुसुम-व्याजेन कामोद्रेकेण निर्ल्लज्जजनान् हसतीत्यर्थः।

अथवा लज्जा येषां संजाता ते लज्जिताः तारकादित्वादितच् प्रत्ययः। विगलिता अपगता लज्जिता यस्मिन् तादृशे वसन्तोदयपर्य्यन्तमुद्दीपकाभावेन मन्दीकृते कन्दर्पदर्पे जगति लज्जा तिष्ठति। वसन्ताविर्भावे तु उद्दीपकमहिम्ना संजातदर्पे तत् प्रभृति जगन्निर्लज्जं भवतीत्यर्थः। तस्यावलोकनेन निरीक्षणेन हेतुना जनितस्तरुण करूणकृताहासः कोमलकरुणकुसुमनिर्मिताहासो यस्मिन् तादृशे, जगदवलोकन-तरुणेत्यर्थ तृतीया तत्कृतेत्यादिना समासः। एतादृशे वसन्ते हरिर्विहरतीत्यन्वयः।

किञ्च विरहिजनानां निकृन्तनं नितरां पीड़नं तस्मिन् विषये कुन्तमुखानां प्रसारिताग्राणामाक तिरिवाकृतिर्येषां तादृशानि यानि केतकानि केतकीकुसुमानि तैर्दन्तुरिता दन्तवत्यः कृता आशा दिशा यस्मिन् तादृशे दन्तानां शैत्यात्तीक्ष्णाग्रत्वाच्च केतकानां तथा रूपणम्। दन्तुरिता व्याप्ता इति वा कृन्तनमित्यत्र नुमागमश्चिन्त्यः आसेत्यादाविव धात्वन्तरमादाय वा प्रयोगः समर्थनीयः। अक्ष्णोरुत्पाटलं पथ्यं नासिकायाश्च कृन्तनमिति वा भट्टस्यापि प्रयोगदर्शनात् दन्तुरितेत्यत्र "दन्त उन्नत उरचिति (५-२-१०६) मत्वर्थेदन्तशब्दादुरच्।" तस्मात्करोति ण्यन्तात् कर्मणिक्तः। देशान्तरे शसयोरभेदत्वादन्त्यानुप्रासोपपत्तिः। अत्र केतकशब्देन केतकीविशेषो ग्राह्यः। न केतकमात्रं वसन्तकाले तस्य समृद्ध्यभावादिति, अथवा सर्वेश्वरसेवार्थं सवेर्त्तृसमागमसम्भवात् सामान्यं ग्राह्यम्।।५।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५।। पुनः किम्भुते वसन्ते; लज्जितं लज्जा, भावे क्तः। विगलित लज्जितस्य जगतोऽवलोकनेन तरुणकरुणैः कुसुमैः कृतो हासो येन तस्मिन्। तथा च तादृशं जगदवलोक्य करूणकुसुमव्याजेन वसन्तो हसतीत्युत्प्रेक्षालंकारः। 'करुणः सदृशे वृक्षे कृपायां करुणा मता।' पुनः कीदृशे वसन्ते ? विरहिणां प्रियवियुक्तजनानां

निकृन्तनाय छेदनाय कुन्तोऽस्त्रविशेषः तस्य मुखम् अग्रभागः। तस्याकृतिरिवाकृतिर्यस्य तत् कुन्तमुखाकृति। तत् केतककुसुमञ्चेति तत् कुन्तमुखाकृतिकेतककुसुमम्। तेन दन्तुरिता व्याप्ता आशा दिशो येन तस्मिन्। तथा च ऋतुराजेन वसन्तेनैव विरहिणां प्रियजनपरित्यागापराधभागिनां निकृन्तनार्थं दिशि केतककुसुमानि स्थापितानीत्युत्प्रेक्षालंकारः। साम्प्रदायिकास्तु विरहिणां निकृन्तनम् छेदनं कर्तरि अनद्, विरहिनिकृन्तनञ्च तत् कुन्तमुखाकृति चेति तत्तथा, तादृशं यत् केतककुसुमं तेन दन्तुरिता उन्नता इव दिशो यत्रेति व्याचक्षते। 'निम्नोन्नते तथा व्याप्ते दन्तुरं कथ्यते बुधैरि'ति धरणिः।।५।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।५।। पुनः कीदृशे? विगलितं[७] गतं लज्जितं लज्जा[८] यस्य तस्य जगतः प्राणिमात्रस्यावलोकनेन विशेषदर्शनेन तरुणकरुणैः नवीनकरुणवृक्षैः पुष्पविकासव्याजेन कृतो हासो यत्र। अत्र [१] हासस्य शुभ्रत्वात् पुष्पविकाससाम्यम्। उक्तञ्च; श्वेतो हासः प्रकीर्तितः इति [१] अथ वा विगलितलज्जितानां वियोगिजनानां [२] जगत्यवलोकनेन तरुणैः अभियोगिभिः करुणं यथा स्यात्तथा कृतो हासो यत्र तादृशे। [३]वियोगिनो लज्जां त्वक्त्वा [४] पश्यन्तीति हासस्तेषामिति भावः। तरुणा रसानभिज्ञाः। [५]एतेन वृद्धानां कृतसन्निवारणानां [६] तरुणहासो न दोष इत्युक्तम्। [७]पुनः कीदृशे। विरहिणां निकृन्तनायाऽतिशयेन विदारणाय कुन्तस्यायुधविशेषस्य भल्लस्य मुखं अग्रभागस्तस्येवाकृति[८]र्यस्य तादृशं [९] यत्केतकं तेन दन्तुरिता व्याप्ता आशा दिशो यस्मिन्। [१०]केतकिरिति पाठान्तरम्। दन्तुरं दन्तमुकुले विषमे मर्मकृन्तने। अग्रभागे च [११] तीक्ष्णे च इति हलायुधः (?)। [१२] करुणास्तु रसे वृक्षे कृपायां करुणा इति **विश्वः** (५०.३०)। दिशश्च ककुभः काष्ठा आशाश्च **इत्यमरः** (१.३.१)। [१३] तारकादित्वात् [१४] इतचि इति। कृति च्छेदने युट्प्रत्ययः[१५]।।५।।

१.सः.४.पर्यन्तं नास्ति-फ.२.तः५.पर्यंतं नास्तिः-अ.ब.३.नास्ति-ग.५.रूपकालङ्कार एव-ब.इ.ह.ज.६.पाटलीपटलैः पाटलीपुष्पसमूहैः-क.७.नास्ति-फ.८.तस्य-अ.९.हासरसस्य-अ.ब.फ.ह.ज.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।५।। विगलितेति। विगलितस्य शिथिलावयवस्य अत एव लज्जितस्य जगतः अवलोकनेन तरुणकरुणैः नूतनवृक्षैः पुष्पविकास व्याजेन कृतो हासो हास्यं यत्र। विरहीति। विरहिनिकृन्तनानि वियोगिमारकारकाणि कुन्तमुखा- कृतीनि

भल्लमुखाकाराणि यानि केतकीपुष्पाणि तैर्दन्तुरिताः व्याप्ता आशा दिशो यस्मिन् ।।५।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।५।। विगलितेति। विगलितानि विगतानि लज्जितानि ह्रियः येषां जगतां यूनामवलोकनेन तरुणाः वरुणाः वालवसेतुवृक्षकुसुमानि तैः कृतःहासः विकास एव परिहासः तस्मिन्। सेतुविकासस्य शुभ्रत्वात्परिहासकरणम्। विरहिणां निकृन्तने च्छेदने कुन्ताः शस्त्रविशेषाः तेषां मुखाकृतिभिः केतकैःदन्तुरिताः शूलारोपणवत्परितः कीलिताः आशाः दिशः यस्मिन्। शूलवत्सर्वत्र केतकानि वर्तन्त इत्यर्थः। उत्प्रेक्षोपमालङ्कारौ पूर्वोत्तरार्धद्योत्यौ ।।५।।

१.यद्वा-ग. २.जगदवलोकनेन-अ. ३.वियोगिनां-अ. ४.पश्यन्तीति च-फ.ह.ज.५.एव वृद्धाना– अ.ब.इ.फ.ग.ह.ज. ६.तरुणहास इत्युक्तम् अ. तरुणहासे न दोष इत्युक्तम्-फ.ह.ज.७.नास्ति-ग.८.यत्र-अ.९.यत्केतनं-फ.१०.केतका इति-फ.११.तीक्ष्णे च प्रोन्नते चेति-इ.फ.ग.ह.ज.१२.तरुणे वृक्षे कृपायां करुणा-अ.ब.करुणः करुणे वृक्षे कृपायां करुण इति विश्वः-इ.फ.ग.१३.तः १४.पर्यन्तं नास्ति-अ.१५.इतच्-ब१६.शिथिलावयवस्यात एवं-ल.म.शिथिलावयवस्य एवं-क.१७.तरुण-करुणैः तरुणवृक्षैः-ल.म.तरुणकरणैः तरुण-करणवृक्षैः-क.१८.नास्ति-ल.१९.योजन-क.२०.नास्ति-ड.२१.वरुण इत्येतद्याख्यानुसारी पाठः-च.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५।। पुनः किंविधे ? विगलितेत्यादि। विगलितं कामोद्रेकवशाद् विस्रंसितं लज्जितं लज्जा यस्मादीदृशं जगत् लज्जितमिति, स्वार्थे णिजन्ताद् भावे क्तः। यद्वा विगलिता लज्जा तद्विगलितलज्जं जगत्। ततस्तत् करोतीत्यर्थे णिच्। ततः कर्मणि क्तप्रत्यये विगलितलज्जितम्। अर्थात् वसन्तेन निर्ल्लजीकृतं जगदित्यर्थः। विगलितलज्जितो जगतः अवलोकनेन तरुणैर्नूतनैः करुणैः वृक्षविशेषैः कृतपुष्पव्याजेन हासो यत्रेति विग्रहः। हासस्य श्वेतवर्णत्वात् करुणपुष्पै साम्यम्। तरुणानां यूनामेव कामभावाभिज्ञतया अनर्गलत्वाद्धासस्योपयुक्तैः श्लिष्टार्थस्य तरुणशब्दस्योपादानम्। तरुणैरिवेति वा समासे इवशब्दलोपो गवेषणीयः। ''तरुणः स्यान्नवेत्यकुब्जपुष्पत्र(तु)वृक्षयोः'' इति। ''करुणो वृक्षभेदे स्यात्कृपायां करुणा मता'' इति **मेदिनी**। पुनः किंविधे ? विरहीति । विरहिणां विरहिणीनाञ्च निकृन्तनाय मारणाय कुन्तमुखस्य कुन्ताग्रस्येवाकृतिर्यस्याः। एवंविधा या केतकी तया दन्तुरिता इव दन्तुरीकृता इव आशा दिशो यत्रेति विग्रहः। निशितानां शस्त्राणाम् अग्रिमो भागो मुखमिति व्यवह्रियते। यथा, ''अमुखो बाणः'' इत्यादि ''ङ्यापोः संज्ञाछन्दसोर्बहुलम्'' इति केतकीशब्दस्य ह्रस्वः। अत्र केतकीति पुष्पं

ज्ञेयम्। यदुक्तम्, ''पुष्पे जातीप्रभृतय: स्वहिङ्गाव्रीहय: फल'' इति। निकृन्तनमिति। ''कृती छेदने'' लटि तुं दर्शनात् नूनं जयदेवोऽपि ल्युटि भ्रान्तो नह्यत्र नुमण्डिशेमुचादीनामिति पित्येवातद्विधानात् किन्तु स्थितेर्गतिश्चिन्तनीयेति पृषोदरादित्वान्नुमत्र कल्पनीय:।।५।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।५।। पुन: कीदृशे ? विगलितं लज्जितं लज्जा यस्य तस्य जगत: प्रणिमात्रस्यावलोकनेन तरुणै: करुणवृक्षै: पुष्पव्याजेन कृतो हासो यत्र तस्मिन्। यूनामेव कामाभिज्ञतया हास्यस्योपयुक्तत्वे श्लिष्टार्थस्य तरुणशब्दस्योपादानम्। तथा विरहिणां निकृन्तनाय कुन्तस्य अस्त्रविशेषस्य मुखमिव आकृतिर्यासां ताभि: केतकिभिर्दन्तुरिता उन्नतदन्ता आशा दिशो यत्र तस्मिन्। प्रासस्तु कुन्त इत्यमरसिंह:।।५।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५।। न केवलं वसन्तस्य स्वत एवासमीक्ष्यकारिता, किन्तु परिकरदौष्ट्यादपीत्याह; विगलितेति। विगलितं विशेषेण गलितं सन्भ्रियमाणमपि अपगतं लज्जितं लज्जा यस्य, एतादृशस्य जगतो वसन्तोद्दीप्तमदनतया लज्जापरित्यागात् दुरवस्थामापन्नस्य जनजातस्य अवलोकनेन, कर्मणि षष्ठी। तरुणैर्नूतनै, पक्षे विपरीतलक्षणया निष्करुणै:, कृतो हास: प्रसूनविकास:, पक्षे परिहासो यत्र तादृशे। लज्जात्याजनेन तेषां दुरवस्थामापाद्य तान् पुन: परिकरैर्हासयतीति, अहो वसन्तस्य तत्परिकराणां च दौरात्म्यमिति भाव:। इयं गम्योत्प्रेक्षा। 'इवादिकपदाभावे गम्योत्प्रेक्षा प्रचक्षते' इति लक्षणात्। न केवलं परिहासयति मात्रं किन्तु अन्यैर्मारयितुमुद्यतो भवतीत्याह; विरहीति। विरहिणां[१४] वियोगिजनानां निकृन्तनाय नि:शेषेण च्छेदनाय कुन्तस्य तीक्ष्णाग्रशस्त्रविशेषस्य मुखस्याकृतिरिवाकृतिर्येषां तै: केतकै: दन्तुरिता दन्तवत्य: कृता आशा दिशो येन तादृशे। केतकशब्देनात्र केतकीकुसुमं ग्राह्यम्। केतककुसुमस्य शारदीयत्वात् केतकीति क्वचित् पाठ:। अव्याहतप्रसरातितीक्ष्णकुन्तलक्षणायुधप्रदानेन विरहिजनमारणाय दिग्विभागान् प्रवर्त्तयतीति भाव:। कृन्तनमित्यत्र नुमागमश्चिन्त्योऽपि अभियुक्ततरैर्वहुश: प्रयुज्यते। तथा च विदग्धमाधवे,

''अजड: कम्पसम्पादी शस्त्रादन्यो निकृन्तन:।
तापनोऽनुष्मताधारी कोऽवायं मुरलीरव:।।'' इति।
शसयोरभेदात् अन्त्यानुप्रासोपपत्तिरिति कविसम्प्रदाय:।।५।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। विगलितेति; वसन्तकालस्य प्रभावेन तरुणानां कामीजनोचितव्यवहारेण आचरणेन वा लज्जात्रपादि विवर्जितेन तदवलोक्य तरुणजनाः हास्यास्पदाः परिहासस्य शरव्या अपि भवन्ति। हासःखलु विकशितस्फुरितपुष्पमुखेन सम्भवति। अत्र तरुणकरुणैः नव करूणबृक्षैः श्वेतपुष्पविकाशव्याजेन परिहासोऽपि व्यञ्जितो भवति। यतो हि **भरतेन** श्वेतहासः प्रकीर्तित इत्येवोक्तम्। **विश्वनाथो**ऽपि मालिन्यं व्योम्नि पापे यशसि धवलता वर्णते हासकीर्त्त्यौ इति प्रणिनाय। अत्र करुणपुष्पस्य धवलता प्रसिद्धत्वात्। पुनः करुणभावापन्नाः विरहिणः स्वस्य लज्जां परित्यज्य उपहासेन खिन्नाः भवन्ति। अत्रः विरहिजनानां कृते उपहासः न युज्यते। अनेन प्रताडनमुपहासेनापि कन्दर्पः न संतुष्टः। लज्जायामुपरि पुनः कुन्तमुखाकृतिकेतकीपुष्पस्य दन्तुरितं भागं व्यवहृत्य कामसंतप्तान् कुन्तेन प्रहरति। तेनापि केतकीधवलदन्ताः दिगङ्गना अपि हसन्ति। आहोस्वित् विरहिजनस्य दुःखेन खेदेन पीडयाऽपि सर्वा तरुण्यः दिगङ्गनाः कन्दर्पोऽपि हसन्ति। अहो करुणता। अत्र परिणामोऽलंकारः। अत्रापि राधायाः विरहे उपहासध्वनिः।।५।।

**६-माधविकापरिमलललिते नवमालतिजातिसुगन्धौ।**
**मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ।। विह० ।।६।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६।। माधविका परिमलललिते नवमालिकया अति सुगन्धौ "विमर्द्दोत्थे परिमलो गन्धे जनमनोहरे" **इत्यमरः**। पुनः कीदृशे, नवमलिक्या अतिसुमन्धौ सप्तला नवमालिकेत्यमरः पुनः कीदृशे मुनिमनसामपि मोहनकारिणि का कथा रागिणामित्यपि शब्दार्थः। पुनः कीदृशे, तरुणीकारणबन्धौ। अत्र सामान्योक्तेऽपि तरुणः सम्भोग्येव प्रतिपत्तव्यः, व्याजेन विरहिजनस्य दुरन्त इत्युक्तेः। तरुणाश्च तरुण्यश्च तरुणी "पुमान् स्त्रियेत्यकशेषः।" विभावनालङ्कारः। यदुक्तं,

प्रसिद्धहेतुव्यावृत्या यत्किञ्चित्कारणान्तरम्।
यत्र स्वाभाविकत्वं वा विभाव्य सा विभावना।।इति।।६।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।६।। माधविकापरिमलेति किंभूते वसन्ते ? वासन्त्याः परिमलेन गन्धविशेषेण ललिते मनोहरे। पुनः किंभूते ? नवमालिकया जात्यातिसुगन्धौ। पुनः किंभूते ? मुनिमनसामपि

मोहनकारिणि व्यामोहकारके तरूणानां का कथेति। सुरतार्थं प्रेरके वा। पुनः किंभूते ? तरूणानामकारणबन्धौ निसर्गमित्रे। वसन्ते हि कामिन्यःस्वयमेव मानं त्यजन्ति।।६।।

### (३) जगद्धरकृत-सारदीपिका

।।६।। माधविकेति माधविकायाः वासन्तिलतायाः परिमलनगन्धेन ललिते मनोहरे नवमलिका निवारपुष्पाणि जातिः जातिपुष्पाणि ताभ्यां सुगन्धौ मुनिमनसामपि ऋषिचित्तानामपि मोहनकारिणी मदनजनके तरुणानां यूनाम् अकारणबन्धौ सहजमित्रे।।६।।

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।६।। माघविकेति। स्पष्टम्। सा मुनिमनोमोहनकारिणी। किमन्येषां वक्तव्यमिति भावः। पुनः कीदृशे ? तरूणानां विलासियुवजनानामकारणबन्धौ स्वभाविकमित्रे। "विमर्दोत्थे परिमलो गन्धे जनमनोहरे" इति।।६।।

### (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६।। माधविकेति। माधविकायाः पुष्पितवासन्तीलतायाः परिमलो गन्धस्तेन मिलिते व्याप्ते, किञ्च, मुनिमनसामपि मुनीनां विषयविमुखानां मनसमन्तकरणा नामपि किमुत रागिणामित्यर्थः मोहनकारिणि विकारसंवादनशीले "सुप्यजाताविति णिनिः (३।२।७८)"। तरुण्यश्च तरुणाश्च "पुमान्स्त्रिये" (१।२।६७) त्येकशेषः। ताषामकारणमन्योऽन्यसंघटनार्थमाह्वानं-तत्र बन्धौ विमुखतरुण तरुणीसम्बन्ध-घटनापटीयसीत्यर्थः। अथवा तरुणतरुणीनामकारणबन्धो अन्योऽन्यसम्बन्धघटन-निरुपाधिकमित्रभूते इत्यर्थः। एवं भूते वसन्ते हरिर्विहरतीत्यनन्वयः।।६।।

### (६) शुक्लध्वजनृपतिकृत-सारवती

।।६।। पुनः किम्भूते वसन्ते तत्राह। माधविकायाः वासन्त्याः परिमलेन गन्धेन ललिते मनोहरे। अपि किम्भूते ? नवमालिकया नूतनमालिकापुष्पविशेषेणातिसुगन्धौ शोभनगन्धयुक्ते। अपि किम्भूते ? मुनिमनसामपि मननशीलमहाजनचित्तानामपि मोहनकारिणि मोहजनके। अपिशब्देनान्यजन- चित्तोन्मादकत्वमीषत्करमिति दर्शितम्। तरुणानां यूनामकारणबन्धौ सहजमित्रे। मुनिनिजनमनोभञ्जकत्वेन यूनामभिमतकारित्वात् परमप्रीतिदायकत्वाच्च वसन्तो बन्धुत्वेन निरूपित इति। 'विमर्दोत्थे परिमलो गन्धे जनमनोहर' **इत्यमरः**।।६।।

### (७) वनमालिभट्टकृत-सञ्जीवनी

।।६।। पुनः कीदृशे ? मधोर्वसन्तस्येयं माधविका। वसन्तो नायकः माधविका[१] वासन्तीलता नायिका च। तस्याः परिमलेन सौरभेण ललिते मनोहरे। यद्वा[२] मधुर्वसन्तः

श्रीराधाधरामृतं वा तत्प्रियत्वान्माधवः श्रीकृष्णः तस्य प्रिया माधविका श्रीराधा तस्याः अङ्गपरिमलेन सौरभेण[३] अङ्गपरिमलेन मुखपरिमलेन वा ललिते सुन्दर इति ध्वनिः। नान्यथेदृशी सौरभसम्पत्ति[४] र्वसन्तस्येति भावः। पुनः कीदृशे ?[५] नवमालिकया नूतनमालिकापुष्पेणातिसुगन्धौ अतिशयेन सौरभयुक्ते।[६] अथ वा[७] मालतिजातीति पाठः। नवमालतिर्नूतना मालती जातिश्च ताभ्यां सुगन्धौ सौरभयुक्ते। गन्धस्येत्पूतिसुरभिभ्य [८] इतीत्। मालतिजातिरित्येकं पदं वा। पुनः कीदृशे ? मुनिमनसां[९] ब्रह्मानन्दयुक्तानां किं पुनरन्येषां मोहनकारिणि मोहजनके। [१०]एतेन के(वल) ब्रह्मानन्दाच्छ्रीराधाकृष्ण[११]भजनमेवाधिकमिति ध्वनितम्।[१२]न वेदं वसन्तसौन्दर्यसौभाग्यं [१३]किन्तु विहारिणोः श्रीराधाकृष्णयोरेव।[१४]पुनः कीदृशे ? तरुणानां विलासियुवजनानां स्वाभाविकमित्रे। यद्वा, कारणेन[१] बलात्कारेणेव वध्नातीति बन्धुरासक्तिकारके। पुष्पविहारः स्त्रीणां [२] नवरतिजनको भवत्येव। अत्र पुष्पाणां मनोहारित्वमुक्तमिति। [३] अथ वा जीवानामभिमतं तनोतीति [४] तनुः कल्पतरुः श्रीकृष्णस्तेन [५] तरुणा [६]श्रीकृष्णचन्द्रेणाकारणबन्धौ सहजमित्रे। विमर्दोत्थे[७]परिमलो गन्धे जनमनोहरे **इत्यमरः** (१.५.१०) ।।६।।

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।६ ।। माधविकेति। माधविकायाः वासन्तीलतायाः परिमलेन गन्धेन ललिते मनोहरे। नवमालिकया [८] नवानि नवारण्यपुष्पाणि ताभिरतिसुगन्धौ। मुनि[९]मनसामपि ऋषिचित्तानामपि मोहनकारिणि मदन [१०] जनके। तरुणानां यूनामकारणबन्धौ सहजमित्रो बृन्दावनविपिने हरिः क्रीडतीत्यन्वयः।।६ ।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।६ ।। माधविकेति। माधविकायाः मल्लिकायाः परिमलेन ललिते [११]सुरभिशालिनि नवमालत्यश्च जातयश्च ताभिः सुगन्धौ अत एव मुनिमनसां विरागिणापि मोहनकारिणि। तरुणानां यूनां अकारणबन्धौ निर्निमित्तसख्यौ मदनोद्दीपने। मानवत्योऽनुनयं विनैव प्रियानुपगच्छन्तीति भावः।।६ ।।

१.वासन्ती नायिका वा-ब.वासन्ती नायिका च-इ.फ.ग.ह.ज.२.मधुः श्रीराधाधरामृतं वा-अ.३.अङ्गपरिमलेन वा-अ.मुखपरिमलेन वा-ब.इ.फ.ग.ह.ज.४.वसन्त इति भावः-अ.ब.इ.-फ.ग.५.नवमालिकापुष्पेणातिसुगन्धी-ग.६.यद्वा-ग.७.मालतिजातीतिभावः-ब.८.इतिवत्-अ.९.अखण्डब्रह्मानन्दमोदजुषां-ह अखण्डब्रह्मानन्दजुषां सेवमानानां-इ.फ.ग.ज. १०.एतेन ब्रह्मानन्दात् श्रीराधा-इ.फ.ग.ह.ज.११.भजनानन्दोऽधिक इति-इ.फ.ग.ह.ज.१२.न चेदं-फ.ग.ह.ज.१३.नास्ति-अ.किञ्च-ग.१४.नास्ति-अ.ब.इ.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६।। पुन: किंविधे ? माधवीत्यादि। माधविकाया: वासन्त्या: परिमलेन गन्धेन ललिते रुचिरे ईप्सिते वा। ''स्यात् परिमलो विमर्दातिमनोहरगन्धगन्धयोश्चापि'' इति **"मेदिनी"**। पुन: किंविधे ? नवमालिकया इति। 'निआलीति' नाम्ना उत्कलगौडादिषु प्रसिद्धतया अतिसुगन्धौ अत्यन्तपरिमलसहितौ गन्धशब्दस्य गन्धस्येदुत्पूतिसुसुरभिभ्य इति समासान्त इप्रत्यय:। यद्येतद् 'वृन्दावनविपिन' इत्यस्य विशेषणं, तदा सुगन्धिनीति न भवति। ''तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य'' इति पुंवद्भावात् इति। पुन: किंविधे ? मुनिमानसापि मोहनकारिणीति का कथा रागिणामित्यपेरर्थ:। पुन: किंविधे ? तरुणेति। तरुणानां तरुणीनां च अकारणेन कारणमन्तरेण उपकारं विना बन्धु: हितकारी अपेक्षित: सम्भोगाद्यनुकुलस्तस्मिन् अत्र सामान्योक्तोऽपि तरुण: सम्भोग्य: वा प्रतिपत्तव्यो न विरही। ''विरहिजनस्य दुरन्ते'' इत्युक्ते: अकारणबन्धाविति विभावनालङ्कार:। ''कारणं विना कार्योत्पत्तिर्विभावना'' इति लक्षणात्।।६।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।६।। पुन: कीदृशे ? माधविकाया: सौरभेन ललितेन नवमालिकापुष्पैरतिसौरभे। मुनिमनसामपि मोहजनके कामिनां का वार्त्तेत्यपेरर्थ:। ईदृशोऽपि य: समाधियुक्तमुनीनां मनस्युद्वेजक: स कथं चिरं तिष्ठति ? तरुणानां निरुपाधिकमित्रे एकशेषस्तरूणशब्द: तरुण्यश्च तरुणाश्च तेषामिति।।६।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६।। आस्तां रागिष्वेवं दुरन्तत्वं विरक्तेष्वपीत्याह; माधविकेति । माधविकाया: पुष्पितवासन्तीलताया: परिमलेन सौरभेण ललिते अतिमनोहरे, 'मिलिते' इति क्वचित् पाठ:, तदा व्याप्त: इत्यर्थ:। तथा नवमालिकयाऽतिसुगन्धौ, 'गन्धस्य' इत्यादिना बहुव्रीहिसमासान्त:। अतिसुगन्धवतीत्यर्थ:। नवमल्लिकयेति क्वचित् पाठ:। जातावेकवचनम्। यदर्थमेव तत् प्रयोजनमाह मुनीनां सततं मननशीलतया विषयपराङ्मुखानां मनसामपि समाधिनिष्ठचेतसामपि, न च चक्षुरादिबाह्येन्द्रियाणाम् एवेति भाव:। मोहनकारिणि, मोहनं कर्त्तुं शीलं यस्य तादृशे। झटिति समाधितो विघटय्य स्मरविकारसम्पादिनीत्यर्थ:। ननु 'आयुर्बलं श्रियं हन्ति पुंसां महदतिक्रम:' इति तादृशमहत्तमानामुद्वेजकस्य कामस्य कथमभ्युदयस्तत्राह; तरुणेति। तरुणाश्च तरुण्यश्च, तरुणा:। 'पुमान् स्त्रियेति' एकशेष: तेषामकारणबन्धौ। अन्योन्यसङ्घटन-कारितया निरुपाधिकमित्रे। मानिनीनां मानभञ्जनहेतुकस्वयंग्राहादिदानशीलतया सापराधतरुणानामाशीर्वादात् समृद्धो भवतीति भाव:।।६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६ ।। माधविकेति; माधविपुष्पस्य गन्धपूर्णे माधविकाया नवमालिकया नवविकशित मालतीकुसुमस्य वा जात्यादिकुसुमचये सुगधौ मुनीनामपि मतिभ्रमोः भवति। कामोद्दीपना व्यामोहश्च जायते का कथा तरुणकुलस्य ? यदि मुनीनां व्यामोहः तर्हि राधाया अपि सा दशा स्यादिति ध्वनिः यद्वा अर्थान्तर संक्रमितध्वनिरिति मन्तव्यः ।।६ ।।

**७-स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते।**
**वृन्दावनविपिने परिसरपरिगतयमुना जलपूते।। विह० ।।७ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७ ।। स्फुरन्त्या अतिमुक्तलतायाः परिरम्भणेन पुलकिता इव मुकुलिताश्चूता येनेति विग्रहः। यथान्यकश्चिदुत्तमाङ्गनाश्लिष्टपुलकिताङ्गा भवति इत्यभिप्रायः। अचेतनावपि स्त्री पुंसौ संयोगमन्तरेण किं पुनः स्थातुमशक्तौ सचेतनावित्यर्थप्रतिपादनार्थे अस्य पदस्योपन्यासं।

वस्तु किञ्चिदभिप्रेत्य तत्तुल्यस्यान्यवस्तुनः।
भक्तिः संक्षिप्तरूपत्वात्सा समासोक्तिरिष्यते ।। इति **काव्यादर्शः**

"अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवीलता" **इत्यमरः** ।।७ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।७ ।। स्फुरदातिमुक्तलतेति। किंभूते वसन्ते ? स्फुरन्त्याश्चलन्त्या अतिमुक्तलताया वासन्त्याः परिरम्भणेन मुकुलितः पुष्पितः पुलकितः जातरोमाञ्चश्च चुतः। अत्र पुष्पाणि रोमाञ्चेनोपमियते। अनेन सात्त्विकभावो दर्शितः। वृन्दावनेति। अत्र पूर्वं ध्रुवपदे इह वने हरिर्विहरतीत्यष्टपद्या एकवाक्यत्वात् विहराधेयत्वे वृन्दावनशब्दो व्याख्यातः। संप्रति वसन्तविशेषणत्वेन व्याक्रियते। किंभूत वसन्ते ? वृन्दावनविपिने। वृन्दमवतीति वृन्दावनं तद्विपिनं यस्मिन्स तथा तस्मिन् परिसरे पर्यन्तभुवि परिगतं यद्यमुनाजलं तेन पूते।।८ ।।

## (३) जगद्धरकृत- सारदीपिका

।।७।। स्फुरदिति। वृन्दावनविपिने हरिः क्रीडतीत्यन्वयः स्फुरन्त्याश्चलन्त्या अतिमुक्तलतायाः परिरम्भणेन आलिङ्गनेन मुकुलितः पुष्पितः पुलकितः हृष्टः आम्रवृक्षो यत्र कथंभूते वृन्दावनविपिने परिसरेति परिसरे पर्यन्तभुवि परिगतं प्राप्तं यत् यमुनाजलं तेन पूते पवित्रे।।७ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।७।। किदृशे ? स्फुरदिति। स्फुरन्ती कम्पमाना शोभमाना वा याऽतिमुक्तलता तस्या: परिरम्भणेन मुकुलितं मञ्जरीयुक्तं तदेव पुलको रोमाञ्चकथनेनाचेतयोरपि कामचेष्टा कथिता। तेन च वसन्तस्यातिदुरन्तत्वं कथितम्। अतिशयेन मुक्तानामपि परिरम्भणोत्सुकतेति "अतिमुक्त" पदेन कथितम्। एतावता वसन्तस्य सरमता दुरन्तता चोक्ता। संप्रति क्रीडाया: स्थानविशेषमाह; वृन्दावनेति। वृन्दावननाम्ने विपिने वने हरीर्विहरतीत्यन्वय:। कीदृशे विपिने ? परिसरे समीपप्रदेशे परिगतेन सर्वतोगतेन यमुनाजलेन पुते पवित्रे। "अतिमुक्त: पुण्ड्रक: स्याद्वासन्ती माधवी लता **इत्यमर**:। मुकुलं करोति तदाचष्टे। णिजन्ताद्भावे त्के सति मुकुलितमिति बोध्यम्। पश्चानमुकुलितमेवपुलका: संजातो स्येति तारकादित्वादितच्। "अम्रश्चूत": **इत्यमर**:। "पर्यन्तभू: परिसर:" इत्यपि।।७।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।७।। स्फुरदिति। स्फुरदिति स्फुरन्ती भासमाना या अतिमुक्तलता माधवीलता, "अतिमुक्त: पुण्ड्रक:स्याद्वासन्ती माधवीलतेत्**यमर**"। तया परिरम्भणमालिङ्गनं तेन मुकुलित: संजातमुकुल: अतएव पुलकित: सञ्जातपुलक इव स्थित इत्यर्थ:। एतादृशश्चूतो यस्मिन् तादृशे अत्र लताचूतयो: परिरम्भणादिप्रतिपादनाभयोर्नायिका-नायकसाम्यं ध्वन्यते। परिसरे पर्य्यन्तभूमौ पर्य्यन्तभू: परिसरसुरतश्रमापनोदन-पटुतरपय:कणालङ्कृत इत्यर्थ:। एतादृशे वृन्दावने वृन्दावनाख्यप्रदेशे वसन्तसमये हरिर्विहरतीत्यन्वय:।।७।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।७।। पुन: किम्भूते वसन्ते तत्राह। स्फुरन्त्या: शोभमानाया: अतिमुक्तलताया: परिरम्भणेन आलिङ्गनेन मुकुल एव मुकुलितम्, तेन पुलकितश्चूतो यत्र। अत्र वासन्तीलता नायिकात्वेन निरूपिता। तस्या: परिरम्भणेन नायकत्वेन निरूपित- चूतवृक्षस्याचेतन-स्यापि पुलकोद्गम इति दर्शयता वसन्तस्याधिक्यं दर्शितम्। कुत्र विहरतीति स्थानमाह; वृन्दावनविपिने वृन्दावननाम्नि वने। कीदृशे वने ? परिसरं पर्यन्तभुवं परि सर्वतोभावेन गतेन यमुनाजलेन पूते पवित्रे। एतेन स्थानस्य विहारयोग्यत्वं दर्शितम्। 'पर्यन्तभू: परिसर' **इत्यमर**:।।७।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।७।। पुन: कीदृशे ? स्फुरन्ती सात्विकोदयेन कम्पमाना, न तु वायुना; कान्त्या द्योतमाना वा या अतिमुक्तलता वासन्ती माधवी वा लता तस्या: परिरम्भणेनालिङ्नेन

मुकुलितो जातकामाङ्कुरःपुलकितः रोमाञ्चितश्चूतवदसाधारणगुणः श्रीकृष्णो यत्र चूते एवेति तादृशे। अनेन श्रीकृष्णचन्द्रस्पर्शेनैव चूतस्य पुलकोदयो न वासन्तीलतालिङ्गनेन। एवं प्रसिद्धिः-महावृक्षा महा[१]नायकाङ्गस्पर्शमात्रेणैव नवीनपल्लवपुष्पफलसम्पदो भवन्तीति। दोहदशास्त्रेऽपि दोहदं विना न तरवः पल्लवपुष्प[२]फलवन्तो भवन्तीति। [३]तस्मादेव मङ्गलं[४]तच्चरणस्पर्शमेव। एतावता वसन्तस्य [५] सरसता दुरन्तता चोक्ते। इदानीं क्रीडायाः स्थानविशेषमाह-(वृन्देति)। वृन्दावनाख्यविपिने वने[१६] परिसरे [६] समीपदेशे परितः सर्वतः गमनशीलेन[७]श्रीकृष्णातोयेन पूते[८]पवित्रिते। पूतं यमुनाजलं यस्मिन्निति वा[९]पुतः। श्रीकृष्णायाः परितः प्रसरणं वसन्ते तच्चरण[१०]स्पर्शोपचित-[११]पूरत्वादेव। वासन्ती माधवीलता **इत्यमरः**(२.४.७२)। पर्यन्तभूः परिसरः इत्यपि (अमरः २.१.१४)। आम्रश्चूतः **इत्यमरः** (२.४.३३)।[१२]मुकुलित इति तारकादित्वादितच्[१३]।।७।।

१.बलात्कारेण बध्नातीति-फ.ग.२.रतिजनको-इ.फ.ग.ह.ज.३.यद्वा-ग.४.तरूः-ह.५.तरुणेन-अ.६.श्रीकृष्णेन-इ.फ.ग.ह.ज.७.परिमले-फ.ग.८.नेवारपुष्पेण नेवारपुष्पाणि नाभिरतिसुगन्धौ-ड. नवारण्यपुष्पाणि तेषां मालयातिसुगन्धौ-क.९.मानसानामपि-ड.१०.जनकः-ड.११.सुरभिणाशालिनि-च.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।७।। स्फुरदिति। स्फुरन्त्याश्चलन्त्या अतिमुक्तलतायाः वासन्तीलतायाः परिरम्भणेन आलिङ्गनेन मुकुलितः पुष्पितः पुलकितो [१४]हृष्ट आम्रवृक्षो यत्र। [१५]कीदृशे बृन्दावनविपिने ? परिसरपरिगतयमुनाजलपूते परिसरे पर्यन्तभुवि परिगतं व्याप्तं यद्यमुनाजलं तेन पूते पवित्रे ।।७।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।७।। स्फुरदिति। स्फुरन्त्यः अतिमुक्तलताः पुण्ड्रकवल्ल्यः तासां परिरम्भणं आश्लेषो येषां तैः मुकुलितैः कुट्मलैःपुलकिताः चूताःरसालाः यस्मिन् तस्मिन्। यद्वा तासां परिरम्भणेन आश्लेषेण मुकुलितं कुट्मलितं तदेव पुलकितं रोमाञ्चितं यैः। समासे नायकनायिकावृत्तान्तभासनात्समासोक्तिः। समासोक्तिः परिस्फूर्तिः प्रस्तूतेऽप्रस्तुतस्य च इति तल्लक्षणात्। वनं वर्णयति परिसरे समीपे परिगतायाः प्राप्तायाः यमुनायाः जलैः पूते शुचौ वृन्दावनविपिने च क्रीडतीति वनविशेषणमेव।।७।।

१.नायिका-अ.ब.फ.ग.नायिकाङ्गस्य-इ.२.फला भवन्ति-ब.इ.फ.ग.ह.ज.फला भवन्तीति-अ.३.तस्मात्तदेव-इ.ग.ह.ज.यस्मात्तदेव-फ.४.यच्चरण-फ.तव चरण-ग.५.सरसतां दुरन्ततां चोक्त्वेदानीं-इ.६.समीपप्रदेशे-इ.७.श्रीकृष्णाजलेन-इ.फ.ग.ह.ज.८.पवित्रे-फ.ग.९.तेन पूते-

इ.फ.ग.ह.ज.१०.स्पर्शस्य पवित्रत्वादेव-फ.स्पर्शोपचितसरसत्वादेव-ज.११.पुरादेव-अ.१२.तः-१३.पर्यन्तं नास्ति-अ.१४.नास्ति-म.१५.कथम्भूते-क.ल.म.

### (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।७।। पुनः किंविधे ? स्फुरदित्यादि। स्फुरन्ति पुष्पसमृद्ध्या सविकासीभवन्ति। किं वा वेपमाना दक्षिणमारुतेनेत्यर्थात् या अतिमुक्ता लता, तस्याः परिरम्भणं वेष्टनमेव परिरम्भणं कम्पमाना नायिका नालिङ्गनम्, तेन पुलकिता इव सञ्जातरोमाञ्चा इव मुकुलितचूताः सञ्जातकलिकाश्चूतवृक्षाः यत्रेति विग्रहः। अन्योऽपि हि नायक उत्तमाङ्गनयालिङ्गितः पुलकिताङ्गो भवति। अत्र मुकुलितमेव पुलकितत्वम्। अत्र नायकनायिकाव्यवहारारोपणमर्थसामर्थ्यात् नायकस्य कामविकारसूचनं रोमाञ्चः नायिकायाः कम्पनञ्च। यदुक्तम्, ‘‘कम्पः स्वेदोऽथ रोमाञ्चः प्रथिमा जघनस्थले। आविर्भवति नारीणामनुरागवशात्मनाम्।।’’ इति। अचेतनावपि स्त्रीपुंसौ संयोगमन्तरेण स्थातुमशक्तौ किं पुनः सचेतनादित्यर्थप्रतिपादनार्थमस्य पदस्योपन्यासः। समासोक्तिरलङ्कारोऽयम्। ‘‘वस्तु कञ्चिदभिप्रेत्य न्यसनात्तत्सधर्मिताः। उक्तिः संक्षेपरूपत्वात् सा समासोक्तिरिष्यते।।’’ इति। वृन्दावनविपिने हरिर्विहरतीति प्रागुक्तम्। वृन्दावनं नाम विपिनम्। किं वा वृन्दादेव्याः वनं रक्षणं यत्र एवंविधविपिनं तत्र। किंविधे ? परिसरेति । परिसरं पर्यन्तभूमी परिगता अभिव्याप्य वहति या यमुना, तस्याः जलेन पूते पवित्रे इति।।७।।

### (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।७।। पुनः कीदृशे ? स्फुरन्त्या माधवीलतायाः परिरम्भणेन पुलकित इव मुकुलितो चूतो रसालतरुर्यत्र तस्मिन्। यथा कश्चित् वराङ्गनालिङ्गितः पुलकितो भवतीत्याभिप्रायः। कीदृशे बृन्दावनविपिने ? पर्यन्तव्याप्तयमुनाजलेन पूते पवित्रे शोभिते इत्यर्थः। पर्यन्तभूः परिसर **इत्यमरः**।।७।।

### (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७।। एवं वसन्तसामर्थ्यनिरूपणेन श्रीराधां प्रति न च श्रीकृष्णे त्वया मानः कार्य इति सूचयित्वा अथ वृन्दावनरमणीयतावर्णनव्यपदेशेन श्रीकृष्णसङ्गमाय प्रोत्साहयन्त्याह; स्फुरदिति। स्फुरन्ती नवपल्लवपुष्पोद्गमतया शोभमाना या अतिमुक्तलता माधवीलता, तस्याः परिरम्भणेनालिङ्गनेन पुलकित इव मुकुलितः, सञ्जातमुकुलश्चूतः रसालवृक्षो यत्र तादृशे। वृन्दावनस्य विशेषणमिदम्। यत्र लताऽपि विरहकातरा स्वयमालिङ्गनेन रसालं पुलकयति, तथा त्वमपि स्वयं परिरम्भेण श्रीकृष्णं पुलकयेति समासोक्त्यलङ्कारेण

वस्तुध्वनिः। 'अतिमुक्तः पुण्ड्रकः स्यात् वासन्ती माधवी लता' **इत्यमरः**। वृन्दावनविपिने, पुनः कीदृशे, परिसरे पर्यन्तभुवि, निकटप्रदेशे इत्यर्थः ।परिगतायाः परितो व्याप्ताया यमुनाया जलेन पूते पवित्रीकृते मनः प्रसादकरे इत्यर्थः। नदीतीरस्थजनस्य क्रीडनायातीवस्पृहणीयत्वात्। उक्तं च 'रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते' इति। मनो मे कालिन्दीपुलिनविपिनाय स्पृहयति''। एतादृशे वृन्दावनविपिने हरिर्विहरतीति अन्वेष्टव्यम्।।७।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। स्फुरदिति; अतिमुक्तलता चलन्त्याः वासन्तीलताया माधवीलतायाः वा चलनेन आम्रबृक्षवेष्टनेन आम्रबृक्षः विकसति। पुष्पितं पल्लवितं च भवति। लताबृक्षयोः नायिकानायकयोः व्यवहारः रोपितः। अत्र वृन्दावनविपनमपि यमुनाजलेन पूतं पवित्रीतं भवति।।७।।

**८-श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारम्।**
**सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम्।। विह० ।।८।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।८।। इदं जयदेवभणितं सरसवसन्तसमये वनवर्णनमुदयतीति योजना। कीदृशं हरिचरणस्तुतिसारं, हरिचरणस्तुतिसारो यत्रेति विग्रहः पुनः कीदृशं, अनुगतमदनविकारं, अनुगतः सन्निधानवर्त्ती मदनविकारः यत्रेति विग्रहः। सम्प्रति विरहिणां दुःखदायिनं पवनं वर्णयिषुराह। इत्यस्याभिप्रायः श्लोकाभ्यांविस्पष्टयति।।८।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।८।।श्रीजयदेवभणितमिति। तेनेति मङ्गलवाचकम्। ततः पाटावाद्यक्षरोत्तरः। ततः स्वरःषड्जादिः। इदं श्रीजयदेवभणितं सरसवसन्तसमयवर्णनमुदयति उदयं प्राप्नोति सर्वोत्कृष्टत्वेन वर्तते। सरसं शृङ्गाररसयुक्त वसन्तकालिनवर्णनं यत्र। सर्वोत्कृष्टत्वे हेतुमाह। हरिचरणस्मृतिरेव सारं यत्र। वा हरिचरणस्मृत्या हेतुभूतया सारम्। अथवा हरिचरणयोः स्मृतिचिन्तनं सारमुत्कृष्टं यत्र। सरस वसन्तत्वे हेतुमाह। अनुगतो मदनविकारो यत्र येन वा अनुगतोऽनुस्यूतः।।अस्यामष्टपद्यां जातिरलंकारः। मध्या नायिका। गुर्जरिरागेण ऋषभादिना। दक्षिणो नायकः। तल्लक्षणं प्रागुक्तम्। विप्रलम्भाख्यः शृङ्गारो रसः। लयो नाम छन्दः। तल्लक्षणम् "मुनियगणौर्लयमामनन्ति तज्ज्ञाः" इति। तदुक्तं **छन्दश्चुडामणौ** चलय इति। विप्रलम्भविभावप्रसङ्गाद्वायुं वर्णयति, "रचितो गद्यपद्याद्यैर्वसन्ते पार्थिवोत्सवे।

वसन्तरागे झुम्पाख्याताले मध्यलयाञ्चिते।। गमकालिप्तभूयिष्टः पूर्णकल्पः प्रकीर्तितः। पूतौ पुनस्तेन पाटस्वराञ्चितविराजितः।। माघवोत्सवः कमलाकरनामा प्रबन्धराट्" ।।८।।

इति माधवोत्सवकमलाकरनामा तृतीयः प्रबन्धः।।

## (३) जगद्धरकृत-सारदीपिका

।।८।। श्रीजयदेवेति श्रीजयदेवकवेरिदं भणितम् उदयं प्राप्नोतु इत्यर्थः। हरिचरणयोः स्मृतिः स्मरणं सारो मुख्यो यत्र सरसं सुमनोहरं वसन्तसमयसम्बन्धिनो वनस्य वर्णो यत्र अनुगतः मदनविकारो(१८) कामविलासो यस्मिन्।।८।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।८।। संप्रति गीतार्थमुपसंगहरति। प्रेक्षावत्प्रवृत्यर्थं स्वभणिते उत्कर्षमाह; श्रीजयदेवेति। जयदेवकवेरिदं भणितं गीतमुदयति तत्र हेतुः ; हरिचरणयोः स्मृतौ स्मरणे सारं श्रेष्ठं, हरिचरणस्मृतिरेव सारो यत्र तत् रसमयसंबन्धनो वनस्य वर्णनं यत्र। अत एव अनुगतमदनविकारं अनुगतः तसंप्राप्तो मदनस्य विकारो(१८)यत्र तत् तादृसम्।।८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।८।।श्रीजयदेवति। हरिचरणस्तुतेः श्रीकृष्णपादस्मरणस्य सारो बलं यस्य। अनेनैतद्गीतस्या- मुष्मिकफलसाधनत्वमुक्तम्। न केवलमामुष्मिकैकसाधनत्वमपि त्वैहिकसुख- सम्पादकत्वमस्तीत्याह; सरसेति। रसाः श्रृङ्गारादयस्तैः स वर्त्तत अथवा युवतिजनघटनाचतुरः। एतादृशो ये वसन्तसमयस्तस्मिन् वनस्य वर्णनम् इति सरसः। अथवा पुष्परससहितः तत्तादृशं सततहरिचरणमुलकारणामत्यर्थः। अथवा सरसमिति वर्णनविशेषणम्। अत्र एवानुगता अनुसृता मदनविकारा स्त्रीपुरुषकामचेष्टा यस्य तत्तादृशम्। अनेनैहिकसुखसाधनत्वमुक्तम् एतादृशं श्रीजयदेवेन भणितं गदितं गीतमुदयति। सकलजनाह्लादकत्वेन चन्द्र इव उदितमासीदित्यर्थः। यदा यदा गीयते श्रूयते च तदा तदा पारलौकिकं पारसौख्यं सम्भवतीति सूचयितुं वर्त्तमानप्रयोग इत्यवगन्तव्यम्। सारस्य त्वाशीः प्रयोग इति ध्येयम्।।८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।८।। कीर्त्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकमुपसंहरति। श्रीजयदेवभणितं कर्त्तृ उदयति अभ्युदितं भवति। किम्भूतम्? हरेश्चरणं चर्याचरित्रमिति यावत्, तस्य च स्मृत्या सारम् उत्कृष्टमित्यर्थः। न तु चरणपदं प्रकृतपादपरम्, अनेन गीतेन तस्यावर्णनात्। अपि किम्भूतम्? सरसं काव्यरससहितं वसन्तसमयस्य वनानां वर्णनञ्च यत्र, अत

एवानुगत आयत्तो मदनविकारो यस्य एतादृशम्। अतिसरसप्रकृतगीतश्रवणेन सहसैव जनानां विकारो भवतीति भावः। 'चरणः पुंसि पादे स्यात् क्लीवं सेवाचरित्रयोः।।८।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।८।। एवं गीतार्थवसन्तवर्णनमुपसहंरन्निव विद्वज्जनप्रवृत्त्यर्थं[१] स्वगीतोत्कर्षमाह; श्रीजयदेवेत्यादिना। श्रीजयदेवकवेरिदं भणितं गीतमुदयति विराजते। तत्र हेतुः ; [२]हरिचरणयोःस्मृतिः स्मरणं तेन सारं श्रेष्ठम्।[३] अथ वा [४][५] हरिचरणस्मृतिरेव सारो यत्र तादृशम्। नात्र हरिपदं चेलाहरणपरं [६] मनोहरपरं वा बोद्धव्यम्। न हि व्रजवासिनां माहात्म्यज्ञानाधीनो नन्दकिशोरे प्रणयः। कीदृशम्? सरसं शृङ्गारेण सह प्रणयेन वा सह श्रीराधया वा सह श्रीराधया वा सह इति यावत्। पुनः कीदृशम्? तत्समयोचितं[७]यद्वनवर्णनम्; यत्र भणिते[८]वनशब्देन वृन्दावनमेव, न हि सर्ववनेषु तादृशं सौभाग्यम्। कीदृशम्? अनुगतमदनविकारम्; अनुमतः प्राप्तः संलग्नो वा मदनस्य कामस्य विकार उदयो यत्र विश्वक्षोभकोऽपि येन वसन्ताश्रयभणितेन कन्दर्पोऽपि मोहं प्राप्त इति भावः। न हि मदनो वसन्तेन [९]मोहमुपयाति। किन्तु श्रीवृन्दावन [१०] चन्द्रिकाविहारेणेति रसिका एव[११]जानन्ति। स्वभावोक्तिरलङ्कारः।।८।।

१.स्वगीते उत्कर्षमाह-इ.फ.ग. २.तः. ३.यद्वा-ग. ४.पर्यन्तो भागो नास्ति-इ. ५.हरिचरणयोः स्मृतिरेव-इ. ६.मनोज्ञपरं-इ.मनोहरं-ग. ७.यद्वर्णनं-ग. ८.नास्ति-फ. ९.मनोहर-त्वमुपयाति-फ. १०.चन्द्रिका एव-अ. ११.जानन्तीति-ब.फ.ह.ज.जानन्तीति भावः-ग.

## (८) नारायणपण्डितकृत- पदद्योतनिका

।।८।।श्रीजयदेवेति। श्रीजयदेवकवेरिदं भणितं [२] उदयति [३] उदयं [४]प्राप्नोतीत्यर्थः। हरिचरणस्य स्मृतिः अनुचिन्तनं[५]सारो मुख्यो यत्र। सरसं [६] सुमनोहरं वसन्त[७]समयवनवर्णनं यत्र। अनुगतोऽनुकृतो मदनविकारः कामविलासो यस्मिन्।।८।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।८।। श्रीजयदेवेति। इदमष्टपदीरूपं सरसवसन्तसमयवनवर्णनात्मकं अनुगताः मदनविकाराः यस्मिन् तत्। एतच्छ्रवणेनाऽपि मदनविकारं जनयति। श्रीजयदेवस्य भणितं हरिचरणस्य स्मृतिरेव सारम्। उदयति उत्कर्षं उत्पादयति। वीतरागिणां स्मृतिकारकं कामिनामपि उद्दीपनकारकमिति उभयोरपि श्रोतव्यमिति भावः।।८।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।८।। श्रीजयेति । इदं श्रीजयदेवभणितं श्रीमता जयदेवेन रचितं सरसो यो

वसन्तसमयस्तस्य सम्बन्धिनो वनस्य वर्णनं गुणकीर्तनं कर्तृ उदयतीति योजना। सरसमिति वर्णनविशेषणं वा। किंविधम्? हचिरणेति। हरिचरणयो: श्रीकृष्णपदयोर्या स्मृति: स्मरणं सैव सारो यत्रेति विग्रह:। पुन: किंविधम्? अनुगतेति। अनुगत: सन्निधानवर्त्ती मदनविकारो यत्रेति विग्रह:। ''वर्ण: क्रियायां विस्तारे गुणोक्तौ वर्ण इत्यपि'' इति **आख्यातचन्द्रिका**।।८।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।८।।अत गीतार्थमुपसंहरन् स्वभणितेरुत्कर्षमाह।श्री जयदेवस्य भणितमिदं उदयति विराजते। कुत:? हरिचरणयो: स्मरणेन सारं सर्वत: श्रेष्ठम्, तत्रापि रस: शृङ्गारस्तत्पोषकवसन्तसमयसम्वन्धिनो वनस्य वर्णनं यत्र तत्। अतएव सन्निधानवर्त्तिन्या: शृण्वन्त्यास्तस्या: मदनविकारो यत्र तत्।।८।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।८।।अथ कवि: स्वभणितैरूत्कर्षविष्कारेण गीतार्थमुपसंहरतिश्रीति।श्रीजयदेव-कवेरिदं गीतम् उदयति, उदयचन्द्र इव सर्वेषां सुखमावहतीत्यर्थ:। तत्र हेतु:, कीदृशम्। यतो हरिचरणयोर्या स्मृति: स्मरणं तया सारं सर्वश्रेष्ठम्। एतद् श्रवणादिनाऽतिशयेन हरे: स्मरणं भवतीत्यर्थ:। तत्र च हेतु:। रस: शृङ्गारादिस्तत् सहितयोर्वसन्त-वृन्दावनयोर्वर्णनं स्वरूपकथनं यत्र तादृशम्।

''कालिन्दीजलसंसर्पिशीतलानिलकम्पिते।
कदम्बपादपच्छाये स्थितं वृन्दावने क्वचित्'' इति।।
'वसन्तकुसुमामोदसुरभीकृतदिङ्मुखे।
गोवर्धनगिरौ रम्ये स्थितं रासरसोत्सुकम्' इति।।

**श्रीगोपालस्तवराजोक्तानुसारेण** रासरसिकस्य श्रीकृष्णस्य तत्र तत्र सदा स्फुरणात्। अत एव सखीमुखात् एतच्छ्रवणेन श्रीराधाया अनुगतोऽनुक्षणमुद्भूतो मदनविकार:। श्रीकृष्णस्य सम्भोगाभिलाषरूपो यत्र तादृशम्।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।। श्रीजयदेवेति; श्रीजयदेवस्य वाक्येन श्रीहरिचरणं प्रति भक्ति: समुदेति। यस्य खलु वसन्तकाले मदनविकारो जायते। अनेन नरपतिकुम्भकर्णदृष्ट्या अत्र लयनामच्छन्द:। माधवोत्सव: कमलाकरनामा प्रबन्धराट् समाप्यते। तस्य मतानुसारं प्रबन्धेऽस्मिन् मध्यलयोऽस्ति, पाटस्वर स्वीकरोति, "गमकालिप्त भूयिष्ट: पूर्णकल्प: प्रकीर्त्तित:। पूतौ पुनस्तेन पाटस्वराञ्चित विराजित:।।" परन्तु अत्रापि षडङ्गाङ्गिविशिष्टे

प्रबन्धे पाटस्वर प्रबन्धोऽस्ति। पञ्चजातिमध्ये मेदिनीश्रुति: सम्वलिता जाति: वर्तते। सन्दर्भेऽस्मिन् संगीतचर्च्चाभावात् मतान्तराणि सन्ति। अत्र माधवोत्सवे कमलाकरनामा तृतीय: प्रबन्ध:। अस्यामष्टपद्यां जातिरलंकार: मध्या नायिका। गुज्जरीरागेण ॠषभादिना दक्षिणनायकेति कुम्भनरपति:।।८।।

**८- दरविदलितमल्लीवल्लिचञ्चत्पराग-**
**प्रकटितपटवासैर्वासयन् काननानि।**
**इह हि दहति चेत: केतकीगन्धबन्धु:**
**प्रसरदसमबाणप्राणवद्गन्धवाह:।।८।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।८।। इह वसन्ते गन्धबाहो वायुश्चेति हरतीति योजना। विरहिणामित्यर्थादवगन्तव्यम्। ननु वायुना सह विरहिणां वैरं नास्ति तत्कथ चेतो हरतीत्याह। प्रसरदसमबाण:(१८) प्राणवदिति काम: प्राणसम: सखेति यावत्। जागरूकप्रभुशक्तिताप्रतिपादनार्थं प्रसरशब्दोपादनम्। कामो ह्यत्र महीपतित्वेन निर्द्दिष्टस्तस्य विरहिणो वधा: समुल्लंघित शासनत्वात्। यदुक्तं, "आज्ञाभङ्गकरान् राजा न क्षमेत् स्वसुतानपीति **कामन्दके**।"

तत्सखश्चायं वायुरतस्तदाज्ञया विरहिणो दहतीत्यभिप्राय: किं कुर्वन् दरविदलितमल्लीवल्लि चञ्चत् परागप्रकटितपटवासै: काननानि वासयन वास उपसेवायां चुरादि:। इषत्विकसित मल्लिकाब्रततीभ्यश्चञ्चन्तश्च ते परागाश्चेति कर्मधारय:। दरविदलितमल्लोवल्लिचञ्चत्परागै: प्रकटिता: पटवास: सुगन्धिचूर्णानि तै: अरण्यानि सुगन्धयन् इत्यर्थ:। पुन: किदृक्, केतकीगन्धबन्धु: अत्र वायो: शैत्यं न वर्णितं तद्योगे चेतो दाहभावात्। "दरोऽस्त्रियां भये शुभ्रे इषदर्थे दरोऽव्ययम्।" "पराग: कौसुमे रेणौ स्नानीयादौ रजस्यपि। सुगन्धिचूर्णापिष्टात: पटवासक:" इत्यापि।।८।।

## (२) राणाकंभ कृत-रसिकप्रिया

।।८।। दरेति। इह वने वसन्ते वा गन्धवाहो वायुश्चेतो दहति। अर्थाद् विरहिणाम्। किंभूतं चेत: ? प्रसरत्,अर्थान्मनोरथं प्रति। पुन: किंभूतम् ? असमबाणप्राणवत्कामस्य जीवितमिव। अथवा प्रसरदसमबाणप्राणवद्गन्धवाह इति पदम्। प्रसरता असमबाणेन प्राणवांश्चासौ गन्धवाह:। वा प्रसरन्योऽसावसमबाण:तस्य प्राणवज्जीवितमिव। प्राणवतो वा। किंभूते वायु: ? केतकीगन्धसहचर:। किं कुर्वन् ? काननानि वासयन्। कै: ? ईषद्विकसितमल्लीनां जातीलतानां चञ्चन्तो गच्छन्तो ये परागास्तै: प्रकटिता ये पटवास:

वासचूर्णानि तैः। न नमययययुतेयं मालिनी भोगिलोकै इतिः मालिनीछन्दः। अत्र समासोक्तिवर्णानुप्रासोपमालंकाराः। विप्रलम्भाख्यःशृङ्गारो रसः। पाञ्चाली रीतिः।अत्र विरहिहृदयविदारणपटीयसः पवनस्य त्रैविध्यन चेतोदाहकत्वोपन्यासेन युवतिजनस्य आत्मसात्कर्तृत्वेन यत्स्मरप्राणवत्वमुदितं तदौचित्यसरणि- सागरप्लवनतरणित्वमात-नोतितराम्। यदभाणि **क्षेमेन्द्रेण(औ.वि.११)** तिलकं बिभ्रती सूक्तिर्भात्येकमुचितं पदम्। चन्द्राननेव कस्तूरीकृतं श्यामेव चान्दनम्। इति।।८।।

## (३) जगद्धरकृत-सारदीपिका

।।८।। वियोगिनां दुःसहं वसन्तवायु वर्णयति दरेति इह वसन्ते गन्धवाहो वायुः विरहिणां चेतः दहतीत्यन्वयः अर्थात् किं कुर्वन् दरविगलिताया ईषद्विकसितायाः मल्ल्याः मल्लिकायाः वल्लीषु लतासु चञ्चद्भिरुद्गच्छद्भिः परागैः पुष्परजोभिः प्रकटितपटवासैः स्फुटीकृतपटवासचूर्णैः काननानि वनानि वासयन् सुरभीकुर्वन् पुनः कथम्भूतः केतकीपुष्पाणां गन्धस्य बन्धुर्मित्रं प्रसरन्तो ये असमबाणाः कामबाणास्तेषां प्राणवत्प्राणा इव।।८।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।८।। संप्रति वसन्तकालिनवायोरपि विरहिजनसंतापकारित्वमाह; दरेति। इह हि अस्मिन्नैव वसन्ते गन्धवाहो वायुश्चेतो दहति। अर्थाद्विरहिणाम्। किं कुर्वन्? काननानि वनानि वास्यन्सुरभी कुर्वन्। कैः? दरं ईषद्विगलितां विकासिता मल्लीवल्लिर्मल्लिकालता तस्याः सकाशाच्चञ्चन्त प्रसरन्तो ये परागाः पुष्परेणवस्त एव प्रकटिताः पटवासाः पिष्टातकास्तैः। कीदृग्गन्धवाहः? केतकी गन्धवन्धुः केतकी पुष्पसौरभबन्धुः। पुनः किदृशः? प्रसरतः प्रतिदिशं संचरतोऽसमबाणस्य कामस्य प्राणवत्प्राणसदृशः। यद्वा, प्रसरता असमवाणेन प्राणवान् शक्तिसंपन्नो यो गन्धवाह इत्येकं पदम्। "ईषदर्थे दरोऽव्ययम्" इति **विश्वः**। "परागः पुष्परजसि" इति च, "पिष्टातं पटवासकः", **इत्यमरः**। "काननं वनम्" इति च, असवः प्राणाः, इत्यपि। "शक्तिः पराक्रमः प्राणः" इति च। "गन्धवाहानिलाशुगाः" इति च।।८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।८।। पुनः प्रकारान्तरेण राधामाह। दरविदलितेति। हे राधे! दरं इषद्विदलिता-श्चलिता या मल्लीवलयः मल्लिका लताः अथवा मल्यश्च मल्लीवल्लयः अत्रैव गोबलीवर्द्दन्यायेन मल्लिकानां पृथगुपादानम्। तासां मल्लिकावल्लीनां चञ्चन्त आभासमाना ये परागाः सुमनो रजांसि "परागःसुमनो रजः" **इत्यमरः**: तान्येव प्रकटिता स्फुटीकृता पटवासा नानाविधकुसुमादि सुगन्धिद्रव्यपरिमलमिलितगन्धचूर्णानि "पटवासो

गन्ध चूर्णकुसुमाद्यैरधिवासितमित्यभिधानम्।" तैः काननानि कृष्णविहारयोग्यविपिनानि वासयन्नधिवासयन् परिमलयुक्तानि कुर्वन्निति यावत्। अञ्चयन्निति केषुचित् पाठः। तदाप्ययमेवार्थः। केतकीगन्धस्य बन्धुः सहचरः तद्गन्धाधिवासित इत्यर्थः। एतादृशो यः गन्धं बहतीति गन्धबहः मलयमारुतः कर्भण्यणीत्यण् प्रत्ययः। स कर्त्ता प्रसरन् वियोगीजननिवर्त्तनाय बहिः सञ्चरन् यः असमबाणस्य प्राणस्तद्वत्। स इव तेन तुल्यं क्रिया चेद्वतिरिति वति प्रत्ययः। प्राण इति जातावेकवचनम्। अथवा प्रधानत्वात् स एव ग्राह्यः। अथवा प्रसरतः वसन्तसमये वियोगिजनविजयाय विष्वक् व्याप्नुवतः असमबाणस्य वा योजना। इह वसन्तसमये चेतः वियोगिनां चित्तादि दहति भस्मीकरोति हि प्रसिद्धौ। पीड़यति खल्वित्यर्थः पश्येति वाक्यशेषः। च्छेकानुप्रास-काव्यलिङ्ग-स्वभावोक्त्युपमाविशेषाणां संसृष्टिः।।८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।८।। उत्कण्ठिता राधा सखीमाह। हि जानीहीत्यर्थे। हे सखि! जानीहि इह वसन्ते यमुनातीरे वा गन्धवाहो वायुः चेतो दहति। किं कुर्वन्? काननानि वनानि वासयन् सुरभीकुर्वन्। कैः? दरविदलितमल्ली- वल्लिचञ्चत्परागः प्रकटितपटवासैः। मल्ली मल्लिकापुष्पम्, दरविदलितायाः ईषद्विकसिताया मल्ल्या मल्लिकायाः वल्लीषु लतासु चञ्चदुद्गच्छन् यः परागः स एव प्रकटितो व्यक्तीभूतः पटवासः सुगन्धिचूर्णद्रव्यविशेषः, तैः। अत्र मल्लिकावल्ली नायिका, वायुर्नायकः। तथा चान्योऽपि नायको नायिकाङ्गसङ्गि-पटवासेन स्वसञ्चारदेशं वासयतीत्युचितमेव। पुनः किम्भूतः? केतकीगन्धस्य बन्धुः, सहचरत्वाद् बन्धुरिव। पुनः किम्भूतः? प्रसरतो विश्वं व्याप्नुवतः असमबाणस्य कामस्य प्राणवत् प्राणसदृश इत्यर्थः। यद्वा प्रसरताऽसमबाणेन कामेन प्राणवत् सामर्थ्यसहितं यथा स्यादिति क्रियाविशेषणतया योज्यम्। अत्र यमुनातीरसम्बन्धेन शैत्यं परागचालनेन मान्द्यं केतकीगन्धबन्धुत्वेन सुगन्धित्वञ्च दर्शयता वायोस्त्रैगुण्यं वर्णितम्। 'ईषदर्थे दराव्ययमि'त्य**मरः**। 'पटवासे गन्धचूर्णे वस्त्राणां निस्वनेऽपि चे'ति।।८।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।८।। पूर्वं [८] वसन्तसमयस्य दुस्सहतोक्ताः सम्प्रति तद्वायोरपि वियोगिजन-सन्तापकत्वमाह[९] दरविदलितेत्यादिना। इहास्मिन् वसन्ते वने वा [१०] स्वतो दुस्सहे [११] तद्गन्धवाहो वायुरपि प्रसरद्यथा भवति तथा चेतो दहतीत्यन्वयः। अर्थाद्विरहिणामिति शेषः। कीदृशः? [१२]केतकीगन्धबन्धुः[२०] केतकीगन्धो बन्धुर्यत्र तद्बन्धुर्वा। अनेन परमाधिक्यं सूचितम्। पुनः कीदृशः? असमबाणस्य [१३] कामस्य प्राणवत् [१४]

कामबाणसदृशः। उक्तञ्च-किं कुर्वन्? [५]काननानि वासयन् [६] सुरभीकुर्वन्। कैः[७]? दरमीषद्विगलिता मलयवायुस्पर्शेण या मल्लीवल्लिर्मल्लिकालता तस्याः चञ्चन्तः प्रसरन्तो ये परागाः पुष्परेणवः त एव प्रकटिताः पटवासाः [८]पिष्टातास्तैः। अतिसुकुमारत्वादीषद्विगलितायास्तस्याः पुष्परेणुसमूहःसम्भवतीति भावः। कामस्य अनङ्गत्वेन तद्रूपेण प्रसरत् स एव चेतो दहतीति ध्वनितम्। ''ईषदर्थे दराव्ययम्'' इति **विश्वप्रकाशः** (१००.११)। [९]''परागः कौसुमे रेणौ स्नानीयादौ रजस्यपि'' **इत्यमरः** (३.३.२१) ''पिष्टातः [१०] पटवासकः'' (**इत्यमरः**-२.७.१३९)। ''पटवासः परागेऽपि पटस्याप्यथ धूपने'' इति **मेदिनीकारः**(?)।[११] ''पृषदश्वो गन्धवहो'' **इत्यमरः** १२ (१.१.६२)।[१३] श्लेषोऽयमलङ्कारः।।८।।

१.विगलित-ब.इ.फ.ह. २.उदितमुदयति-क. ३.उदितं-ड. ४.प्राप्नोतीत्यन्वयः ल.म. ५.सारं मुख्यं यत्र-क.सारो मुख्यं यत्र-ल.म. ६.सुमनोमनोहरं-ड. ७.समयवर्णनं-ड. ८.वसन्तदुस्सहतोक्ता-अ.ब. ९.दरविगलितेत्यादिना-इ.फ.ग.ह.ज. १०.स्वतो दुस्सहतोक्ता गन्धवहो-फ. ११.तद्गन्धवाहोऽपि प्रसरत्-अ. १२.नास्ति-फ. १३.कामस्य प्राणसदृशः उक्तं च-ग.कामस्य प्राणस्य कामवत् कामप्राणसदृशः उक्तं च-फ. १४.कामप्राणसदृशः-फ.ग.ह.ज.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।८।।[१४]अथ वियोगिनां दुस्सहं वसन्तवायुं वर्णयति[१५] दरेति। इह वसन्तो गन्धवाहो वायुः चेतः अर्थाद्विरहिणां [१६]दहतीत्यन्वयः किं कुर्वन्? दरविदलिताया ईषद्विकसिताया मल्ल्या मल्लिकाया [१७] वल्लीषु लतासु चञ्चद्भिरुद्गच्छद्भिः परागैः पुष्पपरागैः पुष्परजोभिः प्रकटितपटवासैः स्फुटीकृतपटवासचूर्णैः काननानि [१८] वनानि वासयन् सुरभीकुर्वन्।[(१६)]पुनः केतकीपुष्पाणां गन्धस्य बन्धुः मित्रम्। प्रसरन्तो ये असमबाणाः[२१] कामबाणाः तेषां प्राणवत्प्राण इव।।८।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।८।। वर्णितवसन्तकालवायुं वर्णयति; दरविदलितेति। दरं ईषत् विदलिताः विकसिताः मल्ल्यः वासन्तीपुष्पाणि तासां वल्लीषु तद्भिन्नवल्लीषु वा चञ्चन् व्याप्नुवन् परागः पुष्परजः तेन प्रकटिताः पटवासाः वस्त्रोपरिक्षिप्यमाणपरिमलद्रव्यश्लक्ष्णचूर्णाः तैः काननानि वनानि वासयन् परिमलयन्। किञ्च इतः अतः केतकीगन्धबन्धुः तत्समो वा। विरहिणामिति शेषः। प्राणहृत् असुनाशकः। प्रसरन्तः असमबाणाः कामा यस्मात्सः गन्धवाहः चेतः दहति सन्तापयति। वातीति पाठे च इत इति च्छेदः। एकतः प्रसरदसमबाणं यथा स्यात्तथा वहति। वातीति योजना। मालिनी वृत्तम्। विरहिणामिति

शेषे साकाङ्क्षो दोषः। तद्वारणाय तथा न योज्यम्। किन्तु राधाया विरहिणीत्वात्प्रतिपाद्यवशेन स्वयमवगम्यते। तत्र प्रसरदसमबाणत्वं हेतुरिति काव्यलिङ्गम्।।८।।

१.अपूर्वेव-ग.२.महात्मनः-इ.फ.ग.ह.ज.३.मक्षयं-ब.४.र्जनं-फ.५.तः७.पर्यन्तं नास्ति-फ. काननानि वनानि वासयन्-इ.ग.ह.६.नास्ति-अ.७.नास्ति-अ.८.पिष्टातकाः-इ.फ.ग.ह.९.परागः पुष्परजसीति च-इ.फ.ग.ह.ज.१०.पटवासस्यात्-अ.ब.पटवासकः **इत्यमरः**-इ.११.तः१२.पर्यन्तं पास्ति-इ.फ.ग.ह.ज१३.श्लेषोपमालङ्कारः-अ.ब.फ.ग.१४.नास्ति-क.ल.म.१५.श्लेकोऽयं सव्यख्याश्चतुर्थप्रबन्धारम्भे दृश्यते-ड.१६.वहतीत्यन्वयः-ड.१७.वल्लीपुष्पलतासु-क.१८.नास्ति-ड.क.१९.पुन कथम्भूतः-क.ल.म.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।८।। सम्प्रति विरहि दुःखदायिपवनं विवर्णयिषुराह, दरेति। इह वसन्ते, हि अवधारणे, ''हि हेतौ अवधारणे'' गन्धवाहो वायुश्चेतो दहतीति योजना। विरहिणामित्यर्थादवगन्तव्यं 'सम्भोगे ये सुखं कुर्युस्ते दुःखं विरहे भृशम्' इति न्यायात्। ननु वायुना सह विरहिणां वैरं नास्ति तत्कथं चेतो दहतीत्याह - प्रसरदित्यादि । प्रसरन् व्याप्नुवन् योऽसमबाणः कामस्तस्य प्राणवद् भवति। प्राणा इव इति तुल्यार्थे वेति सुखकराः इति यावत्। जागरूकप्रभुशक्तिताप्रतिपादनार्थं प्रसरच्छब्दोपादानम्। कामो ह्यत्र महीपतित्वेन निर्दिष्टः। तस्य विरहिणो बध्याः उल्लङ्घितशासनत्वात्। यदुक्तम्; ''आज्ञाभङ्गकरान् राजा न क्षमेत् स्वसुतानपि'' इति **कामन्दके**। तत् सखश्चायं वायुः। अतस्तदाज्ञया विरहिणो दहतीत्यभिप्रायः। किं वा अस्य जगत्प्राणत्वे स्थितेऽपि प्रसरन्तो येऽसमबाणप्राणास्तद्वलयं भवति। केवलं तस्यैव प्राणभूत इत्यर्थः। हि यतो विरहिणामेव चेतो दहति। किंकुर्वन्? काननानि वासयन्, वास उपसेवायां चुरादिः। कैरित्याह - दरविदलितेत्यादि। दरविदलिता ईषद्विकसिता या मल्लीवल्लयो मल्लिकाव्रतत्यस्ताभ्यश्चञ्चन्तः पवनप्रेरणवशादाकाशे सञ्चरन्तो ये परागास्त एव प्रकटिताः पटवासाः सुगन्धिचूर्णानि तैरिति। यद्वा प्रकटितं प्रकटनं भावे क्तः। दरविदलितमल्लीवल्लिचञ्चत्परागप्रकटितमेव पटवासा इति रूपकमिदं 'कृदभिहितो भावो द्रव्यवत् प्रकाशत' इति न्यायात्। सुगन्धिचूर्णम् ''पिष्टातः पटवासकः'' इत्यपि। ''ईषदर्थे दराव्ययम्'' इत्यु**त्पलिनी**। एतेन मान्द्यं सौगन्धं च वायोः प्रतिपादितम्। वैलक्षण्यात् शैत्यं न वर्णितम्, तद्योगे चेतो दाहाभावात्। पुनः कीदृक् ? केतकीति । केतक्याः गन्धस्य बन्धुः सहचरः। बन्धुशब्दोऽत्र सम्पर्कमात्रप्रतिपादकः। अविवक्षितस्य वाच्यस्य ध्वनेः अर्थान्तरसङ्क्रमितवाच्यनामायमर्थध्वनिः। किं वा मुख्यार्थवृत्तिरेव बन्धुशब्दः। तद्यथा - लोके कश्चित् केनचिदभ्यागतेन बन्धुना समेत्य तेनैव सह प्रीत्या दूरमनुव्रजति।

''आवनादुदकान्ताद् वा प्रियं यान्तमनुव्रजेद्'' इति स्मृते:। एवं केतकीगन्धोऽपि मरुता समेत्य तेनैव सह अनुव्रजतीति कृत्वा केतकीगन्ध- बन्धुरित्युच्यते। तथाह्यत्यन्तमृदुनापि मारुतेन हार्यत्वाद् यथा दूरत: केतक्या: सौरभ्यमुपलभ्यते तथा न मल्ल्यादीनामिति कृत्वा मल्लिकादिगन्धस्य नायं बन्धुरुक्त:। अत्र गन्धवाह इति वसन्तसमये युक्तपदोपन्यास:। गन्धं वहतीति व्युत्पत्त्यापि सौगन्ध्यवहनेन मान्द्यं च प्रतीयते। यस्तु वाहक: समलं याति।।८।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।८।। पुनरूद्दीपनाय अनिलमेव विशेषतो वर्णयति; दरेति। इह बसन्तसमये बायुश्चेतो दहति विरहिणामित्यर्थादधिगन्तव्यम्। ननु किमपराद्धमेतैस्तस्य यदेषां चेतो दहति तत्राह। प्रतिदिशं सञ्चरत: कामस्य प्राणतुल्य: कामसख इति यावत्। कामोऽत्र नृपत्वेन निरूपितस्तत्सखा बायु: सख्युराज्ञापालनं विरहिष्वनालोच्य तच्चेतो दहतीत्यर्थ:। किं कुर्वन ? ईषद्विकसिताया मल्लिकाया: सकाशादुद्गच्छद्भि: पुष्पपरागैरेव प्रकटितपटवासै: सुगन्धचूर्णै: काननानि सुरभीणि कुर्वन। कीदृश: ? केतकी पुष्पगन्धस्य सहचारी।।८।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।८।। अथ वसन्त....इति। किं कुर्वन् दहति; दरविदलिता, ईषद्विकसिता या मल्लिवल्लय: ताभ्यश्चंचन्त उद्गच्छन्तो ये परागा: पुष्परेणवस्त एव प्रकटितपटवासा:, स्पष्टीकृतगन्धचूर्णानि, तै: काननानि वनानि वासयन् सुरभयन्। दरोत्फुल्लमल्लीपराग-सुरभितकाननस्य स्मरोद्दीपकत्वात्, चूर्णमुष्टिविक्षेपैर्विरहाग्निं समुज्ज्वालयन् पुनर्जीविताशङ्का यथा न स्यात्तथा दहति, भस्मीकरोतीति भाव:। दाह भस्मीकरणे धातु: ।'पटवासो गन्धचूर्णम्' **इत्यमर:**। दहतीति वर्त्तमानप्रयोगेण पूर्वोत्तरावधिशून्यता व्यज्यते। चेत इति देहस्यान्तरीणत्वात् अप्रतिकारत्वं च। कथमीदृशक्रूरत्वमस्येत्यत आहकेतकीगन्धस्य बन्धु: सहचरस्तद्गन्धादिवासित इत्यर्थ:। संसर्गजा दोषगुणा भवन्तीत्यन्वयात् कण्टकलतासङ्गदोषेण एव तथा क्रूरोऽभूदिति भाव:। यद् वा केतकीनारीसम्भोगचिह्नं धारयित्वा मल्लिकामुपसर्पन् गन्धवाहस्तया रजोमुष्टिभिराहतो निजावमानसन्तप्त: कानने भ्रमन् सर्वं सन्तापयतीति भाव:। हे सखि ! पश्येति वाक्यशेष: कर्त्तव्य:।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।। दरविदलितेति; इह वसन्तकाले असमबाणस्य, कन्दर्पस्य प्राणवत् प्राणप्रिय सखा, वसन्तस्यातिप्रिय: प्राणान् यथा वा प्रसरत् विस्तार्य वहति प्रवहति वसन्तानिलो

दक्षिणानलिो वा स खलु दक्षिणानिलः केतकी पुष्पसुवासेन सुवासितः बन्धु इव, पुनरुर्ध्वविकसित- मल्ली–पुष्पाणां चञ्चत् प्रवहतपरागाः पुष्परेणवः विस्तारिताः सन्तः पटवासः पटवस्त्रं इव व्याप्य वनभुवौ सुरभिना पुनः केतकपुष्पसम्मिलनेन कामीजनान् दहति। तेषां चित्तेषु पीडां जनयति। मालिनीछन्दः। पाञ्चाली रीतिः। समासोक्तिः वर्णानुप्रासोपमालंकाराः। विप्रलम्भाख्यः शृङ्गाररसः। कुम्भकर्णोऽपि अत्र **क्षेमेन्द्रसहायेन** औचित्यं पश्यति। गन्धवाहस्य युवतीजनपीडा प्रसङ्गे। परं कविसमयप्रसिद्ध सर्वमेतत्सम्भवति।।८।।

**९-उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-**
**क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः।**
**नीयन्ते पथिकैः कथंकथमपि ध्यानावधानक्षण-**
**प्राप्तप्राणसमा समागमरसोल्लासैरमी वासराः।।९।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।९।। अमी वसन्तसम्बन्धि ये वासरा पथिकैः कथं कथमपि महता कष्टेन नीयन्ते इति वाक्यार्थः। कीदृशाः वासराः, उन्मीलदित्यादिना उद्गीर्णकर्णज्वराः उन्मीलन्तश्च ते मधुगन्धाश्चेति कर्मधारयः। उन्मीलन्मधुगन्धेषु लुब्धाः ये मधुपाः, तैर्व्याधूता इति सप्तमी समासः। तद्व्याधूताश्च ते चूताङ्कुराश्चेति कर्मधारयः। तद्व्याधूतचूताङ्कुरेषु क्रीड़न्त इति सप्तमी समासः तद्व्याधूतचूताङ्कुरक्रीड़न्तश्च ते कोकिलाश्चेति कर्मधारयः। तद्व्याधून चूताङ्कुरक्रीड़त्कोकिलकाकल्याः कलकला इति षष्ठीसमासः। तैस्तथा प्रोद्गीर्णः कर्णज्वरो येष्विति वहुब्रिहिः। तदेवं विकसन्मधुगन्धेषु लुब्धाः ये भ्रमरास्तैराकम्पितचूताङ्कुरेषु क्रीडतां पिकानां यः सूक्ष्मध्वनिः तदाबद्धकोलाहलेरुत्पन्न-श्रवणब्याधय इत्यर्थः। काऽसौ महाकष्टपूर्वप्रकार इत्याह। ध्यानेत्यादि। ध्याने यद्विधानमेकाग्रचित्तता तेन क्षणं प्राप्तायाः प्राणसमायाः समागमरसोल्लासैः प्रहर्षविशेषैरित्यर्थः। "काकली तु सूक्ष्मे" "कोलाहलः कलकल" **इत्यमरः**।।९।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।९।। उन्मीलदिति। पथिकैरमी वसन्तसमयावासराः कथंकथमिव महताकष्टेन नीयन्ते। कैः कृत्वा ? ध्यानावधानक्षणे प्रियानुचिन्तनैकाग्रताप्रस्तावे प्राप्तो यः प्राणसमासमागम-रसोऽनुरागस्तस्य प्रकटीभावैः। अथवा रसस्योल्लासो येष्विति पथिकविशेषणम्। किभूता

वासरा: ? उन्मीलन्योऽसौ मधुगन्ध: पुष्परसगन्धस्तत्र लुब्धा ये मधुपा भ्रमरास्तैर्व्याधूता आन्दोलिता ये चूताङ्कुरास्तेषु क्रीडन्तो ये कोकिलास्तेषां काकल्युपलक्षितकलरवैरूद्दीर्ण[११] उत्पादित: कर्णज्वरो यैस्ते तथा। कोकिलो वसन्तमासे पञ्चमं वदतीति स्थिति:। अत्र च चूतधूननेन मधुप रोषावेशान्निषादकाकलीमुक्तवानित्याशय:। अथवा कथंकथमपीति ध्यानेनेत्यादिना योज्यम्। ततो विरहिणो ह्यनवस्थतचित्तत्वाद्धातुमपि न शक्नुवन्ति। शार्दूलविक्रीडितं छन्द:। अत्र काव्यलिङ्गमलंकार:। गौडीयारीति:। विप्रलम्भाख्यशृङ्गारो रस:। अत्र कामोद्दीपनविभावै: कोकिलकाकलीकलरवाद्यै: संजनितकर्णज्वरत्वेन प्राणसमसमागमाकाङ्क्षित्वेन विरहासहिष्णुत्वपेक्षया यद्वासराणां कर्मगतं बहुत्वमापादितं तत्सुतरामौचित्यकोटिमाटीकते।।९।।

## (३) जगद्धरकृत-सारदीपिका

।।९।। वसन्तवासराणामनङ्गोद्दीपकत्वमाह उन्मीलदिति अमी वसन्तसम्बधिनो वासरा: दिवसा: पथिकैर्मार्गस्थैर्विरहिभि: कथंकथमपि केनापि दु:खेन नीयन्ते उल्लंघ्यन्ते कथम्भूता: वासरा: उन्मीलदिति उन्मीलञ्चासौ मधुगन्धश्च पुष्परसगन्धस्तत्र लुब्धा: ये मधुपा: भ्रमरास्ते व्याधूता: कम्पिता: ये चूताङ्करा आम्राङ्कुरास्तेषु क्रीडतां कोकिलानां काकलीकलकलै: सूक्ष्माव्यक्तमधुरध्वनिकोलाहलै: कष्टजनकत्वेन उद्गीर्ण: प्रकाशित: कर्णज्वर: श्रवणोपतापो येषु कथं यत इत्यत आह ध्याने चिन्तने अवधानं चित्तैकाग्र्यं तेन क्षणम् अल्पकालं प्राप्ताया अनुभूताया: प्राणसमाया: समागमरसेन सम्बन्ध-स्वरूपरसेन उल्लासो येषान्ते ।।९।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

संप्रति वसन्तदिवसानां दुरन्तत्वमाह; उन्मीलदिति। अमी वसन्तसंबन्धिनो वासरा दिवसा: पथिकै: कथंकथमपि महता कष्टेन नीयन्ते समाप्यन्ते। किदृशा वासरा: ? उद्गिर्णा: प्रकटिता: कर्णज्वरा: श्रोत्रसंतापा येषु तादृशा:। कै: ? उन्मीलन्ति प्रकटीभवन्ति यानि मधूनि गन्धाश्च तेषु लुब्धा लोलुपा ये मधुपा भ्रमरास्तैर्व्याधुता: कम्पिता ये चूताङ्करा आम्रमुकुलानि तेषु क्रीडतां कोकिलानां काकल्योऽव्यक्तमधुरध्वनयस्ताभि: कृता ये कलकला: कोलाहलास्तै:। केन प्रकारेण नीयन्त इत्याह; ध्यानेति। ध्याने स्वाप्रियचिन्तने यदवधानं तत्परता तेन क्षणं प्राप्तो य: प्राणसमाया जीवतुल्याया: कान्ताया: समागमरूपो रसस्तस्मादुत्पन्ना ये उल्लासा उत्साहास्तै:। "काकली तु कले सूक्ष्मे" इति, "कोलाहल: कलकल:" इति च।।९।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।९।। सखि राधायै प्रकारान्तरेणापि वसन्तस्वरूपं कथयति। उन्मीलन् भासमानो यो मधुर्वसन्तः तत्र ये गन्धाः नानाबिधकुसुमपरिमलाः तत्र लुब्धा आशक्ता ये मधुपाः मधुकराः अथवा मधु पुष्परसः तच्च गन्धश्च मधुगन्धौ उन्मीलन्तौ वसन्तसमये प्रोजृम्भमाणौ यौ मधुगन्धौ तयोर्लुब्धा अथवा मधुशब्दस्तन्त्रेणोपात्तः। तदा मधौ वसन्ते यौ मधुगन्धौ इत्यन्वयः, शेषं समानम्। तादृशैर्मधुपैर्व्याधूताः मन्दान्दोलिताः ये चूताङ्कुराः सहकारपल्लवास्तत्र क्रीडन्तश्चर्वणार्थं विहरमाणार्थं ये कोकिलाः परिपुष्टास्तेषां तद्वा, चूताङ्कुरे क्रीड़न्तः भक्षणानुकुलचूताङ्कुरार्थं विहरमाणा इत्यर्थः। काकलीकलकलैर्मधुर-स्फुटध्वनिरूपकोलाहलेः "काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुट" **इत्यमरः** "कोलाहलः कलकल" इति च।

तेर्हेतुभिरुद्गीर्ण अन्तरावस्थानं परित्यज्य स्फुटभावेन बहिर्गतः कर्णज्वरः वियोगिश्रोतृजनश्रोत्रतापो येषु तादृशाः। अत्रोद्गीर्णशब्दस्य गौणवृत्त्याश्रयणान्न ग्राम्यत्वम् तदुक्तं,

उद्गारोद्गीर्ण वान्तादिगौणवृत्तिव्यपाश्रयात्।
अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ।।इति।।

एतादृशाः अमी परिदृश्यमानाः वासराः वसन्तदिवसाः ध्यानं नाम कर्णज्वराविर्भावानन्तरं तन्निवर्त्तकत्वेन गृहस्थितस्वकामिनीचिन्तनम्। तत्रावधानं नाम चित्तैकाग्र्यं तस्य क्षणस्तत्समय इत्यर्थः तस्मिन् प्राप्ताः अपरोक्षत्वेनान्तःकरणे आविर्भूता या प्राणसमा निजकान्तास्तासां समागमरस आलिङ्गनसौख्यम्, अथवा प्राप्तो यः प्राणसम आसमागम इति वा योजना तस्योल्लास उदयो येषां ते तादृशाः तैः पथिकैः पान्थैः "पथः ष्कन्निति" (५-१-७५) ठन् प्रत्ययः। "इसुसुक्तान्तात्कः" (७-३-५१) इति ठस्य कादेशः। कथं कथमपीति कृच्छ्रेण नीयन्ते, वम्यते अपनीता क्रियन्त इति यावत्। नयतेः कर्मणि लट्। सर्वथा वियोगिनामयं समयो मरणप्राय इति भावः। पश्येति वाक्यशेषः। उद्गीर्णकर्णज्वरा इत्यनेनेदं द्योत्यते; यथा लोके ध्याने दिव्यौषधिभावनायां यदवधानं चित्तैकाग्रयं तत्क्षणे प्राप्तौ यः प्राणसमः पञ्चप्राणकल्पः अतएवासमः प्राणव्यतिरेकेण तत्तुल्यवस्त्वन्तराभावादित्यर्थः।

एतादृशो य आगमरसः विल्वादिदशद्रुममूलकषायरसः "पलाशीद्रुर्द्रुमागमाः" **इत्यमरः**। तस्य उल्लासः सन्तोषः स्युः सेवनं येषां ते तादृशाः तैः वसन्तकालपर्व-वासरेषु कोकिलादिकोलाहलश्रवणे ज्वरिणां ज्वराधिक्यं भवतीत्यत्रोद्गीर्णकर्ण-

ज्वरत्वोपपत्तिः। तदुक्तं,

वायुः प्रकोपमुपयाति घनागमेऽसौ

श्लेष्मः प्रकोपमुपयाति तथा वसन्ते।। श्लेष्मज्वरोऽपीत्यर्थः।

तरुण्याः स्पर्शसंलापं चन्दनं मालिकास्तथा। उद्दीपकानि चान्यानि वर्जयेत् ज्वेरितो नरः।।

इति वर्जयेदित्युक्त्या तत्सेवने ज्वराधिक्यं भवतीत्यवगन्तव्यम्। एतादृशैर्ज्वरिभिर्वसन्तवासराः वसन्तकालदिवसाः कथं कथमप्यति प्रयासेन नीयन्ते, मरणकल्पेन याप्यन्ते। तद्वदिति विशेषणसामर्थ्यादप्रस्तुतार्थप्रतीतेः समासोक्तिः। प्रकृताप्रकृतश्लेषो वा न च तस्यैवाभावः। एकावलीकारमते तस्याभावेपि विद्या यथादिमतेषु तस्य भावात्। उक्तं च प्रकृताप्रकृतोभयगतमुक्तं चेत् शब्दमात्रसाधर्म्यात्। श्लेषोऽयं शिलष्टत्वं सर्वत्राद्यद्वयेनान्य इति। विल्वाद्यागमरससेवनस्य ज्वरनिवर्त्तकत्वम्।

विल्वकाश्मीरतर्कारी पाटलीतिन्दुकैर्महत्।

ह्रस्वं वृहत्वशुमति द्वयं गोक्षुरकं तथा।

उभयं दशभूलाख्यं दोषज्वरनिवारणम्।। इति वचनादवगन्तब्यम्।।९।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।९।। राधैव पुनः स्वदुःखानुभवेन परदुःखम् अवधार्य वितर्कयति। पथिकैः प्रियाविरहिणैरमी वासराः वसन्तदिवसाः कथं कथमपि कष्टसृष्टया नीयन्ते। केनावलम्बनेनेत्याह, ध्यानं चिन्तनं तत्रावधानम्, एकचित्तता, तया क्षणप्राप्तः स्वल्पकालमनुभुतः प्राणसमायाः प्राणतुल्यायाः यः समागमरसः सम्बन्धरूपो रसस्तज्जनितैरुल्लासैरानन्दैरित्यर्थः। अत्र यद्यपि उल्लासैः कथं कथमपि नीयन्त इत्यन्वितम्, तथापि स्वल्पकालानुभूतप्राणसमासम्बन्धजनितः उल्लासोऽपि न चिरस्थायीति नैकान्तं दुःखमिति नीयन्त इत्युक्तम्। नापि सुखमैकान्तिकमिति कष्टसृष्टयेत्युक्तमिति बोद्धव्यम्। दुर्णयतां प्रति हेतुमाह; कीदृशा वासराः? उन्मीलन्मधुगन्धैः मुग्धैः सतृष्णैर्भ्रमरैः व्याधूतेषु चालितेषु चूताङ्कुरेषु क्रीडतां कोकिलानां काकलीकलकलैः सूक्ष्माव्यक्तमधुरकोलाहलैरुद्गीर्णः[११] प्रकाशितः कर्णज्वरः[११] श्रवणोपतापो येषु वासरेषु तत्तथा। कलकलैरुद्गीर्णकर्णज्वरैरिति पाठे करणतया पृथक् योज्यमिति। 'काकली तु कले सूक्ष्मे ध्वनौ तु मघुरास्फुटे' 'कोलाहलः कलकल' **इत्यमरः**।।९।।

## (७) वनमालिभट्टकृत- सञ्जीवनी

।।९ ।। पूर्वं वसन्तस्य तद्वायोश्च कोकिलाकाकलीनामपि च दुस्सहत्वमुक्तम्। सम्प्रति तद्दिवसानामपि [१] विशेषदुरन्तत्वमाह उन्मीलदित्यादिना। [२]पथिकैरमी वसन्तसम्बन्धिनो वासरा दिवसाः कथङ्कथमपि महता कष्टेन नीयन्ते समाप्यन्ते। अतिवाह्यन्त इत्यर्थः। कीदृशाः ? [३]उद्गीर्णः प्रकटीकृतः कर्णज्वरः श्रोत्रसन्तापो येषु। कैः ? उन्मीलन्ति प्रकटीभवन्ति ये मधौ वसन्ते गन्धास्तल्लम्पटा ये मधुपाः भम्रास्तैर्व्याधूताः कम्पिता ये चूताङ्कुरा आम्रमुकुलानि तेषु [१] क्रीडतां कोकिलानां याः काकल्यः अव्यक्तमधुरा गिरस्तासां ये [२] कलकलाः कोलाहलास्तैः। कर्णस्याकाशगुणत्वात्कर्ण[३]ज्वरस्यापि दीर्घत्वम्। कर्ण इत्युपलक्षणं; सर्वेन्द्रिय[४]ज्वरा इति। तर्हि कथं नीयन्त[५]इत्यत आह- ध्यानेत्यादिना। [६]ध्याने स्वप्रियाचिन्तने केनापि भाग्योदयेन यदवधानं मनसस्तल्लीनत्वं तेन क्षणप्राप्तो यः प्राणसमायाः प्राणवत् प्रियायाः कान्तायाः समागमरूपो रसस्तस्मादुत्पन्ना ये रसोल्लासा रसोत्कर्षास्तैः। ''कोलाहलः कलकलस्तिरश्चां वासितं रुतम्'' **इत्यमरः** (१.७.२५)। ''काकली तु कले [७] सूक्ष्मे ध्वनौ तु मधुरास्फुटे'' **इत्यमरः** (१.७.२)। ''आम्रश्चूतो[८]रसालोऽसौ'' **इत्यमरः** (२.४.३३)। ''मधु मद्ये पुष्परसे'' इत्यपि (**अमरः** ३.३.१०२)।[९] ''मधुपभ्रमरालयः'' इत्यपि [१०](**अमरः**-२.५.२९ ?)। [११]स्वभावोक्तिविरोधालङ्कारौ ।।९ ।।

[१२]इतिश्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालि सञ्जीवन्यां श्रीगीतगोविन्दटीकायां वसन्तवर्णनं नाम तृतीयः प्रबन्धः।।

१.च दुरन्तत्वमाह-ग.ह.ज. २.पथिकैरमी वासरा दिवसा-अ. ३.उद्गीर्णाः-अ.ब.इ.ग.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।९ ।। [१३]अथ वसन्तवासराणामनङ्गोद्दीपकत्वमाह[१४]उन्मीलदिति। अमी वसन्तसम्बन्धिनो वासराःदिवसाः पथिकैर्मार्गस्थितैर्विरहिभिः कथङ्कथमपि [१५] दुःखेन नीयन्ते। [१६]कीदृशाः ? उन्मीलंश्चासौ मधुगन्धश्च पुष्परसगन्धस्तत्र लुब्धा ये मधुपा भ्रमरास्तैर्व्याधूताः कम्पिता ये चूताङ्कुरा आम्राङ्कुरास्तेषु क्रीडतां कोकिलानां काकलीकलकलैः सूक्ष्माव्यक्तमधुरध्वनिकोलाहलैः कष्टजनकत्वेनोद्गीर्णः प्रकाशितः कर्णज्वरः श्रवणोपतापो येषु। कथं नीयन्त इत्यत आह; ध्यानेति। ध्यानेन [१]चिन्तेनेन यदवधानं चित्तैकाग्र्यं तेन क्षणं अल्पकालं प्राप्तायाः अनुभूतायाः [२] प्राणसमायाः नायिकायाः समागमरसेन सम्बन्धस्वरूपरसेन उल्लासो हर्षो येषां ते।।९ ।।

[3]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितकृतायां वसन्तवर्णनं नाम तृतीय: प्रबन्ध:।।

१.क्रीडन्तो ये कोकिलास्तेषां-फ.२.कलकलास्तै:-फ.३.द्वारस्यापि-इ.४.द्वारा-इ.५.इत्याह-इ.ग.६.स्वप्ने-अ.७.सूक्ष्मेत्यापि-इ.फ.ह.ज.सूक्ष्मेत्यमर:-ग.८.रसालोसावित्यपि-इ.फ.ग.ह.ज. ९.त:१०.पर्यन्तं नास्ति-अ.ब.११.विरोधी एवालङ्कार:-अ.विरोधी एवालङ्कृति:-इ.ग.ह.फ. विरोधादेवालङ्कृति:-ज.१२.नास्ति पुष्पिकेयम्-अ.ब.इ.फ.ग.ह.ज.१३.नास्ति-क.ल.म.१४.पद्यमिदं सख्याख्यं चतुर्थप्रबन्धगतद्वितीय-पद्यत्वेन दृश्यते-ड.१५.केनापि दु:खेन-क.ल.म.१६.कथम्भूता-वासरा:-क.ल.म.

## (९) कृष्णपण्डितकृत-जयन्ती

।।९।। उन्मीलन्निति। उन्मीलन् उद्यन् मधुगन्ध: मकरन्दपरिमल: तस्मिन् लुब्धा: लोभिन: काङ्क्षिण इति यावत्। ते च ते मधुपा: तै: व्याधूता: चूताङ्कुरा रसालमुकुलानि तत्र क्रीडतां कोकिलानां काकलीभि: सूक्ष्मध्वनिभि:। षष्ठीतत्पुरुषो वा। कलकलै: कोलाहलै: उद्गीर्ण: उद्गत: कर्णज्वर:कर्णसन्तापो येषु ते अमी वासरा: वसन्तदिवसा नीयन्ते कथङ्कथमपि कष्टेनेत्यर्थ:। नीयन्ते विरहिसन्तापकरा इत्यर्थ:। ध्यानावधानक्षणे चिन्तासमये प्राप्ताया: प्राणसमाया: प्रियाया: समागमरस: आलिङ्गनादिरस तस्य उल्लासा: हर्षा: तै: पथिकै:।।९।।

[4]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां वसन्तवर्णनं नाम तृतीय: प्रबन्ध:।।

१.चिन्तने अवधानं चित्तैकाग्रयं तेन-ल. चिन्तने अवधानं चित्तैकाग्रयं-म.२.नास्ति-ल.म.३.इति गीतगोविन्दे वसन्तवर्णनं तृतीय:-ड.इत्यष्टपदी तृतीया-ल.म.नास्ति-क.४.नास्तीयं पुष्पिका-च.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।९।। उन्मीलन्निति। अमी वसन्तसम्बन्धिनो वासरा: पथिकै: कथंकथमपि महता कष्टेन नीयन्ते अतिवाह्यन्ते इति वाक्यार्थ:। केनचित् कष्टरूपेण प्रकारेणेति वाचकम्। कथंकथमपि इत्येतदुक्तम्। ''कथमपीति च'' इति **हट्टचन्द्र:**। किंविधा: ? उन्मीलनित्यादिना उद्गीर्णकर्णज्वरा:। उन्मीलन्तश्च ते मधुगन्धाश्चेति कर्मधारय:। उन्मीलन्मधुगन्धेषु लुब्धा: इति "सप्तमीसमास:"। उन्मीलन्मधुगन्धलुब्धाश्च ते मधुपाश्चेति कर्मधारय:। तैर्व्याधूता इति तृतीयासमास:। तद्व्याधूताश्च ते चूताङ्कुराश्चेति कर्मधारय:। तद्व्याधूतचूताङ्कुरेषु क्रीडन्त इति सप्तमीसमास:। तद्व्याधूतचूताङ्कुरक्रीडन्तश्च ते कोकिलाश्चेति क्रीडन्त इति सप्तमीसमास:। तद्व्याधूतचूताङ्गुरक्रीडन्तश्च ते कोकिलाश्चेति कर्मधारय:। तद्व्याधूतचूताङ्कुरक्रीडत्कोकिलानां काकलीति

षष्ठीसमासः। तद्व्याधूतचूताङ्कुरक्रीडत्कोकिलकाकल्याः कलकला इति "षष्ठीसमासः"। तद्व्याधूतचूताङ्कुर- क्रीडत्कोकिलकाकलीकलकलैः प्रोद्गीर्णः कर्णज्वरो येषु वासरेष्विति बहुव्रीहिः। तदेवं विकसन्मकरन्दगन्धेषु लुब्धाः ये भ्रमरास्तैराकम्पितचूताङ्कुरेषु क्रीडताम् आस्वाद्य विहरतां पिकानां यः सूक्ष्मध्वनिः तदाबद्ध- कोलाहलैरुत्पन्नश्रवणव्याधयः इत्यर्थः। विरहिणामर्थात् अत्र चूताङ्कुरक्रीडया कोकिलानां ध्वनेः माधुर्यं सूच्यते। यदाह **कालिदासः** - ''चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूजे'' इति। मधुरश्च कोकिलध्वनिर्विरहिणां कामोद्दीपकत्वेन दुःखप्रद इति कृत्वा कर्णज्वरोपन्यासः। केनापि प्रकारेण नीयन्त इत्युक्तम्। तं प्रकारं प्रदर्शयन्नाहध्यानेत्यादि। ध्यानेन यदवधानमेकाग्रचित्तता तेन क्षणं मुहूर्त्तमेकं प्राप्तायाः प्राणसमायाः स्वकीयाङ्गनायाः यः समागमरसः सम्भोगरसः तस्योल्लासैर्हर्षविशेषैरिति यावत्। यद्वा ध्यानावधानक्षणे प्राप्तः प्राणसमा समागमरसोल्लासो रागाभिव्यक्तियैरिति पथिकविशेषणम्। एतेन ''(न)कर्मधारयो बहुव्रीहिप्रतिपत्तिकर'' इति दूषणमपि निरस्तम्। ''काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे'', ''कोलाहलः कलकलः'' **इत्यमरः**। कलकलैरुद्गीर्णकर्णज्वरा इति पाठः। समासाभावात् रसभङ्गभीत्या (श्लिष्ट) उपेक्षितः। तथा **व्यक्तिविवेकः**, ''यस्यार्थिनः पदार्थानां सम्बन्धश्चेत् परस्परम्। न विच्छेदोऽन्तरा कार्यो रसभङ्गकरो हि सः।।'' इति ।।९।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।९।। चिरविरहिणः प्रियामिलनं विना तद्दिवसनिर्यापणं दुर्घटमित्याह; उन्मीलदिति । प्रियाविरहितैरमी वसन्तसम्बन्धिनो वासरा अतिकष्टेन निर्वाह्यन्ते। कीदृशाः ? उन्मीलन्ति यानि मधूनि गन्धश्च तेषुलुब्धैः मधुपैः कंपितेषु आम्रमुकुलेषु क्रीडतां कोकिलानां सूक्ष्मकलैः ये कोलाहलाः तैः उद्भूतः कर्णज्वरे। येषु ते। कैर्नीयन्ते ? ध्याने प्राणसमायाश्चिन्तने अवधानेन क्षणं प्राप्तायाः प्राणसमायाः समागमरसात् उत्पन्नैः उल्लासैः।।९।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।९।। उन्मीलदिति पथिकैः चिरविदेशसञ्चारितया विरहितौर्जनैरमी वसन्तदूषिता वासरा दिवसाः कथं केन प्रकारेण कथमपि अतियत्नेन नीयन्ते, निर्वाह्यन्ते। ये हि एकैकं क्षणं युगप्रायं मन्यमाना एकमपि दिवसं नेतुमशक्तवन्तः ते पुनः अनेकान् कथं नेष्यन्ति। किन्तु अतिवाहनाऽध्यवसायमात्रमेवाचारन्तीति भावः। 'कथमादि तथाप्यन्तं यत्नगौरववाढयो' रिति **शब्दार्णवे**। दुरतिवाहनीयत्वे हेतुमाह; कीदृशाः,

उन्मीषन्ति यानि मधूनि मकरन्दास्तथा तद्गन्धाश्च तेषु लुब्धा लोलुपा ये मधुपास्तैर्व्याधूता: कम्पिता ये चूताङ्कुरा आम्रमुकुलानि तेषु क्रीडन्तो ये कोकिलास्तेषां काकलीकलकलै: सूक्ष्मकलध्वनिकोलाहलैरुद्गीर्ण उत्कटान्तरावस्थां परित्यज्य स्फुटतया बहिर्निगत: श्रोत्रसन्तापो येषु ते तथा। प्रियाया: सुरतकालीनकरव्याधूतिपूर्वसुधामाधुरीधुरीण-वचनस्मारकतया निरतिशयसन्तापमातन्वतीति भाव:। 'काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुट' **इत्यमर:**। 'कोलाहल: कलकलश्चेत्यपि'। कथं तर्हि वासरा नीयन्ते, तत्राह; ध्यानेन ध्यानमुत्कण्ठातिरेकेण यत् प्रियायाश्चिन्तनं तत्रावधानं चितैकतानता, तेन प्राप्ता क्षणमात्रमेव चेतसि आविर्भूता, किं वा तदवधानक्षणे एवाविर्भूता या प्राणसमा प्राणतुल्या निजप्रिया तस्या: समागमरस: चुम्बनालिङ्गनादिसौख्यं, तस्योल्लासै: साक्षादिव स्फुरणैरित्यर्थ:। यद्वा कथमपि शब्दो ध्यानेनान्वेतव्य:। किञ्चिदवयव-स्मरणमात्रं सञ्जातशोकमोहोन्मादपरम्पराभि: अन्तरान्तराय पातादतियत्नेन यत् ध्यानमत एव तत्रावधानं चित्तस्य स्थिरीकरणम्, अन्यत्समम्। उत्कण्ठार्त्तिभरेण प्राणनिर्गमनसमये एव जीवनिदानतया आसादितप्राणसदृशत्वेन चेतसि आविर्भावात् प्रियतमाया: प्राणसमात्वेन निर्देश:। अत्रोद्गीर्णशब्दस्य गौणवृत्त्याश्रयणान्न ग्राम्यत्वम्। उक्तं च **दण्डिना-**

''निष्ठ्यूतोद्गीर्णवान्तादिगौणवृत्तिव्यपाश्रयात्।
अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते।।'' इति।।९।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।९।। उन्मिलनीति; पथिकजनै: प्रियाविरहेणैव अमी वसन्तऋतौ वासरा: दिवसा: अतिकष्टेनातिवाह्यन्ते इति। कथमिति चेत्? उन्मीलनेति, यदा वकुलपुष्पाणि वसन्तकाले उन्मीलितानि विकशितानि भवन्ति तास्मिन्नुपरि लुब्धका: भ्रमरा: मधुलिह: तद् सुरभिणा मधुपानलोभेन आपतन्ति। तदानीं चूताङ्कुराणि नाम आम्रमञ्जर्य: व्याधूनानि भ्रमराणां पतनेन कम्पितानि भवन्ति। अपि च कोकिलस्य पिकस्य क्रीडितस्य काकलिना कुहुतानेन विरहिणां कर्णेषु ज्वरा: पीडा असहमानतया उत्पद्यन्ते। अस्यां विरहदशायां पथिका: यथा कथञ्चित् दिवसानतिवाहयन्ति। प्रियानुचिन्तनैकाग्रप्रस्तावे प्राप्तो य प्राणसमागमरसोऽनुरागस्तस्य प्रकटीभावे ते पथिका: पथिभवा:। अत: विरहिण:। आगते हि मधुमासे चूतपुष्पस्थितेन मधुलाभलोभेन तेषूड्डीयमानेन गुणुगुणुस्वरेण अन्दोलय्याथवा प्रकम्पित: दृस्यते। पुन: कुहुतानक्रीडया कलकलस्वरेण क्रीडितस्य स्वरेण उद्गीरणेन कर्णे पीडां जनयति विरहव्याधिना। अत: प्रियाया: मुखचन्द्रं ध्यायं

ध्यायं तथा कथञ्चित् दिवसानतिवाहयतीति अर्थ:। अर्थात् चित्ते ध्यानलये मिलनादानन्दमनुभवन्तो तत्र मार्गे कालयापनं कुर्वन्ति। शार्दुलविक्रीडितं छन्द:। काव्यलिङ्गमलङ्कार: इतिकुम्भ:। गौडीया रीति:। विप्रलम्भशृङ्गार:। अत्र कामोद्दीपनविभावै: कोकिलकाकलीकलरवाद्यै: चूतपुष्यस्योपरि भ्रमराणां कोलाहलैश्च जनितकर्णज्वरत्वेन प्राणसमय समागमाकाङ्क्षित्वेन विरहासहिष्णुत्वापेक्षया यद्वासराणां कर्मगतं बहुत्वमापादितं तत् सुतरामौचित्यकोटिमाटीकते इति कुम्भ:। तदपि रामायणे लक्ष्मणाय यथा व्रवीति रामचन्द्र:। "मन्मथायाससम्भूतो वसन्तगुणवर्द्धित:। अयं मां धक्ष्यति क्षिप्रं शोकाग्निर्नचिरादिव।।" **किंस्किन्धाकाण्डे** प्रथम: सर्ग:।।

पथिकवधूलक्षणं **नागरसर्वस्वे** ,यथा

निर्मण्डना मलिनमंशुकमावहन्ती हिण्डिरपिण्डपरिपाण्डुरगण्डभित्ति:।
या सर्वदा प्रियवियोगजदु:खतप्ता तां प्रोषितप्रियतमां निगदन्ति सन्त:।।

विरहिजनानां हृदयविदारणजनितरक्ताक्तनखांशु: किंशुकपाटलपुष्पेषु प्रकटितं भवति। **सामुद्रिके** प्रतिपादितम् यथा "पाणिपदतले रक्ते नेत्रान्तौ च नखानि च। तालुं जंघाधरौष्ठं च सप्तरक्तं प्रशयते।।" इति।

अद्योत्स्यङगेति; अद्य मलयपर्वतस्य क्रोडे सर्पाणां बाहुल्येन निवासजन्य विषज्वलया हिमपर्वते नाम हिमालये शीतले जले स्नातुकामेन अत्र चन्दनपर्वते शीतलपवनाभिमुखिना प्रधावितो भवति मलयपर्वत:। अपि च स्निग्धाम्रबृक्षे मुकुटायमानानि वकुलान्यवलोक्य महता उल्लासेन खलु कुहुकुहुरिति स्वरेण दिगन्तं मुखरयन्ति इति। परिणामालंकार:। तृतीयचतुर्थपादे स्वभावोक्तिरलंकार:।।९।।

**१०-अनेकनारीपरिरम्भसम्भ्रम-**
**स्फुरन्मनोहारिविलासलालसम्।**
**मुरारिमारादुपदर्शयन्त्यसौ**
**सखी समक्षं पुनराह राधिकाम् ।।१०।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१०।। असौ सखी समक्षं यथा स्यादेवं राधिकां पुनराह। आहेत्यव्ययं भूतकाले चादिपाठात्साधु:, कीदृशी, आरान्मुरारिमुपदर्शयन्ती, "आराद्दूरसमीपयोरित्**यमर**:"। अनेकनारीत्यादिकं मुरारेर्विशेषणम्। अनेकनारीणां परिरम्भे य: संभ्रम:त्वरा तेन स्फुरन्त्युद्गच्छन्ति मनोहारिणि विलासे लालसा ओत्सुक्यं व्यधिकरणे बहुव्रीहि:। "लालसे प्रार्थनौत्सुक्ये" धत्**यमर**:।।१०।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१०।। अनेकेति। असौ सखी राधां पुनर्वक्ष्यमाणमाह। किं कुर्वती ? आरात्समीपे समक्षं प्रत्यक्षं यथा स्यात्तथा मुरारिं दर्शयन्ती दृष्टिपथमवतारयन्ती। अनेकनारीणां परिरम्भसंभ्रमेण त्वरया स्फुरन्तो मनोहरिणो ये विलासास्तेषु लालसा यस्य, तेषु लालस उत्सुको वा। "वदन्ति वंशस्थमिदं जतौ जरौ" इति वर्णसाम्यमनुप्रासः। दक्षिणो नायकः।।१०।।

## (३) जगद्धरकृत-सारदीपिका

।।१०।। अनेकेति असौ सखी राधिकां पुनराह इत्यन्वयः कथम्भूता सखी आराद्दूरे वर्तमानं समक्षं यथा स्यात्तथा कृष्णम् उपदर्शयन्ती विषयन्कारयन्ती। कथम्भूतं हरिम् अनेकनारीणां परिरम्भसम्भ्रमेणालिङ्गनादरेण स्फुरन् इतस्ततो गच्छन् मनोहारी मनोज्ञो यो विलासः क्रीडा तत्र लालसः आदरवान् ।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१०।। अनेकेति। असौ सखी राधीकां पुनराह पुनरुवाच। किं कुर्वती ? आराद्दूरतः समक्षं प्रत्यक्षं मुरारिमुपदर्शयन्तीति। कीदृशम् ? अनेकासां नारीणां परिरम्भसंभ्रमेणा-लिङ्गनादरेण स्फुरन् यो मनोहारिविलासंस्तस्य लालसौत्सुक्यं यस्य तादृशम्। "संभ्रामास्त्रयमिच्छन्ति भयमुद्वेगमादरम्"। "सोऽत्यार्थं लालसा द्वयोः" **इत्यमरः**। "आराद्दूरसमीपयो" इति च।।१०।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१०।। एवं वसन्तसमयमुपवर्ण्य तत्र समये नारीभिः सह विहरमाणं श्रीकृष्णं प्रत्यक्षेण प्रदर्शयन्ती सखी राधां प्राह। अनेकेति। अनेकासां नारीणां यः परिरम्भ आलिङ्गनं तत्र सम्भवस्त्वरा तेन स्फुरन् भासमानो मनाहारी चित्ताकर्षणशीलश्च यो विलासः विभ्रमः तत्र लालसः लम्पटः तत्परवश इति यावत्। "लोलुगो लोलुभो लोलो लालसोलम्पटोऽपि चेति" **प्रतापमार्त्तण्डः**, तादृशम्, अनेकेत्यत्र सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इति पुंवद्भावः। स्त्रियाः पुंवत् (६।३।३४) इत्यादिना वा मनोहारीत्यत्र "सुप्य जाताविति णिनिः" (३।२।७) एवंभूतं मुरारिं श्रीकृष्णं आरात् समीपे दूरे वा "आराद्दूरसमीपयोरित्**यमरः**"। समक्षं यथा तथा "प्रतिपरसमऽक्ष्ण" इति समासान्तष्ट च्, उपदर्शयन्ती, प्रदर्शयन्ती सखी उपदर्शयन्तीति वा योजना। राधिकां पुनराहब्रूते। "ब्रूवः पञ्चाना मित्यादिना (३।४।८४) लटि प्रथमपुरुषस्य णलादेशः, ब्रुव आहादेशश्च, नात्र भूतार्थत्वमाहसा उक्तेर्वक्ष्यमाणत्वात्। यत्र भूतार्थे

किमिच्छसीति स्फुटमाह, वासव इत्यादौ स प्रयोगो भ्रान्तिमूल इत्यवगन्तव्यम्। ब्रुवणलादिविधानात्, तदुक्तं वामनेन, आह्लोभूते, अलं तु भ्रमादिति, भूतार्थे मुखप्रयोगस्तु तस्मारपदत्वेनैव प्रयोगश्च आहस्मास्मितमदुमय्यदक्षरां गिरमिति।।१०।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१०।। यया सख्या ललितलवङ्गेति गीतेन पूर्वं राधा रोधिता, सैव पुनराहेति दर्शयति। असौ सखी पुनरिदं गीतेन वक्ष्यमाणं राधिकामाह गदितवती। कीदृशी? आरात् समीपे समक्षं प्रत्यक्षं मुरारिं कृष्णम् उपदर्शयन्ती अङ्गुल्या दर्शयन्ती। कीदृशं मुरारिम्? अनेकानां नारीणां परिरम्भ आलिङ्गनम्, तत्र य: सम्भ्रम: तेन स्फुरन् व्यक्तीभवन् मनोहारी चिताकर्षो यो विलास: तत्र लालसम् उत्तरोत्तरं सतृष्णमित्यर्थ:। 'सम्भ्रमं त्रयमिच्छन्ति भयमुद्वेगमादरमिति विश्व:।लिलेष्ट जनचेष्टानुकरणं सुष्टुभाषया विशेषालापनकिञ्चिद्विलास: सद्भिरुच्यते'इति **भावलता**। रामकरीराग:। रूपकताल:। रागलक्षणम्, 'स्वर्णप्रभा भास्वरभूषणा च नीलं निचोलं सुतनौ वहन्ती। कान्ते पदोपान्तमधिश्रितेऽपि मानोन्नता रामकरी प्रदिष्टा।।' ।।१०।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।१०।। एवं [१] रसार्थोद्दीपनेन वसन्तभावा वर्णिता:। इदानीं रागान्तरेण विभावानाह अनेकेत्यादिना। या पूर्वं वासन्ती परोक्षतयोवाच साऽसौ सखी समक्षं राधिकां पुनराह इत्यन्वय:। किं कुर्वती? आरात्समीपे मुरारिर्मुरस्य [२]मधुरससमूहस्य [३]अरिस्तद्विस्मारक:।श्रीकृष्णस्तं दर्शयन्ती। मधुमुरनरकेति मुरारिशब्दार्थो दर्शित:। कीदृशम्? अनेक-[४]नारी परिरम्भसम्भ्रमेण [५] आलिङ्गनेनादरेण स्फुरद्यो मनोहारी विलासस्तस्य [६] लालसा औत्सुक्यं यस्य तम्। [७] अथ वा अनेकनारी[८]विलासे वैदग्ध्यं [९]विद्यते यस्यां [१०]श्रीराधायां सा। अन्यत्पदं पूर्ववत्। ''सम्भ्रम: स्नेहहर्षयो:'' इति **विश्व**:। [११]''आराद्दूरसमीपयो:'' इति **विश्व**: (१४९.१५)। न च विरहे प्रत्यक्षता सम्भवति। सा पुनर्नायिकानायकयोर्न सखीनामिति। [१२]"लालसे प्रार्थनौ[१३]त्सुक्ये" **इत्यमर**:(३.३२२९)।अर्थान्तरन्यासोऽलङ्कार:।।१०।।

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।१०।। अनेकेति। असौ सखी राधिकां [१४]पुनराहेत्यन्वय:। कथम्भूता सखी? आरात् दूरे वर्तमानं [१५]समक्षं यथा स्यात्तथा कृष्णमुपदर्शयन्ती विषयं कारयन्ती। कीदृशं हरिम्? अनेकनारीणां परिरम्भसम्भ्रमेणालिङ्गनादरेण स्फुरन् इतस्ततो गच्छन् मनोहारी मनोज्ञो यो विलास: [२]क्रीड़ा तत्र लालस:[३]आदरवान्। पश्चात्कर्मधारय:।।१०।।

१.रसार्थमुद्दीपनेन-इ.फ.ग.ह.ज.२.मधुरसमूहस्य-फ.ज.३.अरिं स्वविस्मारकं श्रीकृष्णं-अ.४.नारीणां-इ.फ.ग.ह.ज.५.आलिङ्गनादरेण-ब.इ.फ.ग.ह.ज.६.लालसः-अ.ब.ग.७.यद्वा-ग.८.विलासवैदग्धम्-इ.फ.९.नास्ति-अ.१०.श्रीराधायां लालसः-इ.ग.श्रीराधायां लालसम्-फ.ह.ज.११.आराद्दूरसमीपयोरित्यमरः-इ.फ.ग.ह.ज.१२.लालसा-अ.१३.नास्ति-ब.इ.फ.ग.ह.ज.१४.पुनः पुनः-क.१५.समक्षं प्रत्यक्षं-क.

## (९) कृष्णपण्डितकृत-जयन्ती

।।१०।। एवं वसन्तवर्णनं कृत्वा रासक्रीडां वर्णयितुमाह; अनेकेति। असौ वसन्तवर्णयित्री सखी। अनेकासां नारीणां वल्लवीनां परिरम्भसम्भ्रमेण स्फुरन्तः उद्यन्तः मनोहारिणः रमणीया विलासाः बिब्बोकादयः चेष्टितानि वा तेषु लालसं आशक्तम्। मुरारिं आरात् नातिदूरं समक्षं प्रत्यक्षं उपदर्शयन्ती हस्तनिर्देशेन ज्ञापयन्ती राधिकां प्रति पुनः द्वितीयवारमाह वदति। ब्रुवो लटआहादेशः। वंशस्थवृत्तम्। अत्र नायकस्य दक्षिणत्वं दर्शितम्।।१०।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१०।। हरिरविदग्धाभिः सह क्रीडतीति प्रागुक्तं तत् कदाचिन्मिथ्येति राधा शंस्यत इति दूती प्रत्यक्षं दर्शयन्नाह; अनेकनारीत्यादि ।असौ सखी समक्षं प्रत्यक्षं पुनरपि राधिकामाह। समक्षमिति क्रियाविशेषणं वा। आहे[तेऽ]त्यव्ययं, भूतकाले चादिपाठात् साधुः। किंकुर्वती ? आरादिति ।निकटे मुरारिमुपदर्शयन्ती। ''आराद्दूरसमीपयोः'' **इत्यमरः**। मुरारिं किंविधम्? अनेकासां नारीणां परिरम्भाय कृष्णमालिङ्गितुं यः संभ्रमः अहमहमिकतया त्वरालक्षणश्चेष्टाविशेषः। अनेकनारीणां परिरम्भेषु वा यः संभ्रमस्तेन स्फुरति उद्गच्छति मनोहारिणि विलासे लालससौत्सुक्यं तृष्णातिरेको वा यस्येति व्यधिकरणबहुव्रीहिः। यद्वा लालसयोगाल्लालस इत्यर्था(र्शा)दिः। ''तृष्णातिरेके वाञ्छायामौत्सुक्ये लालसा द्वयोः'' इति **रुद्रः**। अत्र विलासपदेन कृष्णसमीपं गच्छन्तीनां गोपीनां पादस्खलनादिलक्षणो विभ्रमः उच्यते। तथा चोक्तम्; ''स्खलितं बहलं पादन्यासैर्विलोकितमस्थिरं स्थितिरविषये वक्त्राम्भोजं प्रयाति विकुण्ठनं स्मितमपि सुधाव्यर्थः। क्रोधो वृथैव चमत्कृतिदयितसविधं यान्त्यास्तन्या(स्या) विलासरसोत्द्ध्व-(ह्य)यम्।।'' इति।।१०।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।१०।। तद्वर्णनादिभिः श्रीराधिकामुद्दीप्तभावां विधाय किञ्चित् सविधं नीत्वा सखी श्रीकृष्टाभिप्रायं तस्मै साक्षाद्दर्शयन्त्याह; अनेकेति। असौ सखी श्रीराधिकां पुनराह;

किं कुर्वती ? मुरारिम् आरात् समीपे प्रत्यक्षं उप अधिकं दर्शनयन्ती। कथमनभीष्टम् अन्याङ्गनारमणं दर्शयति तत्राह; अनेकनारीति। अनेकनारीणां परिरम्भसंभ्रमेण स्फुरत्सुखाविर्भावं सुमनोहारिषु राधिकाविलासेषु लालसौत्सुकं यस्य तम्। एतद्विलासस्य प्रत्यक्षत्वात् तस्या विलासस्यैव स्फुरणं युक्तमित्यर्थः ।।१०।।

**(१२) पूजारीगोस्वामीकृत-बालबोधिनी**

।।१०।। आदौ 'ललितलवङ्ग' इत्यादिवसन्तवर्णनेन श्रीराधामुद्दीप्तभावां विधाय 'पुनर्दरविदलितमल्ली' त्यादिना मलयानिलभृङ्गकोकिलानां विशेषवर्णनैस्तत्सम्बन्धि दिवसानां दुरति- वाहनीयत्वापादनेन कृष्णदर्शनमन्तरेणाऽन्योन्योपायतां विरहव्यथायां निश्चित्य सम्प्रति वसन्तोचितसाधारणविहारव्यपदेशेन हरिस्त्वामेव कामयते, यदि मद्वचनं न प्रत्येषि, तर्हि स्वयमेवागत्य विलोकयेति तां पुनः कृष्णस्य विहारप्रदेश-सविधमानीय तदभिप्रायं साक्षाद्दर्शयन्त्याह अनेकेति। असौ सखी राधिकां पुनराह, अवभाषे आहेति तिङन्तप्रतिरूपकमव्ययम्। 'पुनः' कथने हेतुगर्भविशेषणम्। कीदृशी आरात् दूरे स्थितं मुरारिं समक्षं निकटमुपदर्शयन्ती। कथमन्याभिर्विहरन्तं कृष्णं तादृशोत्कण्ठितायै राधायै समागमैषिणी सा प्रदर्शितवती। तत्राह अनेकासां नारीणां गोपसुन्दरीणां परिरम्भमालिङ्गनं तस्य सम्भ्रमोऽहमहमिकोद्वेगस्तैः स्फुरन्तश्चे-तसाऽऽविर्भवन्तः ये मनोहारिणः स्वहृदयरञ्जनशीला विलासाः, अर्थात् श्रीराधाया एव न तु तासाम्। तद्विलासानां हि साक्षात् अनुभूतत्वेन स्फुरणाऽसम्भवात्। तेषु लालसं सतृष्णम् 'लोलुपो लोलुभो लोलो लम्पटो लालसोऽपि च' इति **प्रतापमार्त्तण्डः**। गोपिकानां परिरम्भणानि नृत्यगीतसम्भ्रमापसृतपादविन्यासव्याजेन परिहरन् तासां सासूयावलोकनादिविविधविभ्रमैरपि नाम एवं राधया सह क्रीडाविनोदमनुभविष्यन् तस्यां मनोहरविलासपात्रतां किं यास्यामीति मनोरथपरीतचेतसमन्यैरविभावनीयावस्थं निपुणतया विचारगोचरमिति भावः। श्रीराधाया हरिमनोहारिविलासशालित्वं यथा **उज्ज्वलनीलमणौ** -

'तिर्यग्क्षिप्तचलद्दृगञ्चलरुचिर्लास्योल्लसद्भ्रूलता,
कुन्दाभस्मितचन्द्रिकोज्ज्वलमुखी गण्डोच्छलत् कुण्डला।
कन्दर्पागमसिद्धमन्त्रगहनामर्धं दुहाना गिरं,
हारिण्यस्य हरेर्जहार हृदयं राधा विलासोर्मिभिः।। इति।।

काव्यलिङ्गमलङ्कारः। 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्' इति लक्षणम्।।१०।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१०।। अनेकनारीति; असौ सखी पुनर्वक्षमाणमाह। आरात् दूरसमीपयोः। अत्र समीपे प्रत्यक्षेण मुरारीं मुरहन्तंक हरिम् उप समीपे दर्शयन्ती निर्देशं कृत्वा दृष्टिपथमवतारयन्ती नैकस्त्रीणाम् आलिङ्गनेन त्वरया शीघ्रं स्फुरन्तो मनोहारिणो ये विलासाः। या शोभनां रमणक्रीयां निरूपयन्ती राधिकायाः चित्ते विक्रियां जनयित्वा औत्सुक्यं कारयित्वा वदति सखी! वंशस्थवृत्तम्। दक्षिणनायकः। वर्णसाम्यामुनप्रासः। सम्भ्रमास्त्रयमिच्छन्ति भयमुद्वेगमादरम्। अतिभयमुद्वेगमादरेण लालसा। सोत्यर्थं लालसाद्वयोः **इत्यमरः** ।।१०।।

।। चतुर्थः प्रबन्धः / गीतम् ४।।

।। रामकरी/रामक्रि/रामकेरी/रामक्रियारागेण रूपकतालाभ्यां गीयते ।।

**१-चन्दनचर्चितनीलकलेवरपीतवसनवनमाली।**

**केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली।।**

**हरिरिह मुग्धवधूनिकरे विलासिनि विलसति केलिपरे।। ध्रुवम् ।।१।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१।। श्लोकोक्तमर्थ गीतेन वर्ण्णयन्नाह। रामकिरीरागेण गीयते। अस्य ध्यानं यथा; कृष्णं प्रति राधागमनप्रोत्साहनं प्रागुक्तं, तत्र कदाचित् कृष्णः स्वयमुपगतां मां नानुमंसयत इति राधाप्रतिवचनमाशङ्क्य आह। हे विलासिनि! राधे! इह वसन्ते मुग्धवधूनिकरे सुन्दरस्त्रीनिचये हरिर्विलसतीति वाक्यार्थः, "मुग्धः सुन्दरमूढ़योरित्यमरः।" पक्षे मूढ़ इति व्याख्येयम्। तदयमत्रार्थः। तवाभावात् केलिपरे क्रीड़ामात्रशालिन्यपि हावभावानभिज्ञे वधूसमूहे हरिः क्रीडति। यदि तु त्वमेष्यसि तदा ताः सर्वास्त्यक्त्वा त्वयैव सार्द्धं क्रीड़िष्यति। यतोऽसौ विलासी त्वं च विलासिनी, युक्तः उभयोर्विलासिनोः समागम इति राधिकागमनप्रोत्साहनं स्त्रीविलास पुंविलासौ प्रागुक्तौ, हरिविलासितां प्रतिपादयन्नाह। चन्दचर्च्चितेत्यादि। चन्दनचर्च्चितं नीलकलेवरं यस्येति विग्रहः। पीतं वसनं यस्येति विग्रहः। वनमाला अस्यास्तीति ब्रीह्यादित्वादिनि च त्रयाणां कर्मधारयः। केलिचलन्नित्यादिः। केलिभिश्चलाभ्यां मणिकुण्डलाभ्यां मण्डितं गण्डयुगं यस्येति विग्रहः। स्मितमीषद्धसितं शालि तु गन्तुशीलमस्य सस्मितशाली। शलह्वलपतृगतौ, द्वयोः कर्मधारयः।।१।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१ ।। तदेव गीतेन दर्शयति झम्पातालेन; चन्दनचर्चितेति। पदानां बाहुल्यात्पूर्वं ध्रुवपदं व्याक्रियते; हरिरिति। हे राधे हे विलासिनि ! इह मुग्धवधूनिकरे हरिर्विलसति। किदृशे निकरे। केलिपरे। पुनः कीदृशे ? विलासिनि विलासे विद्यते यस्य एकस्यैवोभय-विशेषणत्वम्। इति ध्रुवः। अथ पदानि। चन्दनेत्यादि। चन्दनेन चर्चितमनुलिप्तम्। चर्चिस्तु यद्यप्यध्ययने तथापि धातुनामनन्तार्थत्वादनुलेपे वर्तत इति। तथा चोक्तम्, "क्रियावाचि समाख्यातुं प्रसिद्धार्थप्रदर्शिनः। प्रयोगतोऽनुमन्तव्या अनेकार्था हि धातवः।।" इति। नीलं कलेवरं शरीरं यस्य, पीतं वसनं यस्य, वनमाला विद्यते यस्य, ततः कर्मधारयः। अथवा चन्दनेन चर्चिते नीलकलेवर पीतवसने वनमालाश्च विद्यन्ते यस्यासौ तथा। चन्दनेन चर्चिते ये नीलकलेवरपीतवसने तयोर्वनं संसक्तिरचनाविषयंस्तं मलते धारयतीति स तथा। केल्या चलन्ती ये मणिकुण्डले ताभ्यां मण्डितं गण्डयुगं यस्य स तथा। तथा स्मितशाली स्मिताढ्यः ईषद्धसितयुक्त इति द्वे पदे। अथवा द्वे पद कृत्वा कर्मधारयः। अथवा ईद्दशं गण्डयुगं च स्मितं च ताभ्यामाढ्यः। अथवा गण्डयुगे स्मिताढय इति तन्मा त्रेणैवानुमेयं स्मितं नास्य प्रसारणेन।।१ ।।

## (३) जगद्धरकृत-सारदीपिका

।।१ ।। अमुमेवश्लोकोक्तमर्थं गीतेनाह चन्दनेति रामकरीरागः तस्य लक्षणं स्वर्णप्रभाभास्वरभूषणा च नीलं निचोलं स्वतनौ वहन्ती। कान्तःपदप्रान्तमधिश्रितोऽपि मनोन्नतोरामकरीप्रदिष्टा इति। हे विलासिनि राधे इह मुग्धवधुनिकरे मनोहरकामिनी-समुहे हरिविलसति क्रीडतीत्यन्वयः कथम्भूते मुग्धवधूनिकरे केलिपरे क्रीडातत्परे कथम्भूतो हरिः चन्दनेति चन्दनेन मलयजेन चर्चितं रेखाकारेणानुलिप्तं नीलं कलेवरं शरीरं यस्य पीतं सवर्णवर्णवसन वस्त्रं यस्य वनमाला यस्यास्तीति ततः प्रत्येकं कर्मधारयः पुनः कथम्भूतः केलिना क्रीडया चलन्ती ये मणियुक्ते कुण्डले ताभ्यां मण्डितं शोभितं गण्डयुगं यस्य स्मितेन ईषद्धास्येन शालते शोभते ततः कर्मधारयः।।१ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१ ।। तदेव गीतेन कथयति; चन्दनेति। गीतस्यास्य रामकरी रागः। तालश्च रूपकः। काललक्षणं प्रागेवोक्तम्। गीतार्थस्तु हे विलासिनि विलासशीले ! वृन्दावने मुग्धवधूनिकरे सुन्दरवधुनिचये हरिर्विलसति क्रीडति। कीदृशे वधुनिकरे ? केलिपरे सामान्यक्रीडापरायणे अत्र मुग्धवधूनिकरे[२०] हावभावाध्यनभिज्ञे स्त्रीचये सामान्यक्रीडापरायणे विलसतीति

ध्वनेरर्थः। तथा च हावाद्यभिज्ञां त्वां विना सकलकलाभिज्ञस्य- हरेर्विलान शोभत ईति भावः। "मुग्धः सुन्दरमूर्खयोः" इति **विश्वः**। विलासो हावविशेषस्तल्लक्षणं तु **भरते**–"स्थाने यानासने वापि नेत्रवक्त्रादिकर्मणा।। उत्पाद्दते विशेषो यः स विलासः प्रकीर्तितः।।" इति। एतश्च ध्रुवपदम्। किदृशो हरिः ? चन्दनेन चर्चिते नीलकलेवरे श्यामशरीरे पीतं वसनं वस्त्रं वनमाला च यस्य तादृशः ।पुनः कीदृशः ? केलिषु चलती कक्पमाने मणियुक्ते कुण्डले ताभ्यां मण्डितमलंकृतं गण्डयुगं कपोलयुग्मं यस्य तादृशः। पुनः कीदृशो हरिः ? स्मितेन ईषद्धास्येन शाली शोभमानः। "अथ कलेवरम्। गात्रं वपुः संहननम्" **इत्यमरः**। "गण्डेकपिलौ" इत्यापि। स्मितलक्षणं तु **भरते** – "ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः। अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत्।।" इति।।१ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१ ।। आहेत्युक्तं, तत्प्रकारमेव विशदयति। चन्देनेति। एकतालीतालेन गेयं, तल्लक्षणं तु ''एकेनैव द्रुतेन स्यादेकतालीति कथ्यते'' इति रामक्रियारागेण गीयते इत्युक्तम्। तस्यायमभिप्रायः वसन्तरागस्य पुरुषरागत्वात्, रामक्रियायास्तत्कलत्रत्वात्पतिसन्निधान एव कलत्रस्यावस्थानं न्याय्यमिति रामक्रियारागेण गीयत इत्युक्तम्, तदुक्तम्, ''रामक्रिया वरालीच गौली वासन्तयोषित'' इति। तत्र हरिरित्यारभ्य केलिपर इत्यन्तं ध्रुवपदमिदम्। तदादौ व्याक्रियते हे राधे! बिलासिनि! केलिपरे! एतद् द्वयं राधा सम्बोधनं वा, कीदृशो हरिर्विहरतीत्याकाङ्क्षायामाह। चन्दनेति। चन्दनेति। चन्दनेन पटीरेण चर्च्चितं रूषितं लिप्तमिति यावत्। एतादृशं नीलं श्यामवर्ण्णं च यत् कलेवरं शरीरं तत्र पीतं सुवर्ण्णवर्ण्णं वसनमम्बरं यस्य स चासौ वनमाली च। अथवा, नीलकलेवरश्चासौ वनमाली चेति वा, अनेन वर्ण्णत्रयसम्पत्त्यातिसोन्दर्य्यं सूचितम्। वनमालीत्यत्र ब्रीह्यादित्वादिनिः। आन्ध्रदेशे वरशब्दस्य ग्राम्यत्वदोषः प्रयोग-वाहुल्यात्पतिहर्त्तव्यः। किञ्च, केलिषु विहारेषु चलति चलमाने ये मणिकुण्डले ताभ्यां मण्डितमलङ्कृतं यद्गण्डयुगं कपोलयुग्मं तत्र यत् स्मितं मन्दहासस्ते न शाली रमणीयः, एतादृशो हरिर्विलसतीत्यन्वयः।।१ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१ ।। सखी राधामाहेति यदुक्तम्तदाह; हे विलासिनि श्रृङारभाव-जनितविकारवति राधे! इह मुग्धवधूनिकरे मनोहरवधूसमूहे हरि विंहरति क्रीडति। वधूनिकरे किम्भूते ? केलिपरे क्रीडापरायणे। हरिः किम्भूतः ? चन्दनेन चर्च्चितमनुलिप्तं नीलं कलेवरं यस्य स तथा, पीतं वसनं यस्य स तथा। वनमाला अस्यास्तीति स वनमाली। अत्र

प्रत्येकं कर्मधारयः। पुन किम्भूतः ? केलिः क्रीडा, तया चलता मणिकुण्डलेन मण्डितं गण्डयुगं यस्य स तथा। केलिंचलन्मणिकृण्डलश्चासौ स्मितशाली चेति कर्मधारयः। तदनेन श्रृङ्गारिवेशो दर्शितः।।१ ।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।१ ।। एवं राधामाधवयो रहःकेलिं निरूप्येदानीं समुदायकेलिं गीतेनैव दर्शयति चन्दनेत्यादिना। गीतस्यास्य रामकरीरागः यतितालश्च। तालरूपं पूर्वमेवोक्तम्। [४]रागलक्षणम्,

स्वर्णप्रभाभास्वरभूषणा च नीलं निचोलं सुतनौ वहन्ती।
कान्ते पदोपान्तमधिश्रितेऽपि मानोन्नता रामकरी प्रदिष्टा ।। इति ।

गीतार्थमाह-[५] हे विलासिनि कृष्णविहारशीले; पश्य तदिति शेषः। इह वृन्दावने वसन्ते वा मुग्धवधूनिकरे सुन्दरवधूसमूहे हरिर्मनोहरो विलसति क्रीडां करोति। त्वां विना क्रीडन्नपि न क्रीडतीत्यर्थः। कीदृशे ? केलिपरे क्रीडापरायणे। अत्र मुग्धवधूशब्देन केलिपरशब्देन च हावभावाद्यनभिज्ञता सामान्यक्रीडापरता च व्यञ्जिता। विलासिनीति सम्बुद्ध्या त्वय्येव सर्वकला[१]सम्पद्दर्शिता। [२]विलासिनीसामान्यक्रीडेति ध्वनिः। [३]कीदृशे ? चन्दनेन चर्चित लिप्तेऽपि नीलकले केलिकलाऽकौशलत्वै। नीलाः मलिनीभूताःकला यस्मिन्। किम्भूतो हरिः ? [४]वरे पीतवसनवनमाले[५]यस्य। अथ वा त्वद्वियोगमसहमान एव चन्दनेन चर्चितः अनुलिप्तः नीलकलेबरः [६] पीतं वसनं वनमाला च यस्य सः। एतेन त्वय्येवानुराग उक्तः च,

अन्तर्गतार मदनवह्निशिखावली या
सा बाधते किमिह चन्दनचर्चिताऽपि।
यत्कुम्भकारदहनोपरि पङ्कलेप-
स्तापाय तत्पुनरसौ न तु तापशान्त्यै।। इत्यादि ।

[७]तथा त्वमेव विलोकयेति दर्शयन्ती। कीदृशो हरिः ? केलीषु क्रीडासु चलन्ती कम्पमाने ये मणिकुण्डले ताभ्यां मण्डितमलङ्कृतं गण्डयुगं यस्य स्मितेन[८]मन्दहासेन वा शाली शोभमानः। स्मितलक्षणं च **भरते,**

''ईषद्विकसितैर्गण्डैः कटाक्षैस्सौष्ठवान्वितैः।
अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत् ।।'' इति (६.५४)।

केलिचलन्मणिकुण्डलेत्यादिना कुण्डलचलनं साकाङ्क्षम्; न ह्येतासु काचिद्वृषभानुनन्दिनीतुल्याऽधिका च इति यत् स्मितं तेन शाली शोभमानो न तु तासां विलासेनेति

भावः। मुग्धवधूरित्यत्र कर्मधारयः। एतेन मौग्ध्यमेव [१०] न केलिकुशलता [११] दर्शिता। किं क्रीडत्यापि तु चेष्टां [१२]करोति। अत एव त्वया समक्षेण भवितव्यमिति मम प्रार्थना।

"मुग्धःसुन्दरमूढयोः" इति विश्वः(६६.१०)। विलासो [१] हावविशेषः। "तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु" **इत्यमरः** (?)। "[२]कलेवरम् गात्रं वपुः संहननम्" **इत्यमरः**(२.६.७०)। [३]गण्डौ कपोलौ **इत्यमरः** (२.६.९०)। स्वरूपोक्तिरलङ्कारः[४]। विलासलक्षणम्-

"[५]वासस्थानासनादीनां नेत्रवक्त्रादिकर्मणाम्।
उत्पद्यते विशेषो यः स विलासः प्रकीर्तितः ।। इति"।।१।।

१.सम्प्रदर्शिता-अ.ज. २.विलसतीति सामान्यक्रीडेति ध्वनिः-इ.फ.ग.ह.ज. ३.कीदृशे निकरे-ग. ४.वरे श्रेष्ठे-ज. ५.यस्य तम्। यद्वा-ग. ६.पीतवसनं-अ.ब.इ. ७.तस्मात्-इ.फ.ग.ह.ज. ८.यस्य सः- ९.मन्दहास्येन-अ.ब.ईषद्धसितेन इ.ग.ह.ज.ईषद्धसनेन-फ. १०.न तु-इ.ग.ह.ज. ११.नास्ति-अ.ब. १२.करोतीति-इ.फ.ह.ज.

१.तः २.पर्यन्तं नास्ति-क. ३.रासक्रियारोगेण गीयते-च. ४.रागलक्षणं वर्णयन्नाह-अ.ब. ५.हे विहारिणि-अ.

## (८) नारायणपण्डितकृत- पदद्योतनिका

अमुमेव[६]श्लोकार्थं गीतेनाह कविः चन्दनेति। [७]अस्य[८]रामकरी; रागस्तल्लक्षणम्।

स्वर्णप्रभाभास्वर[९] भूषणा च नीलं निचोलं सुतनौ [१०] वहन्ती।
कान्ते पदोपान्तमधिश्रितेऽपि मानोन्नता रामकरी [११]प्रदिष्टा।।

हे विलासिनि [१२] राधे इह मुग्धवधूनिकरे मनोहरकामिनीसमूहे हरिर्विलसति क्रीडति। [१३]कीदृशे ? केलिपरे क्रीडातत्परे। [१४] कीदृशो हरिः ? चन्दनेति। चन्दनेन [१५]मलयजेन चर्चितं रेखाकारेणानुलिप्तं[१६] नीलं कलेवरं शरीरं यस्य, पीतं [१७]सुवर्णवर्णवसनं वस्त्रं यस्य, वनमाला यस्यास्तीति तत् प्रत्येकं कर्मधारयः। [१८] पुनः कीदृशः ? केलिना क्रीडया [१९]चलती ये [२०] मणिकुण्डले मणियुक्ते कुण्डले ताभ्यां मण्डितं [२१] शोभितं गण्डयुगं यस्य, स्मितेन ईषद्धास्येन शालते शोभते, ततः[२२] कर्मधारयः।।१।।

१.हावभावविशेषः-ज. २.अथ कलेवरम्-इ.फ.ग.ह.ज. ३.तः४.पर्यन्तं नास्ति-ग. ५.वात-अ.ब.बाह्या-ज. ६.श्लोकोक्तमर्थमाह गीतेन-क.श्लोकोक्तमर्थमाह-ल.म. ७.नास्ति-क.ल.म. ८.रामकरीरागः रागलक्षणन्तु-ल.म. ९.लक्षणा च-क. १०.वसन्ती-ड.हरन्ती-क. ११.प्रसिद्धा-म. १२.नास्ति-ड. १३.कथम्भूते वधूनिकरे-क.ल.म. १४.कथम्भूतो हरिः-क.ल.म. १५.मलयजपङ्केन-क. १६.नीलकलेबरं-क.ल.म. १७.सुवर्णवर्णवसनं-क.म.सुवर्णवसनं-ल. १८.पुनः कथम्भूतः ल.म.पुनः

कथम्भूतो हरिः-क.१९.चलन्ति-ड.चलन्ती-क.ल.म.२०.नास्ति-ड.२१.नास्ति-ल.म. अलङ्कृतं-क.२२.कर्मधारयः समासः-क.

## (९) कृष्णपण्डितकृत-जयन्ती

।।१ ।। शुद्धरासक्रियारागरसम्पूर्णस्सङ्ग्रहोऽपि च ।
षड्जांशन्याससम्पन्नो गेयो मध्याह्निनात्परम् ।।

चन्दनेति। इह यमुनाकूले रासा एव विलासाः अस्मिन् सन्तीति विलासी तस्मिन्। केलिपरे क्रीडाशक्ते। मुग्धवधूनां सुन्दरस्त्रीणां निकरे समुदाये हरिः विलसति क्रीडति। वर्तमाने लट्। लसति विलासिनीति वा पाठः। उभयत्र विकारपाठे मात्राधिक्याद्विकार एव भवति। चन्दनेन श्रीगन्धेन चर्चितं छुरितं नीलं कलेवरं शरीरं यस्यासौ; पीतवसनश्चासौ वनमाली चेति विशेषणात्कर्मधारयौ। केलौ क्रीडायां चलद्भ्यां चञ्चलाभ्यां मणिकुण्डलाभ्यां रत्नखति(च) कर्णभूषणाभ्यां मण्डितं शोभितं गण्डयुगं कपोलद्वयं यस्य सः। स्मितशाली मन्दहासवान्। हरिरित ध्रुवायां योज्यम् ।।१ ।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१ ।। रामकिरीरागस्य लक्षणमाह ''स्वर्णप्रभाभासुरभूषणा च, नीलं निचोलं वपुषा वहन्ती। कान्ते पदोपान्तमधिश्रितेऽपि, मानोन्नता रामकिरी प्रदिष्टा।।'' इति। कृष्णं प्रति राधागमनोत्साहः प्रागुक्तः। तत्र कदाचित् कृष्णः स्वयमुपागतां मां नानुशंस्यत इति राधाप्रतिवचनमाशङ्क्याह चन्दनेति । हे विलासिनि! राधे! इह वसन्ते वृन्दावने वा मुग्धवधूनिकरे मुग्धानां मनोहारिणीनां वधूनां स्त्रीणां नवोढानां वा निकरे हरिः विलसतीति वाक्यार्थः। किं वा इह मुग्धवधूनिकरे विलसति। ''वधू(:) श(र्न)ट्यां नवोढायां पृक्कायामपि योषिति'' इति **कुमुदाकरः**। ''नारी सीमन्तिनी वधूः'' **इत्यमरः**। पक्षे मूढवधूनिकर इति व्याख्येयम्। तदयमित्यर्थः। तवाभावात् केलिपरे क्रीडामात्र-शालिन्यपि भा(वा)वभावानभिज्ञे स्त्रीसमूहे हरिर्विलसति। यदि तु त्वमेष्यसि तदा ताः सर्वास्त्यक्त्वात्वयैव सार्द्धं क्रीडिष्यति। यतोऽसौ विलासित्वं विलासिनीयुक्त उभयोर्विलासिनोः समागम इति राधिकागमनोत्साहनम्। स्त्रीविलासपुंविलासौ प्रागुक्तौ। हरिविलासिताः प्रतिपाद्यनाटयन्नाह। हरिः कीदृक्? चन्दनेत्यादि । चन्दनस्य चर्चा स्थासकः सा सञ्जातास्येति तदस्य सञ्जातं (जातं) तारकादिभ्यः इतच् च। चन्दनचर्चितं नीलकलेवरं यस्य, पीतं हरिद्राभं वसनं यस्य, द्वयोः कर्मधारयः। वनमालास्यास्तीति व्रीह्यादित्वा[दीनि](इन्) च। चन्दनचर्चितनीलकलेबरपीतवसनश्चासौ वनमाली चेति पुनर्विशेषणसमासः। ''वनपुष्पमयी माला वनमाला हरेर्मता'' इति **लीलारविन्दः**।

पुन: कीदृक् ? केलिचलेत्यादि। केलिभिश्चलाभ्यां (चलद्भ्यां) चञ्चलाभ्यां मणिकुण्डलाभ्याम्, मणिखचितकुण्डलाभ्यां मण्डितं गण्डयुगं यस्येति विग्रह:। स्मितमस्यास्तीति स्मितशाली। ''मत्वर्थे शालिन् वक्तव्य:'' इति **चान्द्रं व्याकरणम्**। यद्वा शाडश्लाघायामित्यतो धातोर्भावे घञि शाल इति रूपम्। डलयोरेकत्वाभ्युपगमात् पश्चादत इनि पठनादिति मत्वर्थीय इनि:। ततश्च स्मितेन शाली श्लाघावान् प्रशंसनीय इत्यर्थ:। स्मितस्य हि समीचीनतया पुमानुत्तम इति प्रशस्यते। तथाहि; तादृशस्मित- लक्षणमाह **भरत**:; ''ईषद्विकसितगण्डै: कटाक्षै: सौष्ठवान्वितै:। अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेद् ।।'' इति। केलिचलन्मणिकुण्डलमण्डितगण्डयुगश्चासौ स्मितशाली चेति कर्मधारय:।।१ ।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।१ ।। श्लोकोक्तर्थं गीतेन वर्णयन्नाह; चन्दनेत्यादिना। गीतस्यास्य रामकिरीरागो यतिताल:। यथा; 'स्वर्णप्रभाभास्वरभूषणा च/नीलं निचोलं वपुषावहन्ती। कान्ते पदोपान्तमधिश्रितेदऽपि/मानोन्मता रामकिरीयमिष्टा।' इति। हे विलासिनि! असमानोर्द्ध्वविलासशीले! इह वृन्दावने स्वाभिप्रायानभिज्ञे वधूसमूहे हरि: विलसति। त्वद्विलाससादृश्याभासं कामयते। कीदृशे ? केलिषु श्रेष्ठेऽपि।। इति ध्रुवम्।।

कीदृशो हरि: ? चन्दनेनानुलिप्ते नीलकेलवरे पीतं वसनं यस्य, वनमाला विद्यते यस्य, स च। समर्पितानेकोपकरणानेकवर्णवधूनिकरे तद्दत्तचन्दनवनमालात्वद्वर्णवसनभूषित एवं विलसतीत्यर्थ:। अतएव केलिषु चलद्भ्यां कुण्डलाभ्यां मण्डितेन गण्डयुगेन स्मितेन च शोभमान:।।१ ।।

## (१२)लक्ष्णकृत-रसिकरङ्गदा

।।१ ।। प्रबन्धेऽत्र प्रधाननायिकायां श्रीराधायां श्रीकृष्णस्य अनुरागोत्कण्ठादे: कवे: प्रतिपिपादयिषितत्वात् तथा तदुपनिबद्धवस्तु प्रति भूय: समागमकरणकृतनिश्चयायाश्च सखी निजवयस्यायां तदुत्कर्षस्यावश्यतया निरूपणीयत्वाच्च तदुद्वेजकतया बहुनायिकाबल्लभस्य कृष्णस्य अपरासु अपरागस्योचितत्वान्न रक्ताऽपरक्तवृत्त्या रसाभासत्वम्। प्रत्युत बहुनायिकासु तुल्यानुरागकीर्त्तनादेव भवेदाभासता। न च दाक्षिण्येन परिहारी। तुल्यानुवृत्तेरेव दक्षिणे रसज्ञैरिष्टत्वात्। न च तुल्यानुरागस्य इति स्पष्टमाकरे। अलमत्र बहुना। यदाह तद्विशदयति चन्दनचर्च्चित इति रामकिरीरागेण गीयत इति। प्राक् प्रयुक्तस्य पुरुषभूतस्य वसन्तरागस्य प्रियारूपाया: अस्या रागिण्यास्तत्समीपा-

वस्थानस्य युक्तत्वात् साधूक्तम् । एतयो: दाम्पत्यं यथा सङ्गीते, 'रामक्रिया वराडी च गौरी वासन्तयोषित' इति।

अस्या: स्वरूपम्,

स्वर्णप्रभाभासुररत्नभूषा, नीलं निचोलं वपुषा वहन्ती।

कान्ते पदोपान्तमधिश्रितेऽपि, मानोन्नता रामकिरी प्रदिष्टा।। इति ।

'शिखण्डिवर्होच्चयवद्धचूड' इति।

श्रीकृष्णसादृश्यमवाप्तस्य वसन्तरागस्य तथा स्वर्णप्रभेत्यादिना श्रीराधासादृश्यमवाप्ताया अस्या रागिण्याश्च सहावस्थानसूचनेन त्वयाऽपि एवं प्रियेण सहावस्थीयतामिति राधां प्रति सख्युपदेशोऽप्यभिप्रेत:। तत्प्रथममुत्कण्ठावर्धनाय,

तासामाविरभूत् शौरि: स्मयमानमुखाम्बुज:।

पीताम्बरधर: स्त्रग्वी साक्षात् मन्मथमन्मथ:।।इति।।१ ।।

## (१३)प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१ ।। चन्दनेति; गीतस्यास्य रामकरी /केरी /किरी राग:। रामकिरी नाम वृहत्शूकपक्षी। तस्यानुकरणेन तस्मादुभूत: राग:। अत्र झम्पातालेति राणाकुम्भकर्ण: रसिकप्रियायाम्। रूपकतालेति शंकरमिश्ररसमञ्जर्यां निदिशति। हे विलासिनि विलासशीले राधे! इह अत्र वृन्दावने मुग्धवधूनिकरे सुन्दरवधूनिचये हरि: विलसति। कीदृशे निकरे। केलिपरे क्रीडापरायणे विलासिनि विलास विद्यते यत्र। एकस्यैवोभयविशेषणम्। इति ध्रुव:। अत्र मुग्धवधूनिकरेति हावभावहेलाद्यनभिज्ञे स्त्रीचये केलिपरे सामान्यक्रीडापरायणे विलसतीति ध्वनि:। तथा च हावाद्यनभिज्ञां विना सकलकलाभिज्ञस्य हरेर्विलासो न शोभत इति पदानां बाहुल्यात् ध्रुवपदं व्याक्रियते, हरिरिति भाव:। मुग्ध: सुन्दरमूर्त्तय: इति **विश्व:**। चन्दनचर्चित चन्दनेनचर्चितं हे विलासिनि! विलाशशीले! चन्दनेनानुलिप्तं चर्च्चितमिति। चर्चितस्तु यद्यप्यध्ययने वर्तते तथापि धातूनामनन्तार्थत्वादनुलेपे वर्त्तत इति। उद्धरति कुम्भ: क्रियावाचि समाख्यातुं प्रसिद्धार्थप्रदर्शिन:। प्रयोगोऽनुमन्तव्या अनेकार्था हि धातव: इति। नीलं कलेवरं शरीरं यस्य। पीतं वसनं यस्य। वनमाला विद्यते यस्य। तत: कर्मधारय। अथवा चन्दनेन चर्चिते नीलकलेवरे पीतवसने वनमाला च विद्यते यस्यासौ तथा। चन्दनेन चर्चिते ये नीलकलेवरे पीतवसने तयोर्वनं संसक्तिरचनाविशेषस्तं मलये धारयतीति स तथा। श्यामशरीरे पीतरङ्गस्य वस्त्रं धारयित्वा वनमाला आजानुलम्बिता माला वनमाला प्रकीर्त्तिता। इति। तथाविधस्य मालरूपस्य गले धारयति य: केलिषु

रतिक्रीडायां चलन्ति कम्पमाने मणिकुण्डले ताभ्यां शोभमानमलंकृतं वा शरीरं शोभमानं गात्रं ईषद्हास्येन शोभमान: हरि: वर्त्तते । स्मितहास्यस्य लक्षणं यथा भरते, ईषद्विकसितै: गण्डै: कटाक्षै: सौष्ठवान्वितै: । अलक्षितद्विजं धीरमुंत्तमानां स्मितं भवेत् ।। इति ।।१ ।।

**२-पीनपयोधरभारभरेण हरिं परिरभ्य सरागम् ।**
**गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम् ।। हरिरिह० ।।२ ।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२ ।। इतो गोपीनां सौन्दर्य्यमविदग्धत्वं च प्रतिपादयन्नाह। काचित् गोपवधू पीनपयोधरभारभरेण परिरभ्य हरिमुदञ्चितपञ्चमरागं यथा स्यादेवमनुयायति कृष्णस्य गानपश्चाद् गायति इत्यर्थ:। कीदृशं हरिं सरागं गानपरमित्यर्थ: "पञ्चमो रागभेदे स्यात्पञ्चानामपि पूरणे"। अत्र पीनपयोधरपदोपन्यासात् गोप्या: सौन्दर्य्यं प्राक्स्वयम् अलिङ्गनादवैदग्ध्यम्। "बट्रोरुविपुलं पीनपीव्नी तु स्थूलपीवरे" **इत्यमर:** ।।२ ।।

### (२) राणाकुम्भकृत- रसिकप्रिया

।।२ ।। अथ परम्परं गोपिकानां केलिचेष्टितमाह; पीनपयिधरेति। कचिद्गोपवधूर्हरिं गायन्तं हरिमनुगायति वंशकृत्येन गायति। किं कृत्वा ? सरागं सभिलाषं तमेव हरिं परिरभ्य। किंभूता ? पीनपयोधरभारभरेणोपलक्षिता। अथवा विपुलस्तनभाराति- शयेन परिरभ्य। किंभूतं हरिम् ? सरागं तदालिङ्गनसाभिलाषम्। पुन: किभूतम् ? उदञ्चित आ तारावध्युर्ध्वं नीत: पञ्चमरागो येन वा, उदञ्चित: पञ्चमखरोपलक्षिते रागो येन वा, उदञ्चित: पञ्चमरागोऽनुरागो येन; अथवा उदञ्चितपञ्चमरागं यथा स्यात्तथेति गानक्रियाविशेषणम्। शृङ्गारे हि पञ्चमभूयिष्टस्य गानस्य प्राधान्यत्। अथवा उदञ्चितहृद्यरागं यथा स्यात्तथा ।।२ ।।

### (३) जगद्धरकृत-सारदीपिका

।।२ ।। पीनेति हे राधे काचित् गोपवधू: गोपाङ्गना पीनपयोधरभारेण विपुलकुच-गौरवाति शयेन सरागं यथा परिरम्भ आलिङ्गन्च हरिम् अनुपश्चादूर्ध्वकृतं पञ्चमरागं गायति गानं करोति ।।२ ।।

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।२ ।। गोपीनां सौन्दर्य्यविलासानभिज्ञत्वं च कथयन्नैव केलिमाह; पिनेति। काचिद्गोपवधू: पीनपयोधरभारभरेण पीनस्तनगौरवातिशयेन सरागं सानुरयथा स्यादेवं हरिं परिरभ्यालिङ्गन्च उदञ्चित ऊर्ध्वमञ्चित: पञ्चमाख्यो रागो यत् एवं यथा स्यात्तथानुगायति अनु पश्चाद्धरेर्गानानन्तरं

गायति अत्र गोप्याः सौन्दर्यं पीनपयोधरेत्यादितम्। अवैदग्ध्यं तु कृष्णास्य, परिरमभोद्यम विनैव स्वयं प्रथमं परिरम्भणात् । अन्योनयकृते हि परिरम्भे शृङ्गाररसः पुष्तो भवति। तदुक्तं दशरूपके(४.४८), "रम्यदेशकलाकालवेषभोगादिसेवनैः। प्रमिदात्मरतिः सैव युनिरन्योन्यसक्तयोः। प्रकुष्यमाणः शृङ्गारो मधुराङ्गावचेष्टितैः।।" इति। शृङ्गारे पञ्चमः स्वखरे बाहुल्येन भवति स एवात्र कथितः। यदाह भरतः,"पञ्चमं मध्यभूयिष्ठं हास्यशृङ्गारयोर्भवेत्" इति।।२।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।२।। पीनेति। काचिद्गोपवधूः काचिद्वल्लबाङ्गना पीनौ यौ पयोधरौ कुचो तयोर्भारभरेण अत्यन्तभरेणेति वा, अथवा, पयोधरभारस्य भरस्तेन "अप्यथातिशयो भरः" **इत्यमरः**। आलिङ्गनसारस्यायैतदपात्तमवगन्तव्यम्। सरागं साभिलाषं यथा तथा हरिं श्रीकृष्णं परिरभ्य आलिङ्ग्य अथवा सरागमिति हरिविशेषणम्। अन्यत्पूर्ववत्। उदञ्चितः प्रपञ्चितः पञ्चमरागः उद्दीपकोपिकालापकल्पज्ञानविशेषो यस्मिन् कर्मणि तद् यथा तथा, अथवा पञ्चमः पञ्चमाख्यः स्वरविशेषः। "षड्जं मयूरो वदति पिकः कूजति पञ्चमम्।।" उक्तं च,

रे रे कोकिल मा भज मौनं किञ्चिदुदञ्चय पञ्चमरागम्।
नोचेत्तामिह को जानीते काक कदम्बक नीते चूते ।।

इति गायति वदति तस्मिन् मुग्धवधूनिकरे हरिः विलसतीत्यन्वयः। एवमन्यत्रापि यच्छब्दाध्याहारेण ध्रुवपदान्वयः कल्पनीयः। अध्याहारप्रकारस्तु आदिमश्लोकव्याख्यान एव स्फुटीकृतः। अञ्चित इत्यत्र अञ्चेः पूजायामितीडागमः। पीनेत्यत्र उदितश्चेति निष्ठा।।२।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२।। तासां केलिपरत्वमेव दर्शयति। काचिद् गोपवधूः पीनपयोधरभारभरेण भारातिशयेन सराग सानुरागं यथा स्यादेवं हरिं परिरभ्यालिंग्य उदञ्चितपञ्चमरागम् उद्गतपञ्चमरागं यथा स्यादेवमनुगायति कृष्णगानानुगानं करोति। 'अतिशयो भर **इत्यमरः**।।२।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।२।। व्रजवधूनां हावभावाद्यनभिज्ञत्वं कथयन् पुनस्तामेव युवतियूथलीलामाह पीनेत्यादिना। काचिद्गोपवधूः पीनपयोधरभारभरेणातिस्थूलस्तनगौरवाधिक्येन सरागं सस्नेहं यथा स्यात्तथा; [१]यद्वा, पीनोऽतितीक्ष्णः पयोधरयोः भारस्तस्य भरेण [२]भारेण

स्वस्यापि भारभूतेन हरिं मनोहरं परिरभ्यालिङ्ग्य हरे[३]र्गीतानन्तरं गायति। न तु स्वयं गायतीत्यवैदग्ध्यं स्फुटमेव। [४]श्रीकृष्णस्यालिङ्गनेच्छां विनाऽपि प्रथममालिङ्ग्य शृङ्गाररसशोभामावहतीति। उक्तञ्च,

वेषदेशक्रियालापपरिरम्भादिसेवनैः।
स्यादानन्दप्रदो यूनोरुभयोरनुरक्तयोः।।इति।।

कीदृशं हरिम्? सरागं [५]त्वय्येव कामभावेन स्नेहेन वा सानुरागम्। न तु ६सिन्दूरादिरागयुक्तम्। एतेन तासामवैदग्ध्यमेव ध्वनितम्। पुनः कीदृशम्? [१]उदञ्चितपञ्चमरागम्। उदञ्चितः [२] तालालापनेन [३] ऊर्ध्वं गीतः पञ्चमस्वरो येन तम्। शृङ्गारे पञ्चमस्वराख्यस्वरो बाहुल्येन क्रियते।

[४]अथ वा पञ्चमरागगानं तासां५ परीक्षार्थाय, [६]यदि वाऽऽह्लादजननाय चेति ध्वनिः। उक्तञ्च,

[७]निषांद ह्रेषते वाजी गावस्त्वृषभभाषिणः। अजाविकं तु गान्धारं धैवतं बृंहते गजः।।
षडजं मयूरा ब्रुवते मृगा मध्यमभाषिणः। पुष्पसाधारणे काले कोकिलो रौति पञ्चमम्।।
हास्यशृङ्गारयोर्गेयौ स्वरौ पञ्चममध्यमौ। षड्जर्षभौ तथा ज्ञेयौ वीररौद्राद्भुते रसे।
गान्धारश्च निषादश्च कर्तव्यौ करुणाश्रयौ ।।इति ।।२।।

१.अथ वा-इ.फ.ह.ज. २.नास्ति-अ.ब.फ.ज. ३.गानानन्तरं-इ.ह.फ.ज. ४.श्रीकृष्णालिङ्गनेच्छां-इ.फ.ग.ह.ज. ५.त्वय्येव सरागेण सकामेन सस्नेहेन वा सानुरागम्-अ.ब. ६.सिद्धरागयुक्तम्-ब.सिन्दूरादिरागसंयुक्तम्-इ.ग.दिन्दुररागयुक्तम्-फ.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।२।। पीनेति। हे राधे! काचिद्गोपवधूः गोपाङ्गना पीनपयोधर[८]भारभरेण विपुलकुचगौरवातिशयेन सरागं[९]सानुरागं यथा स्यात्तथा[१०] हरिं परिरभ्य आलिङ्ग्य उदञ्चितपञ्चमरागमत्युच्चीकृतपञ्चमरागस्य पश्चाद्गायति गानं करोति ; कृष्णगानानन्तरं स्वयं गायतीत्यर्थः।।२।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।२।। पीनपयोधरेति। काचित् गोपवधूः वधूनिकरस्था पीनयोः स्थूलयोः पयोधरयोःभारभरेण सरागं प्रीतियुक्तं हरिं रागं कलयन्तं परिरभ्य आलिङ्ग्य उदञ्चितः प्रकटितः पञ्चमरागः पञ्चमस्वरो यस्मिन् तथा अनुगायति।।२।।

१.नास्ति-अ.ब.इ.फ.ह.ज. २.तालालापभेदेनात्यूर्ध्वं-ग. ३.अत्यूर्ध्वं नीतः-इ.फ.ग.ह.ज. ४.यद्वा-ग. ५.परीक्षार्थो यदि वाह्लादनाय चेति-अ.परीक्षार्थाय न चाह्लादजननाय वेति-

इ.६.तवाह्लादजननाय-फ.ग.ह.तदाह्लादजननाय-ज.७.धैवतं हेषते वाजी निषादं बृंहते गजः **इत्यमरः** नाट्य वर्गः-अधिक पाठः (१८३) अजाविकं तु गांधारं क्रौञ्चः क्वणति मध्यमम्। ८.भारेण-ल.म.८.नास्ति-ड.९.नास्ति-ड.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२।।इतो गोपीनां सौन्दर्यमविदग्धत्वं च प्रतिपादयन्नाह; **पीनपयोधरेत्यादि**। कापि गोपवधूः पीनौ बृहन्तौ यौ पयोधरौ स्तनौ तयोर्भारभरेण गौरवातिशयेन हरिं परिरभ्य। **उदञ्चितपञ्चमरागमिति**। उदञ्चितः ऊर्ध्वं गमितः उच्चस्वरेणोच्चारितः पञ्चमाख्यो रागो यत्र। यद्वा उदञ्चितः पञ्चमो नाम स्वरो यत्र। ईदृशो रागः यस्मिन् गाने एवं यथा स्यादेवम्। **अनुगायतीति**। कृष्णगानस्य पश्चात् गायतीत्यर्थः। ''रागोऽनुरक्तौ मात्सर्ये क्लेशादौ लोहितादिषु। गान्धारादौ'' इति **विश्वः**। ''पञ्चमो रागभेदे स्यात्स्वरभेदे च पञ्चमी। पाण्डवानां च पत्न्यां स्त्री पञ्चानां पूरणे त्रिषु।।'' इति। पुष्पसाधारणे काले कोकिलो रौति पञ्चममिति कोकिलस्वरवत् पञ्चमस्वरः। रागशब्दोऽत्र तानवगान्धारादौ वर्तते। यद्वा पीनपयोधरभारभरेण परिरभ्य हरिमनुलक्षीकृत्य हरिणा सार्धं वा गायति। ''अनुर्लक्षणे हीने सहार्थे च कर्मप्रवचनीयः।'' ''अनु हीने साहार्थे च पश्चात्सादृश्ययोरपि'' इति **विश्वः**। हरिः किंविधम्? सरागमिति। गानपरम्। किं वा पीनपयोधरभारभरेण सरागं सानुरागं परिरम्भणं सतृष्णमित्यर्थः। तदा काचित् हरिं परिरभ्य अनुगायतीत्यन्वयः। सरागमिति परिरम्भणक्रियाविशेषणं वा। अत्र पीनपयोधरपदोपन्यासाद् गोप्याः सौन्दर्यं प्राक् स्वयमालिङ्गनादवैदग्ध्यम्। अत्र प्रगल्भा वर्णिता। तल्लक्षणं **शृङ्गारतिलके**; ''लब्धायतिः प्रगल्भा स्यात्समस्तरतिकोविदा। आक्रम्य नायकं गाढं विराजविभ्रमा यथा।।'' इति। ''वभ्रो(ड्रो) रुविपुलं पीन पिव्नी तु स्थूलपीवराद्'' **इत्यमरः**।।२।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।२।।कापि गोपवधुर्निविड़स्तनभारातिशयेन सरागं यथास्यात्तथा हरिं परिरभ्य उन्नीतः पञ्चमस्वरोयत्र तं रागमनुगायति ।तदनुरागेण सह वर्त्तमानं हरिमिति वा ।।२।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२।।अथ वधूनिकरस्य मौग्ध्येन केलिपरत्वं दर्शयन्त्याह, पीनेत्यादिना। काचित् कुचसौभाग्यगर्विता गोपवधूः उदञ्चितपञ्चमरागत्वद्विरहोत्कण्ठाऽपनोदाय त्वद्गुण-नामाद्यङ्कितपदगानाय उपक्रान्तपञ्चमाख्यरागविशेषं हरिं स्वमनोहरणव्यापारं मन्यमाना स्वालिङ्गनं पारितोषिकं विभाव्य पीनपयोधरभारभरेण पृथुलकुचगौरवातिशयेन सरागं साभिलाषं यथा स्यात्तथा परिरभ्य समालिङ्ग्य अनुगायति ।त्वद्गानमनुकरोति। न

चेदं तं प्रति किञ्चित् प्रतिपद्यत इति भावः। अनेनास्याः मौग्ध्यमेव व्यक्तं, न च वैदग्ध्यम्। पश्येति शेषः ।।२।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। पीनपयोधरेति; अथ परस्परं गोपिकानां केलि चेष्टितममाह । काचित् गोपवधूः हरिं गायन्तमनुगायति। वंशकृत्येन गायति। किं कृत्वा ? सरागं साभिलाषं, तमेव हरिं परिरभ्य किम्भूतं परिरभ्य हरिमिति जाते प्रश्ने सरागं रामेण सह तदालिङ्गन-साभिलाषम्। पुनः किभूतम् ? उदञ्चित ऊर्ध्वमञ्चितः। आतालावध्यूर्ध्वं नीतः पञ्चमरागो येन वा। उदञ्चितः पञ्चम रागोऽनुरागो येन; अथवा उदञ्चित पञ्चमरागं यथा स्यात् तथेति गानक्रियाविशेषेषणम्। पीनपयोधरेत्यादिना गोप्यरनुगायनं कुर्वन्ति। अत्र अनुगायनमपि अवैदग्ध्यं तु श्रीकृष्णस्य। परिरम्भोद्यमं विनैव स्वयं प्रथमं परिरम्भणम्। अन्योन्यकृते हि परिरम्भे शृङ्गाररसः पुष्टो भवति। **दशरूपकेऽपि** तदर्थं स्पष्टीभवति। रम्यदेशकालावशभोगादिसेवनैः। प्रमोदात्मा रतिः सैव यूनोरन्योन्य शक्तयोः। प्रकृष्टमाणः शृङ्गारो मधुराङ्गाविचेष्टितैः।४/४८। इति। शृङ्गारे पञ्चमस्वरे बाहुल्येन भवति स एवात्र कथितः। यदाह **आचार्यभरतः**, पञ्चम मध्यभूयिष्ठं हास्यशृङ्गार-योर्भवेत्।। इति।।२।।

**३-कापि विलासविलोलविलोचनखेलनजनितमनोजम्।**
**ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम्।। हरिरिह० ।।३।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३।। कापि मुग्धवधू मधुसूदनवदनसरोजमधिकं यथा स्यात्तथा ध्यायति। कीदृशं, बिलासविलोलविलोचन खेलनजनितमनोजम्। बिलासेन विलोलयोर्विलोचनयोः खेलनेन कटाक्षेण जनित उत्पादितः मनुजो येनेति विग्रहः। अत्र मुग्धशब्दोपादानात् गोप्यः सौन्दर्य्यं अवैदग्ध्यं तु तत्कालदर्शनयोग्ये मधुसूदनवदने ध्यानात्।।३।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।३।। कापि विलासेति। कपि मुग्धवधूरधिकं सातिशयं यथा स्यात्तथा मधुसूदनवदनसरोजं ध्यायति। अधिकं सुखमधिककृत्य वा। किं भूतम्? विलासेनचेष्टाविशेषेण विलोले चञ्चले ये विलोचने तयोः खेलनेनार्वतनेन जनित उत्पादितो मनोजो येन । अत्र सरोजे योजितो मधुसुदनशब्द औचितीमावहति। "सूद स्रुतिहत्योः" इति मुखसरोजान्मधुस्र-वतीत्यतिशयाधानम्।।३।।

## (३) जगद्धरकृत-सारदीपिका

।।३ ।। कापीति काचिन्मुग्धवधूर्मनोहर गोपाङ्गना अधिकातिशयेन मधुसूदनवदनसरोज कृष्णस्य मुखाम्बुजं ध्यायति चिन्तयति विलासेन विलोलयोर्विलोचनेन खेलनेन संचारेण जनित उत्पादितो मनोज: कामी येन तत्।।३ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

कापीति। कापिमुग्धवधु: मधुसुदनवदनसरोजं मुखपद्ममधिकं यथा स्यात्तथा ध्यायति चिन्तयति। कीदृशम्। विलाशेन विललयोश्चञ्चलयोर्विलोचनयोर्नेत्रयो: खेलनं च जनित उत्पादितो मनोज: कामो येन अर्थात्तस्यामेव तादृशम्। अत्र प्रत्यक्षस्यापि मधुसूदनस्य ध्यानादवैदग्ध्यं तस्या अवगम्यते।।३ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।३ ।। कापीति। यस्मिन् मुग्धवधूनिकरे कापि काचिन्मुग्धवधू: अतिसुन्दरगोपकामिनी विलासेन विभ्रमेण बिलोले चञ्चले ये विलोचने तयो: खेलनं विहरणं तेन जनित: उत्पादित: मनोज: कामो येन तत्तादृशम्। अत्यन्तमन्मथोद्दीपकमित्यर्थ:। मधुसूदनस्य श्रीकृष्णस्य वदनसरोजं मुखकमलम्। अधिकमत्यन्तं ध्यायति। मधुसूदनवदनसौन्दर्य्यं बहिरिव लोकान्तरमपि तथा भाजयतीत्यर्थ:। तस्मिन् वधूनिकरे हरिर्विहरतीत्यन्वय:। एतेन भगवति श्रीकृष्णेऽस्या: अत्यन्तानुरक्ति: सूचिता ।।३ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।३ ।। पुन: क्रीडापरत्वमेव दर्शयति। कापि भावजनिताश्रुभरेण दर्शनमलभमाना मुग्धवधू: मनोहरवधूरधिकमत्यर्थं यथा स्यादेवं मधूसूदनस्य वदनसरोजं श्रीकृष्णाननपद्मं ध्यायति चिन्तयति। कीदृशम्? विलासे विलोलविलोचनस्य खेलनेन तादृक्कटाक्षादिना जनित उत्पादितो मनोज: कामो येन तत्तथा।।३ ।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।३ ।। कस्याश्चिदवैदग्धमाह; काऽपीत्यादिना। काऽपि मुग्धवधू: [१]मधुसूदनस्य वदनसरोजं मुखपङ्कजं ध्यायति। समक्षस्य श्रीकृष्णस्य ध्यानादवैदग्धमेव विज्ञायतेऽ[२]स्या:। कीदृशम्? विलासेन विशेषनर्तनेन विलोलयो[३]श्चञ्चलयो-र्विलोचनयोर्यत् खेलनं तेन जनित: उत्पादितो मनोज: कामो येन तम्। पुन: कीदृशं मुखम्? अधिकं[४]अनुपमं, माधुर्यविलाससारसन्दोहमित्यर्थ:। क्रियापद-विशेषणं वा[५]सौगन्ध्यादिगुणमधुररसेन [६] कामोद्बोधकत्वात्ताप [७] हारकत्वाच्च वदनस्य

सरोजोपमा। मधुसूदनपदं पूर्ववत्। काऽपीति सामान्यकथनाय। ध्यायतीत्यङ्गसङ्गभावो दर्शितः। मातश्चास्मिन्नवसरे त्वया गन्तव्यमिति। [8]क्रियाकौशलेनायं[9]वञ्चनीय इति भावः।।३।।

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।३।। (काऽपीति)[10]हे राधे! काचिन्मुग्धवधूर्मनोहरगोपाङ्गनाऽधिकमतिशयेन मधुसूदनवदनसरोजं कृष्णमुखाम्बुजं ध्यायति चिन्तयति। विलासेन विलोलयोश्चञ्चलयोर्विलोचनयोःखेलनेन(२४)[11]सञ्चारणेन जनित[12] उत्पादितो मनोजः कामो येन।।३।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।३।। काऽपीति। काऽपि मुग्धवधूः अन्या विलासैः विलोले चञ्चले विलोचने नयने तयोः खेलनेन कटाक्षावलोकनरूपेण जनितः उद्दीपितः मनोजः कामो येन तम्। मुग्धवधूः अन्या मधुसूदनस्य कृष्णस्य वदनमेव सरोजञ्च अधिकं ध्यायति। पूर्वदलं वदनविशेषणत्वे उद्दीपितमदनत्वम्।।३।।

१.मधुसूदनवदनसरोजं-ग.२.तस्याः-ग.नास्ति-ज.३.चञ्चलयोर्यत् खेलनं-ग.विलोचनयोर्यत् खेलनं-ज.४.अनुपममाधुर्य-इ.फ.ग.ह.ज.५.सौगन्ध्यादिगुणादिगुणमधुर-फ.६.कामाद्बोधकत्वाच्च वदनस्य-ज.७.हरणाच्च-ग.८.कलाकौशलेनायं-इ.फ.ग.ह.९.नास्ति-ज.१०.हे राधे नास्ति-ड.ल.म.११.प्रसारणात्-ल.म.१२.नास्ति-ड.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।३।। कापीत्यादि। कापि मुग्धवधूः मुग्धा नायिका मधुसूदनवदनसरोजम् अधिकं यथा स्यादेवं ध्यायति परिभावयति। ध्यानाधिक्ये हेतुप्रतिपादनाय वदनसरोजं विशिनष्टि। कीदृशम्? विलासेत्यादि। कृष्णसमीपं व्रजन्तीनां व्रजस्त्रीणां पादस्खलनादिलक्षणो विलासः प्रागुक्त एव। तत्र विलासविषये विलासैर्वा विलोलयोः विशेषेण सतृष्णयोर्विलोचनयोः खेलनेन व्यापारकरणेन जनित उत्पादितो मनोजो येनेति विग्रहः। ''लोलश्चलसतृष्णयोः'' **इत्यमरः**। अत्र मुग्धा वर्णिता। तल्लक्षणमुक्तं **शृङ्गारसर्वस्वे**, ''रामणीयकमालोक्य प्रियाङ्गेऽनङ्गपीडिता। लज्जया दृष्टिमाकुञ्च्य मुग्धा ध्यायति केवलम्।।'' इति। अत्र मुग्धशब्दोपादानात् गोप्यः सौन्दर्यम् अवैदग्ध्यं तु तत्कालदर्शनयोग्ये मधुसूदनवदने ध्यानात्। ''मुग्धः सुन्दरमूढयोः'' इति **कोषः**।।३।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।३।। कापि मुग्धवधूः मधुसूदनवदनसरोजं अधिकं यथा स्यात् तथा ध्यायति। भ्रमरवद् रसविशेषान्वेषणपर इति श्लिष्टमधुसूदनपदोपन्यासः। कीदृशं? विलासेन

चञ्चलयोः विलोचनयोः खेलनेन जनितस्तासां मनोजो येन तं तद्विलासस्फूर्त्त्युल्लसित-मित्यर्थः।।३।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।३।।अन्यस्या मौग्ध्यमाह, कापीति ।काऽपि मुग्धवधूः विलासेन विलोलयोश्चञ्चलयो-र्विलोचनयोः खेलनानि विकसितमुकुलितापाङ्गितकूणितावर्त्तनानि तैर्जनित उत्पादितो मनोजः कामविकारो येन तादृशं मधुसूदनस्य वदनसरोजं मुखकमलम् अधिकं चिरमतिशयं वा यथा स्यात्तथा ध्यायति, तादृशं माधुर्यसारं पुरः पश्यन्त्यपि प्रतिक्षणनिरीक्षणविलासादिकमकुर्वाणा नेत्रे निमील्य ध्यायन्ती स्थिता। इदमेवास्य मुग्धत्वमिति भावः। यद्वा काऽपि चतुरमन्या मुग्धवधूस्तस्याः स्वयमालिङ्गनरूपचापलं विफलं विलोक्य लोचनसौन्दर्यगर्विता विलासविलोलविलोचनखेलनजनितमनोजं यथा स्यात्तथा 'हरिमुखकमलं विलोक्य' इत्यध्याहर्त्तव्यम्। ध्यायति तादृशप्रयत्नेनाऽपि किमपि फलमलभमाना लज्जया ध्यानमुद्रया तिष्ठतीति भावः।।३।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।।कापि विलासविलोचनेति; कापि नायिका विलासेनाधिकं हरिं विलोक्य मुग्धतया अधिकं सुखमुपभोगार्थमिति प्रत्यक्षेण ध्यायते तस्य श्रीकृष्णस्य मुखम्। तेन जनितकन्दर्पेच्छा तमवलोकयितुं भूयः प्रेरयति। मुखसरोजात् मधुस्रवतीतिवदधिकं ध्यायति। अत्र प्रत्यक्षस्यापि मधुसूदनस्य ध्यानादवैदेग्ध्यं श्रीराधायाःखलु अनुभूयते अत्र मौग्ध्येन कृष्णप्रीया सा नायिका प्रत्यक्षेऽपि ध्यायति अपरञ्च अनुन्मीलितनयनेनाऽपि ध्यानं कर्त्तुं शक्यत इति कवेरभिप्रायः स्यात्।।।३।।

**४-कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले।**
**चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले।। हरिरिह० ।।४।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४।। कापि नितम्बवती प्रशस्तनितम्बा श्रुतिमूले किमपि लपितुं मिलिता सती कपोले चारु यथा स्यादेवं दयितं कृष्णं चुचुम्बेति वाक्यार्थः। कीदृशे कपोलतले पुलकैरनुकूले, सात्विकभावाद्रोमाञ्चित इत्यर्थः। अत्र नितम्बवतीपदोपन्यासात् गोप्यः सौन्दर्य्यं प्राक् स्वचुम्बनादवैदग्ध्यम्। ''पश्चान्नितम्बः स्त्रीकट्याः क्लीवे तु जघनं पुरः'' **इत्यमरः**।।४।।

## (२) राणाकुंभकृत-रसिकप्रिया

।।४।। कापि कपोलतले इति। कापि नितम्बवती दयितं श्रीकृष्णं कपोलतले गण्डप्रदेशे चारूमनोहरं यथा स्यात्तथा चुचुम्ब। किंभूता ? सखीषु चातुर्यात्किमपि कार्यान्तर लपितुं श्रुतिमूले लग्ना। किभूते श्रुतिमूले ? अनुकूलेऽभिमुखमानिते। किंभूते कपोलतले ? रोमाञ्चोपलक्षीते। हरेः सात्त्विकभावेन रोमाञ्चोद्गमः। अत्रानुगन्तुमशक्ता कार्यान्तर-कथनव्याजेन हरिं स्थापयतीति नितम्बवतित्युचितम्। सखीषु दयितचुम्बनं लज्जाकरमिति कार्यान्तरव्याजौचिती। अत्र प्रौढा नायिका। अनुकूलो नायकः।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। कापि कपोलेति कापि नितम्बवती गोपाङ्गना दयितं कृष्णं कपोलतले गण्डदेशे चारु मनोज्ञं यथा स्यात्तथा चुचुम्ब चुम्बितवती कथम्भूता किमपि कार्यं लपितुं बक्तुं श्रुतिमूले कर्णप्रदेशे मिलिता संलग्ना कीदृशे कपोलतले पुलकैः रोमोद्गमैः अनुकूले प्रेमप्रियकथने।।४।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४।। कापीति। कापि नितम्बवती गोपी दयीतं कृष्णं कपोलतले चारू मनोहरं यथा तथा चुचुम्ब चुम्बनं कृतवती। कीदृशी ? किमापि कार्यं लपितुं मन्त्रयितुं श्रुतिमूले मिलिता संलग्ना। कीदृशे। पुलकै रोमाञ्चैरनुकूले प्रियविलाससूचके। औत्सुक्येन सहसा कान्तमुखचुम्बनञ्च सखीजनहास्यकरं भवतीति व्याजेन तया तदारब्धमिति भावः। अत्र प्रथमतश्च मुखस्पर्शनेन कृष्णकपोले रोमाञ्चमुत्पाद्य चुम्बन तस्या अत्राधीरत्वं ध्वनितम्।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। कापि कपोलेति। यस्मिन् बधूनिकरे कापि काचिन्नितम्बवती गोपाङ्गना श्रुतिमूले कृष्णस्य कर्ण्णमूले किमप्यनिर्वाच्यमालपितुं व्यग्रं वक्तुं पुलकै रोमोद्गमैः अनुकूले चुम्बनयोग्ये अन्तरनुरक्ति सूचकत्वात् पुलकानां चुम्बनानुकूल्यमिति भावः। अत्र पुलकानां चुम्बनात्पूर्वमेव कपोले आविर्भावप्रतिपादनात्तस्यामत्यासक्तिः सूचिता, कपोलतले कृष्णस्य गण्डप्रदेशे मिलिता घटमाना आशक्ता सतीत्यर्थः। चारु सुखोदयं यथा तथा दयितं कृष्णं चुचुम्ब चुम्बनं कृतवती। रहस्यकथनव्याजेन कृष्णस्य कपोलचुम्बनं चकारेत्यर्थः। कपोलस्य चुम्बनस्थानत्वंमुक्तं **रतिरहस्ये,**

नयनयुगकपोलं दन्तवासो मुखान्तः
स्तनयुगलललाटं चुम्बनस्थानमाहुः।

तदनु जघन नाभीमूलकमाशु चुम्बेत्

व्यतिकरमुखमुच्चैर्देशसाम्येन लाटे:।।इति।। तस्मिन् वधूनिकरे हरिर्विहरतीत्यन्वयः।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। पुनस्तदेव दर्शयति। कापि सखी जनहास्यभीतापि संश्लेषमिच्छती नितम्बवती किमपि यदेव तदेव लपितुं श्रुतिमूले कर्णमूले मिलिता सङ्गता पुलकैः रोमाञ्चैरनुकूले सङ्गमजसात्त्विकभावभाजि कपोलतले दयितं चारु शोभनं यथा स्यादेवं चुचुम्ब। 'स्वरूपाधरयोस्तुल्यमिति **विश्वः**। तथा च सव्याजं मिलिता मिलनजातभावभाजि कपोले चुचुम्बेति वाक्यार्थः।।४।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।४।। [१]काऽपि नितम्बवती गोपवधूः दयितं कृष्णं चारु मनोहरं[२]यथा स्यात्तथा कपोलतले [३]चुचुम्ब चुम्बनं कृतवती। कीदृशी? किमपि लपितुं मन्त्रयितुं प्रलपितुं वा कन्दर्पवशादधैर्येण स्वचातुर्यरक्षणाय श्रुतिमूले कर्णमूले मिलिता संलग्ना व्याजेनालिङ्गनाय वा [४] नामामृतं तत्कर्णमूले [५] क्षेप्तुं वा। अत एवोक्तं किमप्यनिर्वचनीय-मिति। [६]नितम्बवतीत्यनेना[७]लिङ्गनचतुरतोक्ता। कीदृशे? पुलकै रोमाञ्चैरनुकूले। [८]नायकाभिलाषसूचक [९] पुलकोद्गमस्तन्नामश्रवणसात्त्विकोदयात्। [१०] चुम्बनेनेत्यनेन [११] तस्या [१२] अधीरत्वमुपपादितम् औत्कण्ठ्येन सहसा कान्तमुखचुम्बनं सखीजनहास्यकरं भवतीति भावः। यदा त्वत्कथा-[१३]श्रवणेन जातपुलको भवति तदा त्वय्येव [१४]स्नेहप्राचुर्यम्। तस्मात्त्वया शीघ्रं तत्र गन्तव्यमिति।।४।।

## (७)नारायण पण्डित-पदद्योतनिका

।।४।। काऽपीति। काऽपि नितम्बवती गोपाङ्गना दयितं कृष्णं कपोलतले गण्डप्रदेशे चारु [१५]मनोहरं यथा स्यात्तथा चुचुम्ब चुम्बितवती।[१६] कथम्भूता? किमपि कार्यं लपितुं वक्तुं श्रुतिमूले कर्णप्रदेशे मिलिता सलंग्ना। [१७]कथम्भूते कपोलतले? पुलकैः रोमोद्गमैरनुकूले [१८]प्रियकथने ।।४।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।४।। काऽपीति। काऽपि नितम्बिनी वल्लवी किमपि रहस्यं श्रुतिमूले कर्णान्ते लपितुं वक्तुं मिलिता संश्लिष्टा सती दयितं प्रियं कृष्णं पुलकै रोमाञ्चैः उपलक्षिते अनूकुले सन्निहिते; स्वाङ्गस्पर्शने सात्त्विकोद्रेकाद्रोमाञ्चिते इत्यर्थः। कपोले गण्डप्रदेशे चारु यथा तथा चुचुम्ब। आश्लेषचुम्बनरूपबाह्यसम्भोगशृङ्गाररसो दयिताकृतः।।४।।

१.तः २.पर्यन्तं नास्ति-ज. ३.नास्ति-इ.फ.ग.ह.ज. ४.त्वन्नामामृतं-ग. ५.प्रक्षेप्तुं-ब.इ.फ.ग.ह.ज. ६.नितम्बवत्यनेन-अ.ब.इ.ह.ज. ७.आलिङ्गनाचतुरतोक्ता-इ.ह. ८.नायिका-ब.नायिकाभिलाष-सूचके-इ.फ.ह.ज.नायकाभिलाषसूचके-ग. ९.पुलकोद्गमस्तुत्वन्नामश्रवणसात्त्विको दयात्-ह.ज. १०.चुम्बनेनेत्यस्याः-ह.ज. ११.तस्याः-ब. १२.अधीरत्वं सम्पादितम्-इ.फ.ग.ह.ज. १३.श्रवणे सात्विको(दये)न-फ. १४.स्नेहचातुर्ये-ब.स्नेहवातुर्यम्-अ. १५.मनोज्ञं-क.ल.म. १६.नास्ति-क. १७. कीदृशे कपोलतले-क. कीदृशे कर्णमरुतले-ल. १८प्रियप्रेमकथके इति यावत्-क. प्रेमप्रियकथके-ल.म.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।४।। कापीत्यादि। कापि नितम्बवती प्रशस्तनितम्बा, प्रशंसायां मतुप्, श्रुतिमूले कर्णान्ते किमपि लपितुं मिलिता सती दयितं कपोलतले कपोले चारु यथा स्यादेवं चुचुम्बेति वाक्यार्थः। अत्र तलशब्दः स्वरूपार्थः। स्वरूपानुद्वयोस्तलमिति। ''मूलं शिफायां च नक्षत्रान्तिकयोरपि'' इत्**यजयः**। चारुत्वं नाम चुम्बनस्य सपत्नीभिर-लक्ष्यमाणत्वम्। कपोलतले किंविधे? पुलकैः इति। पुलकैर्लोमहर्षैरनुकूले अनुकूलतामुपगते अनुमतिसूचक इति यावत्। ''इत्थंभूतलक्षणे तृतीया'' वा। अत एव अनुकूले आनुकूल्यं हि रोमाञ्चे लक्षितसात्त्विकत्वात्। अत्र नितम्बवतीपदोपन्यासात् गोप्यः सौन्दर्यं प्राक् स्वयं चुम्बनादवैदग्ध्यम्। अत्र मध्या वर्णिता। तल्लक्षणम्, ''अभिप्रियतमं भीता सपत्नीभ्यो मनागिति, विहरेच्च विहारे च मध्या किञ्चित् प्रगल्भते। सा चेत् कलासु कुशला तदा वञ्चयति प्रियं, कैतवाचरितैस्तैस्तैरुपायैः प्रीतिकारकैः।।'' इति।।४।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।४।। कापि नितम्बवती किञ्चित् कथनव्याजेन श्रुतिमूले मिलिता सती कपोलतले दयितं चारु यथा स्यात्तथा चुचुम्ब। कीदृशे? प्रियाभिलाषसूचके।।४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४।। पुनरन्यस्यास्तदेवाह; कापीति। कापि नितम्बवती द्वयोस्तादृशप्रयत्नं विफलं पश्यन्ती उपायकुशलतामात्मनो मन्यमाना किमपि लपितुं रहस्यकथनमुद्रया श्रुतिमूले मिलिता। नितम्बशोभाऽऽविष्करणमन्थरगमनेन श्रीकृष्णस्य कर्णाभ्यर्णमुपागता सती पुलकैरनुकूले कपोलतले दयितं प्रियं चारु सुखोदयं सन्तोषसूचकं वा यथा स्यात्तथा चुचुम्ब चुम्बितवती। पुलकैरनुकूले इति उक्तिभङ्ग्या न तु चुम्बनेन पुलकिते इति काकसूचनात् यदि पुलका उद्गच्छेयुत्तर्हि स्यादेव चुम्बनसाफल्यं न च ते तथा। पुलकानां चुम्बनात् पूर्वमेव कपोले आविर्भाव आदित एव तया ज्ञातः। अतश्चुम्बन-

प्रख्यापनाय यथा तथा चकार तदपि विफलं जातम्। विशेषतः सखीनां हासकरं बभूवेति भावः।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। कापीति; कापि नायिका मधुसूदनवदनसरोजं मुखपद्मं चारु सुन्दरतया कपोलतले गण्डयुगले चुचुम्ब पुनः पुनः चुम्बनं कृतवती। कथं किमपि कर्णमूले लपितुं विश्वासजन्यां कामपि कथां वक्तुं व्याजेन चुम्बनं करोति भूयो भूयः। येन हरेः रोमाञ्चं भवति। सोऽपि तस्यैरभिमुखी भवति। सखिना दयितचुम्बनं लज्जाकरं भवतीति धिया कार्यान्तरेण चुम्बतीति प्रौढा नायिका अतः सा चतुरा। हरेस्तृतीयसात्त्विकभावोदयः नाम रोमाञ्चः सम्भवति। अनुकूलो नायकश्च।। ४।।

**५-केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले।**
**मञ्जुलवञ्जुलकुञ्जगतं विचकर्ष करेण दुकूले।।५।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५।। काचिद्गोपवधूः केलिकलाकुतुकेनामुं श्रीकृष्णं दुकूले वस्त्रे विचकर्षेति। सप्तम्यन्ता दुकूलस्य, केचिदमुं दुकूले वस्त्रयुग्मं च विचकर्षेति द्विकर्मतामाहुः। तत्रात्मन् एकं वस्त्रं परं कृष्णस्य इत्युभयोर्वस्त्रस्य ज्ञेयम्। कीदृशं यमुनाकूले मञ्जुलवञ्जुले कुञ्जगतं "मञ्जु कान्तं मनोज्ञंच मनोज्ञं मञ्जुमञ्जुलं" "शीतं वानीरवञ्जुलाः"। **इत्यमरः** छत्रिणो यान्तीति न्यायात्। गन्धगर्द्दभन्यायेन च गोप्याः मुग्धवध्वन्तर्गताः। प्राक् स्वयं वस्त्राकर्षणादवैदग्ध्यम्।।५।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५।। केलिकलेति। काचिद्विपी केलिकलाकुतुकेन क्रीडाविज्ञानकौतुकेनामुं कृष्णं करेण दुकूलो विचकर्ष। किंभूतम्? यमुनावनकूले मञ्जुलमनोहरवञ्जुलबकुलकुञ्जगतम्, वेतसकुञ्जगतं वा यमुनाया विपिनोपलक्षिततीर इत्यर्थः। अत्र चकारोऽनुक्तसमुच्चयार्थः। तेन परिहासाद्युच्चीयते। "यमनाजलतीर" इति पाठः। अत्र यमुनातीर इति वक्तव्ये "जल" ग्रहणं शैत्यपावनत्वसंनिकर्षादिद्योतनार्थम्।।५।।

## (३) जगद्धरकृत-सारदीपिका

।।५।। केलीति काचिद्गोपी केलिकलाकुतुकेन शृङ्गाररसक्रीडा तात्पर्येण हेतुना करेण हस्तेनामुं कृष्णदुकूले वस्त्रे विचकर्ष आकृष्टवती कथंभूतम् अमुं यमुनाजलकूले यमुनाजलोपलक्षिते कूलेति मञ्जुलो मनोहरो यो वञ्जुलके वितसलतागृहे तत्र गतं वर्तमानम्।।५।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५।। केलिकलति। काचिद्गोपी अमुं कृष्णं कोलकलाकुतुकेन दुकूले पट्टवस्त्रविषये विचकर्षकृष्टवती। दुकूलं गृहीत्वाऽमुं कृष्णं विचकर्षेति केचिद्योजयन्ति। किदृशम्? मञ्जुलो मनोहरो वञ्जुलो वेतसो यत्र तादृशो च: कुञ्जस्तत्र गतं प्रात्पम्। कुत्र विचकर्ष? यमुनाजलकूले यमुनाया जलयुक्ते रोधसि। वञ्जलकुञ्जस्थं कृष्णं यमुनाकूलं प्रति क्रिडार्थमसकृष्टचेत्यर्थ:। अत्र अन्यानुरक्तस्य कृष्णस्य नायिकाया वस्त्राकर्षणादधात्वं तस्या व्यङ्गम्। "कुतुकं तु कुतुहलम्" **इत्यमर**:। "मनोज्ञं मञ्जु मञ्जुलम्" इति च "वञ्जुलो वेतसे" इति **विश्वा**:। "दुकुलं क्षौमे सूक्ष्मांशुकेऽपि च" इति।।५।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५।। केलीति। किञ्च, यस्मिन् वधूनिकरे, काचिद्गोपिका केलिषु कामक्रीडासु या: कला: तदर्थम्। यत्कुतुकं तेन, अथवा केलिषु विषये या: कला: तेषु विषयेषु कुतुकेन कुतूहलेन हेतुना अमुं योषित्परिषद् परिदृश्यमानं श्रीकृष्णं यमुनावनकूले कालिन्दीतटे विपिनसमीपे, अथवा, यमुनाया वनं जलं "जीवनं भुवनं वनमि**त्यमर**:"। तस्य कूले तीरसमीपभूमौ अधिकरणसप्तमी। मञ्जुलो मनोहरो यो वञ्जुल: कुञ्ज: वानीरलतागृहं तस्मिन्, "निकुञ्ज कुञ्जौ वा क्लीवे लतादिपिहितोदर" **इत्यमर**:। गतं गमनं यस्मिन कर्मणि तद्यथा तथा करेण हस्तेन दुकूले क्षौमवसनं विचकर्ष आकृष्टवती, योषिन्मण्डलगतं श्रीकृष्णं वञ्जुललतामन्दिरे क्रीडार्थमागच्छेदित्याचकर्षेत्यर्थ:। कुञ्जगतमित्येतत्कृष्णविशेषणम्। तदा आकर्षणं यमुनाकूलं प्रत्यवगन्तव्यम्। पूर्वव्याख्याने कुञ्जं प्रतीति विवेक:। तस्मिन् वधूनिकरे हरिर्विलसतीत्यन्वय:।।५।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५।। पुनस्तदेव दर्शयति। काचिद्दुष्टा यमुनाजलकूले यमुनाजलसमीपे केलिकला-कुतुकेन क्रीडाकलाकौतूकेन मञ्जुलो मनोहरो वञ्जुलो यत्र तत्र गतम्। अनेन देशस्य क्रीडायोग्यत्वमादर्शितम्। अमुं श्रीकृष्णं दुकूले पट्टवस्त्रे करेण विचकर्ष आकृष्टवती। क्वचिद् यमुनावनकूल इति पाठ:। तत्र कालिन्द्युप-लक्षितविपिनसमीप इत्यर्थ:। 'वञ्जुलो वकुले ख्यातो वञ्जुलो वेतसे मत' इति **धरणि**:। 'दुकूलं पट्टवाससी'त्यपि। वनं काननतोययोरि'त्यपि धरणिरेव।।५।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।५।। लीलान्तरमाहकेलिकलेत्यादिना। काचिद्व्रजाङ्गना अमुं श्रीकृष्णचन्द्रं केलिकलाकुतुकेन क्रीडाविलासोत्पादकव्याजेन दुकूले पट्टवस्त्रे विषये करेण हस्तेन

विचकर्ष आकृष्टवती। दुकूले गृहीत्वा [२] अमुं विचकर्षेति केचित् ब्रुवन्ति। कीदृशम्? [३] मञ्जुलवञ्जुलकुञ्जगतं मनोज्ञवेतसमन्दिरगतं तव ध्यानाय[४]तद्वञ्चनाय वा रहः-स्थिति(त)मिति सूचितम्। कुत्राकृष्टवती? [५] यमुनाकूले; यमुनाजले केलिविधानाय कृष्टवतीति ध्वनितम्। [६] अन्याशक्तस्य [७] श्रीकृष्णस्य [८] स्वप्रियाध्यानाशक्तस्य वा वस्त्राकर्षणादस्या अधीरत्वं मुग्धत्वं च [९] स्फुटमेव। अतः [१०] तवाधरामृतपानेन त्वया सञ्जीवनीय इति मम प्रार्थना।[११]''वञ्जुलो वेतसाशोक'' इति **विश्वः** (१०५.८५) ''मनोज्ञं [१२] मञ्जु मञ्जुलम्'' **इत्यमरः** (३.१.५२)। ''कुतुकं च कुतूहलम्'' इत्यपि (अमरः १.७.३१)। ''दुकूलं पट्टवस्त्रं स्यादतिसूक्ष्मांशुकेऽपि च'' इति **विश्वः** (१०५.११५)। पर्यायोक्तिरलङ्कारः, रसवदलङ्कारश्च।।५।।

१.एतद्व्याख्यानुसारी पाठः ''चारुतरा'' मिति। २.अमुं विचकर्षेति केचित् चकर्षेति केचित् ब्रुवन्ति-इ. ३.नास्ति-अ.ब.इ.फ.ग.ह.ज. ४.नास्ति-ग. ५.यमुनाजलकूले-इ.फ.ग.ह.ज. ६.अन्यत्रा-शक्तस्य-इ.फ.ग.ह.ज. ७.श्रीकृष्णचन्द्रस्य-इ.फ.ग.ह.ज. ८.स्वप्रियानासक्तस्य वा-ह. ९.स्फुरते-अ. १०.तवाधरपानेन-अ. ११.वञ्जुलो वेतसे मत इति विश्वः-इ.फ.ग.ह.ज. १२.मञ्जुलम्-इ.फ.ग.ह.ज.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।५।। केलीति। [२,३] काचिद्गोपी केलिकलाकुतुकेन हेतुना शृङ्गाररसक्रीडातात्पर्येण हेतुना करेण [४] हस्तेनामुं कृष्णं दुकूले पट्टवस्त्रे विचकर्ष आकृष्टवती। [५]कीदृशममुम्? यमुनाजलकूले यमुनाजलोपलक्षिते [६] कूले तीरे मञ्जुलो मनोहरो यो वञ्जुलकुञ्जो वेत्रलतागृहं तत्र गतं वर्त्तमानम्।।५।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।५।। [७]केलिकलेति। काचित् यमुनाजलस्य कूले तटे; जलग्रहणेन अन्तर्वालुको-पलक्षिते सन्निहित इत्यर्थः। केलिषु कलाः चातुर्यविशेषाः तासां कुतुकेन कुतूहलेन मञ्जुले रमणीये वञ्जुलकुञ्जे वेतससमुदाये गतं स्थितं अमुं कृष्णं दुकूले करेण विचकर्ष! दुकूलग्रहणेन परिधानमोचनपरिहासो व्यज्यते।।५।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५।। केलीत्यादि। काचिद् गोपवधूः अमुं श्रीकृष्णं दुकूले विचकर्षेति सप्तम्यन्तता। दुकूलस्य यथा कृष्णा केशेषु कृष्णेति (कृष्टेति) केचिदमुं दुकूले वस्त्रयुगं विचकर्षेति, कर्षते द्विकर्मकतामाहुः। तत् एकं वस्त्रं परिधेयम् एकमुत्तरीयम् [कृष्ण इत्युभयकेयम्]। केन हेतुनेत्याहकेलीत्यादि। केलिकला सम्भोगा कलना तत् यत्र कुतुकं तेन। किं वा केलिः क्रीडा कलाशिल्पं केलिप्रयोजना कला केलिकला तत्र कुतुकेनेति। कुतुकेनेति

भिन्नं वा पदम्। तत्र केलिप्रधाना कला यस्या इति गोपवधूविशेषणम्। ''कला स्यान्मुलझे वृक्षे शिल्पादिविंशमात्रके। षोडशीं शेच्च(षोडशांशे च) चन्द्रस्य कलना कालयो: कला।।'' इति **विश्व**:। कृष्ण: किंविधम्? मञ्जुलमिति। मञ्जुलं यद्वञ्जुलकुञ्ज-वानीरलतागृहं तद्गीतमिति द्वितीयाश्रितेत्यादिना समास:। ''वकुले वेतसाशोकतिलिषेषु (तिलकेषु) च वञ्जुल:'' इति **विश्व**:। अनेन विजनत्वं वस्त्राकर्षणस्य हेतु: सूच्यते। कुतो विचकर्षेत्याशङ्क्याह, यमुनावनकूलेति । यमुनाया अरण्योपलक्षिते तीरे। अनेन तीरस्य उद्दीपनविभावता सूचिता। तथा च, ''वापी वनगृहोद्यानमाल्यस्रक् चन्दनादय:। सम्भोगस्य विभावा: स्युर्येचान्ये ललितात्मिका:।।'' इति। अत्र वकुलादिवाची वञ्जुलो न गृह्यते। कच्छतूमौ (कच्छभूमौ) तदवस्थितेरनौचित्यात् वानीरवाची तु साधीयान् भवति। तथा च रघौ, ''स्मरामि वानीरगृहेषु सुप्तम्'' इति। अत्र 'छत्रिणो यान्तीति' न्यायाद्; 'गन्धगर्धभ' न्यायेन गोप्या मुग्धवध्वन्तर्गणना प्राक् स्वयं वस्त्राकर्षणा-दवैदग्ध्या।।५।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।५।। काचिद्गोपाङ्गना केलिकलाकुतुकेन अमुं श्रीकृष्णं पीताम्वरे करेणाकृष्टवती। कीदृशं? यमुनाया: तटे वेतसीकुञ्जे गतम्।।५।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५।। तासां तादृशक्रीडाविनोदव्यापारैरुद्वेजितं तं मत्वा अन्यस्या व्यापारान्तरमाह, केलिकलेति द्वाभ्याम्। तत्र केलीति। राधया सह वसन्तविनोदमनुभवामीति सम्भृतोपकरणतया निर्गतस्य मम दुर्दैवेन तादृशमनोरथो विघटित:। सम्प्रत्यमूभि: सह ईदृशे भावविनोदे तया दृष्टे श्रुते वा सति किं नाम सम्प्रतिपत्स्यते। न जाने किं करोमि, कथमात्मानमितो मोचयामीति चिन्ताऽऽकुलतया यमुनावनकूले यमुनातट सम्बन्धिवनसमीपे किम्बा यमुनाजलसमीपे मञ्जुलवञ्जुलकुञ्जगतमतिशीतल-मनोहरवानीरकुञ्जस्थितममुं श्रीकृष्णं ज्ञात्वा काचित् नृत्यकोविदा राधासपक्षा युवतिरित्युत्तरेणान्वय:। चकारोऽत्र भिन्नोपक्रमे। केलिकलाकुतुकेन त्वया सह नृत्यं करोमीति नर्त्तनकौशलकुतुकेन करेण दुकूले उत्तरीयाञ्चले विशेषेण चकर्ष। हठादाकृष्टवती। 'दुकूले' इति गृहीत इव केशेष्वितिवत् बोद्धव्यम्।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। केलिकलाकुतुकेनेति; कापि गोपी क्रीडाकौतुकेन काचित् गोपी खेलजनितलौल्येन स्वस्या:करेण दुकुलेन च यमुनाजलकूले श्रीकृष्णं आकृष्य कुञ्जं

प्रति नेतुकामास्ति। परिहासक्रीडायामुचितमेव। तेन अन्याभ्यः पृथक् करोति कुञ्जमाकृष्य स्वस्यैकान्तता श्रीकृष्णे इच्छतीति ध्वनिः ।।५ ।।

**६-करतलतालतरलवलयावलिकलितकलस्वनवंशे।**
**रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे।। हरिरिह० ।।६ ।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।६ ।। रासरसे गोपक्रीडारसे सह नृत्यपरा युगपत् नृत्यन्ती कापि युवतिः हरिणा कृष्णेन प्रशशंसे प्रशंसितेति वाक्यार्थः। तेन तरलया बलयावल्या कङ्कणश्रेण्या कलितः सम्भक्तः कलस्वनवंशः यत्रेति विग्रहः ।।

शीतकालक्रियामाने तालः खड्गादि मुष्टिषु।
द्रुमभेदे करास्फाले तालं तु हरितालके। ।इति **विश्वः** ।।

अत्रापि छत्रिणो गच्छन्तीति न्यायात्। गोप्यो मुग्धवध्वन्तर्गताः तत्तालयोग्यस्य हावादेरकरणात् रतिविधावकौशल्यादव दग्ध्यम्।।६ ।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।६ ।। करतलेति। हरिणाकृष्णेन कापि युवतिः प्रशशंसे स्तुता। किंभूता ? रासरसे गोपीनां क्रीडानुरागे सहनृत्यपरा कृष्णेन सह तुल्यकालं नृत्यन्ती। किंभूते रासरसे ? करतलयोस्तालस्तालिका तया तरला या वलयावलिर्हस्तकटकश्रेणिस्तया कलितोऽनुगतः कलस्वनो वंशो यत्र यस्मिंस्तथा। अथवा, "अङ्गनामङ्गनामनतरे माधवः" इममर्थ प्रकटयति।।६ ।।

**(३) जगद्धरकृत-सारदीपिका**

।।६ ।। करतलेति काचित् युवतिर्गोपाङ्गना हरिणा कृष्णेन प्रशशंसे स्तुता रासरसे गोपक्रीडानुरागे सहनृत्यपरा कृष्णसमकालं नृत्यति कथंभूते रासरसे करतलयोर्हस्तयो-स्तालेन चपेटध्वनिना तरलया चञ्चलया वलया वल्या कङ्कणपङ्क्त्या कलितः मिश्रितः कलस्वनवंशेऽव्यक्तमधुरशब्दसहितो वंशो वेणु यत्र।।६ ।।

**(४) शंकरमिश्रकृत-रसमञ्जरी**

।।५ ।। करतलेति। काचिद्युवतिर्हरिणा प्रशशंसे स्तुता। कीदृशी ? रासरसो गोपिनां क्रिडाविशेषस्तत्र सहनृत्यपरा कृष्णेन समं नृत्यन्ती। कीदृशो रासरसे ? करतलयोस्तलेन परस्परं वादनेन तरला चञ्चला या वलयावलिः कङ्कणपङ्क्तिस्तया कलितो मिश्रितोऽव्यक्तमधुशब्दसहितो बंशो वेणुर्यत्र तादृशे। अत्र "रासरसे" इत्यादिना गोदुहां क्रीडास्वेव सा स्तुत्या, न तु सकल संगीतकलास्विति ध्वनितम्; "द्रुमभेदे करास्फाले

तालं तु हरितालके” इति। **विश्व**: तरलश्चञ्चले खित्रे हारमध्यमणे, इति च। वलयंकणेऽपि च इति। “आवलिपङ्क्तिः” **इत्यमर**:। “वंशो वेणौ कुले वर्गे काष्ठस्यावयवेऽपि च” इति विश्वः। “रासस्तु वनरासे स्यात्” इति च। “रासस्तु गोदुहां क्रीडा” इति **हारावलि**:।।६।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६।। करतलेति। करतलयोः हस्ताग्रप्रदेशयोर्यौ तालौ मयूराण्डसदृश-कांस्यपात्रविशेषौ ताभ्यां तरला चञ्चला तालघातव्यापारेण इतस्ततश्चलन्तीत्यर्थः। एवं विधा या बलयावलिः कङ्कणमालिका तया कलितः मिश्रितः अतएव कलः अव्यक्तमधुरस्वनो निनादो यस्मिन्, तादृशो वंशो वेणुनालं यस्मिन् तादृशे,ताललक्षणं तु **वाद्यविवेके**,

मयूराण्डार्द्धसदृशं कांस्यतालद्वयं शुभम्।
घात्यः शिव इति ख्यातो घातकः शक्तिरुच्यते।।

अथवा करतालाभ्यां जायमानो यस्तालश्च चञ्चपुटादिस्तन्निर्माणाय या तरला वलयावलीतित्यादि पूर्ववत् करतल एब तालौ कांस्यपात्रविशेषौ ताभ्यां तरलेत्यादि तुल्यं स त्वत्र तालोत्पादनाय वलमानवलयावलिभिरेवानुगृहीतवंशनिःस्वन सम्पन्न इत्यर्थः।

एतादृशे रासे नृत्यविशेष तल्लक्षणं तु उक्तं लक्ष्मीविलासे, यत्र सम्भूय वलिताः परस्परमनोहरम्। दण्डैर्दण्डैश्च नृत्यन्ति नृत्यं तद्दण्डरासकमिति। रास एव दण्डरासकमित्यर्थः। सहनृत्यपरा हरिणा सह नृत्यासक्ता, यस्मिन् वधूनिकरे युवतिः काचिद्वल्लवतरुणी हरिणा कृष्णेन प्रशशंसे तुष्टाव, वेणुनादानुगुण-करतालस्त्वया सम्यगाचरित इति कृष्णेन स्तुतेत्यर्थः। संस्तुतावित्यस्मात्कर्मणि लिट्। तस्मिन् वधूनिकरे हरिर्विलसतीत्यन्वयः।।६।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६।। पुनस्तदेव दर्शयति। रासरसे गोपक्रीड़ारसे सहनृत्यपरा सहैव नृत्यन्ती युवतिः हरिणा कृष्णेन प्रशंससे प्रशंसिता। कीदृशे रासरसे ? करतलयोर्हस्ततलयोस्तालेन चपेटध्वनिना तरला चञ्चला या वलयावलिः तया कलितः सम्बद्धः कलस्वन-वंशोऽव्यक्तमधुरशब्दवेणुर्यत्र। ‘तलश्चपेटतालश्चे’ति **शाश्वत**:। ‘रासः कोलाहलध्वनि क्रीडायामपि गोदुहामि’ति **विश्व**:।।६।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।६।। एवं स्नेहप्राचुर्यरीत्या सन्तुष्टां श्रीराधां सखी पुनराह[२]करतलेत्यादिना। हे रासरसे! आश्चर्यं सखि कलय। रासरसे गोपवधूनिकर [३]रचितेऽपि युवतिः श्रीराधैव प्रशशंसे स्तुता श्लाघितेत्यर्थः। न त्वया सह नृत्यपरा। रासरसस्तु वरस्त्रीकदम्बं विना[४]न भवतीत्यमनोहरत्वं तन्निकरस्योक्तम्। [५] अथ वा हरिणा सह नृत्यपरा काचिद्युवतिस्त्वां प्रशशंसे। ननु सा कथं तथा चक्रे, उच्यते। रमणीयवस्तुनि न कस्य बहुमान इति। [६]यद्वा, रासे रासक्रीडायां रसः बहुनर्तकीनृत्यविशेषो[७] गोषु क्रीडा वा। तस्मिन् हरिणा सह नृत्यपरा नृत्यमात्रकुशला, न तु सर्वकर्मसु। एवमपि तस्या उपहासः। [८]तदैव प्रशंसेति ध्वनिः। कीदृशे? करतलयोस्तालेन परस्परं [९] वादनेन तरला चञ्चला या वलयावलिः कङ्कणपङ्क्तिस्तया कलितो मिश्रितः कलस्वनोऽव्यक्तमधुर[१०]स्वनो वंशो वेणुर्यत्र तादृशे। रासरस इत्यनेन गोदुहक्रीडास्वेव सा स्तुता न तु सकलसङ्गीतकलास्विति ध्वनितम्। "द्रुमभेदे करास्फाले [११] तालम्" इति विश्वः (१०४.१७)। "तरलं चञ्चले [१२] खड्गे" इति **हारावली** (?)। [१३] "रासस्तु गोदुहक्रीडा" इत्यपि च इति **विश्वप्रकाशः** [१४] स्वभावोक्तिरलङ्कारः।।६।।

१.पङ्क्तिद्वयमिदं सप्तमपदत्वेन दृश्यते (नि.सा) मुद्रिते. च.ग्रन्थे च। २.नास्ति-इ.फ.ग.ह.ज.३.रचिते-अ.ब.४.न भवत्येव। मनोहरत्वं-अ.५.यद्वा-ग.६.अथ वा-इ.फ.ह.ज.७. गोक्रीडा वा-ब.गोष्ठेषु क्रीडा वा-ग.८.तथैव-ग.९.वादेन-फ.ग.१०.शब्दसहितो-इ.फ.ग.ह.ज. ११.ताले तु हरितालकः-इ.फ.ग.ह.ज.१२.खड्गे हारमध्यमणावपि-इ.फ.ग.ह.ज.१३.तः.१४.पर्यन्तं नास्ति-अ.ब.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।६।। [१]करतलेति। काचिद्युवतिर्गोपाङ्गना हरिणा कृष्णेन प्रशशंसे स्तुता। रासरसे गोपिक्रीडानुरागे सह नृत्यपरा कृष्णसमकालं[२]नृत्यन्ती। [३]कीदृशे रासरसे? करतलयो[४]र्हस्ततलयोस्तालेन चपेटध्वनिना तरलया [५]चञ्चलया वलयावल्या कङ्कणपङ्क्त्या कलितो मिश्रितः कलस्वरवंशोऽव्यक्तमधुरशब्दसहितो वंशो वेणुर्यत्र।।६।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।६।। करतलेति। करतलावेव तालं कांस्यतालम्। विना परस्परकरतलयोगेनैव तालग्रहणं सङ्गीतसम्मतकरतलस्यैव तालत्वं; तेन तरलानां युवतीनां वलयानां कङ्कणानां आवलिः समुदायः तेन कलितः युक्तः कलः अव्यक्तमधुरःस्वनो यस्य सः; तादृशो वंशो यस्मिन्। रासः रासारब्धक्रीडाविशेषः रसः स्वरसः तस्मिन्। हरिणा सह नृत्यपरा

नर्तनासक्ता काऽपि युवतिः प्रशशंये। साधुवादैस्सन्तुष्टा वेत्यर्थः। पूर्वं पञ्चमरागालाप-मुक्तम्। अधुना तालसहितं वंशवादं नर्तनं चेति तौर्यत्रिकमुक्तम्। तौर्यत्रिकं नृत्यगीतवाद्यमिति कथनात्।।६।।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६।। करेत्यादि। हरिणा कृष्णेन कर्त्रा रासरसे[३३] रासे गोपक्रीडाविषये यो रसो रागस्तन्निमित्तं कापि युवतिः प्रशशंसे। अहह साधु नृत्यसीति प्रशंसिता। किंविधा ? सह नृत्यपरेति। स्वेन सार्द्धं नृत्यन्ती नृत्यन्तीनां हि नर्तकीनां प्रायेण प्रशंसया रागो वर्द्धत इति निमित्तसप्तम्युपपद्यते। ''रासस्तु गोदुहां क्रीडा'' इति हारावलिः। रासरसे कीदृशी ? करतलेत्यादि । करयोस्तले करतले। तलशब्देन करपृष्ठेतरोभागश्च पेट इति लोकप्रसिद्धः। तथा च तान्त्रिकाः व्यवहरन्ति, ''करतलयोः करपृष्ठयोरङ्गुलिषु च न्यासः करन्यासः'' इति। ''तलं स्वरूपाधारयोः खड्गमुष्टिचपेटयोः'' इति **विश्वो**ऽपि। करतलयोस्तालपरम्परास्फालनम्। यद्वा ''करतलाभ्यां तालो गीतकालक्रियामान'' इति। तथा च, ''तालः करतलेऽङ्गुष्ठमध्यमाभ्यां च सम्मिते। गीतकालक्रियामाने तालः खड्गादिमुष्टिषु। द्रुमभेदे करास्फाले तालन्तु हरितालके।'' इति विश्वः। तेन तरलया चञ्चलीकृतया रणत्ता (क्ता) रवन्त्या वलयावल्या कङ्कणश्रेण्या करणभूतया कलिता विदिता कला यस्मिन्। एवंविधस्वनो यस्य वंशस्य तादृशो वंशो वेणुवाद्यं यस्मिन् रासरसे कलितं त्रिषु संख्यातं गृहीतविदिते भातेति। कला चात्र गीतस्य कालविशेषपरिच्छेदे क्रिया। तस्या लक्षणं तु, ''यदि हरिस्मरणे'' इत्यत्र श्लोके प्रागुक्तम्। किं वा करतलतालेन तरला या वलयावलिस्तयोः कलितो विशेषितः कलस्वनोऽव्यक्तमधुरध्वानो यस्य। एवंविधो वंशो यस्मिन्निति विग्रहः। अत्रापि 'छत्रिणो गच्छन्ति' इति न्यायात् गोप्या मुग्धवध्वन्तर्गतत्वम्। तत्कालयोग्यस्य **हावादेर-करणाद्रतिविधावकौशल्यादवैदग्ध्यम्।** ''सुरयवाच्यौ (युवत्यां) तरला भासुरे चञ्चले त्रिषु'' इति कुमुदाकरः। ''वलयः कण्ठरागे ना कङ्कणे पुंनपुंसकम्'' इति **मेदिनी**।।६।।

## (११) पूजारीगोस्वामीकृत-बालबोधिनी

।।६।। रासरसे सहनृत्यपरा युवतिः श्रीहरिणा प्रशशंसे । त्वदीयकिञ्चित् सादृश्याभासं समालोक्य स्तुतेत्यर्थः। कीदृशे ? करतलतालैस्तरलवलयावलिभिस्तत्स्वनैर्मिलितः कलस्वनो वंशो यत्र तस्मिन्। करतलतालवल- **यद्ध्वनिमुरलीनादसंकुल** इत्यर्थः।।६।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६।। आकृष्य सा यच्चकार तदाह; करतलेति। कुञ्जादाकृष्य तेन सह रासरसे रासो नाम बहुनर्त्तकीयुक्तनृत्यविशेषः। आस्वाद्यरूपत्वाद्रास एव रसस्तस्मिन् नृत्यपरा विचित्रनृत्यादिकं कुर्वाणा सैव युवतिः हरिणा नृत्यकलाद्यभिज्ञतया सर्वमनोहरेण श्रीकृष्णेन प्रशशंसे इत्यर्थः। प्रशंसायां हेतुमाह करतलेति। रासरसे कीदृशे, करतलाभ्यां यस्तालः गीतलयज्ञापकशब्दविशेषः तेन हेतुना तरला या वलयावलिः कङ्कणश्रेणी तया, लक्षणया तत्स्वनेन कलितः संवलितः कलस्वनयुक्तो वंशो वेणुर्यत्र तादृशे। करतलतालतर-लवलयध्वनिवंशीनिनादसङ्कुल इत्यर्थः। करतालिकाभिरेव तालनृत्यं निर्वाहयन्ती चञ्चलवलयशिंजितेन मधुरमुरलीनिनादं संवादयन्ती सा कथं न प्रशंसनीयेति।।६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

६-करतलतालेति; हरिणा कृष्णेन कापि युवतिः प्रशंशसे स्तुता। किम्भूता? रासरसे गोपीनां क्रीडानुरागे सहनृत्यपरा कृष्णेन सह तुल्यकालं नृत्यन्ति। किम्भूते रासरसे? करतलतालयोस्तालस्तालिकातया तरला वा वलयावलिर्हस्तकटकश्रेणीतस्तया कलितोऽनुगतः कलस्वनो वंशो यत्र यस्मिस्तथा। अथवा अङ्गनामङ्गनामन्तरे माधव इममर्थं प्रकटयति। करतलयोस्तालेन परस्परं वादनेन तरला चञ्चला या वलयावलिः कङ्कणपङ्क्तिरणितस्तथा कलितो मिश्रिताऽव्यक्तमधुशब्दसहितो वंशो वेणुर्यत्र तादृशे। अत्र रासरसे इत्यादिना गोदुहां क्रीडास्वेव सा स्तुत्या, न तु सकलसंगीतकलास्विति ध्वनितम् द्रुमभेदे करास्फाले तालं तु हरितालके इति **विश्वः**। तरले चञ्चले खिन्ने हारमध्यमणौ इति च। वलयं कङ्कणेऽपि च इति। आवलिः पंक्तिः **इत्यमरः**। वंशो वेणौ कुले वर्गे काष्ठस्यावयवेऽपि च इति **विश्व**। रासस्तु वनरासे स्यात् इति च। रासस्तु गोदुहां क्रीडा इति **हारावलिः**।।६।।

**७-श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामाम्।**
**पश्यति सस्मितचारुपरामपरामनुगच्छति वामाम्।। हरिरिह०।।७।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७।। यतः एता गोप्यो न विदग्धाः अतः कामपि श्लिष्यति, कामपि चुम्बति, कामपि रमयति, नत्वेकस्यां सर्वशृङ्गाररम्भः। रामामिति सर्वत्र योज्यम्। सुन्दरीरमणीरामेत्यमरः। पश्यतीत्यादिः। परामन्यां बालां प्रतिकूलवर्त्तिनीं स कृष्णः स्मितचारुः यथा स्यात्तथा पश्यति। त्रैलोक्यनाथेनापि मया सेव्यमानेयं प्रतिकूलतां न

जहातीति। हरे: स्मितोद्‌गम:। वामामित्युभयत्र योज्यम्। ''प्रतीपदर्शिनी वामेत्यमर:''। संवृणोति खलु दोषसाज्ञतेत्यपरां वामामनुगच्छति। अज्ञता त्वस्या अस्थाने वाम्यकरणात् यदुक्तं,

या कुप्यति विनादोषैस्तुष्यत्यनुनयं विना।
अहेतुकप्रवृत्तिश्च चलच्चित्तेति साधना।।इति।।७।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। एकस्यैव हरे: प्राकाम्यसिध्द्या सर्वाभि: सहैककालं क्रीडनमाह श्लेष्यतीति। स हरि: रासरसे "कचित्कामपि अन्ययाऽन्ययौ सह उक्तरीत्या क्रीडति। रामेति रामणशीला तां रमयति। स्मितचारूतरेति। स्मितचारूतरेति रसदृष्टेरूपलक्षणम्। स्मिते हि रतिभाव उल्षणो भवतीति। "वामाम्" इत्यनुनयेऽपि पराङ्‌मुखीत्वम्। तामनुगमनेन साधयतीति चातुर्यम्। अथवा, नानारूपाणि विधाय तया हि तया तयावस्ताया क्रीडितवान्। अथवा, सममेचैकामाश्लिष्य तामाश्लिषयन्नेवपरां चुम्बति। तत्कुर्वन्नेवान्यां रमयति। चेष्टाविशेषेण तदैवान्यां पश्यति। अन्यमनुगच्छतीत्यनुकरोतीति योज्यम्। श्लिष्यतीत्यादिषु क्रमेण शठधृष्टदक्षिणानुकूलधूर्ता नायका: नायिकास्तु अभिसरिका एव।।७।।

## (३) जगद्धरकृत-सारदीपिका

।।७।। शिलष्यतीति हे राधे श्रीकृष्ण: कामपि गोप्य गोपिकां शिलष्यति आलिङ्गति तथा कामपि चुम्बति तथा कामपि रामा रमयति क्रीडयति अपरां नायिकां स्मितचारुहास समनोहरं यथा स्यात्तथा पश्यति अपरां वामां सुन्दरीमनुगतच्छतीत्यर्थ:।।७।।

## (३) राणाकुम्भकृत-रसमञ्जरी

।।७।। श्लिष्यतीति। कामपि रामां क्रीडाशीलां गोपीं श्लेष्यत्यालिङ्गति,कामापि चुम्बति, कामापि रमयति, निभृत: संभोगेन क्रिडयति, स कृष्ण: स्मितेन चारूतरामतिशये मनोहरामपरां गोपीं पश्यति। कंचिद्वामां वामखभावां कोपवतीमनुगच्छति अनुनयार्थमनुगतिं करोति। अत्र कृष्णेनाश्लेषादौ क्रियमाणोऽपि ताभिर्न कृतमित्यप्यवैदग्ध्यं सूचितम्। "सुन्दरी रमणी रामा" **इत्यमर**:। "विद्या वामा अपि स्त्रियाम्" इति च।।७।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।७।। इत्य मनेन नारीश्रृङ्गारचेष्टितो हरिरेकदैव बहुभिर्विहरणैस्ता: सुखयति। शिलष्यतीति हरिर्यस्मिन् वधूनिकरे कामपि काञ्चिद्वल्लवाङ्गनां शिलष्यति आलिङ्गति विदलादिस्पृष्टकालिङ्गनादि कस्यांचित् करोतीत्यर्थ: उक्तं च रतिरहस्ये

यद्योषित: सम्मुखमागताया अन्योपदेशाद्ब्रजतो नरस्य।

गात्रेण गात्रं घटतेऽत्र तद्यद्-ह्यालिङ्गनं स्पृष्टकमेतदाहुः।।

आलिङ्गनं बाह्यमिह प्रयोज्य तत्रापि चालिङ्गनपूर्वमन्यत्।

तदालिङ्गनं वर्द्धकपीडितलताबेष्टितेत्यादिप्रकारेण सप्तविधमिति। कामपि काञ्चिद्गोपकामिनीं चुम्बति। चुम्बनस्थानानि प्रागेव कथितानि। कामपि रामां रमयति क्रीडयति। स कृष्णः स्मितेन मन्दहासेन चारुतरामपरामत्यन्तमनोहरामथवा स्मितेन मन्दह्रासेन सहस्मिताः सस्मिता अतएव चारुतरा सस्मिता च सा चारुतरा चेति तादृशीमपरां गोपिकां पश्यति वीक्षते। "पाघ्राध्मेत्यादिना पश्यादेशः।" सस्मितचारु-परामिति केषुचित् पाठः। तदा स्मितेन चारु यथा तथा परमन्यां गोपिकां पश्यतीत्यन्बयः। अस्मिन् पक्षे स इति पृथक् पदं कृष्णविशेषणम्। अथवा चार्वित्यत्र भावप्रधानो निर्द्देशः। तदा स्मितं च तच्चारुत्वं च स्मितचारुत्वे, ताभ्यां सहितं यथातथा परामित्यन्वयः। अथवा स्मितेन सहिता अतएव चारुः सस्मिता चासौ चारुश्च, सा परा चेति च बिग्रहः। तामित्यर्थः वामां सुन्दरीं "वामः सुन्दरवक्रयोरित्यमरः।" अपरामन्यां गोपकामिनीं अनुगच्छत्यनुब्रजति अनुसृत्य संकेतस्थलं प्रति यातोत्यर्थः। अनेन भगवतः श्रीकृष्णस्यातिसम्भोगचातुती सूचितेति मन्तव्यम्।।७।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।७।। कृष्णस्य शठनायकत्वं दर्शयन् चित्रविलासमाह[S]। कामपि आश्लेषमिच्छन्तीमा-भीरनारीं श्लिष्यति आलिङ्गति। कामपि चुम्बनार्थिनीं चुम्बति। चुबि क्कत्रसंयोगे धातुः। कामपि रतार्थिनीं रामां रमयति क्रीड़ां प्रापयति। स्मितेन चारु शोभनं यथा स्यादेवमपरान्तरामत्यर्थेन पश्यति। इत्याद्यसहमानामोष्यया गच्छन्तीमनायत्तां वामामदक्षिणामनुगच्छति पश्चाद्गच्छति। 'अदक्षिणे मतो वामो वामा योषित्प्रकीर्तिते'ति "**धरणिः**"।।८।।

[S]'विलासेन विलोलं विलोचनम्, तस्य खेलनेन तादृक्कटाक्षादिना' इत्यादि पाठ।

[S]'विचित्रविलापमाह' इति पाठ।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।७।। सखि! रासविहारे तासां त्वदुक्तरीत्या प्राधान्यं, ताभिः केलिर्या सा त्वद्गौरवान्वेषणायास्ति। न तु तासां गौरवम्। [६]उक्तञ्चात्र, राधामाधाय हृदये तत्याज व्रजसुन्दरीः इति। [७]त्वद्गौरवमाह श्लिष्यतीत्यादिना। सः श्रीकृष्णचन्द्रः कामपि रामां क्रीडा[८]स्वभावो श्लिष्यति[९]आकृष्यालिङ्गनं करोति। कामपि रामां चुम्बति चिबुकमुद्धृत्य चुम्बनं करोति। कामपि रामां कुचस्पर्शाधरपानमधुरवचनादिना रमयति। भाव [१०]

गर्भितस्मितेन चारुतरामतिशयेन मनोहरां पश्यत्यवलोकनं करोति। एवं [१]तास्वभिमुखं नृत्यमानासु प्रीत्या[२] श्रीकृष्णालिङ्गनादिकं दृष्ट्वा[३] ह्रियमाणामपरां वामां [४]मात्सर्यस्वभावां मनोहरस्वभावां वा तामनुगच्छति। तत्सखीमनुनयार्थमनुगतिं करोति।[५] अथ वा तद्वञ्चनमेवं प्रकारेण विधायाऽपरां, न विद्यते परा अन्या त्वत्सदृशी श्रेष्ठा तां त्वां वामां कोपवतीं स्वापराधशमनायानुगच्छति। बलात्कारेणा[६]लिङ्गनादिके कृतेऽपि ताभिर्न कृतमित्यवैदग्ध्यं सूचितं तासाम्। परस्परकृतालिङ्गनादौ शृङ्गाररसः पुष्टो भवतीति ग्राम्य[७]सुखे प्रसिद्धिः। अत एव तासामपकर्षणार्थं [८]स्वोत्कर्षशृङ्गाररसपुष्ट्यर्थं [९] च नायकवरान्तिके त्वया गन्तव्यमिति सूचितम्। सुन्दरी रमणी रामा [१०]**इत्यमरः** (२.६.४)।।७।।

१.केलीति पदस्य पश्चात् दृश्यते पदमिदम्-ड.२.नृत्यती-क.नृत्यति-ल.म.३.कथम्भूते रासरसे-क.ल.म.४.हस्तयोः-ड.ल.म.५.नास्ति-ल.म.६.उक्तञ्च-ग.७.त्वद्गौरवमेवाह-इ.फ.ग.ह.ज. ८.स्वभावां-इ.फ.ग.ह.ज.९.आश्लिष्य-फ.१०.गर्वित-अ.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।७।। श्लिष्यतीति। हे राधेः! कृष्णः कामपि [११]गोपिकां श्लिष्यति आलिङ्गति। तथा कामपि चुम्बति। तथा कामपि रामां रमयति क्रीडयति। परां नायिकां सस्मितचारुसहासमनोहरं यथा स्यात्तथा पश्यति। अपरां वामां [१२] सुन्दरीमनुगच्छतीत्यर्थः।।७।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।७।। दयितकृतबाह्यसम्भोगं वर्णयति श्लिष्यतीति। ध्रुवपदस्थं हरिपदमत्रानुषज्यते। हरिः कामपि वल्लवीं श्लिष्यति आलिङ्गति। कामपि तदन्यां चुम्बति। तदन्यां कामपि रामां सुन्दरीं रमयति। चुम्बनाश्लेषभिन्न नाभिस्पर्शादिना क्रीडति। सस्मितं स्मितयुक्तं मुखं अधरो वा। तेन[१] चारुतरां अतिशोभां स्मितसहितं यथा स्यात्तथा सस्मितं चारुतरमित्यर्थः। अपरां वामां सुन्दरीं मानिनीं तद्वक्त्रं वा अनुगच्छति अनुसरति। अत्र खेलनया सस्मितया योग्यालिङ्गनादिना सत्कारकरणात् दक्षिणो नायकः।।७।।

१.तास्वभिनृत्यमानासु-अ.ब.२.श्रीकृष्णालिङ्गनं-अ.ब.३.नास्ति-इ.फ.ग.ह.ज.४.माधुर्य-स्वभावां-ह.५.यद्वा-ग.६.आलिङ्गनादिकं कृतमपि-अ.ब.७.सुखेऽर्थसिद्धिः-अ.८.स्वोत्कृष्ट-फ.९.तद्रचनार्थं च-ज.१०.इति विश्वः-इ.फ.ग.ह.ज.अयं नैघण्टुकोद्धारो नास्ति-अ.ब.अतः परं इ.फ.ग.ह.ज.पुस्तकेषु एवं दृश्यते-

मुदा सङ्क्रीडद्भिर्व्रजयुवतियूथैःपरिवृतो
न तोषं प्राप्नोति क्वचिदपि मनाङ्नन्दतनयः।

यतस्व त्वं तस्मिन् सहचरि मनागन्यविषयं
मनःकर्तुं कान्ते तव चरणपातैकशरणे ।।

११.गोपाङ्गनां-क.१२.सुन्दराम्-ङ.

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।७।। श्लिष्यतीति। यतः एता गोप्यो न विदग्धाः। अत एव कामपि श्लिष्यति कामपि चुम्बति कामपि रमयति नत्वेकस्यां सर्वशृङ्गारारम्भः। रामामिति सर्वत्र योज्यम्। ''सुन्दरी रमणी रामा'' **इत्यमरः**। पश्यतीत्यादि। परामन्यां वामां प्रतिकूलवर्त्तिनीं स कृष्णः स्मितचारु यथा स्यादेवं पश्यति। त्रैलोक्यनाथेनापि मया सेव्यमानेयं प्रतिकूलतां न जहातीति हरेः स्मितोद्गमः। वामामित्युभयत्र योज्यम्। ''प्रतीपदर्शना वामा'' **इत्यमरः**। संवृणोति खलु दोषमज्ञतेत्यपरां वामाम् अनुगच्छति अज्ञतात्वस्या अस्थाने वाम्यकरणात्। यदुक्तम्, ''या कुप्यति विना दोषैस्तुष्यत्यनुनयं विना। अहेतुकप्रवृत्तिश्च चलचित्तेति साधमा।।'' इति। एतयोरज्ञातत्वात् कृष्णस्यापराधसहनं न तु विज्ञत्वात्तदपराधं स न सहिष्यते इति तस्याः प्रोत्साहनम्।।७।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।७।। श्लिष्यतीत्यादिभिः साधारण्यमेव दर्शितं नत्वेकस्यां शृङ्गारारम्भ इत्यर्थः। स कृष्णः स्मितचारु यथास्यात्तथा परां पश्यति अपरां वामाम् अनुनयेन प्रसादयति।।७।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७।। एवमेतासां कृष्णभावानुबन्धशून्यां क्रीडां निरूप्य कृष्णस्यापि तथा स्वचेष्टितान्याह; श्लिष्यतीति। अत्र श्लिष्यतीत्यादिषु वर्त्तमानसामीप्ये लटिति बोद्धव्यम्। तथा स्वरविशेषसूचितकाक्वर्थोऽपि बोद्धव्यः। अत्र भवतीव का वा तत् प्रेमसर्वस्वरूपा रामाऽस्ति यामयमालिङ्गिष्यति। न कामपीत्यर्थः। तथा कामपि चुम्बिष्यति। नृत्यादिना कामपि रमयिष्यति। सम्भोगप्रार्थनाभिव्यञ्जकं विविधभावानुबन्धिमन्दस्मितसहित-भ्रूविक्षेपसंज्ञासूचितकुसुमशय्यादिपरिष्कृतनिकुञ्जगमनं यथा स्यात्तथा परां कां वा प्रेक्षिष्यति। अपरां कामपि वामां कल्पितप्रणयकोपव्याजेन गच्छन्तीमनुनयमिषेणानु-गमिष्यति। न कामपीति। यद् वा सर्वत्र वर्त्तमान एव लट्। आलिङ्गनचुम्बननर्त्तनसुखानि अन्याभिः प्रार्थितानि अन्याभ्यः प्रयच्छतीति। तदिङ्गितज्ञयाऽन्यया कृते उपालम्भे सवैलक्षस्मितरमणीयमन्यामवलोकते। त्वन्नामाद्यङ्कितगीतश्रवणसञ्जातकोपेनान्यतो गतायामन्यस्यामन्यामनुनेतुमनुयाति। अमुमर्थं स्वरविशेषसूचकापि शब्दसमभिव्याहृता-न्यार्थे पर्य्यवस्यन् किं शब्द उपोद्बलयति।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। शिलस्यतीति; स हरि: रासक्रीडायां क्वचित् कामपि अन्ययाऽन्यया सह उक्तरीत्या क्रीडति। रामेति रमणशीला ता रमयति। स्मितचारुतरेति रसदृष्टेरुपलक्षम्। स्मिते हि, रतिभावे उल्वणो भवतीति। वामाम् इत्यनुनयेऽपि पराङ्मुखीत्वम्। तामनुगमनेन साधयतीति चातुर्यम्। अथवा, नाना रूपाणि विधाय तया सह तयावस्थया क्रीडितवानिति **राणाकुम्भ**:। सममेकैकामाश्लिष्य तामाश्लिष्यन्नेव परां चुम्बति। तत् कुर्वन्नेवान्यां रमयति। चेष्टाविशेषेण तदैवान्यां पश्यति। अन्यामनुगच्छतीत्यनुकरोतीति योज्यम्। श्लिष्यतीत्यादिषु क्रमेण शठधृष्टदक्षिणानुकलधूर्त्तनायका:। नायिकास्तु अभिसारिका एव इति कुम्भ:।।७।।

**८-श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरहस्यम्।**
**वृन्दावनविपिने वलितं वितनोतु शुभानि यशस्यम्।। हरिरिह० ।।८।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।८।। इदं श्रीजयदेवभणितमद्भुतं केशवकेलिरहस्यं श्रृण्वतां शुभानि वितनोत्विति वाक्यार्थ:।

एकेनैवानेकस्यां प्रीणनात् केशवकेलिरहस्यस्याद्भुतत्वम्। ''रह: स्यात् स्त्रीनदीभेदे गोपनीयेऽभिधेयवत्''। कीदृशं वृन्दावनविजने बलितमुत्पन्नम्। पुन: कीदृशं, निजयशस्यं यशशे हितं युगवादित्वात् यत् प्रत्यय:।।८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।८।। उपासंहरति, श्रीजयदेवेति। अत्र स्वरा ऋषभाद्या: पाटा:। श्रीयदवकवेरिदमद्भत-केशवकेलिरहस्यं अद्भुतं च तत्केशवकरहस्यं च तच्चरितं शुभानि वितनोतु। अर्थाद्गायतां शृण्वतां च। किंभूतम्? यशस्यं यशस्करम्। क्व? वृन्दावनविपिने। अत्रैकेननेकासामु-परञ्जनादद्भुतत्वम्। लयो नाम छन्द:। तल्लक्षणम्, "मुनियगणैर्लयमामनन्ति तज्ज्ञा:"। तदुक्तं **छन्दश्चुडामणौ** "चिलय" इति।।८।।

## (३) जगद्धरकृत-सारदीपिका

।।८।। श्रीजयदेवेति श्रीजयदेवकवेरिदं गीतं शुभानि कल्याणानि वितनोतु अर्थात् भक्तानां गीतं कीदृशम् अद्भुतमाश्चर्यकरं केशवस्य कृष्णस्य केलिरहस्यं क्रीडाहर्षो यत्र अद्भुतत्वं युगपत्सर्वासां प्रीत्युत्पादानात्। वृन्दावनविपिने वृन्दावननाम्नि वने ललितं नानारसान्वितमित्यर्थ: यशस्यं यशस्सहितं यशस्करमित्यर्थ:।।८।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।८।। संप्रति गीतसमाप्तौ कविः स्वनाम निबघ्नन्नेवाशिषं प्राथयते; श्रीजयदेवेति। श्रीजयदेवकचेरिदं ललितं गीतं शुभानि वितनेतु विस्तारयेतु। किदृशम्? वृन्दावनेऽद्भुतं केशवस्य केलिरहस्यं गुप्तक्रीडा यत्र तादृशम्। अद्भुतत्वं चैकेनैव कृष्णेनानेककामिनिनां कामपुरणात् पुनः किदृशम्? यशस्यं यशःसहितम्।।८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।८।। श्रिजयदेवेति। अद्भुतानां लोकाश्चर्य्याणां केशवस्य श्रीकृष्णस्य केलीनां विहाराणां रहस्यं यत्र तत्तादृशम्। किञ्च वृन्दावनाख्यविपिने वने चरितानि कृष्णचरितानि यस्मिन् तादृशं, अतएव यशस्यं कीर्त्तौ साधु तत् "साधुरति" (४-४) य प्रत्ययः। श्रोतृ गातृ यशस्करीत्यर्थः। एतादृशं इदं जयदेवभणितं श्रोतृणां गातृणां शुभानं कल्याणानि वितनोतु। अत्र विधानन्यायेन उद्देश्यगुणविधानन्यायेन क्रियायोगोऽव- गन्तव्यः।।८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।८।। निजकीर्त्त्यनुवृत्त्यर्थं स्वनामाङ्कताशीर्दानेन उपसंहरति। श्रीजयदेवकवेरिदं भणितं सर्वेषामेव शुभानि वितनोतु विस्तारयतु। किम्भूतम्? अद्भुतकेशवकेलिरहस्यम् अद्भुता एकेनैव तावदाभीरनारीणां युगपदेव प्रीणनादाश्चर्या केलिः, अद्भुता चासौ केशवकेलिश्चेति अद्भुतकेशवकेलिः, अस्य रहस्यं रहसि भवं रहस्यं गोपनीयमित्यर्थः, अत्र वर्णनीयत्वात्तथा। पुनः किम्भूतम्? विपिनविनोदकलया वनविहारकौशलेन वलितं सम्बद्धम्। पुनः किम्भूतम्? यशस्यं यशस्करम् अर्थात् कवीनां गायतां श्रृण्वताम्।।८।।

## (७) वनमालिभट्टकृत- सञ्जीवनी

।।८।। उक्तलीलावैभवश्रवणफलमाह; श्रीजयदेवेति। श्रीजयदेवकवेरिदं गीतं शृण्वतां[८] पठतां च शुभानि[९] श्रीकृष्णस्मरणात्मिकानि कल्याणानि वितनोतु विस्तारयतु। कीदृशम्? [१०] अद्भुतं अद्भुतार्थ-अद्भुतस्वरूपं वा [११] आश्चर्यकरं वा। केशवस्य [१२] [१३] श्रीकृष्णचन्द्रस्य केलिरहस्यं क्रीडाहर्षः क्रीडागोप्यं वा [१४] यत्र। [१५] अत्राद्भुतमेतदेव गोपवधूदाक्षिण्यानुरोधेन क्रीडितं श्रीराधोत्कर्षख्यापनायान्यमुग्धत्वनिरूपणायेति। [१६] अथ वा अद्भुतं युगपद्व्रजनारीणां रत्युत्पादनात्। [१] कश्चेशश्च वशौ यस्येतीति[२] कियद्व्रजाङ्गनावशीकरणम्। पुनः कीदृशम्? वृन्दावने नाम्नि वने[३] ललितं नानारसान्वितं वनविहारक्रीडायुक्तं वा, वने कामधेनुस्मरणात्। वनविहारव्याजेन श्रीराधान्वेषण[४] चातुर्यमुक्तम्। [५] यशस्यं यशसे हितं यशस्करं वा यशस्सहितं वा[६]।।९।।

[७]इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मज श्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां कृष्णक्रीडावर्णनं नाम चतुर्थः प्रबन्धः।।८।।

१.भणितमिदमद्‌भुंत-मुद्रितग्रन्थे (नि.सा).२.अपि च-इ.फ.ग.ह.ज.३.काचिद्गोपिका-क.४.हस्तेनानुकृष्ण दुकुले-ल.म.५.कथम्भूतं कृष्णम्-क.कथम्भूतममुम्-ल.म.६.नास्ति-ड.क.७.पदमिदं सव्याख्यं षष्ठत्वेन च.ग्रन्थे दृश्यते। ८.नास्ति-ज.९.तः१२.पर्यन्तं नास्ति-इ.१०.नास्ति-अ.ब.११.नास्ति-ब.१३.श्रीकृष्णस्य-ग.ह.१४.नास्ति-अ.ब.१५.अद्भुतत्वमेतदेव-इ.फ.ग.ह.ज.१६.यद्वा-ग.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।८।।श्रीजयदेवेति। श्रीजयदेवकवेरिदं गीतं शुभानि कल्याणानि वितनोतु वर्धयतु; अर्थाद्भक्तानाम्। [८] कीदृशं [९] गीतम्? अद्भुतमाश्चर्यकरम्। केशवस्य कृष्णस्य केलिरहस्यं क्रीडाहर्षो यत्र। अद्भुतं युगपत् सर्वासां प्रीत्युत्पादनात्। बृन्दावनविपिने बृन्दावननाम्नि वने ललितं नानारसान्वितमित्यर्थः। [१०] यशस्यं यशसा सहितं यशस्करमित्यर्थः।।९।।

[११]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां कृष्णक्रीडावर्णनं नाम चतुर्थः प्रबन्धः।।८।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।८।।श्रीजयदेवेति। [१२]श्रीजयदेवकवेः; कविशब्देन तत्कर्तृत्वम्। अद्भुतं च तत् केशवस्य केलिरहस्यं क्रीडातत्त्वम्। वृन्दावनं चतुरशीतिक्रोशरूपं, तत्र विपिनानि मधुवनतालवनादीनि द्वादश प्रसिद्धानि। तत्र चरितं इदं वस्तु यशस्यं कीर्तिकरं शुभानि वितनोतु विस्तारयतु [१]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां कृष्णक्रीडावर्णनं नाम चतुर्थः प्रबन्धः।।८।।

१.कश्चेशश्च केशौ यस्येतीति-अ.ब.नास्तीदं वाक्यम्-ज.२.कियदेतद्ब्रजाङ्गना-इ.फ.ग.ह.ज.व्रजाङ्गना-ज.३.चलितं-अ.इ.फ.ग.ह.ज.४.चातुर्यमुक्तामिति भावः-इ.फ.ग.ह.ज.५.तः६.पर्यन्तं नास्ति-अ.ब.यशस्ये यशस्यं यशस्करं-इ.७.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज.८.नास्ति-क.९.नास्ति-क.१०.वाक्यमिदं नास्ति-ड.११.इति श्रीगीतगोविन्दे कृष्णक्रीडावर्णनं नाम चतुर्थः प्रबन्धः-ड.नास्तीयं पुष्पिका-क.ल.म.१२.श्रीजयदेवकवेरिद मद्भुत इति एतद्व्याख्यानुसारी पाठः।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।८।। श्रीजयेति। इदं श्रीजयदेवभणितम् अद्भुतम् आश्चर्यरूपं यत् केशवस्य केलिरहस्यं क्रीडागुह्यं शुभानि मङ्गलानि वितनोतु। शृण्वतां गायतां चेत्यर्थात्। "रहस्या

स्त्री नदीभेदे गोपनीयेऽभिधेयवत्" इति। एकेनैवानेकासां प्रीणनात् केशवकेलि-रहस्यस्याद्भुतत्त्वम्। किंविधम्? बृन्दावनमिति। बृन्दावनाख्यवने चरितमाचरितम्। यशस्यमिति। यशसे हितं गन्धादित्वाद् यप्रत्ययः यशस्करमित्यर्थः ।।८।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।८।। श्रीजयदेवकवेरिदं गीतं शुभानि विस्तारयतु। कीदृशं? अद्भुतं केशवस्य केलौ रहस्यं वैदग्धीविशेषेण श्रीराधाविलासपरीक्षणरूपं यत्र तत्तथा। वृन्दावनविहारे सौष्ठवयुक्तं यशःप्रदं च ।।८।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।८।। अथैतत् श्रवणादिपराणां मङ्गलं प्रार्थयन् गीतमुपसंहरति। श्रीति। श्रीजयदेवकवेरिदं गीतं शुभानि प्रेमसुखमयानि मङ्गलानि विशेषेण तनोतु। प्रेममूर्च्छापर्यन्तं विस्तारयतु। अर्थादास्वादकानामिति ज्ञेयम्। तादृशसुखविस्तारे हेतुमाह; यतोऽद्भुता याः केशवस्य केलयः तासां श्रीराधिकैकनिष्ठोत्कण्ठापरीततया अन्यैरविभावनीयरूपं रहस्यं यत्र तादृशम् अत एव वृन्दावनाख्यविपिने वलितं प्रकाशितं न चान्यत्र इति भावः। अत एव यशस्यं श्रवणादिपराणां यशस्करम् ।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।। श्रीजयदेवेति; श्रीजयदेवस्य लिखनेन केशवस्य य केलिरहस्यमत्यद्भूमस्ति। वृन्दावनस्य विपिने ललितं कोमलकलाकुतुकं यशोनिमित्तं वितनोतु विस्तारलाभं करोतु। अत्र अनेकनारीशृङ्गारः खलु आश्चर्याय भवति। यतो हि न मानिनी संसहतेऽन्य संगमम्। इतिन्यायेन अन्याषां शृङ्गारः अद्भूतं भावं जनयति ।।८।।

**११-विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-**
**श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम्।**
**स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः**
**शृङ्गारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति ।।११।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।११।। गीतापेक्षितश्लोकाभ्यां सूचयति। हे सखि! मधौ वसन्ते हरिः क्रीडतीति वाक्यार्थः। किं कुर्वन्, विश्वेषामनुरञ्जनेन जनयन्नानन्दम्। पुनः किं कुर्वन्, इन्दीवरश्रेणी श्यामलकोमलैरङ्गैरनङ्गोत्सवं उपनयन् इन्दीवराणां श्रेणय इव श्यामलानि कोमलानि चेति विग्रहः। इन्दीवरं नीलसरोजं स्यात्। स्वच्छन्दं यथा स्यादेवं प्रत्यङ्गमभितो

ब्रजसुन्दरीभिरालिङ्गितः। "गोष्ठाध्वनि वहा व्रजा" **इत्यमरः**। यत्र श्रृङ्गारी मूर्त्तिमानिवेति कविरुत्प्रेक्षांचक्रे।

पुंसःस्त्रियां स्त्रियाः पुंसि संयोगं प्रति या स्पृहा।
स शृङ्गार इति ख्यातः रतिक्रीडादिकारणम्॥

इत्युक्तं **शृङ्गाररतिलके**। श्रृङ्गाररसोऽपि श्यामवर्णो भवति। यदाह **भरताचार्य्यः** "श्यामो भवति श्रृङ्गारः सितो हासः प्रकीर्त्तितः। आद्योत्सङ्गेति पूर्वोक्तम्"॥११॥

## (२) राणाकुम्भकृत-रसिकप्रिया

॥११॥ इदानी इन्दवरङ्गिस्यालकोमलैर्नीलोत्पलराराजिवच्छयामलसुकुमारै। पुनः किंभूतः ? व्रजसुन्दरीभिरभितः इन्दीवरपडि श्यामलकोमलौ[३५]र्नीलोत्पलशाजवच्छयामर-सुकुमारैः। पुनः किंभूतः ? व्रजसुन्दरीभिराभतः प्रत्यङ्गमालिङ्गितः प्रतिप्रतीकमश्लिष्टः। अभितः सर्वतः। कथम् ? स्वच्छन्दुं यथा स्यात्तथा। अथवा यद्वादङ्गं यया समाासादतं तत्तत्तया तया स मालिङ्गितमिति प्रतिप्रतीकशब्दार्थः। अत्रदिपकमलंकारः। वैदर्भी रीतिः। शार्दुलबिक्रीडितं छन्दः। शृङ्गारो रसः। वाक्यौचित्यं च "चन्दनचर्चिते" त्यत्र उत्कण्ठिता नायिका। तल्लक्षण्, "प्रिये कृतव्यलीकेऽप विरहोत्कण्ठितोन्मनाः"॥११॥

## (३) जगद्धरकृत-सारदीपिका

॥११॥ विश्वेषामिति हे सखि राधे! मधौ वसन्ते मुग्धो मनोहरो हरिः कृष्णः क्रीडतीत्यन्वयः। कथमिव मूर्त्तिमान्शरीरधारी श्रृंगाररस इव किङ्कुर्वन् अनुरञ्जनेन अनुरागेण विश्वेषां सर्वेषां भक्तानाम् आनन्दं सन्तोषं जनयन् पुनः किं कुर्वन् इन्दीवरश्रेणीनां कोमला तद्वत्श्यामलकोमलैः कृष्णमनोहरै रङ्गैरवयवैः अनङ्गोत्सवं कामहर्षं उपनयन् उत्पादयन् पुनः कथम्भूतः स्वच्छया व्रजसुन्दरीभिः गोपीभिः अभितः सर्वतोभावेन प्रत्यङ्गं प्रत्यवयवेन आलिङ्गीतः गोपीर्भिरालिङ्गने यस्याः यदङ्ग प्राप्तं तया तेदवालिङ्गि-तमितिभावः। ''श्यामो भवति श्रृंगारः स्मितोहासः प्रकीर्तित'' इति शृंगारविशेषणान्य-प्येतानि पदानि॥११॥

## (४) शंकरमिश्रकृत-रसमञ्जरी

॥११॥ ननु सकलशृङ्गारकलाभिज्ञः श्रीकृष्णः कथं हावाद्यनाभिर्गोपीभिः सह केलिं कृतवानित्यन आहविश्वेषामिति। हे सखि हे राधे। मधौ वसन्ते मुग्धो मनोहरो हरिः क्रिडति। किं कर्वन् ? विश्वेषां गोपिजनानामनुरञ्जनेनानुरागं जनयन्नुपस्थापयन्। कीदृशो हरिः ? अभित उभयतो बाह्वैरवयवैरन्तश्चेतसा प्रत्यङ्गं अङ्गमङ्गं प्रति स्वच्छन्दं यथा स्यादेवं व्रजसुन्दरीभिरालिङ्गितो मूर्तिमान् शरीरी शृङ्गार इव। शृङ्गारस्याशरीरत्वात्क्रीडारसो

न संभवतीति मूर्तिमानित्युक्तम्। अत्र शृङ्गाररसस्य श्यामत्वात्कृष्णसादृश्यम्। तदुक्तम् (ना.शा. ६.४२), "शामो भवति शृङ्गार: सितो हास: परकीर्तित:" इति। यथा मुग्धो मनोहर: शृङ्गाररसो मधौ वसन्ते क्रीडति सर्वत्र विलसति। किं कुर्वन्? यूनोऽनुरञ्जनेन परस्परानुरागजननेन विश्वेषां प्राणिजनाामानन्दं।।११।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।११।। प्रकारान्तरेणापि राधायै श्रीकृष्णचरितं कथयति। विश्वेषामिति। हे सखि! विश्वेषां सर्वप्राणिनाम् अनुरञ्जनेन स्वविषयानुरागेण सह आनन्दं निरबधिकप्रमोदं जनयनुत्पादयन्, अथवा विश्वेषां स्वनिष्ठालौकिक श्रृङ्गारचेष्टादर्शनेन यदनुरञ्जनम् अनुरागस्तेन हेतुना तत्परत्वेन तदानीमेव तेषामानन्दं जनयन्, किञ्च, या इन्दीवरश्रेणी नीलोत्पलसमूहस्तद्वत्श्यामलानि नीलवर्णानि उपमानानीत्यादिना समास:। कोमलान्यतिमृदुलानि आलिङ्गनसौख्यसम्पादकानित्यर्थ:। तादृशानि यान्यङ्गानि च तै: बाहुप्रभृतिभिरवयवैरनङ्गस्य कामदेवस्य उत्सव: अङ्गहीनस्य मम कामिनी विषये एतैरेवाङ्गैरङ्गसम्पत्तिर्जातेति य: सन्तोष: तमुपनयन् सम्पादयन् तत्सूचनार्थमेव प्रकृतेऽङ्गपदेन मन्मथकथनमित्यर्थ:।

अनेन साक्षान्मन्मथ इवाभातीत्युक्तं भवति, अथवा अङ्गानामिन्दीवर-श्रेणीकल्पता प्रतिपादनादिन्दीवरस्य च मन्मथसायकत्वान्ममेदानीं कामिनीजये बहुसायकसम्पत्तिर्जाता इत्यनङ्गस्य य: सन्तोषस्तमवयवैरुपानयन्मित्यर्थ:। अतएव मुग्ध: अतिसुन्दर: ब्रजसुन्दरीभिर्वल्लबललनाभि: अभित: सर्वत: प्रत्यङ्ग प्रत्यवयवं स्वच्छन्दं यथेष्टं असंकोचमिति यावत्। तद् यथा स्यात्तथा आलिङ्गित आश्लिष्ट: एतादृशो हरि: श्रीकृष्ण: मूर्त्तिमान् विग्रहवान्। "मूर्त्तिकाठिन्यकारययोरि**त्यमर**:।" शृङ्गार: शृङ्गाररस इव मधौ वसन्तसमये क्रीडति कामिनी कदम्वेन सह विहरतीत्यर्थ:। पश्येति वाक्यशेष: अत्रैदं बोद्धव्यम्। आलम्वनोद्दीपनभेदेन द्विप्रकारकविभावकटाक्षादि-रूपानुभाव निर्वेदादिव्यभिचारिभावस्तम्भादि सात्त्विकभावव्यङ्ग्यं रतिस्थायिकं ब्रह्मसुखमेव शृङ्गारादिरसशब्दार्थ इत्यभिनवगुप्तपादा उदाहरन्ति, तत्र प्रमाणम्। रसो वैस: रस ह्येवायं लब्धानन्दीभवतीत्यलौकिक चमत्काराभिधानन्दकारी श्रृङ्गारादिको रस इति काव्यप्रकाशकार: तदुक्तं **काव्यप्रकाशे**, "अलौकिक चमत्कारी श्रृङ्गारादिको रस:" इति चमत्कारानन्दयोरभेदस्तु यथा श्रृङ्गारादि रसस्य ब्रह्मानन्दरूपता तथा भगवत: श्रीकृष्णस्य साक्षब्रह्मस्वरूपत्वात् आनन्दरूपरसस्यापि, तथात्वेन उभयोरप्येतच्छृङ्गार इवेत्यनन्वयालङ्कार: तदुक्तम्, "एकस्योपमानो- पमेयत्वेऽनन्वयो मत:" इति लक्षणात्

द्वितीयपक्षे तु उभयोर्भेदादुपमाभेदः। अत्र रसस्य सिद्धत्वेनोपादानान्न स्वशब्द-वाच्यत्वदोषः। साध्यत्वेनोपादान् एव दोष इति।।११।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।११।। गीतार्थमेव यथासम्भवश्लोकेन दर्शयति। हे सखि राधिके! मधौ वसन्ते मुग्धो मनोहरो हरिः कृष्णः क्रीडति। अत्रोत्प्रेक्षते कविः; मूर्तिमान् शरीरी श्रृङ्गार इव। कीदृशः? स्वच्छन्दं यथा स्यादेवं व्रजसुन्दरीभिः व्रजनायिकाभिः प्रत्यङ्गम् अङ्गे अङ्गे आलिङ्गितः आश्लिष्टः। स्वस्य छन्दोऽभिप्रायः स्वच्छन्दम्, क्रियाविशेषणत्वेन नपुंसकत्वम्। 'अभिप्रायवशौ छन्दावि'त्यमरः। अभितः सर्वतः अङ्गैरवयवैः अर्थानारोणामनङ्गोत्सवं कामजनितानन्दम् उपनयन्। किम्भूतैः अङ्गैः? इन्दीवरश्रेणी-श्यामलकोमलैः नीलसरोजदामसुन्दरसुकुमारैः। श्रेणीपदोपन्यासेनातिघनत्वमति-नीलत्वञ्च दर्शितम्? पुनः किम्भूतः? अनुरञ्जनेन विश्वेषां सर्वेषामानन्दं जनयत्। एतावन्ति विशेषणानि श्रृङ्गारेऽपि योज्यानि। 'पुंसः स्त्रियां स्त्रियः पुंसि संयोगः सततं स्पृहा। श्रृङ्गार इति विख्यातो रतिक्रीडादिकारणम्।।' श्यामो भवति श्रृङ्गारः श्वेतो हासः प्रकीर्तितः।' मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः। दैत्ये चैत्रे वसन्ते चे'ति विश्वः।।११।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।११।। [२]सकलशृङ्गाररससकलाभिज्ञस्य श्रीकृष्णस्य श्रीराधोत्कर्षप्रतिपादनाय पूर्वगीतैर्हावभावाद्यनभिज्ञाभिर्गोपीभियूथलीलैवोक्ता। इदानीं श्रीकृष्ण[३] क्रीडोत्कर्षं तदर्थमाह, विश्वेषामिति। हे सखि राधे मधौ वसन्ते हरिर्मनोहरणशीलः क्रीडतीत्यन्वयः। कीदृशः? [४] मुग्धः त्वद्विरहेण मूढः। यद्वा, मनोहरः त्वदागमनकाङ्क्षया [५] सुन्दरः। किं कुर्वन्? विश्वेषां व्रजवधूनां सर्वजीवानां वानुरञ्जनेनानुरागेणानन्दं सन्तोषं जनयन उत्पादयन्। पुनः किं [६] कुर्वन्? इन्दीवराणां नीलकमलानां श्रेणयः पङ्क्तयः [७]तद्वन्नीलैः श्यामलैःकोमलैश्च सुकुमारैः शृङ्गाराङ्गैर्वाऽनङ्गस्य [८] कामस्योत्सवं हर्षं उपनयन् उत्पादयन्। कीदृशो हरिः? स्वच्छन्दं स्वेच्छया व्रजसुन्दरीभिरभितः सर्वतोभावेन प्रत्यङ्गं; अङ्गमङ्गं प्रति इति प्रत्यङ्गम्; आलिङ्गितः आश्रितः। कयाचित्ताम्बूल - स्त्रक्चन्दनाद्युद्दीपनरूपं,[९] कयाचित् [१०] सस्मितकटाक्षानुरूपं, कयाचिद्रोमाञ्चस्वेदादिरूपं शृङ्गारस्याङ्गमाश्रित इति भावः। क इव मूर्तिमान् साङ्गः [११] शृङ्गारः शृङ्गाररस [१२] इव। श्रीकृष्णस्य श्यामाङ्गत्वेन शृङ्गाररस[१३]साम्ये श्यामो भवति शृङ्गारः। शृङ्गारविशेषणान्यप्येतानि पदानि।।११।।

१.नास्तीयं पुष्पिका-च.२.सकलशृङ्गारसकलाभिज्ञस्य-अ.ब.३.क्रीडोत्कर्षामाह-फ.४.त्वद्विरहेण मुग्ध:-अ.ब.५.नास्ति-ग.६.नास्ति-अ.ब.७.तद्वत् श्यामलै: नीलै:-ज.नास्ति-ड.ल.८.कामस्योत्कर्षं उपनयन् स्थापयन्-अ.ब.फ.९.कदाचित्-अ.१०.स्मितकटाक्षानुरूपं-ज.११.नास्ति-अ.ब.१२.एव-अ.ब.ग.१२.साम्यं-फ.ग.ह.ज.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।११।। विश्वेषामिति। हे सखि राधे [१] मधौ वसन्ते मुग्धो मनोहरो हरि: कृष्ण:क्रीडतीत्यन्वय:। क इव ? मुर्तिमान् शरीरधारी शृङ्गाररस इव। किं कुर्वन् अनुरञ्जनेन अनुरागेण विश्वेषां भक्तानां आनन्दं सन्तोषं जनयन्नुत्पादयन्। पुन: किं कुर्वन्? इन्दीवरश्रेणी नीलोत्पलमाला तद्वत् श्यामलकोमलै: कृष्णमनोहरै: [२] अङ्गैरवयवैरनङ्गोत्सवं कामहर्षमुपनयन्नुत्पादयन्। पुन: [३] कीदृश: ? स्वच्छन्दं स्वेच्छया [४] व्रजसुन्दरीभिर्गोपाङ्गनाभिरभित: सर्वतोभावेन प्रत्यङ्गं प्रत्यवयवं आलिङ्गित:। गोपीभिरेकदालिङ्गने यया[५]यदङ्गं प्राप्तं तया तदेवालिङ्गितमिति भाव:। " श्यामो [६] भवति शृङ्गार: सितो [७] हास्य: प्रकीर्तित: इति।" शृङ्गारविशेषणान्यप्येतानि पदानि।।११।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।११।। अष्टपद्यर्थं श्लोकेन वर्णयति; विश्वेषामिति। हे सखि राधे ! व्रजवधूगणानां विश्वेषां सर्वप्राणिनां अनुरञ्जनेन अप्रतिकूलतया आनन्दं हर्षं जनयन् कुर्वन्नित्यर्थ:। इन्दीवराणां नीलोत्पलानां श्रेणीव पङ्क्तिरिव श्यामलानि च तानि कोमलानि सुकुमाराणि तै: अङ्गै: करचरणमुखाधरकण्ठोर:स्थलादिभि: उपलक्षित: अनङ्गस्य कामस्य उत्सवं रासक्रीडारूपं उपनयन् रचयन् वधूजनानां कामोद्दीपनं कुर्वन्निति वा। तदङ्गावलोकनमात्रेण सर्वासां कामोद्दीपनं भवतीति भाव:। आलम्बनविभावत्वेऽपि तदवलोकनेनोद्दीपनत्वम्। अत एव स्वच्छन्दं अविरुद्धतया यथाभिलाषं व्रजसुन्दरीभि:, व्रजो नन्दनिवासघोष: ; तत्र सुन्दर्य: वल्लव्य: ताभि: अभित:, प्रत्यङ्गं अङ्गे अङ्गे प्रत्यङ्गं आलिङ्गितो हरि:। शृङ्गार: रतिस्थायिको रस: मूर्तिमानिव। मधौ वसन्ते मुग्ध:। मूर्तत्वेऽपि मूर्तिमत्वेन सम्भाव्यत इति वस्तूत्प्रेक्षा सिद्धास्पदा। अनेकनारीचुम्बनालिङ्नादि- समृद्धिमत्वनिमित्तेन शृङ्गारस्य स्वतस्सिद्धत्वेऽपि बालक: हरि: क्रीडति। (क्रिय) माणरतिरूपत्वेन मूर्तिमत्वेन कल्पनान्नोपमालङ्कार:।।११।।

१.नास्ति-ड.ल.२.नास्ति-ड.३.कथम्भूत:-क.ल.म.४.नास्ति-क.५.मदङ्गं-ड.६.भवतीति-ड.७.हास:-ल.म.

### (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।११।। विश्वेषामिति। हे सखि! राधे! मधौ वसन्ते मुग्धः सुन्दरो हरिः क्रीडतीति योजना। ''मधु पुष्परसे क्षौद्रे मद्ये ना तु मधुद्रुमे।'' ''वसन्तदैत्यभिच्चैत्रे'' इति **मेदिनी**। उत्प्रेक्षते। शृङ्गार इति। शृङ्गारो मूर्तिमानिव अतिशयशृङ्गारशालित्वात् पुंसः स्त्रियां स्त्रियाः पुंसि संयोगं प्रति या स्पृहा। स शृङ्गार इति ख्यातः क्रीडा रत्यादिकारणम्'' इति **भरतः**। किंकुर्वन्? विश्वेषां समस्तगोपीजनानाम् अनुरञ्जनेनानन्दं जनयन् हर्षमुत्पादनेनयन् शृङ्गारोऽपि तथा। पुनः किंकुर्वन्? अङ्गैरिति ।अवयवैरनङ्गोत्सवम् उपनयम् सम्पादयन् एवं शृङ्गारोऽपि स्वैरङ्गैर्विभावानुभावानुव्यभिचारिस्थायिभिरङ्गोत्सवं जनयति। अङ्गैः किंविधैः? इन्दीवरेति। इन्दीवरश्रेणीभिर्नीलोत्पलपङ्क्तिभिरिव श्यामलैः कोमलैश्च शृङ्गारोऽपि श्यामलो भवति। तथा च, ''श्यामो भवति शृङ्गारः स्मितो हासः प्रकीर्तितः'' इति **भरतः**। कोमलश्चापि शृङ्गारः। तथा च **शृङ्गारसर्वस्वे**, ''शृङ्गार उज्ज्वलः शान्तः कोमलः श्यामलः शुचिः'' इति। किंविधोऽसौ ? स्वच्छन्दमिति। हरिः स्वच्छन्दं स्ववशं यथा स्यादेवम्। व्रजसुन्दरीभिरभितः सर्वतः प्रत्यङ्गं प्रत्यवयम् आलिङ्गित आश्लिष्टः। अङ्गमङ्गं प्रतीतवीप्सायामव्ययीभावः शृङ्गारोऽपि तथा। उत्प्रेक्षालङ्कारः। ''गोष्ठाध्वनिवहव्रजाः'' **इत्यमरः**। ''विश्वं शुण्ठ्यां समस्ते च'' इति **मेदिनी**।।११।।

### (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।११।। अथ गीतार्थं श्लोकेन विशदयन्ती तमुद्दीपयति विश्वेषामति। हे सखि! मधौ वसन्ते मुग्धो हरिः क्रीडति। किं कुर्वन ? विशेषां सर्वगोपीनां जनानामनुरञ्जनेन तेषां स्व स्व वाञ्छातिरिक्तरसदानप्रीणनेन आनन्दं जनयन्। पुनः किं कुर्वन? अङ्गैरनङ्गोत्सवमाधिक्योन प्रापयन। कीदृशेः नीलकमलश्रेणीतोऽपि श्यामलकोमलैः इन्दीवरशब्देन शीतलत्वं श्रेणीशब्देन नवनवायमानत्वं श्यामलपदेन सुन्दरत्वं कोमलशब्देन सुकुमारत्वंच सूचितम्। ननु द्विकोटिस्थोऽयं रसः नायकस्यानुरागे सत्यपि नायिकानुरागमन्तरेण कथं तदुदयः स्यादत आह व्रजसुन्दरीभिरालिङ्गितः आलिङ्गनानुरञ्जनेनारञ्जित इत्यर्थः। एतेनान्योन्यानुरञ्जनमात्रतात्पर्यकतया प्रेमविपाकोद्-गतप्रेमरसाविर्भावेन प्राकृतरसस्तिरस्कृत इति सूचितम्। तर्हि सङ्कोचापत्तिः स्यात्। न स्वच्छन्दं यथा स्यात्तथा कालदेशक्रियाणामसङ्कोचादित्यर्थः। तथापि तस्य सर्वाङ्गता न स्यात्। न अभितः सर्वैरङ्गैरित्यर्थः। तथाप्यङ्गानां दिङ्मात्रता स्यात् न प्रत्यङ्गमिति

एकैकाङ्गस्य यथोचितक्रिययेत्यर्थः। नन्वेकेनानेकासां समाधानं कथं स्यात्तत्राह शृङ्गाररसो मूर्त्तिमानित्यहमुत्प्रेक्षे। यतः सोऽप्येक एव विश्वमनुरञ्जयन्नानन्दयति।।११।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।११।। एवं कृष्णस्य राधिकाविषयोत्कण्ठागर्भितक्रीडानुवर्णनेन तदुपसर्पणं सूचयन्ती पुनः आवश्यकहेतूपन्यासेन तदेव द्रढयति विश्वेषामिति। सखीति सम्बोधनेन यदाख्यामि तत्सत्यमेवेति सूचितम्। मधौ वसन्ते मधुशब्देन वसन्तोपादानं मधुवन्महामादकत्वा-भिप्रायेण, अतो विरहिषु तस्यातिकठिनत्वं सूचितम्। हरिर्मुग्धः सन् त्वदप्राप्त्य मदनेन मूढः मोहं प्राप्तः सन्। उक्तं च, 'राधासङ्गे यदा भाति तदा मदनमोहनः' अन्यथा विश्वमोहोऽपि स्वयं मदनमोहित इति। अत एव स्वच्छन्दं क्रीडाक्रमरहितं यथा स्यात्तथा क्रीडति। पूर्वकृतवसन्तविनोदाभ्याससंस्कारवशेन एव करचरणादिविन्यासमात्रं करोतीत्यर्थः। कीदृशः व्रजसुन्दरीभिः तस्य तादृशावस्थां स्वनिष्ठानुरागकृतां प्रत्येकं मन्यमानाभिः अभितः परितः अङ्गेषु प्रतिप्रत्यङ्गमालिङ्गितः एकैकाङ्गं यथोचितक्रियया श्लिष्ट इत्यर्थः। न चायं कामप्यवलोकते, नाऽपि सम्भाषते, नैवानुमोदते, किमपीति त्वं साक्षात् पश्येति भावः। एतदेव विशदयति। तासामेवानङ्गोत्सवं कामविकारोद्रे-कमिन्दीवरश्रेणी नीलोत्पलमाला, ततोऽपि श्यामलैः कोमलैः इति उपलक्ष्यणम्। सुशीतलैः सुगन्धैश्चेत्यर्थः। ईदृशैरङ्गैरवयवैरुपनयन् प्रापयन्, अत्र श्रीकृष्णाङ्गस्पर्शगुणेनैव तासामनङ्गोत्सवो न तु तासामङ्गस्पर्शेण श्रीकृष्णस्य किञ्चिदपीति भावः। किं च अनुरञ्जनेन तादृशचेष्टाव्यञ्जितत्वदेकनिष्ठानुरागेण विश्वेषां सर्वेषां पश्यतां जनानाम् आनन्दं जनयन्। धन्या खलु राधा यस्याः कृते पुरुषभूषणस्य ईदृशी चेष्टा जाता। तथा गुणज्ञश्चायं यः तादृश स्त्री रत्नप्रेमानुबन्धेन विवशीभूत इति सन्तोषमुत्पादयन् इत्यर्थः। इवोत्प्रेक्षायाम्। शृङ्गारः, शृङ्गाररसः मूर्त्तिमान् सन् क्रीडति किम्? शृङ्गारो हि सम्भोगविप्रलम्भभेदेन उभयात्मको भवति। तथाऽयमिति उत्प्रेक्षणीय इत्यर्थः। अथवा इवशब्दः उपमार्थः। यथा शृङ्गाररसौ मधौ क्रीडति तथाऽयमपीति अर्थः। मूर्त्तिमानिति अभूतोपमा। अयमपि स्त्रीपुरुषसाधारण्येन सर्वेषां प्राणिनां परस्परानुरागेण नलं जनयति। तथाऽयं श्यामलः वर्णः। शृङ्गारस्याङ्गीभूता ये केचन तैः सर्वेषामनङ्गोत्सवमुपनयति। व्रजस्त्रीत्युपलक्षणम्। सर्वैः प्रत्यङ्गमालिङ्गितो भवति।।११।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।११।। विश्वेषामनुरजनेनेति; हे सखिराधे! मधौ वसन्ते नाम चैत्रेमासि वा मुग्धः सुन्दरः मोहकारी वा हरिः क्रीडति। क्व इव क्रीडति? शृङ्गारस्य मूर्त्तिमान् विग्रह इव

अर्थात् स्वयं श्रीकृष्णः शृङ्गाररसस्यावतारः। पुरुषः प्रमदायुक्तः शृङ्गार इति संज्ञितः। किं कुर्वन्? अनुरञ्जनेन अनुरागेण विश्वेषां सर्वेषामर्थात् समग्रं लोकसकलमानन्दं जनयन् हरिः शृङ्गारश्च। पुनश्च किं कुर्वन्? अङ्गैरनङ्गोत्सवमुपनयन्नुपस्थापयन्। किम्भूतैरङ्गैः? इन्दीवरपङ्क्तिश्यामलकोमलैर्नीलोत्पलराजिवश्यामलसुकुमारैः। पुनः किंभूतः? व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः प्रति अवयवं प्रतीकं प्रतिप्रतीकमाश्लिष्टः। अभितः सर्वतः कथम्? स्वच्छन्दं यथा स्यात्तथा। अथवा यद्यदङ्गं यथा यथा समासादितं तत्तत् तया तया समालिङ्गितमिति। प्रति प्रतीकशब्दार्थः। अत्र सामान्यशृङ्गारात् भिन्नं भवति श्रीहरेः शृङ्गारः यत् खलु पूर्णाङ्गरूपेण संघटितं भवति। यथा प्रत्यङ्गं प्रतिभावं संपूर्णं आलिङ्गनचुम्बनरतिक्रीडायां सम्भवति। अतः तस्य क्रीडा पूर्णाङ्गमथवा पूर्णावयवक्रीडा इति मन्तव्या। अत्र वैदर्भी रीतिः दीपकमलंकारः। शार्दूलविक्रीडितं छन्दः। शृङ्गाररसः। वाक्यौचित्यमिति कुम्भकर्णः। उत्कण्ठिता नायिकालक्षणं यथा; प्रिये कृतव्यलीकेऽपि विरहोत्कण्ठिता मता। रसादिलक्षणं सर्वं शंकरमिश्रेण **रसरत्नप्रदीपिकां, दशरूपकं, शृङ्गारतिलकं, नाट्यशास्त्रा**दिकमुद्धृत्य प्रत्यपादित्। इति।।११।।

**१२-अद्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलं**
**प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः।**
**किं च स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदयाद्**
**उन्मीलन्ति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः।।१२।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१२।। वसन्ते दक्षिणावाता वान्त्येव ततोत्सङ्गवसद्भुजङ्गकवलक्लेशादिव प्रालेय पवनेच्छया श्रीखण्डशैलानिलः ईशाचलमनुसरतीति कवेरुत्प्रेक्षां चक्रे। मलयपर्वत-वातश्चन्दनतरुक्रोटरवासिसर्पाणां मुखश्वासैर्मिश्रः सन् विषज्वालया सन्तप्तो हिमावगाहनाय उपयातीत्यर्थः। ईशाचल इत्यचलानामीश इति। राजदन्तादि। ईशस्याचल इति वा विग्रहः। किञ्चेति न केवलमिदमेवेत्यर्थः। स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदयात्कुहुः कुहुरिति गिरः पिकानाम् उन्मीलन्तोति द्वितीयो वाक्यार्थः।

गिरः किम्भूताः कलोत्तानाः मधुराः स्फुटत्वेनोद्भट्यः।
कलावती कला प्रोक्तो ध्वनौ तु मधुरास्फुटे।
उत्तालं स्यादगम्भीरे किरीटोद्भटयोरपि।।

अत्र स्थितशब्दमध्याहृत्य चूतमुकुलान्यालोक्य स्थितानां पिकानामित्यर्थः प्रतिपत्तव्यः अन्यथा भिन्नकर्त्तृत्वात् क्त्वा प्रत्ययो दुरापः स्यात्। हरिरविदग्धाभिः सह क्रोडतीति प्रागुक्तं तत्कदाचिन्मिथ्या राधा मंस्यत इति दूतिप्रत्यक्षं दर्शयत्याह।।१२।।

इति कविराजश्रीनारायणदासकृतायां सर्वाङ्गसुन्दर्य्यां श्रीगीतगोविन्दटीकायां सामोददामोदरे नाम प्रथमः सर्गः।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१२।। श्रीखण्डशैलानिलो मलयाचलपवनः ईशाचलं हिमाद्रिमनुसरति याति। ईशश्चासावचलश्चेति। अथवा, ईशायाः पार्वत्याः गुरूरचलः, मध्यमपदलोपाद् टाब्दिद्दिनाद् वा ईशोपलक्षिताचल इति। अथवा, ईशाचलं कैलासमनु लक्ष्यीकृत्य सरति। कया? प्रलेयप्लवनेच्छया हिमावगाहनेच्छया। अत्रोत्प्रेक्षितं हेतुमाह, नित्येति। नित्यमुत्सङ्गे वसन्तो ये भुजङ्गा एव भुजङ्गकास्तेषां यदूलनं तस्मात्, तत्र वा यः क्लेशः तस्मादिव। अथ भुजङ्गकाद्यद्वलनं तेन यो जायमानः क्लेशः तस्मादिव। अथवा, कवलनं कवलो दशनं तस्मात्। सर्पदष्टो हि तत्तपोपन्तये शीतलेच्छुर्भवति। किं चेति विभावान्तरमाह। पिकानां कोकिलानां कुहूः इति गिर उन्मीलन्ति प्रादुर्भवन्ति। किंभूताः? कलोत्तालाः कलाश्च ता उत्ताला उदीर्णाः। कुतः? हर्षोदयात्। कि कृत्वा? स्निग्धानि यानि रसालमौलिषु मुकुलानि चुतशिरःसु कुङ्मलास्तानालोक्य। अथवा, स्निग्धानि रसालानां मौलिमुकुलानि चुतशिरांसि अशोकानां च मुकुलानीत्यालोक्य। हर्षोदयादिति क्रिययोरेककर्तृकत्वात्पूर्वकालता। शार्दुलविक्रीडितं वृत्तम्। अत्र वर्णानुप्रासोपमाहेतवोऽलंकाराः। वैदर्भी रीतिः। अत्र विप्रलम्भाख्यशृङ्गारसूचको रत्याख्यः स्थायीभावः। अत्र विरहिमनः शरीरकर्तन-कुशलानां स्निग्धरसालमौलिमुकुलानामालोकनेन जातहर्षाणां पिकानां गिरां तद्वैरीन्दुविलुण्डटाककुहूरूपेण यदुन्मीलनलक्षणं यथा क्रियास्वरूपनिरूपणमकारि तन्नितरामौचित्यकोटिमालम्बते। उक्तं च, "सगुणत्वं सुवृत्तत्वं साधुता च विराजते। काव्यस्य सुजनस्येव यद्यौचित्यवती क्रिया।।" इति।।१२।।

## (३) जगद्धरकृत-सारदीपिका

।।१२।। मलयानिलस्य दुःसहत्वे कारणमाह! अद्येति हे राधे! अद्य इदानीं वसन्तसमये श्रीखण्डशैलानिलः मलयजपवनः उत्सङ्गे क्रोडे वसन्तो ये भुजङ्गा सर्पास्तेषां कवलक्लेशादिव ग्रासोपतापादिव ईशाचलं हिमाचलं प्रालेयप्लवनेच्छया तूहिनमज्जने-च्छयानुसरति अनुगच्छति किञ्च पक्षान्तरे पिकानाङ्गिरो वाण्यः स्निग्धरसाल-मौलिमुकुलानि कोमलचूतस्तबककुण्डलानि आलोक्य दृष्ट्वा हर्षोदयात् आनन्दोदयात्

उन्मीलन्ति उद्गच्छन्ति कथंभूतागिरः कुहुः कुहुरिति कलोत्तालाः कुहुकहुरित्याकारेणा-व्यक्तमधुरशब्देनोत्तालाः प्रकाशाः ।।१ २ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१ २ ।। इदानीं राधां शीघ्रं गमयितुं मलयानिलादिदुःसहतामाअद्युत्सङ्गेति। श्रीखण्डशौलानिलो मलय पर्वत सम्बन्धी वायुरीशाचलं रूद्रस्याचलं हिमालयमनुसरति। कस्मादिव ? अद्रेर्मलयस्य उत्सङ्गे क्रोडे वसन्तो ये भुजङ्गाः सर्पास्तेषां कवलेनाश्लेषेण जानितो यः क्लेशः संतापस्तस्मादिव। तर्हि हिमाद्रिं किमिति व्रजतित्यत आह, प्रालेयेति। प्रालेयस्तुषारस्तस्य प्लवनमवगाहनं तस्येच्छया। अत्र सर्पैः कवलितोदगीर्णस्य पवनस्य तद्विषयसंपर्कादधिकं विरहिणां संतापकत्वं ध्वनितम्। न केवलमिदमेव दुःसहं वसन्तेऽपरमपीत्याह; किं चेति। पिकानां कोकिलानां कुहूः कुहूरित्येवंरूपाः गिरः शब्दा उन्मीलन्ति प्रकटीभवन्ति। किदृश्यः ? कलोत्तालाः कला अव्यक्तगिरो मधुराः, उत्ताला उद्भटाः। कस्मात्? स्निग्धा ये रसाला आम्रवृक्षास्तेषां ये मौलयोऽग्रभागास्तत्र यानि मुकुलानि तान्यालोक्य वीक्ष्य यो हर्षोदय आनन्दाविर्भावस्तस्मात्। अत्र क्वचित् "अद्योत्सङ्ग" इति पाठः। तत्राद्य वसन्ते इत्यर्थः। "तुषारस्तुहिनं हिमम्। प्रालेयं मिहिका चाथ" **इत्यमरः**। उत्तालः स्याद्वेमकुम्भे गभे चोत्ताल उत्कटे। "श्रेष्ठऽपि विकरालेऽपि स्यादुत्तार्लं प्लवंगमे" इति **विश्वः**।।१ २ ।।

इति श्रीमहामहोपाध्यायश्रीशंकरमिश्रविरचितायां श्रीशालिनाथकारिकायां गीतगोविन्दटीकायां रसमञ्जर्याख्यायां प्रथमेः सर्गः।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१ २ ।। वसन्तसमयमेव वर्णयति। अद्येति। अद्य अस्मिन् वसन्त समये श्रीखण्डशैलानिलः चन्दनगिरिसमीरणः उत्सङ्गे पटीरतरूपरिदेशे वसन्तः निषण्णाः ये भुजङ्गाः सुरतखिन्नपवनाशनाः तैः कवलः ग्रसनं तेन यः क्लेशः सर्वाङ्गीणव्यथा तस्मादिव प्रालेयं हिमं तत्र प्लवनेच्छया ईशस्य परमेश्वरस्य श्वशुरत्वेन सम्बन्धीयोऽचलः हिमवान तम् अथवा ईशः सर्वेषामचलानां स्वामी यः शैलः हिमवान् तमनुसरति अनुगच्छति तदभिमुखेन यातीत्यर्थः। शीतजलावगाहने विषनिवृत्तिर्लोकायुर्वेदयोः प्रसिद्धैव। किञ्च, अस्मिन् समय एव पिकानां कोकिलानां गिरः कूजितानि, स्निग्धानि कीटाद्यनुपहतानि रसालमौलिमुकुलानि चूताग्रभागस्थित-कोरकान्। किञ्चित् स्निग्धेति केषुचित् पाठः। तदा किञ्चिदीषत्स्निग्धानि विकसितमौलिमुकुलान्यालोक्य दृष्ट्वा हर्षोदयात् अस्माकं सहजसिद्धो यो ग्रासः

सहकारकोरकादिः स इदानीमाविर्भूत इति यः सन्तोषस्तस्य उदयादुत्पत्तेः कुहुः इत्यनुकरणशब्दः लोकेऽपीह इष्टवस्तुजनितसन्तोषातिशयवशाज्जनानां कूत्करणानि भवन्तीत्यनेन प्रकारेण कला अव्यक्तमधुराः उत्तालाङ्गभिराश्च सत्यः उन्मीलन्ति विरहिजनकर्णशूलायमानत्वेन प्रियलिङ्गितजनश्रुतिस्फुटसुधाधारायमाणत्वेन च विलसन्तीत्यर्थः। आकर्णयेति वाक्यशेषः। उम्प्रेक्षालङ्कारः।।१२।।

इति श्रीमदखिलविद्यापारावारदक्षिणामूर्त्तिमहादेवप्रसादलब्धविद्य पूर्वोत्तर-मीमांसा शब्दतर्क साहित्य सार्वभौमचरकूरिकण्डभट्टोपाध्यायानुजेन सर्वाम्बिकागर्भसूक्ति मुक्ताामणिना सर्वविद्याकविमतेन लक्ष्मणसूरिणा विरचिते गीतगोविन्दव्याख्याने प्रथमः सर्गः।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१२।। एतत्समयस्य केलियोग्यत्वं दर्शयति। अद्य एतदहनि श्रीखण्डशैलानिलो मलयपर्वतगन्धवाहः ईशाचले ईशो महादेवस्तस्याचलं पर्वतं कैलासमनुसरति अनु लक्ष्यीकृत्य सरति गच्छति। अत्रोत्प्रेक्षते कविः; उत्सङ्गे क्रोडेऽर्थात् पर्वतस्य, वसन्तो ये भुजङ्गाः। क्वचिच्चात्रोत्सङ्गवसादित्येव पाठः।

*'नायिकाङ्कसंसर्दिधपटवासेन' इति पाठ।

अत्र शब्दार्थ एव सोऽर्थः। तेषां कवलक्लेशात् ग्रासदुःखात् प्रालेयप्लवनेच्छया हिमावगाहनेच्छयैव। यद्वा ल्यवलोपे पञ्चमी। तादृशं क्लेशं प्राप्येत्यर्थः। अत्र विषज्वालाभिभूतेन महेशेनापि स एवाश्रित इत्यन्येषामपि विशेषणाभिभूतानां तदाश्रयणमुचितमिति दर्शयितम् ईशाचलपदेनोपन्यासः। पुनस्तदेव दर्शयति किञ्चेति, अन्यच्चेत्यर्थः। हर्षोदयादानन्दोदयात् पिकानां गिरो वाचः उन्मीलन्ति। गिरः किम्भूताः ? कलोत्तानाः कला मधुराः, उद्गतः तालो यासां ता उत्तानाः, ततश्च कर्मधारयः। क्वचिच्च कलोत्तालाः इति पाठः। तत्र कलेन माधुर्येण उद्गतस्तालो रागध्वनिर्यासां ताः। तदाह; सप्तस्वरास्त्रयो ग्रामाः मूर्च्छनास्त्वेकविंशतिः। द्वाविंशतिश्च श्रुतयः तालाः पञ्चाशदूनकाः।।' 'पुष्पसाधारणे काले कोकिलो रौति पञ्चमम्' ।स्निग्धरसालमौलि-मुकुलान्यालोक्य स्थितानाम्' इत्यध्याहार्यम्, कुहुःसामानाधिकरण्यप्रतिपादकत्वाद् गिरामचेतनत्वेन दर्शनाधिकरणत्वात्। वस्तुतस्तु तादृशमुकुलान्यालोक्य हर्षोदयादित्येवं योज्यम्। तथा चालोकनहर्षोदययोः सामानाधिकरण्यं वर्तत एव, नानुपपत्ति-गन्धोऽपीति।।१२।।

## (७) वनमालिभट्टकृत-सञ्जीवनी

।।१२।।[२]पूर्वमेव तवद्वायुवर्णनेन वसन्तस्य दुरन्तत्वमुक्तम्। सम्प्रति कोकिलकाकलीनामपि तथात्वमाहअद्युत्सङ्गेत्यादिना। श्रीखण्डशैलानिल: [३]मलयपर्वतवायु:। ईशो रुद्रस्तस्याचलो हिमाचलस्तमनु[४] सरति। किमर्थम्? प्रालेये प्रलयकाले यत्[५] पवनं जीवनं तदिच्छया। कस्मादिव? अद्रेर्मलयस्योत्सङ्गे[६]वसन्तो ये भुजङ्गा: सर्पास्तेषां[७] कवलेन[८]पानेन य: क्लेशस्तस्मादिव। अनेनास्योद्वेगावस्था कथिता। किञ्च पिकानां पुंस्कोकिलानां गिर: [१]कुहू: कुहूरित्येवं [२]रूपा: [३]पञ्चमस्वरानुवादिन्यो हर्षोदयादुन्मीलन्ति उद्भवन्ति। किं कृत्वा? स्निग्धानि रसालानामाम्राणां मौलौ[४]शिखरे यानि मुकुलानि तानि विलोक्य दृष्ट्वा। कीदृशा:? कलोत्ताला: कला मधुराश्चोत्तालाश्च। पुरुषकूजितत्वादुत्ताला: [५] राजसस्वभावोदयात्कला:। अनेन तेषामपि स्मर: क्षोभक एव। [६]तद्विरहिणां वामत्वादेवेति भाव:। एतत्सर्वं दुस्सहमिति ध्वनितम्। मौलि: पुंसि शिखायां स्यान्मुकुटे मस्तकेऽपि च इति **हलायुध:** [७]ध्वनौ तु मधुरास्फुटे कल: **इत्यमर:** (१.७.२)। [८] अर्थोत्प्रेक्षाऽयमलङ्कार:।।१२।।

१.पद्यमिदं मुद्रिते (निर्णयसागरमुद्रणालयीये) नास्ति; च.ड.क.ल.म. मातृकासु तु सर्गान्ते दृश्यते। २.पूर्वमेव वायुवर्णनेन-इ. ३.मलयाचल पर्वतवायु:-अ.ब.इ.फ.ग.ह.ज.४.चरति-अ.प्लवनं-अ.प्रवणं-ग.प्रवनं-फ. ६.नास्ति-ब.ये वसन्तो भुजङ्गा:-इ.फ.ग.ह.ज.७.चलनेन यानेन-फ.८.नास्ति-ह.

## (८) नारायणपण्डितकृत-पदद्योतनिका

।।१२।। मलयानिलस्य[९]दुस्सहत्वे कारणमाह [१०]अद्युत्सङ्गेति। हे राधे! अद्येदानीं वसन्तसमये [११]श्रीखण्डशैलानिल: मलयजपवन: उत्सङ्गे क्रोडे वसन्तो [१२]ये भुजङ्गा: सर्पास्तेषां कवलक्लेशादिव ग्रासोपतापादिव ईशाचलं हिमाचलं [१३]प्रालेय[१४] प्लवनेच्छाया[३७] तुहिनमज्जनेच्छया अनुसरति अनुगच्छति। [१५]अनुगच्छति नु वितर्के वा[१६]। किञ्च पक्षान्तरे पिकानां गिरो [१७] वाण्य: स्निग्धरसालमौलिमुकुलानि कोमलचूताग्र [१८]भागस्तवककुट्मलानि आलोक्य दृष्ट्वा हर्षोदयादानन्दोदयात् उन्मीलन्ति उद्गच्छन्ति। कथम्भूता: गिर:?कुहू: कुहूरित्याकारेणाव्यक्तमधुर[१९]शब्देन उत्ताला: प्रकटा:।।१२।।

## (९) कृष्णपण्डितकृत-जयन्ती

।।१२।।[२०]अभ्युत्सङ्गेति।श्रीखण्डोपलक्षित: शैलो मलयपर्वत: तस्मिन् अनिल: वात:। अभ्युत्सङ्गं अभित: उत्सङ्गं समीपं परित:समीप इत्यर्थ:। तत्र वसन्ते (ये) भुजङ्गा: तेषां कवलं कवलनं ग्रसनमिति यावत्। तस्य क्लेशादिव प्रालेये हिमे

प्लवनेच्छया अवगाहनाकाङ्क्षया ईशाचलं हिमवच्छिखरं कैलासाख्यं अनुसरति अनुगच्छति। कलाश्च अव्यक्तमधुराः उत्तालाः रलयोरभेदादुत्ताराः पिकानां कोकिलानां गिरः उन्मीलन्ति उद्यन्ते। वसन्तकाले रसालास्वादनात्कोकिलानां मधुरभाषित्वमिति स्पष्टोऽर्थः। पूर्वार्धनिबद्धस्य मलयानिलस्य कैलासगमनं प्रति भुजङ्गविषवेगस्याहेतुत्वेऽपि तद्धेतुत्वेन सम्भावनाद्धेतूत्प्रेक्षा। एवं वायोः क्लेशाभावादसिद्धः स्याद्दक्षिणतया कृशमन्दत्वरूपं निमित्तं गम्यम्। एवं प्रालेयप्लवनेच्छयेत्यत्रापि प्रालेयप्लवनं फलं न भवति। तस्य फलत्वेन सम्भावनात् फलोत्प्रेक्षा। अवाचकाद्गम्या। इच्छाया अभावात्कल्पिता गुणनिमित्ता हेतूत्प्रेक्षे ति वा। किञ्चिदिति। किञ्चिदीषत् स्निग्धानि स्नेहयुक्तानि रसालस्य मौलिमुकुलानि शिरःकोरकान् आलोक्य हर्षोदयात् मुहुः पुनः पुनः। कुहूरिति अनुकरणशब्दः।।१२।।

१.कुहुरित्येवंरूपाः-फ.ग.कुकूः कुकूरित्येवं रूपाः-इ.२.भूताः-अ.३.पञ्चमस्यानुवादिन्यो-अ.पञ्चमस्वरादिवादिन्यो-ज.४.नास्ति-अ.५.राजसभावोदयत्वात्कलाः-फ.ग.ह.ज.६.न विरहिणां-अ.फ.ग.ह.ज.७.ध्वनौ तु मधुरास्फुट इति कलः-फ.ह.८.अर्थोत्प्रेक्षापमालङ्कारः-फ.ग.ह.ज. ९.दुस्सहत्वकारणमाह-ल.१०.पद्यमिदं सव्याख्यं सर्गान्ते दृश्यते-च.ड.क.ल.म. ११.शैलानिलः-ल.१२.नास्तिः-ड.१३.प्रलय-ड.१४.प्लवनेच्छया नु हिममज्जनेच्छाया-ल.म.प्लवनेच्छया हिमचयमज्जनेच्छया-क.१५.तः.१६.पर्यन्तं नास्ति-ड.१७.वाचः-ल.म.१८.भागास्तानेव कुण्डलानि-ल.म.१९.स्वनेन-क.२०.अभ्युत्सङ्गेति-च.पुस्तकगतः पाठः।

## (१०) धनञ्जय-धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१२।। अद्योत्सङ्गेति। अद्य वसन्ते श्रीखण्डशैलानिलः ईशाचलं हिमालयमनुसरति। अचलानामीश इति राजदन्तादि ईशस्य महेशस्याचल इति वा विग्रहः। उत्प्रेक्षते। उत्सङ्गवसद्भुजङ्गकवलक्लेशाद्दिवमिति । उत्सङ्गे वसन्तः ये भुजङ्गाः तेषां कवलनेन कवलीकरणेन जनितो यः कालकूटविषसंसर्गजः क्लेशस्तस्मादिव। ईशाचलानुसरणे हेतुमाह, प्रालेयेति। प्रालेयप्लवनेच्छया हिमावगाहनवाञ्छया। उत्प्रेक्षालङ्कारोऽयम्। वसन्ते दक्षिणा वातास्तावदायान्त्येव। तत्र कविरुत्प्रेक्षां चक्रे। मलयानिलश्चलनतरुकोटर-वासिभिराशीविषैरशित्वा त्यक्तो विषज्वालया सन्तप्तो हिमावगाहनमाकाङ्क्षतीव। किञ्च न केवलमिदमेवेत्यर्थः। पिकानां कुहूः कुहूरिति। कुहूः कुहूरित्येतदक्षरद्वय-सम्वलिता गिरो विरुतानि हर्षोदयादुन्मीलन्तीति द्वितीयो वाक्यार्थः। गिरः किंविधाः? कलोत्तालाः इति। कला अव्यक्तमधुरा उत्तला उत्कटाश्च श्रेष्ठा वा कलत्वेन उत्ताला वा। गतार्थत्वात् कृतौ भावप्रत्ययस्य प्रयोगः। ''कलावति कलः प्रोक्तो ध्वनौ च

मधुरास्फुटे। उत्ताल उत्कटे श्रेष्ठे कराले च प्लवङ्गमे।।" इति **शाश्वतः**। किं कृत्वा गिरः समुन्मीलन्तीत्याह; स्निग्धरसालेति। स्निग्धाश्चिक्कणाः पल्लविता वा ये रसालमौलयश्चूतद्रुमशिखराणि तेषु तेषां वा मुकुलानि विकसनोन्मुखा कलिका आलोक्य दृष्ट्वा; अत एव हर्षोदयाद्धेतोरित्युक्तम्। अत्र स्थितशब्दमध्याहृत्य चूतमुकुलान्यालोक्य स्थितानां पिकानामित्यर्थः प्रतिपत्तव्यः। अन्यथा भिन्नकर्तृकत्वात् क्त्वा प्रत्ययो दुरापः स्यात्, अचेतनानां गिरां दर्शनयोग्यतापि सम्भवति।।१२।।

## (११) पूजारीगोस्वामीकृत-बालवोधिनी (टीकानास्ति)

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१२।। पुनर्वसन्तवर्णनेन कृष्णान्तिकगमनमेव द्रढयति। अद्रीति। एकस्यापि दिवसस्यासहत्वात् किंमुत सकलस्येति भावः। श्रीखण्डशैलानिलः चन्दनगिरि-सम्बन्धिपवनः ईशाचलं, ईशः महादेवः तस्याचलं हिमाद्रिमनुसरति। तदभिमुखेन प्रयाति। तं किमर्थमनुसरति, प्रालेयो हिमं तत्र प्लवनमवगाहः, तदिच्छया, तदिच्छापि कुतः, उत्प्रेक्षते अद्रेः, उत्सङ्गः श्रीखण्डशैलस्य क्रोडः, तत्र वसन्तस्तिष्ठन्तो ये भुजगाः सर्पाः तेषां कवलेन ग्रासेन यः क्लेशः सर्वाङ्गीणविष सन्तापस्तस्मात्। विषपीडितो हि शीतोपचारं शिवालयगमनं चापेक्षते। तथाऽयमपीति भावः। अतः श्रीखण्डशैलेति विशिष्टस्थानाश्रयतया महागर्वत्वम्। न निलीयन्तेऽस्मात् इति व्युत्पन्नेनानिलशब्देना-प्रतिकार्यत्वं सूचितम्। अनेनायं विरहसन्तापानामतिदुःसह इति व्यजते। अन्यदप्याह-किं च इति। विस्मृत सन्निकृष्टानिष्टस्मरणसूचकः किं ञ्च शब्दः। स्निग्धानि सद्योजाततया चिक्कणानि रसालमौलिमुकुलानि चूताग्रभागस्थितकुड्मलानि आलोक्य दृष्ट्वा अतिमृष्टभक्ष्यत्वेनापेक्षणीयत्वात् मुकुलानां दर्शनेन हर्षोदयात् हेतोः पिकानां कुहूः कुहूरिति गिरो ध्वनय उन्मीलन्ति, उद्गच्छन्ति। किम्भूताः कलेन उत्तालाः उद्भट्टा मलयानिलकोकिलादय कामदेवस्य परिकराः। तत्र चूतमुकुलं तु तस्यातिप्रियम्। प्रियचूत प्रसवो हि ते सखा' इति रतिविलापात्। एवं वसन्तस्य दुरतिवाहनीयत्वसूचनात् प्रियान्तिकगमने विलम्बं मा विधेहीति सख्युपदेशो व्यज्यते।।१२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१२।।अद्योत्सङ्गेति, श्रीखण्डशैलानिलो मलयाचलपवनः ईशाचलं हिमाद्रिमनुसरति याति। किमर्थं हिमावगाहनेच्छया। कुत्रास्तीच्छा ? ईशाश्चासावचलश्चेति। अथवा ईशायाः पार्वत्याः गुरुरचलः ईशोपल शीताचल इति। तत्राह, मलयस्य क्रोडे वसतां सर्पाणां कवलेन यः क्लेशः तस्मादिवोत्प्रेक्षे। अत्रोत्प्रेक्षितुं को हेतुः ? आह, अद्य उत्सङ्गे

वसन्तो ये भुजङ्गाः एव भुजङ्गकास्तेषां यद्वलनं तस्मात्। तत्र वा यः क्लेशः तस्मादेव। चन्दनतरूकोटरस्था हि कवलसन्तप्ता हिमस्नानेच्छया यातीत्यर्थः। न केवलमिदमेव दुःसहमन्यदपीत्याह किं चेति। स्निग्धाम्रवृक्षाणां अग्रभागे मुकुलान्यवलोक्य हर्षोदयात् कुहुः कुहुरिति पिकानां गिरः उदगच्छन्ति। मधुरास्फुटध्वनिनोद्भटाः। शार्दूलविक्रीडितं वृत्तम्। अत्र वर्णानुप्रासोपमा हेतवोऽलंकाराः इति **कुम्भः**। वैदर्भीरीतिः।।१२।।

**१२-(क) रासोल्लासभरेण विभ्रमभृतामाभिरवामभ्रुवा-**
**मभ्यर्णं परिरभ्य निर्भरमुरः प्रेमान्धया राधया ।**
**साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुतिः**
**व्याजादुद्भटचुम्बितः स्मितमनोहारी हरिः पातु वः।।१२-क।।**

इति श्रीगीतगोविन्दे सामोददामोदरो नाम प्रथमः सर्गः।।

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी (टीका नास्ति)

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१२-क।। इदानीं सर्गान्ते कविराशिषमाशास्ते; रासोल्लासेति। हरिर्वो युष्मान्पातु। किंभूतो हरिः? राधया गीतस्तुतिव्यजात् अमृतमयमुखनिर्गतत्वात् इदं गीतममृतमेवेति मिषेण व्याहृत्य उत्कटं यथा स्यात्तथा चुम्बितः। इतीति किम्? साधु युक्तमेतत् यद्गीतममृतकल्पम्। यतस्त्वद्वदनं सुधामयम्। अत्र विंकारे मयट्। अत्रान्यनारीसंनिधौ चुम्बनमयुक्तमिति गीतस्तुतिव्याज्जोक्तिः। किं कृत्वा? निर्भरं गाढं यथा स्यात्तथोरः परिरभ्य। क्व? आभिरवामभ्रुवां गोपाङ्गनानामभ्यर्णं समीपे । किंभूतानां वामभ्रुवाम्? रासो गोपक्रीडा तत्रोल्लासः सहर्षप्रादुर्भावस्तस्य भरेण विलासवतीनाम्। किंभूतो हरिः? स्मितेनान्यनारीणां मनो हर्तुं शीलं यस्य स तथा। अथवा, अन्यनारीसमीपे आलिङ्गनं लज्जावहमिति तत्परिजिहीर्षया राधाया हेतुमर्भं विशेषणमाह; प्रेमारधयेति। "कामान्धः किंचिन्न पश्यति" इति वचनादतिप्रेम्णा व्याकुलयेत्यर्थः। अत्र विप्रलम्भः शृङ्गारः। आशीरप्रस्तुतप्रशंसाव्याजोक्त्याक्षेपहेतवोऽलंकाराः। प्रगल्भा नायिका। मुग्धो नायकः। अत्र "तरूमिव कमितारं चुम्बनार्ताधिरूोढुं यदभिलषति नारी तच्च वृक्षादिरूढम्।।" "इति कृत्वा वृक्षादिरूढमाश्लेषः।" "आभीरजाश्चुम्वनहार्यचत्ताः" इति, "नमितकमिद-मादमाहुर्योषितो यद्वलेन प्रियमुखमभिवक्त्रं न्यस्य तिष्ठन्त्युदास्याः" इति **रतिरहस्यात्** नमितकं नाम चुम्वनविशेषः। शार्दूलविक्रीडितं छन्दः। अत्र राधाया वीरायितेनो-

त्साहात्मकस्य वीररसस्याविर्भावात्तदुपयोगिनी आरभटी वृत्तिः। द्वित्रिपदे तु पाञ्चाली रीतिः।अर्धमागधी रीतिश्चेति। स्थितलयं गानम्।।१ २ ।।

यत्सर्ग संविधातुं नृपतिगुणनिधिं सार्गकर्तुर्निसर्गा-
च्छिक्षाभूत्सर्गवर्गः सकलकलितृणां स्वर्गिग्रिणां च।
राज्ञा कुम्भेन तेन व्यरचि विवरणं नव्यसर्गे विसर्गे-
ऽरीणां दक्षेण सर्गे प्रथमपरिमिते गीतगोविन्दसर्गे।।
यत्र स्याद्गुर्जरी रागस्तालो झम्पेति भागशः।
यथाशोभं प्रयोगोऽपि गद्यपद्याञ्चितान्तरः।।
आभोगान्ते स्वराः पाटाः पुनः पद्यानि कानिचित्।
सामोददामोदराद्यः प्रबन्धो भ्रमरः पदम्।।
इति सामोददामोदर भ्रमरपदनामा चतुर्थःप्रबन्धः।।
पातिव्रत्यपरामपि प्रियतमां वीक्ष्यानुरागादहं
चैतस्यामपि सूक्तिभिः समभवं मानादिरक्षापरः।।
नो जाने कतमैः पुनर्निजगुणैस्तस्याः सपत्नीव मे।
कान्ताया रमञ्जरीयमधुना चेतः समाकर्षति।।

इति श्रीमेदपाटसमुद्रसंभवेन रोहिणी रमणेन कुंभकर्णेन विरचिते गीतगोविन्दविवरणे सामोददामोदरनामा प्रथमः स्वर्गः।।१ २-क।।

## (३) जगद्धरकृत-सारदीपिका

।।१ २-क।। कविः कथोपक्रमं त्यक्त्वा लोकान् शिक्षयति। रासोल्लासेति हरिः कृष्णः वः युष्मान् पातु इत्यन्वयः। कथम्भूतो हरिः रासोल्लासभरेण गोपिक्रीडायां हर्षातिशयेन विभ्रमभृतां श्रृंगारविलासधारिणीनाम् आभीरवामभ्रुवां गोपिकानाम् अभ्यर्णं समीपं निर्भरं[४०] गाढं यथा तथा उरः वक्षःस्थलं परिरभ्य आलिङ्ग्य राधया उद्भटं प्रकटं यथा स्यात्तथा गीतस्तुतिव्याजात् गानप्रशंसाच्छलेन चुम्बितः न तु भवतु ताः सुविभ्रमः प्रत्यक्षं युवतिगणं पस्यन्त्याश्चया कथं चुम्बितस्तत्राह प्रेमान्धया प्रेम्णा हर्षातिशयेनान्धया कृष्णम् अन्योन पश्यततीति ।तया कि कृत्वा त्वद्वदनं त्वन्मुखं सुधामयममृतमयं साधु शोभनम् इति व्याहृत्युक्त्वा कथम्भूतो हरिः स्मितमनोहारी राधायाः चुम्बनकौशलं दृष्ट्वा स्मितेन ईषद्धास्येन मनोहर्तुं शीलं यस्य सः।।१ २-क।।

## (४) शंकरमिश्रकृत- रसमञ्जरी (टीका नास्ति)

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी (टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१२-क।। रासवर्णनमेव प्रकृतसर्गार्थ इत्यादि दर्शयितुमाशीर्दानव्याजेन पुनस्तदेव दर्शयति। साधु समीचीनं त्वद्वदनं त्वदाननं सुधामयम् अमृतमयमिति व्याहृत्य उक्त्वा गीतस्तुतिव्याजात् गानप्रकर्षछलात् रासोल्लासभरेण गोपक्रीडातियेन विभ्रमभृतां श्रृङ्गारभावधारिणीनाम् आभीरवामभ्रुवां गोपाङ्गनानाम् अभ्यर्णे निकटे उरो वक्ष:स्थलं निर्भरं गाढं यथा स्यादेवं परिरभ्यालिङ्ग्य। एतादृशधाम्ने[s] हेतुगर्भविशेषणमाह; प्रेमान्धया प्रेमान्धयेव राधया गोप्या उद्भटचुम्बित: प्रकटचुम्बित:। अतएव प्रेमान्धाया: तादृशछलपरिचयात् स्मितेन मनोहर्तुं शीलं यस्य तादृक् हरि: कृष्ण: वो युस्मान् पातु रक्षतु। सामोदो दामोदरो यत्रेति व्युत्पत्त्या सामोददामोदर इति सर्ग नाम।।१२-क।।

इति श्रीमहाकाव्ये समस्तप्रक्रियाविराजमानमहाराजशुक्लध्वजविरचिताथां सारवत्यां गीतगोविन्द- टीकायां प्रथम: सर्ग:।

[s]'... धाष्टर्ये' इति पाठ।

## (७) वनमालिभट्टकृत- सञ्जीवनी

।।१२-क।। [२]सङ्गीतिश्रोतृभ्य: कविराशिषं ददाति; रासोल्लासेति। हरि: श्रीकृष्ण: वो[३]युष्मान् पातु[४]रक्षतु।[५]कीदृश: ? स्मितमनोहरी स्मितेन[६], [७]मनोहारी। स्मितहरो[८]वा पाठ:। स्मितेन ईषद्धास्येन शोकहर:। हारी हारवान्। पुन: कीदृश:[९] ? प्रेमान्धया सहचरीवचनप्रेमपूरया राधया [१०] निर्भरं[४०] गाढं स्यात्तथा उरो वक्ष:स्थलं आभीरवामभ्रुवां गोपवधूनां अभ्यर्णे समीपे परिरभ्य आलिङ्ग्य रास्क्रीडायां उल्लासभरेण हर्षातिशयेन गीतस्तुतिव्याजात् गानप्रशंसाच्छलेन इति व्याहृत्योक्त्वा उद्भटं यथा स्यात्तथा चुम्बित:। इतीति किम् ? साधु त्वद्वदनं सुधामयम्। किं भूतानाम् ? [११]विभ्रमभृतां शृङ्गारविलासवतीनाम्। अत्रानादरे षष्ठी। ननु सा कथं तच्चक्रे ? तथोक्तं प्रेमान्धयेति। उद्भटचुम्बनं कामसर्वस्वोक्तम्। तल्लक्षणम्-

''कान्तं भुजाभ्यामालिङ्ग्य प्रेयसी प्रणयान्विता।
सशब्दं चुम्बति मुखं [१२]यत्तदुद्भटमुच्यते''।।इति।

सर्गान्ते टीकाकारोक्ति:

''वन्दे युवतियूथस्थं कृष्णं केलिकलानिधिम्।
कालिन्दीजलसंसिक्तं सर्वाभरणभूषितम्'' ।।

इतिश्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंस[१३]शिवदासात्मज[१४]श्रीवनमालिभट्टविरचितायां[१] वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां [२]व्रजयुवतिकेलिवर्णने सामोददामोदरो नाम [३]प्रथम सर्ग:।।१२-क।।

१.निर्भरसुखं-च.२.सङ्गीतिश्रोतृन्-अ. सङ्गीते श्रोतृन्-ब.इ.फ.ग.ह.ज.३.युष्माकं युष्मान् वा-ज.४.नास्ति-अ.५.त:६.पर्यन्तो भागो नास्ति-अ.ब.७.त:९.पर्यन्तो भागो नास्ति-अ.ब.८.इतिवा-ज.१०.नास्ति-अ.ब.इ.फ.ह.११.नास्ति-अ.ब.इ.फ.ग.ह.१२.यदुद्भट-मुदाहृतम्-ग.१३.शिवदास-पण्डितात्मज-फ.ग.ह.१४.श्रीभट्टवनमाली-अ.ब.

## (८) नारायणपण्डितकृत- पदद्योतनिका

।।१२-क।। [४]कवि: कथोपक्रमं [५] त्यक्त्वा लोकान् प्रत्याशिषो [६] ददाति रासोल्लासेति। हरि: कृष्ण: वो युष्मान् पातु इत्यन्वय:।[७] कीदृश: ? रासोल्लासभरेण [८] गोपीक्रीडया हर्षातिशयेन विभ्रमभृतां श्रृङ्गारविलासधरणीनां आभीरवामभ्रुवां गोपाङ्गनानां अभ्यर्णे समीपे निर्भरं गाढ़ं यथा स्यात्तथा उरो वक्ष:स्थलं परिरभ्यालिङ्ग्य राधाया [९] उद्भटं यथा स्यात्तथा गीतस्तुतिव्याजाद[१०] गीतप्रशंसाच्छलेन चुम्बित:। किं कृत्वा ? त्वद्वदनं त्वन्मुखं सुधामय[११]ममृतमयं साधु शोभनमिति व्याहृत्योक्त्वा। [१२]कीदृशो हरि: ? स्मितमनोहरी राधायाश्चुम्बनकौशलं दृष्ट्वा[१३] स्मितेनेषद्धास्येन मनो हर्तुं शीलं यस्य स:।।१२-क।।

[१४] इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां सामोददामोदरो नाम प्रथम: सर्ग:।।

## (९) कृष्णपण्डितकृत- जयन्ती

।।१२-क।। सर्गान्ते मङ्गलं तनोति, रासोल्लासेति। रासक्रीडाविशेषे उल्लास: तदनुष्ठानोत्साह:। तस्य भरेण वेगेन प्रेम्णा हार्देन अन्धया जनसमीपे कथमालिङ्गनीय इति शङ्काशून्यया राधया। आभीरा: वल्लवा: तेषां वामभ्रुवां तरुणीनां अभ्यर्णं समीपे निर्भरं अत्सन्तं सुखं यथा स्यात्तथा परिरभ्य आलिङ्ग्य त्वद्वदनं सुधामयं अमृतप्रायं साधु इति व्याहृत्य उक्त्वा गीति: गीयमाना स्वरसन्दर्भरूपा तस्या: स्तुति: लक्षणलक्षितत्वेन श्राव्यत्वेन गुणकीर्तनं तस्या: व्याजात् मिषात् उद्भटं यथेष्टं चुम्बित:। अत एव स्मितमनोहारी मन्दहसितरुचिर: हरि: श्रोतृन् पातु। एतद्वाक्यं सखीप्रदर्शनसमये विप्रकृष्टत्वात्तात्कालिकं न भवति। परन्तु कविना राधासहितं तया रासक्रीडास्थं ध्यायतां मङ्गलं कृतमिति बोध्यम्। वर्णितरासक्रीडायान्तु तस्यामन्यत्रावस्थानं ज्ञायते पूर्वोत्तराष्टपदीभ्यामिति। व्याजादित्यनेन चातुर्यम्।।१२-क।।

[१]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां सामोददामोदरो नाम प्रथम: सर्ग:।।११।।

१.सञ्जीवन्यां-अ.ब.२.त:३.पर्यन्तं नास्ति-अ.ब.४.इदानीं कवि:-क.५.त्यक्त्वाशिषं-ड.६.ब्रूते-क.७.कथम्भूतो हरि:-क.ल.म. ८.गोपक्रीडाया:-क.गोपक्रीडायां-ल.गोपक्रीडायां-ल.म. ९.उत्कटं-ल.म.१०.गानप्रशंसा-क.ल.म.११.अमृतं-क.१२.कथम्मूतो-क.ल.म. १३.स्मितेनेष-द्धासेन-ल.म.१४.इति श्रीनारायणपण्डितकृतगीतगोविन्दे प्रथम: सर्ग:-ड.इति श्रीमद्गीतगोविन्दे जयदेवकृते

पदद्योतिन्यां सामोददामोदरो नाम प्रथमः सर्गः-क.इति श्रीगीतगोविन्दटीकायां नारायणपण्डितकृतायां भीषदासकारितायां प्रथमः सर्गः। इति चतुर्थाष्टपदी-ल.म.

## (१०) धनञ्जय-धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन) (टीकानास्ति)

## (११) पूजारीगोस्वामीकृत- बालवोधिनी

।।१२-क।।अथ कविरपि वसन्तरासमनुवर्णयन् शारदीयरासकृत-राधा-श्रीकृष्ण-विलासमनुस्मरन् तद्वर्णनरूपमाशिषं प्रयुंक्ते; रासेति। हरिर्वो युष्मान् रक्षतु। कीदृशः ? आभीरवामभ्रुवां गोपसुन्दरीणां समीपे श्रीराधया उद्भटं यथा स्यात्तथा उरः परिरभ्य चुम्बितः लज्जाशीलायास्तत्र तत्सिद्धिः। कथं ? प्रेमान्धया प्रेमावेशादित्यर्थः। किं कृत्वा ? त्वद्वदनं साधुसुधामयमिति निगद्य गीतस्तुतिव्याजं विधाय अतस्तद्वैदग्ध्या-वलोकनात् स्मृतेन तस्या मनोहरणशीलः। कीदृशानां ? रासोल्लासभरेण विभ्रमभृताम्। अतएव सर्गोऽयं श्रीराधाविलासानुभवेन आ सम्यङ् मोदेन सह वर्त्तमानो दामोदरो यत्र स इति।।१२-क।।

इति बालवोधिन्यां श्रीगीतगोविन्दटीकायां प्रथमः सर्गः

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।१२-क।।अथ कविः श्रीराधारहितस्य श्रीकृष्णस्य वसन्तक्रीडानुवर्णने असन्तुष्ट-प्रायान् भक्तानाशंक्य तस्य राधया सह पूर्वकृतशारदीयरासलीलाचरितं उपक्षिपन् तेन च तान् प्रति आशिषं प्रयुजानः सर्गमुपसंहरति रासेति। हे भक्तजनाः। हरिर्वः युष्मान् पातु। भक्तिरसमास्वादयन् परिपालयतु। कीदृशः आभीरवामभ्रुवां गोपसुन्दरीणामभ्यर्णे निकटे राधया स्वनिष्टप्रेमनिवासभूमितयाऽतिस्पृहणीयमुरो वक्षःस्थलं, अत एव निर्भरं दृढं वामनीकृतकुचमण्डलं यथा स्यात्तथा परिरभ्यालिङ्ग्य उद्भटमतिशयं चुम्बितः, किं कृत्वा, प्राणेश्वर। त्वद्वदनं तव मुखं साधु सुधामयमिति व्याहृत्य सम्भाष्य यद् गानमाधुर्येणाहमुन्मादिताऽस्मीति गीतस्तुतिव्याजात् गीतस्तुतिं विधायेत्यर्थः। ल्यब्-लोपे पञ्चमी। ननु कथं तासामग्रे लज्जाशीलायास्तस्यास्तत्सिद्धिः। यतः प्रेमान्धया प्रेमावेशस्तु किं न करोतीति भावः। तासां कीदृशीनां रासविषये उल्लास उत्साहस्तस्य भरेणातिशयेन बिभ्रमरूपं विविधभावाभिव्यञ्जकविला-सवतीनामित्यर्थः। तत्तत् भावाक्षिप्तचित्ततया अन्यव्यापारमजानन्तीनामिति भावः।

अत एव स्थितमनोहारी, तद्वैदग्धकृतालिङ्गनचुम्बनातर्कितलाभसञ्जातान-न्दसमुदितमन्दहसितेन तस्या मनोहरणशील इत्यर्थः।।१२-क।।

इति श्रीगीतगोविन्दे सामोददामोदरो नाम प्रथमः सर्गः।

श्रीराधाविलासदर्शनोत्कण्ठारूपेणामोदेन सह वर्त्तमानो दामोदरो यस्मिन् इति तन्नामायं सर्गः।

।। इति श्रीलक्ष्मणभट्टविरचितायां रसिकरङ्गदाख्यायां श्रीगीतगोविन्दव्याख्यायां प्रथमसर्गः समाप्तः।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१ २-क।। रसोल्लासेति; अत्र कविराशिषमाशास्ते सर्गान्ते। हरिर्वो युष्मान् पातु। किम्भूतो हरिः ? राधया गीतस्तुतिव्याज्यात् अमृतमयमुखनिर्गतत्वात् इदं गीतममृतमेवेति मिषेण व्याहृत्य उत्कटं यथा स्यात्तथा चुम्बितः। इतीति किम्? साधु युक्तमेतत् यद्गीतममृतकल्पम्। यतः त्वद्वचनं सुधामयमिति। अन्यनारी सान्निधौ चुम्बनमयुक्तमेव। गीतस्तुतिव्याजोक्तिः किं कृत्वा? निर्भरं गाढं यथा स्यात्तथोरः परिरभ्य। आभीरवामभ्रुवां गोप्याङ्गनामभ्यर्णं समीपे। वामभुवाम्? रासस्योल्लासः गोपक्रीडा सहर्षं प्रादुर्भावस्तस्य तद्वतीनां विलासवतीनाम् किम्भूतो हरिः। स्मितेनान्यनारीणां मनो हर्तुं शीलं यस्य स्यात्तथा। अथवा अन्यनारीसमीपे आलिङ्गनं लज्जावहमिति तत्परिजिहीर्षया राधाया हेतुगर्भं विशेषणमाह। प्रेमान्धःकामान्धः किञ्चिन्न पश्यति। अतिप्रेम्णा व्याकुलयेत्यर्थः। विप्रलम्भशृङ्गारः। आशीरप्रस्तुतप्रशंसाव्याजोक्तिः, आक्षेपः हेतवोऽलंकाराः इति कुम्भकर्णः। प्रगल्भा नायिका। मुग्धनायकः। चुम्बनस्य प्रकारभेदे बृक्षाधिरूढआश्लेषः विहितः। तद्यथा, आभीरजाश्चुम्बनहार्यचित्ताः इति। **रतिरहस्ये**ऽपि बाहुल्येन चुम्बनविषये प्रपञ्चितम्। आरभटीवृत्तः। पाञ्चालीरीतिः। तत लयगानं, भ्रमरपदनामा चतुर्थः प्रबन्धः।।१ २-क।।

श्रीगुरुं सद्गुरुं नौमि पितामातामहेश्वरौ।
योगतन्त्रस्य साधनं सर्वं तेन विस्तीर्यते।।
श्रीमाता जगदम्बिका हि विमला यस्याः कटाक्षेऽधुना
यस्याः हास्यकलां विधत्ते सुतरां परापरावाक्यधीः।
नत्वारविन्दगुरुं मातरं तां मीराम्बिकाम्।
गीतगोविन्दटिप्पणी प्रफुल्लेन विधीयते।
स्मर्यते राधाकृष्णयोर्लीला त्वलौकिकी क्षितौ
स्वर्णलताख्या टिप्पणी कृपयात्र वितन्यते।।
सा मीरा जगदम्बिका हि सुतरां राधार्चना स्तुयते
तस्याः कृपाकटाक्षेण टिप्पणी हि प्रवर्तते।
इति कविः श्रीप्रफुल्लमिश्रविरचितायां गीतगोविन्दटिप्पण्यां प्रथमः सर्गः।

# ।। द्वितीयः सर्गः ।।

## अक्लेशकेशव



## ।। द्वितीयः सर्गः ।।

।अक्लेशकेशवः ।

**१३-विहरति वने राधा साधारणप्रणये हरौ**
**विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः।**
**क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली-**
**मुखरशिखरे लीना दीनाप्युवाच रहः सखीम् ।।१३।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।१३।। उत्तरगीतमवतारयति। दीना विरहखिन्नापि राधा सखीमुवाचेति योजना। सखीवचनात् कृष्णे जातानुरागा इत्यपि शब्दाद्वेद्यम्। कीदृशा ईर्ष्यावशेन अन्यतो गता कथमीर्ष्येत्याह। साधारणप्रणये हरौ विहरति विगलितनिजोत्कर्षादिति। "साधारणं तु सामान्यं प्रश्रयप्रणयौ समौ।" पुनः कीदृशी क्वचिदपि लताकुञ्जे लीना। लताशब्दोऽत्र वासन्तीपरो बोद्धव्यः। लतागृहस्यैव कुञ्जत्वाल्लताशब्दोपादानव्यापत्तेः। "वासन्ती माधवीलतेत्यमरः।" पुनः कीदृशी, लताकुञ्जे गुञ्जन्मधुव्रतमण्डलीमुखरशिखरे गुञ्जन्मधुव्रतमण्डल्या मुखरं शिखरमग्रभागो यस्येति वहुव्रीहिः। "मधुव्रतो मधुकर **इत्यमरः**।" हरिणी नाम वृत्तम्।।१३।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

**।। धन्नासीरागेण गीयते यतितालेन रूपककाल प्रतिमण्ठ तालेन परिमठ।।**

।।१३।। भुवनशपादकमलं प्रणम्य कुम्भो नृपतिरतिविमलम्।
जयदेवरचितमातुं युनक्ति युक्तेन धातुना गातुम्।।

इदानीं हरेरभिलाषेर्ष्यारूपदोलारूढचित्ता राधा सखीमाह। पूर्वसर्गेऽभिलाष-चिन्तारूपं दशाद्वयं निरूप्य स्मरणलक्षणदशापरदर्शनार्थं द्वितीयसर्गारम्भः।। विहरतीति। राधा सखीं रहोऽपि गोप्यमप्युवाच। यद्यपि लताकुञ्जे स्वरहस्यं वक्तु नोचितं तथापि स्मरपारवश्यविह्वलतया गोप्यागोप्यं नाज्ञासीत्। क्व सति ? साधारणप्रणये सकलगोपिकासु समानस्नेहे हरौ वने वृन्दावने विहरति सति। किंभूता राधा ? विगलितनिजोत्कर्षादन्यस्त्रीभ्यो निजातिरेकापगमादीर्ष्यावशेनासहिष्णुतयान्यतो गता। यत्र स्थिता अन्याभिः क्रीडन्तं न पश्यतीति। अत्रार्थे पुनर्विशेषमाह; गत्वापि क्वचिदपि कुञ्जे ? झङ्कारपरभ्रमरश्रेण्या

वाचालाग्रभागे। अत एव दीना; अत्रापि तैरधिककामोद्दीपनात्। अत्र "रसयुगहयैर्न्सौ म्नौ स्लौ गो यदा हरिणी तदा" इति हरिणी छन्द:। विरहासहिष्णुतालक्षणो विप्रलम्भो रस:। रतेरेवात्युद्रेकाद्रसवदलंकारता। वर्णसाम्येनानुप्रासश्च। प्रौढा नायिका। अत्र गलितनिजोत्कर्षवशाद्दीनस्य वचनाशक्तेर्यत्सखीं प्रति रहस्यकथनं "अपि शब्देन द्योत्यते तन्नितरामौचित्यचमत्काराय। यदाह, "उचितस्थानविन्यस्तौर्निपातैरर्थसंगति:। उपादेयैर्भवत्येव सचिवैरिव निश्चला।। "इति श्लोकोक्तेवार्थ विशिनष्टि वर्णयति। तालेन,"लघुश्चैको द्रुतद्वयम्" इति।।१ ३ ।।

## (३) जगद्धरकृत- सारदीपिका

।।१ ३ ।। विहरतीति राधा रह: एकान्ते सखीं उवाच कथंभूता राधा! वने वृन्दावने हरौ कृष्णे विहरति क्रीडति सति विगलितनिजोत्कर्षात् गतनिजभाग्यात् ईर्ष्यावशेन असहिष्णुतया अन्यतोऽन्यस्मिन् स्थलेगता कथं भूते हरौ साधारणप्रणये अन्यगोपीतुल्यं प्रेम्णा अत एव क्वचिदपि लताकुञ्जे लतागृहे लीना गुप्ता कथम्भूते कुञ्जे कूजतागम्भीरं शब्दं कुर्वतां मधुव्रतानां भ्रमराणां मण्डल्या समूहेन मुखरशिखरे शब्दायमानाग्रभागे अत एव दीनापि दु:खितापि सा राधा।।१ ३ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१ ३ ।। एतद्वचनै: सख्या प्रतिबोधिताया: समक्षमन्याभि: सह निर्भरं क्रीडन्तं हरिं दृष्ट्वाऽसहमानाया अत एव क्वचित्कुजान्तरगताया राधाया अवस्थान्तरं वर्णयितुमाह,विहरतीति। राधा सखीम् इति वक्ष्यमाणमुवाचोक्तवती। किदृशी? ईर्ष्यावशेनान्यतोऽन्यत्र गता। ईर्ष्यायां हेतुमाह,विगलितेति। विगलितो गलितो निज: स्वीय उत्कर्षऽहमेव हरौ? साधारणो राधायामन्तगोपाङ्गनायां च समान: प्रणय: प्रेम यस्य तादृशे। अत एव दीना निभृतं निलीय स्थिता। कीदृशे कुञ्जे? गुञ्जन्त: शब्दायमाना मधुपा भ्रमरास्तेषां या मण्डली पङ्क्तिस्तया मुखरं वाचालं शिखरमग्रभगो यस्य तादृशे। अत्र "कुञ्ज" पदेनैव लताच्छादितगृहप्रात्पौ "लता" पदमतिनिबिडत्वसूचनाय। "प्रणय: प्रेम्णि विश्रम्भे" इति **विश्व**:। "इर्ष्यामाहु: समानेषु मानदानाद्य- मर्षणम्" इति।।१ ३ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१ ३ ।। एवं सखीवाक्यमुखेन वसन्तसमयं तत्र भगवत: श्रीकृष्णस्य विहारांश्च उपवर्ण्यानन्तरं राधायाश्चरितं वर्णयति। विहरतीति राधाकर्त्री साधारणप्रणये स्वस्यामन्यासु च समानप्रेमणि हरौ श्रीकृष्णे वने वृन्दावने विहरति युवतिभि: सहक्रीड़ति आक्रीडति, अथवा असाधारणप्रणये स्वापेक्षयाऽन्यास्वतिशयितप्रेमवति हरौ वने विहरति

सति बिगलितस्त्रस्तो निजोत्कर्ष: अन्यकान्तापेक्षया स्वस्या: पूर्वतनात्यन्तापेक्षया सम्मान: तस्मादिदानीं गलितस्वकीयपूर्व सम्मानाद्धेतोरित्यर्थ:। अतो हेतो या ईर्ष्या अन्यसम्मानजनितासूया तद्वशेन तेन निमित्तेनेत्यर्थ:। अथवा विगलितो यो निजोत्कर्षस्तेनातति सततमागच्छति इत्यात्। अत सातत्यगमन इत्यस्मादाङ् पूर्वात्क्विप्। सा च ईर्ष्या तद्वशेनान्यत: विहरति। कृष्णसमीपादन्यत्रगता राधा, किंच गुञ्जन्ती झङ्कृतिं कुर्वती या मधुव्रतमण्डली रोलम्बकदम्बकं तेन मुखराणि शिखराणि अग्रभागा यस्मिन् तादृशे एतेन कुञ्जस्यत्यन्तोद्दीपकत्वं व्यज्यते क्वचिदपि कुत्रचिल्लताकुञ्जे लतानिर्मितकुटीरे लीना पूर्वं यस्तु सम्मानं कृतवान् तस्य पुरत: सावमानमवस्थान-मनुचितमिति निलीयावस्थितेत्यर्थ: न केवलं लीना अपि तु दीना अनन्यगति का च कृष्णव्यतिरेकेण तदवस्थालापकीर्तिभावादिति भाव:। एवं रूपविशेषणत्रयविशिष्टा सती सखीं रह: एकान्ते, अपि वा, रह: एकान्तमुवाच। अत्र ब्रूवो वचिरादेश:। ब्रुविशासीत्यादिना द्विकर्मकत्वम्। तथा प्रयोगोऽपि "नृपमुचेवचन वृकोदर:" इति। हरिणीवृत्तम् "रसनुगहयैर्नम्रो सो गौ यथा हरिणी तथा" इति लक्षणात्।।१ ३।।

## (५)शुक्लध्वजनृपतिकृत-सारवती

।।१ ३।। अथाभिमानिनी राधा न्यूनजनसाधारण्यजनितासहिष्णुतावशाद् अविचारितमेवान्यतो। ततो निजसौभाग्यातिरेकेण कृष्णस्यानुसन्धानमाशंक्यमाना क्वचिदपि अतिनिभृतस्थल्यचचसो आत्मानं निगृह्य स्थिता। ततस्तदलभमानादरात् प्रेमातिरेकात्तदैकचित्तत्वं सखीषु निवेदयति। राधा रह: गोप्यम् अग्रेतनगीतमुत्पाद्यं सखीमुवाच। कीदृशी राधा ? वने वृन्दावने साधारण: सकलजनतुल्य: प्रणय: स्नेहो यस्य एतादृशि हरौ कृष्णे विहरति विहारं कुर्वति सति, अतएव विगलितो विशेषेण गलितो निजोत्कर्षो निजाधिक्यम्, तस्मात् या ईर्ष्या तया असहिष्णुता, तस्या: वशेन आयत्ततया। 'स्याद्वशमिच्छाप्रभुत्वयोरि'ति। तथा च ईर्ष्यावशेनाविचारितमेव गता, अतएव चिरादेव प्रियमलभमाना खिद्यन्ती स्वचित्तवृत्तान्तं सखीषु निवेदयतीति वाक्यार्थ:। पुन: कीदृशी ? तत: क्वचिदपि लताकुञ्जे लतापिहितोदरस्थले लीना आत्मानं निगृह्य स्थिता स्वसौभाग्यातिरेकात् प्रियानुसन्धानशंकया। अतएव यद्यपि कुञ्जे इति एतावतैव लतापिहितस्थानं लभ्यते, तथापि आत्यन्तिकत्वसूचनाय लतेत्युक्तम्। कीदृशे कुञ्जे ? गुञ्जतां कलं ध्वनतां मधुव्रतानां मण्डलीभि: मुखरं वाचालम् अग्रं यस्य एतादृशि। एतेनोद्दीपनविभावो दर्शित:। अत: प्रियमलभमाना दीना। अपिरत्यर्थे, तथा चातिदु:खितेत्यर्थ:। 'प्रणय: प्रेम्णि विश्वासे याच्ञाप्रश्रययोरपी'ति विश्व:। अन्यत

इति अन्यादिभ्यस्तनायिका। तल्लक्षणं यथा-'उद्दाममन्मथमहाज्वरवेपमानां रोमाञ्चकण्टकितमङ्गकमावहन्तीम्। सम्वेदवेपथुघनोत्कलिकाकुलाङ्गीमुत्कण्ठितां वदति तां **भरत: कवीन्द्र:** ।।१ ३ ।।

'असौभाग्यातिरेकात्' इति पाठ।

## (७) वनमालि भट्टकृत- सञ्जीवनी

द्वितीये कथ्यते सर्गे श्रीराधाप्रणयोदय:।

सेर्ष्या कुञ्जान्तर [२]गता सखीं राधा समब्रवीत्।।

।।१ ३ ।। एवं पूर्वं गोपसीमन्तिनीयूथकेल्युत्कर्षमालोक्य विगलित [३] निजोत्कर्षेव श्रीराधा सखीमाह, विहरतीति। श्रीराधा रह: एकान्ते गोप्यमपि [४] वक्ष्यमाणं सखीमुवाचोक्तवतीत्यन्वय:। कीदृशी ? हरौ श्रीकृष्णे वने विहरति क्रीडति सति। ईर्ष्यावशेनासहिष्णुतया। [५]अन्यत [६]अन्यस्मिन् कुञ्जे गता। पुन: कीदृशी ? क्वचित्कदाचिदपि लताकुञ्जे लताच्छादिते कुञ्जे गता। पुन: कीदृशी ? क्वचित्कदाचिदपि लताकुञ्जे लताच्छादिते कुञ्जे लीना तद्वचनानि श्रोतुं गाढान्धकारे कुञ्जमन्दिरे निलीय स्थिता ; कुत: ? विगलितनिजोत्कर्षात्। विशेषणगतो निज: स्वीय उत्कर्षो हरेरहमेव वल्लभा इत्येवं रूपस्तस्मात्। किंभूते हरौ ? साधारणप्रणये श्रीराधायामन्य-गोपीतुल्यस्नेहे। असाधारणप्रणये वेति[७] च्छेद:। श्रीराधामन्तरा नान्यासु गोपीषु प्रीतिस्तस्मिन्।

कीदृशे कुञ्जे ? [१]गुञ्जन्मधुव्रतमण्डलीमुखरशिखरे शब्दायमानभ्रमरसमूहे शब्दयुक्ता-ग्रभागे [२]वा। अतएव दीना दु:खिता। [३]विप्रलम्भ:। विभावनालङ्कार:। शिखरन्त्वग्रभागे स्यान्माणिक्ये शेखरेऽपि च इति **धरणि:**। प्रणये प्रेम्णि विश्रम्भ:[४]**इत्यमर:** (३.३.१५१)। ईर्ष्यामाहुस्समानेषु मानदानादमर्षणम् इति भरत:।।१ ३ ।।

१.इतिश्रीगीतगोविन्दे सामोददामोदरो नाम प्रथम: सर्ग:-च.

२.गतां-इ.३.निजोत्कर्षेण-अ.निजोत्कर्षबशा-फ.४.वक्ष्यमाणमुवाच-अ.ब.५.नास्ति-ह.६.अन्यत्कुञ्जं-ग.७.नास्ति-अ.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।१ ३ ।। विहरतीति। राधा रह: एकान्ते सखीमुवाच। [५]कीदृशी ? वने वृन्दावने हरौ कृष्णो विहरति[६] क्रीडति[७] सति विगलितनिजोत्कर्षाद [८]गतसौभाग्यादीर्ष्यावशेना-सहिष्णुतया अन्यतोऽन्यस्मिन् स्थले गता।[९] कीदृशे हरौ ? साधारणप्रणये[१०] अन्यगोप्यां [११] तुल्यप्रेम्णि। अत एव क्वचिदपि लताकुञ्जे लतागृहे [१२] लीना गुप्ता। कथम्भूते

लताकुञ्जे ? [१३]गुञ्जतां गम्भीरशब्दं कुर्वतां मधुव्रतानां भ्रमराणां मण्डल्या समूहेन मुखरशिखरे शब्दायमानाग्रके, अत एव[१४] दीना दु:खिता तापिता ।।१ ३ ।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१ ३ ।। देवं ध्यातुं सङ्गतिं रचयति विहरतीति। राधा[१५] कर्त्री। वने असाधारण: अन्यून: अधिक: प्रणय: स्नेहो यस्मिन् तस्मिन् हरौ विहरति सति क्रीडति सति। विगलित: गत: निज: स्वकीय: उत्कर्ष: सर्वातिशयप्रेमरूप: तस्मिन्। ईर्ष्या परोत्कर्षासहनं तस्या: वशात् मानसंज्ञकात्। स्त्रीणामीर्ष्याकृत: कोपो मान इत्यभिधीयते इति अन्यत: प्रदेशान्तरं गता प्राप्ता। गुञ्जन्तो मधुव्रता: भ्रमरा: तेषां मण्डल्या मुखरं उच्चभागो यस्मिन् तस्मिन्। क्वचिदपि इतराज्ञाते लताकुञ्जे लताच्छादितपरितोभागे लीना गूढा दीना पि प्रियविरहाद्दैन्यं प्राप्तापि लीनेत्यर्थ:। रह: सखीं श्रीकृष्णक्रीडारहस्य-कथनयोग्यां उवाच। मानकृतविरहीणीयम्। कुञ्जस्य सनादत्वेन वक्ष्यमाणवचनस्य अन्याश्राव्यत्वं तेन परकीयात्वं (च) व्यज्यते। हरिणीवृत्तम् ।।१ ३ ।।

१.नास्ति-अ.ब.इ.फ.ग.ह. २.नास्ति-अ.ज. ३.विप्रलम्भोऽयम्-इ.फ.ग.ह.ज. ४.प्रणय-स्त्वमी। विश्रम्भ याञ्चाप्रेमाणो-**अमर**:। ५.कथम्भूता राधा-क.ल.म. ६.नास्ति-ड. ७.नास्ति-ड.क. ८.निजसौभाग्यात्-क.ल.म. ९.कथम्भूते-क.ल.म. १०.अन्यगोपी-क.ल.म. ११.तुल्यप्रेमा-ल.म. १२.नास्ति-क. १३.लतासुगुञ्जतां-क. १४.दीनाऽपि दु:खिताऽपि-क.ल.म. १५.कर्ता-च.

## (९) धनञ्जय धरणीदेवकृत सर्वाङ्गसुन्दरी (नूतन)

।।१ ३ ।। पूर्वसर्गोक्तं सखीवचनं निशम्य स्वयमवगम्य स्वप्रकर्षापहार [हृत] माना राधा यच्चकार यद् व्याजहार तद्वर्णयितुं कविरिदानीमुपक्रमते। विहरतीत्यादि। हरौ कृष्णे वने विहरति क्रीडां कुर्वति सति। राधा रह: एकान्ते रहस्तत्वं वा सखीमुवाचेति च योजना। ''रहस्तत्त्वे रते गुह्ये'' इति मेदिनी। किंविधा ? ईर्ष्यावशेनेति। अन्यतो गतोत्कर्षा परोत्कर्षासहनम्, तस्या: वशस्तदधीनभावस्तेन। अन्यत: प्रदेशान्तरं गता। अन्यत इति ''सार्वविभक्तिकस्तसि:।'' तत्र ईर्ष्यायां हेतुमाह, विगलितनिजोत्कर्षादिति। विगलितोऽपध्वस्तो यो निजोत्कर्ष आत्मीयसौभाग्यं तस्मात्। प्रकर्षप्रध्वंसे किंकारणमित्यत आह। हरौ किं विधे ? साधारणप्रणयेति। साधारण: सर्वगोपीजनविशेष: प्रणय: प्रेम यस्य एवंविधे सति। अत एव प्रेम्णस्तु साधारण्यात् दीनापि दु:खितापीति राधाविशेषणम्। न केवलमीर्ष्यावशेन अन्यतो गता किन्तु दीना पीत्यपेरर्थ:। एतेन सर्वगोपीसामान्यस्नेहो भगवान् पूर्वप्रणयिनीं राधिकामनव अन्यासु गोपीषु प्रीतिमातन्वत् विहरतीति कृत्वा प्रणयभरभङ्गाद् दैन्यं राधिकाया इत्युक्तम्। अत एव तद्गतमनसा

गोविन्दगुणकीर्तनाय कृतारम्भाय - रह: सखीमाह । कुत्र स्थिता सत्याह; क्वचिदपि लताकुञ्जे लीनेति।।१ ३ ।।

## (१०) पूजारीगोस्वामीकृत-बालवोधिनी

।।१ ३ ।। अथ सखीवचनं निशम्य स्वयमप्यनुभूय श्रीकृष्णस्य साधारण विहरणं विलोक्य इर्ष्योदयात् तदर्शनमप्यसहमाना अन्यतो गता सखीमुवाच इत्याह, विहरतीति। क्वचिदपि लताकुञ्जे लीना श्रीराधा दीना सती सखीं प्रति रहोऽत्यन्तगोप्यमपि स्वानुभूति-मुवाच। कीदृशी ? ईर्ष्ययान्यत्र गता। ईर्ष्या कुत: ? तास्वपि सर्वासु समान: प्रणयो यस्य तथाभूते हरौ विहरति सति विगलितो निजोत्कर्ष: रहमेवासाधारणी प्रिया इत्येवंरूपो यस्तस्मात् प्रणयतारतम्याद् विहारस्य साम्यव्यवहरणात् श्रीकृष्णस्य स्वभावान्यथात्व-दर्शनाक्षमतया अन्यतो गतेत्यर्थ:। कीदृशे लताकुञ्जे ? गुञ्जन्मधुव्रतमण्डल्या मुखरं शिखरमग्रभागो यस्य तादृशे।।१ ३ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।१ ३ ।। एवं श्रीकृष्णस्य निजविषयोत्कण्ठाविशेषं सखीमुखात् निशम्य तथा स्वयमपि साक्षात् निरीक्ष्य होरिकाख्यसाधारणवसन्तक्रीडाप्रसङ्गेनाऽपि तस्य गोपिकासन्निधानम-सहमानाया: कोपेनान्यतो गताया: श्रीराधाया: वृत्तान्तमाह, विहरतीति। राधा रहोऽपि मानिनीनां सुगोप्यमपि वक्ष्यमाणं सखीं लब्धविश्रम्भां वयस्यामुवाच। कीदृशी कृष्णस्य क्रीडाप्रदेशादन्यतो गता, केन हेतुना ईर्ष्यावशेन प्रियसन्निधानोचित विविधईर्ष्या-वशीकृततयेत्यर्थ:। ईर्ष्यापि कृत:, विगलितनिजोत्कर्षात्, विगलितो न्यूनतां गतो यो निजोत्कर्ष:। अहमेवास्यासाधारणी प्रियेति एवं रूपस्तस्मात्। कथमुत्कर्षहानि:। असाधारण: श्रीराधां विनाऽन्यत्रासम्भावनीय: प्रणयो यस्य तादृशे। किम्बा साधारण: स्वस्मिन् अन्यासु च समानतया प्रतीयमान: प्रणय: यस्य तादृशे हरौ वने निजविहारास्पदे विपिनप्रदेशे विहरति सति, अन्याभि: क्रीडति सति। ननु तथा कुपिता सशपथं पादपतनादिना तेन कथं नानुनीता तत्राह, क्वचिदपि कदापि सङ्केतवसतितया प्रसिद्धौ लताकुञ्जे माधवीनिकुञ्जे लीना उत्कृष्टस्य प्रेम्ण: स्खलनमसह्यं भवतीति। तदनुनयादिक-मनपेक्ष्य निलीय स्थितेत्यर्थ:। 'अतिमुक्त: पुण्ड्रक: स्याद् वासन्ती माधवी लता' **इत्यमर**:। अत एव दीना किं मया मन्दधिया कृतमित्यनुतापोदयाद्दैन्यमनुभवतीत्यर्थ:। कथमतिधीराया: कोपसमनन्तरमेवानुतापोदय:, तत्राह; कुञ्जविशेषणेन, कीदृशे, गुञ्जतां ध्वनतां मधुव्रतानां मधुपानां मण्डलीभि: पंक्तिभि: मुखराणि ध्वनियुक्तानि शिखराणि अग्रभागा यस्य तादृशे। अनेन कुञ्जोपरिभागस्य सद्योविकसत्प्रसूनत्वं सूचितम्।

मधुव्रतमण्डलीत्यनेन एकस्यापि मद्यपानासक्तस्य चेष्टितं समाधातुमशक्यं स्यात् किमुत वहूनामिति श्लिष्टमधुशब्देन व्यज्यते। 'मधुमद्ये पुष्परसे' **इत्यमरः**। कोपावेशेन तत्र प्रविशन्ती परितः मधुपझङ्कारं मन्मथधनुष्टङ्कारं विभाव्य तत्र न स्थातुं न चान्यतो गन्तुं शक्नोतीति उचित एव तस्याः अनुतापः इति भावः ।।१३।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१३।। विहरतीति; श्रीजयदेवकविना द्वितीयसर्गमक्लेशकेशवनाम्ना अभिहितम्। अथ सखीवचनं विविच्य श्रीकृष्णस्य सर्वास्वन्यनायिकासु विहरणं प्रणयलीलामवलोक्य न मानिनी संसहतेऽन्यसंगममिति धिया ईर्षाकषायषेमुषिना तद्दर्शनमपि न सोढ़व्यमिति अन्यस्मिन् दिशि गत्वा निगदति वचनम्। विहरतीति; श्रीराधा यदा वने विहरणशीलाऽस्ति तदानीं साधारणतया नाम अन्याः गोप्यः श्रीकृष्णेन साकं साधारणतया नाम न विशेषतया राधा तु विषिष्टा नायिकाऽस्ति राधां मन्यते। अतः तां नायिका विशिष्टां इत्येव परित्यज्य साधारणनायिकायां प्रीतिरिति राधया न हयते। प्रणयव्यापोरेण व्यापारितां सत्यां दृष्ट्वा इर्ष्याविप्रलम्भेन तेषां दृष्टिं वारयितुमन्यत्र गता सती श्रीराधा स्वस्याः वैशिष्ट्याभिमानेन खलु विगलिता। अतः विगलितनिजोत्कर्षा श्रीराधा इति। अन्यतः अन्यदेशं प्रति गता इति गतान्यतः। तर्हि निजोत्कर्षस्यास्तमिते खलु साधारणा नाम विशेषविहीना किमर्थं श्रीकृष्णेन साकं प्रणयं करोति ? स्थिते सति हि विशेषनायिका कथं कृष्णस्य सामान्ये प्रीतिरिति इर्ष्याविप्रलम्भः। तेन हताशया वनभूमेरन्यदिशं प्रति गत्वा तत्रैकस्मिन् निभृते निकुञ्जे नाम जनशून्ये पत्रादिछायावद्धप्रकोष्ठे किम्भूते कुञ्जे ? यस्मिन् कुञ्जस्याग्रभागे वृक्षलतास्थितपुष्पेषु लीनाः मधुव्रताः मदमत्तभ्रमराः तदर्थं मधुव्रतशब्दस्य प्रयोगः। वाचालाः गुञ्जन् मुखरयन्ति कुञ्जम्। अपि च सा तस्मिन् कुञ्जे लीना, स्वस्याःसत्तां विस्मृत्य इह गोपनेन सखीं दीना सती उवाच उक्तवती। दीना नाम विरहेणोद्‌विग्ना। भ्रमरश्रेणीगुञ्जनेन व्यभिचारिसंयोगात् सम्भोगस्य तस्याः कान्ताभावजन्या परनारीसम्भोगशीलमवगम्य दीनतां प्राप्नोति क्षिन्ना भवति। फलतः तस्याः दुःखमधिकं वर्द्धते। तेन रहसि सखीं प्रति ब्रूते सा। अत्र हरिणीच्छन्दः। विप्रलम्भशृङ्गारः। रतिभावस्य अतिशयोद्रेकात् उक्तत्वात् च रसवदलंकारः। वर्णसाम्यादनुप्रासश्च। नायिका तु प्रौढा। अत्यन्ताप्तनायिकासकाशं स्वस्याः दुःखकथनेन सहजतया वर्द्धते दुःखस्य इति धीया सखीमुवाच।।१३।।

।। पञ्चम प्रबन्ध: / गीतम् ५ ।।

।। गुर्जरीराग प्रतिमठतालाभ्यां गीयते ।।

**१ - संञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशम्।**
**चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम्।।**
**रासे हरिमिह विहितविलासं स्मरति मनो मम कृतपरिहासम्।।ध्रुवम्।।१ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१ ।। गुज्जरीरागेण गीयते पडितालताले। किमुवाचेत्याकाङ्क्षायामाह सञ्चरदिति। मम मनोहरिं स्मरतीति वाक्यार्थ:। अभिलाषोऽथ चिन्ता च स्मृतिश्च गुणकीर्तनम्।

उद्वेगेऽथ प्रलाप: स्यादुन्मादो व्याधिरेव च।।
जडता मरणं चेति दशमं जायते ध्रुवम्।।इति।।

विरहे दशमावस्था अत्र उक्ता। तदत्र गुणोत्कीर्त्तनं वाच्यम् तल्लक्षणं यथा-

सौन्दर्य्यहसितालापैर्नास्त्यन्यस्तत्समो युवा।
इति वाणी भवेद्यत्र तदत्र गुणकीर्त्तनम्।।इति।। **रुद्रट:**।

अधरसुधेति। अधरस्य सुधा, अधर एव सुधेति वा विग्रह:। अधरसुधया मधुरो ध्वनिरधरसुधामधुरध्वनि: सञ्चरन् गच्छंश्च माधवाधरसुधामधुरध्वनिश्चेति कर्मधारय:। तेन मुखरितो मोहनवंशी येनेति विग्रह:। चलितेत्यादि:। "दृशो दृष्टेरञ्चलं चक्षु: प्रान्तदेश: कटाक्ष इति यावत्। चलितेन दृगञ्चलेन योऽसौ चञ्चला मौलिस्तेन कपोले विलोलोऽवतंसो यस्येति विग्रह:। चलितं दृगञ्चलं यस्य चञ्चलो मौलिर्यस्य कपोले विलोलौ अवतंसौ यस्येति विग्रह:।" "पुंस्युत्तं सावतंसौ च कर्णपूरे दृशे स्वरे।" "वष्टिभागोरिरल्लोपमवाच्योरुप्रसर्गयौरित्यवतंसशब्दस्याकारलोप:"।।१ ।।

## (२)राणाकुम्भकृत-रसिकप्रिया

।।१ ।। संचरदिति। तत्र पूर्वं ध्रुवपदं व्याक्रियते, रासेति। हे सखी! मे मनो हरिं स्मरति। स्मरती स्मृते: पूर्वानुभूतार्थविषयत्वाद्दृष्टचरस्य हरेश्चरितं साक्षात्करोति। इह क्रीडावने रासे गोपक्रीडायां विहितो विलासो विभ्रमो येन स तं तथा। कथं ? यथा भवति कृतपररिहासं कृतनर्मकेलि यथा स्यात्तथेति ध्रुव:। अथ पदानि। तत्राद्यं पदम् संचरदिति। संचरन्त्या संक्रममाणयाऽधरसुधया मधुरो ध्वनिर्यत्र तद्यथा स्यात्तथा मुखरितो मोहनो मोहकारी तन्नामा वंशो येन। अत एव चलितदृगञ्चलं नेत्रप्रान्तं यथा स्यात्तथा चञ्चलो यो मौलि: शेखर: शिरो वा तेन कपोलयोर्विलोलौ वतंसौ यस्य स तथा। किम्वुक्तं भवति ?

शिर:कम्पदोषं विना शेखरकुण्डलचालने वादकवैचित्री। अथवा, वंशश्रवणाञ्चलितदृगञ्चला या गोप्यस्तासु चञ्चलो यो मौलिस्तेन कपोलविलोलवतंसम्। अत्राधरसुधापानेन तदाननस्य चन्द्रादप्यानन्दकत्वं द्योतितम्।।१।।

## (३) जगद्धरकृत- सारदीपिका

।।१।। श्लोकोक्तेन गीतेनाह सञ्चरदिति हे सखि! मम मन: हरिं स्मरति गोचरं करोति। सर्वानुभूत - विषयत्वात् कथम्भूतं हरिं सञ्चरता उद्गछता अधरसुधया मधुरेण अधरामृतमनोहरेण ध्वनिना शब्देन मुखरित: शब्दितो मोहननामावंशो येन। पुन: कीदृशं चलितीतिचलित: आवर्जित: दृगञ्चल: कटाक्षो येन चञ्चल: दोलायमाना मौलि: शेखरो यस्य कपोलयोर्गण्डस्थलयोर्विलोलौ चञ्चलौ वतन्सौ कर्णाभरणे यस्य तम् तत: ''प्रत्येकं कर्मधारय:'' पुन: कीदृशम् इह रासे गोपीक्रीडायां विहित: कृत: विलासो क्रीडा येन मयासह कृत: परिहास: नर्मोयेन तम्।।१।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।१।। राधा किमुवाचेत्याहचरदिति। गीतस्यास्य गुर्जरीराग:। तालस्तु प्रतिमंठ:। गीतार्थस्तुमम मनोऽन्त:करणं हरिं स्मरति। कीदृशं हरिम्? रासे गोपक्रीडाविशेषे विहित: कृतो विलासो येन तादृशम्। तथा कृत: परिहासो येन तादृशम् एतच्च ध्रुवपदम्। कीदृशं हरिम्? संचरता प्रतानक्रमेण स्फुरताऽधरेणौष्ठेन सुधेव मधुरो ध्वनिर्यस्य तादृशी मुखरितो वादितो मोहनवंशी महोनकारी वेणुर्येन तादृशम्। तद्वेणुरवेण मोहितं मे मन: कृतापराधमपि तं स्मरतीति भाव:। पुन: कीदृशम्? चलित: कथंचिन्मूर्च्छां प्रति रोषे प्रकटीकृते तत्संमानाय घूर्णितो दृगञ्चलोऽपाङ्गो यत्र एतादृशश्चल: स्वयमेव वेणुद्वारा प्रकटीकृतस्यान्यैश्चाज्ञानात्स्वयमेव परितो दोषाद्दोलायमानो मौलिर्मस्तकं यस्यं, अत एव कपोले विलोलश्चञ्चलो वतंस: कर्णाभरणं यस्य नादृशम्। "पीयूषममृतं सुधा" **इत्मर**:। "चूडा किरीटं केशाश्च संयता मौलयस्त्रय:" इति च। "पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे" इति च।।१।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१।। गुज्जरीरागेण गीयते। उवाचेत्युक्तम्। तत्प्रकारमेव विशदयति। सञ्चरदित्यादिना गुज्जरीरागेण गीयत इत्युक्तम्। तस्यायमभिप्राय:। पूर्वसर्गे रागद्वयस्येकां पत्नीमुक्त्वास्मिन् सर्गे मालवरागस्य द्वितीयां पत्नीं सूचयितुमुपक्षिप्तामेव प्रथमां पत्नीं स्मारयितुमिति। रूपकतालेन गेयम्। तल्लक्षणं तु "द्रुतद्वन्दं विरामान्तं रूपक: परिकीर्त्तित" इति। तत्र रासे हरिमित्यारभ्थ कृतपरिहासमित्यन्तं ध्रुवपदमिदम्।

साधारणत्वात्तदादौ व्याक्रियते। रास इति, हे सखि! रासक्रीड़ायां विहिता मद्व्यतिरिक्त-गोपकामिनीष्वाचरिता: विलासा: विभ्रमा: येन तादृशं, किञ्च, रास एव कृत: मद् व्यतिरिक्तगोपकामिनीषु कृत: परिहासे नर्म वचनं येन तादृशं हरिं श्रीकृष्णमिह कुञ्जकुटीरे मम मन: स्मरति प्रत्यक्षत: सम्भोगाभावेऽपि चिन्तनेनात्र तत्सौख्यमनुभवतीत्यर्थ:। अनेन राधाया: कृष्णे परमाशक्ति: सूचिता, व्यभिचारिभावश्च सूचित:। हरिमितिस्मरती-त्यत्र "अधिगर्थेत्यादिना २-३-५ २ न षष्ठी शेषत्वस्याविवक्षणात्। रासक्रीडाप्रकारस्तु **कृष्णकर्णामृते** उक्त:",

अङ्गनामङ्गनामन्तरा माधवो माधवं माधवं चान्तरेणाङ्गना।
इत्थमाकल्पिते मण्डले मध्यग: संजगौ वेणुना देवकीनन्दन:।।

कीदृशं कृष्णं स्मरतीत्याकाङ्क्षायां विशिनष्टि। सञ्चरदिति, सञ्चरन् ध्वन्युत्पादनार्थं व्यापारवान् योऽधर स्तत्र या सुधा अमृतं तया मधुर: श्रुतिसुखावहो यो ध्वनिस्तेनमुखरित: नादित: अतएव मोहन: स्वनादेन सर्वचित्ताकर्षक: वंशो वेणुनालं यस्य तादृशम्। किञ्च चलितौ कामिनीचित्ताकर्षणार्थ: व्यापारवन्तौ कृतौ, अथवा, स्वरतालानुकर्षणार्थं चलितौ वा दृगञ्चलौ अपाङ्गप्रदेशौ येन तादृशम्, अतएव कपोलया: गण्ड़प्रदेशयो: विलोलौ चलमानौ अवतंसौ कर्णाभरणे यस्य स: तथा विशेषणत्रयविशिष्टं हरिं स्मरतीत्वन्वय:। अनेन कृष्णस्य कामिनीपारवश्यसम्पादमसामर्थ्यं व्यज्यते वतंसेत्यत्र "वष्टिभागोरिरल्लोपमवाच्योरुपसर्गयो:" इत्यादनाकारलोप:। भाषान्तरे शषयोरभेदादन्त्यानुप्रासोपपत्ति:।।१ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१ ।। प्राहेति यदुक्तं तदाह। गीतस्यास्य गुर्जरीराग:। रूपकताल:। रागलक्षण-मुक्तमेव। गीतार्थस्तु, हे सखि! मम मन: कर्त्तृ हरिं कृष्णं स्मरति ध्यायति। कीदृशं हरिम्? इह रासे गोपक्रीडायां विहितविलासं कृतक्रीडम्। पुन: किम्भूतम्? कृत: परिहासो हास्यदिकौतुकं येन एतादृशम्। पुन: कीदृशम्? सञ्चरत्य उद्गच्छन्त्या अधरसुधया अधरामृतेन मधुर: स्पृहणीय: यो ध्वनि: तेन मुखरित: शब्दायितो मोहनवंशी येन स तथा। मोहयतीति मोहन:, कर्तरिल्युट्। यद्वा सञ्चदधरसुधामधुरध्वनिर्यथा भवति तथा मुखरितो मोहनकारी वंशी येन स तथा तम्। पुन: कीदृशम्? वलितं तिर्यक्प्रेरितमूर्द्धीकृतं वंशदण्डस्याग्रं प्रदर्शनार्थं दृगञ्चलमपाङ्गो येन स तथा वंशीवादनानुकूलमुखरासु पूरणेन हेतुना चञ्चला मौलिर्यस्य तम्, अतएव कपोले

गण्डदेशे विलोलः चञ्चलो वतंसः कर्णपूरो यस्य स तथा, ततः कर्मधारयः, तम्। वतंसस्तु पुमान् कर्णभूषणे शेखरेऽपि च।।१ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१ ।।अमर्षणेन किमुवाचेत्यतः सञ्चरदित्यादिना श्लोकोक्तमर्थं गीतेनाह। गुर्जरीरागे प्रतिमण्ठताले। रागलक्षणं पूर्वोक्तमेव। ''द्रुतत्रयेण [२]गातव्यं कुन्दश्च प्रतिमण्ठकः इतिताललक्षणम्।'' हे सखि मम [३]मनः कृतापराधमपि हरिं इह कुञ्जमन्दिरे स्मरति। तद्यथा,

केतकीकुसुमं[४]भृङ्गो[५] बाध्यमानोऽपि सेवते।
दोषाः किं नाम कुर्वन्ति गुणाय[६] हतचेतसे।।इति

कीदृशम्? रासे रासक्रीडायां विहितः कृतः विलासः क्रीडा येन। ध्रुवपदम्। पुनः[७]कीदृशम्? सञ्चरता नानाप्रकारेण स्फुरताऽधरसुधामधुरेण ध्वनिना शब्देन मुखरितः शब्दितो मोहनो [८] विश्वमनोहरो वंशो येन तम्। पुनः[९] कीदृशम्? चलितः[१०] कश्चित्मूर्छाविशेषण[११] सात्त्विकोदयेन वा दृगञ्चलः [१२] कटाक्षः चञ्चलश्चपलो मौलिः [१३] शिखण्डाग्रभागो यस्य। कपोलयोः विलोलौ [१४] चञ्चलाववतंसौ कर्णभूषणे यस्य तम्। कर्मधारयः। पीयूषममृतं सुधा **इत्यमरः** (१.१.४८) [१५]मौलिः किरीटं[१६] केशाश्च (**इत्यमरः** ३.३.१९३) ।।१ ।।

१.परिमठताले-अ.प्रतिमण्ठताले-ब.२.ज्ञातव्यं-फ.३.पुनः-अ.४.भ्रमरो-अ.५.खण्ड्यमानोऽपि-इ.फ.ग.ह.ज.६.हृतचेतसे-ग.ह.७.किम्भूतम्-ज.८.विश्वमोहनो-ग.९.किम्भूतम्-ज.१०.कस्यचित्-इ.फ.ग.ह.ज.११.सात्त्विकरसोदयेन-इ.फ.ह.ज.१२.कटाक्षो यस्य-इ.फ.ग.ह.ज.१३.शिखाग्रभागो-ज.१४.चञ्चलावतंसौ-अ.ब.इ.फ.ग.ह.१५.चूडा-**अमर**:१६.केशाश्च संयता मौलय इति-इ.फ.ग.ह.ज.१७.पुंस्युन्नतावतंसौ द्वौ कर्णपूरे च शेखरे **इत्यमर**:-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।१ ।। श्लोकोक्तमर्थं गीतेनाह, सञ्चरदिति। हे सखि मम मन हरिं कृष्णं स्मरति। कथम्भूतं हरिम्? सञ्चरता उद्गच्छताऽधरसुधा[१]मधुरध्वनिनाऽधरामृतमनोहरेण ध्वनिना [२]शब्देन मुखरितःशब्दितो मोहननामावंशो[३]येन। पुनः कीदृशम्? चलितेति। चलितः आवर्जितो दृगञ्चलः कटाक्षो [४]यस्य, चञ्चलमौलिः [५] शेखरं यस्य, कपोले गण्डस्थले विलोलश्चञ्चलो वतंसः कर्णाभरणं यस्य सः [६] तम;ततः प्रत्येकं कर्मधारयः। पुनः[७] कीदृशम्? इह रासे[४५] गोपक्रीडायां विहितविलासं कृतक्रीडम्। पुनः[८] कीदृशं[९]हरिम्? [१०] कृतपरिहासं विहितविहासम् ।।१ ।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१ ।। (सञ्चरदिति) गुर्जरी रागयतितालयोर्लक्षणमुक्तम्। सञ्चरन् वादनकाले पूरणार्थं विचलन् अधर: अधरोष्ठ: तस्य सुधा अमृतं तेन मधुर: श्राव्य: ध्वनि: तेन मुखरित: मोहन: सङ्केतसूचकत्वाच्चित्ताकर्ष: वंश: मुरलीसंज्ञक: यस्य तम्। चलिते तरङ्गिते दृगञ्चले नेत्रान्तौ यस्य स चासौ चञ्चलमौलि:। शिरस्थकिरीटं कपोलौ च; प्राण्यङ्गत्वादेकवद्भाव:; यस्य स चासौ विलोल: पतित: चलितं वतंसं उत्तंसितमयूरपिच्छादिकृतं यस्य स चासौ तम्। विशेषणानां समास:। विलोलवतंसत्वं वंशवादकस्वभाव:। तदुक्ति: स्वभावोक्ति: ।। ध्रुवाया व्याख्या। मम मन: कृत: परिहासो येन तम्। इह रासे विहिता: रचिता: विलासा: येन तं स्मरति। यद्यपि स्मृतिगोचरस्य षष्ठी विहिता तथापि द्वितीया प्रयुक्ता। अत्र स्मृतेरलङ्कारता नास्ति। सादृश्याभावात्। सञ्चारी भाव: ।।१ ।।

१ .मधुरेण ध्वनिना मुखरित:-क.ल.म. २ .नास्ति-ड.क. ३ .यत्र-ड. ४ .एतस्य-ड. ५ .शिखरो-क. ६ .नास्ति-क.ल.म. ७ .कीदृशं हरिम्-क.ल.म. ८-९ .नास्ति-ड. १ ० .कृतपरिहासं कृतविनोदमेका-किनीदृशं सुखं त्यक्त्वा क्वचिदपि गर्वेण गता। अत: परममूर्खा इति मत्वा हासं कृतवानित्यर्थ:-क.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१ ।। किमाह सखीमित्याह - सञ्चरदिति । रासे हरिमिहेत्यादि। मम मनो हरिं स्मरतीति वाक्यार्थ:। किंविधम्? विहितविलासमिति। इह रासे गोपक्रीडायां विहितविलासं कृतपरिहासं च योऽसौ। क्रीडावसरे कदाचिद् विलासमकार्षीत्कदाचित् परिहासञ्च, तमिदानीं मम मन: स्मरतीति भाव:। अत्र गाथापदानि हरिविशेषणान्येव। ''अभिलाषोऽथ चिन्ता च स्मृतिश्च गुणकीर्तनम्। उद्वेगोऽथ प्रलाप: स्यादुन्मादो व्याधिरेव च।। जडता मरणं चेति दशमं जायते ध्रुवम्।'' इति विरहे दशावस्था उक्ता:। तदत्र गुणोत्कीर्तनं वाद्यम्। तल्लक्षणं यथा, ''सौन्दर्यहसिताद्यैश्च न्यस्तान्यस्यसमो युवा। इति वाणी भवेद् यत्र तदिदं गुणकीर्तनम्'' **इति रुद्रट:**। पुन: किंविधम्? सञ्चरदित्यादि। सञ्चरन्त्या सम्पूरणवशाद् वंशरन्ध्राभ्यन्तरप्रविष्टया अधरसुधया मधुर: अधरामृतरसेनेव माधुर्यगुणयुक्त इत्युत्प्रेक्षाव्यञ्जक इवशब्दो वृत्तावन्तइतटर्गत:। तादृशेन ध्वनिना मुखरितो मुखरीकृतो मोहनो मोहजनको वंशो यस्य। मुखरित: सन् मोहनो वंशो यस्येति वा विग्रह:। सञ्चरता अधरसुधामधुरध्वनिना मुखरितो मोहनवंश: यस्य वा। पुन: किंविधम्? चलितेत्यादि । दृशो दृष्टेरञ्चलं दृगञ्चलं चक्षु:प्रान्तदेश: अपाङ्ग इति यावत्। चलितेन नर्तितेन दृगञ्चलेन योऽसौ चञ्चलो मौलिस्तेन कपोलयो: विलोलौ

विशेषेण चञ्चलौ अवतंसौ कर्णपूरौ यस्येति विग्रहः। किं वा चलितं दृगञ्चलं यस्य, चञ्चलो मौलिर्यस्य द्वयोः कर्मधारयः। कपोलयोर्विलोलौ अवतंसौ यस्य। चलितं दृगञ्चलचञ्चलमौलिश्चासौ कपोलविलोलोऽवतंसश्चेति कर्मधारयः। अथवा चञ्चलमौलौ कपोलयोश्च विलोलोऽवतंसो यस्य। ''मौलिपक्षेऽवतंसः शेखरशिखा दामशिखास्वा-पीडशेखरौ'' **इत्यमर**वचनात्। ''कपोलपक्षे अवतंसः कर्णपूरः।'' तथा च, ''वतंसस्तु पुमान् कर्णपूरशेखरयोरपि'' इति **विश्वः**। वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयोरित्य-वतंसशब्दस्य अकारलोपः।'' ''मौलिः शिरसि चूडायाम्'' इति **कुमुदाकरः**।।१।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।१।। तदेवाह। हे सखि! मम मनः इह विहितविलासं हरिं तत्र यथोचितक्रियाभिः स्वविहरणशीलं स्मरति पूर्वानुभूतमेव प्रमाणयति। कीदृशं ? रासे शारदीये कृतः परिहासो येन तम्। ध्रुवम्। पुनः कीदृशं? हरिं संचरन्ती अधरसुधा यत्र तेन ध्वनिना विदितः मोहनवंशी येन तम्। तादृशवंशीध्वनीरप्यत्र नास्तीत्यर्थः। सर्वत्रैवं योज्यम्। दृशोर्दृष्टेरञ्चलं चक्षुप्रान्तभागः कटाक्ष इति यावत्। चलितेन इतस्ततः प्रचलता दृगञ्चलेन योऽसौ चञ्चलमौलिः शिरोभूषणं तेन कपोलयोर्विलोलौ वतंसौ कर्णभूषणे यस्य तम्।।१।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।१।। यदुवाच तद् विशदयति सञ्चरेत्यादिना गीतेन। इदमपि गुज्जरीरागेण गीयत इत्युक्तम्। रूपं तु लिखितमस्ति। सञ्चरदिति। हे सखि। इह कोपावसरेऽपि रासे(४५) विहितविलासं हरिं मम मनःस्मरतीत्यन्वयः। हरिमिति स्वतो मनोहरत्वम्। तत्र विहितविलासमिति स्मरणस्य पौनःपुन्नमनिर्वार्यत्वं च सूचितम्। अहं स्मरामीति नोक्त्वा मनःस्मरतीति मन्निवारणमनादृत्य हठात् स्मरतीति सखीं प्रति अवहित्था व्यञ्जिता। मनसः तदधीनत्वं च सूचितम्। ननु कथं सापराधं स्मरतीति तस्यापराधं परिहरति। कीदृशम्, कृतः परिहासो मदुत्कण्ठावर्धनाय मच्चित्तपरीक्षणकौतुकाय वा विनोदविशेषो येन तम्, न चापराधं कृतवन्तमिति भावः। रासकालीनविलास मनुस्मरन्त्याह; सञ्चरदिति। कीदृशं सञ्चरति। अधरस्थितैवान्यत्राविर्भवन्ती या अधरसुधा तया मधुरा श्रुतिलोभनीया ये ध्वनयस्तैर्मुखरितो वाचालीकृतः अत एव मोहनश्चेतनाचेतनसाधारण्येन सर्वेषां मोहोत्पादको वंशो वेणुर्येन तादृशम्। मोहोद्दीपकत्वात् प्रथमत एव वेणुध्वनेरुपन्यासः। उक्तं च,

कृष्ण वक्त्रेन्दुनिष्यूतं मूरलीनिनादामृतम्। उद्दीपनानां सर्वेषां मध्ये प्रवर उच्यते।।

इति।

एवं वेणो: सर्वमोहनत्वं यथा **विदग्धामधवे-**

रुन्धन्नम्बुभृतश्चमत्कृतिपरं कुर्वन् मुहुस्तुम्बुरुं,
ध्यानादुत्तरयन् सनन्दनमुखान् विस्मापयन् वेधसम्।
औत्सुक्येवलिर्भिवलिं चटुलयन् भोगीन्द्रमाघूर्णयन्,
भिन्दन्नर्णकटाहभित्तिमभितो बभ्राम वंशीध्वनि: ।। इति।

किं च तत्रैव;

जातस्तम्भतया पयांसि सरितां काठिन्यमापेदिरे,
ग्रावाणो द्रवभावसंवलनत: साक्षादमी मार्दवम्।
स्थैर्यं वेपथुना जहुर्मुहुरगा जाड्यां गतिं जङ्गमा,
वंशीं चुम्बति हन्त यामुनतटीक्रीडाकुटुम्बे हरौ ।। इति।

उद्दीपनत्वं यथा – 'निशम्य गीतं तदनङ्गवर्धनम्।' "**दानकेलिकौमुद्यां** यथा"

वेणोरेष कलस्वनस्तरुलता व्याजृम्भणो दोहदं
सन्ध्यागर्जिभर: पिकद्विजकुहू स्वाध्यायपारायणे।
आभीरेन्दुमुखी स्मरानलसमुत्सेके सलीलानिलो,
राधाधैर्यधराधरेन्द्रदमने दम्भोलिरुन्मीलति ।।इति।

स्वत: एव वंशीध्वनेर्मोहनता। तत्र पुन: महामोहनस्याधरसुधासञ्चार: अत: कस्य वा चित्तं न विमोहयेत् इति भाव:। एवं दूरस्थानां मोहनतामुक्त्वा सन्निहितानां तदाह, चलितेति। चलितौ दृगञ्चलौ यस्य, चञ्चलो मौलिर्यस्य, कपोलयोर्विलोलौ वतंसौ कर्णभूषणे यस्य, तञ्च तञ्च तञ्च। वेणुवादनसमय जायमानेनापाङ्गचलनेन सन्निहितानां गोपिकानां भावमुद्दीपयन्तं मौलिचलनेन तासां भावविलासेषु सन्तोषमिवाभिव्यञ्जयन्तं, अवतंसान्दोलनेन तासां भावानुबन्धेषु वैवश्यमिवाविर्भावयन्तम्। ईदृशं विलासिनं का वा विस्मर्त्तुं शक्नोतीति भाव:। 'चूडा किरीटं केशाश्च संयता मौलय: स्त्रिय:' **इत्यमर**। 'पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे' इत्यपि। अत्र ध्वनिमाधुर्येण वस्तुना अधरसुधाहेतुकता रूपोत्प्रेक्षा निर्णीता।।१ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलताटिप्पणी

।।१ ।। संचरदीति; सा श्रीराधा व्रवीति सखीम्, इदं रासमवलोक्य श्रीराधा स्मरति वदति च, सखि ! हरिणा विहितं रासविलासं मयेदानीं स्मर्यते। स च सञ्चरदधरसुधारसं स्वस्याधरत: सुधा अमृत रस इव स्वर: श्रीकृष्णस्य वंशीध्वनि: सञ्चरणशीलो भवति। तेन ध्वनिना वंशीस्वनेन वनभूमि: मुखरिता भवति। तस्य दृश: नेत्रयो: प्रान्तभागयो:

अर्थात् अपाङ्गदृष्टिद्वारा कटाक्षनिक्षेपं करोति। तेन स्वस्य मस्तकमितस्ततं कृत्वा पश्यति। फलतः तस्य शिरोभूषणं मस्तकमण्डितमयूर चूडा तथा अवतंशं कर्णकुण्डलयोः दोलनं मनोरमाय भवति। अनेन मया सह रासे परिहासं रासक्रीडायां कृत्वा ममानन्दवर्धनाय तदा प्रभवति आसीत्। तथैव इदानीं न भवति।।१।।

**२-चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम्।**
**प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरसुवेशम्।। रासे०।।२।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२।। ह्रस्वचन्द्रश्चन्द्रकः चन्द्रकेण क्षीणार्द्धचन्द्राकारेण कालिमाभागेन चारुर्यो मयुरशिखण्ड़को मयूरपिच्छः तस्य मण्डलेन वलयिता वेष्टिता केशा यस्येति विग्रहः। "वेष्टितं स्याद्वलयितमित्य**मरः**।" उपमानोपमेयभावं विशेषणप्रतिपादयन्नाह। प्रचुरेत्यादि। प्रचुरं च तत् पुरन्दर धेनुश्चेति कर्मधारयः। तेनानुरञ्जितश्चित्रितो मेदुरः स्निग्धो मुदिरो मेघस्तादृक् शोभनो वेशो यस्येति विग्रहः। "मुदिरः कामुके मेघे" इत्यु**त्पलमालिनी**।।२।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२।। चन्द्रकेति। चन्द्रकचारूमयुरशिखण्डकानां मण्डले संघाते वलयाकारेण वेष्टिताः केशा यस्य। तथा प्रचुरं घनं पुरंदरधनुषानुरञ्जितो मेदुरः सान्द्रस्निग्धो मुदिरो मेघस्तद्वत्सुवेशो दर्शनीयस्तम्।।२।।

## (३) जगद्धरकृत- सारदीपिका

।।२।। चन्द्रकेति चन्द्रकेण विचित्रवर्णचिन्हेन चारुणां मयूरशिखण्डकानां मयूरपिञ्छानां मण्डलेन समूहेन वलयिताः वलयाकारेण वेष्ठिताः केशाः येन अत एव प्रचुरेण विस्तीर्णेन पुरन्दरधनुषा ईन्द्रधनुषा अनु रञ्जितश्चित्रितो मेदुरो निविडः स्निग्धयो मुदिरो मेघस्तद्वत्सुवेशं सुन्दरम्।।२।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।२।। ननु व्यासङ्गादिना विस्मार्यतामित्यत आह, चन्द्रकेति। चन्द्रकेण विचित्रचिह्नेन चारूणा मनोहराणां शिखण्डकानां मयुरापिच्छिानां मण्डलेन समुहेन वलयिता वेष्टिताः केशा येन तादृशम्। तथा चात्र मयूरादिदर्शनेऽपि तस्यैव दर्शनं भवतीति ध्वनितम्। पुनः कीदृशम्? प्रचुरैर्बहुलैः पुरन्दरधनुर्भिरनुरञ्जितः संवलितो यो मेदुरः सान्द्रस्निग्धो मुदिरो मेघस्तद्वच्छोभनो वेश आकृतिर्यस्य चाद् भूतोपमा तादृशम्। अत्र नानामणिख-

चितहारकेयूरादीनामिन्द्रधनु:साम्यम्। श्रीकृष्णस्य मेघसाम्यम्। इयं चाभूतपमा ज्ञेया। कुत: ? प्रचुरपुरन्दरधनुर्भिरनुरज्जितमेघस्य प्रसिद्धे:। "समौ चन्द्रकमेवकौ" **इत्यमर**:। "बर्हिकण्ठसमे वर्णे मेचकं ब्रुवते वुधा:" इति **कात्य**:। "शिखण्डस्तु पिच्छबर्हे नपुंसके" **इत्यमर**:। "वेष्टितं स्याद्वलयितम्" इति च। "मुदिर: कामुकोऽम्बुद:" इति **विश्व**:। "वेशो वेश्यागृहे प्रोक्तो नेपथ्ये गृहमात्रके" इति च।।२ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२ ।। चन्द्रकेति। चन्द्रकैर्मेचकैश्चारुणि रमणीयानि यानि मयूरशिखण्डानि वर्हिबर्हाणि तेषां मण्डलं संघात: तेन बलयित: संजातबलय: वेष्टित इत्यर्थ:। तथाविधा: केशा यस्य तादृशं मयूरपिच्छालंकृतमौलिकमित्यर्थ:। अतएव प्रचुरमायतं यत् पुरन्दरधनुरिन्द्रचाप: तेन अनुरञ्जित: अलङ्कृत: मेदुर: स्निग्धश्च मुदिरोमेघ: "घनजीमूतमुदिरजलमुग्धमयोनय" **इत्यमर**:। तस्य सुवेश: शोभनो वेश: इव वेशो यस्य, तथाविधम्, इन्द्रचाप सवर्ण मयूरबर्हालङ्कतत्वेन तस्येन्द्रचापालङ्कतमेघ-साम्यमित्यर्थ:। एतादृशं हरिमित्यन्वय:। अत्र वृत्त्यनुप्रासोपमाविशेषयो: संसृष्टि:। देशान्तरशसयोर वैलक्षणॅदन्त्यानुप्रासोपपत्ति:।।२ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२ ।। पुन: कीदृशं हरिं तत्राह, चन्द्रकेण चन्द्राकारकेन अवयवेन चारूणां शोभनानां मयूरशिखण्डकानां वार्हि:पुच्छानां मण्डलेन समृहेन वलयिता वलयाकारेण वेष्टिता: केशा यस्य तम्। गोपतनूद्भवानां सारूप्याय मयूरपुच्छै: केशा बद्धा: भवन्त्येवेत्यनुभवोऽपि। पुन: किम्भूतम्? प्रचुरं महत् पुरन्दरधनु: शक्रचाप:, तेनानुरञ्जितो भृषितो मेदूर: स्निग्ध: मुदिरो मेघ:, तद्वत् सुन्दरो वेशो यस्य तम्। वेशोऽत्र केशा एव, तेषामपि भोगानवच्छेदकतया शरीरभिन्नत्वादतिकृष्णतया विचित्रतया[S] प्राचुर्येण च सादृश्यम्।।२ ।।

[S] 'चित्रितया' इति पाठ।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।२ ।। नन्वेवम्भूत: श्रीकृष्ण [२]स्तदा व्यासङ्गादिना न स्मर्तव्य:। सत्यम्; बलाच्चेतस्या-याति [३]किं कर्तव्यम् [४]किम्भूत: ? चन्द्रकेण विचित्रचिह्नेन [५] चारुणां मनोहराणां [६] मयूरशिखण्डकानां मयूरपिच्छानां मण्डलेन समूहेन वलयिता वेष्टिता: केशा येन। किञ्च प्रचुरै: बहुभि: पुरन्दरस्य [७]इन्द्रस्य धनुर्भिरनुरञ्जित: [८]चित्रितो मेदुर: स्निग्धो मुदिर: सानन्दो जलदो मेघ: तद्वत्सुवेश सुन्दरम्। अत्र नानामणिखचितहारमुकुट-

केयूरादीनामिन्द्रधनुर्भिस्साम्यमिति अद्भुतोपमेयम्। श्रीकृष्णस्य[१०] मेघसाम्यम्[११] ''शिखण्डश्च पिच्छबर्हे नपुंसके'' **इत्यमर**:(२.५.३१)। ''वेष्टितं स्याद्वलयितम्'' इत्यपि (**अमर**: ३.१.९०)। ''मुदिर: कामुकेऽम्बुदे'' इति **विश्व**: (१०१. १२१)। ''वेशो वेश्यागृहे प्रोक्तो नेपथ्ये गृहमात्रके'' (इत्यपि; **विश्व**: ११४.९)। [१२]'' समौ चन्द्रकमेचको'' **इत्यमर**:(२.५.३१)। मयूरो बर्हिणो बर्ही[१३] **इत्यमर**: (२.५.३०)। ''मण्डलं वर्तुले प्रोक्तं समूहे विग्रहे[१४] रवे:। आवृतौ[१५] देशकालेऽपि मण्डलं क्षुद्रभूमिके'' इति **वैजयन्ती**। भावोत्प्रेक्षा रूपकोऽलङ्कार: ।।२।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२।। चन्द्रकेति। चन्द्रकेण विचित्रवर्णचिह्नेन चारूणां शोभमानानां मयूरशिखण्डकानां मयूरपिच्छनां मण्डलेन समूहेन वलयिता: वलयाकारेण वेष्टिता: केशा: यस्य, अत एव प्रचुरेण विस्तीर्णेन पुरन्दरधनुषा [१६]इन्द्रधनुषाऽनुरञ्जितश्चित्रितो मेदुरो[१७]निबिड: स्निग्धो[१८] मुदिरो मेघस्तद्वत्सुवेषं सुन्दरम् ।।२।।

१.मुदित-अ.ब.२.तदान्यासङ्गादिना-ब.३.किं कर्तव्यमित्याह-ज.४.कीदृशाम्-फ.ग.ह.ज.कीदृश:-इ.५.चारुरागं-अ.ब.६.नास्ति-अ.ब.इ.फ.ग.ह.७.नास्ति-अ.८.नास्तृअ. ९.अभूतोपमेयम्-इ.फ.ग.ज. अभूतोपमेय:-ह.१०.नास्ति-अ.ब.११.शिखण्ड: पिच्छबर्हे नपुंसक: **इत्यमर**:-ग.शिखण्ड: पिच्छबर्हे तु नपुंसक **इत्यमर**:-फ.ह.ज.१२.नास्ति-अ.ब.१३.इत्यपि-इ.फ.ग.ह.ज.१४.रवौ-ग.१५.देशभागेऽपि-इ.फ.ग.ह.ज.१६.नास्ति-ड.१७.इति सान्द्रो मुदिरो-क. मेघस्तद्वत्सुवेषं-ल.म.१८.मेदुरो-ड.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२।। (चन्द्रकेति) चन्द्रका: चन्द्रकान्तिमण्डलविशेषा:। तै: चारु उद्रिक्तवर्णत्वात्सुन्दरम्। मयूरस्य शिखण्डका: शीर्षस्थतुल्याग्रभागा: तेषां मण्डलं समुदाय: तेन वलयिता: वेष्टिता: केशा: यस्य तम्। प्रचुरै: पुरन्दरधनुर्भिर: नुरञ्जित: संयुक्त: मेदुर: गाढ: मुदिर: मेघस्तद्वत्सुवेश: शोभनसंवेश: तम्। पीताम्बरपरिधानीयत्वेन नीलमेघश्याम इति वर्णितम्। अत्रापि सुकेशमिति पाठे मयूरशिखण्डच्छन्नत्वेन उपमानं प्रचुरपुरन्दरादिविशेषितमिति कल्पितोपमा।।२।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२।।पुन: किंविधम्? चन्द्रकेत्यादि। ह्रस्वश्चन्द्र: चन्द्रक:, ह्रस्वार्थे क:। चन्द्रकेण अर्धचन्द्राकारेण कालिमाभागेन चारुर्यो मयूरशिखण्डक: मयूरपिच्छं तस्य मण्डलेन समूहेन स एव मण्डलं मण्डलाकारत्वात्तेन वा वलयिता वेष्टिता केशा यस्येति विग्रह:।

''समौ चन्द्रकमेचकौ'' **इत्यमर**:। ''वेष्टितं स्याद्वलयितं सम्वीतं रुद्धमावृतम्'' **इत्यमर**:। उपमानोपमेयभावं विशेषणद्वारा प्रतिपादयन्नाह। पुन: किंविधम्? प्रचुरेत्यादि। प्रचुरं सम्पन्नं यत् पुरन्दरधनुस्तेनानुरञ्जितो भूषित: चित्रितो वा यो मेदुर: स्निग्धो मुदिरो मेघस्तादृक् शोभनवेशो यस्येति विग्रह:। ईदृश: मुदिर इव सुवेशस्तमिति वा। ''मुदिर: कामुके मेघे'' इत्यु**त्पलिनी**। ''सान्द्र: स्निग्धस्तु मेदुर:'' **इत्यमर**:। ''वेशो रूपे च भूषायां प्रवेशे गृहमात्रके'', ''प्रचुरं भूरिसम्पन्नम्'' **इत्यमरमाला**। अत्र मयूरशिखण्डसंयत-केशपाशस्य इन्द्रधनूरञ्जितमेघेन साम्यं गम्यते।।२।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२।। पुन: कीदृशं? चन्द्रकेनार्द्धचन्द्राकारेण चारूणां मयूरपुच्छानां मण्डलेन वेष्टिता: केशा यस्य तम्। तदेव उत्प्रेक्ष्यते, वृहदिन्द्रधनुषा अनुरञ्जितश्चित्रितो य: स्निग्धो मेघ: तादृक् शोभनो केशो यस्य तम्।।२।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२।। वेशमनुस्मरन्त्याह; चन्द्रकेति! चन्द्रकेन मध्यस्थित सचाकचैक्यार्धचन्द्राकारेण चारूणां मनोहरणां मयूरशिखण्डकानां मण्डलेन पंक्त्या वलयितो रचनाविशेषेणाध ऊर्ध्वतया वेष्टित: केशबन्धो यस्य तम् तदेवोत्प्रेक्षते। प्रचुरा बहुला ये पुरन्दरधनुष: इन्द्रचापास्तैरनुरञ्जितश्चित्रितो यो मेदुर मुदिर: स्निग्धनीलमेघस्तद्वत् शोभनो वेशो यस्य तम्। गोपवेशोचितविचित्रवर्णकेलिकलापपंक्तिपर्यन्तवेष्टितकुन्तलबन्धतया महेन्द्रचापशोभितसान्द्रजलद इव दर्शनीय:। मेघालोके भवति सुखिनोऽप्यन्यथा वृत्तिचेत:' इति रीत्या कस्य वा मनो न विकारयतीति भाव: उक्तं च **गोविन्दलीलामृते-**

'नवाम्बुदलसद्द्युतिर्नवतडिन्मनोज्ञाम्बर:,
सुचित्रमुरलीमुख: शरदमन्दचन्द्रानन:।
मयूरदलभूषित: सुभगतारहारप्रभ:
स मे मदनमोहन: सखि तनोति नेत्रस्पृहाम्।।'' इति।।२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। चन्द्रकेति, चन्द्रकेन अर्द्धचन्द्राकारेण परिदृष्टस्य मयूरपुच्छानां संयोगेन श्रीकृष्णस्य केशे जालं प्रचुरं भूयिष्ठं वा धनं पुरन्दरधनु इन्द्रधनुरिव चित्रितं दृश्यते। यस्मिन् केशपाशे इन्द्रधनुषि उत्प्रेक्षिते घनमेघाछन्नमिव केशं वहुल: नवीनमेघस्य शोभां धत्ते इत्युप्रेक्षा। मेदूरं चिक्कणं तदनुगुणं केशपाशम्। सोऽपि मम स्मरण पथमायाति।।२।।

**३-गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभम्।**
**बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम्।। रासे० ।।३ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३ ।। गोप्यो मुखे चुम्बयित्वा कृष्णं लोभं प्रापितवत्य: इत्यत्र वस्त्वर्थ। गोपकदम्ब-नितम्बवती मुखे चुम्बनेन लम्बितो लोभो यस्येति विग्रह:। अत्रावैदग्ध्यं गोपीनां प्राक् सूयं चुम्बनाद्वेद्यम्। अत्रापि णितिभव्युत्पन्ने धान्यपलालन्यायेन प्रयोज्या विवक्षायां लोभे कर्मणि वाच्ये क्त प्रत्यय:। पश्चाद्योज्यस्य ''गतिबुद्धि'' रित्यादिनाकर्मत्वात् प्रयमद्वितीये तयोरविभक्त्युत्पन्ने, पुन: कीदृशं, बन्धुजीवं मधुराधरपल्लवं ''स्वादुप्रियौ तु मधुरौ बन्धुकौ बन्धुजीवक:।'' पुन: कीदृशम्, उल्लसितस्मितशोभम्।

ईषद्विकसितैर्गण्डै: किञ्चिद्विकसितेक्षण:।
ईषल्लक्षद्विज: सोऽयमुत्तमानां स्मितं यथा।।इति **रुद्रट**:।।३ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३ ।। गोपेति। गोपसमूहस्य नितम्बवतीनां पृथुनितम्बानां मुखचुम्बनेन लम्भित: प्रापितो लोभो येन। अर्थान्मुखस्य। अथवा, गोपाङ्गनानां मुखचुम्बनेन लम्भितो लोभो येन; अथवा, गोपवधूचुम्बने लम्बितो लम्बीकृतो लोभो येनेति पाठान्तरं युक्तम्। अपि च, बन्धुजीववत् मधुरो मनोहरोऽधरपल्लवो यस्य। अपि च, उल्लसिता स्मितेन शोभा यस्य तम्।।३ ।।

## (३) जगद्धरकृत- सारदीपिका

।।३ ।। गोपेति गोपकदम्बस्य गोपसमूहस्य नितम्बवतीनां स्त्रीणां मुखचुम्बनेन लम्बित: लोभो येन । पुन: कीदृशं, बन्धुजीवपुष्पवत् मधुरो मनोहरोऽधरपल्लवो ओष्टपल्लवो यस्य उल्लसितेन विकासितेन स्मितेन शोभा यस्य तम् ।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३ ।। ननु एवं चैस्मिन्ननुरागिणि चेतस्तदा तं किमिति नानुसरसीत्यत आह, गोपकदन्बेति। गोपकदम्बस्याभीरसमूहस्य या नितम्बवत्य: प्रशस्तनितम्बशालिन्य स्त्रियस्तासां मुखचुम्बने लम्भित: प्रापितो लोभो येन तम्। तथा च मदग्रेऽप्यन्यास्वनुरक्त: स इत्येतावदहमसहमाना तं नानुसरामीति भाव:। यद्वा,नन्वयं त्वय्यनुरागरहितोऽन्याभिर्गोपीभि: सह क्रीडतीति त्वं तद्गुणकीर्तनमपि किमिति करोषीतयत आह, गोपकदम्बवतीभिर्मुखचुम्बने लम्भित: प्रापितो लोभ यस्य तादृशम्। तथा च तासु सहजस्नेहो नास्ति, परंतु बलात्कारेण ताभिश्चुम्बने लोभ: कारित:। सहजस्तु प्रणयो मय्येव तस्येति भाव:। पुन; कीदृशम्?

बन्धुजीवपुष्पवन्मधुरो मनोहरोऽधर एव पल्लवो यस्य तम्। उल्लसितान्तरीषद्धास्येन शोभा यस्य तम्। तथा च बन्धुककुन्ददर्शनेनापि तदीयाधरहास्यस्मारकेण स एव स्मर्यत इति भाव:। "रक्तकस्तु बन्धुको बन्धुजीवक:" **इत्यमर:**। "सुरसो मधुर: प्रोक्तो मधुलेशे मनोहरे" इत्य**नेकार्थ:**।।३।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।३।। गोपेति। गोपानां गोपकानां कदम्बकं समूहस्तस्य नितम्बवत्यस्तरुण्य: गोपकामिन्य इत्यर्थ:। कदम्बग्रहणं तु सकलगोपिकासंग्रहसूचनार्थम्, अथवा, कदम्ब आसामस्तीति कदम्बा:, आर्शाद्यच् तादृशाश्च नितम्बवत्यश्च राशीकृत नितम्बवत्य इत्यर्थ:, अथवा गोपकदम्बके गोप कुले या: नितम्बवत्य: तासाम्, अथवा कदम्बे कदम्बवने नितम्बवतीनां मुखचुम्बने वदनास्वादने स्तम्भित आसक्त: लोभो यस्य स तथाविधं सकलगोपकामिनी मुखचुम्बनलालसमित्यर्थ:। अनेन श्रीकृष्णस्य दक्षिणनायकत्वं व्यज्यते किञ्च बन्धुजीवम् "बन्धुको बन्धुजीवन" **इत्यमर:**। तद्वन्मधुरो मनोहरो योऽधरपल्लव: दन्तवास: किशलय: तत्र कलित: प्रस्तुत: दरस्मितशोभ: मन्दहासकान्तिर्यस्य तादृशं मन्दहासभासुराधरबन्धूकमित्यर्थ:। एतादृशं हरिमित्यन्वय:।।३।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३।। पुन: किम्भूतन्तत्राह, गोपकदम्बनितम्बवतीनामाभीरसमूहवामभ्रुवां मुखचुम्बनेन अर्थात् स्वमुखचुम्बनेन लम्भित: प्रापितो लोभो येन स तथा तम्। पुन: किम्भूतम्? बन्धुजीववत् बन्धुकपुष्पमिव मधुरो मनोहरोऽधरपल्लवो यस्य तम्। अत्र लौहित्यादिना अधर: किसलयेन रूपित:। पुन: किम्भूतम्? तासां मुखचुम्बनकौतुकेन उल्लसिता प्रकाशिता स्मितशोभा हास्यश्रीर्यस्य तम्। 'कदम्बमाहु: संहार्थे नीपे च नीकुरुम्बके"।।३।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३।। ननु श्रीकृष्ण[१]स्त्वय्यनुरागरहित: अन्ययुवतिभि: सह क्रीडति, किमर्थं तं स्मरसीति, सत्यम् स गुणवां[२]स्तत्र इत्याह, गोपेत्यादिना। पुन: [३]कीदृशम्? गोपकदम्बस्याभीरसमूहस्य या नितम्बवत्यो नार्यस्तासां मुखचुम्बनेन[४] लम्भित: [५] प्रापितो लोभो यस्य तम्। [६]अथ वा [७] नितम्बिनीभि: [८]स्वमुखचुम्बने लम्भितो लोभो येन तम्। तस्य तासु स्वभावजो स्नेहो नास्ति परन्तु बलात्कारेण ताभिश्चुम्बने लोभ: कारित इति[९]भाव:। किञ्च [१०] बन्धुजीवो[११]बन्धूकपुष्पं तद्वत् मधुरो मनोहरो

योऽधरपल्लव: पल्लवाकृतिरधरश्रेष्ठो यस्य तम्। यद्वा बध्नातीति[१२] बन्ध: प्रणयस्तं जीवयतीति; स चासौ मधुराधरपल्लवो यस्य तम्। [१३]पुन: उल्लसितेन [१४]देदीप्यमानेन स्मितेनेष[१५]द्धासेन शोभा यस्य तम्। यदि बन्धूकपुष्परागेण [१६] मधुरपल्लवाधररागरञ्जितो भवति स च स्मितकुन्दकलिकया युतो भवति; तदाधरशोभा मनो हरेदित्यभूतोपमेयम्। [१७]''रक्तकस्तु बन्धूको बन्धुजीवक:'' **इत्यमर:** (२.४.७३)। [१]सरसो [२] मधुर: प्रोक्तो मधुरोऽथ मनोहर: इत्य**नेकार्थ:**। पल्लवोऽस्त्री [३]किसलयम् **इत्यमर:** (२.४.१३)। उपमारूपकालङ्कार: ।।३।।

१.स्त्वदनुराग-ब.२.तत्राह-इ.फ.ग.ह.ज.३.कीदृशी-अ.ब.४.नास्ति-अ.५.प्राणित:-अ.ब.६.यद्वा-ग.७.तन्नितम्बवतीभि:-इ.फ.ह.ज.८.मुख-ग.९.नास्ति-ज.१०.बन्धुजीववत् बन्धूकपुष्पवत्-इ.फ.ग.ह.ज.११.बन्धूकपुष्पवत्-अ.ब.१२.नास्ति-अ.ब.१३.नास्ति-अ.ब.१४.नास्ति-अ.ब.१५.हास्येन-इ.फ.ग.ह.ज.१६.मधुराधरपल्लवोऽधरराग-ज.१७.तक्तवस्तुश्च बन्धूको बन्धुजीवक:-ज.रक्तस्तु-ह.इ.ग. रक्तश्च बन्धुको-फ.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३।। गोपेति। गोपकदम्बस्य आभीरसमूहस्य नितम्बवतीनां स्त्रीणां मुखचुम्बनेन लम्भित: प्रापितो लोभो [४]येन। [५] पुन: [६] कीदृशम्? बन्धुजीवमिव[७]जपापुष्पमिव[८]मधुरो वल्लभोऽधरपल्लव: ओष्ठपल्लवो यस्य। बन्धुजीवं[९]दुपरिया भाषायाम्। उल्लासितेनोत्कटेन स्मितेन शोभा यस्य तम्।।३।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३।। गोपकदम्बेति गोपकदम्बानां बल्लवगणानां नितम्बवत्य: नितम्बिन्य: स्त्रिय इति यावत्। तासां मुखानां चुम्बने लम्भित: प्राप्त: लोभो यस्य तम्। यद्यप्यत्र गोपनितम्बवतीकदम्बेति वक्तव्यम्; तदा यथान्यानेकगोपगणत: स्त्रीत्वेनास्य वा स्त्रैणत्वं प्रकाशते इति न तथेति व्याख्यातपाठ एव सम्यक्। बन्धुजीवं जपाकुसुमं तद्वन्मधुर: आरक्त: अधरपल्लवो यस्य तम्। अत्राधरपल्लवयो: परिणाम:, पश्चात् बन्धुजीवेति वाचकलुप्तोपमा। अन्यथा उपमाया अयोगात्। ''परिणाम: कियार्थश्चेद्विषयी विषयात्मना'' इति परिणामलक्षणम्। अधरपल्लवयोर्नादौ रूपकम्। उपमाया: पल्लवेन सह सम्बन्धप्रसङ्गात्। बन्धुजीवकपदप्रयोगे चतुर्मात्रयतिगणभङ्गो भवति। गणेनात्राष्टके तालपातैक्यं कृतम्। ''फुल्लजपामधुरे'' ति पाठस्सम्यक्। उल्लसितं उद्गतं स्मितं तेन शोभा यस्य तम् ।।३।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३ ।। पुन: किंविधम्? गोपेत्यादि। गोपकदम्बानां गोपसमूहानां नितम्बवतीभि: मुखस्य चुम्बनेन कृष्णमुखचुम्बनदानेन लम्बित: प्रापितो लोभो यस्येति विग्रह:। सुरतायेत्यर्थात्। गोप्यो मुखे चुम्बयित्वा कृष्णं लोभं प्रापितवत्य: इत्यत्र वस्त्वर्थ:। कदम्बमाहु:। ''सिद्धान्ते नीपेऽपि निकुरुम्बके'' इति **विश्व:**। अत्र वैदग्ध्यं गोपीनां प्राक् स्वयं चुम्बनाद् वेद्यम्। अत्र णिच्युत्पन्ने 'धान्यपलाल' न्यायेन प्रयोज्याविवक्षायां लोभे कर्मणि वाच्ये क्तप्रत्यय:। पश्चात् प्रयुज्यमानस्य प्रयोज्यस्य गतिबुद्धीत्यादिना कर्मत्वात् प्रथमाद्वितीयेतरविभक्तिरुत्पन्नेति। पुन: किंविधम्? बन्धुजीवेत्यादि। बन्धुजीवकुसुमवन्मधुर: प्रिय: प्रीतिजनक: अधरपल्लवो यस्येति विग्रह:। ''स्वादुप्रियौ तु मधुरौ'' **इत्यमर:**। श्लेषोक्त्या मधुर: स्वादुगुणयुक्त:। किं वा बन्धुजीववन्मधुर: शोभनोऽधरपल्लवो यस्येति विग्रह:। अत्र मधुरशब्दस्य लक्षणया शोभनार्थकता। प्रीतिजनकत्वरूपमुख्यार्थसम्बन्धात् शोभनं हि द्रव्यं प्रीतिजनकं भवति। अयमेव बन्धूकपुष्पसदृशोऽधरोऽतिप्रीतिजनको भवति। तेनात्रोक्तिश्लेषालङ्कारप्रतिपादनार्थं मधुरशब्दो निबद्ध:। उद्दामस्वच्छन्दादिव शब्दवल्लक्षणगत्या शब्दप्रवृत्ति:। पुन: किंविधम्? उल्लसितस्मितशोभमिति। उल्लसिता उत्कर्षेण दीप्तिमती स्मितस्य प्रागुक्तलक्षणस्य शोभा यस्येति विग्रह:।।३ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३ ।। पुन: कीदृशं? गोपाजातीयस्त्रीणां मुखचुम्बेनेन लम्भित: प्रापितो लोभो यस्य तं मयीति शेष:। तथा बन्धुकपुष्पवत् अरुणो मधुरश्चाधरपल्लवो यस्य तं तथा विकसितेन स्मितेन शोभा यस्य तम्।।३ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३ ।। अधरशोभामनुस्मरन्त्याह; गोपेति! गोपकदम्बस्य गोपसमूहस्य यावत्यो नितम्बवत्यस्तरुण्यस्तासां मुखचुम्बनेन लम्भितो मयि प्रापितो लोभश्चुम्बनलालसा यस्य तम्। पुन: कीदृशम्, बन्धुजीवं बन्धूककुसुमं 'बन्धूको बन्धुजीवक' **इत्यमर:**। तद्वन्मधुर: स्पृहणीय: किं वा बन्धुजीवस्यापि स्पृहणीय:। ईदृशं माधुर्यं किं मम स्यादित्यभिलषणीय इत्यर्थ:। एवं भूतो योऽधरपल्लव ओष्ठदलं तत्र कलिता आविर्भूता दरस्मितस्य मन्दहसितलेखस्य शोभा यस्य तम्। दरस्मितस्य साहजिकत्वेऽपि कलितेत्यनेन तस्य भावविशेषसूचकता व्यज्यते। नितम्बभारालससमागतव्रजयुवति-कर्त्तृकनिजमुखचुम्बनोद्बोधितमन्मुखचुम्बनस्पृहं तम्। अनादृतवत्या कोपग्रहगृहीततया

मया आत्मनैवात्ममान्द्यं कृतं निश्चिनोमि च तस्य तद् गोष्ठीष्वनादरं यत् तासु चुम्बनमर्पयन्तीषु कथमेतावदभिप्रायं न जानन्तीति मदभिमुखं दरहसितवानिति भावः।।३।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।। गोप कदम्बेति; गोपकदम्बसमूह नितम्बिनी उन्नतनितम्बं लोभनीयं यासां तासां मुखचुम्बनदर्शनजनित राधाहृदये जातः लम्भितः लोभः बन्धुजीव बन्धुकपुष्प इव मधुराधरस्य कोमलोष्ठपल्लवस्य आस्वादनं कर्त्तुं बलवती इच्छा वर्द्धते। यतो हि अन्यासां चुम्बनं स्वनायकेन दृष्ट्वा स्वतः लोभायते तनुरिति ।।३।।

**४ -विपुलपुलकभुजपल्लववलयितवल्लवयुवतिसहस्रम्।**
**करचरणोरसि मणिगणभूषणकिरणविभिन्नतमिस्रम्।। रासे० ।।४।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४।। विपुलपुलकौ च तौ भुजपल्लवौ चेति कर्मधारयः। विपुलपुलक भुजपल्लवाभ्यां बलयितं वेष्टितं वल्लव युवतिसहस्रं येनेति विग्रहः। सर्वासामेकदैवालिङ्गनात्, तासु कृष्णस्य प्रेमातिरेकः। करचरणेत्यादिः। करौ चरणौ च उरश्च इति विग्रहे द्वन्द्वश्चेत्यादिना एकवद्भावः। करचरणोरसि स्थितानि मणिगणोपलक्षितानि यानि भूषणानि तेषां किरणैर्विभिन्नं तमिस्रं येनेति विग्रहः। "तमिस्रं तिमिरं तमः" **इत्यमरः**।।४।।

## (२)राणाकुम्भकृत-रसिकप्रिया

।।४।। विपुलेति। विपुलपुलकौ पृथुरोमाञ्चौ यौ भुजौ तौ पल्लवाविव ताभ्यां वलयितं बल्लवयुवतीनां गोपाङ्गनानां सहस्रं येन। पुनश्च करौ च चरणौ च उरश्च तेषां समाहारः करचरणोरः। प्राव्यणयङ्गत्वात्समाहारः। "अमूर्धमस्तकात्स्वाङ्गादकामे"(पा.६।३।१२) इति सप्तम्या अलुक्समासः। तत्र स्थितानां मणिगणभूषाणां किरणैर्विभिन्नं तमिस्रं येन स तथा।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। विपुलेति विपुलाः पुलकाः रोमोद्गमा ययोस्ताभ्यां भुजपल्लवाभ्यां वलयितं वेष्टितं बल्लवानाम् अबिराणां युवतीसहस्रं गोपिकावृन्दं येन पुनः कीदृशं कमौ चरणौ उरश्च एषां समाहरः करचरणोरस्तस्मिन् वर्त्तमानानां मणिगणयुक्तभूषणानां किरणं वनदाप्त्या विभिन्नं नाशितं तमिस्रमन्धकारो येन सः तम्।।४।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४।। पुन: कीदृशम्? विपुलेति। विपुल: पुलको रामोञ्चो यत्र ताभ्यां भुजपल्लवाभ्यां पल्लववत्कोमलाभ्यां बाहुभ्यां वलयितं वेष्टितं बल्लबयुवतीनामाभीरपत्नीनां सहस्रं येन तम्। अत्र वलयितमित्यनेनावज्ञया तासां वेष्टनमात्रं न तु गाढालिङ्गनं सरहस्यं चुम्बनालिङ्गनादिकं तस्य मयैव सहेति तस्य स्मरणमुचितमेवेति ध्वनितम्। पुन: कीदृशम्? करयोश्चरणयोरूरसि च यानि मणिमयानि भूषणान्यलंकरणानि तेषां किरणैर्विभिन्नं नाशितं तमिस्रं येन तम्। एतेन प्रथमाभिसारे स्वकीयालंकारकिरणैरूद्द्योते सति लज्जया परावर्तमानां मां समानीय तां चेष्टां कृतवान् येन तं क्षणमपि मनो न विस्तरतीति ध्वनितम्। "अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तम:" **इत्यमर**:।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। विपुलेति, विपुला विस्तृता निरन्तरा अविरला: सान्द्रा इति यावत्, तादृशा: पुलका रोमोद्गमा येषु तथाविधानाम्। अनेन तृतीय: सात्विकभाव: सूचित:। भुजानां पल्लवैरग्रभागैरत्रावस्थानसाम्यात्पल्लवशब्देनाग्रभागव्यवहार:। करतलपल्लवयो:-साम्याद्वा, अत्र करतलस्य पल्लवत्वरूपणाद्भुजानां शाखात्वरूपणमवगन्तव्यम्। अतएवैकदेशविवर्त्तिरूपकम्। बलयितं क्रोड़ितं वेष्टितालिङ्गितमिति यावत्। तादृशवल्लवयुवतिसहस्रं गोपकामिनी षोड़शसहस्राणि येन, तादृशम्, अत्र सर्वेश्वरस्य भोगचातुर्य्यं सूचितम्, किञ्च कराश्च चरणाश्च उरश्च करचरणोर: प्राण्यङ्गत्वादेकवद्भाव:, अथवा करौ चरणौ उरश्चेति, क्रमदीपिकादिग्रन्थेषु भगवतो बहुभुजवत्ताया अपि प्रतिपादनात्तथा व्याकृतमित्यवगन्तव्यम्। तस्मिन् यानि मणिगणभूषणानि नवरत्ननिर्मिता-लङ्करणानि तेषां किरणैर्मयूखै: विभिन्नमपाकृतं तमिस्रं रतिसारस्य प्रतिपादकान्धकार: स्वोपासकनिर्मोहान्धकारो वा येन तं तथाबिधं हरिमित्यन्वय:।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। पुन: किम्भूतन्तत्राह; विपुल: प्रचुर: पुलक: रोमाञ्चो यत्र तादृशेन भुजपल्लवेन बाहुपल्लवेन वलयितं वलयाकारेण वेष्टितम् आलिङ्गितं वल्लवयुवतिसहस्रं गोपतरुणीसहस्रं येन तम्। सहस्रशब्देन वल्लवीनामाधिक्यप्रतिपादनेन कृष्णस्य विश्वमूर्तित्वं प्रदर्शितम्। तथा च तावन्त्य एव कृष्णमूर्तयोऽपीति भाव:। पुलकोद्गमश्च आलिङ्गनसुखादेव। यद्यपि आलिङ्गनसुखात् सर्वाङ्गिन एव रोमाञ्चो भवति तथापि नान्याङ्गरोमाञ्चव्युदासोऽभिमत:, किन्तु मुख्यता भुजयोरित्येव भुजयोरित्युक्तम्। पुन: किम्भूतम्? करचरणोरसि स्थितानां मणिगणभूषणानां किरणेन दीप्त्या विभिन्नं विशेषतो

भिन्नं विदारितं तमिस्त्रं तमो येन तम्। करचरणोरसीत्यत्र प्राण्यङ्गत्वादेकवद्भावः। मनोहरत्वेन कोमलत्वेन च पल्लवसादृश्यं भुजयोः।।४।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४।। पुनः कीदृशम्? विपुलो विस्तीर्णः [१०]पुलको रोमाञ्चो यत्र[११] ताभ्यां [१२]भुजपल्लवाभ्यां पल्लववत्कोमलाभ्यां वलयितं[१३]वेष्टितं वल्लवयुवतीनां गोपवधूनां सहस्त्रं समूहो येन तम्। अत्र वलयितशब्देनावज्ञया तासां वेष्टनमात्रं न तु गाढालिङ्गनचुम्बनादिकमिति भावः। सस्नेहालिङ्गनादिकन्तु[१]तस्यैव मय्येवमेतत्तात्पर्यमिति । किञ्च करयोश्चरणयोश्चोरसि च मणिगणानां [२] रत्नसमूहानां किरणै रश्मिभिर्भिन्नं विशेषेण नाशितं तमिस्त्रमन्धकारो येन तम्। अनेन प्रथमाभिसारसङ्गमे [३] मदीयाङ्गालङ्कारप्रकाशेन ध्वान्तनाशेनावगुण्ठितमुखीं मां दृष्ट्वा बलादानीय तां चेष्टां कृतवान्। तं क्षणमपि विस्मर्तुं[४] मन्मनो नार्हतीति प्रेमपराकाष्ठा दर्शिता, [५]स्वसौभाग्यातिशयो[६]ऽपि दर्शित इति भावः। करचरणोरसीति प्राण्यङ्गत्वादे[७]कवचनम्। वेष्टितं स्या[८]द्वलयितेऽपि च इति **कोशप्रदीपे**। ''अन्धकारोऽस्त्रियां ध्वान्तम्'' **इत्यमरः** (१.८.३)।''किरणास्त्र[९] मयूखांशु'' इत्यपि (**अमरः** १.४.३३)।।४।।

१.सरसोऽथ मधुः प्रोक्तो-ज.२.मधुः प्रोक्तो-इ.फ.ग.ह.३.किसलयमपि-इ.फ.ग.ह.-किसलयमित्यपि-ज.४.येन तम्-क.५-६.नास्ति-ड.७.बन्धुजीवपुष्पमिव-क.मधूकपुष्पमिव-ल.म.८.अधरोरसयुक्ताधरपल्लवो यस्य-ड.९.दुपहरिया-ल.म.१०.नास्ति-अ.ब.११.तासां-अ.ब.१२.नास्ति-ग.१३.चेष्टितं-अ.ब.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४।। विपुलेति। विपुलाः बहुलाः पुलका रोमोद्गमा ययोस्ताभ्यां भुजपल्लवाभ्यां वलयितं [१०] वेष्टितं वल्लवानां आभीराणां[११]युवतीनां सहस्त्रं गोपिकावृन्दं येन। पुनः[१२]कीदृशम्? [१३]करौ चरणौ उरश्च तेषां समाहारः[१४]करचरणोरः तस्मिन् वर्तमानं, मणिगणयुक्तभूषणानां[१५] किरणेन कान्त्या विभिन्नं [१६]विदारितं तमिस्त्रमन्धकारो येन ।।४।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४।। विपुलेति। विपुलाः पुलकाः प्रोद्गतरोमाञ्चाः भुजानां पल्लवाः पाणयः मृदुत्वेन पल्लवारोपो वा भुजे बोध्यः ; तैः वलयितानि मण्डलीकृतीनि वलल्व(ल्लव)युवतीनां गोपतरुणीनां सहस्राणि येन तम्। अर्थाद्रासक्रीडारचनं दर्शितम्। प्रत्येकं परस्परपाणिधारणेन मण्डलाकारयोषिन्मण्डले मध्ये तिष्ठन्तमिति भावः। करचरणोरसि, करौ च

चरणौ च उरश्चेति द्वन्द्वैकवद्भाव:; प्राण्यङ्गत्वात्। मणिगणभूषणानां किरणै: कान्तिभि: विभिन्नं तमिस्त्रं येन तम्।।४।।

१.एव नास्ति-इ.फ.ग.ह.ज. २.रत्नसमूहभूषणानां-ग.रत्नसमूहानां भूषणानां-फ.ह.ज. ३.मदीयालङ्कारेण ध्वान्तनाशेनेव कुञ्चितमुखीं-इ.मदीयालङ्कारप्रवेशेन ध्वान्तनाशेन कुण्ठितमुखीं-अ.ब.ड.क.मदीयालङ्कारेण ध्वान्तनाशेनैव कुञ्चिमुखीं-ज.४.मम मनो-ग.५.सुख-सौभाग्यातिशयो-ग.६.निदर्शित-इ.नास्ति-ज.७.एकत्वं बहुत्वेऽपि-इ.फ.ह.ज.८.वलयितं वलयालिङ्गनेऽपि वेति-इ.फ.ग.ह.ज.९.मयूरखांशुरश्मिरित्यपि-ज.मयूखांशुरित्यपि-इ.फ.ग.ह.च-ल.म.१४.नास्ति-ड.१५.किरणैर्दीप्त्या-क.ल.म.१६.दारितं-ड.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४।। पुन: किंविधम्? विपुलेत्यादि। विपुला महान्त: पुलका रोमाञ्चा ययोर्भुजयोस्त[ात:](योः), तादृशयोर्भुजयो: पल्लवेन विस्तारेण भुजाभ्यां विपुलपुलकभूजशाखाभ्यां वा वलयितं वेष्टितं बल्लवयुवेति। अर्थाद्धि सम्भद्रं (सम्भव) सहस्त्रम्। सहस्त्रशब्दोऽत्र सङ्ख्यावाची। ''असङ्ख्यावचने स्यातां सहस्त्रं शतमित्युभे इति **हट्टचन्द्र:**। सर्वासामेकदैवालिङ्गनात् तासु कृष्णस्य प्रेमातिरेक:। पल्लव: किसलये खड्गे विस्तारे विटपे वने'' इति। पुन: किंविधम्? करचरणेत्यादि। करौ च चरणौ च उरश्च इति विग्रहे द्वन्दश्चेत्यादिना एकवद्भाव:। करचरणोरसि स्थितानि मणिगणोपलक्षितानि यानि भूषणानि तेषां किरणैर्विभिन्नं निवर्तितं तमिस्त्रं येनेति विग्रह:।।४।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४।। इह रासे विहित विलासं हरिं कीदृशं विस्तीर्ण: पुलको ययोस्ताभ्यां पल्लववत्कोमलाभ्यां भुजाभ्यां वेष्टितं वल्लवयुवतीनां सहस्त्रं येन तं एकदानेकालिङ्ग-नान्नैकनिष्ठप्रेमाणमित्यर्थ:। तथा करचरणोरसि स्थितानि मणिगणोपलक्षितानि यानि भूषणानि तेषां किरणैर्नाशितम् अन्धकारं तम्।।४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४।। निजसौभाग्यप्रथनाय तासां तस्य च व्यापारविशेषनुपक्षिपन्त्याहविपुलेति ! विपुला: पुलका येषु तादृशानि यानि भुजपल्लवानि, तैर्वलयितानां परस्परकरासक्ततया मण्डलाकारतया परित: स्थितानां वल्लवयुवतीनां सहस्त्रं यस्य तम्। भुजानां कोमलत्वग्रहणाय पल्लवशब्दोपादानम्। परितो वेष्ठनं तस्यान्यत्रगमनशङ्कया इति भाव:। पुन: कीदृशम्; करचरणोरसीति प्राण्यङ्गत्वादेकवद्भाव:। करयोश्चरणयोरुरसि च धृतानां मणिगणभूषणानां मणिगणखचितवलयनूपुरहारपदकादीनां किरणै:

कान्तिपुञ्जैर्विभिन्नमपाकृतं तमिस्रमन्धकारं येन तम्। आलिङ्गनाभिलाष-सूचककोमलभुजोद्गतरोमाञ्चस्य तरुणीवृन्दस्य वैजात्यं दीपैः प्रदर्शयन्तमिव। मयि सौहृदं प्रकाशयन्तं तं कथं न ज्ञातवतीति भावः ।।४।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। विपुलेति; विपुलं पुलकितं विस्तारितं रोमाञ्चितं भुजपल्लवं पल्लवमिव कोमलं भुजयुगलाभ्यां वेष्टितं वल्लवं नाम गोपयुवतीनां बहुशः गोपवध्वः स्वस्य प्रणयं गोविन्दे प्रकटयन्ति। तथा हस्त-पाद-वक्षसि नानालंकारभूषण जन्यतेजसा अन्धकारो विदूरितः। रासमण्डलभूमेः तथाभूतः कृष्णः स्मर्यते ।।४।।

**५ - जलदपटलवलदिन्दुविनिन्दकचन्दनतिलकललाटम्।**
**पीनघनस्तनमण्डलमर्दननिर्दयहृदयकपाटम्।। रासे० ।।५।।**

### (१)नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५।। जलदपटले चलन् चासौ इन्दुश्चेतिकर्मधारयः। जलदपटलचलदिन्दुंविनिन्दकं चन्दनविन्दुर्यत्र इदृशं ललाटं यस्येति वा विग्रहः। पीनपयोधरयोः परिसरमर्द्दनाय निर्द्दयहृदयकवाटं यस्येति विग्रहः। द्रुतत्वात् प्रसारितत्वाच्च हृदयस्य कवाटत्वं यस्येति विग्रहत्वे निरूपितम्। “पर्य्यन्तभूः परिसरः,” “कवाटमररं तुल्ये” **इत्यमरः** ।।५।।

### (२)राणाकुम्भकृत-रसिकप्रिया

।।५।। जलदेति। जलदपटलं घनसमुहः तं वलतः संभजमानस्येन्दोश्चन्द्रस्य विनिन्दकश्चन्दनतिलको ललाटे यस्य, वर्तुल इतियावत्। केचिञ्चलदिति पठन्ति, तत्र जलदपटलं गच्छत इति व्याख्येयम्। तत्पक्षे वंशे वाद्यमान मंर्ध्नः कम्पन ललाटे तिलकं चलदिव दृश्यते। अत्र ललाटस्य श्यामत्वात्तिलकस्यं गौरत्वान्मेघचन्द्राभ्यामुपमानो-पमयभावः।। अपि च, पीनौ घनौ यौ स्तनौ तन्मण्डलमर्दने निर्दयं हृदयकपाटं यस्य। चलदत्यत्रापि तथैव।।५।।

### (३) जगद्धरकृत- सारदीपिका

।।५।। जलदेति पुनः कीदृशं, हरिं जलदपटले मेघसमूहे चलतः इन्दोश्चन्द्रस्य विनिन्दकं समानं चन्दनतिलकं यत्र तादृशं ललाटं यस्य अभूतो प्रमेयं क्वचिज्जलदपटल – चलदिन्दुविनिन्दकचन्दनबिन्दु ललाटमिति पाठः। तदा जलदपटले चलन्सञ्चरन्य इन्दुश्चन्द्रस्तस्य विशेषेण निन्दकस्तिरस्कारकः चन्दनबिन्दुर्मण्डलाकृति तिलको ललाटे

यस्य तं। पुन: कीदृशं, पीनौ मांसलौ यौ पयोधरौ स्तनौ तयो: परिसरपर्यन्तदेशस्य मर्द्दने निर्द्दयं दयारहितं हृदयकपाटं कपाटवद्विस्तीर्णहृदयं यस्य तादृशम्।।५ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।५ ।। पुन: कीदृशम्? जलदपटले मेघसमूहे चलन्संचर इन्दुश्चन्द्रस्तस्य विनिन्दकस्तच्छोभातिशायी चन्दनविन्दुर्मण्डलाकृति तिलकं यत्र तादृशं ललाटं यस्य तम्। पुन: किदृशम्? पीनौ मांसलौ पयोधरौ स्तनौ तयो: परिसरस्य पर्यन्तभागस्य मर्दने निर्दयहृदयकपाटं कपाटवद्विस्तीर्णं हृदयं यस्य तादृशम्।।५ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५ ।। जलदेति। रासे, किञ्च, जलदपटलेन वारिवाहनिवहेन उपाधिना चलन् चञ्चल इवावभासमानो य इन्दु: पूर्णचन्द्र: तस्य विनिन्दकस्तिरस्कर्त्ता यश्चन्दनविन्दु: पटीरतिलकं तल्ललाटे यस्य तादृशं चलदग्रहणं चन्द्रस्यातिप्रकाशद्योतनार्थम्। निश्चल-नीरन्ध्रजलदे तत्प्रकाशस्याभावात्। सुरतसमये चलत्कुण्डलालङ्कृतललाटभासुरचन्द्रचन्दन-तिलकमित्यर्थ:। अथ तद् विनिन्दकश्चन्दनविन्दुर्यस्मिन् तथाविधं ललाटं यस्य तादृशं नीलजलदाभललाटसमीपभासमानचन्दनतिलकमिति वार्थ:। अथवा चलन्निन्दुर्यस्य तच्चलदिन्दु, जलदपटलं च तच्चलदिन्दुं च निन्दति वा चन्द्रविम्बसहित-मेघनिन्दक इत्यर्थ:। पीनौ पयोधरौ तयो: परिसर: ''पर्य्यन्तभू:परिसर'' **इत्यमर:**। तस्य मर्द्दनं पीड़नं वामनीकरणमित्यर्थ:। तत्र निर्द्दयं पराङ्मुखं हृदयकवाट कवाटवद्विस्तीर्णं हृदयं यस्य तादृशम्। गाढ़ालिङ्गनतत्परमित्यर्थ:। परिसरग्रहणं पयोधरयोरत्यन्त-काठिन्यसूचनार्थम्। अन्यथा तयोरेव मर्द्दने तत्काठिन्यं हीयते। तथा च सति रसभङ्गप्रसङ्ग इति भाव:। अत्र कुचपरिसरमर्द्दन एव भगवतो निर्द्दयत्वप्रतिपादनादन्यत्रसदय-हृदयत्वमवगन्तव्यम्। गोपिकानां वहुत्वेऽपि पयोधरेत्यत्र द्विवचनेनैव विग्रह: कार्य:। तदुक्तं **वामनेन**, स्तनादीनां द्वित्वविशिष्टा जाति: प्रायेणेति। पीनेत्यत्र प्याय: पीति पीभाव:, स्विदितो निष्ठायामिति निष्ठा, तस्य नत्वम्।।५ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५ ।। पुन: किम्भूतन्तत्राह, जलदपटलो मेघसमूह:, तत्र वलत: सम्भजत इन्दोश्चन्द्रस्य विनिन्दकं विशेषेण निन्दकं चन्दनस्य तिलकं यत्र एवभूतं ललाटं यस्य तम्। गोपीनां तिलकं वर्त्तु लम्भवत्यतश्चन्द्रसारूप्यम्, ललाटस्य च कृष्णतया मेघसारूप्यम्। पुन: किम्भूतम्? पीनानां मांसलाना पयोधराणां परिसरस्य पर्यन्तभागस्य मर्दने निर्दयो हृदयरूप: कपाटो यस्य तम्। हृदयमेव प्रकीर्णत्वाद् दृढ़त्वाच्च कपाटत्वेन रूप्यते।।५ ।।

[S]‘कृष्णामूर्त्तय एवेति’ इति पाठ।

[r]‘नान्याङ्गरोमाञ्च’ इत्यत्र ‘लास्याङ्गरोमाञ्च’ इति पाठ।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५।।[१] पुन: स्वोत्कर्षमेव [२] प्रथमं कथयन्त्याह, जलदपटलेति। जलदपटले मेघसमूहे वलतो राजमानस्य; चलदिति पाठे चलत: स्फुरत:; इन्दोश्चन्द्रस्य विनिन्दकस्तच्छोभातिशायी चन्दनतिलक: [३] चन्द्राकृति: [४]तिलको ललाटे यस्य तम्। पुन: कीदृशम्? गोपवधूनां[५]पीनौ पीवरौ पयोधरौ स्तनौ तयो: परिसरस्य पर्यन्तभाग्यस्य प्रसरणशीलस्य वा मर्दनेन निर्दयं दयारहितं हृदयमेव [६]कपाटं कपाटवत् विस्तीर्णं हृदयं यस्य[७]तम्। कपाटपदस्यायं भाव: कपाटं प्रियधनरक्षणार्थं अप्रियनिवारणार्थं च दीयते। अत्र श्रीकृष्णचन्द्रस्य प्रियधनं[८]राधैव। [९]सा च हृदयेअधि तिष्ठतीति [१०] तद्रक्षार्थमिति। अर्थान्तर [११] न्यासोऽयमलङ्कार:। उत्प्रेक्षारूपक इत्येके। ‘‘कपाटमररं तुल्ये’’ (**इत्यमर**: २.३.१७)। पर्यन्तभू: परिसर: इत्यपि (**अमर**: २.१.१४)। कपाटं कुञ्चिकामृते नोद्घाटितं भवति यथा तथा मां विना [१२] हृदयालिङ्गनरस इति सूचितम्। मद्व्यतिरिक्तानां कं सुखं पाटयतीति[१३]वा ।।५।।

१.पुन: किम्-इ.पुन: कीदृशम्-फ.ग.ह.नास्ति-ज. २.प्रथयन्-इ.फ.ग.ह.ज. ३.नास्ति-फ.ज. चन्द्राकृति-ह.ग. ४.नास्ति-फ.ज. ५.पीनौ पीवरौ तीक्ष्णौ पयोधौ तयौ:-इ.ह.ग.पीवरौ तीक्ष्णौ पयोधरौ तयो:-फ.ज. ६.नास्ति-ग. ७.नास्ति-अ.ब.इ.स:-फ. ८.श्रीराधैव-इ.फ.ग.ह.ज. ९.तच्चहृदये तिष्ठतीति-इ.फ.ग.ज.तच्च चद्धृदये तिष्ठतीति-ह. १०.तद्रक्षार्थं हृदयं कपाटपदेन पृहीतमिति-इ.फ.ग.ज. ११.न्यासोपमालङ्कार:-अ.ह.ज.फ.ग. १२.तद्धृदया-इ.फ.ग.ह.ज. १३.वा कपाटशब्दार्थ:-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५।। जलदेति। [१]पुन: कीदृशं हरिम् [२]? जलदपटले मेघसमूहे [३] चलतस्सञ्चरत: इन्दोश्चन्द्रस्य विनिन्दकं समानं चन्दनतिलकं[४] चन्दनगन्धकृततिलकं यत्र, तादृशं ललाटं यस्य।[५] अभूतोपमेयम्।[६] पुन: कीदृशम्[७]? पीना नां मांसलानां पयोधराणां स्तनानां परिसरस्स पर्यन्तदेशस्य[८] मर्दनेन निर्दयं दयारहितं हृदयकपाटं यस्य।।५।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५।। जलदेति। जलदपटले मेघमण्डले चलन् इन्दु: चन्द्र:, तं विनिन्दतीति विनिन्दक:; तत्तुल्य इत्यर्थ:। ‘‘देशीयदेश्यरिष्टाभसोदराद्या इवार्थका’’ इति वचनात्। आर्थी उपमा। तादृशश्चन्दनतिलक: वर्तुलाकारविन्दु: अर्धचन्द्राकारो वा यस्मिन् तत् ललाटं यस्य स: इति पुन: बहुव्रीहि:। पीनौ पयोधरौ कुचौ तयो: परिसरे परिमर्दने

पीडने निर्दयं हृदयं अन्त: करणमेव कपाटं फलकं यस्य तम्। हृदयपदस्य वक्षोरूपार्थकत्वे गाढालिङ्गनेनापि कुचमर्दनं युक्तम्।।५ ।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५ ।। पुन: किंविधम्? **जलदपटलेत्यादि**। जलदा मेघास्तेषां पटलं समूहस्तेन हेतुना चलतश्चलद्रूपतया लक्ष्यमाणस्येन्दोर्विनिन्दकस्तिरस्कर्ता चन्दनबिन्दु: मण्डलाकार: चन्दनतिलको यत्र ईदृशं ललाटं यस्येति विग्रह:। ''वर्णकादेश्चक्राकृतिर्विन्यासो बिन्दुरुच्यत'' इति। शून्यमिति ज्योति: शास्त्रदौ। तथा च, ''बिन्दु: स्याच्छिदुरे नाट्यभेदे पृषतशून्ययो:'' इति "**कुमुदाकर**:"। पुन: किंविधम्? पीनपयोधरेत्यादि। पीनौ च तौ पयोधरौ स्तनौ चेति कर्मधारय:। तयो: परिसरस्य प्रान्तदेशस्य मर्दनाय मर्दन वा निर्दयं दयारहितं हृदयकवाटं यस्येति विग्रह:। हृदयमेव कवाटं, हृदयं कवाटमिवेति वा। दृढत्वात् प्रसारितत्वाच्चात्र हृदयस्य कवाटत्वं निरूपितम्। ''स्मृत: परिसरो मृत्यौ देवोपान्त्यशप्रान्तप्रदेशयो:'' इति **विश्व**:। ''कपा (वा) टमररं तुल्ये'' इति।।५ ।।

## (११) पूजारीगोस्वामीकृत- बालवोधिनी

।।५ ।। पुन: पूर्वानुभूतमेघसमूहेन वेष्टितेन्दो: शोभातिशायी चन्दनतिलको ललाटे यस्य तम्, तथा पीनपयोधरयो: पर्यन्तभागस्य मर्द्दनाय निर्द्दयं हृदयकपाटं यस्य तम्। दृढ़त्वविस्तीर्णत्वाभ्यां अत्र हृदयस्य कपाटत्वेन निरूपणम्। 'पर्यन्तभू: परिसर: कपाटमम्वर समम्' "**इत्यमर**:"।।५ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५ ।। पदद्वयसूचितचुम्बनालिङ्गनाभ्यां संस्मारितयोर्ललाटवक्षसो माधुरीमनुस्मरन्त्याह, जलदेति! जलदपटलाद् सान्द्रनीलमेघसंघात् चलन्नि:सरन्निव दृश्यमानस्तत् समीपवर्त्तीत्यर्थ:। एवंभूतो य इन्दु: पूर्णचन्द्रस्तस्य विनिन्दकस्तिरस्कारी, ततोऽपि अधिकशोभन इत्यर्थ:। ईदृशश्चन्दनबिन्दुर्ललाटे यस्य तं किञ्च पीन पयोधरयो: गोपतरुणीनां पृथुलकुचयो: परिसरस्य पर्यन्तभागस्य मर्दने वामनीकरणे विषये निर्दयं दयारहितं हृदयकपाटं यस्य तम्। दृढत्वविस्तीर्णत्वाभिप्रायेण वक्षस: कपाटत्वेन रूपणम्। परिसरग्रहणं स्तनयो: काठिन्यद्योतनार्थम्। अत एव निर्दयशब्दस्य उपन्यास:। ईदृशललाटवक्षसो: सौभाग्यं निरीक्ष्य का वा चुम्बनालिङ्गनाभ्यां विरमेदिति भाव:।।५ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५ ।।जलदपटलेति; जलदपटलेनेति; मेघसमूहेन वेष्टितेन्दो:परिवृते चन्द्रे शोभातिशायी चन्दनतिलकललाटदेशे चन्दनतिलकललाटे केशपाशस्य चन्द्रेणसाकमुपमितम् ।पुन:

स खलु स्वकीयश्रितानां गोपीनामत्युन्नतं पृथुलं स्तनमण्डलं दृढेहस्तेन मथित्वा स्वस्य निष्ठुरतां प्रतिपादयति। निर्दयः अर्थात् निष्ठुरः हृदयकपाटं विस्तीर्णः वक्षदेशो वा तस्य स्तनमर्दनप्रकारमाचुचुकात् मूलपर्यन्तं दृढेन एतत् कार्यं गोपीनामानन्दं वर्द्धयते। अत्र हृदयकपाटस्य दृढताद्योतने कपाटाभ्यन्तरे गोप्यते खलु रासेश्वरी श्रीराधा इत्येव सञ्जीवनीकारस्य वनमालीभट्टस्याशयः। प्रत्युत हृदि राधाया स्थानं सुरक्षितमिति ध्वनिर्न भवति। परन्तु पीनस्तनस्यपर्यन्तमर्दने काठिन्यमिति रसिकरङ्गदाटीकायाम्। परन्तु पीनस्तनपर्यन्तमर्दनत्वं रतिभावोद्रेकाय नितरामावश्यकम्। तेन गोपीनां सुखवर्द्धनं तथा अधिकाधिकक्रीडां कर्त्तुमिछा बलवती भवेदिति। निर्दयता खलु राधा स्वयं दीनतामनुभूय स्वस्य भावं प्रति उपेक्षा एव निष्ठुरतां द्योतयति इति। उक्तं च **श्रीमद्भागवते**, "बाहुप्रसारपरिरम्भकरालकोरु नीवीस्तनालभ्मननर्मनखाग्रपातैः। क्ष्वेल्यावलोकहसितैः व्रजसुन्दरीणामुत्तम्भयन् रतिपतिं रमयाञ्चकार।" १०.२९.४६ ।।५।।

**६-मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम्।**
**पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम्।। रासे० ।।६।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६।। मणिमयो मणिविकारो यो मयूरस्तेन मनोहराभ्यां कुण्ड़लाभ्यां मण्डितौ गण्डौ यस्येति विग्रहः। पुनः कीदृशं, अनुगतमुनिमनुजसुरासुरवरपरिवारं अनुगताः मुनिमनुजसुरासुराणां वराः परिवाराः परिजनाः यस्येति विग्रहः। "परिवारः परिजने खड्गकोषे परिच्छदे"। यद्यप्येतद्वस्तुतोपकारकरवर्णनं तथा विरहिण्याः गुणोत्कीर्त्तनत्वात् अदुष्टम्।।६।।

### (२)राणाकुम्भकृत-रसिकप्रिया

।।६।। मणिमयेति। मणिमये मकराकारे मनोहरे ये कुण्डले ताभ्यां मण्डितोऽलंकृतो गण्डो यस्य। अपि च, उदारं दक्षिणम्। किंच पीते वसने यस्य। किंच अनुगत अश्रितो मुनिमनुजसुरलक्षणो वरपरिवारो यस्य तम्।।६।।

### (३) जगद्धरकृत- सारदीपिका

।।६।। मणिमयेति मणिमयेन मणिरूपेण मकरवन्मनोहराभ्यां कुण्डलाभ्यां मण्डितोऽलङ्कृतो गण्डम् गण्डस्थलं यस्य । पुनः कीदृशं, महान्तम् उदारम् अभीष्टदातारं वा पुनः कीदृशं पीतं वसनवस्त्रं यस्य महत्वमाह अनुगता आश्रिता ये

मुनिवरा: शुकनारदादय: मनुजा: परीक्षितादय:, सुरवराब्रह्मारुद्रादय: असुरा: प्रल्हादादयस्ते परिवारा: परिजना: यस्य तादृशं ''द्वन्द्वान्तवरपदस्य तेषां वरा'' इति ग्रहणम्।।६।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।६।। पुन: कीदृम्? मणिमयेति। मणिमये मणिखचिते मकरवन्मनोहरे ये कुण्डले ताभ्यां मण्डितौ कपोलौ यस्य तम्। पुन: कीदृशम्? उदारमौदार्यगुणयुक्तम्। अत्र रहसि मया यथोचितं तत्सर्वं तत्क्षणमिव पूरितवानिति स कथं च न स्मर्यत इति ध्वनितम्। पुन: कीदृशम्? पीतं वसनं वस्त्रं यस्य तम्। औदार्योपपादकं विशेषणमाह, अनुगता आश्रिता ये मुनयो नारदादय:, मनुजा मनुष्या भीष्मादय:, सुरा इन्द्रादय:, असुरा: प्रहलादादयस्त एव वरा: श्रेष्ठा: परिवारा: परिजना यस्य तम्। तथा च तैरप्यधिगत: सुमन: फलै: सततं सेव्यत इति तस्यौदार्यं ख्यातमेवेति भाव:। "परिवार: परिजने खडगकोशे परिच्छदे" इति **विश्व:**। "दानमभ्युपपत्तिश्च तथा च प्रियभाषणम्। खजनेऽपि परे वापि तदौदार्यमिति स्मृतम्।।" इति नायकौदार्यगुणलक्षणम्।।६।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।६।। मणिमयेति। मणिमये रत्नविकारे मकराकृती मनोहरे चित्तानन्दकरे च ये कुण्ड़ले अथवा मकरेण मकराकारेण मनोहरे ये कुण्डले ताभ्यां मण्डितावलङ्कृतौ गण्ड़ौ कपोलौ यस्य तथाविधं किञ्च उदारं गम्भीरं इष्टार्थदानसामर्थ्यमितियावत्। किञ्च पीतवसनं सुवर्णवर्णाम्बरं किञ्च अनुसृता गता ये मुनिमनुजसुरासुरवररास्त एव परिवारा: परिचारका यस्य तादृशम् अथवा तै: परिवार: परिवेष्टनं यस्य तादृशम्। इदं तु भूतगत्या भाविवृत्त्या वा हरिविशेषणम्। न तु रासक्रीडासमयो तदानीं मुनिमनुजादिसन्निधाने रसाभासोपपत्ते:।अथवा भगवत: श्रीकृष्णस्य विश्वरूपत्वात्तादृशं रूपान्तरमङ्गीकृत्य वा विरोध: समाधेय:। अनेनामुष्मिक सौख्यसम्पादनात्मकत्वमपि तस्यैवेति सूच्यते। मनुहरेत्यत्र ''हरतेरनुद्यमेनऽचित्यच् (३-२) प्रत्यय:।।६।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।६।। पुन: किम्भूतन्तत्राह, मणिमयमकरेण मणिकृतमकराकारेण मनोहरकुण्डलाभ्यां मण्डितो गण्डो यस्य तम्। उदारमुद्भटं पीतवस्त्रं यस्य तम्। अनुगता: पश्चाल्लग्ना: मुनिमनुजसुरासुरवरा: परिवारा यस्य तम्। 'परिवार: परिजने खड्गकोषे परिच्छदे।।६।।

## (७) वनमालिभट्टकृत- सञ्जीवनी

।।६।। पुनः स्वोत्कर्षप्राधान्यमेव वर्णयन्त्याह, मणिमयेत्यादिना। [९]पुनः कीदृशम्? मणिमये मणिखचिते मकरवन्मनोहरे; मणिमयमकरेण रत्नमत्स्येन [१०] च मनोहराभ्यां [११] कुण्डलाभ्यां मण्डितौ [१२] भूषितौ [१३] कपोलौ यस्य तम्। पुनः कीदृशम्? [१४]उदारं [१५] स्वलावण्यगुणोदारयुक्तम्। तल्लक्षणं[१६]**नाटयशास्त्रे**-(२२.४०)

दानमभ्युपपत्तिश्च तथा च प्रियभाषणम्।
स्वजने च परे वाऽपि तदौदार्यमुदाहृतम्।।इति।।

[१] यन्मया चिन्तितं तत्सर्वं तत्क्षणमेव [२] पूरितवानिति सः कथं विस्मर्तव्यः। पुनः कीदृशम्? पीते वसने [३] यस्य पीतवसनं वा। [४]पुनः कीदृशम्? अन (नु?) गता आश्रिता मुनयः [५] शुकादयो मनुजाः परीक्षिदादयः सुरा ब्रह्मादयः असुराः प्रह्लादादयः, त एव वराः श्रेष्ठाः [६] वरा वृन्दावननिवासिनो वा गोपीजनाः [७]परिवाराः सेवका यस्य तम्। [८]अथवा सर्ववरः श्रीगोपीजनलक्षणः श्रीराधारूपो वा परिवारः सेवको यस्य तम्। स्वभावोक्तिरलङ्कारः: [९]रसवदलङ्कारश्च ।।६।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।६।। मणिमयेति। मणिमयेन मणिरूपेण मकरेण मनोहराभ्यां कुण्डलाभ्यां मण्डितोऽलङ्कृतो [१०] गण्डो गण्डस्थलं यस्य। पुनः [११] कीदृशं हरिम्? उदारमभीष्टदातारम्। [१२] पुनः [१३] कीदृशम्? [१४] कृतपीताम्बरपरिधानम्। अनुगता आश्रिता मुनयो [१५] यतयः मनुजा लोकाः सुरा [१६]देवाः [१७] असुरवरास्ते परिवारा परिजना यस्य ।।६।।

## (९) कृष्णपण्डितकृत- जयन्ती

।।६।। मणिमयेति। मणिमयाभ्यां प्रचुररत्नखचिताभ्यां मकरवन्मनोहराभ्यां मकराकाराभ्यां कुण्डलाभ्यां मण्डितौ गण्डौ यस्य तम्। कर्णालम्बिकुण्डलकान्तिविशिष्ट-गण्डमित्यर्थः। उदारं वदान्यम्। पीतं हेमाभं वसनं परिधानीयं यस्य तम्। अनुगताः मुनयः नारदाद्याः मनुजाः सुदामादयः सुराः इन्द्रादयः असुरेषु वरः श्रेष्ठः प्रह्लादः सः परिजनो यस्येत्यनेन सर्वसुरमित्रत्वं प्रहलादादन्यदैत्यशत्रुत्वं च व्यज्यते। रासक्रीडावलोकनार्थमागत्य यथायोगमुपसेवन्ते हरिमिति भावः।।६।।

१.उदारपदेनेति यन्मया-इ.फ.ग.ह.ज. २.पूरितवानसि-अ.ब. ३.वा यस्य-अ.ब. ४.नास्ति-अ.ब.इ.फ.ग.ह.ज. ५.नास्ति-अ.ब. ६.नास्ति-अ.ब.नरा-इ. ७.नास्ति-अ.ब. ८.यद्वा-ग. ९.नास्ति-फ. १०.नास्ति-ड. ११.नास्ति-ड. १२-१३.नास्ति-ड. १४.नास्ति-ड.ल.म. १५.ऋषयः-क. १६.नास्ति-ड. १७.असुरा दैत्याः-क.असुरा दैत्यवराः-ल.म.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।६ ।। पुन: किंविधम्? मणिमयेत्यादि। मणिमयौ मणिनिर्मितौ यौ मकरौ ताभ्यां मनोहरे ये कुण्डले ताभ्यां मण्डितौ भूषितौ गण्डौ यस्येति विग्रह:। ''मकर: यादसाभेदे निधिराशिप्रभेदयो:'' इति। पुन: किंविधम्? उदारमिति। उदारं महान्तम् अपेक्षितफलप्रदं वा दक्षिणं वा। ''उदारो दातृमहतो: सद्वृत्ते दक्षिणे त्रिषु'' इति **कुमुदाकर**:। पुन: किंविधम्? पीतवसनमिति। पीतं हरिद्राभं वसनं यस्येति विग्रह:। पुन: किंविधम्? अनुगतेति। अनुगता: शुश्रूषुत याऽन्वग्भावमुपागता: ये मुनिमनुजसुरासुरवरास्ते परिवारा: परिजना: यस्येति विग्रह:। मुनयश्च मनुजाश्च सुराश्च असुराश्च तेषां वरा: श्रेष्ठा: इति द्वन्दात् पर: श्रूयमाणो वरशब्द: प्रत्येकमभिसम्बन्धनीय:। ''वरो जामातरि श्रेष्ठे'' इति '**शाश्वत:**'। ''परिवार: परिजने खड्गकोषे परिच्छदे'' इति। यद्यपि अनुगतमुनिमनुजसुरासुरवरपरिवारमिति विशेषणं शृङ्गारप्रस्तावानुपयोगी तथापि अभिलाषादिदशानामवस्थानां मध्ये गुणकीर्तनस्यापि शृङ्गाराङ्गत्वेन गुणकीर्तनप्रस्तावे विरहिण्या नायकगुणकीर्तनत्वाददूषणम्।।६ ।।

## (११) पूजारीगोस्वामीकृत- बालवोधिनी

।।६ ।। पुन: कीदृशं ? मणिप्रचुराभ्यां मकराकाराभ्यां मनोहराभ्यां कुण्डलाभ्यां मण्डितौ गण्डो यस्य तम्। यद्यप्येतदप्रस्तुतोपसारवर्णनं तथापि विरहिण्या गुणोत्कीर्त्तनत्वादेवादूषणं अतएवोदारं तथा पीतं वसनं यस्य तम्। किं च अनुगत: सौन्दर्येणाकृष्ट: मुन्यादीनां वरपरिवार: परिग्रहो येन तम्।।६ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।६ ।। पुनश्चुम्बनसुखवदान्ययो: कपोलयोर्माधुर्यमनुस्मरन्त्याह; मणिमयेति। मणिमयाभ्यां हीरकादिरत्नप्रचुराभ्यां मकराकारतया मनोहराभ्यां कुण्डलाभ्यां मण्डितौ गण्डौ कपोलौ यस्य तम्। पुन: कीदृशम्? पीते, पीतवर्णे वसने परिधानोत्तरीये यस्य तम्। अनेन शोभातिशयो दर्शित:। न केवलं शोभातिशययुक्तमात्रम्, उदारं च सर्वाभीष्टपरिपूरणसमर्थं महत्तमं वा 'उदारो दातृमहतो' रित्य**मर**:। अत एवानुगतात् रूपगुणमाधुर्यैराकृष्टवरशब्द: सर्वत्र योजनीय:। मुनिवरा: श्रीनारदादय:, मनुजवरा: श्रीमदुद्धवादय:, सुरवरा: ब्रह्मादय:, असुरवरा: प्रह्लादादय: परिवारा: परिचारका यस्य तम्। मुन्यादीनामेव चेत् तर्हि किमुत स्त्रीजातीनामिति भाव:। इदं तु भूतगत्या हरिविशेषणम्। तादृशलीलावसरे तेषामनुसरणस्यानौचित्यात् यद्यपि एतत् प्रस्तुतोपकारिवर्णनं न भवति, तथापि विरहिण्यास्तादृशगुणकीर्त्तनं न दूषणम्। यद्वा

अनुगता अनुचरा इत्यर्थः। तादृशा ये मुनयश्च मनुजाश्च सुराश्च असुराश्च तेभ्योऽपि ये वराः श्रेष्ठास्ते के गोपीजना एव परिवारा लीलापरिकरा यस्य तम्। प्ररोढात्वमापन्ना अपि यदधरमधुलोभेन भावविशेषमङ्गीकुर्वत्यः परिचरन्तीति भावः। उक्तं च तैरपि-

''वीक्षालकावृतमुखं तव कुण्डलश्री गण्डस्थलाधरसुधं हसितावलोकम्।
दत्ताभयं च भुजदण्डयुगं विलोक्य, वक्षः श्रियैकरमणं च भवाम दास्यः।।६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६।। मणिमयेति - मकरं नाम नक्रमूर्त्तिनिर्मितं शोभनं कुन्डलं यस्य श्रीकृष्णस्य गण्डयुगं शोभमानं दृश्यते तम्। उदारं स्वलावण्यगुणोदारयुक्तमिति सञ्जीवनी तल्लक्षणं **नाट्यशास्त्रे** ;

दानमभ्युपतिश्च तथा च प्रियभाषणम्।
स्वजने च परेवापि तदौदार्यमुदाहृतम्।। २२.४०।।

श्रीराधा चिन्तयति, यन्मया चिन्तितं तत् तत्क्षणमेव पूरितमिति। उदारमभीष्टदातारमिति पदद्योतनिका उदारं वदान्यमिति **जयन्तीकारश्च**। परं **रसिकरङ्गदाटीकाया**मुच्यते यदुदारं च सर्वाभीष्टपरिपूरणसमर्थं महत्तमं वा उदारो दातृमहतो **इत्यमरः**। पूर्वस्मिन् पदे निर्दय उपाधिना श्रीराधा वर्णयति परमत्र उदार शब्दाभिधानेन कयोश्चिदन्यतमस्य शब्दस्य प्रयोगे व्याजस्तुतिर्स्यादिति। यदि उदारः स निर्दयः कथम्? अतः प्रणयव्यापारस्य स्वरूपनिर्णयं खल्वति गहनं भवति। **विश्वनाथोक्तिः**; प्रेम्णः कुटीलगामीत्वात् कोपः यः कारणं विना।।३/१९९। पीतवसनधारणपूर्वकः मुनिजनानामाकर्षणं करोति। परं तेषु सुरासुरमुनिप्रभृतिभ्यः श्रेष्ठः गोप्यादयः परिवारान् परितःवर्त्तन्ते इति ताः सदैव आकृष्टा वर्त्तन्ते।

रसिकरङ्गदाकारः व्रवीति, परोढत्वमापन्ना अपि यदधरमधुलोभेन भावविशेषमङ्गीकुर्वत्यः परिचरन्तीति भावः। उक्तं तैरपि **श्रीमद्भागवते** वीक्षालकावृतमुखं तव कुंण्ड़लश्रीगण्ड़स्तलाधरसुधं हसितावलोकम्। दत्ताभयं च भूजदण्ड़युगं विलोक्य वक्षः श्रीयैकरमणं च भवाम दास्यः। **श्री.भा.पु.**१०/३०/३९।।६।।

**७-विशदकदम्बतले मिलितं कलिकलुषभयं शमयन्तम्।**
**मामपि किमपि तरङ्गदनङ्गदृशा मनसा रमयन्तम्।। रासे० ।।७।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७।। विशदश्चासौ कदम्बश्चेति विग्रह:। स्फीतत्वात् विशत्वं विशदत्वं तस्य तले धवलो विशद शुक्ल: ''स्वरूपानूर्ध्वयोस्तल'' पुन: कीदृशं, कलिकलुषं भयं शमयन्तं एतदपि गुणोत्कीर्त्तनत्वात् अदुष्टं पुन: कीदृशं मामपि मनसा रमयन्तं, विदूरवर्त्तिनीमपि इत्यापि शब्दार्थ:, एतेन सूत्रान्तरे प्रेमातिरेक:। इति ध्वनितम्। किंभूतेन मनसा इत्याह। तरङ्गदनङ्गदृशेति। तरङ्ग इवाचरति तरङ्गति सर्वप्रातिपदिकेभ्य सच्चिवा तरङ्ग तमनङ्गं करोतीत्यर्थेणिच् पचाद्यन्तौ तरङ्गदनङ्गदृक् येनेति विग्रह:।।७।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। विशदेति। विशदकदम्बतंले मिलितम्। अर्थान्मुन्यादिभिरूपास्थितम्। अत एव कलिकलुषभयं शमयन्तं पापं नाशयन्तम्। पुन: किं कुर्वन्तम्? मनसा करणभूतेन तरलतरङ्गदनङ्गदृशा तरला चासौ तरङ्गदनङ्गा च, तरङ्गन्संमूर्च्छन्ननङ्गो यत्र तथाविधया दृष्ट्या मामपि रमयन्तम्। अपिति गोपीश्च। अत एव कलिकलुषभयं कलहकालुष्यभयं शमयन्तम्। अत्र तरङ्गदनङ्गेति सरसदृष्टिरूक्ता।।७।।

## (३) जगद्धरकृत- सारदीपिका

।।७।। विशदेति विशदकदम्बतले मिलितम् उपस्थितं । पुन: कीदृशं कलिकलुषा-त्कलिकाजातपापाद्भयं तन्नाशयन्तम् । पुन: कीदृशं माम् अपि किमपि अनिर्वचनियं यथा स्यात्तथा तरंगन् उद्गछन् अनङ्गयोगोस्यां तादृशदृष्ट्या मनसाहृदयेन च रमयन्तम् ।।७।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।७।। पुन: कीदृशशम्? विशदेति। विशदस्य कदम्बस्य तले मूले मिलितं लग्नं, मत्संकेतीकृतकदम्बतले मदपक्षयाऽग्रत एव गत्वा केचन न मां पश्यन्त्विति मत्प्रतारणाय वा निलीय स्तितं कृष्णं मे मन: स्मरतीत्यर्थ:। पुन: कीदृशम्? कलि: प्रणयकलहस्त-स्माद्यत्कलुषं चित्तकश्मलं "अहं संकेते समागता, असौ नागत: प्रायशोऽन्यवल्लभासक्तो भविष्यति, अत: परं यद्यायास्यति तदा मया नसंभाषणीय:" इत्येवंरूपम्, "एकाकी कथं कथमत्र तिष्ठामी" इति च तद्भयं कदम्बमूलादुपेत्य चाटूक्तिभि: शमयन्तमित्यर्थ:। यद्वा कले: कलियुगस्य यत्कलुषं पापं तदभयं शमयन्तमित्यर्थ:। पुन: कीदृशम्?

किमप्यनिर्वचनीयमेव यथा स्यात्तथा उद्गच्छन्ननङ्गः कामो यत्र एतादृश्या दृशा दृष्टया मनसा च मामपि रमयन्तमित्यर्थः। मामपीत्यपिशब्देन सोत्कण्ठोत्क्याऽहमपि हरेः कस्यचिल्लोकोत्तरप्रणयपात्रमासं, न त्वेतादृश्योऽन्या वध्व इति ध्वनितम्। "कलिः स्यात्कलहे शूले कलिरन्त्ययुगे युधि" इति विश्वः। "कलुषं त्वाविलैनसोः" इत्यपि ।।७।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।७।। विशदेति। किञ्च अत्र कदम्बशब्देन केलिकदम्बो ग्राह्यः न कदम्बमात्रम्। वसन्तकाले तस्य पुष्पोद्गमाभावात्। अथवा सर्वर्त्तुसमागमस्य सम्भवात्सामन्यं वा ग्राह्यम्। विशदं पुष्पोद्गमेन मनोहरं यत्कदम्बतलं कदम्बवनप्रदेशः तस्मिन् मिलितं गोपीकाभिः परिवेष्टितं कलिना कलियुगेन यत्कलुषं कलौ यत् कलुषं वा तस्माद् यद्भयं भीतार्थानां भयहेतुरित्यपादानसंज्ञायां पञ्चमी। तत्शमयन्तं स्वचरितश्रवणेन निवर्त्तयन्तं सकलकलिमलापहमित्यर्थः। उक्तं च **श्रीभागवते,**

एतं निशम्य भृगुनन्दनसाधुवादं वैयासकिः स भगवानथ विष्णुरातम्।
प्रत्यर्च्य विष्णुचरितं कलिकल्मषघ्नं व्याहर्त्तुमारभत भागवतप्रधानः।।

किञ्च तरङ्गति तरङ्ग इवाचरन्ती तद्वत्सा मन्यमाना या अनङ्गदृक् मन्मथोद्दीपकदृष्टिः तया, अथवा, तरङ्गन्ती अनङ्गदृक्यस्मिन् मनसि तत् तादृशं, तेन मनसादृक्सहायचित्ताख्येन हेतुना दृक्सहायत्वं वहिरस्वतन्त्रं मन इति न्यायादवगन्तव्यं, किमपि किञ्चित्। मामपि दवीयसीमपि रमयन्तं सन्तोषयन्तं निकटस्थगोपिकां रमयत्येव सदृशा मनसा च, वामामपीत्यपि शब्दार्थः। अथवा परिसरे वर्त्तमानां मामपि सन्तप्यमानानङ्गोद्दीप- कदृशा मनसा च रमयंन्तमित्यर्थः। दूरस्थवस्तुदर्शनं श्रीकृष्णस्य च विरुद्धं विश्वतश्चक्षुरिति श्रुतेः, अथवा भगवतः श्रीकृष्णस्याचिन्त्य महिमत्वेन रासक्रीडासमय एव प्रधाननायिकां सन्निहितां मां लक्ष्मीमपि उक्तविध दृक्सहायेन मनसा द्वाभ्यां वा रमयन्तमित्यर्थः। एतादृशं हरिमित्यन्वयः तरङ्गदित्यत्र सर्वेभ्यः प्रादिपदिकेभ्यः क्विवाचर इति वचनात् क्विप्। शमयन्तमित्यत्र ''जानीदृषुदृकनसृक् योस्यामन्थाश्चेत्यमन्तत्वेनमित्सज्ञायां शमोदर्शने इतिनियमात्। अत्र ''मित्वमितांह्रस्व'' इति ह्रस्वः।।७।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।७।। पुनः किम्भूतन्तत्राह, विशदकदम्बतले निर्मलकदम्बाधस्तले मिलितम् इतस्ततः क्रीड़ां कृत्वा आगत्य स्थितम्। पुनः किम्भूतम् ? कलिकलुषभयं कलियुगजनितपापत्रासं शमयन्तं नाशयन्तम्, पश्यतां तादृशावस्थां स्मरतामित्यर्थः। पुनः किम्भूतम् ? मामपि

किमपि अनिवर्चनीयं यथा स्यादेवं तरङ्गमुद्गच्छन्ननङ्गो यस्यादेतादृशा दृशा मनसा च रमयन्तम्।।७।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।७।। पुन: श्रीराधास्वातन्त्र्यमेवाह, विशदेति। पुन: कीदृशम्? [१]विशदकदम्बतले मिलितं [२]विशदस्य स्वच्छस्य कदम्बस्य तले मूले मिलितं संलग्नम्। [३]मदर्थं मदपेक्षया [४] मदग्रत एव कदम्बस्य तले मूले गत्वा[५]क्रीडायां वा निलीय स्थितमिति भाव:। पुन: [६]कीदृशम्? कले: प्रणयकलहस्य कलियुगस्य वा [७] कलुषं साधारणव्रजवधूभजनं तत्कृत[८]मालिन्यं शमयन्तं नाशयन्तम्। ''त्वय्येव मम प्रीतिर्नान्यासु'' इत्यादिप्रेम-वाक्यैरित्यर्थ:। पुन: कीदृशम्? किमप्यनिर्वचनीयस्तरङ्गवदुद्गच्छदनङ्ग: कामो यत्र तया दृशा दृष्ट्या मनसा हृदयेन च मामपि रमयन्तम्।[९]अत[१०]एव सकलाभिज्ञं [११]हरिं मे मन: स्मरतीति सूचितम्। ''कलि: स्यात्कलहे शूरे [१२]कलिरन्त्ययुगे युधि'' इति **विश्व**: (१०४.४८) १३''कलुषञ्चाविलैनसो:'' इति च **विश्व**: (११८.१४)। विभावनालङ्कार: ।।७।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।७।। विशदेति। विशदकदम्बतले विमलकदम्बतले मिलितमुपस्थितम्। पुन: [१४]कीदृशम्? [१५]कलिकलुषभयं [१६]कलिकालाज्जातपापाद्भयं शमयन्तं[१७]नाशयन्तम्। [१८]पुन:[१९]कीदृशम्? ममापि किमपि अनिर्वचनीयं यथा स्यात्तथा तरङ्गदुद्गच्छन्ननङ्गो यया तादृश्या दृष्ट्या मनसा हृदयेन च[२०]रमयन्तम् ।।७।।

१.त: २.पर्यन्तं नास्ति-अ.ब.इ.फ.ह.ज. ३.नास्ति-अ.ब. ४.अग्रत एव-फ.ह.ज.अग्रज इव-ग. ५.मया सह क्रीडार्थं वा-इ.फ.ग.ह.ज. ६.नास्ति-अ.ब.इ.फ.ग.ज. ७.कलुषं भयं-ज. ८.मालिन्यं च-ह. ९-१०.नास्ति-अ.ब. ११.नास्ति-ग. १२.कलिरन्त्ययुगेऽपीति-अ.ब.कलिरन्त्ययुगेष्वपीति-फ.ज.ह.ग. १३.कलुषन्त्वाविलैनसो:-ह.फ.ग. १४.नास्ति-ड. १५.नास्ति-ड. १६.कलिजातपापभय-शमयन्तं-ड १७.नास्ति-ड.क. १८-१९.नास्ति-ड. २०.रमयन्तं इति ; सम्भोगं कृतवानित्यर्थ:-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।७।। विशदेति। विशदं निर्मलं च तत् कदम्बस्य तले तदध: प्रदेशे मिलितं सर्वसमुदाययुतम्। कलि: चरमयुगं तत्र भवं कलुषं पापं तस्य भयं शमयन्तं नाशयन्तम्। किमपि यत्किञ्चित् तरङ्गत् चलन्ती अनङ्गदृक् कामोद्दीपनदृक्, तया। अनङ्गविशेषणं वा। मनसा मामपि रमयन्तम्। साधारणप्रणयेन क्रीडन्नपि लोचनेन मामवलोकयन्तमिति भाव:। अनेन तस्यापि सानुरागत्वं दर्शितम्। एकस्या एव अनुराग श्चेत् रसाभासा-पत्ते:।।७।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।७।। पुन: किंविधम्? विशदेत्यादि। विशदश्चासौ कदम्बश्चेति विग्रह:, पुष्पितत्वात् वैशद्यम्। तस्य तले अध: मिलितं समागतं स्वरूपानूद्र्ध्वयोस्तलमिति। निर्मूल इत्यर्थ:। किं वा "विशदे निरवकरे कदम्बतले मिलितम्। त्याजितावकरे देशे विशदो व्यक्तशुक्लयो:" इति '**हट्टचन्द्र:**'। पुन: किंविधम्? कलिकलुषभयमिति। कले स्तुरीययुगस्य सम्बन्धी यत् कलुषं तस्माद् यद् भयं तन्नाशयन्तम्। एतदपि गुणोत्कीर्तनत्वाददुष्टम्। "कलिर्नान्तयुगे युद्धे कलिकायां कलि: स्त्रियाम्" इति **कुमुदाकर**:। पुन: किंविधम्? मामपीत्यादि । मामपि रमयन्तं न केवलमुपकण्ठ-वर्तिनीरपि गोपीराश्लेषादिना रमयति किन्तु मां विदूरवर्तिनीमपीत्यपेरर्थ:। एतेन तासु न हरे: प्रेमातिरेक इति ध्वनितम्। विदूरवर्तिनी रमयितुमशक्येत्याह। मनसा रमयितुमिति सम्बन्ध:। यद्यपि मामसन्निहितां चुम्बनालिङ्गनादिना साक्षाद्रमयितुं न क्षमते तथापि दाक्षिण्यात् ध्यात्वा सन्निधावपि तां विचिन्त्य मनस्सङ्कल्पितचुम्बनादिना रमयतीत्य-भिप्राय:। दक्षिणो हि नायक एवं भवति। तथा च, "यो गौरवं भयप्रेमसद्भावं पूर्वयोषिति। न मुञ्चत्यन्यचित्तोऽपि ज्ञेयोऽसौ दक्षिणो यथा।।" इति। ननु मनसा रमयन् कृष्ण: केन लक्षणेन लक्ष्यत इत्याशङ्कां निराकर्तुं हेतुविशेषणमाह - तरङ्गदनङ्गदृशेति । "तरङ्ग ऊर्मि: तरङ्गोगौ भङ्गकम्पौ च" इति '**कुमुदाकर:**'। तरङ्ग इवाचरति तरङ्गति। कर्तु: कृतं सलोपश्चेति क्यङ्, तलोपे शतृप्रत्यये तरङ्गन्ती व्यासादनङ्गदृक् चेति विशेषणसमास:। अनङ्गेन जनिता दृक् अनङ्गदृक् शाकपार्थिवादिर्यथा। दृक्शब्दोऽत्र दर्शनवाची। "दृक् स्त्रियां दर्शने नेत्रे बुद्धौ च त्रिषु वीक्षिते" इति '**मेदिनी**'। तस्माद् "इत्थंभूतलक्षणे तृतीया" इति। तथा च, कृष्णविशेषणमिदम्, तदयमर्थ: तरङ्गन्ती अर्थात् पुन: पुनरुद्गच्छन्ती या कामोद्रेकजनिता दृक्, तया विशेषणभूतया विशिष्ट: कृष्ण: मामपि मनसा रमयतीति मया लक्ष्यत इत्यभिप्राय:। किं वा तरङ्गदित्यादि मनसो विशेषणम्। तथा च, तरङ्ग इवाचरति तरङ्गति। तरङ्गन्तमनङ्गं करोतीत्यर्थे णिच्। तत: पचाद्यचि कृते तरङ्गदनङ्गा दृक् चक्षुर्येन मनसा इति विग्रह:। यद्वा अनङ्गं करोतीति णिच्। तत: पचाद्यचि कृते तरङ्गन्ती अनङ्गदृक् मत्कामोत्पादिका दृक् येनेति। बहि: कर्मणि व्यासक्तोऽपि पुमान् यद्यन्तश्चिन्तनीयं किञ्चिच्चिन्तयति तदा प्रायेण चक्षुषा तरङ्गयतीति लौकिकोऽनुभव:। तेन चक्षुषो नर्तितेन उक्तं चित्तं प्रकृतानुगुणं लक्ष्यत इति भाव:। तथा चोक्तम्, "आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च।

नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मन:" इति। किमपीति रमणक्रियाविशेषणम्। अनिर्वचनीये ईषदर्थे वा किमपिशब्द:। "अनिर्वाच्ये मनागर्थे किमपीति प्रयुज्यते" इति '**हट्टचन्द्र:**'।।७।।

## (११) पूजारी गोस्वामीकृत- बालबोधिनी

।।७।। अत्युत्कण्ठाया: स्फुरितमाह ।विशदकदम्बतले मिलितं पुष्पितत्वाद् विशदत्वं प्रेमकलहोद्भूतक्लेशाद्यद्भयं तच्चाटुभिरपनयन्तं तथाप्यनिर्वचनीयं यथा स्यात्तथा मामेव रमयन्तम्। कया ? तरङ्ग इव आचरन्ननङ्गो यत्र तया दृशा। मनसा च मया सह रतिं ध्यायन्तमित्यर्थ:। पूर्वदृष्टस्फूर्त्तिरियम्।।७।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।७।। एवं रूपमाधुर्यमुक्त्वा तस्य सौहार्दप्रकटनपटीयस्त्वमाह; विशदेति। विशदे निर्जनतया मन: प्रसादकरे कदम्बतले मिलितं युवतिगणतो नि:सृत्य तत्र स्थिताया मम समीपे प्राप्तम्। तत्र हेतु:। कलि: कलह: मां विहाय अन्याभि: कृतवसन्तक्रीडा-लक्षणापराधहेतुक: तदुत्थं यत् कलुषं चिन्तानुतापादिक्लेश:, तदुद्भूतं भयं शमयन्तम, नुनयादिनाऽपनयन्तमित्यर्थ:। तदानीं दुर्वोधवासतासहचरी कोपमुद्रामुद्रितसौहार्दाय गद्गदिकानिरुद्धकण्ठतया किमपि अनालपन्त्या मम मन:कन्दलनाय किमपि अनिर्वचनीयं यथा स्यात्तथा तरङ्गन् तरङ्ग इवाचरन् अनङ्गो यत्र तथा विधया दृशा विविधमन्मथ, भावाभिव्यञ्जकावलोकनेन इति अर्थ:। मनसा च मामपि मामेव रमयन्तं मया सह रतिं ध्यायन्तमित्यर्थ:। मया मन्दधिया तथा प्रणतोऽपि स: किञ्चिदपि नादृत:। किन्तु आत्मनो मौढ्यमेवाविष्कृतमिति भाव:।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। विशकदम्बतलेति - विशदेति; स्फुटितकदम्बवृक्षमूले कलिकलुषभयं नाम अनङ्गरसे अत्युत्कण्ठायां तद् कामभावं शामयितुं माम् नाम श्रीराधिकाम् तरङ्गवत् इतस्ततश्च अनङ्गदृशा कामदृष्ट्या मनसि रमणं कुर्वाण: तत्र कदम्बवृक्षमूले तिष्ठति। तथा चोक्तम्, "आकारैरिङ्गितैर्गत्या चेष्टता भाषणेन च। नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मन:" इति। अत्र स खलु श्रीकृष्ण: शृङ्गारमार्तण्ड: मनस्यपि मां स्वस्य कामज्वालां प्रशामयतीति अर्थ: ।।७।।

**८-श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम्।**
**हरिचरणस्मरणं प्रति संप्रति पुण्यवतामनुरूपम्।। रासे० ।।८।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी ८

।।८।। सम्प्रतीदं जयदेवभणितं पुण्यवतां हरिचरणस्मरणं प्रत्यनुरूपं, कीदृशम्, अतिशय सुन्दरं मोहनं मधुरिपुरूषं येनेति विग्रहः ।।८।।

## (२)राणाकुम्भकृत-रसिकप्रिया

।।८।।श्रीजयदेवेति। अत्रालापस्तेन पाटः। हरिचरणस्मरणं प्रति हरेः कृष्णस्य चरणं रासक्रीडाद्याचरणं तस्य स्मरणं प्रति इदं श्रीजयदेवभणितम्। राधया अष्टपद्यादौ स्मरति मनो ममेत्यादि भणितम्। संप्रति इदानीमपि पुण्यवतामनुरूपं योग्यम्। सतां हरिचरणस्मरणे हेतुर्भवतीति यावत्। किंभूतम्? अतीव सुन्दरम्। तथा मोहनमधुरिपो रूपं यत्र तत्तथा। अत्र "मुनियगनैर्लयमामनन्ति" इतिलयो नाम छन्दः। अत्र सर्वा अपि जातयो रासा भवन्तीति केचित्। यदाह–सयलाउ जाईउ एत्थावसेण एत्य वत्तंति। रासा बंधो रसायणं विट्टगोट्ठीसु।।८।।

## (३) जगद्धरकृत- सारदीपिका

।।८।।श्रीजयदेवेति श्रीजयदेवभणितं पुण्यवतां भक्तानां हरिचरणयोः स्मरणं प्रति अनुरूप योग्यं भवतु इति व्यवहारः कथम्भूतम् अतिसुन्दरं मोहनं मोहकारकं मधुरिपोः रूपं कृष्णस्य रूपं यस्मिन्।।।८।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।८।।श्रीजयदेवेति।श्रीजयदेवकवेरिदं भणितं पुण्यवतां कृष्णस्मरणाानुकूलादृष्टवतां हरिचरणस्मरणं प्रति संप्रति कलौ अनुरूपं योग्यम्। कीदृशम्? अतिसुन्दरमोहनं गोपवधूमोहनकारि मधुरिपोः कृष्णस्य रूपं वृत्तम्। अनायासतो हरिंभस्मरणं वतीति भावः।।८।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।८।। तदिदं गीतं फलेन योजयति। श्रीजयदेवेति। श्रीजयदेवेन कविना भणितं कथितं अद्भुतं सर्वाश्चर्य्य करम् अतएव मोहनं सर्वचित्ताकर्षकं मधुरिपोः श्रीकृष्णस्य रूपं श्रृङ्गारादिरूपं यस्मिन्, तत्तादृशम्, अतएव सम्प्रतीदानीं हरिचरणस्मरणं प्रति श्रीकृष्णस्य पदारविन्दस्मृतिं प्रति अनुरूपम् अनुकूलसाधनमिदं गीतं पुण्यवतां पूर्वपुण्यपरिपाकशालिनां गातृणां च श्रोतृणां च श्रियः साधनं भवत्विति शेषः।अथवा

विशेषण विशिष्टमिदं गीतं पुण्यवतां हरिचरणस्मरणं प्रति अनुरूपं अगुणसाधनं भवत्विति शेष:। अस्ति भवत्यो: साधारणत्वात् अथवा मधुरिपुरूपमित्यत्र रूप्यते ज्ञाप्यते परोक्षत्वेन वस्त्विति रूपमपरोक्षज्ञानं यस्मात्तथाविधम् इदं गीतं, अथवा हरिचरण स्मरणं प्रति अनुरूपम्, अथवा रूपं हरिचरणस्मरणं प्रति चानुरूपमितियोजना। अत्रेदमवश्यं श्रोतव्यं गातव्यं चेति भाव:। अस्मिन् गीते द्वितीयावस्था प्रतिपादिता।।८।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।८।। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकमाशीर्ददाति। श्रीजयदेवभणितं वर्णितम् अतिसुन्दरम् अतएव मोहजनकञ्च तन्मधुरिपुरूपञ्चेति तदतिसुन्दरमोहनमधुरिपुरुपं कर्त्तृ, सम्प्रति कलियुगे पुण्यवतां पुरुषाणाम् अनुरूपम्, भवत्विति शेष:। कुत्र कर्मणि ? हरिचरणस्मरणम्प्रति। तथा च श्रीजयदेवकृतवर्णनोपस्थापितरूपेण सम्प्रति हरिचरणस्मरणं धार्मिकानां भवत्विति वाक्यार्थ:।।८।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।८।। गीतोक्तं सङ्ग्रहेणाह, श्रीजयदेवेति। श्रीजयदेवकवे: भणितं गीतं [१]सम्प्रति सर्वदैव पुण्यवतां[२] श्रीराधाकृष्णस्मरण ङ्कुर्वतां पुण्यजनानां हरिचरणस्मरणं प्रति अनुरूपं योग्यं तल्लभ्यमित्यर्थ: न च तदन्यैर्लभ्यमित्यर्थ:[३]। अतिसुन्दरं[४] मनोहरं[५] व्रजवधू-मोहकारि च मधुरिपो[६] दैत्यशत्रोरमृतवसन्तशत्रोर्वा श्रीकृष्णस्य रूपं यत्र। कलौ बहूनां रागिणां शृङ्गारादि[७]प्रवृत्तानामनायासेनैव श्रीकृष्णस्मरणं जातमिति भाव:।।८।। [८]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालि- सञ्जीवन्यां श्रीगीतगोविन्दटीकायां पञ्चम: प्रबन्ध:।।५।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।८।।श्रीजयदेवेति। श्रीजयदेवेन भणितं गीतं भक्तानां हरिचरणस्मरणं प्रति अनुरूपं योग्यं भवत्विति[९]शेष:। [१०]कथम्भूतम् ? अतिसुन्दरं मोहनकारकं मधुरिपुरूपं कृष्णरूपं ? यस्मिन्।।८।।

१ .इति श्रीगीतगोविन्दे पञ्चम: प्रबन्ध:-ड नास्ति-क.ल.म. २ .नास्तीयं पुष्पिका- च. ३ .गणयती-त्यादिना-ह.ज.इ. ४ .नास्ति-अ.ब. ५ .कामं श्रीकृष्णेऽभिलाषं-अ.ब. ६ .करोतीत्यन्वय:-ज. ७ .नन्दकुमारे-ग. ८ .यत्र-अ.ब. ९ .अथवा-इ.

## (९) कृष्ण पण्डितकृत- जयन्ती (टीकानास्ति)

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।८।।श्रीजयेत्यादि। सम्प्रति कलौ इदं श्रीजयदेवभणितं पुण्यवतां जनानां हरिचरण-शरणं प्रति अनुरूपम् अनुकूलं भवति। किंविधम् ? **अतिसुन्दरेत्यादि**। अतिसुन्दरतया

मोहनं मोहनजनकत्वेन वर्णितं मधुरिपुरूपं यत्रेति विग्रहः। एतेन भगवतो रूपादिचिन्तनेन पुण्यवतां पुण्योपचय इति भावः।।८।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।८।।श्रीजयदेवभणितं भगवद्भक्तिविशेषवतां हरिचरणस्मरणं प्रति संप्रति इदानीं योग्यं तादृशभावेनास्वादनीयमिति भावः। कीदृशं ? अतिशयेन सुन्दरं मोहनं च मधुरिपो रूपं यत्र तत् ।।८।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।८।। एवं श्रीकृष्णगुणरूपचेष्टितानां प्रस्तुतोपयोगितां सूचयन् सम्प्रति श्लाघनीयताविष्कारेण गीतमुपसंहरति। श्रीति। श्रीजयदेवस्य भणितमेतद्गीतं पुण्यवतां भक्तिलक्षणसुकृतशालिनां प्राक्तनाधुनिकभक्तिवासनावतां वा सम्प्रति सर्वदैवेत्यर्थः। हरिचरणस्मरणं प्रति अनुरूपं योग्यं सविशेषास्वादनार्हमित्यर्थः, भवतीति शेषः। तत्र हेतुः। कीदृशम्, अतिशयेन सुन्दरं मोहनं व्रजवधूनां मोहनकारि च मधुरिपो रूपं यत्र तत्र ।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।।श्रीजयदेवेति; श्रीजयदेवः हरिचरणसेवकः अति शोभनः मधुकैटभासुरवधकारी तस्य चरणस्य स्मरणमेव पुण्यशालिनां कर्म भवतीति भावः। इति श्री प्रफुल्लमिश्र विरचित स्वर्णलता टिप्पण्यां पञ्चम प्रवन्धः।।८।।

**१४ -गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते**
**वहति च परीतोषं दोषं विमुञ्चति दूरतः।**
**युवतिषु वलस्तृष्णे कृष्णे विहारिणि मां विना**
**पुनरपि मनो वामं कामं करोति करोमि किम् ।।१४।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१४।। हे दूति! मम मनः वामं प्रतिकूलमनायत्तचित्तमिति यावत्। यतो युवतिषु बलतृष्णे मां विहारिण्यपि कृष्णे पुनरपि कामः वामं करोति, तदत्र किं विधेयं तदुपदेशेति वाक्यार्थः। किं प्रकारक कृष्णे मनः कामं करोतीत्याह। गणयतीत्यादि। भ्रमं भ्रमादपि नेहत इति। भ्रान्त्यापि क्रोधं न चेष्ट इत्यर्थः। पुनरुत्कण्ठिता भूत्वा राधा सखीं प्राह हे सखि! केशिमथनमुदारमित्यादि।।१४।।

## (२)राणाकुम्भकृत-रसिकप्रिया

।।१४।।इदानीं राधा तदेव रहस्यं भङ्ग्यन्तरेणाह, "रागो धन्यासिको यत्र तालो वर्णयति: स्मृत:। चम्पूबन्धयोगान्ते गमकानेकविस्तर:।। तदन्ते स्यु: स्वरास्तेना: पाठ: शुचिरसाञ्चिता:। प्रबन्धोऽयं मुररिपो: पुरस्ताद्रत्नकण्ठिका।।" इति। स चायं मधुरिपुरत्न-कण्ठिका नाम पञ्चम: प्रबन्धो भैरवरागेण गीयते। गणयतीति। हे सखि! मम चित्तमद्यापि पुनरपि कृष्णे कामं करोति। तर्हि वद किं करोमि। किं विशिष्टे? युवतिषु गोवलत्तुष्णे। वलन्ती संभजमाना तृष्णा स्पृहा यस्य तस्मिन्। अपि च मां विना विहारिण्यपि क्रीडाशीलेऽपि। अत्र "अपि" शब्द: पुनर्योज्यते। किंविशिष्टं चेत:? वामं मयि विपरीतचरितम्। विपरीतत्वे हेतुमाह, यत: कृष्णस्य सापराधस्यापि गुणसमुहं गणयति कृतानप्यपरधांस्त्यकत्वा; अपि च, भ्रमादपि भ्रान्तिं प्राप्याति कोपं नेहते न चेष्टते। पुनरसंतोषकाले परितोषं वहति। अपि च, सन्तमपि दोषं नायिका। तल्लक्षणम्; उद्दाममन्मथमहाज्वरवेपमानां रामाञ्चकण्टकितमङ्गकमावाहन्तीम् संवेदवेपथुघनोत्कलिका-कुलाङ्गीमुत्कण्ठितां वदति तां भरत:। उत्का भवति सा यस्या वासके नागत: प्रिय:। तस्यानागमने हेतु चिन्तयन्त्याकुला यथा। अत्र हरिणीवृत्तम्। यमकं शब्दालंकार।।१४।।

## (३) जगद्धरकृत- सारदीपिका

।।१४।। इदानीं राधाया: कृष्णे वसतश्चेत् सोऽवश्यत्वमाह। हे सखि मम मनश्चित्तं पुनरप्यधुनापि कृष्णं काममिछां करोति किं करोमि, निवृत्तौ उपायान्तरं नास्तीत्यर्थ: युवतिषु गोपिषु चल तृष्णे जाताभिलाषे पुन: कीदृशं मां विना विहारिणि क्रीडाशीले कीदृशं मन: वामम् अवश्यमित्यर्थ:। वामत्वे कारणमाह मम मन: सापराधस्यापि कृष्णस्य गुणग्रामं गुणसमुहं गणयति। भ्रमादपि भ्रामं विस्मरणं नेहते न चेष्टते भ्राममपीतिपाठे भ्रामं क्रोधं नेहते न वाञ्छति। तद्गुणाकर्णनेन परितोषं सन्तोषं वहति दोषं मदीयावज्ञादीकदूरत एव मुञ्चति परित्यजति।।१४।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१४।। ननु कृष्णस्त्वां विहायान्यगिपीभि: सह विहरति, त्वं किमिति तं स्मरसीत्यत आह, गणयतीति। मे मन: कृष्णे पुनरपि काममभिलाषं करोति तात्किं करोमि। कीदृशे कृष्णे? युवतिषु बह्वीषु चलन्ती वर्धमाना तृष्णा यस्य तादृशो। अत एव मां विना विहारिणि वारंवारं विहरणशीले न तु विहरति। कीदृशं मन:? अत एव वामां प्रतिकूलम्। वामे हेत्वन्तरमाह, गणयतीति। तस्य गुणानां सौन्दर्यादीनां ग्रामं समुहं गणयति परिसंख्याति।

भ्रामं क्रोधं भ्रमादपि नेहते न वाञ्छति। दोषं वैरमवधीरणादिकं दूरतो विमुञ्चति। तत्र हेतुमाह, वहतीति। परितोषं संतोषं वहति। अत्र विभावनाविशेषोक्ती अलंकारौ। निजानुसरणरूपानुरागहेतुं विनाप्यनुरागप्रकाशनात्। अन्याङ्गनासक्तिरूपवैराग्यहेतुसत्त्वेऽपि **वेराग्यकथनाच्च** तथा च "**काव्यप्रकाशे** (१०।१०७) "क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना। विशेषोक्तिरखण्डेषु कारणेषु फलावचः।। इति। एषा च **काव्यप्रकाशकृता** व्याख्याताहेतुरूपक्रियायाः प्रतिषेधेऽपि तत्फलप्रकाशनं विभावना। मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिरिति। ग्रामः खरे संवसथे वृन्दे शब्दादिपूर्वके इति **विश्वप्रकाशः**। ग्रामः क्रोधे रवौ दिप्तौ इति। कामः स्मरेऽभिलाषे च इति च ।।१४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१४।। अथ स्वपरित्यागिनि कृष्णे विरहमाणा स्वकीयं मन उपालभते। गणयतीति। हे सखि! मनः मदीयं चेतः कर्त्तृ श्रीकृष्णे युवतिषु मद्यतिरिक्तगोपकामिनीषु अत्र कामिनी कामत्याज्यता सूचनार्थं युवतिग्रहणं कथञ्चित्त्यागे सम्भवत्यपि कस्याश्चित्त्यागो सूचयितुं बहुवचनमितिभावः। बलत्तृष्णे प्रवर्द्धमानानुरागे सति इदमेकमागः सूचकत्वम्। अतएव मां विना मां परित्यज्य तास्वेव युवतिषु विहारिणि क्रीडाशीले सति इदमन्यदपराधसूचकम्। अथवा वलत्तृष्णे मयि चञ्चलप्रेम्णि अत एव मां विना युवतिषु विहारिणि मयि एवमपराधद्वयशालिन्यपि कृष्णे गुणग्रामं गुणसमूह मेव गणयति संख्याति न तुगुणलेशमित्यर्थः। अत्र मनसः अत्यनसूयत्वसूचनार्थं ग्रामशब्दनिवेशत्यवगन्तव्यम्। अत्रापराधकारित्वेन गुणगणनार्हे वस्तुनि वस्तुना वस्तुध्वनिः। न केवलं कृष्णे पक्षपातित्वं अपि तु तं परित्यज्यान्यत्र मनसो गमनमपि नास्तीत्याह भ्राममिति। मनः कर्त्तृभ्रामं भ्रमणं परित्यागमिति यावत्। भ्रमशब्दात् स्वार्थेऽण् प्रत्ययः। भ्रमात् प्रमादादपि किमुत यत्नादितिभावः नेहते नाकाङ्क्षते तादृगवस्थायामपि कृष्णं परित्यज्य मम मनोऽन्यत्र भ्रमं नेच्छतीत्यर्थः। अथवा भ्रममनवस्थानम् अततिसततमाप्नोतीतिभ्रमात् अतसातत्यगमन इत्यस्माद्धातोः क्विप् सर्वदा चञ्चलस्वभावमित्यर्थः। मनो विशेषणमेतत्। तादृगपि मनो भ्रामं नेहत इत्यर्थः, स्वयं सर्वदा चञ्चलस्वभावं, विषयोऽपि महापराधशाली अतएव त्यागसमयश्च प्राप्तः। न त्यजतीत्यहो मनसो दार्ढ्यं भगवति पुरुषोत्तमे श्रीकृष्ण इति भावः भ्राममित्यत्र नोदात्तोपदेशस्येत्यादिना वृद्धिः प्रतिषेधात् कृदन्तप्रयोगमसाधुं मत्वा भ्राममिति। केचित् पठन्ति तदीयमर्थः न केवलं कृष्णगुणगणनामात्रं करोति किन्तु तस्मिन् भामं क्रोधं भ्रमादपि त्यजति भ्राम क्रोध

इत्यस्मान् क्विप् घञ् वा अत्रापि ध्वनि पूर्ववदूहनीय:। न केवलं कृष्णेऽवस्थानमात्रमपि तु तस्मिन् सन्तोषमपि भजतीत्याह वदतीति, अपराधशालिन्यपि कृष्णे परितोषं सर्वदा सन्तोषमेव वहति, न कदापि वैसुख्यमित्यर्थ:। न केवलं गुणगणनाकारित्वादिरूपं गुणसन्पन्नत्वम् अपितु इदानीं दोषारोपाहे दोषारोपमपि न करोतित्याह दोषमिति दोषं दोषारोपणं दूरत: एव विमुञ्चति त्यजति महानुभावे दोषारोपणस्य महापातकीत्व स्मरणादिति भाव:। एतन्मनसि निधायोक्तं दूरत इति, उक्तं च कालिदासेन कुमारसम्भवे ''निवार्य्यतामालि किमप्ययं वटुरित्यादिना। अत्रापि ध्वन्यूह प्रकार: पूर्ववत् पूर्वपरिचयवासना महिम्न गुणगणनादिकं करोति नाम इदानीमेवमनुचितकार्य्यं करोतीति तन्निवर्त्तने ममोपायस्तु न स्फुरतीत्याह। पुनरपीति हे सखि! वामं वक्रं अनुचितकार्य्यकरमिति यावत्, एतादृशं मन्मन: पुनरपि आरनालीप्रक्षेपेऽपि दुग्धदधिभाण्ड यन्त्रमार्गदर्शनन्यायेन कृष्णेन परित्यक्तमपि पुनर्भूयोऽपि अत्र कृष्णस्य सुतरां कामना विषयतानर्हतार्थमपिशब्द इत्यवगन्तव्यम्। अस्मिन्नेव कृष्णे काममनुरागं करोति किं करोमि ''अतश्च वक्रगतिशालिनो मम मनस: समाधानार्थं त्वया महानुपाय: कल्पनीय इतिभाव:। गणयतीत्यत्र नोपधावृद्धि:। अवन्तत्वे साल्लोपस्य स्थानिवत्वात्। परितोषमित्यत्र उपसर्गस्य घञ् मनुष्ये वहुलमिति। परि उपसर्ग दीर्घ:। मां विनेत्यत्र पृथग् विनेत्यादिना विकल्पेन द्वितीया।

विहारिणीत्यत्र ''सुप्यजाता विति'' (३-२-१८) णिनि:। अथवा विहारोऽस्यास्तीति विहारी, तस्मिन विहारिणी न चात्र एकाक्षराकृते जाते सप्तम्यां च नमस्कृताविति निषेध: तस्य पायिकत्वात्, तथा काव्यप्रकाशकारप्रयोगश्च ''इदमुत्तममतिशयिनीति।'' वलदित्यत्र नात्मनेपदम्। अनुदात्ते तामात्मनेपदस्यानित्यत्वात्। तदनित्यत्वं च क्षङोङित्करणात् ज्ञापयतीत्येतदुक्तं वामनेन वलतेरात्मनेपदमनित्यं ज्ञापकादिति विशेषोक्तिरलङ्कार:। हरिणीवृत्तम्।।१४।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१४।। ननु तथावमानविधायिनि कथमेवमनुरज्यस इति सखा, वचनमाशंक्याह, हे सखि वामं प्रतीपं मे मम चित्तं पुनरपि तथाभूते कृष्णे काममभिलासं करोति। अहं किं करोमि, तथा च नाहमभियोज्येति भाव:। कीदृशे कृष्णे ? युवतिषु वलन्ती वर्धमाना तृष्णा यस्य एवम्भूते। पुन: किम्भूते ? मान्तदेकमात्रनिरतां विहाय त्यक्त्वा विहारिणि क्रीडति। अत्र युवतिपदोपन्यासेन तासामतिरिक्तगुणे न्यूनता दर्शिता। वलन्ती तृष्णा यस्येत्यनेन माधवस्य तास्वेकाश्रयं प्रेम च दर्शितम्। तदनेन प्रबन्धेन कृष्णस्यापराधातिरेकं

दर्शयन् तद्गामित्वेन चेतसो वामत्वमुपपादितम्। चेतसो वामत्वे हेत्वन्तरमाह, यस्मादेतन्मनः सापराधस्यापि माधवस्य गुणग्रामं रतिकौशलादिगुणसमूहं गणयति विचारयति। भ्रामं क्रोधम्। भ्राम क्रोधे धातुः, भावे धञ्। भ्रमादपि भ्रान्तिरूपेणापि नेहते न चेष्टते। परितोषं प्रीतिं वहति धारयति। दोषं मदीयावहेलनादिकं दूरतो विमुञ्चति नानुसन्धत इति यावत्। 'वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे। वारिवाहे हरे कामे विद्याद् वामेति योषिति।।१४।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।१४।। नन्वयं त्वां विहायान्यवधूभिर्विहरति तं किमिति त्वं वारं वारं स्मरसि; सत्यम्; गुणवान् विलासि चेत्याह, गणयतीति। हे सखि मम मनः पुनरपि वारं वारं श्रीकृष्णे काममभिलासं[६] किमहं करोमित्यन्वयः। अनेन मानशैथिल्यमनुग्रहश्चोक्तः। कीदृशे श्रीकृष्णे ? युवतिषु व्रजवल्लीषु वलन्ति वर्धमाना तृष्णाऽभिलाषो यस्य। अत एव मां विना विहारिणि क्रीडाशीले। यद्वा पूर्वं विहारिणि नेदानीं महत् दुःखामिति। कीदृशं मनः ? वामं प्रतिकूलं; विरक्तानुरागित्वात्।वामत्वे हेत्वन्तरमाहगणयतीत्यादि। तस्य सौन्दर्यादीनां गुणा[५१] नां ग्रामं समूहं गणयति परिसंख्याति। [१] न [२] तु दोष[३]लेशमपि। [४] तद्गुणस्वभावोऽयम् ; वामत्वं पश्येत्यर्थः। भामं[५]क्रोधं भ्रमाद्विभ्रमादपि नेहते न गच्छति। किन्तु प्रतिदोषं [६] तद्द्रष्टुं चेष्टां करोतीत्यर्थं। एतेन श्रीकृष्णगुणसमूह-गाने(ने)र्ष्याभावस्तन्मूलो मानश्च गत इति[७]ध्वनितम्। तत्र कारणमाह, तादृशेऽपि च परितोषं [८] सन्तोषं वहति। किन्तु मामृतेऽन्यनायिकाक्रीडासञ्जातं दोषं दूरतः [९]दूरात् विमुञ्चति [१०] त्यजति। किन्तु तद्गुणानेव पश्यतीत्यर्थः। [११] तद्यथा

अरतिरियमुपैति[१२]सा न निन्दां
गणयति तस्य मनो गुणान् न दोषान्।
विगलति रजनी न सङ्गमाशा
व्रजति तनुस्तनुतां न चानुरागः।। इति ।।

[१३]''ग्रामः स्वरे संवसथे बन्धे शब्दादिपूर्वकः'' इति **विश्वः** (८९.१४)। ''भामः क्रोधे रवौ दीप्तौ'' इति च। ''वामं सव्ये प्रतीपे च'' इति (**विश्वः**:८९.२२)। कामः स्मरेऽभिलाषे च इति च (**विश्वः**-८९.९)।।१४।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।१४।। इदानीं राधायाः [१४] कृष्णे वसति सति चेतसोऽवशत्वमाह गणयतीति। हे सखि मम [१५]मनश्चित्तं पुनरप्यधुना कृष्णे काममिच्छां करोति किं करोमि।

निवृत्तावुपायान्तरं नास्तीत्यर्थ:। [१६]कीदृशे[१७]कृष्णे ? युवतिषु गोपीषु वलत्तृष्णे जाताभिलाषे। पुन: [१८]कीदृशे ? मां विना विहारिणि क्रीडाशीले। कीदृशं मन: ? [१९] वाममवशमित्यर्थ:। वामत्वकारणमाह मम मन: सापराधस्यापि कृष्णस्य गुणग्रामं गुणसमूहं गणयति। भ्रमादपि भ्रामं विस्मरणं नेहते न चेष्टते। [२०]भाममिति पाठे [२१]भामं क्रोधं नेहते [२२]न[२३]वाञ्छति।[१]तदगुणाकर्णनेन परितोषं[२]सन्तोषं वहति, दोषं[३]मदीयावज्ञादिकं दूरतो विमुञ्चति[४]परित्यजति ।।१४।।

१-२.नास्ति-अ.ब.३.लेशमपि पश्यतीति-इ.फ.ग.ह.ज.४.तत्तद्गुण-फ.५.क्रोध:-ह.ज.६.नास्ति-अ.ब.द्रष्टुं-ज.७.ध्वनि:-ग.८.नास्ति-ग.९.दूरादपि मुञ्चति-इ.फ.ह.ज.१०.नास्ति-अ.ब.११.नास्ति-अ.ब.१२.मां न निद्रा-अ.ब.माननिद्रा-अ.ज.१३.ग्राम: स्वरे संवसथे वृन्दे शब्दादिरूपक:-इ.ग्राम: स्वरे समूहे च बन्धे शब्दादिरूपक:-ज.१४.कृष्णे वसतश्चेतसो-क.१५.मन: पुन: कृष्णे-ड.१६-१७.नास्ति-ड.ल.म.१८.नास्ति-ड.१९.वामत्वे कारणमाह-क.ल.म.२०-२१.भ्रामम्-क.ल.म.२२-२३.नास्ति-क.ल.म.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१४।। एवं साधारणप्रणयेऽपि तस्मिन् महाप्रणय इत्यतस्तत्सङ्घटनार्थं यत्न: कर्तव्य इत्यग्रिमाष्टपदीमवतारयितुमाह, गणयतीति। ममेति शेष:। मन: वामं वक्रं अनुगते सुरादिकं च। गुणग्रामं[५१] सद्गुणसमुदायं मनसा मामपि रमयन्तमित्यादि गणयति संख्यानं करोति। भ्रमादपि अविचारादपि भ्रामं भ्रमोऽत्यन्तं तदन्यत्र विहारं नेहते न काङ्क्षति। परितोषं सन्तोषं वहति। दोषं मदतिरिक्तनारीरम्भणरूपं श्लिष्यति कामपीत्यादिकं प्रत्यक्षदृष्टं दूरतो विमुञ्चति। न गणयतीत्यर्थ: पुनरपि कामं अभि(लाषं) करोति; किमहं करोमि ? बुद्ध्या परासक्ता न सेव्या इतिरूपया बोध्यमानमपि तमेव काङ्क्ष(त) इति भाव:। प्रतिकूलं युवतिषु इतरासु वलन्ती भवन्ती भ्रमन्ती तृष्णा अभिलाषो यस्य तस्मिन्। मां विना मदृते, मां त्यक्त्वा विहारिणि क्रीडापरे कृष्णे। विहारिणि इति विधेयविशेषणं वा। अत्र ''कृषु'' न इति प्रकृतिप्रत्यययोर्मध्ये तवर्गप्रथमागम:, ''ष्टुनेति'' ष्टुत्वं; रषाभ्यामिति णत्वं(च)। एवं वाक्यात्तकारसिद्धि :-

अघोषादूष्मणो ह्यूर्ध्वं स्पर्शमात्रे समास्थिते।
सकृत्तत्स्पर्शसंस्थानं तन्मध्ये प्रथमागम:।।'' इति ।। हरिणीवृत्तम् ।।१४।।

१.तद्गुणकथनेन-ल.म.२.नास्ति-क.ल.म.३.स्वकीयावज्ञादिकं-ल.म.तदीयावज्ञादिकं-क.४.नास्ति-ल.म.परित्यजतीत्यर्थ:-क.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१४।। गणयतीत्यादि। हे दूति ! मम मनो वामं प्रतिकूलम् अनायत्तमिति यावत्। कृष्णे पुनरपि काममभिलाषं करोति बलादिव तत्र गच्छतीत्यर्थ:। ''वामं सव्ये प्रतीपे

च द्रविणे गतिसुन्दरे" इति **विश्वः**। कृष्णे किंविधे ? युवतिषु वलत्तृष्ण इति। युवतिषु सामान्ययोषित्सु वलन्ती तृष्णा यस्येति विग्रहः। पुनः किंविधे ? मां विनेति। मां विहाय विहारिणि विहारशीलेऽपीत्यर्थः। मनसो वामत्वं प्रकटयन्नभिलाषप्रकारमाह - गणयतीत्यादि। तस्यैव गुणग्रामं गुणसमूहं गणयति मन्यते संयाति वा। "ग्रामः स्वरे संवसथे बृन्दे शब्दादिपूर्वके" "**इत्युत्पलमालिनी**"। भ्रमादपि भ्रान्ततोऽपि भामं क्रोधं नेहते न चेष्टते। "भ्रमोऽम्बुनिर्गमे भ्रान्तौ" इति। "भामः क्रोधे रवौ दीप्ते" इति **मेदिनी**। तथा तस्मिन् सर्वसुन्दरी प्रियतमे परितोषं सन्तोषं वहति। उपसर्गस्य घञमनुष्ये बहुलमिति दीर्घः। तथा दोषं दूरतः दूरादेव विमुञ्चति च कृष्णस्य सर्वसुन्दरीसाधारणानुग्रहत्वं दोषः। अतः किमहं करोमि तदुपदिशेति समुदितार्थः। इदं च नायकस्य प्रेमणि ज्ञातेऽपि स्त्रीस्वभावादुक्तम्। श्लेषोक्त्या मम मनो वामं समीचीनम्; यतः अनुरक्ते अनुकूलं भवति। अतो मनोऽभिलषितं पूरयेति भावः।।१४।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।१४।। ननु श्रीकृष्णस्तां विहाय अन्याभिश्चेद्विहरति तर्हि त्वं किमिति तं स्मरसीति स्वाभिप्रायं वक्ष्यमाणं सखीं प्रत्याह गणयतीति। मम वामं सुन्दरं विदग्धमिति यावत् वैदग्ध्यं च वक्ष्यमाणमधुसूदनशब्दार्थे दर्शितव्यम्। तादृशं मम मनः कृष्णेऽभिलाषं पुनरपि करोति। अहं किं करोमि ? निजोत्कर्षानुभवानन्दोन्मादं ममायत्तं न भवतीत्यर्थः। कीदृशे कृष्णे ? पूर्वरीत्या मयि बलन्ती तृष्णा यस्य तस्मिन्। तदर्थमेव युवतिषु मां विना विहारिणि अतएव तस्य गुणानां ग्रामं समूहं गणयति भामं क्रोधं भ्रमादपि नेच्छति दोषं साधारण्याचरणं दूरतो विमुञ्चति परीतोषं च वहति प्राप्नोति। ग्रामो वृन्दे शब्दादिपूर्व इति **विश्वः**।।१४।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१४।। एवं श्रीकृष्णस्य निजविषयकबहुमान स्वलघुताशंकापरिहारं निरूप्य आत्मनोऽपि तद्विषयकप्रणयोत्तरङ्गावस्थामाह; गणयतीति। मनः पुनरपि वामं प्रतीपं सत् कृष्णे कामाभिलाषं करोति, किं करोमीत्यन्वयः। अत्र प्रणयखेददैन्याद्याकुलतया पुरःस्थिताया अपि सख्या अनवेक्षणादसम्बोधनम्। ममेत्यनुक्तिर्मदवस्थां मनागपि अनालोच्य तत्प्रवणमेव सदा सम्पन्नमिति मनसि असूयातिशयं सूचयति। पुनरपि इत्यनेन प्रथमवाम्येन निरपराधे प्रथितप्रणयानुबन्धे समीपोपगते कृतोपलालने दयिते दुरभिमानाविष्कारेण मामीदृशीं दशामानीतवान्। सम्प्रति तु द्वितीयवाम्येन कृष्णं कामयते

इति किं वदामि। अपि तु कृष्णे कामं करोतीति तद्विषय मनोरथमपि धन्यतयाऽभीप्सिततमं मन्यमानं पुन: कीदृशीं दशामनुभावयति न जानामीति सूच्यते। ननु पुरुषजातिस्तु प्रायश: शठो भवति। अत: शठे शाठ्यं विधीयत इति न्यायमनुसरतो मनस: कथं प्रथमवामतेत्याशंक्याह, कृष्णे कीदृशे, बलतृष्णे, बलन्ती पूर्वोक्तरीत्या मयि एव वर्धमाना तृष्णा, प्रगाढानुरागो यस्य, तादृशे, ननु गोपिकाभि: सह नृत्यगीतादिरस-विनोदमनुभवतस्तस्य कथं त्वदेकतृष्णतेति। अत आह; पुन: कीदृशे, मां विना युवतिषु विहारिणि, कृतेऽपि मदर्थं सखीप्रेषणादिबहुप्रयत्नेन मदलाभेन, यथा महातृषार्त्त स्तोयमप्राप्य तुषारमपि लेलिहते तद्वत् युवतिषु मत्सदृशधर्मावच्छिन्नासु विशिष्या-परिचितनामधेयासु व्रजतरुणीषु विहारिणि। विहारोत्कण्ठाविनोद: स: अस्यास्तीति तादृशे विहारसदृशे कतिपयव्यापारशालिनीत्यर्थ:। अतो मनस: कथं न प्रथमवामतेति भाव:। अथ द्वितीयवाम्येन यत् करोति तदाहगणयतीत्यादिना गणनाया: पृथगनेकपदार्थ विषयतया गुणान् गणयतीति वक्तव्ये गुणग्रामं गणयतीति गुणानामसंख्येयतया गणनाविषयत्वेन तत् समुदायस्यैव पुन: पुनरावर्त्तनाध्यवसायं करोतीत्यर्थ:। अनेनादरातिशयो व्यज्यते। 'ग्राम: स्वरे संवसथे वृन्दे शब्दादिपूर्वके' इति **विश्व**:। तस्येत्यनुक्तिस्तादृशगुण, ग्रामस्याश्रयान्तराभावात् असाधारणं तदेकाधारणं बोधयति। मदपरक्तस्य तस्य गुणगणने किमर्थं क्लिश्यसि, विरम निष्फलोद्यमादिति बहुशो मया निवारितमपि भ्रामं ततोऽन्यत्र भ्रमणं न करोति इति। किं वदामि, भ्रमात् प्रमादादपि तदर्थं नेहते, न चेष्टते। भ्राममिति भ्रमशब्दात् स्वार्थेऽण्प्रत्यय:। भाममिति क्वचित्पाठ:। तदा अरे मनोमर्कट। अन्योपभुक्त, गुणगणनमेवं कुर्वन् कथं न लज्जसे इति बहुधा भर्त्सितमपि भामं क्रोधं भ्रमादपि नेहते। भाम क्रोधे धातु:। न केवलमेतावता विरमति परितोषं च वहति। चकारोऽत्र भिन्नोपक्रमे। अरे विचारमूढ। कथमात्मसन्तापकव्या-पारशीले अनुरज्जसे इति बहुधाबोधितमपि न बुध्यते। किन्तु तद्गुणलावण्यादिस्मरण-संजातानन्दसम्भृतं किमपि नापेक्षते इति भाव:। अरे दुर्बोधकल्पितोपचारचतुरं महाधूर्त्तं किमिति विश्वसिषीति भूरिश उपदिष्टमपि दोषं धूर्त्तत्वादिदूषणं दूरतो विशेषेण मुञ्चति। यथा एकमपि कदापि कोऽपि न पश्यति तथा त्यजत्ययमित्यर्थ:। हे सखि! मदीयं मनो ममापीदृशमनयत्तं चेत् तार्हि किं करोमि, कथमात्मानं समादधामि, नात्र कमप्युपायं पश्यामि, किन्तु त्वमेवात्र शरणमिति वस्तुध्वनि:। अत्र कामशब्देन न तु स्वसुखतात्पर्याभिलाष:, किन्तु शुद्धप्रेमैव। तासां प्रेमविशेषोऽयं प्राप्त: कामपि माधुरीम्। तत्र क्रीडानिदानत्वात् काम इत्युच्यते बुधैरिति **श्रीरूपगोस्वामि** चरणोक्ते:। तथा च तत्र, प्रेमैव गोपरामाणां काम इत्यगमत् प्रथाम्।।१४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१४।। गणयति गुणग्रामेति; यदा श्रीकृष्णः अन्यगोपिभिः रंरमते तदानीं श्रीराधा परित्यागग्लानिना खिन्नापि स्वस्याः सखीं व्रवीति। हे सखि! मम चित्तं श्रीकृष्णमयत्वेनाद्यापि भूयोभूयः श्रीकृष्णं कामयते किं वा करोम्यहम्? इयमुक्तिः खलु मानशैथिल्यमनुग्रहश्चोक्तिरिति सञ्जीवनी। अर्थात् मानशैथिल्यात् सा कृष्णस्य अवगुणानां नाम अन्य स्त्रीसम्भोगजन्य, अवहेलनादीनि गणयति। यद्यपि तत्र ईर्षया स्त्रीणां कोपः मानकोपशब्देनोच्यते। यथा **दशरूपके**; स्त्रीणामीर्ष्याकृतो मानः कोपोऽन्यासङ्गिनि प्रिये श्रुते वाऽनुमिते दृष्टे, श्रुतिस्तत्र सखिमुखात्।

अतः व्रजयुवतीषु, बलतृष्णे वर्द्धनशीलतृष्णायां रमणशीलतापि कृष्णस्य वर्द्धते। परन्तु कथं स विहरति रतिरङ्गे सङ्गं विना मम इति मत्वा मन्मनसि भामं क्रोधं मनागपि लेशमपि न भवति। यतः तस्मिन् मम बलवती प्रीतिरस्ति। तस्य गुणग्रामं गुणानां ग्रामः समूहः अहं गणयामि तस्य दोषमपि परिहरामि। तथापि बलवती कामनासम्पन्नः श्रीकृष्णः यदा मया विना गोपीषु वा गोपयुवतीषु रमते तदानीं मनो मे व्याकुलायते। तत्र उत्कण्ठारूपायाः नायिकायाः लक्षणं योज्यं भवति **रसिकप्रिया टीकायाम्**। तद् यथा;

उद्दाममन्मथमहाज्वरवेपमानां रोमाञ्चकण्टकितमङ्गकमावहन्तीम्।
संवेदवेपथुघनोत्कलीकाकुलाङ्गी उत्कण्ठिता वदति तां **भरतः कवीन्द्रः**।।

उत्का उत्छुका भवति सा यस्या वासके नागतः प्रियः। तस्याः नागमने हेतुं चिन्तयन्त्याकुला यथा।। अत्र हरिणीवृत्तम्। यमकं नाम शब्दालंकारः। संशयदीपकालंकारौ क्रियौचित्यं च।।१४।।

।। षष्ठ प्रबन्ध: / गीतम् ६ ।।

।। मालवराग एकतालीतालाभ्यां गीयते ।।

**१-निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तम्।**
**चकितविलोकितसकलदिशा रतिरभसरसेन हसन्तम्।।**
**सखि हे केशिमथनमुदारं**
**रमय मया सह मदनमनोरथभावितया सविकारम् ।। ध्रुवम् ।।१ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१ ।। गुण्डकिरीरागेण गीयते। अस्य ध्यानस्वरूपम
रणोत्सुका कान्तपथं प्रतीक्ष्य मालापयन्ती मृदुपुष्पतल्पे।
इतस्तत: प्रेरितदृष्टिरार्त्ता श्यामातनुर्गुण्डकिरी प्रदिष्टा।।

हे सखि! केशिमथनं केशवं मया सह रमयेति वाक्यार्थ:। मया कीदृश्या मदनमनोरथभावितया, मदनमनोरथेन भावितेति विग्रह:। लव्धं प्राप्तं ''विन्नभावितमासादितं च भूतं च'' **इत्यमर:**। ''वाञ्छा लिप्सा मनोरथ:'' **इत्यमर:**। मदन मनोरथभाव: संजातोऽस्या इति तारकादिर्वा। कृष्णं कीदृशं सविकारं ''विकारोमानसोभाव:'' **इत्यमर:**। अत्रगीते केशिमथनशब्दमुपादाय पुनरपि मधुसूदनस्योपादानं वलवत्ताप्रतिपादनार्थं वलवत्सु स्त्रिया रतिरित्युक्ते:''। निशङ्ककेलिता प्रतिपादनार्थं वा ''नि:शङ्ककेलिर्नपराङ्गनासु'' ''इत्युक्ते: निभृतेत्यादि। निभृतं च तत्कुञ्जगृहं चेति कर्मधारय: निर्जनताप्रतिपादनार्थमत्र निभृतशब्दोपादनम्। निकुञ्जस्य रम्यता प्रति पादनार्था गृहशब्दोपादानम्। कीदृशं केशिमथनं निशि रहसि निलीय वसन्तम्। कश्चिन्मां द्रक्ष्यतीति शङ्काज्ञया रात्रौ निर्जने संकुचितमात्मानं कृत्वा तिष्ठन्तं निलीयेति लङ्श्लेष्मणे क्वानर्थया चकितेत्यादि। चकितविलोकितसकलदिशा, चकितं यथा स्यादेवं विलोकिता: सकलदिश: ययेति विग्रह:। यदृच्छाभ्रमणादागमिष्यतां जनानां सन्दर्शनं सम्भवतीत्युपयुक्तं चलित सकलदिश: प्रतीक्षणं, कृष्णं किम्भूतं रतिरभसवशेन हसन्तं, रते: सम्भोगरूपो यो रभसोवेगस्तद्वशेन तदायत्ततया हसन्तम्। मनोऽनुकूलेष्वर्थेषु सुखं सम्वेदनं रति: इति भरताचार्य्य:।।१ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१ ।। इदानीं कामज्वरसंतप्तहृदया राधा सख्यां दूतीत्वमारोप्य कृष्णेण सहानुसन्धानमभिलषन्ती आह वर्णयतितालेन, निभृतेति। पूर्व ध्रुवपदं व्याक्रियते, सखि

हे इति। हे सखि! मया सह केशिमथनं कृष्णं रमय कामकेलीः कारय। किंभूतम्? उदारं महान्तम्। किंभूतया मया? सविकारं नानाविकारसहितम्, विकारः कामोजो भावः कुचोदरादिप्रकटनम्; तदुक्तं **रसिकसर्वस्वे**, "नाभीमूलकुचोदरप्रकटव्याजेन यद्योषितां साकाङ्क्षं मुहुरीक्षणं स्खलितता नीवीनिबन्धस्य च। केशभ्रंशनसंयमौ च कमितुर्मित्रादिसंदर्शनैः सौभाग्यादिगुणप्रशस्तिकथनैस्तत्सानुरागेङ्गितम्।। इति। रतिचेष्टासहितं यथा स्यात्तथा मदनमनोरथभाविततया कामकेलीच्छाभावितान्तः करणया। अथवा, कथोपलक्षितं रमयेति कृष्णविशेषणत्वेनाह,मदनमनोरथानां भावो विद्यते यस्मिन् स भावी तस्य भावो भाविता तया। किमुक्तं भवति? यथाऽहं तस्मिन्नभिलाषवती तथा सोऽपि मयि स्यादिति भावः। एवं शृङ्गाररसः संपन्नो भवति। तथा चोत्कम्, "चेष्टा भवति पुंनार्यो रत्युत्थानातिसक्तयोः। संभोगो विप्रलम्भश्च स शृङ्गारो द्विधा मतः।।" अथवा, किंभूतं हरिम्? सविकारम्। मानसभावसहितमिति कृष्णविशेषणम्। इति ध्रुवः। अथ पदानि। निभृतेति। तमेवोभयनिष्ठं भावं सूचयन्त्याह, किंभूतया मया? निभृतनिकुञ्जगृहं गतयाः। "वश्यः प्रणेयो निभृतविनीतप्रश्रिताः समाः" इत्युक्तत्वात्तथाप्यवसरोचितं व्याख्यातव्यम्। एतेनाभिसारस्थानमुत्कम्। तदुक्तं **भरतेन**, "विवाहे तीर्थयात्रादौ बन्धनोत्सवके तथा। नटनृत्ये तथा केलौ जागरोद्यानसंगतौ। असतीसङ्गमकुले रत्युत्पाताद्युपप्लवे। चौरिकयाभिसारः स्यात्स्वदारानिह रक्षयेत"।। निशि रात्रौ। अपि च किंभूतम्? रहसि गुप्तस्थाने निलीय तिरोभूय वसन्तम्। अपि च किंभूतया? चकितेन विलोकिताः सकला दिशो यया सा। "कुत्र कृष्णो वसति" इति गवेषितुमभिसरन्तीं "सस्योमां मा द्राक्षु" रिति लज्जया त्रासोत्कम्पेनेति। अपि किंभूतम्? रत्युत्साहवशेन हसन्तम्।।१।।

## (३) जगद्धरकृत- सारदीपिका

।।१।। पुनरपि राधा गीतेन सखीमाह निभृतेति । हे सखि ! त्वं केशिमथनं कृष्णं मया५ २ सह रमणक्रीडां कारय। कीदृशं कृष्णम् उदारं महान्तं कथम्भूतया मया मदनस्य मनोरथः इच्छा स्मितभावो रत्याख्यः सञ्जातो यस्याः, कथंभूतं कृष्णं सविकारं भावसहितं च कीदृश्या मया निभृतं गूढं यद्वा कुञ्जगृहं गतया प्राप्तया कथंभूतं कृष्णं निशिरात्रौ रहसि एकान्तस्थले निलीयेति सेहिती भूयवसन्तं तिष्टतं कथंभूतया मया चकितं सभयं यथा तथा विलोकिताः दृष्टाः सकलदिशा यया पुनः कथंभूतं कृष्णं रतिरभस उत्साहस्तस्य भरेण आधिक्येन हसन्तं सस्मितं मुखं अस्मिन् गीते पूर्वार्द्धं राधाविशेषणमुत्तरार्द्धं कृष्णस्येति बोद्धव्यम्।।१।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१ ।। अथोत्कण्ठिता राधा सखीं स्वमनोरथमाह, निभृतनिकुञ्जेति। गीतस्यास्य गौडमालवराग:, एकताली तालश्च। गीतार्थस्तु, हे सखि! मया सह केशिमथनं कृष्णं रमय। कीदृश्या मया? मदनस्य यो मनोरथ इच्छा तद्युक्तो यो भावो रत्याख्य: स जातो यस्यास्तादृशया। यद्वा, मदनमनोरथेन भावितया प्राप्तया। ननु को वेद मया प्रार्थने कृते कदाचिन्नायात इत्यत आह, उदारमौदार्यगुणसंयुक्तम्। तथा च त्वत्प्रार्थितमवश्यं स दास्यत्येवेति भाव:। कीदृशं कृष्णम्? सविकारं(५२), विकारो मानसो भावस्तत्सहितम्। एवमन्योन्यानुरागपूर्वकत्वेन शृङ्गाररसपोषणमुक्तम्। अन्यथा रसाभासो भवतीति भाव:। यद्वा, सविकारमिति क्रियाविशेषणम्। विकार: स्तनप्रान्तादिप्रकटनं तत्सहितं यथा स्यादेवं मदनमनोरथभावितयेत्यर्थ:। तदुक्तं "**रसिकसर्वस्व**" "नाभीमूलकुचोदरप्रकटनव्याजेन यद्योषितां साकाङ्क्षं मुहुरीक्षणं स्खलितता नीवीनिबन्धनस्य च। केशभ्रंशनसंयमौ च कमितुर्मित्रादिसंदर्शनै: सौभाग्यादिगुणप्रशस्तिकथनैस्तत्सानुरागेङ्गितम्।।" इति अत्र "केशिमथन" पदोपादानं सामर्थ्यख्यापनाय। तत्प्रयोजनं च नि:शङ्ककेलिप्रतिपादने। भावितेत्यत्र प्रथमे व्याख्याने तारकादित्वादितच्। द्वितीये पक्षे "भवितं वासिते पक्षे" इति **विश्व:**। पुन: कीदृश्या मया? निभृतमेकान्तं यन्निकुञ्जरूपं गृहं तं प्राति गतया। कीदृशं कृष्णम्? निशि रात्रौ रहस्येकान्ते निलीय तिरोहितीभूय वसन्तं तिष्ठन्तम्। एवंभूतं मां राधा पश्यत्विति कुतोऽपि मत्प्रताणाय संकुचितमात्मानं कृत्वावस्थितमिति भाव:। पुन: कीदृश्या? चकितं यथा स्यादेवं विलोकिता: सकला दशो यया तादृश्या। कुत्र कृष्णो निलीय तिष्ठतीति कृत्वाऽभिसरन्तीं मां मा कश्चन पश्यत्विति च शङ्कितां पश्यत्येवेति च भाव:। कीदृशं कृष्णम्? रतौ यो रभस उत्साहस्तद्युक्तो यो रस: शृङ्गाराख्यस्तेन हसन्तम्। क्रीडायां कालक्षेपांसहिष्णुम्। तथात्मप्रकटनार्थं पुन: स्थितमपि मामियं न पश्यतीति कृत्वां हसन्तमिति भाव:। "निभृतं रह एकान्तम्" इति "**धरणि:**"। "रभसो वेग उत्साह:" **इत्यमर:**।।१ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१ ।। गुण्डकिरीरागेण गीयते। एवं रासक्रीडासक्तं श्रीकृष्णं स्मृत्वा तज्जनितविरह-वेदनां षोढुमशक्ता तमानयेत्याह। निभृतेति। गुण्डक्रियारागेण गीयते इत्युक्तम्। तस्यायमभिप्राय:। प्रथमसर्गे मालवरागस्यैकां पत्नीमुक्त्वा अस्मिन् सर्गे प्रथमकलत्र स्मरणानन्तरं द्वितीया वल्लभां सूचयितुं गुण्डक्रियेत्युक्तम् तत्स्वरूपं तु,

रणोत्सुका कान्तपथं प्रतीक्ष्यसावासयन्ती मृदुपुष्पतल्पे।
इतस्ततः प्रेरितदृष्टिरार्त्ता श्यामातनुर्गुण्डकिरी प्रदिष्टा।।

एकताली तालेन गेयम्। ''एकेनैवद्रुतेन स्यादेकतालीति कथ्यते'' इति तल्लक्षणं पूर्वसर्गे कथितम्। तत्र सखि हे इत्यारभ्य सविकारमित्यन्तं ध्रुवपदम्। तत्साधारणत्वादादौ व्याक्रियते। सखीति। हे सखि! मदनमनोरथः कामभोगवाञ्छा तया भावितया अधिवासितया अथवा गृहीताग्न्यादिष्विति निष्ठायाः पूर्वनिपाते भावित मनोरथेति जातम्। तदा अनुसंहितकामभोगविलापयेत्यर्थ। एतादृश्या मया सह उदारं वाञ्छितार्थ वितरणधुरन्धरं केशिमथनं केशिनाम दानव हन्तारं श्रीकृष्णं सकलपीडा-पनोदनसामर्थ्यसूचनार्थमनेन कृष्णाभिधानमित्यवगन्तव्यम्। सविकारं विकारेण सहितं यथातथा रमय विहारय। मया सह क्रीडापरायणं कुर्वित्यर्थः। शिष्टेषु पदेषु तृतीयान्तं मयेत्यनेन योज्यम्।

द्वितीयान्तं केशिमथनमित्यनेन योजनींयम्। कीदृश्या मया कीदृशं केशिमथनमित्याकाङ्क्षायामाह। निभृतेति। निभृतं निश्चितमेकान्तयोग्यमित्यर्थः। यन्निकुञ्जगृहं लतागृहं तद्गतया प्राप्तवत्या अनेन सम्भोगयोग्यमिदं स्थानमिति सूचितम्। किञ्च चकितं, वाताहतिजनित शुष्कपर्णारवश्रवणेन तदध्यानवशात् कृष्ण एवागत इति यद्भयं तेन, अथवा कृष्णं विना एकाकितयावस्थितां मां को वा **हरिष्यति** वेति यद्भयं तेन, अथवा उक्तलक्षणं चकितं यथा तथा वा विलोकिताः वीक्षिताः सकलदिशो यया तादृशया मया सह कीदृशं कृष्णं निशि निशायां रहस्येकान्ते निलीय यद्भयवशात् स्त्रीकदम्बे बिरहमणिस्य गोपनं कृत्वा वसन्तं तिष्ठन्तं किञ्च रतिः गोपिकाभिः कृता या कामक्रीड़ा तत्र यो रभसः गोपिकासम्बन्धिनिधुवननिर्माणवेगः हर्षो वा ''रभसो वेगहर्षयोरि**त्यमरः**'' हासं कुर्वन्तम्। काममष्टगुणं भवेदिति यद् वाक्यं तस्यार्थ इदानीमपरोक्षात् ज्ञात इति गोपकामिनीर्हसन्तमित्यर्थः। एतादृशं मया रमये-त्यन्वयः।।१।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१।। मनोरथनिहितसङ्गमप्रणालिकया कामपीड़ामसहमाना राधा सखीमभ्यर्थयति। गीतस्यास्य मालवरागः। एकतालीतालः। एतल्लक्षणञ्चोक्तमेव। हे सखि! मया सह केशिमथनं कृष्णं रमय क्रीड़य। अत्र प्रायो वीररताः स्त्रिय इति श्लाघाप्रयोजक-गुणपुरस्कारेणोपन्यासः। कथमेवम्विधस्तव दुराग्रह इत्याशंक्याह-मया कथम्भूतया? मदयतीति मदनः कामः, तेन दुर्दशत्वं दर्शीतम्। तज्जनितो मनोरथोऽभिलासः स

एव रतिनामा स्यायी भाव: स जातोऽस्या एति च तारकादित्वादितच्। यद्वा मदनजनितमनोरथेन भावितया तदेकचित्ततयेत्यर्थ:। तथा च नाहं स्वायत्ता इति दर्शितम्। मद्वचसा कथं कृष्ण: समागमिष्यतीति सखिवचनमाशंक्याह; कीदृशम्? उदारं महान्तम्। तथा च स महान् मम दु:खवार्तामुपश्रुत्य कृपया सर्वथा समागमिस्यतीति दर्शितम्। महतामपि निरागाणामत्रैदास्यं सम्भाव्यत एवेत्याशंक्याह, कीदृशम्? सविकारं कामजनितविकारसहितमित्यर्थ:। तथा च सोऽप्यत्र सोत्कण्ठ एवेति न तदर्भ्यथने भवत्या: कोऽपि परिश्रम इति दर्शितम्। पुन: किम्भूतया? निभृतं संगुप्तंयन्निकुजं गृहं तत्र गतया। एतेन निकुञ्जेत्यनेनाभिसारयोग्यं स्थानमुपदर्शितम्। तथा च **साहित्यदर्पणे**, क्षेत्रम्वाटी भग्नदेवालयो दूति गृहम्वनम्। आलयञ्च श्मशानञ्च नदीनाञ्च तटन्तथा।। एवं कृताभिसाराणा पुंश्चलीनां विनोदने। स्थानान्यष्टौ तथा ध्वान्तच्छन्ने कुत्रचिदाश्रय:।। इति।। केशिमथनं किम्भूतम्? निशि रात्रौ निलीय वसन्तम् इयमागत्य किमाचरिष्यतीति निगृह्य तिष्ठन्तम्। तथा चाग्रतस्थां नय पश्चान्मां नयेति वाक्यार्थ:। तत: किम्भूतया मया? चकितं चमत्कारं यथा स्यादेवं विलोकिता: सकला: दिशो यया। अत्र स एव कृष्ण: क्वास्तीति तन्निरूपणार्थं नयनचमत्कार:। केशिमथनं तत: किम्भूतम्?रतिरभसभरेण हसन्तं प्राप्तरतिजनितप्रमोदायत्ततया हास्यवन्तमित्यर्थ:। रभसो वेग उत्साह **इत्यमर**:।।१ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१ ।। एकतालीताले मालवरागे। एकताली त्रिधा प्रोक्ता गीतशास्त्रविशारदै:।

रामा च चन्द्रिका तद्वद्विपुलेत्यथ लक्षणम्।।

द्रुतमेकं भवेद्यत्र स ताल: [१]खण्डसंज्ञित:।।

रामा तेनैकताली तु कीर्त्यते गायकोत्तमै:।।

रागलक्षणन्तु पूर्ववदेव। इदानीं विरहोत्कण्ठिता राधा सखीं प्रत्याहनिभृतेत्यादिना।

[२]तल्लक्षणन्तु।

उद्दाममन्मथमहाज्वरवेपमानां

रोमाञ्चकण्टकितमङ्गकमुद्वहन्तीम्।

संवेदवेपथुघनोत्कलिकाकुलाङ्गी-

मुत्कण्ठितां वदति तां भरतो मुनीन्द्र: ।। इति ।।

[३]गीतार्थस्तु, हे सखि मया सह केशिमथनं, प्रशस्ता: केशा यस्य स: [४]केशी काम:; तमप्यात्मसौन्दर्येण मथ्नाति क्षोभयति। केशी चासौ मथनश्च तमिति। [५]अथवा

नायकसामर्थ्यख्यापनाय केशिमथनपदोपादानम्। [६]तं केशिमथनं मन्मथमथनं [७]श्रीकृष्णं रमय क्रीडां कारय। कीदृश्या मया? निभृतनिकुञ्जगृहं गतया एकान्तनिबिडलताच्छादित मन्दिरं प्राप्तया। कीदृशम्? निशि रात्रौ रहस्येकान्ते निलीय [८]तिरोभूय वसन्तं तिष्ठन्तम्। तदवलोकनार्थं कुञ्जमन्दिरगतां मां दृष्ट्या सा राधा मां मा पश्यत्विति कुतर्कमत्प्रतारणाय रहःस्थितमिति भावः। [१]चकितं सभयं यथा स्यात्तथा विलोकिता दृष्टाः [२]सकलाः समस्ता दिशो यया येन वा तया तं च श्रीकृष्णमभिसरन्तीं मां कृष्णो मार्गे मा पश्यत्विति सभयं सर्वदिक्षु पश्यतीति भावः। किञ्च,[३] रत्युत्साहस्तद्रभसो वेगो रसः शृङ्गाराख्यस्तेन हसन्तं सुरतकालसमयार्थमग्रस्थितमपि मामियं न पश्यतीति हसन्तमिति भावः।

[४]ननु मयार्थितः श्रीकृष्णो नायास्यतीत्याह[५] उदारं उदारस्वभावं; अत एव[६]त्वत्प्रार्थितमवश्यं दास्यतीति भावः[७]। कीदृश्या? [८]मदनस्य कन्दर्पस्य मनोरथः इच्छा तद्युक्तो यो भावः रत्याख्यस्तज्जातया प्राप्तया वा। तारकादित्वादितच्। कीदृशम्? मदनजनित[९] विकारसन्तापसहितम्। पदद्वयेनानेन परस्परानुरागजनितः शङ्गाररसः पुष्टो भवतीति भावः। "भावितं वासिते प्राप्ते" इति **विश्वः** (५५.९३)। निभृतं सम्भृते [१०]गुरुः इति **यादव**। रभसो वेग उत्साह : **इत्यमरः**। विभावन[११] विशेषालङ्कारौ ।।१।।

१.खण्डिसंज्ञितः-ग. २.उत्कण्ठितालक्षणम्-इ.फ.ग.ह.ज. ३.४.नास्ति-अ.ब. ५.यद्वा-ग. ६.तः७.पर्यन्तं नास्ति-अ.ब. तं केशिमथं श्री कृष्णं-फ.ग. ८.तिरोवसन्तं-ग.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।१।। पुनरपि राधा[१२]गीतेनाह, निभृतेति। हे सखि त्वं केशिमथनं कृष्णं मया सह रमय क्रीडां कारय। कीदृशम्? उदारं महान्तम्। [१३]कथम्भूतया? मदने मनोरथः इच्छा तस्मिन् भावितया साभिप्रायया। [१४]कीदृशम्? सविकारं भावसहितम्। [१५]पुनः कीदृश्या मया[१६]? निभृतं गूढं यन्निकुञ्जगृहं [१७]लतागृहं गतया[१८]तत्प्राप्तया। पुनः कथमभूतं कृष्णम्? निशि रात्रौ रहसि एकान्तस्थले निलीय [१९]तिरोभूय वसन्तं तिष्ठन्तम्? पुनः [१]कथम्भूतया [२] मया? चकितं सभयं यथा स्यात्तथा विलोकिता दृष्टाः सकला दिशो यया। पुनः [३] कथम्भूतं[४]कृष्णम्? [५]रतेः रभस उत्साहस्तस्य भरेणाधिक्येन हसन्तं सस्मितमुखम्। अस्मिन् गीते पूर्वार्धं राधाविशेषणं उत्तरार्धं[६] कृष्णस्य ।।१।।

१.सचकितं-ज. २.सर्वाः-इ.फ.ग.ह. ३.रतिषूत्साहः-इ. ४.तः७.पर्यन्तं नास्ति-ज. ५.नास्ति-अ.ब. ६.त्वद्वाञ्छित-इ.फ.ग.ह. ८.नास्ति-अ.ब.इ.फ.ग.ह.ज. ९.विकारस्सन्तापस्तेन सहितम्-ज. १०.गुप्तः-इ.ह.ग.ज. ११.विशेषावलङ्कारौ-इ.फ.ग.ह.ज. १२.गीतेन सखीमाह-

क.ल.म.१ ३.कथम्भूतयामया-क.१ ४.कथम्भूतं हरिम्-क.ल.म.१ ५.त:.१ ६.पर्यन्तं नास्ति-क.पुन:-ड. कीदृश्या मया-ल.म.१ ७.नास्ति-ड.१ ८.प्राप्तया-ड.ल.म.१ ९.तिरोहितीभूय-ल.म.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।१ ।। निभृतेति। निभृतं निविष्टं निकुञ्जं एव गृहं गतया। चकितेन भयसम्भ्रमेण विलोकिता: सकला: दिश: यया तया। अन्यशङ्कात: परित: अवलोकयन्त्या प्राप्तया निशि रात्रौ रहसि इतरवधूभ्य: निलीय आच्छाद्य वसन्तं गूढतया परानविदित[७] रतिरभसवशेन सम्भोगाभिलाषेण हसन्तम्। ध्रुवाया: क्रियान्वय:। हे सखि त्वं मया सह राधया सह। मदनमनोरथै: नानाविधसंलापादिभि: चुम्बनबन्धादिकरणाभिलाषरूप: भावितया उक्तया मया अत एव सविकारं मानसविकारसहितम्। उदारं केशिमथनं केशिनामकदैत्यहन्तारं रमय योजय। अत्र कर्तृकर्मणो: तृतीयाद्वितीयायुक्तविशेषणानीति क्रमेण योज्यानि। यथाक्रमं तृतीयान्तविशेषणहेतुकानि प्राय: श्रीकृष्णविशेषणानीति न व्यवहितत्वदोष:।।१ ।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१ ।। गुण्डकरीरागस्य लक्षणमाह, ''रतोत्सुका कान्तपथप्रतीक्षामापादयन्ती मृदुपुष्पतल्पे। इतस्तत: प्रेरितदृष्टिरार्त्ता श्यामाङ्गना गुण्डकरी प्रदिष्टा।।'' इति। अस्यां हि गाथायामुत्कण्ठिता वर्णनीया। तल्लक्षणम्, ''उद्दाममन्मथमहाज्वरवेपमानां, रोमाञ्चकण्टकितमङ्गतलं वहन्ती। गाढानुरागवचनां पुरत: सखीनाम्, उत्कण्ठिता वदति तां भरत: कवीन्द्र:।।'' इति। अत्र वात्स्यायनरतिसागरप्रभृतिकामशास्त्रप्रतिपादित-सुरतक्रमानुगुणतया सम्भोगं वर्णयितुं राधिकावचनव्याजेन कवेरुपक्रम:। पुनरुत्कण्ठिता भूत्वा राधा सखीं प्राह, निभृतेति। हे सखि! केशिमथनं केशवं मया सह रमयेति वाक्यार्थ:। केशिनामा कश्चिदसुरस्तुरगरूपस्तं मथितवानिति। किंविधम्? उदारमिति। उदारं महान्तम् अतीवदातारं दक्षिणं वा। ननु शृङ्गारप्रस्तावे केशिमथनपदोपादानम-समीचीनमिति न वाच्य: खल्वयमभिप्राय:। यद्यपि हिंसकोऽसौ तथापि प्रपन्नजनं प्रति उदार एवानुकूलो दक्षिण इति यावत्। तेन पदद्वयमपि साधीय:। यद्वा दुष्टमेव निराकरोति। साधुजनेषु दक्षिण एवेत्यात्मनो निर्दोषतया प्रतिपादनम्। अथवा तस्या: गच्छतो मध्ये मार्गं दुष्टजनेन पराभवोऽपि न भविता। मयि प्रपन्नायां दाक्षिण्यं च करिष्यतीति साभिप्रायत्वम्। [यद्वा केशिमथनशब्दमुपादाय पुनरप्युत्तरपदे मधुसूदनशब्दस्यो-पादानम्।] अतिबलवत्ताप्रतिपादनार्थं बलवत्सु स्त्रिया: रतिरित्युक्ते:। नि:शङ्कं केलिप्रतिपादनार्थं वा, ''नि:शङ्ककेलिर्न पराङ्गनासु'' इत्युक्ते:। मया किंविधया?

मदनमनोरथेति। मदनाद् यो मनोरथ: कृष्णसङ्गमेच्छा तेन भाविता प्राप्ता तया। ''लज्जां प्राप्तं विन्नं वित्त: भवितमासादितं च भूतं च'' इति। मदनकृतो यो मदीयो मनोरथस्तत् कृतो भाव:, सात्त्विकविकार: सञ्जातोऽस्या इति तारकादिर्वा। यद्वा मदनस्य मनोरथेन भवितया उत्पादिततया इमामुत्पाद्य कृष्णेन सह रमयिष्यामीति वाञ्छया मदनो माम् उत्पादितवानिवेति राधाया उत्प्रेक्षागर्भविशेषणम्। एतेन स्वस्या: सौन्दर्यातिशय-प्रतिपादनार्थं मदनस्य विभुत्वमुत्प्रेक्षितम् इति मन्तव्यम्। तथा च "भवभूति:"- ''सा रामणी(णा)यकनिधेरधिदेवता वा सौन्दर्यसारसमुदायनिकेतनं वा। तस्या: सखे नियतमिन्दुसुधामृणालज्योत्स्नादिकारणमभून्मदनश्च वेधा:।।'' इति। कृष्णं किंविधम्? सविकार मिति । सह विकारैराङ्गिकसात्त्विकरूपैर्वर्तत इति स तथा तम्। सविकारतया रमयेति भाव:। मया किंविधया केशिमथनं च किंविधमित्याशङ्क्य सर्वत्र गाथापदेषु क्रमेण विशेषणद्वयं योजनीयम्। तद्यथा। पुन: किंविधया? निकुञ्जगृहमिति। निभृतं गुप्तं च तत् निकुञ्जं गृहञ्चेति कर्मधारय:। तद्गतया प्राप्तया निर्ज्जनताप्रतिपादनार्थमत्र निभृतशब्दोपादानम्। निकुञ्जं गृहमिव निकुञ्जस्य रम्यताप्रतिपादनार्थं गृहशब्दोपादानम्। निकुञ्जमेव गृहं वा गृहप्रयोजनसिद्धे:। अत्र साधकबाधकप्र, माणाभावादुपमा-रूपकयोरन्यतरानिर्द्धारणात् सन्देहसङ्करोऽयमलङ्कार:। पुन: किंविधम्? निशीत्यादि। कश्चिन्मां द्रक्ष्यतीति शङ्कया निशि रात्रौ रहसि निर्ज्जने निलीय सङ्कुचितमात्मानं कृत्वा वसन्तं तिष्ठन्तं निशीत्युक्तम्, दिवामैथुनस्य निषेधत्वात्। पुन: किंविधया? चकितविलोकितसकलदिशेति। चकितं यथा स्यादेवं विलोकिता: सकला दिशो ययेति विग्रह:। यदृच्छाभ्रमणादागमिष्यतां जनानां सन्दर्शनं सम्भवतीत्युपयुक्तं चकितं सकलदिश: प्रतिक्षणम्। पुन: किंविधम्? रतिरभसेनेति। रतौ यो रभसो हर्ष:, रते: सम्भोगरूपाया: यो रभसो वेगो वा तद्वशेन तदायत्ततया हसन्तम्। ''मनोऽनुकूलेष्वर्थेषु सुखसम्वेदनं रति:। असं(यं) प्रयोगविषये सैव प्रीतिर्निगद्यते।।'' इति **भरत**:। ''वशश्चा(मा)यत्ततायां स्याद्'' इति "**विश्व**:"।।१।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।१।।अभिलाषानेवाह निभृतेत्यादिभि:। अस्यापि मालवरागैकतालीतालौ। 'द्रुतमेकं भवेद् यत्र सैकतालीति संज्ञिता' इत्येकतालीलक्षणम्। उत्कण्ठया क्षणं अपि स्थातुमशक्नुवती सखीं प्रार्थयते, हे सखि! मया सह केशिमथनं श्रीकृष्णं रमय। केशिमथनमिति प्रथमे निजभावावलम्वनभुजस्फूर्त्त्या भुजवीर्योद्वोधक, नामनिर्द्देश:। तत्र हेतुमाह, मदनेन प्रेम्णा यो मनोरथ: विविधसम्भोगाभिलाष: तेन युक्तया। एतावतापि

कथं तत्सिद्धित्यत् आह सविकारं मयि मानसभावेन सहितम्। अतएव उदारं मनोरथदातारं एवमन्योन्यानुराग: कथित:। अन्यथा रसाभासापत्ते। यथोक्तं- 'अनुरागोऽनुरक्तयां रसावह इति स्थिति:। अभावे त्वनुरागस्य रसाभासं जगुर्बुधा:' ।। इति। कीदृश्या ? मया निशि निभृतकुञ्जगृहं गतया निर्ज्जनार्थं निभृतमिति कुञ्जस्य रम्यतार्थं गृहमिति च। कीदृशम्? तदलाभान् मम वैकल्यादिदिदृक्षया रहसि निलीय वसन्तं संकुचितमात्मानं कृत्वा तिष्ठन्तम्। चकितं यथा स्यात्तथा कृष्ण: कुत्र निलीयते इति विलोकिता: सकला दिशो यया तया रतिरभसादुच्छलितरसेन मद्वैकल्यं समीक्ष्य हसन्तम्।।१ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१ ।। एवमुत्कण्ठातिरेकनिरूपणेन सखीं प्रति तं विना क्षणमात्रमपि स्थातुं न शक्नोतीति विज्ञाप्य पुन: सङ्केतवसतिगमनप्रभृतिसर्वेषामपि भावानामाशंसनीयत्वं प्रकाशयन्ती प्रार्थयते। निभृतेत्यादिना गीतेन। गुण्डकिरीरागेण गीयत इति प्रस्तुतश्रीराधावस्था, सादृश्याभिप्रायेण उक्तम्। अस्या: रूपं च

रतोत्सुका कान्तपदप्रतीक्षानिवासयन्ती मृदुपुष्पतल्पे।
इतस्तत: प्रेषितदृष्टिरार्त्ता श्यामातनुर्गुण्डकिरी प्रदिष्टा।। इति।

निभृतेति। हे सखि ! मया सह केशिमथनं रमयेत्यन्वय:। स्वरविशेष; सहकृततया हे शब्द आदरातिशयं व्यनक्ति। केशिमथनमिति निजभावोद्दीपन; भुजवीर्योद्बोधक-नामनिर्देशेन श्रीकृष्णस्य निर्दयतया कामशास्त्रोदितविविधविकटसम्भोगकुशलत्वं सूचितम्। वीरपुरुषस्य हि कामिनीकामनाविषयत्वात्। तथा च श्रुति:; 'वीरपुरुषं हि स्त्रीय: कामयन्ते' इति। अत एवोदारं कामिनीसर्वाभीष्टपरिपूरणसमर्थम्। मया कीदृश्या, मदनमनोरथ: सम्भोगाभिलाष: तेन भावितया युक्तया, कुन्तलसमीकरण-संदानितरसनाकीलकदृढीकरणव्यग्रहस्ततादिसम्भोगाभिलाषव्यंजकविविधव्यापार-शालिन्येत्यर्थ:। ननु अनुरागस्तूभयनिष्ठश्चेद्रसापत्तिरन्यथा रसाभास इति चेत् प्राह; सविकारं(५१) विकारो मानसो भावस्तेन सहितं मत्सम्भोगाभिलाससूचकविविधविलास-शालितया अन्यादृशमिव विभाव्यमानमित्यर्थ:। तत्र हृदयहारिविनोदक्रममाह निभृतेत्यादिभि:। तत्र निभृतेति, मया कीदृश्या, निभृतमेकान्तकेलियोग्यं यन्निकुञ्जगृहं तत् निशि रात्रौ गतया प्राप्तया स्वच्छन्दकेलिपर्याप्त्यर्थं निभृतशब्दस्य उपादानम् । निकुञ्ज स्यातिरमणीयत्वेन गृहशब्दोपन्यास:। तं कीदृशं, मम इतस्ततोऽन्वेषण-सम्भ्रमवैकल्यादिदिदृक्षाकौतुकाय रहसि कुञ्जैकदेशलतावृतस्थाने निलीयात्मानं

सङ्कोचीकृत्य वसन्तं तिष्ठन्तं, तदनन्तरं मया कीदृश्या, अथ मद्वाटिकागतो मे जीवितौषधिरिति शङ्कासमुदितेन चकितेन साध्वसेन समागतश्चेत् कुत्राऽस्ते इति अन्वेषणार्थं विलोकिताः सकलदिशो यया तादृश्या । ततस्तं कीदृशं, मम तादृशसम्भ्रमादिदर्शनेन रतौ सम्भोगविषये यो रभसो वेग औत्सुक्यमिति यावत्, तद्वशेन हसन्तं विस्मृतप्रथमसंविधानत्वेन हासं कुर्वन्तमित्यर्थः ।।१ ।।

## (१ ३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१ ।। निभृततिकुञ्जगृहमिति; गीतं तु मालवरागः परन्तु रसिकरङ्गदाकारः कुम्भकर्ण गुण्ड़किरि रागमिति निरूपयति। मालवगौडी एकतालेति शुक्लध्वजः सारवतीटीकायां विशिनष्टि। रसिकप्रियाकारः राणाकुम्भकर्णस्तथा रसमञ्जर्यां मालवगौडे एकतालीति कथयतः। सञ्जीवनी, पदद्योतनीका, जयन्तीटीकासु तथैव मालवगौड़ेन एकतालीताले गीयते। पूजारीपण्ड़ितस्यापि तन्मतम्। अत्र श्रीराधा सखीं प्रति श्रीकृष्णं विना क्षणमात्रं जीवितुमशक्ता इति अत्र प्रकाशयन्ती तस्य संकेतस्थलं प्रति गतमिति व्रूते। निभृतं गोपनीयं निकुञ्जं कुञ्जस्थलं गतवती। अत्र एकतालीसंज्ञा यथा,

द्रुतमेकं भवेद्यत्र सैकतालीति संज्ञिता। तत्र कुञ्जे राधा सखीं ब्रूते, केशीनामकराक्षसी-वधकर्तारमुदारं श्रीकृष्णं मम कामपीडां शामयितुं सविकारं विकारेण सह नाम अष्टसात्त्विकं विकारं शान्तये मया सह रमणस्य व्यवस्थां कुरू मनोरथं मनोवाञ्छां च पूरय। इत्येव ध्रुवपदम्। राधाकृष्णयोरनुरागः परस्परं प्रति वर्तत एव। अन्यथा तत्र रसाभासः स्यादिति पूजारी पण्डितः बालवोधिन्यां वदति। "अनुरागेऽनुरक्त्या रसावस्थ इति स्थितिः ।अभावे त्वनुरागस्य रसाभासं जगुर्वुधाः ।।"

श्रीराधाश्रीकृष्णयोः परस्परानुरागः प्रागेव सिद्धत्वाम् नात्र रसाभासप्रसङ्गोत्थापनं युज्यते। यदा गोपनीये कुञ्जमध्ये गोपनेनासीत् श्रीराधा तदानीं चकितदृष्ट्या सकलदिशमवलोक्य व्याकुलासीत् तदा श्रृङ्गाररस वेगेन हसन्तं आसीत् कृष्णः राधां प्रति व्यक्तीकरोत्यनुरागात् ।

अत्र केशीमथनं पुनः उदारमिति यथैव असुरनिधनरूपकमुच्यते तथैवात्र उदारतापि स्वीक्रियते। रसिकरङ्गदाकारस्तु वीरपुरुषं हि स्त्रियः कामयन्ते इति श्रुतिर्यथा उद्धरति तथैवात्र न युज्ज्यते। कविना वारम्बारमसुरनिधनकार्यं भगवतः कृष्णस्य विष्णोरवतारस्य वा वर्णयति। अतः नैरन्तरप्रणयशीलयोः श्रीराधाकृष्णयोः मन्ये पूर्वाग्रहता वा उपाधिनिष्ठता न योजयितुं शक्यते। कुम्भनरपतिः खलु यथार्थतः कामविकारं राधायाः रसिकसर्वस्वमाश्रित्य प्रतिपादयति नाभीमूलकुचोदरप्रकटनव्याजेन यद्योषितां साकांक्षं

मुहुरीक्षणं स्खलितता निवीनिबन्धस्य च। केशभ्रंशनसंयमौ च कामे तु मित्रादिसंदर्शनै:। सौभाग्यादिगुणप्रशस्तिकथनैस्तस्यानुराग इङ्गितम् द्योत्यते। अत: श्रीराधाया: विविक्तलता-मण्डपस्थिताया: श्रीकृष्णं इतस्ततरवलोकिताया: दृश्यं श्रीकृष्ण: गोपनेन दृष्टवा हसति।।१।।

**२-प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलम्।**
**मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम्।।सखि।।२।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।२।। प्रथमसमागमे हि कामिन्यो लज्जिता: भवन्ति। यथा
शिलष्ट: कण्ठे किमिति न मया मूढया प्राणनाथ-
स्चुम्बत्यस्मिन् वदनविनति: किं कृता किं न दृष्ट:।
नोक्त: कस्मादिति नववधूचेष्टितं चिन्तयन्ती
पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा।। इति **विश्वप्रकाश:**।
पुन: कीदृशं, पटुचाटुशतैरनुकूलं चाटुश्चातुरीति ख्यात:। उक्तं च
प्रथममिहतदेतत्पूगपुष्पादिदानै-
र्मृदुमधुरवचोभिर्योजयेत्सन्निधाने।
करतलमथ गात्रे भ्रामयेच्छश्वदस्या:
सुरतमहरपूर्वं मन्दमालिङ्गनं च।।इति।।

**श्रृङ्गारतिलके** मृदुमधुरेत्यादि, मृदुनि मधुराणि स्मितभाषितानि यस्या इति विग्रह:। कृष्णस्य चाटुना जाते श्रृङ्गारभावे राधाया: स्मितोद्गम:। यदुक्तं हासो भवति श्रृङ्गारादिति। राधाभाषणेन प्राप्तप्रणयस्य हरेर्विशेषणमाह। शिथिलीकृतजघनदुकूल(५२) मिति। शिथिलीकृतं जघनदुकूलं येनेति विग्रह ।।२।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।२।। अपि च प्रथमेति। अपभुक्तचरेऽपि हरौ प्रथमसमागम इव लज्जितया तत्कालीनाश्चेष्टा: कुर्वन्त्या वा। बहुकालान्तरितमिलितेन प्रथमसमागमता अपि। किंभूतम्? पटुचाटुशतैरनुकूलं सान्त्वनक्षमप्रियवचनशतैरनुनयपरम्। एतदुक्तं भवति, "प्रथममिह हि देयं पूगपुष्पादिकं स्यान्मृदुमधुरवचोभिर्योजयेत्संर्निधाने। करतलमथगात्रे भ्रामयन शश्वदस्यारछुरितमुदरपृष्ठे मन्दमाशिलष्य दद्यात्।।" प्रथमसमागमे कामिन्यो लज्जन्त्यो मानमावहन्ति। तथा च "श्लिष्ट: कण्ठे किमिति मया मूढया प्राणनाथश्चुम्बत्यस्मिन्वदन-

विकृतिः किं न दृष्ट। नोत्कः कस्मादिति नववधूचेष्टितं चिन्तयन्ती पश्चात्तापं वहति तरूणी प्रेम्णि जाते रसज्ञा।" इति "**भरतः**"।। अपि किंभूतया? अत एव मृदु मधुरं यथा स्यात्तथा स्मितपूर्व भाषणं यस्याः सा तया। अपि किंभूतम्? शिथिलीकृतजघनदुकूलं श्लथीकृतं जषनस्थितं पट्टवस्त्रं वा। अन्तर्भावितणिजर्थत्वात् श्लथीकरणे सङ्गमस्य हेतुत्वम्। संगमादेव श्लथमभवदिति। तदुक्तं **भरतेन**, "कान्ते तल्पमुपागते शिथिलिता नीवी स्वयं बन्धनाद्वासो विश्लथमेखलागुणधृतं किंचिन्नितम्बस्थितम्। एतावत्सखि! वेदिम् केवलमहं तस्याङ्गसङ्गे पुनः कोऽसौ कास्मि रतं च कीदृशमिति स्वल्पापि मे न स्मृतिः।।"।।२।।

## (३) जगद्धरकृत- सारदीपिका

।।२।।प्रथमेति प्रथमसमागमेन नूतनसान्निध्येन लज्जितया लज्जायुक्तया । कथंभूतं कृष्णं वैलक्षण्यदूरीकरणाय पटुचाटुशतानि कुशलानि यानि चाटुशतानि स्तवशतानि तैरनुकूलम् आनूकूल्यकारकं मृदुकोमलं मधुरं स्मितपूर्वकं भाषितं यस्याः सा तया शिथिलीकृतं जघनदुकूलं जघनस्थितं पट्टवस्त्रं येन तम् ।।२।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।२।।पुनः कीदृश्या मया? प्रथमेति। प्रथमसमागमागमलज्जितया। एवमवधार्याहमागता संप्रति कथमेतस्याग्र प्रकटयाम्यात्मानमिति लज्जाकरणम्। कीदृशं? पटु नायिकाप्रसादनदक्षं यच्चाटुशतं प्रियवचनशतं तेनानुकूलम्। पुनः कीदृश्या मया? मृदु कोमलं मधुरं माधुर्यगुणयुक्तं भाषितं यस्यास्तया। तदीयचाटूक्तिभिरपहृतलज्जया। किंचित्स्मितभाषितयेत्यर्थः। पुनः कीदृशं कृष्णम्? शिथिलीकृतं स्मितानुरागानुकूलां मां ज्ञात्वा श्लथीकृतं जघनस्थितं दुकूलं पट्टवस्त्रं येन तादृशम्। अशेषनायकमणि-श्रीकृष्णदर्शनेन दृढबन्धापि नीवी स्वयमेव स्खलिष्यति ततो मेखलालम्बितं जघनस्थितमेव वासस्तेनापहरणीयमिति जघनेत्युपात्तम्। तदुक्तं "**रतिरहस्ये**" "ओष्ठाग्रं स्फुरतीक्षणे विचलतः कूपोदरे मत्स्यवद्धम्मिल्लः कुसुमाकुलो विगलति प्राप्तोति बन्धं पुनः। प्रच्छन्नौ व्रजतः स्तनौ प्रकटतां श्रोणीतटं दृश्यते नीवी च स्खलति स्थितापि सुदृढ कामेङ्गिते योषिताम्।।" "चटु चाटु प्रिये वाक्ये" इति "कोशः"। "जघनं कटेरघोभाग" इति "**हारावलिः**"

**अत्र रसबदलंकारो विभावना वाऽइति संजीवनी।।२।।**

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२।।प्रथमेति। प्रथमसमागमेन नूतनसम्भोगेन लज्जितया लज्जाकर्मीकृतया अथवा संजातालज्जया वा प्रथमसमागमलज्जा च। हृदयसङ्गमदाढ्यार्भावकृतेत्यवगन्तव्या।

एतादृश्या मया पटूनि परहृदया- वर्जनसमर्थानि यानि चाटूनि प्रियवचनानि तेषां शतै: अनुकूलं सङ्गतं ममानुगतमिति यावत्, अत्र चाटुशतानां कृष्णकर्त्तृकत्वमेव न राधाकर्त्तृकत्वम्। प्रथमसमागमलज्जितयेत्येतद् विरोधात् मनोरञ्जनचतुरैरालापै: प्रथमसम्भोगकालीनां मदीयां लज्जातिरस्करिणीमपाकृत्य मया सङ्गतमित्यर्थ:। न केवलं तनुसङ्गतिमात्रम् अपितु तत्कृतं कार्य्यान्तरमपि सूचयति। मृद्विति। मृदु कोमल पदघटितम् अत एव मधुरं श्रुतिसुखकरं सस्मितमन्दहाससमेतं यथा तथा भाषितुं वक्तुं शीलमस्येति भाषितस्य भाव: भाषिता तया चातुरी धुरिणत्वेनेत्यर्थ:।

इदं राधाविशेषणं वा अस्मिन् पक्षे भाषितमिति। भावे निष्ठा बहुव्रीहिसमास:। णिनिपक्षे त्वतलोर्गुणवचनस्येति पुंवद्भाव:। कृष्णपक्षे अनेन हेतुना शिथिलीकृतं सम्भोगार्थमपाकृतं जघनदुकूलं लज्जासंरक्षकत्वेनश्रोणीभागे दृढघटितं दुकूलं मृदुमधुरालापैर्मच्चित्तद्रवीकरणपूर्वकमपाकृत्य मां युक्तवन्तमित्यर्थ:। एतादृशं केशिमथनं रमयेत्यन्वय:। अनेन धृष्टनायकत्वं सूचितम् ।।२ ।।

### (६) शुक्लध्वजनृपतिकृत- सारवती

।।२ ।। तत: किम्भूतया मया तत्राह, प्रथमसमागमलज्जितया ईर्ष्यया अन्यत्र गमनान्तरं मद्वाक्येनैव य: प्रथम: समागम: तेन लज्जितया। न तु प्रथम एव समागम:, तत्पूर्वमपि निष्पन्नत्वादिति। केशिमथनं पुन: किम्भूतम्? पटुचाटुशतैरनुकूलं चाटूनां शतं चाटुशतम्, पटु प्रव्यं चाटुशतञ्चेति पटुचाटुशतम्, तैरनुकललं क्रीडाविरोधिलज्जापहारकमित्यर्थ:। तदुक्तम्, 'प्रथममिह हि देयं पूगपुष्पादिभूयो मृदुमधुरवचोभिर्योजयेत्सन्निधाने। करतलमथ गात्रे भ्रामयेत् शश्वदस्या:। सुचिरमुदिभूयो मधुरस्मितभाषिते, मृदुनी सूक्ष्मे मधुरस्मित-भाषिते यस्या एवम्भूतया। तथा च तदीयचाटुशतशिथिललज्जाहमपि वदिष्यामीति वाक्यार्थ:। केशिमथनं पुन: किम्भूतम्? शिथिलीकृतं करेण स्वसम्बद्धराधाजघनदुकूलं* जघनस्थितपट्टवस्त्रं येन। तदुक्तम्, 'कान्ते तल्पमुपागते विगलिता नीवी स्वयम्बन्धनात्। वासश्च श्लथमेखलागुणघृतं किञ्चिन्नितम्बस्थितम्[X]।। एतावत्सखि वेद्मि केवल-महन्तस्याङ्गसङ्गे पुन:। कोऽसौ काऽस्मि रतञ्च कीदृशमिति स्वल्पापि मे न स्मृति:।।२ ।।

*'मालापञ्च:' इति पाठ।

+'चलत्कारम्' इति पाठ।

X'प्राप्तव्यरतिजनितप्रमोदायततया' इति पाठ।

### (७) वनमालि भट्टकृत- सञ्जीवनी

।।२ ।। पुन: कीदृश्या? 'प्रथमसमागमलज्जितया' प्रथमसङ्गेन जातलज्जया। एतेनानयोर्माधुर्यातिशय: प्रत्यङ्गं नूतनत्वञ्च नायिका लज्जादिगुणोऽपि सूचित:।

एनमुद्दिश्यागता कथमस्याग्रे यास्यामीति लज्जा। क्षणे क्षणे [10] पल्लवतामुपैति तदेव रूपं रमणीयताया इति भाव:। कीदृशम्? पटु[12]नायिकानुग्रहरूपाणि[13] यानि चाटुशतानि मधुरप्रियवचनशतानि तैरनुकूलमनुग्रहकारकमनुनयपरं वा। [1]नेयं चतुरेति विज्ञान[2]चतुरानुनय: कर्तव्य इति भाव:। पुन: कीदृश्या? मृदु कोमलं मधुरं कर्णामृतं स्मितमीषद्धास्ययुक्तं भाषितं यस्या तया। कीदृशम्? स्मितवचनादिना शैथिल्यमापादितं जघनस्थितं दुकूलं पट्टवस्त्रं येन। एतेन नायकचूडामणिश्रीकृष्णदर्शनादेव दृढबद्धा नीवी स्वयमेव स्खलिता तदवलम्बितं वासस्तेनापि गृहीतमिति सूचितम्। उक्तं **भरतेन** (**अमरुशतके**)-कान्ते तल्पमुपागते शिथिलिता नीवी स्वयं बन्धनात् इति।
उक्तं च "**रतिरहस्ये**"

> ''ओष्ठाग्रं स्फुरतीक्षणे विचलत: कूपोदरे मत्स्यव-
> द्धम्मिल्ल: कुसुमाकुलो[5]विगलति प्राप्नोति बन्धं पुन:।
> प्रच्छन्नौ व्रजत: स्तनौ प्रकटतां श्रोणीतटं दृश्यते
> नीवी च स्खलति स्थिताऽपि सुदृढं कामेङ्गिते योषिताम्।।"

इति। जघनं [6]कटेरधोभाग: इति "**हारावलि:**"। चाटुभरं प्रियोक्ति: स्यात् इति "**रत्नमाला**।" रसवदलङ्कारो विभावना वा।।२।।

१-४.नास्ति-ड.५.नास्ति-क.६.कृष्णस्येति बोद्धव्यम्-क.७.रतिरभसवशेन इति-च पाठ:। ८.नास्ति-अ.ब.इ.ग.ह.९.प्रथमसङ्गवज्जातलज्जया-इ.ज.प्रथमसमागमजातलज्जया-ग.नास्ति-फ. १०.यन्नवतामुपैति-ज.११.**माघ**:-इ.फ.ग.ह.ज.१२.नायिकाग्रहरूपाणि-इ.फ.ग.ह.ज.१३.नास्ति-अ.ब.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२।। प्रथमसमागमेति। प्रथमसमागमेन नूतनसान्निध्येन लज्जितया लज्जायुक्तया। कीदृशम्? वैलक्षण्यदूरीकरणाय पटूनि कुशलानि चटुशतानि तैरनुकूलं आनुकूल्यकारकम्। मृदु कोमलं मधुरं स्मितपूर्वकं भाषितं यस्या[9]स्तया। [10]शिथिलीकृतजघनदुकूलं श्लथीकृतं जघनदुकूलं जघनस्थितपट्टवस्त्रं येन।।२।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२।।प्रथमसमागमेति। प्रथमसमागमेन लज्जितया लज्जापराधीनत्वात्। अत एव पटूनि समथार्नि चाटूनि प्रियवचनानि तेषां शतै: अनुकूलं लज्जया रतिपरराङ्मुखी तत्कालोचितप्रियभाषणै: अभिमुखीकुर्वन्तमित्यर्थं। अत एव मृदूनि पेशलानि मधुराणि श्राव्याणि स्मितसहितभाषणानि यया तया। शिथिलीकृतं जघनदूकूलं येन तम्। तद्वन्मनोद्दीपितमदनया महैव विवस्त्रीकृतमित्यर्थ:।।२।।

१.वनेयं चरतीति-अ.ब.२.त्वयानुनय:-ज.३.स्मितमीषद्धारस्यं तद्युक्तं-ज.४.भारते-ग.भरते-इ.फ.ह.ज.५.विगलित:-अ.ब.इ.फ.ग.ह.ज.६.कट्यधोभाग:-ज.७.कथम्भूतं कृष्णम्-क.ल.म.८.अनुकूल-ड.९.तस्या:-ड.सा तया-क.ल.म.१०.शिथिलीकृतं जघनबन्धनं-ड.शिथिलीकृतं जघनबन्धनं शिथिलीकृतजघनदुकूलं कटिस्थपट्टवस्त्रं यया-क.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२।। पुन: किंविधया ? प्रथमेति। प्रथमे समागमे लज्जितया सञ्जातलज्जया, प्रथमसमागते हि कामिन्यो लज्जिता भवन्ति स्वभावत:। तथा च, ''श्लिष्ट: कण्ठे किमिति न(च) मया मूढया प्राणनाथश्चुम्बत्यस्मिन् वदनविनतिम्।'' इति। किंकृता किंदृष्ट: ? नोक्त: कस्मादिति नववधूचेष्टितं चिन्तयन्ती, ''पश्चात्तापं वहति तरुणी प्रेम्णि जाते रसज्ञा'' इत्यमरुक:। हरिं पुन: किंविधम् ? पट्विति। पटूनि चातुर्ययुक्तानि अर्थात् अर्थक्रियासमर्थानि यानि चाटुशतानि प्रियोक्तिशतानि तैरनुकूलतामात्मन: कथयन्तम्। ''पटुर्दक्षे च नीरोगे चतुरेऽप्यभिधेयवत्'' इति **"मेदिनी"**। असतामपि गुणानां सद्रूपतया वर्णनं चाटु:। ''चटुश्चाटुश्च चिपिटे भूषणादिगुणवर्णने'' इति **मेदिनी**। शतशब्दोऽत्र सङ्ख्यावचनम्। अनुकूलनायकस्य लक्षणमाह। तथा च **"रुद्रट:"** - ''योऽनुरक्ततया मौनी योऽनासक्तपराङ्मन:। सीतायां रामवत् सोऽयमनुकूल: स्मृतो यथा।।'' इति। एतेनैतदुक्तं भवति, लज्जया प्रतिकुलनामपि मां मृदुवचनशतैराश्वास्य समीपं नेष्यतीति। तथा च "शृङ्गारप्रकाशे", ''प्रथममिह तदेतत् पूगपुष्पादिदानैर्मृदु-मधुरवचोभिर्योजयेत् सन्निधाने। करतलमथ गात्रे भ्रामयेतत्शाश्वदस्या:, सुरतसमर पूर्वं मन्दमालिङ्गनं च।।'' इति। पुन: किंविधया ? **मृदुमधुरेत्यादि**। स्मितयुक्तानि भाषितानि स्मितभाषितानि, मृदूनि कोमलानि मधुराणि प्रीतिजनकानि सस्मितवचनानि यस्या इति विग्रह:। ''भाषितं वचनं वच:'' **इत्यमर:**। कृष्णचाटुना जाते शृङ्गारभावे राधाया: स्मितोद्गम:। यदुक्तम्, ''हासो भवति शृङ्गाराद्'' इति। राधाभाषणेन प्राप्तप्रणयस्य हरेर्विशेषणमाह। किंविधम् ? शिथिलीकृतमिति। श्लथीकृतं जघनस्य दुकूलं क्षौमवस्त्रं येनेतिविग्रह:। प्रथमसमागमे लज्जावकाश एव पुरुषो वस्त्रान्ताकर्षणादौप्रवर्तित इति कामशास्त्रीया रीति:।।२।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२।। प्रथममिलनेन लज्जितया नित्यं नवनवानुभवात्तथोक्तं मम प्रसादनसमर्थानां विनयोक्तीनां शतैर्मामनुनयन्तं मृदुमधुरस्मितेन युक्तं भाषितं यस्यास्तया स्वचाटुभिरप-गतसलज्जवामतां मां स्मितादिभिज्ञात्वा शिथिलीकृतं जघनस्थ दुकूलं येन तम्। चाटुर्नारीप्रियोक्ति: स्यादिति **हारावली**।।२।।

## (११) लक्ष्मणकृत-रसिकरङ्गदा

।।२।। एवं क्रमेणोत्तरत्रापि प्रथमसमागमस्तेन लज्जितया कोपकालीनभ्रूकुटिलीकरण-कटाक्षनिरीक्षणचेलाञ्चलग्रहणनिरसनपरुष भाषणादिस्वचेष्टितस्मरणसञ्जातापत्रतया इत्यर्थः। ततो लज्जावनतमुखीं मां मानिनीं विभाव्य पटूनां चाटूनां शतैरनुकूलयन्तं, तत् करोतीतिण्यतादनुकूलशब्दात् 'क' प्रत्ययः। भाविनि! किमकाण्डे मयि विधेयजने कोपेनानुतप्यसे। उचितमेवात्रप्रणयस्खलनेऽपि क्षणं प्राणेश्वरी इत्यादि प्रसादसमर्थवि, नयोक्तिभिः मामनुकूलां कुर्वन्तमित्यर्थः। तदनन्तरं मृदु मन्दं मन्दं मधुरं भावानुबन्धिस्मितं यत्र तादृशं भाषितं वचनं यस्यास्तया। महामोहनोऽसि, यन्निर्वापयति मे कोपानलं त्वद्वचनामृतमाधुरीवृष्टिरिति साकूतमन्दहसितकोमलभारतीभङ्गीतरङ्गितसम्भोगस्पृहया इति भावः। अनन्तरं विगलितलज्जावामतया मम शिथिलीकृतं सम्भोगार्थमपावृतं जघनस्थदुकुलं वस्त्रं येन तम्। 'चाटुनापि प्रियोक्तिः स्यादिति **रत्नमाला**'।।२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। प्रथम समागम लज्जितयेति; श्रीराधा स्वस्याः श्रीकृष्णप्रीतिं सदैव सखीसमक्षं व्रवीति। यद्यपि अन्यसङ्गजन्यं इर्ष्याभावं जनयति तथापि नैव कृष्णं प्रति रूष्टा। अतः तस्याः स्मरणे कृष्णस्य प्रथम समागमः कथमासीदिति विवृणोति सा।

प्रथमे मम लज्जामवगम्य श्रीकृष्णः चाटुवचनधुरन्धरः चतुर -चटुल—वाक्यवागुरया मम चैतांसि रञ्जयित्वा मामनुकुलं कृता आसीत्। अहमपि तेन त्यक्तलज्जवार्तालापेन निमज्जितः आसम्। तदानीं स शनैः शनैः मम जघनात् वस्त्रमनावृतमकरोत्। यथा आनन्दवर्द्धनेनोक्तम् उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्। यथा समस्तं तिमिरांशुकं तथा पुरोऽपि रागाद्गलितं न लक्षितम्।। **(प्रथम उद्योतः ध्वन्यालोकः** उदा० १ ३ का०)। प्रसङ्गेऽस्मिन् **कुम्भनरपतिः** प्रथमसमागमस्य समये नायकः कथं पुगादिकं ताम्बुलं वा दद्यात् इति उद्धरति। तथा च शृङ्गारप्रकाशे, प्रथममिह तदेतत् पूगपुष्पदिदानैर्मृदुमधुरवचोभिर्योजयेत् सन्निधाने। करतलमथ गात्रे भ्रामयेतत्शाश्वदस्याः, सूरतसमरपूर्वं मन्दमालिङ्गनं।।" अपि च **भरतमतानुसारं** क्लिष्टकण्ठेति आलिङ्गनचुम्बनादिकं कथं करणीयमिति विवृणोति। उक्तं च "रतिरहस्ये"

"ओष्ठाग्रं स्फुरतीक्षणे विचलतः कूपोदरे मत्स्यव-<br>
द्धम्मिल्लः कुसुमाकुलो^विगलति प्राप्नोति बन्धं पुनः।<br>
प्रच्छन्नौ व्रजतः स्तनौ प्रकटतां श्रोणीतटं दृश्यते<br>
नीवी च स्खलति स्थिताऽपि सुदृढं कामेङ्गिते योषिताम्।।"

पुनः नायिकया किं करणीयमिति **भरतमतम्,** "कान्ते तल्पमुपागते शिथिलिता नीवीस्वयं .. इत्यादि स्मरति। **रसमञ्जर्यामपि** रतिरहस्यं स्मरति , ओष्ठाग्रं स्फुरतीक्षणे विचलतः

कूपोदरे मत्स्यवद्धम्मिल्ल:। जघनं कटेरधोभाग: इति **हारावली**। एतत् सर्वमपि राज्ञा **शुक्लध्वजे**नापि इङ्गितम्। **सञ्जीवनी** टीकाकारोऽपि तद् विवृणोति। स्मृतौ शृङ्गाररसस्यानुभव: स्वल्पमपि व्याकुलतां शामयतीति वक्तुं शक्यते।।२ ।।

**३-किसलयशयननिवेशितया चिरमुरसि ममैव शयानम्।**

**कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानम्।। सखि० ।।३ ।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।३ ।। किशलयेति। अश्लेषं प्रथमं कुर्य्याद्द्वितीयं चुम्बनं तथा।

तृतीयं नखदानं च दंष्ट्राघातं चतुर्थकम्।।

पञ्चमं क्षोभणं प्रोक्तं षष्ठं प्रहरणं तथा।

सप्तमं कण्ठशब्दं च बन्धनं चाष्टमं रतम् ।।इति।। **नागरसर्वस्वे** प्रोक्तम्। तदत्र किशलयशयने निवेशितयेत्यनेन दुग्धजलाभिधानमालिङ्गनं प्रकटितम्।

यदुक्तम्, अङ्गे तथा प्रणयिनो मृगशावकाक्षी

गात्रे क्रमेण विशतीव नितान्तरागात्।

गाढोपगूहनवशेन निरन्तरं यत्

संश्लेषमाहुरिह दुग्धजलामिधानम् ।।इति।।

निवेशितयेति गायितयेति भाव:। जघनवस्त्रशिथिलीकरणस्य किशलयशयन-निवेशितस्य च कृष्णकर्त्तृकत्वाद्राधाया: सौभाग्यातिरेक:। पुन: कीदृशं, चिरमुरसि ममैव शयानमित्येतेन तिलतण्डूलाख्यमालिङ्गनमुक्तम्। यदुक्तं,

तल्पे रतिं तदूपगूहनकेलिमुच्चै:

र्यां निस्तरङ्गमिथुनं घटयाच्च रागात्।

रागातिरिक्त परिवर्द्धितगौरवेण

तत्कीर्त्तितं मुनिजनैस्तिलतण्डुलाढ्यम्।।इति।।

कृतपरिरम्भणेत्यादि, कृते परिरम्भणे चुम्बने ययेति विग्रह:। आलिङ्गनमत्र जघनोपगूहाख्याम्। यदुक्तम्

आक्रम्य यत्र जघनं जघनस्थलेन

संलंघये प्रियतमोयतमानताङ्गीम्।

व्यक्तिर्भवन्नखपदास्खलितोत्तरीया

प्राज्ञैस्तदेवकथितं जघनोपगूढम् ।।इति।।

चुम्बनमित्युक्तं **नागरसर्वस्वे**। नेत्रे कपोलफलके वदने ललाटे
नाभिस्तलेऽधरपुटे स्तनयोश्च गुह्ये।
कक्षोरु वक्षसि हृदि प्रवदन्ति चुम्बं
दन्तक्षतं च वदनान्तरनेत्रवर्जम् ।। इति।।

पुनः कीदृशं परिरभ्य कृताधरपानम् अन्योऽन्य रागातिशयाम् पृथङ्निर्द्दिष्टेम् ।।३ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३ ।।अपि च, किसलयेति। किसलयरचिते शयने निवेशितया। "सङ्केततल्पेऽभिमुखोपविष्टां गाढं पतिः श्लिष्यति, सापि कान्तम्। अन्योन्यगात्रे विशतीव रागा द्वन्द्वं तदाकृष्टजलाभिधानम्।।" अपि च, ममैवोरसि चिरं शयानम्। एतच्चालिङ्गनभेदापेक्षयोक्तम्। तथा च **कोकोक्तम्**, "असकृदतनुगाढाश्लेषलीलां वितन्वञ्जनितजघनबाहुव्यत्ययं स्पर्धते तम्। मिथुनमथ मिथोऽङ्गे लीयते निस्तरङ्गं निगदति तिलपूर्वं तण्डुलं **तन्मुनीन्द्रः**"।। अपि च, कृते परिरम्भणचुम्बने यया सा। एतदप्यालिङ्गनभेदापेक्षयोक्तम्।। "जघनकलितकान्तश्रीणिरथ्योपरिष्टाद्व्रजति यदिह नारी स्रस्तकेशोत्तरीया। करजरदनकृत्यं चुम्बनं वा विधित्सुः कलयति जघनोपश्लेषणं **तन्मुनीन्द्रः**।।" अपि च, आश्लिष्य कृतमधरपानं येन। अत्रायं भावः, "अधरदशनजिह्वापानमालिङ्ग्य कुर्यान्नयनवदनपादेश्चेति जिहवाप्रवारम्। ग्रहणमथ विदध्याद्वस्त्रकेशस्तनोरः कुचयुगभगदेशे मर्दनं चोरूयुग्मे" इति।।३ ।।

## (३) जगद्धरकृत- सारदीपिका

।।३ ।। किसलयेति किसलयशयने पल्लवकृतशय्यायां निवेशितया कथंभूतं कृष्णं ममैवोरसि वक्षस्थले चिरं शयानं कृतालिङ्गनमित्यर्थः। कथंभूतया मया कृतं परिरम्भणपूर्वकम् आलिङ्गनपूर्वकं चुम्बनं यथा सा तथा। कथंभूतं कृष्णं परिरभ्य आलिनं कृतम्, अधरपानम् ओष्ठपानं येन सः तम्।।३ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।३ ।।पुनः कीदृश्या मया ? किसलयशयनेति। किसलयशयने नवपल्लवशय्यायां निवेशितया। कीदृशं तम्? चिरं बहुकालं व्याप्य ममैवोरसि शयानं सुप्तम्। एतेनालिङ्गनविशेषं कीदृशं तम्? चिरं बहुकालं व्याप्य ममैवोरसि शयानं सुप्तम्। एतेनालिङ्गनविशेषं क्षीरनीराख्यमुत्कम्। तल्लक्षणं च **पञ्चसायके**, "गात्रोपरिष्टादथ तस्य मध्ये संलीयते यन्मिथुनं शरीरम्। कामाभिमानाक्षतपूर्णचेष्टं तत्क्षीरनीराख्यमिदं प्रादिष्टम्।। इति। कीदृश्या मया? कृते परिरम्भणचुम्बने यया तादृश्या। एतच्च

जघनोपश्लेषरूपलिङ्गनाभिप्रायेण। तदुत्कम्, "जघनकलितकान्तश्रेणिरङ्गीपरिष्टदजति यदिह नारि स्त्रस्तकेशोत्तरीया। करजरदनकृत्यं चुम्बनं वा विधित्सु: कलयति जघनोपश्लेषमेनं **मुनीन्द्र**:।।" इति। चुम्बनमपि प्रकृते समौष्ठाख्यं बोध्यम्। तदुक्तं पञ्चसायके, "ओष्ठेन कान्तस्य मुखौष्ठयुग्मं निपीड्य जिह्वाञ्चिततालुभागम्। चुम्बोत्सवं नृत्यति यत्र नारी प्रोक्तं समौष्ठं कविभि: पुराण:।। इति। कीदृशं कृष्णम्? परिरभ्यालिङ्ग्य कृतं मदीयाधरपानं येन तादृशम्। अनेन लालाटिकमुक्तम्। उक्तं च, "अन्योन्यसंसक्तमुखं कपोलं नेत्रं ललाटं हृदयं च बाहुम्। सानन्दभावं श्रममिलिताक्षं लालाटिकं तत्त्वविदो वदन्ति।। इति।"पल्लवोऽस्त्री किसलयं **इत्यमर**:।।३ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।३ ।। किशलयेति। हे सखी! किशलयशयनं कृष्णरतिपल्लवतल्पं तत्र निवेशितया कृष्णनैव सादरं स्थापितया अनेन राधायां कृष्णस्यात्यन्तानुराग: सूचित:। कृते कृष्णेनैवाचरिते परिरम्भणे चुम्बने आलिङ्गनाधरस्वादने यस्यास्तथाविधया कर्त्र्या परिरभ्यामुभयोरनुरागसाम्यं सूचितम्। किंच ममैवोरसिपयोधरोपरिन्यासमित्यर्थ:। चिरं बहुकालं शयनं निद्राणम् अनेन मय्येवातिप्रीति: पूर्वपरिचयवासनापि वर्त्तते इति सूचयित्वा तादृशं केशिमथनं मया रमयेत्यन्वय:।।३ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३ ।।पुन: किम्भूतया तत्राह, किसलयशयननिवेशितया पल्लवशय्यायामुपवेशितया, अर्थात्तेन। तदाह "**भरत**:", 'अङ्केऽथ तल्पेऽथ सुखोपविष्टां गाढं पति: श्लिष्यति सा च कान्तम्। अन्योन्यगात्रे विशतीव रागात् द्वन्द्वं तदा क्षीरजलाभिधानम्।।' पुन: किम्भूतम्? ममैवोरसि वक्ष:स्थले चिरं चिरकालम्व्याप्य शयानं सुप्तम् नेयं सुरतावस्था किन्त्वालिङ्गनविशेष एवेति ध्येयम्। तदाह, 'असकृदतनुगाढाश्लेषलीलाम्वितन्वन्। जनितजघनबाहुव्यत्यय: स्पर्धते ताम्।। मिथुनमथ मिथोऽङ्गे नीयते निस्तरङ्गम्। निगदति तिलपूर्वं तण्डुलं तं **मुनीन्द्र**:।।' मया पुन: किम्भूतया? चिरं हृदि तदीयावस्थानेनाधीरतया कृते परिरम्भणचुम्बने यया एवम्भूतया। इदमप्यालिङ्गनविशेषापेक्षया पूर्वं कृष्णकर्त्तृकमिदानीं राधाकर्त्तृकमिति भेद:। तदुक्तं **भारते**, 'जघनकलितकान्त: श्रोणिरप्युपरिष्टात् व्रजति यदिह नारी स्त्रस्तकेशोत्तरीया।। करजवदनकृत्यं चुम्बनञ्चाविधित्सु:। कलयति जघनोपश्लेषमेनं **मुनीन्द्र**:।।' कृष्णं पुन: किम्भूतम्? परिरभ्यालिङ्ग्य कृतमधरपानं येन तम्। तदुक्तम्, "अधरदशनजिह्वापानमारभ्य कुर्यात्।

नयनवदन गृह्णैश्चेति जिह्वाप्रचारम्।। ग्रहणमथ विदध्याद्वस्त्रकेशस्तनादेः। कुचयुग-भगदेशे मर्दनञ्चोरुयुग्मे''।।३।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३।। पुनः कीदृश्या? किसलयशयने नवपल्लवरचिततल्पे सख्या श्रीकृष्णेन वा निवेशितया। कीदृशम्? चिरं ममैवोरसि शयानं सुप्तम्। शयानमितिबहुकालालिङ्गना-पेक्षोक्ता [1]। पुनः कीदृश्या? कृते परिरम्भचुम्बने यया। [2]एतेन जघनोप[3]श्लेषणं ओष्ठचुम्बनञ्च श्रीकृष्णस्य तया कृतमिति भावः। तद्यथा **पञ्चसायके-**

''जघनकलितकान्तश्रोणिरङ्गोपरिष्टात् व्रजति यदिह नारी स्त्रस्तकेशोत्तरीया''।।इति।।

चुम्बनमप्युक्तम् (**पञ्चसायके**)-

''ओष्ठेन कान्तस्य मुखौष्ठयुग्मं
[4]निपीड्य जिह्वाञ्चिततालुभागम् इति''।

[5]कीदृशम्? परिरभ्य आलिङ्ग्य कृतं मदीयाधरपानं [6] येन। एतेन लालाटिकमालिङ्गना-दिकमप्युक्तम्। यथा-

''अन्योन्यसंसक्तमुखं कपोलं
[7]नेत्रं ललाटं हृदयं च बाहू।
सानन्दभावं श्रममीलिताक्षं
लालाटिकं तत्त्वविदो वदन्ति''।।इति।।

[8]कृतेत्यादिना सुरतप्रेमादिदाने नाथायत्तं ज्ञेयम्।।३।।

१.इति भावः इत्यधिकम्-इ.फ.ग.ह.ज. २.नास्ति-अ.ब. ३.श्लेषेण-अ.ब. ४.निनीय जिह्वा वितितास्तु भागमिति-इ.फ.ग.ह.ज. ५पुनः कीदृशम्-ग.ह.ज. ६.येन तम्-ग. ७.नेत्रे-फ. ८.कृताधर-पानमिति-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३।। किसलयेति। किसलयशयने पल्लवकृतशय्यायां निवेशितया[1] उपवेशितया। ममैवोरसि वक्षःस्थले चिरं शयानम्। कृतालिङ्गनमित्यर्थः। कृतं परिरम्भणपूर्वक-मालिङ्गनपूर्वकं चुम्बनं ययासा। परिरम्यालिङ्ग्य कृतमधरपानमोष्ठपानं येन।।३।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३।। किसलयेति। किसलयशयने पल्लवशय्यायां निवेशितया मृदुतया तेन पातितया। चिरं बहुकालं ममैव उरसि मां पातयित्वा स्वयमुपरि आलिङ्गितमित्यर्थः। कृतं परिरम्भणं आलिङ्गनं चुम्बनं यया। अत एव परिरभ्य आलिङ्ग्य कृत अधरपानं अधरोष्ठचुम्बनं येन तम्। आदौ नायिकारब्धसम्भोग-शालिनमित्यर्थः।।३।।

## (९) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।३ ।। पुन: किंविधया ? किसलयेत्यादि। किसलयशयने नवपल्लवशय्यायां निवेशितया शायितयेत्यर्थ:। जघनवस्त्रशिथिलीकरणस्य किसलयशयननिवेशनस्य च कृष्णकर्तृकत्वाद्राधाया: सौभाग्यातिरेक: सूचित:। पुन: किंविधम् ? चिरमुरसि ममैव शयानमिति । चिरं बहुक्षणं ममैव उरसि शयानं, स यदा मां पल्लवशय्यायां स्वापयिष्यति तदा तमप्यहं निजवक्षसि स्वापयिष्यामीति भाव:। चिरमित्यनेन विरहिणां सम्भोगस्वभावकथनम्। उरसि ममैवेत्यनेन निर्ल्लजत्वं धाष्टर्यहेतु: सूच्यते। तथा च "**शृङ्गारसर्वस्वे**" ''यदा कन्दर्पसम्विग्नां सम्विशेयेति कामुक:। तदा प्रगल्भते सुज्ञा निर्ल्लज्जा सापि कामिनी।। स्वाङ्गैरङ्गानि कान्तस्य संयोज्य प्रेमशालिनी। दुग्धोदकवदेकत्वं भजते चाथ चुम्बति।।'' इत्यनेन शयनसमनन्तरमेव धृष्टनायिकाया: प्रथममनुष्ठेयमालिङ्गनं चुम्बनं चावशिष्यते। तदेव सम्प्राप्तमुभयमेवाह; कृतपरिरम्भण-चुम्बनयेति। कृतमनुष्ठितं परिरम्भणं चुम्बनं च ययेति विग्रह:। तथा च, "**रतिरहस्ये**" क्रम उक्त: ''आश्लेषं प्रथमं कुर्याद् द्वितीयं चुम्बनं तथा। तृतीयं नखदानं च दंष्ट्राघातं चतुर्थकम्।। पञ्चमं क्षोभणं प्रोक्तं षष्ठं प्रहरणं तथा। सप्तमं कण्ठशब्दं च बन्धनं चाष्टमं रतम्।।'' इति। तत्रालिङ्गनचुम्बने धृष्टत्वात् प्रथमप्रवृत्तिं नायिकाया अभिधाय पश्चान्नायकस्याह - परिरभ्य कृताधरपानमिति । परिरभ्य आश्लिष्य कृतमधरपानं येनेति। अत्र किसलयशयनेत्यादिना दुग्धजलाभिधानमालिङ्गनं प्रतिपादितम्। तल्लक्षणं यथा, ''अङ्केऽथ तल्पेऽथ सुको(खो)पविष्टाम्, गाढं पति: श्लिष्यति सापि कान्तम्। अन्योऽन्यगात्रे विशतीव रागाद्, द्वन्द्वं तदा दुग्धजलाभिधानम्।।'' इति।।३ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३ ।। पल्लवशय्यायां शायितया चिरकालं व्याप्य ममैवोरसि शयानं ततश्च कृते परिरम्भणचुम्बने यया तया परिरभ्य कृतमधरपानं येन तम्।।३ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।३ ।। किशलयेति। अनन्तरं किशलयशयने नवपल्लवरचिततल्पे निवेशितया तेनैव सादरं शायितयां इत्यर्थ:। अनन्तरं ममैवोरसि स्तनोपरि चिरं शयानम् आनन्दपारवश्येन कियत् कालं निद्राणमिव स्थितमित्यर्थ:। अनन्तरं कृते परिरम्भणचुम्बने यया तादृश्या। इदं जघनोपश्लेषाख्यमालिङ्गनम्। अनन्तरं परिरभ्य आलिंग्य कृतं मदधरपानं येन तम्। अनेनोभयो: समानकेलिकुशलता सूचिता।।३ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।। किशलय शयनेति; सम्भोगस्य भावना श्रीराधाया: पुन:पौनिकतया अग्रे सरति। पूर्व पदस्यानु अर्थात् जघनात् वस्त्रापसारणानन्तरं मानं कोमलपत्रशय्यायां शायितया ममैवोरसि दीर्घकालं शायित: मामालिङ्गच गाढचुम्बनेनाधरसुधामधुं वा आस्वादयामास। इदं खलु जघनोपश्लेषाख्यमालिङ्गनम्। सञ्जीवन्यां पञ्चसायकमुद्धृतमस्ति, जघनोपश्लेषणं चुम्बन ञ्च यथा **पञ्चसायके**; चतुर्थोऽध्याये

जघनकलितकान्तश्रोणिरङ्गोपरिष्टाद् व्रजति यदिह नारी स्त्रस्तकेशोत्तरीया।।

ओष्ठेन कान्तस्य मुखौष्ठयुग्मं निपीड्य जिह्वाञ्चिततालुभागम्।। इति ललाटिकमालिङ्गनं यथा **पञ्चसायके**;

ललाटिकमालिङ्गनम् यथा, अन्योन्य संसक्तमुखं कपोलं, नेत्रं ललाटं हृदयं च बाहुम्। ४/४५

सानन्दभावं श्रममीलिताक्षं ललाटिकं तत्त्वविदो वदन्ति।। इति।।३।।

**४-अलसनिमीलितलोचनया पुलकावलिललितकपोलम्।**

**श्रमजलसकलकलेवरया वरमदनमदादतिलोलम्।। सखि०।।४।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४।। अलसेन निमीलिते लोचने ययेति विग्रह:। एतेनाङ्गिक: कामविकार: सूचित:। पुलकावलिललितकपोलम् अनेकसात्त्विककामविकार:। श्रमजलेत्यादि। श्रमजले घर्माम्बुनि क्लिन्नं सकलकलेवरं यस्या इति विग्रह:। गत्यादित्वात्परनिपात:। एतेनापि सात्त्विक:। निवृत्तेत्वङ्गसत्त्वाभ्यां द्वेत्रिष्वाङ्गिकसात्त्विके" **इत्यमर:**।। श्रृङ्गारतिलके-ऽप्युक्तम् स्मरणे सङ्गमे चैव प्रियस्यालोचने तथा।

हेतुत्रयं समासाद्य सात्त्विक: सम्प्रवर्त्तते।।
स्तम्भ:स्वेदोऽथरोमाञ्च:स्वरभङ्गोऽथवेपथु:।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका: स्मृता:।।

पुन: कीदृशं वरमदनमदार्दातिलोल, वरश्चासौ मदनमदश्चेति कर्मधारय:। "मदोरेतसि कस्तूर्य्यां गर्वे हर्षेभदानयो:" इति **विश्व:**। तस्माद्धेतोरतिशयेन लोलम्। कामकृताद गुरुहर्षादिति सतृष्णमित्यर्थ:।।४।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। अपि च, अलसेति। अलसे च ते निमीलिते च तादृशे लोचने यस्या: सा। एतेनालिङ्ग (ङ्गि) ककाम कामविकार: सूचित:। तथा च नायिसिकालक्षणे, "यत्र मूर्धानमारम्भ पादपर्यन्तत: क्रिया:। अङ्गेन विहिता यस्मात्तस्मादाङ्गिकमुच्यते"।। अपि च, पुलकावल्या रोमाञ्चपङ्क्त्या सुन्दरकपिलम्। अनेन सात्त्विकविकाराविर्भाव: सूचित:। यदुक्तं "**भरतेन**" "स्मरणे संगमे चैव प्रियस्यालोकने तथा। हेतुत्रयं समासाद्य सात्त्विक: संप्रवर्तते।। स्वेद: कम्पोऽथ रोमाञ्च: स्वरभङ्गोऽथ वेपथु:। वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विका मता:"।। अपि च श्रमजलेन गमनायासजनितेन स्वेदेन सकलं सशोभं शरीरं यस्या: सा। "श्रमजलसिक्तम्" इति वा पाठ:। श्रमजलशकलानि स्वेदविन्दव: कलेवरे यस्या इति वा। "सकल" शब्द: संपर्यायो वा। अपि च, उत्तमकाममदादतिलोलम् अतिसतृष्णम्।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। अलसेति अलसेन सुरतसौख्येन निमीलिते मुद्रिते नेत्रे यस्या: सा तया पुलकावल्या रोमाञ्चत्त्या ललितौ मनोहरौ कपोलौ यस्य तम्। श्रमजलेन सुरतजनितेन वारिणासिक्तं कलेवरं शरीरं यस्यास्तया वरमदनमदात् उत्तमकामजनितहर्षात् अतिलोलम् अतिचञ्चलं सतृष्णमित्यर्थ:।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।४।। पुन: कीदृश्या ?। अलसेति। अलसे अलसे आलस्ययुत्के अत एव निमीलिते लोचने यया अत्र निमीलितमित्योपादानादानादवघृष्टाख्यचुम्बनमुक्तम्। उक्तं च, "हस्तेन नेत्रे च निमील्य भर्तु: संमीलिताक्षी वदने खजिह्वाम्। निक्षप्यि क्रीडति यत्र लीला ख्यातं रसज्ञैरवघृष्टसंज्ञम्।।" इति। कीदृशम् ? पुलकाबल्या रोमाञ्चपङ्गक्त्या ललितौ मनोहरौ कपोलौ यस्य तम्। पुन: कीदृश्या मया ? मदनचिन्तया जनितं जलं प्रस्वेदस्तेन सिक्तमार्द्रं कलेवरं यस्यास्तया। क्वचित् "श्रमजलसक्तकलेवरया" इति सुगम: पाठ:। कीदृशं तम् ? वर उत्कृष्टो यो मदो हर्षस्तेनातिशयेन लोलं चञ्चलम्। "काये च कलेवरम्" इति "**विश्व:**"।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। अलसेति। हे सखि ! अलसेन सुखपारवश्येन भावप्रधानो निर्देश:। निमीलिते मुकुलिते लोचने ययो: तया अथवा अलसेन रतिखेदेन सुखपारवश्येन मन्दीकृतस्व-व्यापारे अतएव निमीलिते लोचने यस्यास्तया सकलकलेवरया सर्वाङ्गीणस्वेदोदकया आविर्भूतकामवलया चेत्यर्थ:। अथवा कलया कान्त्या सहितं सकलमिति वा। अनेन

सम्पूर्णसात्त्विकभाव: सूचित:। कलेवरशब्दस्य ग्राम्यत्वदोषो देशभेदात् परिहर्त्तव्य:। श्रमजलशकलेति क्वचित्पाठ:। तदा श्रमजलशकलानि कणा: कणाविन्दव इति यावत् तानि यस्मिन् तादृशं कलेवरं यस्या: तया सकलेति मध्यपदलोपो वा, एवं विधया मया सह पुलकावल्या रोमाद्गमपरम्परया ललितौ रमणीयौ कपोलौ गण्डभागौ यस्य तम्। अनेनापि सम्पूर्णसात्त्विकभाव: सूचित:। अतएव वर: सर्वाङ्गीणसात्त्विकभावोदय पर्यन्तं प्रवलो यो मदनमद: कन्दर्पकृतदर्प: अत्यन्तसुरतोद्योग: इति यावत् तस्माद्धेतो: अतिलोलम् अत्यन्तचञ्चलं सर्वाङ्गीणसात्त्विकभावोदयपर्य्यन्तसुरत-व्यापारशालिन-मित्यर्थ:। एतादृशं केशिमथनं मया सह रमयेत्यन्वय: सात्त्विकभावस्तु। प्रलयरोमाञ्चौ स्वेदौ वैवर्ण्यवेपथु। अश्रु वैस्वर्य्यमित्यष्टौ सात्विका: परिकीर्त्तिता:।।इति।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। मया तत: किम्भूतया तत्राह। अलसं मन्थरम्, तच्च तन्निमीलितञ्चेति। अलसनिममीलितं लोचनं यस्या: तया। यद्वा अलसं मन्थरं यथा स्यादेवं निमीलिते लोचने यया, चुम्बनादिसुखयोगादिति भाव:। 'अलस: पादयागे स्यात्क्रियामान्द्ये द्रुमान्तर' इति। तं पुंन: किम्भूतम्? पुलकावल्या[५५] रोमाञ्चपंक्त्या ललितौ यस्य तम्। एतेन यत्र यत्रैव चुम्बनं तत्र तत्रैव सात्त्विकविकारा इति मन्तव्यमिति सूचितम्। तदुक्तं **भारते**, 'सङ्गमे स्मरणे चैव प्रियस्यालोकने तथा। हेतुत्रयं समासाद्य सात्त्विकं संप्रवर्तते।। स्वेद: कम्पोऽथ रोमाञ्च: स्वरभङ्गोऽथ वेपथु:। वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका मता:।।' मया पुन: किम्भूतया? श्रमजलेन सुरतायासजनितगात्रवारिणा सकलं सम्पूर्णां कलेवरम् अङ्गं यस्या एवम्भूतया। सं पुन: किम्भूतम्? वरमदनमदादति-शयितकामदर्पात् हर्षाद्वा अतिलोलं सुरतक्रियायामत्यर्थेन चञ्चलमित्यर्थ:।।४।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४।। [३]पुन: कीदृश्या? [४]अलसे आलस्ययुक्ते निमीलिते मुद्रिते लोचने यस्या: तया। एतेनाङ्गिक: कामोत्सव: कथित:। यथा ''यत्र मूर्धानमारभ्य पादपर्यन्तिका: क्रिया:।

अङ्गेन विहिता यस्मात्तस्मादाङ्गिकमुच्यते''।।इति ।।

कीदृशम्? पुलकानां रोमाञ्चानां आवल्या पङ्क्त्या ललितौ मनोहरौ कपोलौ यस्य तम्। एतेन सात्त्विकभावोदयेन शृङ्गार[५]रसस्य स्थिरता कथिता। **भरतोक्ता**:,

स्मरणे सङ्गमे चैव प्रियस्यालोकने तथा।

[६]हेतुत्रयं समासाद्य सात्त्विक: सम्प्रवर्तते।।

स्वेद: कम्पोऽथ रोमाञ्च: स्वरभङ्गोऽथ वेपथु:।
वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विका: [७] स्मृता:।

कीदृश्या ? श्रमजलेन सुरतानन्द [१] स्वेदजलेन सिक्तं [२] युक्तं सम्पूर्णं वा कलेवरं शरीरं यस्यास्तया। एतेन सुरतानन्दपूर्तिरुक्ता। [३]कीदृशं श्रीहरिम् ? [४]वरमदनमदा(द)तिलोलं उत्कृष्टकामगर्वादतिलोलं चञ्चलं[५] सतृष्णम्। प्रचुरश्रेष्ठयोर्वर: इति **विश्व**:। काये कलेवरम् इत्यपि। रसवदलङ्कार:।।४।।

१.नास्ति-क. २.नास्ति-ड. ३.नास्ति-अ.ब.इ.ग. ४.नास्ति-ग. ५.रसास्यास्थिरता कथिता। भरतोक्त:-इ.फ.ग.ह.ज. ६.पङ्क्तिरियं नास्ति-अ.ब.इ.फ.ग.ह.ज. ७.मता:-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।४।। अलसेति। अलसेन सुरतसौख्येन निमीलिते मुद्रिते लोचने [६]नेत्रे [७]यस्या: सा। पुलकावल्या रोमाञ्चपङ्क्त्या ललितौ मनोहरौ कपोलौ यस्य तम्। श्रमजलेन[८] सुरतजनितवारिणो सिक्तं कलेवरं[९]यस्या: सा तया। वरमदनमदादुत्तमकामजनित-हर्षादतिलोलमतिचञ्चलं, सतृष्णमित्यर्थ:।।४।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।४।। (अलसेति) अलसेन सुखातिशयजनितालस्येन निमीलिते लोचने यया तया। पुलकावलिभि: रोमाञ्चौ: ललितौ कपोलौ यस्य तम्। कान्ताश्रमजनकपौरुषातिशय-भावना। एवं श्रमजलेन सिक्तं आर्द्रितकलेवरं यस्यास्तया। वरमदनमदात् कामहर्षोदयादित्यर्थ:। [१०]वेग: संभोगातिशय: यस्य तम्।।४।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।४।। पुन: किंविधया ? अलसेति। अलसेन निमीलिते लोचने यया। ''अलसं कोपाधिरोगे स्यात् क्रियामान्द्ये रोगान्तरे'' इति विश्व:। अत्र अलसशब्दस्य धर्मवृत्तत्वात् क्रियामान्द्यं मन्दालसशब्दार्थ:; यथा अलसवलितै: प्रेमार्द्रार्द्रैरित्यादि। एतेनाङ्गिक: कामविकार: सूचित:। पुन: किंविधम् ? **पुलकेत्यादि** । पुलकावल्या रोमाञ्चश्रेण्या ललितौ कपोलौ यस्य तम्। अनेन सात्त्विक: कामविकार: सूचित:। द्विविधं किल कामविकार:; आङ्गिक: सात्त्विकश्चेति। तथा च, ''निर्वृत्तेत्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिक: सात्त्विक:'' इति। पुन: किंविधया ? **श्रमजलेत्यादि**। श्रमजलक्लिन्नं सकलकलेवरं यस्या इति मध्यपदलोपी समास:। एतेनापि सात्त्विक: कामविकार: सूचित:। पुन: किंविधम् ? वरमदनेत्यादि। वर: श्रेष्ठोऽसौ मदनमद: कामकृतो दर्पो हर्षो वा। तस्माद्धेतोरतिशयेन लोलं सतृष्णं रति(त)प्रगल्भं वा। अनेन विशेषणेन राधिकाया:

श्रमे सञ्जातेऽपि कृष्णस्य पौरुषविशेषात् कामसंवेगः सूचितः। तथा अलस-निमीलितेत्यादेरिदं तात्पर्यम्। सुरतप्रवृत्तस्य मिथुनस्य रागाभिवृद्धौ सत्यामेते विकाराः प्रवर्तन्त इति। तथा च, "मिथोऽनुरागान्मिथुनस्य मैथुने", "प्रगल्भता स्यादथ मिलनं दृशोः। स्मितं मुखे कण्टकितं च गण्डयोः, कलेबरे प्रक्षरणं च वेपथुः।।" इति।।४।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।४।। अलसेन निमीलिते लोचने यया तया पुलकावलिभिर्ललितं कपोलं यस्य तम्। श्रमजलं सकलकलेवरे यस्यास्तया वरमदनमदादतिलोलं सतृष्णम्।।४।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।४।। अलसेति। अनन्तरमलसेन तच्चुम्बनसुखसमुदितालस्येन निमीलिते ईषन्मुद्रिते लोचने यस्यास्तया। अलस इति भावप्रधाननिर्देशः। पुलकावलिभिर्मत्कृतचुम्बनानन्द-जनितरोमाञ्चालिभिर्ललितौ कपोलौ यस्य तम्। अनेन परस्परभावोदयः सूचितः। अनन्तरं श्रमजलं सुरतानन्दस्वेदः सकले कलेवरे यस्यास्तया। किं वा कलया कान्त्या सहितं सकलं श्रमजलेन सकलं कान्तिविशेषयुक्तं कलेवरं यस्यास्तया। अनन्तरं तदुद्भटसम्भोगसमुदितघर्मजलबिन्दुसन्दोहसञ्जाततादात्मिकरमणीयतादर्शनेन वर उत्कृष्ट उद्दीप्त इत्यर्थः। ईदृशो यो मदनस्तेन मदोन्मत्तः। तस्मादतिलोलमतिशयेन चञ्चलं सतृष्णं वा द्विगुणित सुरतव्यापारमित्यर्थः। 'लोलश्चलः सतृष्णयो' **इत्यमरः**।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

**४- अलसनिमिलितेति -** आलस्ययुक्ते लोचने मीलिते नाम कामक्रीडाजन्य निद्रा क्लान्तिस्तथा चक्षुनिमीलनं भवति श्रीराधायाः। अपि च श्रमघर्म आर्द्रता पुनः रोमाञ्चावली रोमाञ्चेन कपोलस्य रोमाञ्चपरिप्रकटनं जातं श्रीराधायाः। इदृशेन मदनमत्तेन रत्युत्सुकेन निर्घाताघातरूपेण कामक्रीडाप्रेम्णा श्रमजलपरिपूर्णतया श्रीराधायाः इदृशी कोमलदशा कामक्रीडां कर्त्तुमत्यन्तं लालायितभावं सतृष्णभावं वा प्रकटय्य श्रीराधा तत् खलु इदानीं स्मरति। यतो हि स्मरणे सम्भोगभोगः द्विगुणो भवति नायकस्यावर्त्तमानेऽपि। अत्र आङ्गिकः कामोत्सवः कथितः इति **सञ्जीवनी**। स स्मरति।

यत्र मूर्द्धानमारभ्य पादपर्यन्तिका क्रियाः। अङ्गेन विहिता यस्मात् तस्मादाङ्गिकमुच्यते।।

अत्र स्तम्भस्वेदरोमाञ्चादयः सात्त्विकविकाराः। **भरतेनोक्तम्,**

स्मरणे सङ्गमे चैव प्रियस्यालोकने तथा। हेतुत्रयं समासाद्य सात्त्विकः संप्रवर्त्तते।।

तद्यथा- स्वेद: कम्पोऽथ रोमाञ्च स्वरभङ्गोऽथ वेपथु:। वैवर्णमश्रुप्रलयावित्यष्टौ सत्त्विका: स्मृता:।। कामक्रीडायामालस्यं श्रमक्लान्ति: स्वेदादयश्च भवन्ति। अत्र कामेच्छयाऽपि कथं संभवतीति आशय:।।५ ।।

**५-कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारम्।**

**श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम् ।।सखि० ।।५ ।।**

**(१)नारायणदासकृत-सर्वाङ्गसुन्दरी**

।।५ ।। कोकिलस्येव कलरव: कूजितं यस्या: सा तया, कोकिल: पिक: कलरव: पारावत: तयोरिव कूजितं यस्या: सा इति विग्रह:। एतेन कण्ठशब्द: प्रतिपादित:

दात्यूहलावकमयूर कपोत हंस
पारावतादि रुतबद्धवनितं रतेषु।
तस्मिन्कृतेऽपि पुनरूक्तमनोजभाव:
संयोजयेद्बहलचुम्बनमैथुनानि।। इति ।।

पुन: कीदृशं, जितमनसिजतन्त्रविचारं जितोऽभिभूतो मनसिजतन्त्रस्य इति भाव: श्लथकुसुमेत्यादि। श्लथानि बन्धाद्गलितानि कुसुमानि येषां कुन्तलानापदार्थ-श्लथकुसुमा आकुला: केशा: यस्या इति विग्रह:। आकुलकुन्तलानामन्यपदार्थता। उक्तं च ''ग्रहणमथ विदध्यात्कण्ठकेशस्तनादेरिति'' **रसिकसर्वस्वे**। पुन: कीदृशं नखलिखित घनस्तनभारं गुरुत्वात् स्तनस्य भारत्वे निरूपणे

पादजंघोरुदेशेषु स्तने कक्षे गले श्रुतौ।
नखमत्र प्रदातव्यं भगे नाभौ च मर्द्दनम्। इति **स्मरदीपिकायाम्**।।५ ।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।५ ।। अपि च। कोकिलेति। कोकिल१ कलरवयो: कूजितं यस्या:। कलरव शब्द: पारावतपर्याय:। एतदपि सुरताधिकारायोक्तम्। तदुक्तं **रसिकसर्वस्वे** "दात्युहलावक-मयूरकपोतहंसपारावतादिरूतवद्धानिनतं रतान्ते। तन्मिश्रनि:श्वसितसीत्कृतम्बहानिनादै: संयोजयेन्मदचुम्बनमैथुनादौ।। इति। अपि च, जितो न्यक्कृत: कामशास्त्रविचारो येन। वात्सानादिभ्योऽपि कुशल इत्यर्थ:। अपि च, श्ल्थकुसुमा आकुला व्यस्ता: कुन्तला यस्या सा। अपि च, नखैर्विलिखितोऽङ्कितो निबिड:स्तनभारो येन। एतेन बाह्यरतमुक्तम्। तदुक्तं **भरतेन**, 'आश्लेषचुम्बननखक्षतताडनानि संमर्दनं प्रसरणं खलु शिक्षितानि। जिह्वाप्रवेशरसनग्रहणं तु नाभीक्षोभं रतं वदति वाह्यरतानि तज्ज्ञ:' इति।।५ ।।

## (३) जगद्धरकृत- सारदीपिका

।।५।। कोकिलेति कोकिलकलरववत् अव्यक्तध्वनिवत् कूजितं शब्दो यस्यास्तया जित: मनसिजस्य तन्त्रविचार: शास्त्रसिद्धान्तो येन स: तम्। श्लथा शिथिला: कुसुमै: पुष्पैराकुला: व्याप्ता: कुन्तला: चूर्णं कुन्तला यस्या: स तया नखेन लिखित श्चिन्हितो घनो निबिड: स्तनभारो येन स: तम्।।४।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५।। पुन: कीदृश्या मया ? कोकिलेति। कोकिलस्य कलोऽव्यक्तमधुरो यो रव: शब्दस्तदवत्कूजितं शब्दितं यस्यास्तया। अनेन कूजिताख्यं बाह्यरतमुक्तम्। तदुक्तं "पञ्चसायके" पिकाशिखिकलहंसप्रायपक्षिव्रजानां स्वरितमनुकरोतीत्यङ्गना मन्मथार्ता। मुखदशनविवर्ता तत्कवीन्द्रा वदन्ति स्तनितमिति समासाच्चित्रसंभोगकाले।। इति।" ननु **वात्स्यायना**दिशासत्रेऽन्य एव क्रम उक्त:। तदुक्तम् आश्लेषं प्रथमं कुर्याद्वितीयं चुम्बनं तथा। तृतीयं नखदानं च दंष्ट्राघातं चतुर्थकम्। पञ्चमं क्षेपणं प्रोक्तं षष्ठं प्रहरणं तथा। सप्तमरतस्याग्रे वक्ष्यमाणनखदानादिरतात्प्राक्करणे श्रीकृष्णस्य रसिकताभङ्ग: स्यादित्यत आह, जितेति। जितोऽवज्ञातो मनसिज[५६]तन्त्रस्य कामशास्त्रस्य विचारो येन तम्। अयं भाव:; चतु:षष्टिकलाकुशलस्यापि परमस्त्रीनायकस्य जगदीश्वरस्य स्वानुकूलोत्तमनायिकासंनिधौ रसमग्नतया क्रमस्मरणाभावान्न दोषा:। तदुक्तम् रतिचक्रप्रवृत्तस्य नैव शास्त्रं न च क्रम:" इति। पुन: कीदृश्या ? श्लथा:केशग्रहणपूर्वक-चुम्बनादिपानेन शिथिला: कुसुमैराकुला व्याप्ताश्च कुन्तला यस्यास्तया। नखेन लिखित: क्षतयुक्त: कृतो घनस्तनभारो येन तम्। अत्र लिखितपदोपादानात्पङ्कजपात्राख्यं नखदानमुक्तम्।।५।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५।। कोकिलेति। हे सखि ! कोकिलानां पिकानां कलरव: अव्यक्तमधुरध्वनि: तत्कल्पं कूजितं अव्यक्तकण्ठरुतं यस्यास्तया कलरवकूजितयेत्यत्र मध्यपदलोपी समास:। अन्यस्य तद्बिधायकस्याभावात्। तद्धि तमिति भावे-ष्ठा अनेन विशेषणेन राधाया: कामशास्त्रप्रसिद्धरतिकूजितप्रामाण्यं सूचितम्। उक्तं च **रतिरहस्ये**,

हुंकृतंस्तनित फुत्कृते कृतं
फुत्कृत श्वसित रोदनादिकम्।
मुञ्च पीडय गृहाण जीवय
त्राहि हा धिगिति शीत्कृतं विदु:।।

तच्च भावुककपोलकोकिलहंसकेलिसदृशै रतिक्रमै:।
मिश्रितं प्रहरणे प्रयुज्यतेऽप्यन्यथाविरुतमिष्यते बुधै:।

उर्ध्ववमुच्चलितकण्ठनासिकाहूंकृतमब्जघोषवत् तच्च विस्फुट नवफुत्कृतं कदर यातवज्जले, तदतिध्वनिकरं करातं हृत्प्रयुज्ममपहस्तकं विदुरिति। किञ्च श्लथानि सम्भोगमर्द्दने श्रस्तानि यानि कुसुमानि तैरकुला: व्याप्ता: कुन्तलाश्चिकुरा: यस्या तया श्लथशव्दस्य कुन्तलविशेषणत्वं वा। एतादृश्या मया सह नखैर्करजैर्लिखितोऽङ्कित: घनस्तनभार: पृथुकुचमण्डलं येन तादृशं नखक्षतालंकृतमदीयकुचमित्यर्थ:।

अनेन पूर्वोपभोगस्वारस्यं च जानातीत्युक्तं भवति। किञ्च, जित: स्वायत्तीकृत: मनसिजतन्त्रे कामशास्त्रे विचार: पद्मिन्यादिस्त्रीजातिचतुष्टयपरिज्ञानं भद्रकान्तादि पुं जातिपरिशीलनं मण्डूकबन्धादिसकलबन्धद्रावकस्तम्भनादि साधनसकलौषध-षोड़शकलादिसकल प्रतिभा यस्य तादृशम्। अनेन रसिकाग्रणीरित्युक्तम्। एतादृशं केशिमथनं मया सह रमयेत्यन्वय:।।५ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५ ।। मया तत: किम्भूतया तत्राह, कोकिलकलरववत् अव्यक्तध्वनिवत् कूजितं यस्या एतादृश्या। सुरतकाले विदग्धनायिकाभि: नायकस्य रसोद्रेकार्थं तथाविधशब्द-विशेषस्य विधेयत्वात्। तदुक्तं "**नागरसर्वस्वे**" 'दात्यूहलोचकमयूरकपोत-हंसपारावतादिरुतवत् ध्वनितं रुताख्यम्। तन्मन्त्रितं श्वसितशीत्कृतहानिनादे: संयोजयेद्वदनचुम्बनमैथुनादौ। तं पुन: किम्भूतम्? जितो मनसिजतन्त्रस्य कामशास्त्रस्य विचारो येन तम्। तथा च कामशास्त्रविचारिततत्तत्कर्माधिककर्मकुशलमित्यर्थ:। 'तन्त्र प्रधने शास्त्रयोरि'इति **विश्व:**। मया पुन: किम्भृतया? श्लथकुसुमा: शिथिलबन्धपुब्या आकुला अस्तव्यस्ता: कुन्तला: केशा यस्या एवम्भूतया, सुरतकालीनकुन्तलाकर्षणादिना इति भाव:। तं पुन: किम्भूतम्? नखेन लिखित: अंकित: घनो निविड: स्तनभारो येन तम्। एतेन वाह्यरतमुक्तम्। तदुक्तम्, 'आश्लेषचुम्बननखक्षतताड़नानि समर्दने प्रसरणं खलु वीक्षितानि। जिह्वाप्रवेशरसना-ग्रहणन्तु नाभिक्षोभं रतम्वदति वाह्यरतानि तज्ज्ञ:।।५ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५ ।। [११]पुन:[१२] कीदृश्या? कोकिलस्य कलरवोऽव्यक्तमधुरशब्दस्तद्वत्कूजितं शब्दितं यस्या: [१३]तया। कोकिलपुंस्त्वं पुरुषायिताभिप्रायादिति। अनेन कूजिताख्यं[१४] बाह्यरतमुक्तम् [१५]। तदुक्तं पञ्चसायके- ''पिकशिखिकलंहसप्रायपक्षिव्रजानां स्तनितमनुकरोति ह्यङ्गना मन्मा थार्ता। [१]मुखदशनविवर्ता तत्कवीन्द्रा वदन्ति स्तनितमिति

समासाच्चित्रसम्भोगकाले[२]"।।

कीदृशम्? [३]जितोऽवज्ञान उल्लङ्घितो वा मनसिजस्य[५६] कामस्य तन्त्राणां वात्स्यायनाद्युक्तकामशास्त्राणां विचार: सिद्धान्तो येन तम। तत्रैवोक्तम-

"आश्लेषं प्रथमं कुर्याद्द्वितीयं चुम्बनं तथा।
तृतीयं नखदानं च दंष्ट्राघातं चतुर्थकम्।
पञ्चमं क्षेपणं प्रोक्तं षष्ठं प्रहरणं तथा।
सप्तमं कण्ठशब्दश्च [४]बन्धनं वाऽप्यनन्तरम्"।।इति ।।

तत्सर्वं विपरीतं जातमिति भाव:।[५] रतिचक्रे प्रवृत्तस्य[६] नैव शास्त्रं न च क्रम:[७] इत्युक्ते: (का.श.२.२.३१)। पुन: कीदृश्या मया। कीदृशं[१०] श्रीकृष्णम्?[११] नखै[१२]र्लिखित:[१३] क्षतयुक्त: कृतो घनो निबिड: स्तनभरो येन। अत्र लिखितपदोपादानात्पङ्कज-पत्राख्यं नखक्षत मुक्तम्।[१४] यथा-

"अत्यर्धमेकस्फुरितोर्ध्व रेखं
प्राहु: क्षतं पङ्कजपत्रसंज्ञम्"।।इति।।

"तन्त्रं प्रधानशास्त्रयो:" इति **विश्व**:(?)। "चिकुर: कुन्तलो बाल: कच: **केशशिरोरुह**:" **इत्यमर**: (२.६.९५)। "भारो भारे च सिद्धान्ते भार: स्थूलेऽपि वस्तुनि" इति **वैजयन्ती**।।५।।

१.खेद-फ.ग.ह.ज.२.नास्ति-फ.३.श्रीहरिं कीदृशम्-इ.फ.ग.ह.४.नास्ति-अ.ब.इ.फ.ग.ह. ५.सतृष्णं वा-इ.फ.ग.ह.ज.६.नास्ति-क.ड.७.यया-ड.८.वारिणा-क.फ.१३.नास्ति-अ.ब.इ.फ.ग.ह.१४.त:१५.पर्यन्तं नास्ति-अ.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५।। कोकिलेति। कोलिलानां कलरववदव्यक्तध्वनिवत् कूजितं शब्दो[१५] यस्यास्तया। जितो मनसिजतन्त्रविचार: कामशास्त्रसिद्धान्तो येन[१] तम्।[२] श्लथा: शिथिला:[३] कुसुमाकुला: पुष्पव्याप्ता: कुन्तलाश्चूर्णकुन्तला यस्यास्तया। नखेन विलिखितश्चिह्नितो घनो निबिड: स्तनभरो येन।।५।।

१.त:२.पर्यन्तं नास्ति-अ.ब.इ.फ.ग.ह.ज.३.जितो ज्ञात:अ.ब.इ.फ.ग.ह.ज.४.बन्धनं चात्यनन्तरम्-इ.ज.५.उक्तं च रतिचक्रे-इ.फ.ग.ह.ज.६.न च-अ.ब.७.इति-इ.फ.ग.ह.ज.८.नास्ति-अ.ब.९.नास्ति-अ.ब.इ.ह.ज.१०.नन्दसूनुम्-ग.श्रीकृष्णं कीदृशम्-ज.११.नखै-१४.अयं श्लोकोद्धारो नास्ति-अ.ब.१५.यस्या: सा तया-क.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।५।। कोकिलेति। कोकिलस्य कलरवं कूजितं मिम्मिणिनादिकं यस्यास्तया। जित: मनसिजस्य[५६] तन्त्रविचार: वात्स्यायनशास्त्रविचार: दृढमननं[४]येन तम्। कलाभिज्ञ-

मित्यर्थ:। श्लथा: उन्मुक्तधम्मिल्ला: कुसुमै: आकुला: कुन्तला: यस्या:, तया। श्लथकुसुमाश्च ता: आकुला: विकीर्णाश्च कुन्तला: यस्यास्तया वा। नखै: लिखितौ घनौ स्तनरूपौ भारौ येन तम्।।५।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५।। पुन: किंविधया? कोकिलेत्यादि। कोकिल: पिक: कलरव: पारावत: तयोरिव कूजितमव्यक्त- कण्ठध्वननं यस्या: सा तया। एतेन कण्ठशब्द: प्रतिपादित:। यदुक्तम्, ''दात्यूहलावकमयूरकपोतहंस, पारावतादिरुतवद्ध्वनितं रुताख्यम्। तन्मिश्रितश्वसित-सीत्कृतिहानिनादै:, संयोजयेद् वदनचुम्बनमैथुनादौ।।'' इति। ''पारावत: कलरव:'' "**इत्यमर:**"। पुन: किंविधम्? जितेत्यादि। जित अनादृतमनसिजतन्त्रस्य[५६] कामशास्त्रस्य विचारो येन स तम्। तथाहि 'रतिचक्रे प्रवृत्तेऽपि नैव शास्त्रं न च क्रम:' इति न्यायात्। ''तन्त्रं कुटुम्बकृत्ये स्यात्सिद्धान्ते चौषधोत्तमे।। प्रधाने तन्तुवाये च शास्त्रमात्रे परिच्छदे।'' इति **मेदिनी**। पुन: किंविधया? श्लथेत्यादि। श्लथानि निबन्धनतो गलितानि कुसुमानि येषाम्। आकुलकुन्तलानामन्यपदार्थता। श्लथकुसुमा आकुला इतस्ततो विक्षिप्ता: कुन्तला यस्या: सा तया। ''ग्रहणमथ विदध्यात् कण्ठकेशस्तनादे:'' इति। अनेनात्र केशग्रहणं सूचितम्। पुन: किंविधम्? नखेत्यादि। नखैर्लिखितौ क्षतीकृतौ घनस्तनभारौ येन। गुरुत्वात् स्तनयोर्भारत्वारोप:। प्रयुक्तैर्गाथापदैर्बाह्यरतमुक्तम्। तथा च, ''आश्लेषचुम्बननखक्षतभूषणानि, दन्तक्षतच्छुरितमर्दनताडनानि। जिह्वाप्रचारकुचकेशगृहीतना(म)र्थी, क्षोभं रतं वदति बाह्यरतानि तद्वद्।।'' इति। इत्यनेन प्रतिपादितक्रमस्य प्रकृते लाभेऽपि जितमनसिजतन्त्र-विचारमिति पूर्वोक्तक्रमातिक्रमोऽपि साधीयान्।।५।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५।। कोकिलस्य कलरव इव कूजितं यस्यास्तया जितोऽभिभूत: कामशास्त्रस्य विचारो येन तम्। अतएव शास्त्रोक्तक्रियापरिभावस्य व्यतिक्रमो नाशङ्कनीय:। श्लथकुसुमैराकुला: कुन्तला यस्या स्तया नखैरङ्कितो घनस्तनभारो येन तम्। ''तन्त्रं प्रधानं शास्त्रयो:'' इति। "**विश्व**"।।५।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५।। अनन्तरं तस्य तादृश सुरताटोपेन कोकिलकलरवयो: पिकपारावतयो: कूजितमिव कूजितं यस्यास्तया। रतिकूजितप्रकारो यथा रतिरहस्ये, 'दात्यूहलावक-मयूरकपोतहंसपारावतादिरुतवद्ध्वनितं रतेषु' इति। 'पारावत: कलरव' **इत्यमर:**।

अनन्तरं मम तादृशरमणीयमणितश्रवणेन जित: स्ववशीकृतो मनसिजतन्त्रविचारो वात्स्यायनादिप्रणीतकामशास्त्राणां सिद्धान्तो येन तम्। स यथा **पञ्चसायके**,

आश्लेषं प्रथमं कुर्यात् द्वितीयं चुम्बनं तथा। तृतीयं नखदानं च दंष्ट्राघातं चतुर्थकम्।

पञ्चमं क्षेपणं प्रोक्तं षष्ठं प्रहरणं तथा। सप्तमं कण्ठशब्दश्च बन्धनं चाप्यनन्तरमिति।।''

'तन्त्रं प्रधानशास्त्रयोरिति **विश्व:**। अनन्तरं तत्कृतविविधबन्धसम्पादितसुरतसंमर्दनेन श्लथा: शिथिला: कुसुमैर्मल्लिकादिभिराकुला व्याप्ता: कुन्तला: कवरीबन्धो यस्यास्तया। अनन्तरं मद्विकीर्णप्रसूनकवरीबन्धविस्रंसनेनापलक्षितरतिमध्यसमयनि:सहतानिराकरणाय नखेन लिखित: करजाग्रेणाङ्कितो घनो निविडस्तनभारो येन तम्। स्तनयोरतिपृथुलत्वात् भारत्वेन रूपणम्।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

५- कोकिल कलरवकूजितया जितमनसिजतन्त्रविचारम्; श्रीराधाकृष्णयो: रतिक्रीडायां रतिरसोत्सर्गकाले शब्दस्य साम्यं गण्यते। अत्र शृङ्गारलीलायां कोकिल इव कूजनं रतोत्सवे सम्भवतीति **रसिकसर्वस्वे**; तद् यथा, "दात्यूहलावकमयूरकपोतहंस पारावतादिरूतवद्ध्वनितं रतान्ते।" तन्मिश्र नि:श्वसितसीत्कृतहानिनादै: संयोजयेत् मदनचुम्बन हा निनादै: संयोजयेन्मदनचुम्बनमैथुनादौ।। इति। अपि च **पञ्चसायके** प्रपञ्च्यते। तद्यथा;

पिकशिखिकलहसंप्रायपक्षिव्रजानां स्तनितमनुकरोति ह्यङ्गना मन्मथार्त्ता।
मुखदशन विवर्त्ता तत्कवीन्द्रा वदन्ति। स्तनितमिति समासाच्चित्रसम्भोगकाले।।

पुन: कामस्य सोपानानि वात्स्यायनीयेषु **कामसूत्रादिषु** तथा **पञ्चसायकेऽपि** सुतरां प्रपञ्चितमस्ति तद्यथा;

आश्लेषं प्रथमं कुर्यात् द्वितीयं चुम्बनं तथा। तृतीयं नखघातं च दंष्ट्राघातं चतुर्थकम्।।
पञ्चमं क्षेपणं प्रोक्तं षष्ठं प्रहरणं तथा। सप्तमं कण्ठशब्दश्च बन्धाख्यं चाष्टमं रतम्।।

नखलिखित घनस्तनभारं गुरुत्वात् स्तनस्य भारत्वे निरूपणे **स्मरदीपिकायां** स्पर्शस्थानानि यथा,

पादजंघोरुदेशेषु स्तने कक्षे गले श्रुतौ।
नखमत्र प्रदातव्यं भगे नाभौ च मर्द्दनम्।

बाह्य रतस्य संज्ञाकरणं निश्चप्रचमुच्यते **भरतेन** तद् यथा;

आश्लेषचुम्बननखक्षतताडनानि संमर्दनं प्रकरणं खलु शिक्षितानि।

जिह्वाप्रवेशरसनं ग्रहणं तु नाभि क्षोभं रतं वदन्ति वाह्यरतानि तज्ज्ञाः।।

तथापि उच्यते; रतिचक्रप्रवृत्तस्य नैवशास्त्रं न च क्रमः। इति। अत्र नखदानविषयेऽपि **पञ्चसायके** प्रपञ्चितम्। तद्यथा; अत्यूर्ध्वमेकं स्फुरितोर्ध्वरेखं प्राहुः क्षतं पङ्कजपत्रसंज्ञम्। दोर्मूल-नाभि-स्तन-वक्ष– संधावित्यूर्ध्वयोगं मनुते महेशः।। इति।। बाह्यशृङ्गारस्य प्रकारः नखलिखितं स्तनौ तथा कुन्तलाकर्षणादि। एतत्कृतविविधबन्धसंपादितसुरतमर्दनेन श्लथाः शिथिलाः पुष्पाणां समूहः मुकुलिते धम्मिल्ले चारूकुसुमानि व्याप्तानि। एतस्य लक्षणानि वहुत्र कामशास्त्रेषूपलभ्यन्ते। पुनः श्रीराधायाः घनस्तनयोरूपरि नखेन लिखत्यसौ रसिकः रसराजः। अत्रपि स्तनयोरति पृथुलत्वमपि द्योत्यते।।६ ।।

**६-चरणरणितमणिनूपुरया परिपूरितसुरतवितानम्।**

**मुखरविशृङ्खलमेखलया सकचग्रहचुम्बनदानम्।।सखि० ।।६ ।।**

### (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।६ ।। वाह्यरतमुक्त्वा सम्प्रत्यभ्यन्तरसुरतमाह। चरणयोः रणितौ मणिनूपुरौ मणियुक्त मञ्जीरौ यस्या इति विग्रहः। एतेनाष्टमं बन्धाख्यं प्रतिपादितम्।

द्वौ पादौस्कन्धसंलग्नौ क्षिप्त्वा लिङ्गं भगे लघुः।

कामयेत् कामुकः कान्तां बन्धः काकपदो मतः।। इति **स्मरदीपिकायाम्**। कीदृशं हरिं, परिपूरितसुरतवितानं, परिपूरितकाकपदाख्य बन्धस्य सुरतस्य विग्रहः। इत्थं कृष्णश्रृङ्गारमुक्त्वा सम्प्रति विपरीतरतमाह मुखरेत्यादि। पूर्वंमुखरा पश्चाद्विश्रृङ्खला कटिभागस्यान्दोलनात् छिन्नगुणा मेखला रसना यस्या इति विग्रहः। एतेन राधायाः हंसलीलाख्यो विपरीतबन्धः। यदुक्तं,

नारी पादद्वयं दत्वा कान्तस्योरुयुगोपरि।

कटिमान्दोलयेत्याशु बन्धोऽयं हंसलीलकः।। इति।।

कीदृशं हरिं, सकच ग्रहचुम्बनदानं यस्येयि विग्रहः। विपरीते तथाबिध चुम्बनस्य सुखदत्वात् ।।६ ।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।६ ।। अपिच, चरणेति। चरणयोः रणितौ शब्दितौ मणिनूपुरौ यस्याः। ग्राम्याख्यबन्ध-सूचनायोक्तमिदम्। तदुक्तं **रसिकसर्वखे**, 'उत्तानतायाः सुरते यदोरूस्त्रीशीर्षकान्तोरुगतौ

भवेताम्। ग्राम्यं तदा स्यात्कटितो यदास्या बहिर्भवेत: किल नागराख्यम्।।' परिपूरित: संपूर्णतां नीत: सुरतवितान: सुखावसरां प्रस्तावो वा येन। अपिच, मुखरा वाचाला विशृङ्खला काञ्ची यस्या:। अथवा 'सुखदविशृङ्खलमेखलया' इति पाठ:। अपि च, सकचग्रहकेशग्रहणेन सहितं चुम्बनदानम् यस्य ।।६ ।।

## (३) जगद्धरकृत- सारदीपिका

।।६ ।। चरणेति चरणयो: पादयो: रणितौ शब्दितौ मणियुक्तनूपुरौ यस्या:। परिपूरितं सम्पूर्णं कृतं सुरतवितानं सुरतसमूहो येन तम् । मुखरा: शब्दायमाना विश्रृङ्खला उन्मुक्ता मेखलाकाञ्ची यस्या: सा तया सकचग्रहं कचग्रहणसहितं चुम्बनदानं यस्य तम्।।६ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६ ।। एतावत्पर्यन्तं चुम्बनालिङ्गनादिना सप्तविधं बाह्यरतमुक्तम्। संप्रति बन्धनाख्यमष्टमरतमाहचरणो रणितौ शब्दायमानौ मणिखचितौ नूपुरौ यस्यास्तया। एतच्च भ्रामरिकं नाम विपरीताभिप्रायेणोक्तम्। तदुक्तं **रतिरहस्ये** 'चत्रद्भ्रमति कुञ्चिताङ्गिका भ्रामरं नृजघने समुचि् ते' इति। कीदृशम्? परिपूरितं सुरतवितनं रतिवस्तारो येन तम्। अनेन नायककर्तृका बन्धा: कथिता:। भ्रामरकबन्धश्रान्तां विदित्वा किसूलयशयनसिथतां मां खयमपि रमयिष्यतीति भाव:। कीदृश्या? पूर्वं मुखरा शब्दायमाना पश्चाद्विश्रृङ्खला त्रुटितगुणो खला काञ्ची यस्यास्तया। अनेन प्रेङ्खोलितनामकं विपरितरतमुत्कम्। । तदप्युत्कं पुरूषायितप्रकरणे 'सर्वत्र'शब्दोमनोराकारेण व्याख्यात: मध्यात्पूर्वपश्चमभागे दक्षिणोत्तरभागे चेति। **रहस्ये-** 'सर्वत: कटितटभ्रमो यदि प्रेङ्खपूर्वमिदमुत्कमूलितम्' इति। अत्रापि 'सर्व'शब्दार्थ: स एव। कीदृशं तम्? सकचग्रहं केशह्णसहितं चुम्बनदनं यस्य तम्। केशग्रहणपूर्वकचूम्बनं विपरीतमेवोत्कम्। तदुत्कम्, 'श्रृङ्गारे चुम्बनं कार्यं पुंसालिङ्गनपूर्वकम्। विपरीतरते नार्या सकचग्रहचुम्बनम्।।' इति। 'मेखला खङ्गबन्ध: स्यात्काञ्चीशैलनितम्बयो:' **विश्व**:।।६ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।६ ।। चरणेति। हे सखि! चरणयो: रणिते रतिरभसेन सिञ्जने मणिनूपुरे रत्नमञ्जीरे यस्यास्तया रत्यर्थव्यापारचरणनूपुरयेत्यर्थ। किञ्च मुखरा रतिरणसमये रणन्ती, मुखानिरत्यादत्ते स्वायत्तीकरोतीति मुखरा, निरन्तरं सर्वजनप्रेक्षणीयेत्यर्थ:। अद्य व्याख्याने अतएव विश्रृङ्खला दर्शनप्रतिबन्धकरहिता मेखला यस्यास्तादृशया मुखरित श्रृङ्खलेति पाठे, मुखरिता रतिसमयेनादिता श्रृङ्खलवत् श्रृङ्खलया श्रोतृणां श्रवणनयनयो

र्निनदरूपाभ्यां विपक्षान्तरसञ्चारप्रतिबन्धकेत्यर्थ:। शृङ्खलशब्दोऽप्यस्ति। स्तम्वेरमा मुखरशृङ्खलकर्षिणस्ते", इति **कालिदास**प्रयोगात् एवं विधया परिपूरित: सङ्गीकृत: सुरतवितान: सम्भोगविस्तार: सम्भोगयागो वा यस्य तादृशम् यागपक्षे चरणरणितादीनां यागाङ्गमन्त्रोच्चारणध्वन्यादि साम्यमवगन्तव्यम्। अनेन सम्भोगयज्ञ सम्यग्ज्ञानात्युक्तं भवति। अतएव सकचग्रहं कचग्रह: पुरोभागे कुन्तलग्रहणं यथा तथा तत्सहितं यथा तथा चुम्बनदानं यस्य तादृशं, मम सम्भोगकरणकौशलमालोक्य तस्य पारितोषिकत्वेन तदानीमेव सकल ग्रह: मदीयकपोलादि चुम्बनं कृतवन्तमित्यर्थ अनेन भगवत: श्रीकृष्णस्य तस्यां महती दया वर्त्तते इति सूचितम्। एवं विधं केशिमथनं मया मह रमयेत्यन्वय:।।६।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।६।।अत: किम्भूतया मया तत्राह, चरणौ रणितौ शब्दितौ मणिनूपुरौ मणिप्रधाननूपुरौ यस्या: तया। एतेन ग्रामाख्यो बन्ध: सूचित:। तदुक्तम्, 'उत्तानिताया: सुरते यदूरू आसीनकान्तोरुगतौ भवेताम्। ग्राम्यं तदा स्यात् कटितो यदास्य बहिर्भवेतां किल नागराख्यम्।।' तं पुन: किम्भूतम्? परिपूरित: कथितप्रकारेण समाप्तं नीत: सुरतवितान: प्रकृतसुरतविस्तारो येन तम्। 'वितानो यज्ञ उल्लोचे विस्तारे पुंनपुंसकम्। क्लीवं वित्तविशेषे च त्रिषु मत्ते च तुच्छके।'* मया पुन: किम्भूतया? मूखरा वाचाला विश्रृंखला विपर्यस्ता मेखला यस्या: एवम्भूतया। 'एकयष्टि भवेत् काञ्ची मेखला त्वष्टयष्टिका' इति। अत्रु मुखरमेखलात्वेन विपरीतरति: सूचिता। तत्रा, 'नृपुरनि:स्वनौ जातौ श्रूयते रसनाध्वनि:। मूढकान्ते रति श्रान्ते कामिनीरूपमायते।।' तं पुन: किम्भूतम्? सुकचग्रहं चुम्बनदानं[५७] यस्य तम्, इदमपि विपरीतरति- सूचकमेव।।७।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।६।। एवं सप्तधा[५]ऽऽलिङ्गनभेदादिकं बाह्यरतमुक्त्वा इदानीं बन्धाख्यमान्तरमाह, चरणेत्यादिना। कीदृश्या? चरणयो रणितौ शब्दायमानौ मणिखचितौ नूपुरौ यस्या:। एतेन भ्रामरिको नाम विपरीतरतौ नायिकाकृतबन्धविशेषो दर्शित:। प्रोक्तं **पञ्चसायके,**

"चक्रवद् भ्रमति कुञ्चिताङ्घ्रिका भ्रामकं नृजघने समुच्छ्रिते" इति।

कीदृशम्? परिपूरितं अभिपूरितं सुरतवितानं रतिविस्तारो येन [६]तम्। एतेन भ्रामरिकाख्यो नायककर्तृको बन्ध उक्त:। पुन: कीदृश्या?[७]पूर्वं मुखरा शब्दायमाना पश्चाद्विशृङ्खला त्रुटितमणिगणा शिथिला च मेखला क्षुद्रघण्टिका यस्या: तया[८]। एतेन [९]प्रेङ्खोलितनामकं विपरीतरत (मुक्तम्। तदुक्तं पुरुषायितप्रकारणे-) स्वजघनमेव

दोलायमानं सर्वत्र भ्रामयेत् इति [१०] प्रेङ्खोलितं नाम। [११]पुनः कीदृशम्? [१]सकचग्रहचुम्बनदानम्। केशग्रहणसहितं कृतं चुम्बनदानं येन यस्येति वा। इदमपि विपरीतरतमेव। [२]तदुक्तम्,

"शृङ्गारे चुम्बनं कार्यं पुंसाऽऽलिङ्गनपूर्वकम्।
विपरीतरते नार्या सकचग्रहचुम्बनम्" इति।

"शृङ्खला कुमुदे काञ्च्यां वस्त्रे च कचबन्धने" इति **विश्वः**। "मेखला खड्ग(ङ्ग)बन्धे स्यात्काञ्ची- शैलनितम्बयोः"[३] इति **विश्वः** (१०५.११८) ।।६।।

१.नास्ति-ड.तं तथा-ल.म. २.नास्ति-ल.म. ३.नास्ति-ड. ४.यस्य-च. ५.आलिङ्ग-नादिकं-ग.फ. ६.नास्ति-अ.ब. ७.तः ८.पर्यन्तं नास्ति-अ.ब.इ.फ.ग.ह. ९. प्रेङ्खनामकं-अ.ब. १०.प्रेङ्खा-अ.ब. ११.नास्ति-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।६।। चरणेति। चरणयोः पादयोः रणितौ शब्दितौ मणियुक्तनूपुरौ[४]यस्यास्तया। परिपूरितं[५]पूर्णं कृतं सुरतवितानं सुरतसमूहो [६]येन। मुखरा शब्दायमाना विशृङ्खला उन्मुक्ता मेखला काञ्ची [७] यया। सकचग्रहं केशग्रहणसहितं चुम्बनदानं[८]यस्य तम् ।।६।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।६।। चरणेति चरणयोः रणितौ नदन्तौ मणिनूपुरौ पदकटकौ यस्यास्तया नूपुरग्रहणेन पादभूषणत्वे प्राप्तेऽपि चरणग्रहणं तात्कालिकसम्बन्धावगमार्थम्। परिपूरितं सुरते वितानं उल्लोचो यस्य तम्। पुरुषमूर्धगतरमणीपादशालि समपादाख्यं कङ्कणं सूचितम्। मुखरा नदन्ती विशृङ्खला वलन्ती मेखला काञ्ची यस्यास्तया। क्षुद्रघण्टा व न्मेखलाकलकलेन पुरुषायितं सूच्यते। कचग्रहेण चिकुरसंहितग्रहणेन सहितं यथा स्यात्तथा दानं येन तम् कामातिशयः सूच्यते ।।६।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।६।। साम्प्रतमाभ्यन्तररतमाह। पुनः किंविधया? चरणेति। चरणयोः रणितौ शब्दायितौ मणिनूपुरौ मणियुक्तमञ्जीरौ यस्याः सा तया। एतेन काकपदाख्यबन्धः सूचितः। "द्वौ पादौ स्कन्धसंलग्नौ क्षिप्त्वा लिङ्गं भगे लघु। कामयेत्कामुकः कान्तां बन्धः काकपदो मतः।।" इति। पुनः किंविधम्? परिपूरितमिति। परिपूरितं कात्स्न्र्ये सम्पूर्णीकृतं सुरतस्य वितानं विस्तारो येन। अनेन सुरतावसानं सूचितम्। अष्टविधं हि सुरतं रतिरहस्योक्तम्। तत्र बन्धस्य सर्वान्तत्वात् साम्प्रतं रतिविशेषमाह। पुनः किंविधया? मुखरेति। पूर्वं मुखरा पश्चाद् विशृङ्खला कटिभागस्यान्दोलनात्

विगलितबन्धना मेखला काञ्ची यस्या: सा तया। ''शृङ्खला पुंस्कटी वस्त्रबन्धे च निगडे त्रिषु। स्त्रीकट्यां मेखला काञ्ची सप्तमी रशना तथा।।'' ''क्लीबे सारसनं चाथ'', ''पुंस्कट्यां शृङ्खलं त्रिषु'' **इत्यमर**:। किं वा विशिष्टं शृङ्खलं शृङ्खलं पुंस्कटिमेखलाविशृङ्खलं मुखरं प्रचलद्रूपम्, तया शब्दायमानं विशृङ्खलमेव मेखला यस्या इति विग्रह:। अनेन पुरुषायितं स्पष्टमुक्तम्। तथा च, ''स्वेच्छया श्रमिणि वल्लभेऽथवा योषिदाचरति पुरुषायितम् आदितो घटितयन्त्रमेव वा तां निपात्य नरबद्धं चेष्टते'' इति। पुन: किंविधम्? सकचेति। कचग्रहणसहितं चुम्बनदानं यस्य स तम्। इदमपि विपरीतरति-(त)सूचनमधिगन्तव्यम्। विपरीतरते तथाविधचुम्बनस्य सुखदत्वात्। तथा च, ''लीलासनगतामुच्चैर्दूरीकृतमुखी पुमान्।।'' इति। विपरीतरते कान्तां केशेष्वाकृष्य चुम्बतीति। लीलासनगतामिति लीलासनाख्यबन्धमास्थिता-मित्यर्थ:।।६।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।६।। चरणयो रणितौ मणियुक्तमंजीरौ यस्यास्तया। अनेन लीलाविशेष: सूचित:। संपूर्णतां नीत: सुरतस्य विस्तारो येन तम्। पूर्वं मुखरा पश्चात् विशृङ्खला त्रुटितगुणा कांची यस्यास्तया। केशग्रहणेन सह चुम्वनदानं यस्य तम्।।६।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।६।। तन्नखाग्रस्पर्शेन नि:सहताऽपगमानन्तरं मम चरणयो रणितौ शब्दायमानौ मणिनूपुरौ रत्नखचितमञ्जीरौ यस्यास्तया। अनेन भ्रमरिको नाम नायिकाकृतबन्धविशेषो दर्शित:। एतल्लक्षणं **पञ्चसायके** द्रष्टव्यम्। अनन्तरं मम तादृशरतिचेष्टितेन परिपूरित: पूर्णतां नीत: सुरतस्य वितानं विस्तारो येन तम्। यथेष्टविविधबन्धसुरतापादन-पर्याप्तोत्साहमित्यर्थ:। अनन्तरं वीरायितमाह; तस्य तादृशप्रौढसुरताभोगमाकलय्य मुखरविशृङ्खलमेखलया आदौ मुखरा रतिव्यापारेण रणन्ती पश्चात् विशृङ्खला परिहितनिजदेशसन्निवेशात् त्रुटितगुणमेखला काञ्ची यस्यास्तया। अयं प्रेङ्खोलितनामक-विपरीतरतिविशेष:। अनन्तरं सकचग्रहं कचग्रहणसहितं चुम्बनदानं यस्य तम्। मम तादृशरतिकौशलमालक्ष्य पारितोषिकतया वामकरेण चिकुरमानमय्य दक्षिणेन चिबुकमुन्नमय्य पुन: पुन: चुम्बनं कृतवन्तमित्यर्थ:। उक्तं च; 'विपरीतरतेर्नार्य्या: सकचग्रहचुम्बन' मिति।।६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

६- चरणरणितेति; चरणयो रणितौ शब्दितौ मणिनूपुरौ यस्या: श्रीराधाया:। कुम्भनरपति: श्रीराधाया: इमां स्थितिं ग्राम्याख्यं वदतीति सूचयति। **रसिकसर्वस्वे** तत् विहितं कथम्;

उत्तानिताया: सुरते यदोरू स्त्रीशीर्षकान्तोरूगतौ भवेताम्।

ग्राम्यं तदा स्यात् कटितो यदास्या बर्हि भवेत: किल नागराख्यम्।।

अनेन परिपूरित: सुरतव्यापार: येन कृष्णेन यस्या: काञ्ची विशृङ्खला। छिन्ना कटिदाममाला रसना छिन्नत्वात् यस्या:। चुम्बनम् केशग्रहणम् इत्येव सञ्जीवनीकारस्य उल्लेख: विपरीतरतावेव विचारितम्। विपरीतरतौ नायिकाकृतबन्ध: **पञ्चसायके** वर्ण्यते, चक्रवद् भ्रमति कुञ्चिताङ्घ्रिका भ्रामकं नृजघने समुच्छ्रितेति।।

सकचग्रहचुम्बनदानम् विपरीतरतिं द्योतयति। **रतिरहस्येऽपि;**

शृङ्गारे चुम्बनं कार्यं पुंसालिङ्गनपूर्वकम्। विपरीतरते नार्या सकचग्रहचुम्बनम्।।

इदं खलु राधाया: हंसलीलाख्य: विपरीतबन्ध:। तद् यथा ,

"नारीपादद्वयं दत्त्वा कान्तस्योरूयुगोपरि।

कटिमान्दोलयेत्याशु: बन्धोऽयं हंसलीलक:।।"

अपि च, द्वौ पादौस्कन्धसंलग्नौ क्षिप्त्वा लिङ्ग भगे लघु:।

कामयेत् कामुक: कान्तां बन्ध: काकपदो मत:।। इति **स्मरदीपिकायाम्**।

चरणौ रणितौ मणियुक्तमञ्जिरौ यया तथा। अनेन कृष्णस्य लीलाविशेष: सूच्यते। स: कृष्ण: सुरतस्य विस्तारं नीतवान्। पूर्वं काञ्चीदामस्य मधुरशब्दमपि पश्चात् छिन्नसूत्रेण इतस्तत: पतन्ति नुपुराणि यस्या:। स खलु श्रीकृष्ण: केशराशिं परामृश्य चुम्बतिश्रीराधिकाम् तथा भूतस्य श्रीकृष्णस्य इति भाव:। अत्र सुरतस्य विस्तार:द्योत्यते रतिव्यापारे व्यापारिता सती तस्या: पादयौ: मणिनुपुरौ शब्दायितौ ग्राम्याख्यरतिबन्धं सूचयति **राणाकुम्भनरपति:**। **रसिकसर्वस्वमुद्धृत्य रसिकरङ्गदाकार:** भ्रामरिकोनामबन्धस्य निर्णय: स्वल्वेतत् दर्शयामास। एतस्य लक्षणं **पञ्चसायके** द्रष्टव्यम्।।६।।

**७-रतिसुखसमयरसालसयादरमुकुलितनयनसरोजम्।**

**नि:सहनिपतिततनुलतया मधुसूदनमुदितमनोजम्।। सखि०।।७।।**

**(१) नारायणदासकृत-सर्वाङ्गसुन्दरी**

।।७।। रते: श्रृङगाररुपाया: यत्सुखं तस्य य: समय: कालस्तत्र यो रसोऽनुरागस्तेनालसया मन्यतेऽत्यर्थ:। एतेन च्युति: सान्निध्यसूचनम्। यदुक्त **रसिकसर्वस्वे**। "मुहु: स्वजघनाश्लेष: सीत्कारो वीतलज्जता। हुंकार: श्वसितं नार्य्याश्च्युति सान्निध्यसूचकम्।।"

पुन: कीदृशं दरमुकुलितनयनसरोजम् अर्द्धनिमीलितनेत्रपद्ममित्यर्थ:। एतेन च्युतिकाल: सूचित:। ''मूर्च्छा निमीलनं चाक्ष्णोश्च्युतिकालस्य लक्षणमिति'', नि:सहेत्यादि। नि:सहोऽसहनमबलत्वमिति यावत्। ''निर्निश्चयनिषेधयोरित्**यमर:**। नि:सहे निपतिता तनुलता यस्या इति विग्रह:। तनुलताया: कान्तवक्षसि निपातने च्युतिसमयानन्तरमवस्था-विशेषमाहु:।

अङ्गेस्वेद: श्लथत्वं च केशवस्त्राद्यसंबृति:।
जाते रतिसुखे नार्य्या विरामे सा च दृश्यते।। इति ।।

कीदृशं मधुसूदनं, उदितसरोजं विगलितवसनायास्तनुलताया: दर्शनादित्य-भिप्राय:। अत्रार्थे **सरस्वतीकण्ठाभरणम्,**

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा नान्येन वासो विगलितकवरीभारमंसं वहन्त्या:।
भूयस्तत्कालकान्ति द्विगुणितसुरत प्रीतिना शौरिणा व:
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहुलक्ष्म्या: पुनातु।।७।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। अपि च, रतिसुखेति। रतिसुखसमये द्वयोरेककालं रेत:कणक्षरणसमये रस: तदेकाग्रीभावस्तेन अलसा मन्थरा। एतेन च्युतिसुखासन्निध्यं सूचितम्। उक्तं च **रसिकसर्वस्वे**, मुहूश्चजनाश्लेष: सित्कारो वीतलज्जेता। अङ्गावधूननं नार्याश्च्युतिसान्निध्य-सूचकम्।। अपि च, दर[५४]मुकुलिते ईषन्निमीलिते नयनसरोजे यस्य येन वा। एतच्च च्युतिकालसूचकम्। उक्तं च **भरतेन** 'मूर्च्छना मीलनं चाक्ष्णोश्च्युतिकालस्य सूचकम्। सर्वमेतत्परिज्ञाय साधयेच्चस्वयं तत:।।' अपि च, नि:सहा असमर्था निपतिता शयेन एव तनुलता यस्या:। एतेन विपरीतसुरतं सूचितम्। तदुक्तं **कोकेन**, 'स्वेच्छया मिलितवल्लभोऽथवा योषिदाचरति पुरूषायितम्। आदितो घटितयन्त्रमेव वा तं निपात्य नरवद्धि चेष्टते।। चक्रवद्भ्रमति कुञ्चितत्रिका भ्रामयेच्च जघनेऽथ तद्गते। सर्वत: कटितटभ्रमो यदि प्रेङ्खपूर्वमिदमुक्तमुतम्।' एतेन च्युतिकालोत्तरावस्था सूचिता। तदुक्तं **भरतेन**, 'अङ्गे स्वेद: श्लेथत्वं च केशवस्त्रादिसंवृति:। जाते च्युतिसुखे नार्या विरामेच्छा च गम्यते।।' अपि च, मधुसूदनं मधुविनाशिनम्। उदितमनोजमभ्युदितकामम्।।७।।

## (३) जगद्धरकृत- सारदीपिका

।।७।। रतिसुखेति रतिसुखसमये सुरतसुखकाले प्रीत्या अलस्या अलसयुक्तया, दरमुकुलितनयनसरोजं ईषन्मीलितनेत्रकमलं नि:सहा असमर्थानिपतिता तनुलता

शरीरलता यस्यास्तया कथंभूतं कृष्णं मधुदैत्यं सूदयतीति तम् । उदित: जातो मनोज: कामो यस्य तम् ।।७।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।७।। पुन: कीदृश्या मया ? रतिसुखेति। रतिसुखसमये सुरतसुखप्राप्तिकाले लोकोत्तरां काष्ठां प्राप्तो य: संभोगशृङ्गाराख्यो रसस्तेनालसया मन्थरया। कीदृशं कृष्णम् ? दर इसन्मीलिते मुद्रिने नयनसरोजे नेत्रकमले यस्य तम्। एतेन युगपदेव द्वयोरानन्दावाप्ति: सूचिता। तदुत्कं रतिरहस्ये 'मूर्च्छना मीलनं चाक्ष्णोश्च्युतिकालस्य लक्षणम्' इति। पुन: कीदृश्या मया ? नि:सहाऽसमर्था अत एव किसलयशयने निपतिता तनुलता यस्यास्तया। अनेन सुरतान्तसमय उक्त:। तदुक्तम्, 'अङ्गे खेद: श्लथत्वं च केशवस्त्रादिसंवृति:। जाते च्युतिसुखे नार्या विरामेच्छा च जायते।।' इति। नन्वभिसारे विघ्नबाहुल्यात्कथमेतावान्क्रियाकलाप: संभविष्यतीत्यत आह मधु २ सूदनमिति। मधुनामानं दैत्यं सूदितवान् यस्तस्याभिसारविघ्ननिवारणे कियान्परिश्रम इति भाव:। कीदृशं मधुसूदनम् ? उदितस्तत्कालत्रुटित: मुक्ताहारकाञ्चीगुणस्तस्य स्थानम्। पुन: सचन्दनं संजातपयोधरश्रोणीपरिसरस्य रशनादिना मल्लज्जितस्मितराधाया अङ्गविलोकनादिना पुनराविर्भूतो मनोज: कामो यस्य तम्। तदुत्कम्, 'अधस्तने च्युते प्रीतिरूपचारैरुपस्कृता। सविश्रम्भकथायोगैस्तै रतिं नयते पराम्।।' इति। अत्रोत्कण्ठिता नायिका। तदुक्तम्, 'नैवागत; समुचितेष्वपि वासरेषु प्राणेश्वर: स्वगुरूकार्यवशेन यस्या:। दुर्वारवृत्तविरहज्वरतापिताङ्गीमुत्कण्ठितां वदति तां **भरत:** कवीन्द्र:।।' इति।।७।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।७।। एवं वाह्यसम्भोगशृङ्गारमुपवर्ण्यान्तरसम्भोगशृङ्गामुपवर्णयति। रतीति। हे सखि ! रति: सुरतं तत्र यत्र सुखं अथवा रतिस्थायिकतरुणं तस्य समय: आविर्भावकाल: तत्र यो रस: विभावादिव्यङ्ग्यालौकिकसुखास्वादलक्षण: उक्तं च, ''अलौकिकसुखास्वादो रस इत्यभिधीयते'' इति एवं विधेन रसेन अलसया परवशया तत्कालविगलितवेद्यान्तरया इत्यर्थ:। हेतुगर्भविशेषणं चैतत् अत्रैव बोद्धव्यम्। रत्यादिस्थायिको विभावादि व्यङ्ग्यालौकिकसुखजनका निराश्रयपदार्थविशेषो रस इति केचित्। तदुक्तम्,

रामादेर्हृदिकारणोपजनित: कार्य्यै: प्रतीति गत:
संपुष्ट: सहकारिभिर्जनयति स्थायी सुखं वा सुखम्।
भावेनाथ च वर्णनानुकरणै: काव्येऽपि नाट्येऽपि च
व्यक्तोऽयं तु निराश्रय: सुखकर: सभ्यै:रसश्चक्ष्यते।।इति।।

रत्याधारान्त: करणाभिव्यक्तविभावाद्यान्तरकरणवृत्तितिरस्कृतावरणकं ब्रह्मस्वरूपमेव रस इत्यभिनवगुप्तपादा उदाहरन्ति। अतएव श्रुतिप्रमाणयन्ति ''रसो वै स: रसज्ञह्येवायं लब्धानन्दी भवतीति''। रसपारवश्यादे: निसत्त्य जीवन प्रयत्नधारणयोग्या अतएव निपतितशय्यायामवस्थिता परिवर्त्तनादिपरिज्ञान-शून्यतयेत्यर्थ:। एतादृशी तनुलता गात्रलतिका यस्यास्तया एवंविधया मया सह दरमुकुलिते सुखपारवश्येन ईषन्निमीलिते नयनसरोजे सरोजकल्पनयने यस्यतम्। अतएवोदित: दृष्टिसम्भोगादिनोत्पन्न: मनोज: कामो यस्य तादृशं परिपूर्णसम्भोगवाञ्छ-मित्यर्थ:। एतादृशं मधुसूदनं मधुनामदैत्यघातुकं केशिमथनं मया सह रमयेत्यन्वय:। अत्रोभयो: समरति: सूचिता ।।७।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।७।। मया पुन: किम्भूतया तत्राह, रति सुखसमयरसालसया सुरतसमये रसेन श्रृङ्गाररसेन अलसया च्युतिकालीनसुखविशेषानुभवेन मन्दक्रिययेत्यर्थ:। 'अलस: पादयोगे स्यात् क्रियामान्द्ये द्रुमान्तरे' इति। चक्षु अलसयेत्यनेन तदविनाभूत-चक्षुनिमीलनादिकं दर्शयता च्युतिलक्षणं दर्शितम्। तदुक्तम्, 'मूर्च्छनामीलनं चक्षोश्च्युतिकालस्य लक्षणम्। तत: स्वजधनाश्लेष: शीत्कारो वीतलज्जता।। हुंकार: शाश्वतं नार्याश्च्युतिसान्निध्यकारका:।' पुन: किम्भूतम्? तं दर ईषत् मुकुलितं मुद्रितं नयनसरोजं नयनकमलं येन तम्। एतदपि च्युतिकालीनसुखसूचकमेवेत्युक्तम्। मया पुन: किम्भूतया? नि:सहारतान्ते असमर्थात् अतएव निपतिता तनुलता यस्यास्तया। एतेन सुरतान्तावस्था दर्शिता। तदुक्तम्भारते, 'अङ्गस्वदे: श्लथत्वञ्च केशवस्त्रादि-सम्वृत्ति:। या ते च्युतिसुखेनार्ये विरागेच्छा च गम्यत' इति। तं पुन: कीदृशम्? मधुसूदनं मधुनामदैत्यहन्तारम्, वीरसूचनार्थं पुनरुक्ति:। यद्वा मधु पुष्परसं पिवतीति मधुसूदनं, सूदधातु: पानार्थ:, धातोरनेकार्थत्वात्। अतएव उदितमनोजम् उदितकाम-मित्यर्थ:।।७।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।७।। एवं [९] सोत्कर्षमुक्त्वा तज्जनितरताधिक्यमाह[१०]रतीति। पुन: कीदृश्या मया? रति[५८]सुखमये [११]सुरतसुखकाले यो रसोऽनुराग: सुरतश्रमेण निद्रारूपो वा उद्भटशृङ्गाररूपो वा [१] तेनालसया [२] आलस्ययुक्तया मन्थरया वा। कीदृशम्? [३]दरमुकुलिते[४] ईषन्मुद्रितेऽर्धोद्घाटिते वा मन्थरे नेत्रकमले यस्य तम्। अनेनोभयो: सुरतानन्दावाप्ति: [५]जातेति[६] ध्वनि:। तदुक्तं **रतिरहस्ये,**

"मूर्च्छना मीलनं चाक्ष्णो[७]श्च्युतिकालस्य लक्षणम्" (इति)

[८]पुन: कीदृश्या[९]मया ? नि:सहाऽसमर्था किसलयपुष्पशयने निपतिता तनुलता [१०] शरीरलता यस्या [११]स्तया। [१२] एतेन सुरतान्त[१३]विरतिरुक्ता। [१४]यथा[१५]**भारते-**

[१६]"अङ्गस्वेद: श्लथत्वं च केशवस्त्रादिसंवृति:।
जातेच्युतिसुखे नार्या विरामेच्छा च जायते" [१७]इति।

पुन: कीदृशम्? मधुसूदने [१८]ममाधरपानकर्तरि दैत्यसूदने वा [१९]मुदित आनन्दं[२०]प्रापितो मनोज: कन्दर्पो येन। [२१]उक्तं [२२]**रतिरहस्ये,**

"अवसानेऽपि च प्रीति [२३]रुपचारैरुपस्कृता।
[२४]सविस्रम्भकथायोगै रतिं जनयते पराम्" ।।

[२५]इति। किञ्च [२६]षुञ्, [२७]अभिषवे इति धातु:। [२८]अत्राभिषवो राधाधरामृतखण्डनमिति ज्ञेयम्। [२९]मधुसूदनपदं[३०]दैत्यपरत्वे सिद्धम्। रसवदलङ्कार:।।७।।

१.नास्ति-अ.ब.इ.फ.ग.ह. २.तच्चोक्तम-इ.ग.ह.ज. ३.इति-इ.फ. ४.यस्या: सा तया-क.ल.म. ५.सम्पूर्णं-क.ल.म. ६.येन तम्-क. ७.यस्या:सा तया-क.यस्या:-ल.म. ८.यस्य स:-ल.म.येन-क. ९.स्वोत्कर्षम्-इ.फ.ग.ह.ज. १०.रतिसुखेत्यादिना-इ.फ.ग.ह.ज. ११.सुरतकाले तत्सुखसमये-ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।७।। रतिसुखेति। रतिसुखसमये सुरतसुखकाले [३१] प्रीत्यालसया आलस्य- युक्तया दरमुकुलितनयनसरोजं ईषदुन्मीलितनेत्रकमलम्। नि:सहा असमर्था निपतिता तनुलता [२]शरीरतला [३]यस्यास्तया। [४] कथम्भूतं [५]कृष्णम्? मधुदैत्यं[६]सूदयतीति तम उदितमनोजं जातकामम् ।।७।।

१.तेनालसयुक्तया-ज. २.नास्ति-अ.ब.आलसयुक्तया-फ.ग.ह. ३.नास्ति-अ.ब.इ.फ.ह. ४.ईषन्मुद्रिते उद्घाटिते मन्थरे-अ.ब. ५-६.नास्ति-अ.ब. ७.रति-अ.ब.इ.फ.ग.ह.ज. ८-९.नास्ति-इ.फ.ग.ह.ज. १०.नास्ति-ह. १२.नास्ति-अ.ब.एतेनैव-इ.फ.ग.ह.ज. १३.विरते: ध्वनि:-अ.ब. १४.-१५.नास्ति-अ.ब.यथा भरते-ह. १६.अङ्गखेद:-ह. १७.इति भारते-अ.ब. १८.मयाधर-अ. १९.नास्ति-अ.ब. २०.पोषितो-ग. २१-२२.नास्ति-अ.ब. २३.उपकारै:-अ.ब. २४.अयमुत्तरार्धो नास्ति-अ.ब. २५.इति रतिरहस्ये-अ.ब. २६.षुञ्, अभिषब:।श्रीराधा-ह. २७.अतिषवे-अ. २८.स चात्र राधाधरामृत-खण्डनम्-अ.ब. २९.मधुसूदनपदं प्रसिद्धम्-ह. ३०.दैत्यपरे प्रसिद्धम्-इ.फ.ग.ज. ३१.रसालसया-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।७।। रतिसुखेति। रतिसुखस्य समये रतान्तकाले रसेन अलसतया। दरमुकुलिते ईषत्सङ्कोचिते नयनसरोजे नेत्रोत्पले यस्य तम्। एतेन समसम्भोग: उभयोरपि समकालानन्दोदयात्। नि:सहं सोढुमशक्यं तया निपतिता तनुलता यस्या: तया।

नानाबन्धव्यापारकरणरहितयेत्यर्थ:। अत: उदित: मुदित: मनोजो येन तम्। मधुसूदनमिति पुनर्विशेष्यग्रहणं विशेषपरम्। तादृशदैत्यनाशकशूरस्य अबलासम्भोगेऽपि वृष इव पुन: पुन: सुरतशीलमिति कामिनीभ्यो कामुकातिशय: श्लाघ्य इति (भाव:)।।७।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।७।। पुन: किंविधया? रतिसुखेति। रते: सम्भोगरूपाया: सम्बन्धि यत् सुखं निर्वृतिस्तत: समये यो रस आस्वाद:, सुखस्यार्थात् रागो वा तेनालसया च्युतिसान्निध्यसूचनम्। यदुक्तम्, ''मुहु: स्वजघनाश्लेष: सीत्कारो वीतलज्जता। हुंकारश्वसितं नार्या श्च्युतिसान्निध्यसूचनम्।।'' इति। ''पारदास्वादयो: रस:'' इति **मेदिनी'**। पुन: किंविधम्? दरमुकुलितेति। दरमुकुलितम् ईषन्निमीलितं नेत्रसरोजं येन स तम्। अनेन च्युतिकाल: सूचित:। यदुक्तम्, ''मूर्च्छा निमीलनं चाक्ष्णोश्च्युति-कालस्य लक्षणम्'' इति। अनेन नायिकानायकयोर्विशेषणद्वयेन च्युतियौगपद्यप्रतिपादनात् समरतमुक्तम्। तथा च, ''शशके पद्मिनी तुष्टा, मृगे तुष्टा तु चित्रिणी। शङ्खिनी वृषभे तुष्टा, हस्तिनी रमते हये।। उच्चनीचातिनीचैश्च तथाप्युच्चेन वर्ज्जितम्। ख्यातं समरतं चैव द्विषन्ति चान्यथा स्त्रिय:।।'' इति। पुन: किंविधया? नि:सहेति। नि:सहोऽसहन-मबलत्वमिति यावत्। तेन निपतिता तनुलता यस्या भूमाविति शेष:। विपरीतरते तु नायकस्य वक्षसि पतनमिति मन्तव्यम्। तनोर्लतात्वप्रतिपादनेन पतनं समुचितम्। एतेन च्युतिसमयानन्तरो, चितावस्था कथिता। यदुक्तम्, ''अङ्गे स्वेद: श्लथत्वं च केशवस्त्रादिसंवृति:। जाते च्युतिसुखे नार्या विरामेच्छा च दृश्यत।।'' इति। पुन: किंविधम्? मधुसूदनमिति। मधुनामानं दैत्यं सूदयति दहतीति स तम्। केशिमथन-पदविशेषणत्वेन इदं पदं योज्यम्। अन्यथा पौनरुक्त्यप्रसङ्ग:। पुन: किंविधम्? उदितमनोजमिति। उदित: उदयं प्राप्त: मनोजो यस्य स तम्। विगलितवसनाया: राधाया: तनुलतादर्शनादित्यभिप्राय:। अत्रार्थे **'सरस्वतीकण्ठाभरणम्'**, ''उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ मानिनैकेन कृत्वा, धृत्वा चान्येन वासो विलु(ग)लितकबरीभारमंसे वहन्त्या:। भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा व:। शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्या: पुनातु।।'' इति। एतेन सकलशृङ्गाररसावतरणं दर्शितम्।।७।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।७।। बालवोधिनीरतिः शृङ्गाररूपा तया यत्सुखं तस्य यः समयः कालः तत्र यो रसः तेन अलसा यस्याः तया; ईषन्मुकुलिते नयनसरोजे यस्य तम्। निःसहोऽसहनमवलत्वं इति यावत् निःसहेन निपतिता तनुलता यस्यास्तया, मधुसूदनमिति श्लिष्टं अनेक भृङ्गो यथान्यकुसुमावलीनां मधु क्रमेणास्वादयन् कमलिन्युत्कर्षमनुभूयतस्यामासक्तो भवति, तद्वत् अयमपीति स्वमनसो वैदग्ध्यमेव वोधितम् अतएवाविर्भूतो मनोजः कामो मय्यभिलाषो यस्य तम्।।७।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।७।। अनन्तरं रतिसुखसमयस्य सुरतावसानसमयस्य यो रसः अलौकिक, सुखस्वादलक्षणः, उक्तं च, 'अलौकिकसुखस्वादः रस इत्यभिधीयते' इति। तेनालसया, तत् पारवश्यसञ्जातमोहयेत्यर्थः। तत्समय एवानन्दपारवश्येन दरमुकुलिते ईषन्मुद्रिते नयनसरोजे नेत्रपद्मे यस्य तम्। अनन्तरं निःसहः असहनवलत्वं तेन निपतिता कान्तोरसि नितरां परिवर्त्तनादिज्ञानशून्यतया पतिता तनुलता यस्यास्तया। अनेन सुरतान्त उपलक्षितः। अनन्तरं मम तादृशभावदर्शनेन उदितः पुनरुद्भूतो मनोजः सम्भोगाभिलाषो यस्य तम्। मधुसूदनमिति अश्रान्तिसूचनापादकविशिष्टनामनिर्देशः। उदितमनोजं त्वत् रतिकरणाय। श्लिष्टार्थेन भृङ्गो यथान्यकुसुमानां मधून्यास्वादयन् पद्मिन्या एवोत्कर्ष मनुभूयात्यासक्तो भवति तथा अयं मय्यपीति ध्वनितम्।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। रतिसुखसमयेति; रतिसुखसमयो नाम रतिक्रीडानन्दभोगकाले रसालतया नाम रसक्षरणं नाम द्वयोरेकस्मिन्काले रेतक्षरणमेकाग्रीभावं जनयति। तेन उभययोः शीथिलितानुभवने शरीरयोः आलस्यं निद्रयादरमुकुलितं नयनं अर्थात् अर्द्धमुकुलितं नेत्रयुगञ्च भवति। अत्र च्युतिसुखसानिध्यञ्च ध्वन्यते इत्यपि कुम्भनरपतेः मतम्। तच्च सञ्जीवन्या : मतम्। युगपत् च्युतिलक्षणं **रसिकसर्वस्वे** यथा,

मुहुश्च स्वजनाश्लेषः सीत्कारो वीतलज्जया। अङ्गावधूननं नार्याश्चुति सानिध्य सूचकम्।

युगपद् सुखरसं **रतिरहस्ये** वर्णितमस्ति तद्यथा

मूर्च्छना मिलनं चाक्ष्णोश्चुति कालस्य सूचकम् सर्वमेतत्परिज्ञाय साधयेच्च स्वयं ततः।
इति **भरतः**।

अर्धनिमिलिते लोचने शिथिलशरीरे सुरतान्तः कालः द्योत्यते। विपरीतसुरतं **कोकेन** सूचितम्। तद्यथा;

स्वेच्छया मिलितवल्लभोऽथवा योषिदाचरति पुरुषायितम्।
आदितो घटितयन्त्रमेव वा तं निपात्य नरवद्विचेष्टते।।
चक्रवद्भ्रमति कुञ्चितन्त्रिका भ्रामयेच्च जघनेऽथ तद्गते।
सर्वत: कटितटभ्रम यदि प्रेङ्ख्पूर्वमिदमुक्तमुन्नतम्।।
च्युति कालोत्तरावस्था अनेन सूचितम्।
विकार: स्तनप्रान्तादि प्रकटनं तत् सहितं सविकारम्।। अथवा
विकार: कामजोभाव: कुचोदरादिप्रकटनम्।।

**रसिकसर्वस्वे** उक्तम्, नाभिकुचोदरप्रकटनव्याजेन यद्योषितां

साकांक्षं मुहुरीक्षणं स्खलितता निबिनिबन्धस्य च।
केशभ्रंशनसंगमौ च क्रामितुर्मित्रादि संदर्शनै:
सौभाग्यादिगुणप्रशस्तिकथनैस्तस्यानुरागेङ्गितम्।।
अङ्गस्वेद: श्लथत्वञ्च केशवस्त्रादि सवृंति:।
जाते च्युतिसुखे नार्या विरामेच्छा च जायते।। इति **भरत**:।।

नि:सह निपतितततनुलतया शरीरं क्लान्तं शिथिलं म्लानं शयनशीला अर्धनिमिलितलोचनापि मधुसूदनस्य मधुदैत्यस्य युद्धे हन्ता मधुसूदनस्य रतियुद्धे न क्लान्तता वर्त्तते। तस्य कामविकार: वर्द्धते एव। तथा भूतं मधुरिपून् मच्छमीपमानय मीलनार्थम्।। **रतिरहस्येऽपि** विवृणोति **सञ्जीवन्यनुसारम्** -

अवसानेऽपि च प्रीतिरुपचारैरुपस्कृता। सविस्रम्भकथायोगै रतिं जनयते पराम्।। इति ।। अत्र रसवदिति सञ्जीवनी।।७।।

**८-श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम्।**
**सुखमुत्कण्ठितगोपवधूकथितं वितनोतु सलीलम् ।। सखि० ।।८।।**

**(१) नारायणदासकृत-सर्वाङ्गसुन्दरी**

।।८।।अतिशयमधुवनशीलं कर्त्तुं सुखं वितनोत्विति वाक्यार्थ। उत्कण्ठा गोपवधूकथितं यन्मधुरिपुरतं तत् श्री जयदेवभणितमित्यर्थ:। ''शीलं स्वभावे सद्वृत्ते रतं निधुवनं च तत्'' इत्यमर। पुन: कीदृशं सलीलं ''हेलालीलेत्यमीहावा: क्रियाश्रृङ्गारभावजा:'' **इत्यमर**:। उत्कण्ठिता लक्षणं यथा,

उद्दाममन्मथमहाज्वरवेपमानां

रोमाञ्चकण्ठकितमङ्गतलं वहन्तीम्।

सस्वेदवेपथुघनोत्कलिकाकुलाङ्गी-

मुत्कण्ठितां वदति तां भरतः कवीन्द्रः।।८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।८।।अपि च, श्रीजयदेवेति। इदं गीतप्रतिपादितप्रमेयक, व्युत्तम्भितवक्तृत्वेनोत्कण्ठित-गोपवधूकथितं राधाकथितं सुखं वितनोतु। अर्थात् गायतां शृण्वतां च। किंविशिष्टम्? श्रीजयदेवेन भणितम्। जयदेवभणितरूपमित्यर्थः।श्रीजयदेवति सर्वत्रः पद्मावत्या आराधको जयदेवः श्रीजयदेव इति मध्यमपदलोपी समासः। पूनः किंभूतम्? अतिशयेन मधुरिपोर्निधुवनशीलं सुरतचरितं यत्र तत्तथेति। उत्कण्ठितेत्यदि। उत्कण्ठिता नायिका। विप्रलम्भः शृङ्गारः। अत्र लयश्छन्दः।।८।।

१ - एवं मानादि प्रकरणेऽस्मिनसे मुनिराह...

## (३) जगद्धरकृत- सारदीपिका

।।८।।श्रीजयदेवेति इदं श्रीजयदेवेन भणितम् उक्तं गीतकर्तृ सुखं पारलौकिसुखानि ऐहिकानि च वितनोतु विस्तारयतु केषां गायतां श्रृण्वतां च कथंभूतं श्रीजयदेवभणितम् अतिशयमधिकं मधुरिपोः कृष्णस्य निधुवनशीलं सुरतचरितं यस्मिन्। पुनः कीदृशम्, उत्कण्ठितया गोपवध्वा राधिकया कथितं सलीलं श्रृङ्गाररसक्रियासहितम्।।८।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।८।।श्रीजयदेवेति। इदं जयदेवकविना भणितं यदुत्कण्ठितां या गोपवध्वा राधिकायाः कथितं मदवेचनं सुखं तनोतु विस्तारयतु पठतां श्रृण्वतां च। कीदृशम्? मधुरिपोः श्रीकृष्णस्य निधुवनं सुरतक्रिडां शीलयतित्येयेवंरूपम्। 'आपोवनं निधुवनं सुरतेन समं त्रयम्' **इत्यमरः**।।८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।८।।श्रीजयदेवेति। अतिशयमाधिक्यमस्यास्तीति अतिशयं, सातिशयमित्यर्थः। अनेन सर्वातिशायितं व्यज्यते। एतादृशं यन्मधुरिपुनिधुवनं श्रीकृष्णसुरतं तस्य शीलं स्वभाववर्णनं यस्य एतादृशम्। उत्कण्ठिता सुरतसंजातोत्कण्ठा विरहोत्कण्ठिता नायिका या राधिका तया च, कथितं सख्ये निवेदितं च, यदतिशयमधुरिपुनिधुवनशीलं तद्वा कर्त्तृ अत्र प्रतिपाद्येन प्रतिपादकलक्षणा तथा च शीलप्रतिपादक- प्रबन्धकर्त्तेत्यर्थः।

सुखं श्रोतृणां गातृणां च निरन्तरसौख्यं वितनोतु विस्तारयतु। इदानीमियं राधिकाष्टविध-शृङ्गारनायिकासु विरहोत्कण्ठिताख्या, तल्लक्षणं तु, ''चिरयत्यधिकं कान्ते विरहोत्कण्ठिता मता'' इति तस्या: नायिकाया आनुकूल्यसम्पादने सहायत्वेन सख्येव ग्राह्या तदुक्तं **श्रृङ्गारतिलके**

दूती दासी सखि चैव धात्रेय प्रतिवेशिनी।
लिङ्गिनी शिल्पिनी चेति सहाया परिकीर्त्तिता:।।इति।।

एतन्मनसि निधायैवात्र गीते श्रीजयदेवेन सखिशब्दैनैव सम्बोधनव्यवहार:। न दूत्यादि शब्दैरिति।।८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।८।। कीर्त्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति। उत्कण्ठिता चासौ गोपवधूश्चेति उत्कण्ठितगोपवधू:, तया कथितं विलापरूपं कर्त्तृ इदं वाक्यं सुखं वितनोतु गायतां श्रृण्वतामित्यर्थ:। कीदृशम्? श्रीजयदेवभणितं(५४) वर्णितम्। पुन: कीदृशम्? अतिशयेन केशवस्य निधुवनशीलं यत्र प्रतिपद्यत इति भाव:। पुन: कीदृशम्? सलीलं लीला: श्रृंगारभावजा: तत्साहित्यमपि प्रतिपाद्यतयेत्यवधेयम्। 'निधुवनमायोधनमा:हु वन्धरिद' इति '**हारावली**'। 'स्वभावे शीलने शीलमि'ति '**धरणि**':।।८।।

S 'पादरोग' इति पाठ।
* मेदिनीकारास्तु 'क्लीबं' वृत्तविशेषे स्यात्त्रिलिङ्गो मत्ततुच्छयो:' इति।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।८।।[७]इदं जयदेवेन कविना भणितं शृण्वतां [८] पठतां सुखं वितनोतु विस्तारयतु। अतिशयेन मधुरिपुनिधुवनशीलं [९] श्रीकृष्णसुरतक्रीडास्वभावो यत्र। कीदृशम्? सुखं उत्कण्ठितया गोपवध्वा श्रीराधया कथितं भाषितम्।[१०] पुन:[११] कीदृशम्? सलीलं श्रृङ्गारविलास, लीलासहितम्। अनेन व्रजवधूकदम्बैरनास्वादितं श्रीराधासुरतमिति भाव:।।८।।

श्रीकृष्णोत्कण्ठया सख्याऽऽनीतया राधया तया।
उत्सारितवधूबृन्दो दृष्ट: कृष्णो गतिर्मम।।

[१२]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मज श्रीवनमालिभट्टविरचितायां वनमालि सञ्जीवन्यां श्रीगीतगोविन्दटीकायां षष्ठ: प्रबन्ध:।

१.सुलीलम्-ड.२.नास्ति-क.३.यस्या: सा-क.ल.म.४.त:५.नास्ति-ड.६.सूदयति तम्-ड.७.इदञ्च-अ.ब.८.नास्ति-अ.ब.ज.९.श्रीकृष्ण क्रीडा-अ.ब.श्री राधाकृष्ण सुरत क्रीडा ब.१०-११.नास्ति-अ.ब.इ.फ.ग.ह.१२.नास्तीयं पुष्पिका-अ.ब.इ.ग.फ.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।८।।श्रीजयदेवेति। इदं श्रीजयदेवेन भणितमुक्तं गीतं [१] कर्तृ [२]पारलौकिकानि शुभानि ऐहिकानि च वितनोतु। [३]कीदृशं जयदेवभणितम्? अतिशयमधिकं [४] मधुरिपुनिधुवनशीलं कृष्ण [५] सुरतचरितं यस्मिन्। पुन: [६]कीदृशम्? [७]उत्कण्ठितया गोपवध्वा राधिकया कथितम्। पुन: कीदृशम्? सलीलं [८] शृङ्गारजक्रियासहितम्।।८।। [९]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां षष्ठ: प्रबन्ध:।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।८।।श्रीजयदेवेति। श्रीजयदेवेन भणितं उक्तं इदंमअद्भुतं आश्चर्यकरं मधुरिपो: निधुवनस्य शीलं यस्मिन् तत्। स्वभावचरित्रमिति यावत्। सलीलं विलासयुक्तं यथा स्यात्तथा। उत्कण्ठिता कालासहिष्णुतायुक्ता गोपवधू: तया राधया कथितं सुखं वितनोतु। उक्ता नायिका।।८।।

[११]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां षष्ठ: प्रबन्ध:।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।८।।श्रीजयेति ।श्रीजयदेवेन भणितमिदं गीतं कर्तृ सुखं वितनोतु। गायतां शृण्वतां चेत्यर्थात्। किंविधम्? अतिशयेत्यादि ।अतिशयेन मधुरिपोर्निधुवनं सुरतं शीलयतीति। शीलसमाधावित्यस्मात् ''शीलिकामिभिक्षाचरिभ्योऽण्'' इत्यण् तत्। अथवा अतिशयमधुरिपुनिधुवनशीलं कर्तृ सुखं वितनोतु। ''रतेरतिशय: पूज्य: रतं निधुवनं च तत्'' **इत्यमर:**। ''शीलं स्वभावे सद्वृत्ते'' इति **कुमुदाकर:**। तेन निधुवनशीलं सुरतवृत्तमित्यर्थ:। किंविधम्? श्रीजयदेवभणितं गीतरूपेणेत्यर्थात्। पुन: किंविधम्? उत्कण्ठितेति। उत्कण्ठितया राधिकया सख्यै कथितम्। पुन: किंविधम्? सलीलमिति ।गणयति गुणग्राममित्यत्रोक्तलक्षणया लीलया सह वर्तत इति। सलीलमिति कथितक्रियाविशेषणं वा। ''हेला लीलेत्यमी हावा: क्रिया: शृङ्गारभावजा:'' **इत्यमर:**।।८।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।८।। इदं श्रीजयदेवभणितं[१०] कर्त्तृ सुखं वितनोतु। किदृशम्? उत्कण्ठिताया गोपवध्वा: श्रीराधाया: कथितं यत्र तत्। तथा अतिशयेन मधुरिपो: सुरतक्रीडां शीलयति स्मारयति तत्तल्लीलया सह वर्त्तमानम्। रतं निधुवनमि**त्यमर:**।।८।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।८।। उत्तरलीलावर्णनाकर्णनाय कवि: श्रोतृन् प्रोत्साहयन् गीतं समापयति श्रीति। श्रीजयदेवेन भणितमिदं गीतमास्वादकानां प्रेमसौख्यं वितनोतु विस्तारयतु। सुखविस्तारे हेतु: कीदृश:, अतिशयोऽस्यास्तीति अतिशयम्। आर्शादित्वादच् अतिशयं यन्मधुरिपो: श्रीकृष्णस्य निधुवनं सुरतक्रीडा तस्य शीलं स्वभाववर्णनं यत्र तत्। 'शीलं स्वभावे सद्वृत्ते' **इत्यमर**:। किं वाऽतिशयेन मधुरिपोर्निधुवनं शीलयति स्मारयति तत्। यत: सलीलं रहस्यलीलया सह वर्त्तमानं, पुन: कीदृशम्, उत्कण्ठिताया गोपवध्वा: श्रीराधिकाया: कथितं यत्र तत् किं वा सलीलमनायासं यथा स्यात् तथा सुखं विस्तारयतु इत्यर्थ:। वाससज्जादशाशेषे मानस्य विरतावपि पारतन्त्रे तथा यूनोरुत्कण्ठा स्यादसंगमादिति। मानापगमानन्तरमस्या उत्कण्ठा।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।। श्री जयदेवेति; इदमतिगम्भीरं प्रणयतत्त्वं कृष्णेन उत्कण्ठिताया: राधाया: सुरतिचरितं सरलतया श्रीजयदेव कथितं वाक्यं जयतु। अत्र लयच्छन्देति **कुम्भकर्ण**:।।८।।

**१५-हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवी-**
**वृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्डस्थलीम्।**
**मामुद्वीक्ष्य विलक्षितं स्मितसुधामुग्धाननं कानने**
**गोविन्दं व्रजसुन्दरीगणवृत्तं पश्यामि हृष्यामि च ।।१५।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।१५।। हस्तेति। हे सखि! गोविन्दं ब्रजसुन्दरीगणवृतं पश्यामि हृष्यामि चेति योजना। ननु मूढासि त्वं, यतस्त्वां विहायान्याङ्गनया सह विहरन्तुमपि हरिं पश्यामि हृष्यामीत्येतदुद्देशमपाकर्त्तुमाह, मामुद्वीक्ष्य विलक्षितस्मितसुधामुग्धाननं, हस्तश्रस्त-विलासवंशमिति, विलक्षितेन लज्जया या स्मितसुधा ईषद्धासामृतं तया मुग्धं सुन्दरमाननं यस्येति विग्रह:। अत्यन्तस्पृहणीयस्य वस्तुनो दर्शनमुपयुक्तमेवेत्यभिप्राय:। हस्तश्रस्तविलासवंशमिति भयादवगन्तव्यम्। व्रजसुन्दरीगणवृतोऽहं राधया दृष्ट इति सापराधमात्मानं मन्यमानस्य हरेलज्जाभयं च उपयुक्तं भयेन हस्तात् बस्तुश्रंसनं भवत्येव। यथोक्तं **कुमारसम्भवे**,

"नालक्षयत्साध्व ससन्नहस्त: शस्त्रशरंचापमपि स्वहस्तात्।" त्रैलोक्यनाथो ब्रजसुन्दरी मध्ये मां दृष्ट्वा विभेतीति राधाया: हर्षोद्गम:। पुन: कीदृशं, अतिस्वेदार्द्र-गण्डस्थलं, अत्र दर्शनं हर्षश्च द्वयमत्युपयुज्यते। तत्र ददर्श अतिसौन्दर्य्यात्। हर्षस्त्वनन्तरानुरागादिति व्यञ्जके सात्त्विकभावविशेषणत्वात्, पुन: कीदृशं, अनृजुभ्रूवल्लि मद्वल्लवीवृन्दोत्साहदृगन्तवीक्षितम्। अनृजुभ्रूवल्लि मद्वल्लवीनां यद्वृन्दं तस्य उत्सारी उर्द्धवगमनशीलो दृगन्त: कटाक्ष: तेन वीक्षितं दृष्टम् अनृजुत्वं भ्रूवल्या विस्मयाद्वेदम् कथमस्य राधामालोक्य हस्तविलासवंशश्रंसनं भवतीति विस्मयहेतु:। "गोपगोपालगोसंख्यागोधुनाभीरवल्लवा" **इत्यमर**:।।१५।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१५।। इदानीं मनसा भावितं परमेश्वरं दृष्टवा सखेदमाह, हस्तस्त्रस्तेति। हे सखि! 'वत' इति खेदे। अहं कानने वृन्दावने गोविन्दं पश्यामि व्यलिकं हृष्यामि च। किं विशिष्टं गोविन्दम्? व्रजसुन्दरीगणवृतं गोपाङ्गनासमुहयुक्तम्? मामुद्वीक्ष्य मां दृष्ट्वा हस्तात्स्त्रस्त: पतितो विलासवंश: केलीवेणुर्यस्य। अत एव विलज्जितं विह्वलीभूतम्। पुन: किंभूतम्? अतिस्वेदेनार्द्रं गण्डस्थलं यस्य। 'गण्डस्थलाम्' इति पाठे मामित्यस्य विशेषणम्। संजातसात्त्विकभावां मां सोऽपि संजातसास्विकभाव इति हस्तस्त्रस्तेति युक्तम्। पुन: किंभूतम्? अनृजुभ्रुवल्लिमद्वल्लवीवृन्दोत्सारिदृगन्तवीक्षितम्। कुटिलभ्रूवल्लि-युतानां[६१] बल्लवीनां वृन्दं उत्सारि ऊर्ध्वप्रसरणशीलं दृगन्तवीक्षितं कटाक्षे क्षणं यस्य। अथवा, अनृजुभ्रूवल्लिमद्वल्लवीवृन्देन ऊत्सारिणा दृगन्तेन वीक्षितम्। एतावता राधां प्रति तस्य स्वभावावलोकनं दृष्ट्वऽन्याभिरपसृतम्। अत्र शार्दूलविक्रीडितं च्छन्द:। तथा दीपकमलंकार:। विप्रलम्भशृङ्गारो रस:। अत्र गोविन्दस्य व्रजसुन्दरीपरिवृतत्वेऽपि यत् आत्मौपाधिकदर्शनस्य लज्जिताहेतुत्वेन हर्षदर्शककर्म अतोऽपादानमौचितीमावहति। पाञ्चाली रीति:। लाटानुप्रासश्च। दक्षिणो नायक:। अन्यत्सर्वं समानम्।।१५।।

## (३) जगद्धरकृत- सारदीपिका

।।१५।। अधुना अत्युत्कण्ठया सख्या नीयमाना सा गोपिगणवृन्दं कृष्णं दृष्ट्वा अपरावर्तिसखीमाह हस्तेति हे सखि! गोविन्दम् अहं पश्यामि हृष्यामि हर्षं प्राप्नोमि च, पश्यामीति.......।।१५।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१५।। स्वमनोरथान्तरमाह, हस्तेति। हे सखि! अहं गोविन्दं कदा पश्यामि। कदाचिद्गोविन्ददर्शनं भविष्यतीत्याशङ्कायां काकु: अत एव हृष्यामि। तद्दर्शनजन्य आनन्दो

मम कदाचिद्भविष्यतीत्यप्राप्याशंसेव। पश्यामि हृष्यामीति भविष्यत्सामीप्ये वर्तमानप्रयोग:। कीदृशम्? व्रजसून्दरीगणवृतं गोपवधूकदम्बपरिवृतम्। ननु सपत्नीभि: परिवृतं दृष्ट्वा विलज्जितम्। पुन: किदृशम्? 'अन्यवधूभि: परिवृतोऽहमनया दृष्ट:' इति हेतोर्विषादसूचकं यत्स्मितं तदेव शुभ्रत्वादतिस्पृहणीयत्वाच्च सुधा तया मुग्धं मनोहरमाननं मुखं यस्य। पुन: कीदृशम्? अनृजु कुटिला भ्रुलता यासामेतादृश्यो या वल्लव्यो गोपवध्वस्तासां वृन्दमुत्सारयत्येवंशीलं दृगन्तवीक्षितं नेत्रान्तेनावलोकितं यस्य तम्। मय्यागतायां भिया दृगन्तचेष्टयान्यगोपीरपसारयतीत्यर्थ:। पुन: कीदृशम्? हस्तात्स्त्रस्तो विगलितो मर्द्दर्शानेन साध्वसवशात्स्खलितो विलासवश: क्रीडावेणुर्यस्य तम्। पुन: कीदृशम्? अतिशयेन स्वेदैरार्द्रं गण्डस्थलं[५५] यस्य तम्। सर्वत्र मामुद्वीक्षयेत्यस्यां संबन्ध:।।१५।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१५।। केशिमथनं रमयेत्युक्तेर्निर्भीक: स्त्रीगणासक्तश्च केशिमथन: कथमाने इत्याशङ्क्य। राधे वतस्योत्तरमाह। हस्तेति। हे सखि कानने वृन्दावने विहारदेशं दैवादागतां मामावलोक्येत्यर्थ:। अनन्तरमेव हस्ताभ्यां मद्भयाद्गलित: विलासवंश: वल्लवीगणविलासमूलकारणवेणुनालं यस्य तादृशम्। अनेन राधासकाशात् कृष्णस्यभीति: सूचिता, किञ्च, मामुद्वीक्ष्येति स्वेदेनाधिकश्रमजलेनार्द्रे परिप्लुते गण्डस्थले कपोलभागौ यस्य तादृशम्। अनेनापि राधासकाशात्कृष्णस्य भीति: सूचिता। लोकेऽपि हि यथा भयादतिस्वेदोद्गमदर्शनात्। किञ्च, मामुद्वीक्ष्यैव विलक्षितं प्राप्तवैलक्षण्यं स्मितसुधामुग्धं चाननं यस्य, अनेन कृष्णस्य भयं सूचितम्, अतएवानृजु: कृष्णसम्बन्धिदर्शनजनितभयावलोकने वक्राकारा या भ्रूवल्लि: सा आसामस्तीति भ्रूवल्लीमत्य: तादृशीनां वल्लवीनां वृन्दं समूहस्तस्य या उत्साहदृश: मन्मथोद्दीपकदृष्टय: तासामन्त:नाशं कल्प: संकोचो यस्मात्तादृगवीक्षितं वीक्षणं यस्य तादृशं, मद्भयेन निवारितगोपिकाविलासदृष्टि: वीक्षणशालिनमित्यर्थ:। अथवा अनृजुपदं दृगन्तविशेषणम्। अत्यन्त चञ्चलै: पूर्वोक्तप्रकारेण वक्राकारैर्दृगन्तैरपाङ्गैर्वीक्षितमवलोकनकर्मीकृतं शेषं समम् अनेन कृष्णं प्रति तासां तत्कालिन ईषत्प्रेमभङ्ग: सूचित:। आद्यव्याख्याने न कर्मधारयान्मत्वर्थीय दोष: तस्यानित्यत्वात्। तदनित्यत्वम्। एकदेशा नैकाधिकरण इति ज्ञापकात् सर्वधनी सर्वकेशीत्यादि भाष्यकारवचनाच्च। महाकवि प्रयोगश्च ''आ कैलासाद्विशकिशलयच्छेदपाथेयवन्त:'' इति। कोकप्रीतिचकोरपारणपटुज्योतिष्मती लोचने, इति, च, एतादृशं व्रजसुन्दरीपरिवृतं गोविन्दं पश्यामि, समनन्तरपूर्वकाले दृष्टवत्यस्मि।

अथच हृष्यामि सन्तुष्टवत्यस्मीति, अत्र वर्त्तमानसामीप्ये वर्त्तमानवदेति भूतार्थे उभयत्रापि लट्। अन्यथा लीये कुञ्जलीयावस्थितायाः राधायाः दवीयस कृष्णप्रतीति पश्यामीत्युक्तिविरोधात्। कृष्णसमीपवर्त्तिनि कुञ्जे निलीयावस्थानाङ्गीकारे वर्त्तमानप्रयोग एवाङ्गीकार्य्यः। अत्र कृष्णस्य राधाकर्मनिरीक्षणजनितं यद्भयं तस्य दर्शनाद्राधाया हर्षोऽवगन्तव्यः। तथा च मत्सकाशात्तस्य श्रीकृष्णस्य भीते वर्त्तमानत्वात्तद्दर्शनेन वल्लवोजनस्यापि तत्कालिके प्रेमभङ्गस्य सम्भवाच्च, मया सह रन्तुं सत्वरं सत्त्वनिःशङ्कमानेतव्य इति। काव्यलिङ्गमलङ्कारः।।१५।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१५।। कामपीडितराधा वशेनोपनीतकृष्णसाक्षात्कारं निवेदयति, हे सखि गोविन्दं कृष्णं पश्यामि तद्दर्शनेन हृष्यामि च, कानने व्रजसुन्दरीगणेन गोपनारीवृन्देन वृतम्वेष्टितमित्यर्थः। अतएव मामुद्वीक्ष्य दृष्ट्वा, विलक्षितमिति भावे क्तः विलक्षितेन लज्जया यत्स्मितं तदेव सुधा तया मुग्धं मनोहरम् आननं यस्य तम्। पुनः किम्भूतम्? अतिस्वेदार्द्रगण्डस्थलं मामुद्वीक्ष्यैव अतिस्वेदेन अतिधर्मेण आर्द्रस्तिमितं गण्डस्थलं यस्य एतादृशम्। तेन सात्त्विकभावो दर्शितः। पुनः किम्भूतम्?अतएव हस्तात् स्रस्तः विलासवंशः क्रिड़ानिमित्तवेणुर्यस्य तम्। पुनः किम्भुतम्? तथाभूतसम्भ्रमादिदर्शनेन अनृजुभ्रुवल्लीमतीनां कुटिलभ्रु वां वल्लवीनां वृन्देन समूहेन उत्सारिदृगन्तं न ऊर्द्धतिर्यग् गामि, दृगन्तेन वीक्षितं दृष्टमित्यर्थः। तेन तासां क्रोधातिरेको दर्शितः। तथाछलेन प्रबन्धेन मयि सानुकूल एव कृष्णः न भवत्या तदनु नायकोऽपि श्रमइति सूचितम्। प्रेयो नामालंकारः।।१५।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१५।। इदानीं सख्या नीयमाना राधा युवतिगणवृतं श्रीकृष्णं दृष्ट्वा परावृत्य [१२]आगतां सखीमाह, हस्तेति। हे सखि [१३]गोविन्दं कानने पश्यामि हृष्यामि च दृष्ट्वा हर्षं, करोमि। कीदृशम्? [१]व्रजसुन्दरीगणवृतम्। नन्वन्यस्त्रीगणवृतं [२] दृष्ट्वा कथं ते हर्षं, इत्यत आह, मामुद्वीक्ष्य दृष्ट्वा विलज्जितं अन्यगोपीगणवृतोऽहमनया दृष्ट इति [३] जातलज्जम्।[४]अथ वा लज्जासहितं यत्स्मितं तदेव सुधामृतमुज्ज्वलत्वात् स्पृहणीय-त्वाद्वा। [५] तथा मुग्धं सुन्दरमाननं मुखं यस्य तम्। ललाटत्रिवलीं [६]कृत्वाऽङ्गभङ्गमाह। [७]तादृशाननं पश्यन्त्याः कस्या मन्दभाग्याया नानन्दो भवेत् [८] इति [९] भावः। किञ्च युवतिगण[१०] परिवृतोऽप्यात्मानं सापराधमिव मन्यमानो मत्तो विभेति इति मे हर्ष इति भावः। पुनः कीदृशम्?[११] हस्तान्मर्दनेन मद्भयेन वा स्रस्तः स्खलितो विलासवंशः

क्रीडावेणुर्यस्य तम्। अधरामृत[१२]पानापराधी वंशोऽपि मद्भयात्पतित इति ध्वनि:। पुन: कीदृशम्? अनृजु: कुटिला भ्रूलता यासां व्रजवल्लवीनां गोपस्त्रीणां वृन्दमुत्सारयत्यपसारयति [१३] दृगन्तं नेत्रप्रान्तं वीक्षितमवलोकितं यस्य तम्। मामागतां दृष्ट्वा मद्भयाद्[१४] दृगन्तचेष्टयाऽन्यगोपीर-पसारयतीत्यर्थ:। पुन: कीदृशम्? अतिशयेन [१५] प्रस्वेदैरार्द्रे गण्डस्थले यस्य तम्। अनेन मद्दर्शनादेवा[१६]ङ्गो सानन्दो जात [१७] इति ध्वनि:। सानुकूलश्च नायक:। [१८] प्रेयो नामायमलङ्कार:। तल्लक्षणम्[१९] "प्रीतिप्रकाशनं तच्च प्रेय इत्यवगम्यते" इति **दण्डी** (२.२७९)। लज्जितमित [२०] भावे क्त:। मामुद्वीक्ष्येति सर्वत्र सम्बध्यते।।१५।।

१.व्रजसुन्दरीणां गणवृतं-अ.ब.२.नास्ति-अ.ब.३.सञ्जात-लज्जम्-इ.फ.ग.ह.ज.४.यद्वा-ग.५.यथा-अ.६.कृत्वाऽऽलिङ्गनं भङ्गमाह-इ.कृत्वाङ्गुलिभङ्गमाह-प.ग.ह.कृत्वाऽङ्गुलीकृतं भङ्गमाह-ज.७.तादृगाननं-इ.फ.ग.ह.ज.८-९.नास्ति-अ.ब.१०.वृतो-ग.११.हस्तान्मदृर्शनेन-ह.ज.१२.पानापराधात्-ग.१३.तद्दृगन्तं-अ.ब.ह.ज.१४.नास्ति-ग.तदङ्गचेष्टया-ज.१५.स्वेदै:-ज.१६.अङ्गे-ग.ह.ज.१७.इति ध्वनि: नास्ति-अ.ब.१८.प्रेषो-अ.ब.फ.प्रेङ्गो-इ.ग.ह.ज.१९.

प्रतिप्रकाशनं तत्प्रेषमभिधीयते-अ.प्रतिप्रकाशनं यत्र प्रेङ् खमभिधीयते-इ. प्रतिप्रकाशनं यत्र तत्प्रेषमभिधीयते-फ.प्रीतिप्रकाशनं यत्र तत्प्रेङ्खमभिधीयते-ग.प्रीतिप्रकाशं यत्र तत्प्रेङ्खमभिधीयते-ह.ज.२०.भावोक्ति:-ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।१५।। हस्तेति। हे सखि गोविन्दं कृष्णं पश्यामि दर्शनेन हृष्यामि च [१] हर्षं प्राप्नोमि। [२] कीदृशं गोविन्दम्? [३]कानने वृन्दावने व्रजसुन्दरीगणवृतं[४] गोपीवेष्टितम्। [५] कीदृशम्? मामुद्वीक्ष्य मां दृष्ट्वा हस्तस्रस्तविलासवंश: हस्तात् स्रस्तो विगलितो विलासवंश: क्रीडावंशो यस्य [६] तम्। पुन: कीदृशम्? अनृजु [७]भ्रूवल्लिमतीनां कुटिलभ्रूलतायुक्तानां [८] वल्लवीनां[९]गोपीनां वृन्दे समूहे उत्सारि ऊर्ध्वतिर्यग्गामि दृगन्तवीक्षितं कटाक्षेक्षणं यस्य [१०] तम्। पुन: कीदृशम्? अतिस्वेदेनातिघर्मेणार्द्रं गण्डस्थलं यस्य। [११] विलज्जित-स्मितं सलज्जाहास्यं तदेव सुधाऽमृतं तेन मुग्धाननं मनोहरमुखम्।।१५।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।१५।। हस्तस्रस्तेति। हस्तात् स्रस्त:च्युत: विलासवंश: खेलनवेणु: यस्य तम्। अनृजव: वक्राश्च ता: भ्रूवल्लय: आसां सन्तीति अनृजुभ्रू वल्लिमत्य: ताश्च ता: वल्लव्य: तासां वृन्देन गणेन उत्सारितं प्रत्युक्तं दृगन्तवीक्षितं कटाक्षलोचनं यस्मिन् तम्। अतिस्वेदेन क्रीडाश्रमजनितेन आर्द्रं सिक्तं गण्डस्थलं यस्य तम्। मां राधां उद्वीक्ष्य अवलोक्य [१२] विलक्षितं लज्जितम्। अनुरक्तं विहाय क्रीडारब्धे (ति)हीणम्।

स्मितमेव अमृतं तया मुग्धं मनोहरं आननं यस्य तम्। व्रजसुन्दरीणां गणेन वृतं परितो व्याप्तम्। [१३] वधूगणातिक्रमणकथनेन राधानुनयकरणप्रतिबन्धक[१४] विशेषणमेतत्। गोविन्दं कानने वने पश्यामि; दूरादिति। मनसा ध्यानलयेन वा द्रक्ष्ये। अत एव हृष्यामि; एतादृशकृष्णो दृग्गोचरोऽभूदिति हर्षं[१५]प्राप्ताऽस्मीति भाव: ।।१५।।

१.हर्षमाप्नोमि-ल.म. हर्षं प्राप्नोति-क.२.कथम्भूतं-क.ल.म.३.नास्ति-क.४.गोपीसमूहेन वेष्टितम्-क.ल.म.५.पुन: कीदृशम्-क.६.नास्ति-क.७.भ्रूवललीवतीनां-क.८-९.नास्ति-क. १०.नास्ति-ल.म.११.विलक्षितं-ड.ल.म.१२.मामुद्वीक्ष्य विलक्षितं इति च ग्रन्थानुसारी पाठ: १३.वधूगणातिक्रमणेन राधा-च.१४.विशेषणम्-च.१५.प्राप्तोस्मीति-च.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१५।। हस्तस्रस्तेत्यादि। हे सखि! गोविन्दं कानने बृन्दावने व्रजसुन्दरीगणवृतं गोपस्त्रीसमूहैर्वेष्टितं पश्यामि हृष्यामि चेति योजना। ननु मूढासि त्वं यतस्त्वां विहाय अन्याङ्गनाभि: सह विहरन्तमपि हरिं पश्यामि हृष्यामीत्येतदुद्देश्यमपाकर्तुमाह। किंविधम्? मामिति। मामुद्वीक्ष्य दृष्ट्वेति सर्वत्र विशेषणे हेतुत्वेन योज्यम्। विलक्षितस्मितसुधामुग्धाननमिति। स्मितमेव सुधा स्मितसुधा, स्मितसुधया मुग्धं यत् आननं तत् स्मितसुधामुग्धाननम्। विलक्षितं स्मितसुधामुग्धाननं यस्य। यद्वा विलक्षितश्चासौ स्मितसुधामुग्धाननश्चेति तम्। अथवा विलक्षिते लज्जायां विलक्षं करोति विलक्षयति, ततो भावे क्त:; यत् स्मितं तदेव सुधा तया मुग्धाननम्। ''सापत्रपे विलक्ष: स्याद्'' इति **इत्यमर:**। अत्यन्तं स्पृहणीयस्य वस्तुनो दर्शनमुपयुक्तमेवेत्यभिप्राय:। पुन: किंविधम्? हस्तस्रस्तविलासवंशमिति भयादवगन्तव्यम्। व्रजसुन्दरीगणवृतोऽहं राधां [यात्य]दृष्ट इति सापराधमात्मानं मन्यमानस्य हरेर्लज्जाभये युक्ते। भयेन हस्ताद् वस्तुस्रंसनं भवत्येव। तथा चोक्तं **कुमारसम्भवे**, ''नालक्षयत्साध्वससन्नहस्त: स्रस्तं शरं चापमपि स्वहस्तात्'' इति। ''विलास: शृङ्गारभावजा क्रिया।'' इति तदर्थो वंश: विलासवंश: हस्ताच्छ्रस्तोऽध: पतितो विलासवंशो यस्य स तम्। त्रैलोक्यनाथोऽपि व्रजसुन्दरीमध्ये मां दृष्ट्वा बिभेतीति राधाया: हर्षोद्गम:। पुन: किंविधम्? अतिस्वेदेति। अतिशयस्वेदेन आर्द्रं गण्डस्थलं यस्येति विग्रह:। अत्र दर्शनं हर्षश्च द्वयमप्युपयुज्यते। तत्र दर्शनमतिसौन्दर्यात्। हर्षस्तु अन्तरनुरागादिव्यञ्जकसात्त्विकभावविशेषात्। स्वेदोऽत्र सात्त्विक:। पुन: किंविधम्? अनृजुभ्रूवल्लीत्याति। अनृजू वक्रे भ्रूवल्ली विद्येते यासामिति, प्रशंसायां मतुप्।

''अनृजुभ्रूवल्लीमतीनां वल्लवीनां यद् बृन्दं तस्य उत्सारी ऊर्ध्वगमनशीलो योऽसौ दृगन्तोऽपाङ्ग: तेन वीक्षितं दृष्टं वल्लवी गोपसुन्दरी'' इति **नाममाला**। अनृजुत्वं भ्रूवल्ल्या विस्मयाद् वेद्यम्। कथमस्य राधाहस्ताद् वंशसंस्रनं भवतीति विस्मय:। यद्वा अनृजुभ्रूवल्लिमद्वल्लवीबृन्दे उत्सारिदृगन्तवीक्षणं यस्येति विग्रह:। वीक्षितं वीक्षणम्। अनेन अन्योऽन्यवीक्षणं प्रतिपादितम्। अत्र दर्शनानन्तरं हर्ष:। प्रेयो नामालङ्कार:। ''प्रीतिप्रकाशनं यच्च प्रेय इत्यभिधीयते।'' ''प्रेय: प्रियतमाख्यानम्'' इति **दण्डी**।।१५।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।१५।। अथ पूर्वदृष्टगोपीमण्डलस्थश्रीकृष्णस्फूर्त्या स्वमनसोऽनुभूतं श्रीकृष्णाभिप्राय-ज्ञानं साक्षाद्दर्शयन्ती साटोपमाह हस्तेति। हे सखि! अहं कानने गोविन्दं पश्यामि हृष्यामि च। कीदृशं ? ब्रजसुन्दरीगणवृतम्। ननु मुग्धासि त्वम्, यत: त्वां विहाय अन्याङ्गनाभि: सह विहरन्तं हरिं पश्यसि, दृष्ट्वा च हृष्यसि इत्याशंक्याह। कुटिलभ्रूलता-युक्तानां, वल्लवीनांवृन्दात्सारिणा निजभावोद्वोधकेनापाङ्गेन वीक्षितमपि मामुद्वीक्ष्य उद्ग्रीवको भूत्वा विशेषेण दृष्ट्वा विलक्षितो विस्मयान्वितो य: सस्मितसुधया मुग्धमाननं यस्य स च तम्। मदवैशिष्ट्यानुभवात् विस्मयहर्षान्वितं इत्यर्थ:। अतएव मद्दर्शनावेशेन हस्तात् स्खलितो विलासवंशो यस्य तम्, अतएव अतिस्वेदेनार्द्रं गण्डस्थलं यस्य तम्।।१५।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१५।। अथ सखीप्रोत्साहनाय पूर्वदृष्टं गोपीमण्डलस्थश्रीकृष्णकृतनिजविषयक-प्रणयचेष्टितं स्मृत्वा पश्यन्ती सा सोल्लासमाह, हस्तेति। कानने गोविन्दं पश्यामि, हृष्यामि च दृष्ट्वा हृष्यामीति न अपि तु पश्यामि हृष्यामीत्युक्तिदर्शनहर्षयो: पौर्वापौर्यकार्यकारणभावं निरुन्धानाऽनयो: समसमयत्वं तुल्यकारणप्रभवत्वं विपरीतं वा कार्यकारणभावं व्यनक्ति। चकार: पौन:पुन्यार्थ:। कीदृशं, व्रजसुन्दरीगणवृतम्। ननु मुग्धासि त्वं यद्वल्लवीगणवृत्तं तं पश्यसि, हृष्यसि चेत्याशंक्य विशेषणचतुष्टयेन परिहरति ।कीदृशं सन्ततचिन्तोपनीतां मामुद्वीक्ष्य उद्ग्रीवो भूत्वा विशेषेण दृष्ट्वा हस्ताभ्यां स्रस्तो भूमौ स्खलितो विलासवंशो यस्य तम्। वादनाय धृतो वेणुर्भूमौ पतित:, तं न ज्ञातवानिति भाव:। पुन: कीदृशम्, अनृजु, भ्रूवल्लीमतीनां कथमकस्मादेव सम्पन्न: अयमिति कोपकुटिलितभ्रूलतानां वल्लवीनां वृन्दस्य उत्सारि, शीघ्रमितोऽपसरत इति रुक्षभावाभिव्यञ्जकं दृगन्तवीक्षितमपाङ्गनिरीक्षणं यस्य तम्। अनेनात्मनो मदधीनतां

प्रकाशयन्तमित्यर्थः। ततो मां निकटवर्त्तिनीं वीक्ष्यातिस्वेदेन मदुपसर्पणसमुदित-साध्वसजनितघर्मजलातिशयेनार्द्रं क्लिन्नं गण्डस्थलं यस्य तम्। अनन्तरं मदवलोकितसंवलितविलोकनः किममुमनुनयामि किं प्रणमामि किं वा निवेदयामि मदीयावस्थामित्यादि विविधमनोरथावकाश सूचकतया विलक्षितं प्राप्तवैलक्षं यत् स्मितं तदेव मम सन्तापोपशमनतया सुधा तया मुग्धं मनोहरमाननं मुखं यस्य तन्। अत्र विलक्ष इति भावप्रधान निर्देशः। विलक्षः विस्मयान्विते **इत्यमरः**।।१५।।

## (१३) प्रफुल्लमिश्रकृत-स्वर्णलता टिप्पणी

१५-हस्तस्रस्तेति; अथ श्रीकृष्णस्य गोपीमण्डलस्थ प्रणयविषयं मनसा चिन्तयित्वा तत् खलु साक्षादिव स्वसखीं व्रवीति। सखि! अहं वृन्दारण्ये गोविन्दं पश्यामि हृष्यामि च। कीदृशं व्रजबालानां समक्षं कृष्णस्यान्य स्त्रीसङ्गमम् तदृष्ट्वा हर्षिता भवामि। परं परस्त्रीसंगतस्य स्वस्याः नायकस्य तथाभूते दृश्ये कथं हर्षानुभवः? उच्च्यते मामुद्वीक्षादि, मां दृष्ट्वा लज्जाशीलः स्मेरहासेनामीयं रसं प्रकटयामास। हस्तात् गलिता वंशी मुखे नाना भावं प्रकटयामास। तस्य मुखस्य ग्लानिं तथा स्वेदपूर्णेन कपोलयुगलेन संकेतेन गोपीवृन्दोत्सारितः। एव भूतं कृष्णं दृष्ट्वा प्रमुदिता भवामि। मां तासां समीपे दृष्ट्वा तस्य मनसि ग्लानिः जाता। तस्मात् गोपीषु ममोपस्थितिः सख्या अस्तीति ध्वन्यते। स्वस्यापराधं श्रीकृष्णेन हृदयेन स्वीक्रियतेऽपि। प्रेयो नामालंकारः इति सञ्जीवनी। शार्दूलविक्रीडितछन्दः।। प्रेयोऽलंकारः तल्लक्षणमपि **दण्डिना**, प्रीति प्रकाशनं यच्च प्रेय इत्यवगम्यते।। (२.२७९) परन्तु कुम्भनरपतिः पाञ्चाली रीतिः लाटानुप्रासः दक्षिण नायकः दीपकालंकारश्च मन्यते।।१६।।

**१६-दुरालोकस्तोकस्तबकनवकाशोकलतिका-**
**विकासः कासारोपवनपवनोऽपि व्यथयति।**
**अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल**
**प्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ।।१६।।**

## (१) नारायणदासकृत-सर्वाङ्गसुन्दरी

।।१६।। स्तोकस्तवकोऽल्पगुच्छ ईदृशो नवकाशोककलिकाशोक तस्य विलासः इति। ''समे शाखालते स्कन्धशाखाशाले शिफा जटा'' **इत्यमरः**। दुरालोकस्तोक इति दुःखनालोक्यते, अशोकोऽपि विरहेऽसुखदायी स्यादित्यभिप्रायः ''कासारोपवने-पवनोऽपि व्यथयतीति।'' ''आरामः स्यादुपवनम्।'' ''कासारः सरसी सत'' इत्यमररः।

पुनातीतिपवन: पावकी परोपकारक: इति यावत्। विरहे पवनोऽप्युद्वेजक इत्यभिप्राय। अपीत्यादी। हे सखि! चूतानां मुकुल प्रसूतिरपि न सुखयति, कीदृशी, शिखरणी अग्रभागयुक्ता, साग्रत्वेना प्रतिदर्शनीयत्व मध्यातिरेकत्वं चोक्तम्। अतएव भ्रामद्भङ्गीरणितरमणीयेति रमणीयमपि विरहे अन्य अनर्थहेतुरित्यभिप्राय:। वृत्तं चास्य शिखरिणी। ''रसैरुद्रैश्छिन्ना यमनसभलाग: शिखरणी'' ।।१६।।

इति कविराजश्री नारायणदासकृतायां सर्वांगसुन्दर्य्यां अक्लेशकेशवो नाम द्वितीय: सर्ग:।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१६।। इदानीं पुनरेव विप्रलम्भविभावानाह, दुरालोक इति। हे सखि? दुरालोकस्तोकस्तबकनवकाशोकलतिकाविकास: मां व्यथयति। दु:खेनालोक्यते विरहिभिरिति दुरालोक:। दुरालोक: स्तोकऽल्पक: स्तबको गुच्छो यस्या: स। अशोकलतिकाया: विकास: अशोकलतिकाविकास:। नव एव नवक:। प्रशंसायां क:। नवकश्चासावशेकलतिकाविकासश्च। दुरालोकस्तोकस्तबकश्चासौ नवकाशोकलतिका-विकासश्च स:। अपि च, अयं कासारोपवनपवनो व्यथयति। न केवलं स: पवनोऽपीति। 'कासार: सरसी सर:'। अथवा 'दुरालोक' इत्यादिपवनविशेषणत्वेन योजनीयम्। दुरालोकस्तोकस्तबका चासौ नवकाशोकलतिका चेति तां विकासयति स इति कर्मण्यण्। अथवा, अशोकलतिकाया विकासो यस्मादिति। एतेन वायोस्त्रैविध्यमुत्क्म्। अपि च, न केवलं पवन:, अपि तु चुतानां मुकुलप्रसूतिरपि न सुखयति। कीदृशी मुकुलप्रसूति: ? शिखरिणी साग्रा। पुन: कीदृशी ? भ्राम्यद्भ्राङगीरणितरमणीया। भ्रम्यन्त्य: परित: स्फुरन्त्यो या भृङ्ग्यो भृङ्गाङ्गनास्तासां रणितेन शब्दितेन रमणीया। अत्र मधुलिडङ्गनाग्रहणं पुरूषान्तराभिलाषनिवृत्त्या औचितीमावहति। अत्र शिखरिणी वृत्तम्। समुच्चयोऽलंकार:। लाटानुप्रास: शब्दालंकारश्च। क्रियौचित्यं च। विप्रलम्भ: श्रृङ्गारो रस:। सर्वत्र स्थितिलया गीति:। मागधी गौडीया च रीति:।।१६।।

## (३) जगद्धरकृत- सारदीपिका (टीकानास्ति)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१६।। हे सखि! धैर्यमवलम्बस्व मिलिष्यत्येव त्वां हरिरित्याश्वासयन्तीं दूतीमेव त्वरयितुमाह, दुरालोकेति। हे सखि! स्तोकोऽल्प: स्तबको गुच्छो यस्या एतादृशी या नाविकातिनवाऽशोकलतिकानुकम्प्याशोकशाखा तस्या विकास उद्बोधो दुरालोको दु:खेनालोकयितुं शक्य:। नविकेत्यत्र ह्रस्व:। लतिकेत्यत्रानुकम्पायां क:। मद्धस्तपालिताऽत

एवानुकम्प्याऽशोकलतिका दुरालोकेति भावः। किमपरम्? कासारः सरस्तत्संबन्धि यदुपवनं तत्संबन्धी यः पवनो वायुः सोऽपि व्यथयति। दुःखं ददातीत्यर्थः। 'कासार' पदेन वायोः शैत्यं कथितम्। उपवनसंबन्धित्वेन ससौगन्ध्यं मान्द्यं च ध्वनितम्। यतो वनबृक्षेरूपहतगतित्वेन मन्द एव वायुर्भवतीति यदा स्तोकेत्यादि वायोरेव विशेषणम्। तदा स्तोकस्तवकनवकाशोकलतिकां विकाशयतीत्येवंभूतः पवनो व्यथयतीत्वन्वयः। नन्वभिमुखमागच्छन्पवनश्चलनादिना निवार्य तामित्यत आह, दुरालोक इति। अतीन्द्रिय इत्यर्थः। तथा चाकस्मादेवासौ न दृश्यत इति भावः। अपि च इयं शिखरिणी गोवर्धनगिरौ वर्तमाना चुतानाम्राणां मुकुलप्रसूतिरपि कुऽमलोद्गमोऽपि न सुखयति। विकासदशायां तु को वेद किं करिष्यतीति कविना ध्वनितम्। प्रसूतिः शिखरिणी। प्रशस्ताग्रभागवतीत्यर्थः। शिखरिणीत्यत्र प्रशंसायामिन्।यद्वा, इयं शिखरिणी मल्लिका न सुखयतीत्यर्थः। कीदृशी? भ्राम्यन्तीनां भ्रमरङ्गनानां रणितीभिर्गुञ्जितौ रमणीया। शिखरिणीनामकं छन्द इत्यपि ध्वनितम्। तल्लक्षणं तु वृत्तरत्नकरे, 'स्तोकोऽल्पे चातके' इति विश्वः। 'स्याद्गुच्छकस्तु स्तबकः' **इत्यमरः**। 'लता ज्योतिष्मतीवृक्षशाखावल्लिप्रियङ्गुषु' इति **विश्वः**। 'कासारः सरसी सरः' 'इत्यमर'ः। 'स्त्रीरत्नं. मल्लिकायां च प्रोत्का शिखरिणी बुधैः' इति **'विश्व'**ः।।१६।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१६।। इतोऽवश्यं कृष्ण आनेतव्य इत्याह। दुरालोकेति। हे सखि! स्तोकानि स्वल्पानि स्तवकानि गुच्छा यासु तादृशा नवकाः कोमलाश्च या अशोकलतिकास्तासां विकासः पुष्पोद्गमः दुरालोकः विरहिजनस्य द्रष्टुमशक्यः। अस्योद्दीपकत्वादिति भावः। दुरालोक इत्यत्र ''ईषदुःसुष्वी'' (३-३-१२६) त्यादिना खल् प्रत्ययः। दुरालोके इति समस्तं वा पदम्। तस्य विकाश इत्यनेनान्वयः। अस्मिन् पक्षे एतादृशो विकासः व्यथयति पीडयति मामिति शेषः। किञ्च कासारः सरः ''कासारः सरसी सरः'' **इत्यमरः**। तस्योपवनं समीपवर्त्ति यद्वनं तत्सम्बन्धी यः पवनः शीतसुगन्धिमन्दमारुतः सोऽपि व्यथयति तटस्थोद्दीपकत्वेन मलयमारुतस्यापि विरहिणा दुःसहत्वादिति भावः। उक्तं च ''मलयानिलचन्द्राद्यास्तटस्थोद्दीपकाः क्रमादिति।'' किञ्च, शिखराण्यग्राणि यस्याः तादृशी तीक्ष्णाग्रप्रदेशा इत्यर्थः। भ्राम्यन्तीनां गन्धलोभेन परिभ्रमन्तीनां भृङ्गाणां भ्रमरीणां यानि रणितानि झङ्कारास्तैः रमणीया मनोहराः अत्र भृङ्गीति स्त्रीव्यक्तिग्रहणं तद्रणितस्यादिति श्रुतिसुखकरत्व द्योतनार्थम्।

लोकेऽपि रसिका: स्त्रीगानश्रवणार्थमेव पुन: पुन: प्रवर्त्तमाना: दृश्यन्ते। एतादृशीयं परिदृश्यमाना चूतानां सहकारतरूणां मुकुल: प्रसूति मन्मथसायक-रूपकुड्मलोद्गम: सोऽपि न सुखयति सुखं न करोति। तथा च वर्णितोद्दीपनप्रभावेन कृष्णं विना मया क्षणमात्रमपि स्थातुं न शक्यते। अतस्तदानयनार्थं त्वायातिक्षिप्रमेव गन्तव्यमिति भाव:। भ्राम्यदित्यत्र ''शमामष्टमानां दीर्घ: श्यनी ति (३७-३-७४) शमादित्वात् भ्रमतेर्दीर्घ:। शिखरिणीत्यत्र कविवाग्वैभव द्योतनार्थं निक्षिप्तं वृन्दोऽपि शिखरणीयमुक्तार्थप्रतिपादिका सती सुखयतीत्यर्थ:। शिखरिणीलक्षणम्, ''रसै रुद्रैश्छिन्ना यमनसभलाग: शिखरिणीति''। अपि भ्राम्यदित्यत्रापि शब्द: पादादौ न प्रयोक्तव्य: न पादादौ खल्यादय: प्रयोक्तब्या इति निषेधात्। प्रयोगवाहुल्यात् स दोष: परिहर्त्तव्य:, यद्वा, समुच्चयार्थत्वात्तु न दोषाबह:।।१६।।

इति श्री गीतगोविन्दव्याख्याने द्वितीय: सर्ग:।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१६।। भवतु क्रमेण कृष्णमनुनीयानयिष्यामीति सखीवचनमाशंक्य स्वकीयकाल-क्षेपासहिष्णुता प्रतिपदेनायद्हृत्तापमुद्भावयति। हे सखि स्तीकोऽल्प: स्तवक: गुच्छो यस्य एतादृशो यो नवकाशोको नूतनाशोकवृक्ष: तत्र लतिकाया यो विकास: प्रकाश: स दुरालोक: दु:खेन दर्शनीय: अर्थात् मम तथा चाचेतनस्या अपीदानीं परस्परं सोल्लासमाशंक्य इति दर्शयन्त्या अतिरिक्तहृदयोद्वेग उद्भासित इति भाव:। यद्वा तादृशनवकाशोकवृक्ष: लंतिका च तयोविकास उद्गम: दुरालोक: अर्थान्मम। तथा च-सन्नद्धस्तवकाशोकलतिकाया: काकत्येति धरणि:। यद्वा दूरादालोके दु:खेन दर्शनीयोऽर्थान्मम स्तोक: स्वल्पो स्तोको गुच्छो यस्य एतादृशो यो नवकाशोको नूतनाशोकवृक्ष: लतिका विकासयतीति कर्मण्यन्निति पवनविशेषणतया व्याख्येयम्। कासार: तडाग: उपवनम उद्यानं तयोश्च पवन: कासारोपवनपवन:, सोऽपि व्यथयति पीडयत्यर्थान्माम् अत्राशोकलतिकाविकासकत्वमात्रदर्शनेन वायो: मान्द्यत्वम्, तडागोपवनसम्बन्धित्वेन शीतलत्व सुरभित्वञ्च दर्शितम्। तथा च ईदृश: सुखदोऽपि वायु: पीडाकर: इति चित्रमिति भाव:। न केवलमेतदेव शिखरिणि पर्वते स्थितेत्यर्थात् चूतानामियं मुकुलप्रसूतिरपि सुखयति। कीदृशी ? भ्राम्यन्तीनाम् उपर्यध: पार्श्वे च चलन्तीनां भृङ्गीनां रणितै शब्दितै: रमणीया मनोज्ञा तथा चातिदूरस्थापि सहकारमञ्जरी मधुकररणितेनानुमीयमाना न सुखयति किं पुन: निकटस्थेति भाव:। 'अपि सम्भावना प्रश्नशंकाहर्षसमुच्चयोरिति तथाह्यनुकूलपदार्थे च कामचारक्रियासु च।।' छन्दोऽप्यत्र शिखरिणीति छलेनोपदर्शितम्।१६।।

X 'दूरालोक: स्तोकस्तवकनविका' इति पाठान्तरं वर्तते।

S 'रणिति रमणीये'ति पाठान्तरं वर्तते।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१६।। सखि धैर्यमावह; मिलिष्यत्येव श्रीकृष्ण इत्याश्वासयन्तीं सखीं प्रत्याह, दुरालोकेति। हे सखि दुरालोको दु:खेन आलोकयितुं शक्य: स्वभावेनाऽपि स्तोकोऽल्प:[१] स्तबको गुच्छो यस्या:[२] सा,[३] नवकाशोकलतिका अशोकशाखा तस्या विकास:[४] प्रकाश:। किञ्च कासार: सरसी उपवनञ्च तयो: पवनोऽपि कमलाकर[५] चरो वायुरपि व्यथयति पीडां करोति। मामिति शेष:[६] कासारोपवनशब्दाभ्यां शैत्यसौ[७]गन्ध्यमान्द्यादीनां ध्वनि:।[८] किञ्च चूतानामाम्राणां श्रीगोवर्धन[९] गिरिस्थितानां मुकुलप्रसूति: कुड्मलोऽपि न सुखयति न सुखं [१०] करोति। किं प्रकाशदशायां करिष्यति[११]न वेद्मि।[१२] कीदृशी ? शिखरे[१३] मौलौ वर्तमाना; दूरादेव दुस्सहेत्यर्थ: पुन: कीदृशी ? भ्राम्यन्तीनां भृङ्गीणां[१४] भ्रमराङ्गनानां रणितैर्गु[१५]ञ्जितै रमणीया मनोहरा।[१६] " स्तोकोऽल्पे " इति **विश्व**:(३.२९)।[१७] " स्याद्गुत्सकस्तु स्तबक:" **इत्यमर**:(२.४.१६)। " कासार: सरसी सर:" इत्यपि (**अमर**: १.१०.२८)[१८] "स्त्रीरत्ने मल्लिकायाञ्च प्रोक्ता शिखरिणी बुधै:" (इति **विश्व**: ५१.१०३)।[१९] "आम्रश्चूतो रसाल:"[२०] **इत्यमर**: २.४.३३)। "कुट्मलो मुकुलोऽस्त्रियाम्" (**इत्यमर**: २.४.१६)। हेतूक्तिरलङ्कार: ।।१६।।

१.स्तबकोऽङ्गुष्ठो-अ.२.नास्ति-अ.३.नवा अशोकलतिका-अ.ब.नवका नवाऽशोकलतिका-इ.ह.४.नास्ति-फ.५.सरो-इ.ह.ग.ज.६.कासारोपवनाभ्यां-इ.फ.ग.ह.ज.७.सौगन्ध्यमान्द्यादीनि-अ.ब.सौगन्ध्यमान्द्यानीति-अ.ज.८.किञ्चेयं-इ.फ.ग.ह.ज.९.गिरौ-इ.फ.ग.ह.ज.१०.कारयति-अ.ब.फ.११.नवेति-अ.ब.१२.कीदृशी प्रसूति:-ग.१३.मूलौ-अ.ब.१४.भ्रमराणां-ग.१५.नास्ति-फ.१६.स्तोकोऽल्पक इति-ब.ह.स्तोकोऽल्प इति-फ.स्तोकोऽल्पकस्वल्प इति-ज.१७.त:,२०.पर्यन्तो भागो नास्ति-अ.ब.गुच्छ: स्तबक:-इ.फ.ग.ह.ज.१८.स्त्रीरत्ने मल्लिकायां शिखरिणीति-इ.ग.ह.ज.१९.अयं नैघण्टुकोद्धारो नास्ति-फ.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।१६।। दुरालोकेति। हे सखि दुरालोको दु:खेनालोक्यते वियोगिनीनामुद्वेगजन (क) त्वात् दुरालोक:। स्तोकोऽल्प: स्तबको गुच्छो यस्या:। नवाशोकलतिकाया विकास उद्योत: मां व्यथयति पीडयति। किञ्च कासारोपवनपवनोऽपि सरोवर[२] निकटवनपवनोऽपि मां व्यथयति। अपि च चूतानामाम्राणामियं मुकुलप्रसूति: कलिकोद्भव: मां न सुखयति। [३]कीदृशी ? भ्राम्यन्तीनां भृङ्गीणां[४]भ्रमरीणां रणितै: [५] शब्दितै: रमणीया मनोज्ञा[६]ऽपीत्यर्थ:। शिखरिणी प्रशस्ताग्रभागवती ।।१६।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१६।। (दुरालोकेति।) हे सखि [७] अस्तोकै: अनल्पकै: स्तबकै: गुच्छै: नमितानां अशोकस्य लतिकानां शाखानां विकास: दुरालोक: आलोकितुमशक्य:। उद्दीपकत्वात् कासारस्य सरस: उपवनं क्रीडावनं तस्य पवनोऽपि वायुरपि व्यथयति पीडयति। इयं पुरोवर्तिनी शिखरिणी चूतानां रसालानां भ्राम्यन्त्यश्च ता: भृङ्ग्य तासां रणितेन कूजितेन[८]रमणीयानि मुकुलानि कोरका: तेषां प्रसूति: उत्पत्ति:। उत्पत्तिमन्मुकुलानीत्यर्थ:। सुखयति। एतदालोकनोद्दीपितमदनत्वान् माधव: स्वयमायास्यतीति भाव: ।।१६।।

[९]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां अक्लेशकेशवो नाम द्वितीयसर्ग:।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१६।। दुरेति ।स्तोकोऽल्प: स्तबको गुच्छो यस्य ईदृशो नवको नूतनो योऽशोकस्तस्य कलिकानां विकासो विकसनं स्तोकस्तबकेषु नूतनानामशोककलिकानां विकासो वा। दुरालोको दु:खेन आलोक्यते मयेति शेष:। ''ईषद्दु:सुषु कृच्छ्राकृच्छ्रार्थेषु खल्।'' इति। अशोकलतिकाविकास इति पाठेस्तोकस्तबका नवीना याऽऽशोकद्रुमस्य लतिका शाखा तस्या विकासो दुरालोक इत्यर्थ:। ''एकप्ररोहे पुष्पाणि पृथक् यत्र बहुनि च। स पुष्पगुच्छ: स्तबको यथा स्यात् करवीरके।।'' इति सर्वानन्द:। ''समे शाखालते स्कन्धशाखाशाले शिफाजटे'' **इत्यमर**:। अशोकस्य विरहे दु:खदायित्वादेवमुक्तम्। न केवलं स: कासारोपवनपवनोऽपि व्यथयति। कासार: सरसी, तस्योपवनं समीपवर्तिकाननं, तस्य पवनोऽपि व्यथयति। यद्वा कासारोपवनयो: सरस्यारामयो: सम्बन्धी पवन इति। पुनातीति पवन:। पावक: परोपकारक इति यावत्। विरहे परोपकारकोऽपि उद्वेजक इत्यर्थप्रतिपादनार्थं पवनशब्दस्य प्रयोग:। ''आराम: स्यादुपवनम्'' **इत्यमर**:। अत्र पवनस्य गुणत्रययोगोऽपि दर्शित:। कासारसम्बन्धात् शैत्यम् उपवनसम्बन्धान्मान्द्यं सौगन्ध्यं चेति। दुरालोकस्तोकेत्यत्र ''वा शरि'' इति विसर्गलोप:। दुरालोकस्तोकेत्येकं वा पदम्। तदा व्यथयतीति उभयत्र योज्यम्। न केवलमेतावदित्याह, **अपीति**। अपिशब्द: पूर्ववाक्यापेक्षया समुच्चये शङ्कायां वा गर्हायां वा । तथा च, ''अपि सम्भावनाप्रश्नशङ्कागर्हासमुच्चये। तथा युक्तपदार्थे च कामचारक्रियास्वपि।।'' इति **मेदिनी**। चूतानां मुकुलप्रसूतिरपि न सुखयति तत् करोतीति णिच्। इयमपीत्यङ्गुल्या निर्दिश्य वदति । किंविधा ? **शिखरिणीति**।

अग्रभागयुक्ता साग्रत्वेनातिदर्शनीयत्वं मध्वतिरेकत्वं चोक्तम्। अत एव **भ्राम्याद्-भृङ्गीरणितरमणीयेति** । भ्राम्यन्तीनां भृङ्गीणां रणितेन रमणीया मनोहरा। अत्रापिशब्द: समुच्चय:। एवंविधापि न सुखयतीत्यर्थ:। रमणीयमपि विरहेऽस्यानर्थहेतुरित्यभिप्राय:। किं वा शिखरिणी पर्वते चूतानां प्रसूतिरपि न सुखयति। शब्दशक्त्याशिखरिणीय-मितिशिखरिणीनामछन्द:। ''कासार:सरसीसर: **इत्यमर**:।।१ ६।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।१ ६।। एवमुक्त्वा स्फूर्त्त्यापगमे पुनराह, दुरालोक इति। हे सखि! अल्पो गुच्छो यासां तासां नवकाशोकलतिकानां विकासो दु:खेनालोक्यते। सरोवरस्योपवनसम्बन्धी पवनोऽद्धपि व्यथयति तथा भ्राम्यन्तीनां भृङ्गीणां रणितै: रमणीयापि प्रशस्ताग्रभंगयुक्तापि च चूतानां मुकुलप्रसूतिर्न सुखयति। अशोकोऽपि शोकदायी, पवनोऽपि पीडक:, रमणीयापि उद्वेगकरीत्यहो विरहवैपरीत्यमित्यर्थ:।।१ ६।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।१ ६।। एवं स्मृतिविजृम्भितोत्कण्ठातिशयनिरूपणेन प्रस्थानोन्मुखीं सखीं त्वरयन्ती त्वदागमनावधि मज्जीवितमिति स्वीयानामपि अशोकलतादीनां क्रूरतापादनेन सूचयन्ती सदैन्यमाह; दुरालोकेति। हे सखि! स्तोका: स्वल्पोद्गमा: स्तवका गुच्छा यासु तादृशीनां नवकानां नूतनानामशोकलतिकानां विकास: पुष्पोद्भेदो दुरालोको दु:खेनालोक्यते यस्तादृश:। 'स्याद्गुच्छकस्तु स्तवक:' **इत्यमर**:। या: खलु अशोकलतिका: मयाऽतियत्नेन संवर्ध्य चूतसुकुमारैर्विवाहितास्ता इमा: प्राप्तप्रथमपुष्पोद्भेदोत्सवा जाता इति कौतुकेन विलोकिता: सत्य: कथं मयि क्रौर्यं वितन्वत्यो दुर्दर्शनीया भवन्तीति भाव:। स्तोकस्तवकेति निकटकृतदोहदत्वं नवकमिति अचिरारोपितत्वम्। हे सखि! तथा कासारोपवनपवनोऽपि मां व्यथयति। मत्क्रीडासुखसम्पादक: य: कासार: पद्माकर उपवनं च तयो: संसर्गेण प्राप्तसुशीतलधीरत्वादिसद्गुणसौभाग्योऽपि समीरणोऽयं न मया किमपि याचितो न सम्भाषितो नापि विलोकित:, तथापि स्वयमकाण्ड एवं मां पीडयतीति भाव:। अपि च तथा चूतानां मुकुलप्रसूति: कुड्मलोद्गम: न सुखयति, कीदृशी शिखरिणी, प्रशस्त: शिखरोऽग्रभागोऽस्यास्तीति तादृशी, प्राप्तमन्मथतीक्ष्ण-सायकपदवीतया प्राणग्राहिणी भवतीति भाव:। पुन: कीदृशी भूमन्तीनां रणितै: कूजितै: रमणीया मनोहरापि नवविवाहिता अशोकलता, प्रथमपुष्पोद्भेदसामयिकोत्सवसम्भ्रम-जाततया तद्भृङ्गाङ्गनाप्रस्तुतमङ्गलगानसन्तोषसञ्जातपुलका रसालयुवानो मत्पालिता इमे। आस्तां तावत् पारितोषिकदानं, किन्तु विप्रियमाचरन्तीति भाव:। अत्र

अस्मदोऽनुक्तिर्न चाहम् आत्मानं तथा शोचामि यथा विरहकातरमतिसुकुमारप्राणेश्वरं कदाचित् दैवात् ईदृशात्मीयानिष्टकरणप्रवणशोकलतादिषु गोचरतां जातेषु किं भावीति बोधयति। दुरालोकादिप्रतिनियतक्रियावैचित्री उक्तमेवार्थमुपोद्बलयति। शुद्धकार्य-समारोपहेतुकसमासोक्त्यनुप्राणितविभावनाविशेषोक्त्यो: संसृष्टि: संकरो वा ।।१ ६ ।।

**(१ ३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

१ ६ क- दूरालोकेति; इथं स्मरणेन श्रीराधाया: उत्कण्ठा विवर्द्धिता। तस्मिन् सन्दर्भे सखीं प्रेरयामास श्रीराधा तां विवृण्वती। हे सखि! दूरात् लघु: अशोकपुष्पस्तवकं तथा पुष्करिणीतटोपवनस्य पुष्पसुरभितं सुशीतलं पवनं मां पीडयति। तद्वदाम्रवृक्षोपरि मुकुलान्मुखभ्रमराणां सुमधुरं गुञ्जनमपि मां दु:खीकरोति। आहोस्वित् मयेव संवर्धितबृक्षमुकुलागमे ममाप्यसहनीयं भवति। सम्भोगकालस्य सकलं सुखकरं पदार्थं विरहोत्कण्ठिताया: वैपरीत्ये फलं प्रति प्रयाति। अत्र शिखरिणी वृत्तम्। समुच्चयोऽलंकार: लाटानुप्रास: विरहोत्कण्ठिता नायिका। विप्रलम्भ: शृङ्गार:। सर्वत्र स्तितिलगा गीति:। मागधीगौडीया च रीति:। इति **कुम्भकर्ण:**। परं हेतूक्तिरलंकारस्य मतं विशिनष्टि सञ्जीवनीकार:।।१ ६ ।।

**१ ६(क) साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासित**
**भ्रूवल्लीकमलीकदर्शितभुजामूलोर्ध्वहस्तस्तनम्।**
**गोपीनां निभृतं निरीक्ष्य गमिताकांक्षश्चिरं चिन्तय-**
**न्नन्तर्मुग्धमनोहरं हरतु व: क्लेशं नव: केशव:।।१ ६-क।।**

**(१ )नारायणदासकृत-सर्वाङ्गसुन्दरी (टीकानास्ति)**

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।१ ६-क।। इदानीं सर्गान्ते कविर्भक्तजनानाशास्ते, साकूतेति। केशवो हरिर्वो युष्माकं क्लैशं हरतु। किंलक्षण: ? गमिताकाङ्क्ष: गमिता नाशं नीता आकाङ्क्षाऽभिलाषो येन स तथा। अर्थात् गोपीषु। किं कुर्वन्? चिरं निभृतं यथा स्यात्तथा निरीक्ष्यान्तर्हृदये चिन्तयन्। किं निरीक्ष्येत्यपेक्षायामाह, साकूतस्मितं साभिप्रायमीषद्धसितम्। पुन:किम्? आकुलाकुलगलद्धम्मिल्लम्। आकुलाकुलं कामोद्रेकाद्रोमाञ्चोद्गमादिहेतुना गलद्धम्मिलं विगलत्केशबन्धम्। पुन: किम्? उल्लासितभ्रूवल्लीकमुत्क्षिप्तभ्रूवल्लीकम्। पुन: किम्? अलीकदर्शितभुजाभूलोर्ध्वहस्तस्तनम्। भुजाया: मूलं भुजामूलं, भूजामूले ऊर्ध्वौ यौ हस्तौ भुजामूलोर्ध्वहस्तौ। अलीकं दर्शितौ भुजमूलोर्ध्वहस्ताभ्यां स्तनौ यत्र कर्मणि तत्।

कासामित्यपेक्षायामाह, गोपीनाम्। तच्चतुष्टयं हेतुगर्भवत्त्वेन विशिनष्टि, मुग्धमनोहरमिति। मुग्धानां मूर्खाणां मनो हरतीति न मत्सदृशस्येति गमिताकाङ्‌क्षत्वे हेतुः। तदेवग्रिमे सर्गे प्रकटयिष्यति। राधामाधाय हृदये तत्याज व्रजसुन्दरीः "इत्यदीना। अत एव नवः सकलपुमपेक्षया चरितविशेषेण नवोऽन्यादृश इव सुभाषितेन गीतेन युवतीनां च लीलया। चेतो न भिद्यते यस्य स वै मुक्तोऽथ वा पशुः।। "इति वचनात्। अथवा, नूयते स्तूयत इति नवः। अथवा,नवस्तरुणः। तरुण दृष्ट्वा कामिनीनां कामचेष्टा जायत एव। अथवा, तस्मिन्पक्षे गोपीनां निभृतं भावं निरीक्ष्येति व्याख्येयम्; तदा साकूतस्मितेत्यादि चतुर्णामपि पदानां भावविशेषण पक्षे निक्षेपः। मुग्धमनोहरमिति क्रियाविशेषणम्। अत्र विदग्धो नायकः। समुच्चयाशिषावलंकृती। शार्दूलविक्रीडितं वृत्तम्। परिकरोऽलंकारश्च। अत्र यत्सकलकामिनीकामपूरकस्य कामजनकस्य विलासवतीविलासादिभिरगृह्यस्य यन्नवत्वविशेषणेनान्यादृशत्वमुपपादितं तद्विचार्यमाणमौचित्यचारुतामाचरति। यदाहः विशेषणैः समुचितैर्विशेष्यार्थः प्रकाश्यते। गुणाधिकैगुणोदारः सुहृद्भिरिव सज्जनः।। इति।।१६-क।।

> शृङ्गारोत्तरसत्प्रमेयभणितावुद्गीतगोविन्दके
> प्रत्यार्थिप्रभुगर्वपर्वतसुपर्वाधीशशोभाभृता।
> श्रीपुम्माणनरेशवंशविशदक्ष्माभृद्वतंसायित-
> श्रीमत्कुम्भधराधिपेन विवृतः सर्गे द्वितीयेऽन्वयः।।

तथा च **सङ्गीतराजे-**

> गीतौ भैरवरागेण ताले वर्णयतौ यथा।
> आभोगान्तस्थितैः पाटैः स्वरैः पद्याञ्चितस्ततः।।
> अक्लेशकेशवादिश्च कुञ्जरस्तिलकाभिधः।।६।।

इति श्रीराजाधिराजहम्मीरवीरवंशकरीरेण श्रीकुम्भकर्णमहीमहेन्द्रेण विरचिते गीतगोविन्द-विवरणे अक्लेशकेशवनामा द्वितीयः सर्गः।।१६-क।।

## (३) जगद्धरकृत- सारदीपिका (टीकानास्ति)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१६-क।। काव्यं गीत्यानुसारि दुर्लभमथ प्रसादादिभिर्लक्ष्मीकान्ताविलासवर्णनरस-स्तत्रापि लोकोत्तरः।
सर्व चैतदभूदरण्यरुदितं पद्मावतीवल्लभस्यैतां चेद्रसमञ्जरों न
रचयेच्छ्रीशालिनाथप्रभुः।।

इति श्रीमहामहोपाध्यायश्रीशंकरमिश्रविरचितायां श्रीशालिनाथकारितायां गीतगोविन्दटीकायां रसमञ्जर्याख्यायां द्वितीय: सर्ग:।।१६-क।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी (टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१६-क।। सर्गान्ते जनानामाशीषमाह, नवो नूतन: केशव: वो युस्माकं क्लेशं कष्टं हरतु। किम्भूत:? गोपीनां निभृतं सगोप्यभावं निरीक्ष्य अन्त: चेतसि किञ्चिद्विशिष्यानि वर्चनीयम् तदुक्तं '**साहित्यदर्पणे**, शठोऽयमेकत्र दर्शितबद्धभावोऽन्यत्र दर्शितबहिरनुराग इति। निभृतं किम्भूतम्? साकुतं साभिप्रायं स्मितं यत्र एतादृशम्। पुन: किम्भूतम्? आकुल कुलोऽत्यन्तास्तव्यस्तो गलन् बन्धादुन्मुक्तीभवन् मिला: संयता: केशा: यत्र। पुन: किम्भूतम्? उल्लासिता भ्रूवल्ली यत्र तदुल्लासित-भ्रूवल्लीकम्। पुन: किम्भूतम्? अलीके परिदृश्यमाना कार्यं विना छलेन वा दर्शितम्। भुजामूलञ्च अर्धहस्तश्च स्तनश्च तौ भुजमूलार्धहस्तस्तनं यत्र। एतेन मोट्टायितभावो दर्शित:। अर्धहस्तदर्शनमङ्गुलीनां श्लेषेनादि बोधनादित्यवधेयम्। 'दोर्दोषा तु भुजाभुज' 'इत्यमर':। अलीकञ्च लमिख्ययोरि' इति 'धरणि': अक्लेशो दु:खरहित: केशवो यत्रेतिव्युत्पत्त्या अक्लेशकेशव इति सर्ग नाम।।१६-क।।

इति श्रीगीतगोविन्दे महाकाव्ये अक्लेशकेशवो नाम द्वितीय: सर्ग:।।

इति समस्तप्रक्रियाविराजमान-महाराजशुक्लध्वजविरचितायां

सारवत्यां गीतगोविन्दटीकायां द्वितीय: सर्ग:।

\+ निर्णयसागरयात्रालयमुद्रितपुस्तके 'मूलोर्द्धहस्त' इति पाठ:।

X 'दयिताकांक्ष:' इति पाठान्तरं वर्तते।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१६-क।। [१०]सर्गान्ते श्रोतृन् प्रति कविराशिषमाशास्ते, साकूत इत्यादिना। [११] स हरि: केशवो वो युष्माकं क्लेशं दु:खं हरतु। कीदृश:? [१२] नवस्तरुणो नूतनो वा नानामाधुर्योदयात्। पुन: [१] मुग्धमनोहर: [२] सुन्दर:। [३]मुग्धाया राधाया मनो[४]हरणक्षम इति वा। पुन: कीदृश:? गमिताकाङ्क्ष: गमिता नीता श्रीराधायां काङ्क्षा [५] अभिलाषो येन। किं कृत्वा? किं कुर्वन्? गोपीनां निभृतं गुप्ताभिप्रायं निरीक्ष्य काञ्चिद्वल्ल-भामन्तर्मनसि चिरं चिन्तयन्। कीदृशम्? निभृतं साकूतं [६] स्मितं साभिप्रायं स्मितमीषद्धास्यं यत्र। [७]पुन: [८]कीदृशम्? आकुलाकुलो अस्तव्यस्तो गलद्धम्मिल्ल: केशपाशो यत्र तम्। [९]तथा उल्लासित, भ्रूवल्लीकं [१०] उत्क्षिप्तभ्रूवल्लीकं ;

जृम्भमाणव्याजेनेत्यर्थः। [११] तथा अलीकेनानिमित्तेन दर्शिता [१२] भुजमूलोर्ध्वहस्तस्तना यत्र। वालोर्ध्व इति पाठः। भुजाश्च वालाश्च हस्ताश्च स्तनाश्चेति द्वन्द्वः। [१३] साकूतं भाववीक्षणे इति **मेदिनीकारः**। निभृतं तु रहस्ये स्यान्निभृतं गुप्तमुच्यते इति धरणिः। [१४] अलीकं कपटे प्रोक्तमलीकं गुप्तभावकम् [१५]। अलीकमनिमित्तं च वृथाभाषणक इति **हलायुधः**। धम्मिल्लः केश[१६]पाशः स्यात् इति **वैजयन्ती**। रसवदलङ्कारः ।।१२।।

श्रीराधादर्शनादेव गतक्लेशोऽधिमानसम्।
पुलकोल्लासरुचिरः क्लेशं हरतु केशवः।।

वन्दे व्रजपतिं देवं माधवं वल्लवीप्रियम्। यमुनातीरनिकुञ्जेषु वृषभानुसुतारतम्।।

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंस[१७]शिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायाम् [१८] अक्लेशकेशवो नाम द्वितीयः सर्गः।।१६-क।।

१.नास्ति-ज.२.सुन्दरः-ग.३.नास्ति-अ.ब.४.हरणे-फ.५.नास्ति-अ.ब.६.नास्ति-इ.फ.ग.ह.७-८.नास्ति-अ.ब.इ.फ.ग.ह.९.नास्ति-अ.ब.इ.फ.ग.ह.१०.नास्ति-अ.ब.ज.११.नास्ति-अ.ब.इ.फ.ग.ह.१२.मूलार्ध्ववालार्ध्व इति पाठः-अ.ब.१३.साकूतं समये प्रोक्तं साकूतं भाववीक्षणे-इ.फ.ग.ह.ज.१४.तः १५.पर्यन्तं नास्ति-ग.१६.पाशे-इ.फ.ग.ह.ज१७.श्रीशिवदासपण्डितात्मज-ह.१८.केशवो नाम-फ.१.पद्यमिदं नास्ति-च.२.निकटपवनोऽपि-क.ल.३.कथम्भूतानां-क.कथम्भूतम्-ल.म.४.नास्ति-ड.५.नास्ति-क.६.अपि नास्ति-क.७.च ग्रन्थानुसारं पाठस्त्वेवं-दुरालोकोऽस्तोकस्तबकनमिताशोकलतिका। ८.च.ग्रन्थानुसारं अपि भ्राम्यद्भृङ्गीरणित-रमणीयातिमुकुल इति तृतीयं चरणम् ९.इति गीतगोविन्दे अक्लेशकेशवो नाम द्वितीयः सर्गः-च.१०.सम्प्रति-इ.११.नास्ति-इ.१२.नास्ति-ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।१६-क।। अधुना कविर्लोकान् प्रत्याशिषं ब्रुतेसाकूतेति। [१] नवः शृङ्गारस्तरुणो वा केशवो वा युष्माकं भक्तानां क्लेशं दुःखं हरतु[२]दूरीकरोतु। [३] कथम्भूतः केशवः? गोपीनां निभृतं गोप्यभावं निरीक्ष्य दृष्ट्वा काञ्चिद्दयितां वल्लभां अन्तर्मनसि चिरं चिन्तयन्। पुनः [४] कीदृशः? मुग्धमनोहरः मोहयुक्तसुन्दरः। कीदृशम्? निभृतम्। साकूतं साभिप्रायं स्मितमीषद्धास्यं यत्र; आकुलाकुलोऽस्तव्यस्तो गलन्मुक्तीभवन् धम्मिल्लः केशपाशो यत्र। उल्लासिता उच्चैः कृता[५] भ्रूवल्ली यत्र। अलीकेन छलेन दर्शिता भुजाबालार्ध-हस्तस्तना [६]यस्मिन्। भुजाश्च बालाश्च अर्धहस्तस्तना[७]श्चेति[८]द्वन्द्वः।।१६-क।।

[९]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां अक्लेशकेशवो नाम द्वितीयः सर्गः।।

१.नवशृङ्गाररस: केशव:-क. नवशृङ्गारस्तरुणो-ल.म.२.नास्ति-क.३.कीदृश:-क.ल.म.४.नास्ति-ड. कीदृश: केशव:-क.५.भ्रूवल्लिलता-क.ल.म.६.त:७.पर्यन्तं नास्ति-ड.८.समास:-क.एतदनन्तरमेवं दृश्यते-क.ग्रन्थे- ''दयितं प्रियं दृष्ट्वा कुचोदरप्रकटीकरणपूर्वकं सङ्केतीकरणं यस्मिन् क्रियायां यथास्या मोहनकारकं शीलं यत्र तादृशं निभृतम्'' ९.इति गीतगोविन्दटीकायां नारायणपण्डितकृतायां भीषदासकारितायां पदद्योतनिकायां द्वितीय: सर्ग:-ल.म.नास्ति-क.

## (९) कृष्ण पण्डितकृत-जयन्ती (टीकानास्ति)

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन) (टीकानास्ति)

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।१६-क।।अथ कविरपिश्रीराधयोन्नीतं श्रीकृष्ण भिप्रायं व्यंजयन्नाशास्ते साकूतेति । श्रीराधिकोत्कर्षनिश्चयेन नव इव जात: केशव: वो युष्माकं क्लेशं हरतु । कीदृश: ? गोपीनां निभृतं रहस्यं तद्भावप्रकाशनं निरीक्ष्यातुल्याया: श्रीराधाया: सर्वोत्तमतां चिरमन्तर्विचारयन्निरस्तान्यनारीष्वाकांक्षा यस्य स:। अत:परोत्तमा अन्या नास्तीत्यर्थ:। गमिता तस्यां प्रापिताकांक्षा येन इति वा । भावप्रकाशकरणानि निभृतस्य विशेषणान्याह, आकूतेन सह स्मितं यत्र तत् तथाकुलादप्यातुल: अतिशिथिल: अतएव गलन् केशबन्धो यत्र तत् । किं च उत्क्षिप्तं भूवल्लीकं यत्र तत् तथैव । छलेन दर्शितभूजामूलादर्द्धदृष्ट: स्तनो यत्र एतत् अतएव मुग्धं मनोहरम् ।।१६-क।।

अत: सर्गोऽयमक्लेशो गत: श्रीराधिकासम्बन्धिमन: साधारण्याभासरूप: क्लेशो यस्मात् स केशवो यत्र स:। इति श्रीगीतगोविन्दटीकायां बालवोधिन्यां अक्लेशकेशवो नाम द्वितीय सर्ग:।।१६-क।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१६-क।।अथ कविरपि श्रीराधयोन्नीतं श्रीकृष्णाभिप्रायमनुसंदधानस्तदनुवर्णनेन एवं सर्गान्तं सूचयति। साकूतेति। केशवो वो युस्माकं क्लेशं हरतु नाशयतु। कीदृश:, गोपीनां निभृतं भावप्रकाशनरहस्यं निरीक्ष्य मुग्धं मनोहरमव्याजसुन्दरं राधारूपवस्तु अन्तर्मनसि चिरं चिन्तयन् विगताकाङ्क्ष: निवर्त्तितेतरसजातीय रमणीयवस्तु-दर्शनाभिलाष इत्यर्थ:। अत एव नव: तद्विरहकृतकार्श्यं पाण्डिमादिवशेनान्यादृश इव विभावनीय इत्यर्थ:। किं तन्निभृतं, तदाह आकूतेन सह उद्गतं स्मितं यत्र तादृशम्। आकुलादप्याकुल: अत्याकुलोऽतिशिथिल इत्यर्थ:। अत एव गलन् विस्रंसन् धम्मिल्ल: केशबन्धो यत्र तत्। 'धम्मिल्ल: संयता: कचा:' 'इत्यमर':। उल्लासिता नर्त्तिता भ्रूवल्ली यत्र तत्। अलीकेन कुन्तलसमीकरणादिव्याजवाहूत्तोलनेन दर्शितं यत् भुजामूलं तेन हेतुना अर्धदृष्ट: स्तनो यत्र तत्।।१६-क।।

इति श्रीगतगोविन्दे अक्लेशकेशवो नाम द्वितीयसर्गः ।

अत एव क्लेशरहितः केशवः यत्र तन्नामायं सर्गः ।

।। इति श्रीगीतगोविन्दव्याख्यायां रसिकरङ्गदाख्यायां द्वितीयसर्गः ।।

## (१ ३) प्रफुल्लमिश्रकृत-स्वर्णलता टिप्पणी

१ ६ (क)—साकूतेति; अत्र सर्गान्ते कविः भक्तान् आशास्ते। केशवः युस्माकं क्लेशं हरतु। किंभूतः केशवः ? गोप्यः साकूतं आकूतिना साकं प्रार्थनया अभिलाषया वा कामाकर्षणार्थं श्रीकृष्णस्य पुरः किं किं कुर्वन्ती ताः ? चतुःप्रकारं रतिभावं प्रकटितमस्ति। पूजारीगोस्वामिना उक्तमस्ति। साभिप्रायं स्मितम् सर्वाः गोप्यरेकैकं मित्यर्थं स्मितहास्येनाहूयन्ति। द्वितीयतः आकुलाकुलगलद्धम्मिल्लम्। कामव्याकुलेन स्वस्याः केशबन्धमपि मुकुलितमस्तव्यस्तम्। तृतीयतः उल्लासिताः भ्रूवल्ली। नेत्रापाङ्गविकारो नाम कामचेष्टा।

``सुभाषितेन गीतेन युवतीनां च लीलया। चेतो न भिद्यते यस्य स वै मुक्तोऽथवा पशुः।।" इतिवचनात् चतुर्थतः अलिकदर्शितभूजामुलार्धदृष्टस्तनम्। कपटेन स्वस्योन्नतस्तनौ कक्षादि प्रदर्शनादि व्याजेन कुर्वन्त्यः गोप्यः। येन श्रीकृष्णः तान् प्रति आकृष्टः स्यात्। अनेनैव प्रकारेण गोपीनां कामनाव्याकुलतां निशम्य तस्य मनसि श्रीराधायाः सौन्दर्यगुणान् हृदि मन्त्रयित्वा तस्याः चिरन्तनभावमुपास्य तेन मिलितुमुकण्ठिता। श्रीकृष्णः भक्तानां दूरितं हरतु इति आशीर्वादात्मकः श्लोकः। श्लोकोऽयं जयन्ती - रसमञ्जरी - सर्वाङ्गसुन्दरी-श्रुतिरञ्जनी-टीकासु न वर्त्तते। व्रजयुवतीनां साकाक्षं प्रणयं श्रीराधायारलौकिक-प्रेम्णा मलीनमिति। शार्दूलविक्रीडितम् छन्दः। विदग्धोनायकः। परिकरोऽलंकारः। इति अक्लेशकेशवकुञ्जरतिलकनामा षष्ठः प्रबन्धः।।१ ६-क।।

टीकां निर्ममे बहुशः विद्वद्जनाः सज्जनाः। नारायणोदयनः कुम्भकर्णप्रभृतयः।१ ।

टिप्पणी हि विधीयते विवुधानां पुरःसरम्। बालानामववोधाय सारल्येन प्रतन्यते।२ ।

क्लेशं हरतु मे कृष्णःसमुल्लसतु चेतना। श्रीकृष्णप्राणनाथेन धन्यं धन्यायितं जीवम्।३ ।

अक्लेशकेशवो नाम इति कौत्सकुलावतंस श्री प्रफुल्ल मिश्रविरचितायां स्वर्णलताटीपण्यां द्वितीय सर्गः।

❀ ❀ ❀

# ।। तृतीयः सर्गः ।।

## मुग्धमधुसूदनः



# ।। तृतीयः सर्गः ।।

। मुग्धमधुसूदनः ।

**१७-कंसारिरपि संसारवासनाबन्धशृङ्खलाम्।**
**राधामाधाय हृदये तत्याज व्रजसुन्दरीः।।१७।।**

**।। मुग्धमधुसूदनः ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१७।।अस्मिन् समये श्रीकृष्णः किं चकारेत्याशयेनाह। हरिरिहेत्यादिना प्राप्तवैदग्ध्यं गोपीना प्रतिपादितम्। अविदग्धानां चाप्ययुक्त एव परित्याग इत्याह। कृष्णाभिप्रायः प्रकटयन् उत्तरगीतार्थं श्लोकश्यां गृह्णाति।

कंसारिः राधां हृदये हरिः आधाय व्रजसुन्दरीः तत्याजेति योजना। कदाचिद्राधा अन्यगोपीसदृशी स्यादिति अपाकर्त्तृमाह। संसारवासनाबद्धश्रृङ्खलामिति पूर्वानुभूतस्मृत्यु-पस्थापितविषये स्पृहा। वासना संसारे वासनैव बन्धो। बन्धनं तदर्थं श्रृङ्खलां निगडरूपामित्यर्थः। एतेन राधायाः सौन्दर्य्यदग्ध्यं चोक्तम्। ''श्रृङ्खला पुंस्कटीवस्तु-बन्धेऽपि बन्धने निगडे त्रिष्विति **मेदिनी**:।'' अपरं किं चकार तदर्थमाह।।१७।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१७।। गोयानुगुणैरधिकैरधिगतं तनुते धातुं बुधसमांकामत्।
नत्वा निधिमिह सुरवरनतं कुम्भनरेशोऽलंकृतियुतम्।।

इदानीं राधायाः कृष्णेऽनुरागं निरूप्य कृष्णस्यापि राधायामनुरागं दर्शयन्नाह गौडकृतिरागेण, कंसा रिरिति। कंसारिरपि व्रजसुन्दरीस्तत्याज। न केवलं राधैव कृष्णसक्ता बभूव किंतु कृष्णोऽपि राधासत्को बभूवेत्यपिशब्दार्थः। किं कृत्वा ? राधां हृदये आधायारोप्य। किंभूतां राधाम्? संसारवासनाबन्धे शृङ्खलेव शृङ्खला। अत्र 'तक्वजोर्ज' इति पथ्या छन्दः।।१७।।

## (३) जगद्धरकृत-सारदीपिका

।।१७।। एवं राधायाः विरहोत्कण्ठा कृष्णस्यापि विरहव्यथां तस्यामाह। कंसारिरपि कृष्णोपि राधां हृदये मनसि स्थाप्य ब्रजसुन्दरीं गोपीं तस्याः लज्जां त्यक्तवान्। कीदृशीं राधां संसारे वासनां संस्कारस्तस्यां बन्धायश्रृङ्खलां निगडरूपां सौन्दर्यवतीं तत्याजेति। राधायां कृष्णस्यानुरागातिशयो ध्वनितः।।१७।।

## (३) शंकरमिश्रकृत-रसमञ्जरी

।।१७।। राधायाः कृष्णविषयिणीमुत्कण्ठामुक्त्वा संप्रति कृष्णस्यापि तस्यामुत्कण्ठामाह, कंसारिरिति। कृष्णोऽपि व्रजसुन्दरीस्तापात्तत्याज। त्यागे हेतुगर्भविशेषणमाह, राधामिति। राधां हृदय आधायारोप्य। 'सुन्दरी' पदेन बहुवचनेन सौन्दर्यवतीरपि तत्याजेति कथनेन कृष्णस्य राधामनुरागातिशयो ध्वनितः। कीदृशीं राधाम्? संसारविषयिणी वासना संस्कारस्तस्य बन्धनेन शृङ्खलामिव। अनेनाभिलाषाख्या प्रथमावस्था। एतल्लक्षणं च दशरूपके, (४।५३) 'अभिलाषः स्पृहा तत्र कामे सर्वाङ्गसुन्दरे। दृष्टे श्रुते वा तत्रापि विस्मयानन्दसाध्वसम्।।' इति 'शृङ्खला पुंस्करे वस्त्रबन्धेऽपि निगडेऽपि च' इति **विश्वः**।।१७।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१७।। अथ कृष्णस्य पूर्ववर्णितराधाविरहवेदनाप्रतिज्ञापनाय तस्यैकान्तावस्थानं सम्पादयितुं कामः प्रथमं गोपिकाकदम्बत्यागं घटयति। कंसारिरिति। कंसारिः श्रीकृष्णोऽपि यथा राधाकृष्णविरहखिन्ना तथा कृष्णोपि राधाविरहखिन्नोऽन्यत् सर्वं तत्याज, तथा राधायां प्रेमातिशयवशात्तद्विरहखिन्नः कंसारिरपीत्यपि शब्दार्थः। अथवा कंसघातकत्वेन कृष्णावतारः परमात्माऽपीत्यपि शब्दार्थः। संसारवासनाभिरसंसारिणो मगवतः श्रीकृष्णस्य कल्पिता अध्यारोपिता वल्लवाङ्गनाभिः सहस्रं श्रुतिसौख्यप्रतिपादिका या वासना ताभिर्बद्धा निर्मिता या शृङ्खलेव शृङ्खला तत्कल्पा विषयप्रमुखस्यापि कृष्णस्य निरन्तरं वैषयिकसुखसम्बन्धे दृढशृङ्खलायमानामित्यर्थः, अथवा संसारवासनायै बद्धशृङ्खलायमानां कृष्णस्य संसारवासनां राधाप्रमुखवल्लवाङगनामूलकत्वादिति-भावः। एवंविधां राधां हृदये आधाय स्मृतेत्यर्थः। ब्रजसुन्दरी वल्लवाङ्गना तत्याज त्यक्तवान्। फलोन्मुखराधाभोगादृष्टप्रेरितः सन्गोपिकाकदम्बमत्याक्षीत्। न तु स्वतो राधाभोगलोलुपः सन्नित्यर्थः। काव्यलिङ्गमलङ्कारः।।१७।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१७।। एकाश्रितत्वेन राधाभिनिवेशस्य रसाभासतां निराकर्त्तुं तस्यापि राधायामेतादृगेवाभिनिवेश इति दर्शयति। कंसारिः कृष्णः व्रजसुन्दरीः सर्वगोपरमणीः तत्याज मुमोच। किं कृत्वा? राधां हृदये आधाय धृत्वा। अत्र कंसारिपदोपन्यासेन सुरताभिसूचनेनोत्तमनायकता सूचिता। सुन्दरीपदेन बहुवचनेन च राधायां माधव-स्याधिकानुबन्धो बोधितः। कीदृशीं राधाम्? संसारे वासना विषयस्पृहा सैव बन्धो बन्धनं तत्र शृंखलामिव। तदाह 'शृंखले स्यात् कटीरन्ध्रे बन्धे च निगडेऽपि च' इति।।१७।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।१७।। एवं सर्ग[२]द्वये प्रोक्ता श्रीराधोक्ति[३] र्हरौ परा।

तृतीये त्वथ कृष्णेन तस्यां गुर्वी निरूप्यते।

।।१७।। श्रीराधाया: श्रीकृष्णस्यापि श्रीराधायां[४]गुर्वीं रतिमाह, कंसारिरित्यादिना। कं सुखं विषयजन्यमपसारयति[५]निजानन्दप्रदानेन[६]निजस्वच्छस्वरूपप्रदर्शनेन वा स कंसारि:[७] श्रीकृष्ण:; संसारजन्यसकलसुख विस्मारक इत्यर्थ:। ईदृशोऽपि श्रीराधां हृदये आधाय आरोप्य। व्रजन्तीति व्रजा: युवतिसमूहा: [८]ता एव सुन्दरी: सौन्दर्यवतीरपि तत्याज त्यक्तवान्।[९] कीदृशीम्? संसरतीति संसार: कारागृहरूप[१०]स्तस्य[११]बन्धाय शृङ्खलामिव शृङ्खलाम्। यथा कश्चिदवरुद्ध: कारागृहे [१२] राधायादवसिद्धिं प्राप्य तां हृदये आधाय तद्बलेन [१३] शृङ्खलां निगडं त्यजति तद्वत्।[१४] अथ वा संसारवासना भोगसंस्काररूपा तस्या बन्धस्तस्य कामपूर्तिकर्त्रीमिव। बहि: कश्चिद्वासनापूर्ताविभिलाषं करोति।[१५]अथ वा सम्यक् सार: [१६]संसार: प्रणयरस: [१७]श्रीकृष्णो वा तस्मिन् वासनाबन्धाय शृङ्खला वेणी इव, परमानन्दप्रदत्वात्। शृङ्खला पुंस्कटीवस्त्रबन्धेऽपि निगडेऽपि च इति **विश्व:** (१०५.११९)। संसार: स्यात्तु जगति तथा संसार: सारभूतेऽपि च इति क्षेमेन्द्र:।[१८]संस्कारे (सारे) वासना[१९] बन्धे वासना त्ववरोधन: इति **हलायुध**: (५.९५)। सुन्दरी रमणी रामा **इत्यमर:** (२.६.४)। शृङ्खला कुमुदे काञ्च्यां वस्त्रे च कचबन्धने इति **विश्व:**।।१७।।

१.वासनाबद्ध-अ.ब. २.द्वयेनोक्ता-ब.इ.फ.ग.ह.ज. ३.हरिप्रिया-फ. ४.गुर्वीमाह-अ.ब.फ. ५.निजानन्दनिजस्वच्छं-ग. ६.निजस्वरूप-अ.ब.ज. ७.नास्ति-अ.ब.इ.फ.ग. ८.त:१०.पर्यन्तं नास्ति-ज. ९.नास्ति-अ.ब.फ. ११.वासनाबन्धाय-ज. १२.राधां सिद्धिं प्राप्य-इ.फ.ग.ह.ज. १३.नास्ति-अ.ब. १४,१५.यद्वा-ग. १६.नास्ति-ज. १७.नास्ति-अ.ब. १८.संस्कारो वासना स्मृता-हला. १९.प्रोक्ता-ग.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।१७।। इति [१] राधाया विरहव्यथामुक्त्वा कृष्णस्य विरहव्यथामाह कंसारिरिति। कंसारिरपि [२]कृष्णोऽपि राधां हृदये मनसि आधाय संस्थाप्य व्रजसुन्दरी: गोपीस्तत्याज त्यक्तवान्। कीदृशीं [३] राधाम्? संसारे वासनाबन्धस्तस्य शृङ्खलां निगडरूपाम्।।१७।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।१७।। कृष्णालम्बनराधाप्रीतिवर्णनं कृतं ; राधालम्बनकृष्णरत्यप्रतिपादनेन परस्परानुरागाभावाच्छ्रोतृणां भावाभासप्रतीति: स्यादिति भगवतोऽपि कामावस्थां

वर्णयितुमाह कंसारिरिति। कंसारि: कृष्णोऽपि संसारस्य वासनया काङ्क्षया बद्धा शृङ्खला निगडाख्या यस्य स:। वासनाया: मोक्षप्रतिबन्धकत्वे परिणामालङ्कार:। कंसारिरित्यत्र नित्यमुक्तत्वरूपार्थान्तरसङ्क्रमितवाच्यध्वनि:। राधां हृदये आधाय धृत्वा व्रजसुन्दरीं(:) तदितरसर्वगोपीं (:) तत्याज त्यक्तवान्। सर्वपरित्यागेन राधायां अतिशयरागत्वात् ज्येष्ठत्वम्।।१७।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१७।। युगपत्प्रवृत्तस्यापि राधामाधवयोर्विरहस्य क्रमवर्णनीयत्वात् कवि: पूर्वं विरहोत्कण्ठितां राधामभिधाय साम्प्रतं कृष्णस्यापि विरहविधुरतां वर्णयितुमपक्रमते। हरिरिहेत्यादिना प्राग्वैदग्ध्यं गोपीनां प्रतिपादितम् अविदग्धानां चोपयुक्त एव परित्याग इत्याह कंसारीत्यादि। कंसारि: कृष्णोऽपि राधां हृदये मनसि च आधाय धृत्वा अर्थाद् ध्यानेन समारोप्य व्रजसुन्दरीरन्यास्तत्याज। राधानुसरणव्यग्रचित्तत्वादिति भाव:। एतेन चिन्तानिर्वेदौ व्यभिचारिभावौ प्रतिपादितौ। तथा च, 'निर्वेदो ग्लानिराशङ्का तथासूया मद: श्रम:। आलस्यमथ दैन्यं च चिन्ता मोह: स्मृतिर्धृति:।। व्रीडा चपलता हर्ष: आवेगो जडता धृति:। गर्वो विषाद औत्सुक्यं निद्रापस्मार एव तु। त्रासो हर्ष: प्रबोधश्चाप्यवहित्थं तथोग्रता। वितर्को व्याधिरुन्मादो मरणमशौचमेव च। त्रयत्रिंशदिमे भावा: विज्ञेया व्यभिचारिण:।।' इति। कदाचित् राधाप्यन्यगोपीसदृशी स्यादित्यपाकर्तुमाह। किंविधाम्? संसारेति। पूर्वानुभूतस्मृत्युपस्थापितविषये स्पृहावासनासंसारे वासनैव बन्धो बन्धनं तदर्थं शृङ्खलानिगडरूपामित्यर्थ:। यद्वा संसारे वासना नित्यविज्ञानं तृष्णा वा, तस्या बन्धशृङ्खलाम्। 'वासना नित्यविज्ञाने, व्यसने धूपनेऽपि च।।' इति **कुमुदाकर**:। 'वासनं धूपने वारिधान्यां वस्त्रेऽथ वासना। संसारभेदे लिप्सायां व्यसनज्ञानयोरपि।।' इति **हट्टचन्द्र**:। अत्र बन्धपदोपादानात् बन्धने व्यावृतत्वं शृङ्खलाया अवगम्यते। तथा च, ''कर्णावतंसादिपदै: कर्णादिध्वनिनिर्मितै:। सन्निधानादिबोधार्थं स्थितेष्वेतत् समर्थनम्'' इति **काव्यप्रकाश**:। अथवा वसतेर्ण्यन्ताद् भावे तुमर्थे युट्। तदयमर्थ:; कारागृहकल्पे संसारे वासनायै जनं बन्दीकृत्य वासयितुं बन्धशृङ्खला। अत्र शृङ्खलात्वरूपणेन राधाया: सौन्दर्यं वैदग्ध्यं चोक्तम्। एवं नाम सुन्दरी सा यदुत(क्त)संसारे जनस्तया शृङ्खलयेव निबध्यते इति। कंसारिरपीा[६४] त्यत्रापिशब्द: पूर्वोक्तराधिकाविरहबाधापक्षेया समुच्चये, तेन न केवलं राधा कृष्णविरहेण विव्यथे किन्तु कंसारिरपि। राधिकाविरहेणेति द्वयोरपि परस्परनिर्भरप्रेम्णो यौगपद्येन विरहवेदना प्रतीयते।।१७।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।१७।। एवं सर्गद्वयेन राधामाधवायोरुत्कर्षं निरूप्य इदानीं श्रीराधिकोत्कण्ठावर्णनान्तरं श्रीकृष्णोत्कण्ठामाह, कंसारिरिति। यथा सा तस्मिन्नुत्कण्ठिता तथा कंसारिरपि राधाम् आ सम्यक् प्रकारेण हृदये धृत्वा व्रजसुन्दरीस्तत्याज। हृदयेतद्धारणपूर्वकं शारदीयरासान्तर्विस्फूर्त्त्या चलित इत्यर्थः। कीदृशां ? पूर्वानुभूतस्मृत्यपस्थापिता विषयस्पृहा वासना, सम्यक् सारभूतायाः प्राक्निश्चिताया वासनाया बन्धनाय स्थूणानिखननन्यायेन दृढीकरणाय शृङ्खलां निगड़रूपां परमाश्रयामित्यर्थः। यथा कश्चिद् विवेकी पुरुषः तारतम्येन सारवस्तुनिश्चयात् तदेकचित्तः तदन्यत् सर्वं त्यजति तथायमपि तास्तत्याज इत्यभिप्रायः।।१७।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१७।। अथ श्रीराधिकोत्कण्ठावर्णनानन्तरं श्रीकृष्णोत्कण्ठां वर्णयति; कंसारिरिति। कंसारिरिति पदं व्रजसुन्दरीत्यागस्यापाततो नैष्ठुर्यकार्यविषयतया प्रतीयमानस्य बलवत्प्रयोजनानुरोधेन करणाददोषत्वसूचनाय इति बोद्धव्यम्। यथा श्रीराधा कृष्णे उत्कण्ठिता तथा कंसारिरपि राधिकायामित्यपि शब्दार्थः। हृदयं राधायामाधाय इति न अपि तु राधां हृदये आधाय इत्युक्तिः। विरहबह्निज्वालाकुलेऽतिकठिने चेतसि सुकुमारतराङ्गीं तां कथमिव निवेशयामि। न च सा निमेषमात्रमपि अस्मादपक्रामति। तत् कोऽत्र प्रतिकार इति पुनः पुनः निमीलितनेत्रो विचारितवानिति बोधयति। व्रजसुन्दरीरिति त्यक्तुमनर्हा अपि तत्याज इति उक्तवान् । कीदृशीम्; संसारवासना-बन्धशृङ्खलां समन्ततः सर्वासु अवस्थासु सारभूतानि यावन्ति रमणीयवस्तूनि, तद्विषया या वासना, पूर्वानुभवजनितस्मरणसाधारणसंस्कारः। तस्या बन्धे तिरोधाने शृङ्खलां निगडरूपां सजातीयवत्स्त्व न्तरस्मरणनिराकरण धुरन्धरामित्यर्थः। किं वा सम्यक् सारभूताया वासनायाः पूर्वानुभूतस्मृत्युपस्थापित विषयस्पृहायाः स्वनिष्ठप्रेमरूपाया बन्धाय दृढीकरणाय शृङ्खलां परमाश्रयामित्यर्थः। अनेन श्रीकृष्णस्य श्रीराधायामनुकूल-नायकत्वं दर्शितम्। उक्तं च,

राधायामेव कृष्णस्य सुप्रसिद्धानुकूलता।
तदालोके कदाऽप्यस्य नान्यासङ्गः स्मृतिं व्रजेत्।। इति ।

अनुकूलनायकलक्षणं यथा,

"अतिरिक्ततया नार्यां त्यक्त्वाऽन्यललनास्पृहः" इति ।।१७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

१७- कंसारिरपीति; कंसस्य अरिः कंसारिरपि संसारस्य नाम जगतः विविधविषयचारूवासनाया बन्धनमिव बन्धनमुपास्य हृदि धारयित्वा व्रजसुन्दरीं त्यक्तवानासीत्। गोपीपरिवेष्टनीं परिहिय श्रीराधान्वेषणं कृतमासीत्। अत्र न केवलं श्रीराधायाः वासनाधिक्यमस्ति अपितु श्रीकृष्णस्यापि तथा प्रणयसान्द्रता विद्यते। अस्य व्याख्यानं सञ्जीवनीटीकायां कंसारिशब्दस्य भिन्नतया क्रियते। तत्र कं नाम सुखं तत् सुखं प्रति सारयति दर्शयति नयति वा जनान् इत्येव तस्य निजानन्दप्रदानकारित्वम् अथवा संसारस्य सुखं विस्मरति अत एव कंसारी। कंसारि अपि श्रीराधा प्रेम्णा संसारी पुनः कंसस्य अरिः निष्ठुरः घातकत्वेन मनोरमगोपीकुलं त्यक्तवानसौ। अतः कंसारिशब्दस्य देहलीदीपकन्यायेन अर्थान्तराणि सन्ति। श्रीकृष्णोऽप्यत्र अनुकूलो नायकः। अत्र पूर्वसर्गे यथा राधायाः व्याकुलता वर्त्तते तथा व्याकुलता कृष्णस्यापि तृतीये सर्गे वर्णिताऽस्ति। अत्र पथ्याच्छन्दः। सर्गेऽस्मिन् नायकः मुग्धः। नायिकाः च मुग्धाः। तदर्थं नामकरणमस्ति मुग्धमधुसूदनः इति।। दीपिकाकारस्यापि एतन्मतम्। यौवनालंकाराः कुम्भनरपतिना उद्धृताः कुम्भनरपतिना सलक्षणं पथ्याच्छन्द इति निरुपितः।।१७।।

**१८-इतस्ततस्तामनुसृत्य राधिकामनङ्गबाणव्रणखिन्नमानसः।**
**कृतानुतापः स कलिन्दनन्दिनीतटान्तकुञ्जे विषसाद माधवः।।१८।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१८।। कलिन्दनन्दिनी यमुना तस्यास्तटान्तकुञ्जे माधवः विषसादेति योजना। कीदृक् किं कृत्येत्याह इतस्ततस्तां राधिकामनुसृत्य राधिकाकृतानुताप इति। ''पश्चात्तापोऽनुतापः स्यादित्यमरः'' ।।१८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१८।। इदानीं कृष्णस्य विरहावस्थाचेष्टितमाह इतस्तत इति। स माधवोऽनङ्गबाणव्रण-खिन्नमानसः सन् विषसाद विषादं चकार। किं कृत्वा ? कलिन्द नन्दिनीतटान्तकुञ्जे इतस्ततस्तां राधामनुसृत्यान्विष्य। किंविशिष्टः ? कृतानुतापः पूर्वमेव मया कथं नानुनीतेति कृतपश्चात्तापः। अत्र कुञ्जेष्विति वक्तव्ये बहुष्वपि परिभ्रमन् तदार्तिवशादेकमेवाज्ञासीदित्येक-वचनम्। वंशस्थवृत्तम्।।१८।।

## (३) जगद्धरकृत- सारदीपिका

।।१८।। पुनः किं कृतवान्। इतस्ततेति स माधवः कलिन्दनदिन्याः यमुनाया स्तटान्तकुञ्जे तीरलतागृहे निषसाद स्थितवान्। किं कृत्वा इतस्तत अनेकस्थानेषु तां

राधिकाम् अनुसृत्यान्वेष्य कीदृशः अनङ्गबाणव्रणेन कामशरऽङ्कक्षतेन खिन्नदीनं मनो यस्य कृतोनुतापः पश्चात्तापो येन सः।।१८।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।१८।। इतस्तत इति। स माधवः कलिन्दनन्दिन्या यमुनायास्तटान्तकुञ्जे तीरप्रान्तलतापिहितोदरगृहे निषसाद न्यवसत्। अत्र 'माधव' पदेन मा लक्ष्मीस्तस्या अपि धवः स्वाभी यदिरहव्याकूलो बभूवेति राधायाः सौभाग्याधिक्यं ध्वनितम्। किं कृत्वा? इतस्ततस्तेषु स्थानेषु तां हृदयनिहितामनुसृत्यानुलक्ष्य। कीदृशः। अनङ्गस्य कामबाणस्य तद्व्रणं क्षतं तेन खिन्नं दुःखितं मानसं यस्य। पुनः कीदृशः? कृतानुतापः कृतः किमिति मया तस्या अद्यावधीरणं कृतमिति पश्चात्तापो येन सः। अनङ्गबाणो(६५) त्यत्रानङ्गपदेनाङ्गरहितस्यात एवालक्षितगतागतस्य कामस्यशेषदृष्टदमानपि कृष्णेन निवारणं कर्तुं न शक्यमिति ध्वनितम्। अवश्य इति चिन्ता भवेद्यथेति तेन श्लोकेन चिन्ताख्या द्वितीयावस्था ध्वनिता। तदुक्तं **शृङ्गारतिलके**, (१.८) 'कथं स वल्लभः प्राप्यः किं कुर्यादस्य सिद्धये। कथं भवेदसौ वश्यव इति चिन्ता भवेद्यथा।।' इति।।१८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१८।। कामिनीकदम्बत्यागानन्तरकृत्यमाह। इत इतिकृतः प्राप्तः अनुतापः निष्कारणमेव मत्प्राणसखी राधामेतावन्तं कालं किमिति त्यक्तवानस्मीति यः पश्चात्तापः स यस्य तादृशः स माधवः श्रीकृष्णः अनङ्गस्य ये बाणाः अरविन्दादयः सायकाः, उक्तं च

अरविन्दमशोकञ्च चूतञ्च नवममालिका।
नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः।।इति।।

तैर्व्रणाः क्षतानि "तृतीया तत्कृतेत्यादि" (२-१-३०) समासः। तैः खिन्नं दुखितं मानसं मनो यस्य स तादृशः सन्, उक्तं च,

अप्रत्यक्षं लक्ष्यं चेतश्चापोऽपि पुष्पनिष्पन्नः।
मौर्वी मकरन्दवशा शिव शिव कुसुमशर समरसन्नाह।।

इति विरहातुरस्य मन्मथशरपीडायाः युक्तत्वादितिभावः अतएव तद्वेदना निवृत्तये इतस्ततस्ता राधिकां "प्रत्ययस्तात्का" (७-३-४४) दित्यादिनाऽत्र इत्वम्। अनुसृत्यान्वितस्या मार्गणं कृत्वेत्यर्थः। कलिन्दनन्दिन्याः यमुनायाः तटान्तकुञ्जे तीरसमीपलतागृहे विषसाद दुःखितवान्। यमुनातटे सर्वत्र राधिकां परिमृश्य कुत्रापि तामदृष्ट्वा श्रान्तः सन् कुत्रचिद् वानीरकुञ्जे व्याकुलितमना अवतस्थे इत्यर्थः। नन्दनीत्यत्र

कृत्य ल्युट्यो बहुलमिति बहुलग्रहणसामर्थ्यान्नन्द्यादि ल्यु प्रत्ययमपोह्य ल्युटिटित्वा नङीण् प्रयोगश्च। अम्बरमनम्बरणमासीत्कलिन्दनन्दन्या इति। अत्रापि केचिच्छाब्दिकंमन्याः कलिन्दनन्दनेति पाठं कल्पयन्ति। तदतिसाहसम्। उक्तबिधयागतेः सम्भवात्। अनङ्गवाणब्रणखिन्नमानसामिति केषुचित्पाठः। तदा राधिकाविशेषणम्। काव्यलिङ्गम्।।१८।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१८।। ततः किं कृतवानित्याह। कलिन्दनन्दिनी यमुना तस्यास्तटान्तकुञ्जे निकटकुञ्जे सद्गुणविशिष्टो माधवो विषसाद विषादं लेभे। अत्र मा लक्ष्मीः तस्या धवो माधव इति प्रकृते माधवपदेन कृष्णस्योपन्यासेन तस्य च राधाया अलाभेन विषादप्रतिपादनेन तस्याधिक्यं दर्शितम्। किं कृत्वा? इतस्ततः सर्वत्र तामनिवर्चनीयरूपां राधिकामनुसृत्यान्विष्य। किम्भूतः? अनङ्गबाणेन कामशरेण यो व्रणः तेन खिन्नं मानसं यस्य तथाभूतः। अत्र अनङ्गपदेन अङ्गहीनतया अविदिताङ्गक्षतवेदनावत्त्वेन कामस्य निर्दयप्रहारशालिता दर्शिता। पुनः कीदृशः? कृतोऽनुतापः पश्चात्तापो येन, अर्थात् कथं तस्यां मया साधारणप्रणयव्यवहारो विहित इत्याकार इति।।१७।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१८।। व्रजसुन्दरीः तत्याजेति यदुक्तं तदेव श्रीकृष्णचेष्टितं सन्तापमाह इतस्तत इति। स माधवो मधुप्रियः कलिन्दनन्दिन्याः यमुनायाः तटान्तकुञ्जे तीरसमीपलता[४] पिहितोदरमन्दिरे विषसाद क्लेशभरेण[५] प्रणयभरेण वा विषण्णो बभूव। [६]किं कृत्वा? इतस्ततस्तेषु कुञ्जेषु। तां श्रीराधां अनुसृत्य अन्वेष्य; तत्र हेतुः अनङ्गस्य कामस्य ये बाणाः सम्मोहनादयः तेषां व्रणैः क्षतैः [७]खिन्नं विषादयुक्तं मानसं[८]यस्य सः। कीदृशः? [९]श्लोकद्वयेनानेनोभयोस्तुल्योऽनुरागः[१०] प्रदर्शितः। कन्दर्पो दर्पकोऽनङ्ग **इत्यमरः** (१.१.२५)। [११]स्वभावोक्तिरलङ्कारः।।१८।।

१.राधाविरहव्यथामुक्त्वा अथ कृष्णविरह-क.२.नास्ति-ड.३.नास्ति-ड.४.पिहितोदरे-अ.ब.ग.५.तत्प्रणय-इ.ह.६.किं कृत्वा नास्ति-अ.ब.७.विपन्नं-इ.फ.ज. विषण्णं-ग.ह.८.नास्ति अ.ब.-९.श्लोकद्वयेनोभयोः-अ.ब.१०.नास्ति-अ.ब. प्रदर्शित इति-इ.फ.ग.ह.ज.११. प्रेङ्खस्वभावोक्तिरलङ्कारः-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।१८।। इतस्तत इति। स माधवः कलिन्दनन्दिनीतटान्तकुञ्जे [१] यमुनातीरलतागृहे [२] निषसाद स्थितवानित्यर्थः। किं कृत्वा? इतस्ततोऽनेकस्थलेषु [३] तां राधां

अनुसृत्यान्विष्य। कीदृशः [४] कृष्णः ? अनङ्गबाणव्रणेन[६५] कामबाणक्षतेन खिन्नं दीनं मानसं यस्य। कृतानुतापः कृतपश्चात्तापः।।१८।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।१८।। इतस्तत इति। स माधवः अनङ्गबाणस्य व्रणेन कामोद्रेकेण खिन्नं मानसं अन्तःकरणं यस्य, तादृशस्सन् तां राधिकां इतस्ततः परितः कुञ्जादौ अनुसृत्य गवेषयित्वा अप्राप्नुवन् कृतानुतापः तां विना कथं मया रासक्रीडा कृतेति पश्चात्तप्तस्सन् कलिन्दनन्दिन्याः यमुनायाः तटान्तकुञ्जे तीरस्य कुञ्जे निषसाद श्रमेणावसन्नगतित्वादुपविष्टः। वंशस्थं वृत्तम् ।।१८।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१८।। इतस्तत इत्यादि। सपरित्यक्तेतरव्रजसुन्दरीको माधवः तां राधामीर्ष्यावशेन प्रदेशान्तरगतामितस्ततोऽनुसृत्य कलिन्दनन्दिन्याः यमुनायाः तटान्तरस्य तीरस्य कुञ्जे विषसाद विषादयुक्ता बभूव इति योजना। अनेनात्र विषादो नाम व्यभिचारिभावः कथितः। किंविधः ? अनङ्गबाणव्रजखिन्नमानस इति। अनङ्गस्य बाणेन शरेण यो व्रणः क्षतं तेन खिन्नं दुःखितं मानसं यस्येति विग्रहः। अनेन दैन्यमुक्तम्। ''व्रणोऽस्त्रियामीर्म मरीः(रुः)'' **इत्यमरः**। पुनः किंविधम् ? अत एव कृतानुतापः इति। कृतोऽनुतापः पश्चात्तापो येनेति विग्रहः। ''पश्चात्तापोऽनुतापः स्याद्'' **इत्यमरः**।।१८।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।१८।। तदनन्तकृत्यमाह, इतस्तत इति। न केवलं सैव माधवोपि यमुनायास्तटप्रान्तकुञ्जे विषादं चकार। किं कृत्वा ? तत्तत्स्थाने तां श्रीराधिकाम् अन्विष्य। कीदृशः ? अहो तस्याः सर्वोत्तमतां जानतापि मया कथमेवं कृतमिति कृतः पश्चात्तापो येन सः अनेन तत्सदृशी दशाप्युक्ता।।१८।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१८।। अनन्तरकृत्यमाह; इतस्ततेति। सः श्रीराधाप्रणयभङ्गचिन्ताकुलो माधवस्तां मानग्रस्तचित्ततया निजसमीपादन्तर्हितां राधिकां निजप्रणयसर्वस्वरूपाम् इतस्ततः पूर्वक्रीडाप्रसङ्गेन परिचितेषु अनुसृत्य क्वचिन्मदकलमरालमञ्जुगुञ्जितं तन्मञ्जीरकलशिञ्जितं विभाव्य क्वचन मन्दानिलान्दोलितस्थलारविन्दसन्दोहे तच्चरणविन्यासबुद्ध्या क्वचिच्च स्फुटत् कनकयूथिकावीथीं तदङ्गगौरकान्तिरियमिति तत्तदभिमुखमनुधावन् तत्र तत्र तददर्शनसमुदितशोकमोहसमय एव प्राप्तावसरस्यानङ्गस्य बाणैः सम्मोहन-

शोषणसन्तापनादिविविधास्त्रैर्ये व्रणा मर्मग्रहव्यथास्तैः खिन्नं राधानुसरणप्रतिबन्धक-खेदध्वस्तं विवेकधीरं मानसं यस्य यः। अत एव कृतोऽनुतापो येन सः। स्वयमुत्थापितराधाविरहसन्तापमुत्प्रेक्ष्य उत्प्रेक्ष्य किमाचरितं मया दुर्विदग्धेन, न हि शिरीषकुसुमसौकुमार्यं वज्रकठिनघनताडनेन मन्दधियोऽपि कदाचित् परीक्ष्यन्ते, इत्यादिविविधपश्चात्तापाकुलचित्त इत्यर्थः। तथा सन् कलिन्दनन्दिनीतटान्तकुञ्जे यमुनातीरसमीपवर्त्तिनि राधासङ्केतवसतितया प्रसिद्धे वानीरकुञ्जे विषसाद। निजानुचित-करणोदितविविधविलापो बभूवेत्यर्थः।।१८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

१८- इतस्ततेति; श्रीकृष्णचन्द्रः मनसि श्रीराधां प्रति अवहेलनं प्रकटयामास। अतः दुःखितः पश्चात्तापेन राधिकाम् इतस्ततमन्विष्यान्विष्य स मनसि कामबाणस्य प्रहारेणः जर्जरितः। यमुनातटस्थिते कुञ्जे विषादं नाटयामासः। अतः राधायाः संकेतस्थानानि यमुनाकूलवेतसकुञ्जे अन्विष्यान्विष्य दुःखेन खेदेन पश्चात्तापेन वा वर्त्तते श्रीकृष्णः।।१८।।

।। सप्तम प्रबन्धः / गीतम् ७ ।।

।। गुर्जरीरागेण यतितालाभ्यां गीयते ।।

**१-मामियं चलिता विलोक्य वृतं वधूनिचयेन।**
**सापराधतया मयापि न वारितातिभयेन।।**
**हरिहरि हतादरतया गता सा कुपितेव।।ध्रुवम् ।।१ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१ ।। गुज्जरी रागेण गीयते। हरि हरि इति खेदे पुत्रकलत्रादिबियोगदुःखार्त्तैर्ज्ञानिभिः "संसारतारको हरिः मुहुः स्मर्य्यते" तद्दर्शना ज्ञानिनामपि जागर्त्त्येष व्यवहारः, तद्दर्शनादयमपि भगवानान्मानुषत्वमापन्नः कदाचिदात्मानमजानन् तथाऽकरो-दित्यभिप्रायः। सा राधा हतादरतया गता कुपितेव। गीतेनानेन हरेर्विलापावस्था वाच्या। तल्लक्षणं

सम्भ्रमाति मनो यत्र रतौत्सुक्यादितस्ततः।
वाचः प्रियाश्रया एव स विलापः स्मृतो यथा।।इति।।

इयं राधा वधूनिचये वृतं मां विलोक्य चलिता मयाप्यसावति भयेनैव न वारितेति त्रिस्वगति एष विलापः। यदेवं कथमेनानुनयसीत्याह।।१ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१ ।। उक्तमर्थ गीतेन स्पष्टयति, तत्र पूर्व ध्रुवपदम्। हरीति। हरि हरीति। खेद। सा राधा कुपितेव गता। कया ? हतादरतया। हतो विनाशित आदारो बहुमानस्तस्य भावस्तया। इति ध्रुवः। अथ पदानि। मामियमिति। मां वधूनिचयेन वृतं विलोक्य गतेति ध्रुवपदेनैकवाक्यत्वात्संबन्धः। किंभूता ? तादृशी मया चलितापि सापराधतया न वारिता न निषि। इह साकूतम् तस्या गमने हेतु जानन्नपि सापराधोऽस्मि। कथमेतस्या अग्रे मयातिभयेन वक्तुं पार्यत इति बुद्वा अतिशयितं भयं यस्येति मयेत्यस्य विशेषणम्। करणे तृतीया। अतिक्रान्तं भयमिति वधुनिचयविशेषणं वा। अथवा, मामेवं विलोक्य सा चलितापि मया न वरिता। हरि हरि गतेति विषादाभिनयेन योज्यम्।।१ ।।

## (३) जगद्धरकृत- सारदीपिका (टीकानास्ति)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१ ।। कृतानुतापमेव गीतेन कथयति, मामियमिति। गीतस्यास्य गुर्जरीरागः। प्रतिमंठतालः। गीतार्थस्तु, हरिहरि कष्टम्। सा राधा हतादरतया कुपितेव गता। ननु सा कुपिता गतेति त्वया कथं ज्ञातमित्यत आह, मामियमिति। मां वधूनिचयेन गोपवधूसमूहेन वृतं वेष्टितं विलोक्य दृष्ट्वा चलिता प्रस्थिता। विलोक्येत्यव्यवहितपूर्वकाले क्तत्वा। तेन गोपवधूवेष्टितं मां दृष्टाऽव्यवहितकाल एव यतश्चलिता ततो ज्ञायते कुपितेवेति भावः। ननु मा गच्छेति त्वया किमिति न निवारितेत्यत आह; सापराधतयेति। मयातिभयेनाति-शयितभीत्या सा न निवारिता। भयहेतुमाह; सापराधेति। अपराधो राधां विहायान्यगोपीभिः सह क्रीडारूपस्तदुक्ततया।।१ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१ ।। तटान्तकुञ्जे बिषसाद माधव इत्युक्तं तत्प्रकारमेवाभिनीय दर्शयति मामियमित्यादिना। गुज्जरीरागेण गीयते इत्युक्तम्। तस्यायमभिप्रायः गुण्ड़क्रियोप-स्थानानन्तरं तत्सपत्न्या एवोपस्थानं युक्तमिति अथवा, कवेः प्रियत्वाद् वा पुनरवस्थानमिति। रूपकतालेन गेयम्। तल्लक्षणं तु

"द्रुतद्वन्द्वं विरामान्ते रूपकः परिकीर्त्तित"।

इति। तत्र हरि हरीत्यारभ्य कुपितेवेत्यन्तं ध्रुवपदम्। इयं वधूनिचयेन वृतमावृतं मां विलोक्य दृष्टवा चलिता चलमानामस्मत्समीपं परित्यज्यान्यत्र निर्गता इति मयापि राधायामतिप्रेमशालिनापीत्यपरोऽर्थः।

अथवा समो पतिना वधूनिचयेन न वारितैव दक्षिणेन मया तु नितरामित्यपि शब्दार्थः। अपराधेन सह वर्त्तत इति सापराधस्तस्य भावस्तद्धा तया, प्राणसमां राधां परित्यज्यान्यासम्भोगरूपो योऽपराधः तत्सहचरभावेनेत्यर्थः। अतएवातिभयेन अपराधनिष्पन्नं यद्भयं तेन हेतुना न निवारिता, किमिति गच्छसीति न निरुद्धा अपराधिनैव साक्षादपराद्धचित्तसन्तोषकरणस्य प्रायशो लोकविरुद्धत्वादितिभावः। अतएव हतः प्रतिहतः अपगत इति यावत्। तादृश आदर आश्वासो यस्याः सा तादृशी तस्याभावस्तत्ता तया ''त्वतलोर्गुणवचनस्येति'' पुंवद्भावः। मत्कृतादररहितयेत्यर्थः।

अतएव कुपितेव कोपनशीलसम्पन्नेव वस्तुगत्या मयि कोपस्याभावादितिभावः। अतएवोत्प्रेक्षणम्। गता अनुचितकारिणं माननादृत्य एतादृशस्य मम पुरतोऽवस्थानम् अनुचितमित्यन्यत्र निर्गतेत्यर्थः। निर्गमजनितखेदमभिनयन्तीत्यर्थः। हरिहरीति द्विरुक्तोऽयं शब्दः प्रकृतिखेदद्योतकः, अयं प्रयोगो लोकानुसारीति केचित्। स्नानकाले हरि हरिरितिवत्। इङ्गालशब्दवद्देशभाषानुसारी प्रयोग इत्यपरे। अव्ययगतपठित इत्यन्ये, व्याकरणान्तरसिद्धि इति केषांचित् संप्रदायः, वयं तु ''ओर्गुण'' (६-४-१४६) इतिज्ञापकात्संज्ञापूर्वक विघेरनित्यत्वात्ह्रस्वस्य गुण इति नात्र गुणः किन्तु ''एङ्ह्रस्वादिति'' (६-१-६९) सुलोप इति ब्रुमः। सर्वत्र पक्षे प्रकृते खेदद्योतकोऽयं न विष्णुवाचकः प्रकारान्तरेणापि सिध्यति।।१ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१ ।। न केवलं विषादं लेभे अपितु राधाविहारविकलो बहुतरं विलापे इति गीतेनाह। गीतस्यास्य गुर्जरीरागः, प्रतिमण्ठतालः। रागलक्षणमुक्तमेव। वधूनिचयेन नारीसमूहेन वृतं वेष्टितं मां विलोक्य इयं राधा चलिता गन्तुं प्रवृत्तेत्यर्थः। अत्रेयमितिभावनोपस्थित्या अन्यस्त्रीसाधारणविहारेण सापराधतया स्वयमेव तथाविधं दृष्टवतीत्यभिनयेन मयापि न निवारिता न गमने निषिद्धा हरि हरीति खेदं सा राधा हतादरतया नष्टबहुमानत्वेन कुपितेव गता क्रुध्देव गता। अत्र गमनक्रियाकर्मणोः विशेषतोऽज्ञानतया नोद्देशः। अत्रेवशब्द एवार्थः; यद्वा तस्याः मयि कथं कोपः स्यादिति निर्भरप्रणयानुबन्धात् कुपितेवेत्युक्तम्। सा इत्यनुस्मृतिमादाय उक्तमित्यवधेयम्।।१ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१ ।। [५]श्रीकृष्णानुतापमेव दर्शयति [६]मामियमित्यादिना। गुर्जरीरागे मठताले। ध्रुवपदम्। तल्लक्षणं पूर्ववत्। हरि हरीति महत्कष्टम्। [७]हरि हरि कष्टेऽद्भुते च यादवः [८]। [९] श्रीराधा हतादरतयाऽनादरेण कुपितेव गता। ननु कुपितेव गता इति त्वया कथं ज्ञातमित्यत

आहवधूनिचयेनेति। वधूनिचयेन गोपस्त्रीसमूहेन वृतं वेष्टितं मां विलोक्य दृष्ट्वा इयं [१०] चलिता। ननु सा गच्छन्ती किमिति त्वया [१] न निवारिता ? सापराधतया अपराधो राधां विहायान्यवधूक्रीडारूप: तद्युक्त त या मया अतिभयेनातिशयभीत्या न निवारिता। मात्राच्युतिरलङ्कार:।।१।।

१.यमुनाकूललतागृहे-क.यमुनाकूले लतागृहे-ल.म.२.विषसाद इति-ड.३.गतां-क.४.नास्ति-ड.ल.म.५.श्रीकृष्णानुनयमेव गीतेन दर्शयति-इ.फ.ग.ह.ज.६.मामिति-इ.फ.ग.ह.ज.७.त:८.पर्यन्तं नास्ति-अ.ब. एतत्पदव्याख्यान्ते दृश्यते-फ.ग.ह.ज.८.इत आरभ्य एतत्पदसमाप्तियावत् व्याख्या नोपलभ्यते-इ.सा राधा-फ.ग.ह.ज.१०.ज्वलिता-ब.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।१।। कृतानु[२]तापत्वमेवाह गीतेनमामियमिति। हरि हरि इति खेदानुकारे। सा राधा हतादरतया हतबहुमानत्वेन कुपितेव कोपं प्राप्तेव अन्यस्थाने गता। मां कृष्णं वधूनिचयेन गोपीसमूहेन वृतं वेष्टितं[३]विलोक्य चलिता इतो गता इति भिन्नैव वाक्यरचना। मयापि कृष्णेनापि सापराधतया कृतापराधत्वेन हेतुनाऽतिभयेन न निवारिता। यद्वा किम्भूतेन मया ? अतिभयेन अतिशायितं भयं यस्येति।।१।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।१।। मामियमिति। चलिता रासक्रीडारम्भकाले क्रीडास्थलान्निर्गता इयं नस्सन्निकृष्टा राधा, वधूनिचयेन सुन्दरीकदम्बेन वृतं वेष्टितं मां विलोक्य कुपितेव गतेति योजना। किमर्थं नानुनीतेत्यत आह सापराधतयेति सापराधतया तदितराङ्गनाक्रीडनरूपागसा सहिततया; अतिभयेन साध्वसेन मया न निवारिता प्रणयानुवचनैर्न निरुद्धा। ध्रुवाया व्याख्यानम्। हत: विनष्ट: आदरो यस्या: सा तस्या: भाव: तया। अवमानेनेत्यर्थ:। कुपितेव सा राधा गता। हरि हरि इति खेदे।।१।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१।। अस्यां हि गाथायां हरेर्विलापावस्था वाच्या। तल्लक्षणम् ''संभ्रमाद्धि मनो यत्र रत्यौत्सुक्यादितस्तत:। वाच: प्रियाश्रया एव स विलाप: स्मृतो यथा।।'' इति। मामियमित्यादि। हरिहरीति विषादे। ''आम्रेडितं विषादार्थे शिवेति च हरीति च'' इति **हट्टचन्द्र**:। सा राधा हतादरतया कुपितेव गतेति वाक्यार्थ:। प्रदेशान्तरमिति शेष:। हतादरतयेति। यद्वा हत आदरो येन तस्या: भावस्तत्ता तया। ममैवानादरेणेत्यर्थ:। हतादरता कुत इत्याह वध्विति। इयं राधा वधूनिचयेन वृतं वेष्टितं मां विलोक्य चलिता सती मयापि यतो न वारिता न निवर्त्तयिता। हृदये राधामादधान: कृष्ण: प्रत्यक्षतया

तामेव परामृशतीति इयमित्युक्तवान्। अनिवारणहेतुमाह अतिभयेनेति। कस्मादतिभयमित्याह - सापराधतयेति । अपराधस्तदितरनारीसम्भोगस्तेन सहित तयेत्यर्थ:। स्वगत एष विलाप:। अथवा मया किंविधेन ? सापराधतया अतिभयेनेति। अति नितान्तं भयं यस्य सोऽहमतिभयस्तेन। ''अतिशब्द: प्रशंसायां प्रकर्षे लङ्घनेऽप्यति। नितान्ते सम्प्रति क्षेपवाचकोऽप्येष दृश्यते।।'' इति **विश्व**:। ननु चलनगमनयोरथ-विशेषादत्रार्थपौनरुक्त्यं, नैतदस्ति शब्दशक्तिस्वभावादर्थविशेषस्फुरणा। तथा हि चलनं नाम प्रस्थानमनियतकर्मकम्। गमनं तु देशान्तरलक्षणं प्रतिनियतकर्मकम्। तत्रायमभिप्राय:। मां विलोक्य चलिता प्रस्थिता स्थानान्तरं गन्तुमारब्धा मयापि तस्याश्चलनं निषिद्धम्। ततश्च हतादरतया प्रदेशान्तरं गतेति।।१ ।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।१ ।। पश्चात्तापमेवाह मामियमित्यादिभि:। अस्यापि गुर्ज्जरीराग, यतितालौ। हरिहरीति खेदे। हा कष्टम्, सा पूर्वानुभूतगुणा श्रीराधा वधूसमूहेन वृतं मां दूरतो विलोक्य चलिता, अनेनान्योन्यावलोकनं जातमिति गम्यते। कथं तदैव नानुनीता मया दृष्टापि सापराधतया तां विहाय अन्याभिर्विहाररूपयाति भयेन न निवारिता।।१ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१ ।। विलापमेव प्रपञ्चयति; मामियमित्यादिना गीतेन। इदमपि गुज्जरीरागेण गीयत इत्युक्तम्। तत्र मामिति, 'हरिहरि' इति विषादाभिव्यञ्जकप्रातिपदिकरूपको निपातसमाहार:। सा चिरं प्रणयबहुमानोपलालिता राधा हतादरतया हत: प्रतिहत: आदर: सम्मानो यस्यास्तस्या भावस्तत्ता तया। प्रतिलवोपचितप्रणयबहुमानयोरनुचित-परिहासकृतखण्डनेनात्मनो लघुतां मत्वेति भाव:। कुपितेव साहजिकभावाभिव्यञ्जक-भङ्गिविशेषतिरोधानेनान्तर्गतप्रणयप्रसरं निरुन्धाना गता। मदनुनयादवकाशं निराकुर्वाणा झटित्यन्तर्गता। ननु कथं तादृशं त्वत्प्रणयमननुरुध्य तथा कुपितेत्यत आह; मामिति इयं मत् प्राणेश्वरी राधा वधूनां निजनिजभावोद्योतकविलासवतीनां निचयेन मण्डलेन वृतं वेष्टितं मां तत्प्रेमवशीकृतमिव प्रतीयमानं विलोक्य विशेषेण दृष्ट्वा कथमिदमदृष्टचरं पश्यामीति मन्युशोकावेशाद् भ्रान्तचित्ततया चलिता अन्यथाभावं प्राप्ता। तादृश-प्रणयमनुरोद्धुं न समर्थेति अर्थ:। अनेन परस्परालोकनमात्रं जातमिति आयातम्। ननु तथापसृता सा मालतीमल्लीजातिषु भ्रमतां कालयोगत: अयि पद्मिनि ! जानीहि तवैवेष मधुव्रतो मधुसूदन इत्यादि अनुनयेन किमिति न निवारितेत्यत आह; सापराधतया कृताकृतपूर्वेदृग्विधापराधतया हेतुभूतयातिभयेन अतिशयं भयं यस्य तथाभूतेन प्रथमं

तां प्रमाणातिगनि:श्वसितोत्तम्भितकुचोत्तरीयामालक्ष्य सञ्जातकम्पेन तत: स्मिततिरोधानितवदनां निरीक्ष्य प्राप्तातिकातर्येण ततश्च कोपकुटिलितभ्रूलतामालोक्य कथं दर्शयाम्यात्ममुखमस्यै। निरपत्रपस्तिष्ठामि वा पुरतोऽस्या: कथमतिसाहसिक-मित्यादि समुदितसाध्वसेन मयाऽपि न निवारिता। न निरोद्धुं शक्या इत्यर्थ:।।१ ।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

१- मामियमिति; इयं मां गोपवधूनिचयपरिवृत्तमवलोक्य ममापि तां प्रणयविहीनतामनुभूयं दु:खेन खेदेन मां दूरत: चक्षुविनिमयेनापि गता। ह हा आत्मानमहमपराधिनम् मत्वा तां किमपि वक्तुं नाहं समर्थ:। अपि च तां प्रतिनिवृतां भवितुं वक्तुं मम सामर्थ्यमपि नासीत् अपराधभयेन।। १ ।।

**२-किं करिष्यति किं वदिष्यति सा चिरं विरहेण।**
**किं धनेन जनेन किं मम जीवितेन गृहेण ।। हरिहरि० ।।२ ।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।२ ।। सर्वमेतत्प्रियाविरहितस्याकिञ्चित्करमित्यभिप्राय:।।२ ।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।२ ।। किमिते। इदानीं मदपराधे मन्निमित्तमेव सा विषादं भुङ्क्ते इति आत्मसमत्वेन तामपि गणयन्नाह, सा किं करिष्यतीति। मयि मिलिते कोपेर्ष्यादिकं कथं विधास्यतीत्यर्धोक्त्या। अहभुत्तरं दास्यामित्याह, किं जनेनेति; गोपीजनेन। किं धनेति। धनजीवनमप्यकिंचित्करं कृत्वा जीवितं निन्दति। जीवितफलं किम्? सुखमपि त्वदृते नान्यदिति वाक्यशेष:। किंविशिष्टा सा? विरहेण उपलक्षिता। अथवा, मम विरहेणाक्रान्ता सा किं वदिष्यतीत्यादि। ममापि तां विना किं धनादिनेति योजनीयम्।।२ ।।

**(३) जगद्धरकृत- सारदीपिका (टीकानोपलब्धा)**

**(४) शंकरमिश्रकृत-रसमञ्जरी**

।।२ ।। किं करिष्यतीति। सा चिरं विरहेण चिरकालिनमद्वियोगेन किं करिष्यति। विरहतापस्यात्यर्थं कमुपायं करिष्यतीत्यर्थ, अथ च, किं वदिष्यति? किं मम सद्गुणं वदिष्यति, दोषान वा वदिष्यतीत्यर्थ: यदवा, काकुस्वरे किं वदन्तीत मया सह न कदाचिद्वानी न कथयीष्यत्यैर्थ:। तया विना मम धनेन किम्? न किंचित्प्रयोजनमित्यर्थ:। ननु धनं विना परिजनसंग्रह: कथं स्यादित्यत अह, तया विना मम जनेनाश्रितेन परिजनेन किम्? न किमपि प्रयोजनम्। ननु परिजनं विना गोधनरक्षा कथं भविष्यतीत्यत आह, तया विना

मम गोधनेन किम्? न किमपि प्रयोजनम्। ननु धनं विना परिजनादृते च गृहरक्षापि न स्यादित्यत आह। तया विना मम गृहेणापि किम्? अपि तु प्रयोजनं नास्तीत्यर्थः। अपि विना तु प्रयोजनं सांसारिका भोगाः कथं सेत्स्यन्तीत्यत आह। तया विना मम सुखेनापि किम्? स्रक्चन्दनवनितादिजन्येनापि सुखेन किं प्रयोजनमित्यर्थः। इयं च स्मृत्याख्या तृतीयावस्था। तदुक्तां **रसार्णवसुधाकरे**, 'अर्थानामनुभूतानां देशकालनुवर्तिनाम्। सातत्येन परामर्शो मानसः स्यादनुस्मृतिः।। अत्रानुभावविश्वासाद्धीनं कृत्वा विहस्तता। राज्यासनादिविद्वेषश्चेत्याद्याः स्मरकल्पताः।।' इति।।२।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।२।। प्रकारान्तरेणापि खिद्यति किं करिष्यतीत्यादि। सा राधा चिरं विरहेण मद्वियोगेन हेतुना किं किं कार्य्यं करिष्यति विरहवेदनामसहमाना विषादिना प्राणत्यागादि कार्य्यं करिष्यति किमित्यर्थः। किं किं वचनं वदिष्यति प्राणसमं मां परित्यज्य विदीर्णहृदया कथं वर्त्तते इति मां शप्यते किमित्यर्थः। अत्र मम धनेन किं काय्यं राधां विना मम केयूरादि भूषणरूपेण कस्तूरिकादिपरिमलद्रव्यरूपेण क्षौमादिदिव्यवस्त्ररूपेण ताम्बूलादि भोगसाधनरूपेण धनेन किमपित्यर्थः। मम सुखेन किम्।।२।।

राधां परित्यज्य विपञ्चिस्वरश्रवणादि साधनजनितसुखेन मम किं मण्डनैः किं रमणीयवस्त्रैः किं माल्यताम्बूलसुगन्धलेपैः। "विना प्रियामात्ममनोऽनुकूलां पुंभोगसाराहि मृगायताक्षी" इति। अत्र भावसन्धिरनुसन्धेयः।।२।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२।। पुनरनुचिन्तनपूर्वकं विलपति, सा राधा चिरं चिरकालं व्याप्य यो विरहः विश्लेषः तेन लक्षिता तद्युक्ता किं करिष्यति किमाचरिष्यति किम्वा वदिष्यत्यर्थात् मयि वितर्कोऽत्र व्यभिचारी भावः। अतः किं जनेन किमन्येन किं धनेन त्रिभुवनेन करात्मभूतया तया विना हिरण्यादिवित्तेनेत्यर्थः। मम जीवितेन सुखेन किम्, मम जीवितरूपेण सुखेनापि न किमपीत्यर्थः। तथा च ताम्विना न किमपि सुखजनकमिति भावः।।२।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।२।। किञ्च [४] सा राधा चिरं चिरकालं विरहेण वियोगेन किं करिष्यति [५] किं [६]वदिष्यति? मम दोषमदोषं वा वदिष्यति। नन्वन्यगोपवधूनिकरं विहाय कोऽयं तस्यामाग्रहः? [७]तत्राह-किं जनेनेति। श्रीराधां विना मम गोपवधूनिचयेनान्यजनसमूहेन [८]वाऽपि किम्? ताद्विरहे धनेन तज्जनितविचित्रभोगाभरणादिना वा किम्? ननु [१] गृहमन्तरा गृहसौख्यं न स्या [२]त्तदाह, गृहेण किम्? [३]मम गृहेण किम्? [४] तद्विरहे। सैव

गृहमित्यर्थः। ननु गृहं विना सुखं कथं स्यात्तत्राह, सुखेनेति। तद्विरहे गृहसुखेन किम्? सैव मम सुखरूपेति भावः। इयं स्मृत्याख्यावस्थोक्ता।।२।।

१.न. निवारिता इत्यत आह-ज.२.तापत्वमाह-क.३.दृष्ट्वा सापराधतया कृतापराधत्वेन हेतुना भयेन वा न निवारिता-क.४.नास्ति-अ.ब.५.६.नास्ति-अ.ब.फ.ग.ह.ज.७.नास्ति-अ.ब.८.वाऽपि जनेन-ग.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।२।। किं करिष्यतीति। सा राधा चिरं विरहेण बहुकालवियोगेन किं करिष्यति? [५] किं [६] वदिष्यति? तां राधां विना मम जनेन लोकेन किम्? [७] धनेन जीवितेन च किम्? [८]गृहेण किम्? [९] तां विना सर्वं विफलमित्यर्थः।।२।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।२।। किं करिष्यतीति। सा चिरं विरहेण बहुकालवियोगेन। किमित्यत्र काकुः। किं वा वदिष्यति? अत्रापि काक्वा मौनम्। काक्वाक्षिप्तमिति मध्यमं काव्यम्। काक्वभावे सापराधं मां किं वदिष्यति निन्दां करिष्यतीति, किं करिष्यति आत्मव्यापादनादिकं विरहेण करिष्यति किमिति शङ्का स्वदुर्नयभावा व्यज्यते। मम जनेन परिजनेन तदतिरिक्तवधूगणेन वा किम्? व्यर्थमिति। धनेन गृहधान्यादिना किम्? भोगोपयोगिस्रक्-चन्दनताम्बूलादिना किम्? गृहेण सङ्केतयोग्यकुञ्जकुटीरादिना किम्? भवेन संसारेण जन्मना किम्? सुखेनेति पाठः स्पष्टः। अत्र भोगसाधनानां वैयर्थ्यप्रतिपादनान्निर्वेदाख्य-सञ्चारीभावो व्यज्यते।।२।।

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२।। किं करिष्यतीत्यादि। सा राधा चिरं विरहेण चिरकालं यो वियोगस्तेन किं करिष्यतीति। प्राणनिरपेक्षमपि कर्म कुर्यादित्याशयः। चिरमिति मकारान्तमव्ययम्। विरहपदेन समस्तमसमस्तं वा। किं वदिष्यतीति विरुद्धमपि वक्ष्यतीत्यभिप्रायः। मम धनेन किं प्रयोजनम्? धनप्रयोजनकारिणी राधिकैव मे इत्यर्थः। स्वकीयेन जनेन वा किं प्रयोजनम्? सुखेन सुखान्तरेण वा किं कार्यम्? राधिकामन्तरेण मम सुखमेव न प्रतिभातीत्यर्थः। गृहेण वा किं कार्यम्? तया विरहितस्य मम गृहमप्रयोजनमिति यावत्। इति सर्वमेतत् प्रियाविरहितस्याकिञ्चित्करमित्यभिप्राय। निर्वेदोऽयम्।।२।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।२।। ततः सा चिरं विरहेण कामवस्थां प्राप्य कमुपायं विधास्यति सखीं प्रति किं वा वदिष्यतीत्यहं न जाने। अतो मम धनेन गर्वं समूहेन किं, व्रजजनेन वा किं, गृहेण वा किं, सुखेन वा किं, तां विनैव तत्सर्वं अकिंचित्करमित्यर्थः।।२।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२।। अथ तस्या गमनानन्तरामवस्थामुत्प्रेक्षते। किं करिष्यतीति; या हि पद्मिनीपत्रमात्रान्तरितस्य प्रियतमस्यावलोकने अतिव्याकुलां चक्रवाकीं विलोक्य 'प्राणेश्वर' पश्य पश्य महच्चित्रम्। यदियं निजप्रेयां समपश्यन्त्यपि प्राणितीत्याश्चर्य-सम्भृतहृदया मां दर्शितवती सा चिरविरहेण युगसहस्रायमाननिमेषार्धकालोऽप्यधिकदशा-विशेषानु, भावकेन विप्रयोगेन किं करिष्यति। चिन्तयामि किमप्यत्याहिताचरणं वा करिष्यतीति भाव:। विचारशून्ये। कथमकारणकोपग्रहेणात्मानं कदर्थयसि, जानीहि त्वदेकवशंवदं प्राणेशमिति प्रबोधयन्तीं सखीं प्रति किं वदिष्यति। कथमेवं जल्पन्ती ज्वलदग्नौ तृणं विक्षिपसीत्यादि प्रतिकूलवादं कथयिष्यतीति भाव:। धनजनादिसुख-सम्पन्नतया पूर्णकामस्य तस्य को वा मत् स्मरणावकाश इति सा कदाचित् मन्येत। दु:खिते मनसि सर्वमसह्यमिति तद्विरहसन्तप्तस्य मम धनेन किं भूषणवसनानु-लेपनमाल्यताम्बूलाद्युपभोगसाधनीभूतेन द्रविणेन किं प्रयोजनम्। न किमपीत्यर्थ:। तथा जनेन बन्धुगोष्ठीरसा भिनिवेशेन वा किम्। सुखेन गीतवाद्यनृत्यादिविविध-विनोदानन्देन किम्? गृहेण रत्नविनिर्मितचन्द्रशालिकदिविचित्रमन्दिरनिवासेन वा किम्। एतत्सर्वं तत्सहितस्यैव मम सुखाय एव। तद्रहितस्य तु केवलं दु:खाय एवेति भाव:।।२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

२- किं करिष्यतीति, श्रीराधा मत्त: विच्छिन्ना किं करिष्यति? रुष्टा मयि किं वा वदिष्यति? मम कुत्रचिदपि प्रयोजनं नास्ति। मह्यं न धनं वित्तं गृहादि सम्पति: न च स्नेह जन: रोचते यदि सा नास्ति। तया विना सर्वं तुच्छयते।।२।।

**३-चिन्तयामि तदाननं कुटिलभ्रु कोपभरेण।**
**शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण।।हरिहरि०।।३।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३।। कोपभरेण कुटिलभ्रू तदाननं चिन्तयामि। राधाया अभावे नान्यत्किनच्चित् सुखावहमित्यभिप्राय:। वाक्यार्थोपमामाह। उपरि भ्रमता भ्रमरेण आकुलं शोणपद्ममिवेति। ''शोण: कोकनदच्छविरित्य**मर**:।'' ह्रस्वो नपुंसके प्रातिपदिकस्येति भ्रूशब्दस्य ह्रस्व:।।३।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३।। चिन्तयामीति। अहं तदाननं चिन्तयामि। किंभूतमाननम्? कोपभरेणार्थान्मयि कुटिलभ्रु। कुटिले कुञ्चिते भ्रुवौ यत्र। किमिव? शोणपदमेनोपमीयते। भ्रमरेण कुटिले कोपावेसपरिस्फुरमाणे भ्रुवाविति। अत्र वाक्यार्थोपमालंकार:। तथा च 'तदाननमधीराक्षमाविद्धं शतदीधिति। भ्रमद्भृङ्गमिवालक्ष्य केसरं भाति पङ्कजम्।।' इति।।३।।

## (३) जगद्धरकृत- सारदीपिका (टीकानोपलब्धा)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।३।। चिन्तयामीति। अहं तदाननं चिन्तयामि स्मरामि। कीदृशम्? रोषभरेण कोपातिशयेन कुटिलभ्रू कुटिला वक्रा भ्रूर्यत्र तादृसम्। किमिव? उपरिभ्रमता भ्रमरेणाकुलं व्याप्तं शोणपद्ममिव। अत्र रोषभरेण मुखे शोणपद्मसादृश्यं बोध्यम्। वारंवारं वक्रीभवन्त्योर्भ्रुवोश्च भ्रमरोपमा बोध्या। अनेन गुणकीर्तनाख्य चतुर्थावस्था। तदुक्तम्, 'अङ्गप्रत्यङ्गलीलाभिर्वाक्-चेष्टाहसितेक्षणै:। न तस्य सदृश: कश्चिदित्यादिगुणकीर्तनम्।।' इति। 'शोण: कोकनदच्छवि:' **इत्यमर:**।।३।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।३।। चिन्तयामीति। कोपभरेण कोपाधिक्येन ''अन्यथातिशयो भर:'' **इत्यमर:**। अथवा कोपधारणेन वा कुटिले वक्रे भ्रुवौ यस्मिन् तादृशं मदुपेक्षा जनितकोपकुटिलीकृत्य भ्रूसमेतं तस्या: राधाया आननं मुखम् उपरि ऊर्द्ध्वभागे भ्रमता सञ्चरता भ्रमरेणाकुलं व्याप्तं शोणपद्ममरुणपद्ममिव चिन्तयामि ध्यायामि। अथवा शोणपद्ममिव स्थितं तदाननमिति वा अत्र कुटिलभ्रुवो भ्रमरसाम्यम्। कोपभरेणेत्येतन्मुखस्य रक्तिम-सम्पादनार्थं गृहीतम्। लोके कुपितं मुखं रक्तवर्णं दृश्यते। अत्र शोणपद्ममिवेत्युपमा। उपरि भ्रमणं भ्रमरयो: साधारणम्। शोणपद्ममिवेत्येकं पदम्। अत्र भावोदय: प्रत्येतव्य:।।३।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।३।। प्रकारान्तरमालोच्यातिसन्धत्ते, तदाननं चिन्तयामि। कीदृशम्? कोपभरेण क्रोधातिशयेन कुटिलभ्रु कुटिले वक्रे भ्रुवौ यत्र तथा। किमिव? उपरि भ्रमता भ्रमरेणाकुलं व्याप्तं शोणपद्ममिव। अत्रोपमा नामालंकार:। तथाह, 'यथा कथञ्चित्सादृश्यं यत्रोद्भूतं प्रतीयते। उपमा नाम सा तस्या: प्रपञ्चोऽयं निदर्श्यत' इति।।३।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।३।। एवं तां विना [१०] धनादीनां दुःखप्रदत्वमुक्त्वा इदानीं कुपितायास्तस्या [११]आननचिन्तनं मे जीवनमिति [१२]दर्शयति, चिन्तयामीति। अहं तदाननं चिन्तयामि [१] स्मरामि। कीदृक्? रोषभरेण कोपातिशयेन कुटिले वक्रे भ्रुवौ यत्र। किमिव? उपरिभ्रमता [२] सञ्चरता भ्रमरेणाकुलं [३] व्याकुलं शोणपद्ममिवा [४] रक्तकमलमिव। अनेन [५] कोपारक्तं मुखं [६] पद्मसदृशं [७]भ्रुवोर्भ्रमरोपमा चेति। [८]शोणः कोकनदच्छविः **इत्यमरः** [९](१.५.१५)। एतेन माधुर्यमुक्तम्।।३।।

१.धर्ममन्तरा-इ. धनमन्तरा-फ.ग.ह.ज. २.तत्राह-इ.फ.ग.ह.ज. ३.गृहेण किं मम न किञ्चित्-फ. ४.तद्वियोगे-इ.फ.ग.ह.ज. ५.६.नास्ति-क. ७.धनेन च किम्-क.ल.म. ८.गृहेण च किम्-क. ९.तया विना-क. १०.धनादिना-अ.ब. ११.आननचिन्तनमेव-फ.ग. १२.तद्दर्शयति-ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।३।। चिन्तयामीति। अहं तदाननं [१०] राधामुखं चिन्तयामि [११] स्मरामि। कीदृशं [१२] तदाननम्? रोषभरेण क्रोधातिशयेन कुटिले वक्रे भ्रुवौ यस्मिन् किमिव? शोणपद्ममिव रक्तोत्पलमिव। कीदृशं शोणपद्मम्? उपरि भ्रमता भ्रमरेणाकुलम्।।३।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।३।। चिन्तयामीति। रोषभरेण ईर्ष्याकृतरोषेण कुटिले भ्रुवौ यस्मिन् तत्। तस्या राधायाः आननं उपरिभ्रमता सञ्चरता भ्रमरेण आकुलं आच्छादितविकासभावं शोणपद्ममिव रक्तकमलमिव; कोकनदस्य उत्पलत्वात् कमलत्वं नास्तीति तादृश-कमलस्य स्वतस्सिद्धत्वादुत्प्रेक्षैव। तादृशं चिन्तयामि। क्वचिदपि रक्तकमलस्य सद्भावत उपमैव; तयाऽपि मुखारुण्यं व्यज्यत इति अलङ्कारेण वस्तुध्वनिः।।३।।

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।३।। चिन्तयामीत्यादि। तदाननमिति। तस्याः राधिकायाः आननम् अहं चिन्तयामि परिभावयामि। चिन्तनमिदं राधायाः अभावेनान्यत् किञ्चित न सुखावहमित्यभिप्रायः। किंविधम्? कोपभरेणेति। क्रोधातिशयेन कुटिले अनृजूकृते भ्रुवौ यस्मिन्निति विग्रहः। भ्रूकुटीयुक्तमित्यर्थः। ह्रस्वो नपुंसके प्रातिपदिकस्येति भ्रूशब्दस्य ह्रस्वः। वाक्यार्थोपमामाह, शोणेत्यादि। उपरि भ्रमता भ्रमरेण आकुलं व्याप्तं शोणपद्ममिव कोपातिशयेन लोहितत्वात् शोणपद्मोपमं भ्रुवौ कुटिलवाद् भ्रमद्भ्रमरोपमे। तथा च **दण्डी**, ''यथा कथञ्चित् सादृश्यं यतो भूतं प्रतीयते। उपमा नाम सा तस्याः प्रपञ्चोऽपि प्रदर्शितः।।'' इति तत्रापि वाक्यार्थोपमेयम्। तद्यथा, ''वाक्यार्थेनैव वाक्यार्थः कश्चिद्

यदुपमीयते। एकानेकेवशब्दत्वात् सा वाक्यार्थोपमा द्विधा।।" इति इयमेकेवशब्दाद् वाक्यार्थोपमा।।३।।

**(११) पूजारी गोस्वामीकृत-बालवोधिनी**

।।३।। अहं तदाननमेव ध्यानेन पश्यामि। कीदृशं ? रोषभरेण कोपभरेण कुटिला भ्रुर्यत्र तादृशम्। तेनैव लोहितं वाक्यार्थोपमामाह उपरिभ्रमता भ्रमरेण व्याप्तमरुण, पद्ममिव।।३।।

**(१२) लक्ष्मणकृत-रसिकरङ्गदा**

।।३।। तस्यागमनसमयसुखमाधुर्यमनुमोदमान आह; चिन्तयामीति। अहं तदाननं तस्या राधाया मुखं चिन्तयामि, ध्यानेन पश्यामीत्यर्थः। कीदृशं कोपभरेण क्रोधातिशयेन कुटिले वक्रीभूते भ्रूवौ यत्र तादृशं, तेन च मुखस्यारुणत्वमप्यायातम्। किमिव, उपरि भ्रमता ऊर्ध्वभागे सञ्चरता भ्रमरेणाकुलं व्याप्तं शोणपद्ममिव दर्शनीयमित्यर्थः। 'शोणः कोकनदच्छवि' रित्य**मरः**। आस्तां तावत् प्रसादकालीनस्य, कोपकालीनस्यापि मुखमाधुर्यस्य चिन्तनेनापि तदधीनः अस्मि इति भावः।।३।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

३- चिन्तयामीति; तस्या कोपमयिं मूर्त्तिं कल्पयामि। मुखे भ्रूयुगं क्रोधेन कुटीला वक्रा स्यात् प्रेम्णापि केचित्। रक्त कमले भ्रमरमिव तस्याः नेत्रयुगं भवेत्। तस्याः क्रोधस्य कलनमपि न करिष्यते।।३।

**४- तामहं हृदि संगतामनिशं भृशं रमयामि।**
**किं वनेऽनुसरामि तामिह किं वृथा विलपामि।। हरिहरि०।।४।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।४।। तां हृदि सङ्गतामहमनिशं रमयामीति प्रागेवं विचिन्त्य पुनर्ज्ञानं लव्ध्वा प्राह। किं वनेऽनुसरामि तां किंवा वृथा विलपामीति। "करविनिहितरत्नं मृग्यते नीरमध्ये" इत्यभिप्रायः।।४।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।४।। तामहमिति। अहं अनिशमनवरतं हृदि संगतां हृदये मिलितां तां भृशमत्यर्थ रमयामि। इत्युक्त्वा पुनः प्रबुद्धवाह, इष्टशून्यप्रदेशे वृथा किं विलापामि, तां वनेऽनुसरामि।।६।।

**(३) जगद्धरकृत- सारदीपिका (टीकानोपलब्धा)**

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।४।। तामहमिति। तामनुसरामि तस्या अनुसरणं करोमि। इह वृथा किं विलपामि किमिति। वृथा विलापं करोमि ? हृदि संगतां हृदये संनिहितामनिशं निरन्तरं भृशमतिशयेन तां रमयामि क्रीडयामि। यद्वा,–'किं' शब्दः प्रश्ने। अहं तां हृदि संगतामनिशं रमयामि किं वा वने तामनुसरामि। वृथा विलपामीत्यर्थः।।४।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।४।। विरहातुरः सन् भ्रान्तवदाह। तामिति। हृदि हृदये सङ्गतां पूर्वं मया सन्त्यक्तां तामिदानीं मया वित्यक्तां राधिकाम् अनिशं सदाभृशमत्यर्थं हृदि हृदये रमयामि। अनुभवामि। ततः इह वने लताकुञ्जे तां राधां किं किमर्थम् अनुसरामि अन्वेषयामि तस्या मार्गणं किमिति करोमित्यर्थः। ग्रीवास्थ ग्रैवेयकान्वेषणवत् सङ्गतमार्गणस्य लोकविरुद्धत्वादिति भावः। इह वने वृथा निष्प्रयोजनं किं किमर्थं बिलपामि। तस्य बाह्यनिमित्तं परिवेदनं किमिति करोमीत्यर्थः। लोके हि आन्तराशक्तिपूर्विकाया एव बाह्याशक्तेः श्लाघनीयत्वात्तादृशीमान्तरा शक्तिमनादृत्य बाह्यरत्यर्थं मया कृतं भावः अन्तरासक्तेः श्लाघनीयत्वं मालतीमाधवे यथा;

व्यतिषजति पदार्थानान्तरः कोऽपि हेतु र्न खलु बहिरुपाधीन् प्रीतयः संश्रयन्ते।
विकसति हि पतङ्गस्योदये पुण्डरीकं द्रवति हि हिमरश्मावुद्गते चन्द्रकान्तः ।।
अत्राप्युक्तं अहमिहैव वसन्नपि तावकस्त्वमपि तत्र वसन्नपि मामकः।
न तनु सङ्गम एव सुसङ्गमो हृदयसङ्गम एव सुसङ्गमः।। इति ।।

अत्र द्वितीयावस्थावगन्तव्या। रमयामीत्यत्र चौरादिकोणिजवगन्तव्यः।।४।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।४।। अथ सद्यः समुत्पन्नधृतिव्यभिचारिभावेनाह, अहं तां राधाम् अनिशं वारं वारं भृशम् अत्यर्थेन रमयामि क्रीडयामि। सा राधा क्व लब्धा इत्यत आह, मनसि हृदये सङ्गतां स्थितामित्यर्थः। तामिह वने किम् अनु सरामि किमन्वेषयामीत्यर्थः। वृथा निरर्थकं किम्विलपामि।।४।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।४।। तामेव [१३]मधुरतामाह, [१४]तामिति। अहं तां राधां अनिशं वारं वारं भृशमतिशयेन रमयामि [१५]क्रीडयामि। कीदृशीम्? हृदि हृदये संगतां सन्निहिताम्। किमिह वनेऽनुसरामि [१६]इह तस्या अनुसरणं करोमि। इह वने वा किं वृथा विलपामि, किमिति वृथाविलापं करोमि। [१]हृदि सन्निहितत्वात्। न हि गृहे नष्टं वने [२]मृग्यते।।४।।

१.नास्ति-ज. २.नास्ति-ग. ३.नास्ति-अ.ब.ज. ४.रक्त-फ.आरक्तकमिव-ज. ५.कोपात्त-न्मुखं-फ. ६.पद्मसादृश्यं भ्रमरोपमा चेति-अ.ब.इ.ग.ह.ज. ७.नास्ति-अ.ब. ८.तः. ९.पर्यन्तं नास्ति-अ.ब. १०.राधाननं-क. ११.नास्ति-क. १२.नास्ति-ड. १३.माधुर्यतामाह-अ.ब.इ.फ.ग.ह.-ज. १४.नास्ति-अ.ब.इ.फ.ग.ह. १५.क्रीडामि-ग.क्रीडयामीति-फ. १६.नास्ति-फ.ग.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।४।। तामिति। अहं हृदि संगतां राधां अनिशं वारं वारं भृशमतिशयेन रमयामि क्रीडयामीति भावना। इह वने तां राधां किमनुसरामि किं हृदि संगतत्वादेव वृथा व्यर्थमेव किं विलपामि, विलापं करोमि।।४।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।४।। तामहमिति। मनरसंग उक्तः। अहं तां अनिशं निरन्तरं हृदि चित्ते संगतां हृदि ध्येयत्वेन स्थिताम्। भृशं अत्यर्थं रमयामि लालयामि। अविच्छिन्नधारावाहिज्ञान-गोचरामित्यर्थः। अत एव तां वने किमनुसरामि ? तदन्वेषणार्थं पर्यटामि। इह कुञ्जवने किं वृथा बिलपामि श्रोतृरहिततया व्यर्थं प्रलापं करोमि। वृथेति वैयर्थ्यं उद्देशकोटौ सत्त्वात्पुनः किमितिपदेन वैयर्थ्यविधानात्।।४।।

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।४।। तामित्यादि ।अहमनिशमनवरतं हृदि सङ्गतां हृदये संलग्नां तां भृशं निर्भरं रमयामि। विरहिणोर्ध्यानलब्धां प्रियतमां रमयन्ती ।प्रागेवं विचिन्त्य किमनुसरामि, किमर्थमन्वेषयामि। किं वृथा विलपामीति ।व्यर्थमकारणं वा विलापं करोमि। ''वृथा व्ययं भवेद् व्यर्थोऽप्यविधौ च निरर्थकः'' इति **कुमुदाकरः**। करविनिहितरत्नं मृग्यते नीरमध्य इत्यभिप्रायः। किमिति मकारान्तमव्ययं विकल्पार्थे। तथा च, ''आहो उताहो किमुत विकल्पे किमुत च'' **इत्यमरः**।।४।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।४।। अथ तत्स्फूर्त्त्याह अहं तां हृदि सङ्गतामपि पुरः प्राप्तां निरन्तरमित्यर्थं रमयामि वने किमर्थं वा अनुसरामि तामुद्दिश्य किं वृथा विलपामि। 'न करकलितरत्नं मृग्यते नीरमध्ये' इत्यभिप्रायः।।४।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।४।। मुखचिन्तनाध्यवसायेन सर्वाङ्गीणतया चेतसि आविर्भूतां राधामनुभवन्नाह तामिति। तदेकजीवनोऽहं तां कोपपर चित्तां राधामनिशं निरन्तरं हृदि सङ्गतां हृदये निवसन्तीं भृशमित्यर्थः। रमयामि, अनुनयादिना सन्तोषयामि। या सदा हृदये निवसन्ती

तां किमर्थमिह वने कण्टकादि सङ्कीर्णे विपिनेऽनुसरामि अन्वेषयामि। तामुद्दिश्य किमिति वृथा व्यर्थं विलपामि परिदेवनं करोमि। नहि गृहे स्थितं वस्तु वने मृग्यत इति न्यायात्।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

४- तामहमिति; तां राधिकां मदीये हृदयस्याजिरे नित्यं रमणं करोमि। यदि सा मम हृदि निरन्तरं वसति तर्हि किमर्थमहं व्यग्रोऽस्मि। बनभूमौ अन्वेष्वणं करोमि। मुधा विलपनं तस्याः न दर्शने च करोमि। अत्र कविना सुरदासेन यथा उच्यते निरन्तर मिलई कवहु मिलेना...। श्रीकृष्णस्य श्रीराधया सम्बन्धस्तु निरन्तरमेव नित्यमेव तयोर्मीलनं - विच्छेदलीलया प्रणयस्य द्रढीकरणं भवति।।४।।

**५- तन्वि खिन्नमसूयया हृदयं तवाकलयामि।**
**तन्न वेद्मि कुतो गतासि न तेन तेऽनुनयामि ।। हरिहरि० ।।५।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५।। असूयया हे तन्वि! तव हृदयं सूयाय खिन्नमाकलयामि वेद्मि। यद्येवं कथं मे नानुनयसीत्याह। तन्न वेद्मि इत्यादि। त्वं कुतो गतासि तन्न वेद्मि तेन कारणेन ते तव नानुनयामीत्यर्थः। कुत इति तव द्वितीयान्तात् नासिः। किं देशं प्रसीसीत्यर्थः।।५।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५।। तन्वीति। हे तन्वि हृदयं असूयया खिन्नं खेदयुक्तं भविष्यतीत्याकलयामि। तत्तस्मादहं कुतो गताशीति न वेदिम, अपि तु असुयात एव गतासीति वदिम। अतो हेतो हेतोर्दर्शनाभावात्। ते तव संबन्धिना न तेन नमस्कारेणानुनयामि। अथवा, तव हृदयं असूयया खिन्नम्। तेन कारणेन ते तव हृदयं नानुनयामि। 'प्रतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः' इति न्यायापातादिति भावः। अथवा, तत्कुतो न वेदिम। अथवा, त्वं न गतासि यातासि। तव हृदयं न ते नमस्कृतौ न अनुनयामि।।५।।

## (३) जगद्धरकृत- सारदीपिका (टीकानोपलब्धा)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५।। तन्वीति। हे तन्वि! तव हृदयं असूयया मयि दोषाविष्कारेण खिन्नं खेदयुक्तमाकलयामि पश्यामि! इयं चोद्वेगावस्था। तदुक्तं **शृङ्गारतिलके**,(२।११) 'यस्मिन्रम्यमरम्यं वा न च हर्षाय किंचन। विद्वेषः प्रणितव्येऽपि स उद्वेगः स्मृतो यथा।।'

इति। तन्न वेदिम। कुतो गतासि तदहं न वेदिम। ते तव नतेन स्तुत्याऽनुनयामि त्वामित्यर्थः. क्वचितु 'तुनेन' इति पाठस्तदा तेद ते तव नुतेन स्तुत्याऽनुनयामि त्वामित्यर्थः। यद्वा, 'नु' इति वितर्के। 'तेन' इति लक्षणेऽव्ययम्। तथा च यं मार्ग लक्षीकृत्य गतासि तेन तं मार्ग लक्षीकृत्यं गत्वा तेऽनुनयामि तवानुनयं करोमि। ते इति सबन्धमात्रविवक्षायां षष्ठी। अनेन विलापावस्था कथिता। तदुक्तं **शृङ्गारतिलके**, (२.१२) 'बम्भ्रमीति मनो यस्मिन्रत्यौत्सुक्यादितस्ततः। वाचः प्रियाश्रया एव स प्रलापः स्मृतो यथा।।' इति।।५।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५।। विरहातुरः सन्नेव प्रकारान्तरेणापि प्रलपति। तन्विति। हे तन्वि! हे राधे! मोहवशादसन्निहिताया अपि सन्निहितसम्बोधनम्। कुतः कस्मात्कारणाद्गतासि। तत्कारणमहं न वेद्मि न जाने। अतस्तव केवलमसूयया ईर्ष्यया खिन्नं दुःखितं न तु मत्कृतापराधेन खिन्नमिति आकलयामि निश्चिनोमि। तेनासूयया कलुषितकारणेन त्वां नानुयामि प्रियं न करोमीत्यर्थः। "असूयाविष्टचेतनाः प्रियवचनासाध्यत्वादिति भावः।" ते इत्यत्राद्यख्याने कर्मण्यपीति वचनात् भजे शम्भोश्चरणयोरितिवत् कर्मणि षष्ठी। द्वितीय व्याख्याने तु क्रियामात्रयोगे चतुर्थी व्याख्यान्तरं वा हे तन्वि तवहृदयमसूयया ईर्ष्यया कामिनीकदम्बभोगलोलुपम्त्तिरस्कारजनितेर्ष्या खिन्नमाकलयामि, जाने, तर्हि तां परिमृग्य तस्या असूयाजनित खेदस्योपकरणं किमिति न किम्भूत इत्याकाङ्क्षायामाह। असीति, हे तन्वि! असीत्वमर्थेऽव्ययं असत्वं कुतः कुत्रगता मां परित्यज्य कस्मिन् स्थले स्थिता तत्स्थलमहं न वेद्मि, न जाने, तेन स्थलापरिज्ञानरूपकारणेन त्वां नानुनयामि। अनुसृत्य नानुगतोऽस्मि। अज्ञातस्थलस्थितानुसरणस्याशक्यत्वादिति भावः।।५।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५।। पुनर्भावनोपस्थितां राधां सम्बोध्य विलपति, हे तन्वि! कृशाङ्गि! तव हृदयम् असूयया क्रोधेन परगुणासहिष्णुतया वा खिन्नं दुःखितमाकल्यामि। कथं तर्हि प्राणभूताया मम विनयो भगवता न क्रियत इत्यत आह, कुत्र गतासि न वेद्मि न जानामि, तेन हेतुना न त्वामनुनयामि चरणप्रणिपातादिना अनुनयं न करोमीत्यर्थः। मनसा पुनः करोम्येवेति भावः। अत्र चाज्ञातावस्थितिः सा कथमेवं सम्बोध्यातिशंका प्रलापावस्था या समाधेया तदाह, 'अनक्षरवाक् प्रलापः स्यात् वेतसो भ्रमणादृशमि'ति। यद्वा न तेन इत्यत्र भावे क्तः, तथा च कुतो गतासि तन्न वेद्मि न जानामि। अतः पदपतनादिकं विहाय नमनेन तेनाहं नयामि अनुनयं करोमीत्यर्थः। अत्र क्रियाग्रहणमपि कर्त्तव्यमिति चतुर्थी। यद्वा ते तव कृतं प्रति षष्ठी, येन प्रकारेण पूर्वमनुभूता राधा तेनैवाभिनिवेशावशेन तां पश्य

ह्युपलोभात् येनैवानुभवन्ति प्राक् जनानिष्टान् समागमे तथा संस्कारयोगेन वीक्षन्ते तान् वियोगिन इति।।५ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।५ ।। तां हृदि विभाव्य स्वापराधं क्षमापयति, तन्वीति। हे तन्वि विरहकृशाङ्गि! तव हृदयमसूयया मयि [3] दोषारोपेण खिन्नमाकलयामि जानामि। सहजापराध[4] मये मयि किमेतत्? खिन्नमित्युद्वेगावस्थोक्ता। [5]यथा,

यस्मिन् रम्यमरम्यं वा [6] स्यान्न हर्षाय किञ्चन इत्युद्वेग इति। किञ्च सापराधेन मया तव प्रार्थना युक्ता। तन्न वेद्मि इति। त्वं कुतो हृदयान्निर्गताऽसि तन्न वेद्मि। तेन हेतुना ते तुभ्यं नाऽनुनयामि [7]नान्वेषणं करोमि। यद्वा नु [8] तर्के। ते सम्बन्धे षष्ठी। एतेन विलापावस्थोक्ता [9] ।।५ ।।

१.हृदय-इ.फ.ग.ह.ज. २.मृग्येत-अ.ब.मृग्यत इति-ज. ३.दोषरूपेण-ब. ४.भये-ब.इ.फ.ग. ५.नास्ति-अ.ब. ६.नास्ति-ग.अन्वेषणं न करोमि-इ.फ.ह.ज. ८.वितर्के-इ.फ.ग.ह.ज. ९.एतदनन्तरं उक्तं शृङ्गारे बभ्रमीति मनो यस्मिन्निति इत्ययं भागो दृश्यते-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।५ ।। हृदि संगतां प्रत्याह, तन्वीति। हे तन्वि असूयया असहिष्णुत्वेन खिन्नं दु:खितं तव हृदयमाकलयामि तर्कयामि। तत्तस्मादहं न वेद्मि न जाने [1] कुत: कुत्र गतासि; तेन कोरणेन ते तुभ्यं नाऽनुनयामि। क्रियया यमभिप्रैति (पा.२.३.१३ वा.) इति सम्प्रदानत्वम्।।५ ।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।५ ।। अथोन्मादावस्थामाह, तन्वीति हे तन्वि तव हृदयं अन्त:करणं असूयया परोत्सवासहिष्णुतया खिन्नं खेदयुक्तं आकलयामि जाने। कुतो वा नानुनीयत इत्यत आह, कुत इति। कुत: क्व त्वं गतासि तत्तत्स्थलं न वेद्मि न जानेऽहम्। तेन कारणेन स्थानाज्ञानरूपेण ते त्वामिति कर्मणि षष्ठी। नानुनयामि प्रियवचनप्रणिपातादिना न प्रसादयामि।।५ ।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५ ।। तन्वीत्यादि। हे तन्वि! हे कृशाङ्गि! तव हृदयम् असूयया कोपाविष्करणेन खिन्नं खेदयुक्तम् आकलयामि मन्ये। यद्येवं कथं मे नानुनयसीत्याह। तन्न वेद्मीत्यादि। त्वं कुतो गतासि? कं प्रदेशं प्रयातासि तदहं न वेद्मि। तेन हेतुना ते तुभ्यं नानुनयामि अनुनयं न करोमि। कुत इति द्वितीयान्तात्तसि:

दृश्येति । हे प्रिये! त्वं दृश्यसे मयेति शेष: ।।५।।

### (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।५।। स्फूर्त्त्यपगमे पुनराह, हे तन्वि! तव हृदयं त्वदुत्कर्षज्ञानायोद्यमरूपे गुणे दोषारोपणेन खेदयुक्तमहं वेद्मि। तत्कथं नानुनयामि ? कुतो गतासि तन्न वेद्मि। तेन हेतुना ते तव पादग्रहणादिनापराधं न क्षमापयामि ।।५।।

### (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५।। एवं तन्मयत्वमवाप्तेन चेतसा साक्षात्कृतां राधां सोत्कण्ठमाह; दृश्यसे इति। हे प्रिये! मे त्वदन्वेषणकातरस्य मम पुरतः अग्रतः एव दृश्यसे, दृष्टासि। अत्र त्वं मयेति अनुक्तिर्नाहं त्वामन्वेषणेन पश्यामि। किन्तु मद्वैकल्यमसहमाना करुणया स्वयमेवाविर्भूतासीति सूचयति। एवं चेत् तर्हि किमर्थं गतागतं गमनागमनं विदधासि करोसि। यावदेवाहमनुनेतुमुपसर्पामि तावदेव तिरोहसि। कथमधन्यो भ्रान्तोऽस्मीति मूर्च्छाभ्युपागमसमये एव पुनराविर्भवसि। इदमनुचितं चारुशीलाया इति भावः। किं च निवेदयामि, पुर्वे पूर्ववत् ससम्भ्रमं सम्भ्रमेण सहितं यथा स्यात्तथा परिरम्भणमालिङ्गनं न ददासि। पूर्वं यथा सौरभलोभेन मुखमनुपतन्तं मधुकरमवलोक्य नाथ! वारयेमं भीषणमिति सम्भ्रमेणानवहितमपि मामालिङ्गितवती तथेदानीमपि विरहव्याकुलितं त्वदभिकांक्षिणं जानत्यपि केनापि व्याजसम्भ्रमेणालिङ्गनदानेन किं नानन्दयसीति भावः।।५।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

५- तन्वीति; हे तन्वि न तव हृदये स्थितां भावनां कलयितुमपि क्षमोऽस्मि। क्रोधवशेन दुःखिता सती तव दुःखमाकलयामि ।।५।।

**६-दृश्यसे पुरतो गतागतमेव मे विदधासि।**
**किं पुरेव ससंभ्रमं परिरम्भणं न ददासि ।। हरिहरि० ।।६।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६।। हे प्रिये! मम पुरतस्त्वं गतागतं विदधासीति दृश्यसे तत्किं पुनरेव ससम्भ्रममालिङ्गनं न ददासि, पुरो गतायाः प्रियायाः नैष्ठुर्य्यमेतादृश न युक्तमित्यभिप्रायः।।६।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।६।। दृश्यस इति। हे तन्वि! मे पुरतो गतागतमेव विदधासि यातायातमेव करोषीति दृश्यते। अपरं, पुरेव ससंभ्रमं यथा स्यात्तथा परिरम्भणं न ददासि। विरहिणो हि चिन्तानुषङ्गात्सर्वतस्तामेव पश्यन्ति। तथा चोत्कम्, 'प्रासाद सा पथि पथि च सा पृष्ठतः

सा पुर: सा पर्यङ्के सा दिशि दिशि च सा तद्वियोगातुरस्य। हंहो चेत: प्रकृतिरपरा नास्ति ते कापि सा सा सा सा सा सा जगति सकले कोऽयमद्वैतवाद:' ।।६ ।।

## (३) जगद्धरकृत- सारदीपिका (टीकानोपलब्धा)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६ ।। इदानीं भावनया प्रत्यक्षीकृतां प्राह, दृश्यस इति। हे सुन्दरि! पुरेव पूर्वमिव ससंभ्रमं सादरं परिरम्भमालिङ्गनं किमिति न ददासि ? पुरतोऽग्र दृस्यसे गतागतं यातायातं विदधसि।।६ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६ ।।अथ निरन्तरभावनाजनित राधा सा आकार: प्रलपति। दृश्यसे इति। हे तन्वि! पुरत: ममाग्रभागे दृश्यसे। साक्षाद् वीक्ष्यसे। पुन: किमर्थं गतैव। मदग्रभागावस्थानं विहायान्यत्र निर्गतासि। अथवा गतं पुनरागमनमेव किं किमर्थं विदधासि करोषि। पुरेव प्रागिव विप्रयोगावस्थात: पूर्वमिवेत्यर्थ:। ससम्भ्रमं ससन्तोषं यथातथा परिरम्भणं किं किमर्थं न ददासि प्रयच्छसि। अग्रतो दृश्यसे। प्रयोजनवशादन्यत्रापि गच्छसि। अनन्तरमागच्छसि। अथवा पुरतो दृश्यसे। प्रयोजनवशादन्यत्रापि गच्छसि, अथ गाढालिङ्गनादिकं प्रयच्छसि, इदानी तु तद्विपरीतं किमिति विदधासीत्यर्थ: ।।६ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६ ।। मे मम पुरत एव अग्रत एव गतागतं यातायतं विदधासि करोषीति दृश्यसे विलोक्यसे। पूर्वैव प्रागेव ससंभ्रमं सादरं यथा स्याद् एवं परिरम्भणम् आश्लेषं किं कथं न ददासि अर्पयसि ससभ्रमं सत्त्वरम्वा ? तदाह, सम्भ्रमन्त्वादरे भीतौ त्वरायामपि वर्तत' इति **विश्व**: ।।६ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६ ।। सम्प्रति भावनया लक्ष्यीकृत्य तां प्रत्याह-दृश्यस इति। पुरतोऽग्रे गतागतं यातायातमेव [२]विदधासीति दृश्यसे। हे सुन्दरि! पुरेव पूर्वमिव मे [३] मम ससम्भ्रमं सादरं परिरम्भणमालिङ्गनं [४] किमिति न ददासि? [५] पुरा[६] अग्रे अयं भाव:। अन्तर्बहिर्वर्तमाना सहसैवादृश्या कथं भवेदिति।।६ ।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६ ।। दृश्यस इति। हे राधे! त्वं मम पुरत: अग्रे गतागतं गमनागमनमेव विदधासि करोषीति [७]दृश्यसे। तर्हि [८]पुरेव पूर्ववत्ससम्भ्रभं [९]सवेगं परिरम्भणमालिङ्गनं किं केन कारणेन न ददासि ?।।६ ।।

१.नास्ति-ड.२.वितत्तासीति-अ.ब.३.नास्ति-अ.ब.४.नास्ति-अ.ब.५,६.नास्ति-अ.ब.७.दृश्यते-ड.८.पूर्वमिव-क.९.सर्वाङ्गे-क.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६।। दृश्यस इति। पुरतः अग्रे दृश्यसे। गतागतं यातायातं विदधासि। पुरेव प्रागिव ससम्भ्रमं सानन्दं परिरम्भं आलिङ्गनं न ददासि न यच्छसि। दृक्संगवशात् सञ्चरन्तीव दृश्यसे इति भावः। किमिति प्रश्नः कोऽपराधो ममेत्यर्थः। मद्रहितरासक्रीडाकरणमेव अपराध इति चेदुत्तराष्टपदी पदम्। अत्र कालावच्छेदोपमा ।।६।।

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६।। 'नमेव प्रत्याययति। मे मम पुरोऽग्रतः गतागतं गमनागमनमेव विदधासि करोषि। तत् किं पुरेव पूर्ववत् ससंभ्रमं सादरं सत्वरं वा परिरम्भणम् आलिङ्गनं न ददासि ? ससंभ्रममिति क्रियाविशेषणं वा। पुरोगतायाः प्रियायाः नैष्ठुर्यमेतादृशं न युक्तमित्यभिप्रायः। "संभ्रमः साध्वसेऽपि स्यात् संवेगादरयोरपि" इति **विश्वः** ।।६।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६।। पुनः स्फूर्त्त्याह, हे प्रिये ! ममाग्रतस्त्वं यातायातं विदधासीति दृश्यसे। तत् किं पुरेव ससंभ्रमं परिरम्भणं न ददासि, पुरः स्थितायाः प्रियायाः निष्ठुरतेदृशी न युक्तेत्यभिप्रायः।।६।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६।। अथ स्मृत्युपगमे तस्याः कोपमनुसंदधानः सातङ्कमाह; तन्वीति । हे तन्वि ! खेदासहनगात्रि ! सहजस्निग्धमपि तव हृदयं मदभिप्रायस्यान्यथात्वं ग्राहयन्ती असूयया खिन्नं खेदयुक्तं भावान्तरं प्राप्तमिति त्वद्वाम्येनाहमाकलयामि तर्कयामि। न च तादृशोदारस्य हृदयस्य इदं सम्भावितमिति भावः। कुतः कारणात् क्रीडाप्रदेशादन्यतो गतासि। तत्कारणत्वरूपं मदपराधं न वेद्मि। बहुशः चिन्तयन्नपि किञ्चिदपि न निश्चिनोमीत्यर्थः। तेन हेतुना त्वां नानुनयामि, अनुनयेन प्रसादयितुं न शक्नोमि। किन्तु स्वयं सौशील्येन एव उपेत्य मामनुगृहाणेति भावः।।६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

६ - दृश्यसेति; त्वं मत्पुरः यातायातं करोसीति दृश्यसे। तत् किमर्थं पूर्ववदालिङ्गनं न करोसि ममानुनयविनयेन किमपि फलं न फलति। पुरः प्रियायाः व्यवहारः किमर्थमेव भवतीति न युज्यते।।६।।

**७-क्षम्यतामपरं कदापि तवेदृशं न करोमि।**
**देहि सुन्दरि दर्शनं मम मन्मथेन दुनोमि ।।हरिहरि० ।।७।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७।। हे सुन्दरि! क्षम्यतामयमपराधः। इत्येको वाक्यार्थः। तवेदृशमपरं न करोमीति द्वितीयः। ''विभाषाया कदा कर्ह्योः'' इति भविष्यदर्थे लट् प्रत्ययः। देहि सुन्दरि! दर्शनं मयीत्यत्र कारणमाह। मन्मथेन दुनोमीति ''भवन्ति वरवर्णिन्यो दुःखिनां वेदनाच्छिदः'' । इत्यभिप्रायः।।७।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। क्षम्यतामिति। हे तन्वि! भवतु यत्किंचिन्मया अपराद्ध क्षम्यतां तत्। ईदृशमपरमप्रियं तदापि न करिष्यामि। हे सुन्दरि! मम दर्शनं देहि। त्वादिनाऽहं मन्मथेन दुनोमि। इतस्ततस्तामित्यादौ धीरललितो नायकः, परस्परानुरागजनितो विप्रलम्भ-शृङ्गारः।।७।।

## (३) जगद्धरकृत- सारदीपिका (टीकानोपलब्धा)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।७।। क्षम्यतामिति। हे सुन्दरि! क्षम्यतां ममापरमपराधं क्षमख। कदापि तवेदृशं विप्रयं न कारिष्यामि। इयं चोन्मादावस्या। तदुक्तं **रसार्णवसुधाकरे**, 'अतास्मिंस्तदिति भ्रान्तिरून्मादादेव जायते' इति। पुनः किंचित्संजातविवेक; कथयति। हे सुन्दरि! मम दर्शनं देहि। मन्मथेन कामेनाहं दुनोमि तप्तो भवामि।।७।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।७।। मदनव्यथातुरः सन् तां प्रार्थयते। क्षम्यताभिति। हे राधे! क्षम्यतां मत्कृतापराधः सह्यतामित्यर्थः। अमर्य्यादस्य पुरुषस्यापराधः किमिति क्षन्तव्य इत्याकाङ्क्षायामाह। ईदृशमिति, हे तन्वि! ईदृशं भवदुपेक्षारूपं अपरं कृतापराधादन्यमपराधं तव कदापि न करोमि। अनेन कृष्णस्योन्ममादित्वं निरस्तमित्यमवगन्तव्यम्। अपराधसहनफलं किमित्याकांक्षायामाह। देहीति। हे सुन्दरि! अनवद्यसर्वाङ्गं प्रार्थ्यमानदर्शनानुकूलं हेतुगर्भमिदं सम्बोधनम्। मम दर्शनं। त्वदीयदिव्यरूप साक्षादीक्षणं देहि प्रयच्छ, तद्दर्शनेन किं साध्यमित्यत आह। मन्मथेनेति। मन्मथेनान्वर्थसंज्ञेन कामदेवेन मयि दुनोमि परितापं प्राप्नोमि। इति स्वस्मिन्नेव साक्षात्परितापमनुभवामि न तु परितापेन तापमनुभवामीत्यर्थः। अनेन महती व्यथा सूचिता। तथा च मदनस्तुतसर्वाङ्गीणमदीय- शरीरतापं निरवद्य भवदीयप्रदर्शनेन निवारयेत्यर्थः।।७।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।७।। अन्यसाधारणप्रणयव्यवहाररूपं सापराधं स्वयमेवाशंक्य पुनरेवं न करिष्यामीति भावनोपस्थितां राधां प्रत्याह; हे सुन्दरि क्षम्यतां अर्थात् पूर्वकृतमपराधम् अपरमीदृशमपराधं कदापि न करोमि न करिष्यामीत्यर्थः। वर्त्तमानसामीप्ये वर्त्तमानत्वेति लोटप्रयोगः। मम कृते दर्शनं देहि, मन्मथेन मदनेन दुनोमि तप्तो भवामीत्यर्थः। अत्र मां मथ्नातीति व्युत्पत्ति मनसि कृत्वाह। न तामपि मथ्नातीति सूचयितुं मन्मथपदेन उपन्यास कृत इति दर्शितम्।।७।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।७।। पुनश्च ध्यानेन प्राप्तामिव ज्ञात्वा क्षमापयति - [१] क्षम्यतामिति। [२] हे सुन्दरि ! क्षम्यताम् [३]। [४] कदापि तव ई दृशं अपरं अपराधं (न) करोमि। [५]मम दर्शनं देहि। यतोऽहं [६]मन्मथेन [७]कामेन दुनोमि सन्तप्तो भवामि। अपराधबाहुल्यान्ममेति षष्ठी [८] अथ वा मन्मथश्च मामेव दहतु, न तु त्वामिति [९]त्वदर्थमेव जीवनमिति [१०] स्नेहपराकाष्ठा दर्शिता। [११]अत्राप्युन्मादावस्थोक्ता। अन्यस्मिंस्तदिति भ्रान्तिरुन्मादो विरहोद्भवः इति। भ्रमोऽत्रालङ्कारः। [१२]सम्भ्रमः स्नेहहर्षयोः इति विश्वः।।७।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।७।। क्षम्यतामिति। हे सुन्दरि ! पूर्वकृतापराधः क्षम्यताम्, अपरमीदृशं तवापराधं कदापि न करोमि। अत एव मम दर्शनं देहि यतोऽहं मन्मथेन कामेन दुनोमि पीडामनुभवामि।।७।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।७।। क्षम्यतामिति। हे राधे ! इदं प्रथमागः क्षम्यतां त्वया। ईदृशं अपरं अपराधं कदापि भविष्यत्काले न करोमि न करिष्ये। हे सुन्दरि ! मम दर्शनं देहि। मन्मथेन दुनोमि[६८] सन्तापमाप्नोमि। मयि दयां विधेहीत्यर्थः। तवापि मयि प्रीतिर्वर्तते मम विषादेन तवाप्यसुखमिति भावः। एवं विलापवर्णनेन उन्मादरूपावस्था द्योत्यते।।७।।

१.नास्ति-इ.फ.ग.ह.ज. २.तः ३.पर्यन्तं नास्ति-अ.ब.इ.फ.ग. ४.तवेदृशं विप्रियं कदापि कदाचिदपि न करोमि न करिष्यामि इति, अपरमपराधं क्षम्यतां क्षमस्व। इयमुन्मादावस्थोक्ता। पुनर्जातिविवेकः कथयति-इ.फ.ग.ह.ज. ५.तः ६.पर्यन्तं नास्ति-अ.ब. ७.नास्ति-अ.ब. ८.यद्वा मन्मथो-ग. अथवा मन्मथो-इ.फ.ह.ज. ९.तः. १०.पर्यन्तं नास्ति-ग. ११.अत्रोन्मादा-ज. १२.नास्ति विश्वकोशे. नास्ति-फ.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।७।। क्षम्यतामिति। हे सुन्दरि ! तव ईदृशमपराधम् अपरम् अपरवारं कदापि न करोमि न करिष्यामीत्यर्थः। विभाषया कदाकर्ह्योरिति भविष्यदर्थे लट्प्रत्ययः। इदानीं

तु यत् कृतं तत् क्षम्यताम्। सोढव्यं त्वयेति शेषः। देहीत्यादि। मयि मद्विषये दर्शनं देहि। सम्प्रदानस्यापि विवक्षितत्वात् विषयसप्तमी। अत्र कारणमाहमन्मथेन दुनोमीत्यादि। तापं प्राप्नोमीति। ''भवन्ति वरवर्णिन्यो दुःखिनां वेदनाच्छिदः'' इत्यभिप्रायः। तन्वि! खिन्नमित्यादीनि गाथापदानि त्रीणि कृष्णस्य राधिकासन्निधिसम्भावनाय स्फुटाक्षर-परिवेदनपराणीति मन्यते। तथाहि, यदा सा समीपत एव तिरोहिता वर्तते तर्हि मद्विलपितमाकलय्य दृष्टिपथं नागमिष्यतीत्यभिप्रायः कृष्णस्य वर्णनीयः।।७।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।७।। पुनः स्फूर्त्यापगमे प्राह, हे सुन्दरि! क्षम्यतामपराधमिमं अपरमीदृशं कदाचिदपि न करोमि, अतो मम दर्शनं देहि, यतस्तव प्रियोऽहं मन्मथेन मनो मथ्नातीति मन्मथो विरहस्तेन दुनोमि।।७।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७।। पुनर्लतान्तरिततया सन्निहितां मन्यमानः स्वापराधमङ्गीकृत्य सदैन्यं प्रार्थयते क्षम्यतामिति। हे सुन्दरि! मनोहराङ्गि! मन्नेत्रचकोरचन्द्रिके! राधे! मयि दर्शनं देहि। आस्तां तावत् परिरम्भणादिकं तव दर्शनमात्रेण जीविष्यामीति भावः। सापराधजने दर्शनदानमपि अनुचितमिति चेत्, क्षम्यताम्। महानुभावाः खलु कदाचित् कमपराधं क्षमन्त एव। तथा त्वमपि क्षमस्वेति प्रार्थये। ननु वारं वारमेवं कृते अपराधे कथं क्षमा स्यादिति चेत् तव सम्बन्धे ईदृशमपरमपराधं किंवा ईदृशमन्यादृशं वा अपराधं कदापि न करोमि इति जानीहि। ननु क्षमा माऽस्तु ततस्तव का हानिः स्यादत आह मन्मथेन दुनोमि सन्तप्तोऽस्मि। यदि न क्षमसे भवतु नाम, विधेयजनस्य शिक्षणमुचितमेव। तदा त्वयैवास्य दण्डो विधेयः। पामरमन्मथेन कदर्थितं मां मा पश्येति भावः।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

७ - क्षम्यतामपरेति; हे सुन्दरि! मम प्रिये! ममापराधं क्षमस्व। पुनः कदाचिदेवमाचरणं न करिष्यामि। मां दर्शनं देहि। अहं कन्दर्पपीडया व्यथितोऽस्मि ।।७।।

**८-वर्णितं जयदेवकेन हरेरिदं प्रवणेन।**
**किन्दुबिल्वसमुद्रसम्भवरोहिणीरमणेन ।। हरिहरि० ।।८।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।८।। हरेः प्रवणेन आयत्तेन जयदेवकेनेदं गीतरूपं वर्णितम्। ''प्रवणः क्रमनिम्नोर्व्यामायत्ते च चतुष्पथः'' **इत्यमरः**। किन्दुविल्वेत्यादि। किन्दुविल्वाख्यं शासनं तच्च महत्वात् समुद्रत्वेन रूपितम्। किन्दुविल्वसपुद्रसम्भवश्चासौ रोहिणीरमणश्चेति कर्मधारयः। अन्यकुलोद्भूतस्याप्यन्यकुलोन्नतिकारकत्वदर्शनात् सम्भवशब्दोपादानम्। तत्कुलोत्पत्तिकताख्यापनार्थं दृष्टान्तोऽत्र युधिष्ठरः, तदेवं किन्दुविल्वशासनाज्जातस्तस्यैवोन्नतिकारको यथा सागराज्जातश्चन्द्रः सागरबृद्धिकारक इत्यर्थः संपद्यते।।८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।८।। वर्णितमिति। इदं पूर्वोक्तं जयदेवेन वर्णितमं। किंभूतेन ? हरेः प्रवणेन हरिपरायणेन। पुनः किंभूतेन ? ति (कि)न्दुबिल्वं तच्छासनं निवासो वा ग्राम; समुद्र इव तत्संभवरोविहणीरमणेनव चन्द्रणेव।।८।।

## (३) जगद्धरकृत- सारदीपिका

।।८।। वर्णितमिति जयदेव केन स्वार्थेन इदं गीतं वर्णितं कीदृशेन जयदेवकेन हरेः प्रणतेन कृष्णस्याराधनेन पुनः कीदृशेन किन्दुविल्वं जयदेवकुलं तदेव कुलं तदेव समुद्र स्तस्या तत्सम्भवो यस्य एतादृशो रोहिणीरमणश्च चन्द्र इव यथा सागरादुप्तन्न चन्द्र स्तथा किन्दुविल्वोप्तन्नो जयदेव इति यद्वा किन्दुविल्वशासनम्।।८।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।८।। वर्णितमिति। जयदेवकेन हरेश्चरित्रं वर्णित्। कीदृशेन ? प्रणतेन। अर्थाद्धरिमित्यर्थः। कीदृशेन ? किन्दुबिल्वो जयदेवकुलवृत्तिग्रामः, स एव महत्वात्समुद्र इव तत्र संभवोयस्य तादृशेन रोहिणीरमणेन पूर्णचन्द्रेण तस्योन्नतिर्यथा क्रियते तथा तत्कु लस्योन्नतिर्जयदेवेन कृतेति चन्द्रसादृश्यम्। 'ग्लौरिन्दुरेणतिलकि हारिरोहिणीशौ' इति **हारावली**।।८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।८।। वर्णितमिति। हरेः श्रीकृष्णस्य प्रवणेन तत्परेण तद्भक्तेनेत्यर्थः। तिन्दुविल्वो नाम जयदेवस्य जन्मवंश इति केचित्। जन्मग्राम इत्यपरे। समुद्र इव तद्वत विपुल इत्यर्थः। तस्मात् सम्भवन्तीति सम्भवाः वंशाख्यसमुद्रसमुत्पन्ना इत्यर्थः। तेषां रोहिणरमणश्चन्द्रः तेषां चन्द्रवदाह्लाकारीत्यर्थः। अनेन वंशोन्नतिमूलकारणं भवती-

त्युक्तम्। तेन अथवा सम्भवत्यस्मादिति सम्भवो जन्मकारणं तिन्दुविल्वसमुद्र एव जन्मकारणं तस्य रोहिणीरमण: यथा चन्द्र: स्वजनकसमुद्रोल्लासकरस्तद्वदयमपि वंशोल्लासकर इत्यर्थ: एतादृशेन जयदेवकेन स्वार्थे क:, निरहंकारित्वद्योतनार्थमल्पार्थे वा क प्रत्यय:। वर्णितं हरिविरहाकारेण प्रथितमिदं गीतं श्रोतृणां गातृणां च ऐहिकामुष्मिकसुखं करोतीत्याशय:। अथवा उक्तविशेषणविशिष्टेन जयदेवेनेदं गीतं वर्णितं हरिप्रीत्यर्थं रचितमित्यर्थ:।।८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।८।। कीर्त्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति, हरे: प्रवणेन श्रीकृष्णस्या-यत्तेन जयदेवकेन जयदेवनाम्ना प्रशस्तेन इदं कृष्णचरितं वर्णितं प्रकृते गीते निबद्धमित्यर्थ:। तदाह, 'प्रवणं क्रमनिम्नोर्व्यां प्रह्वे ना तु चतुष्पथे' **इत्यमर**:। कीदृशेन? केन्दुविल्वनाम तत्कुलं तदेव तत्कुलीय-नानागुणनानापुरुषरूपरत्नाकरत्वात् समुद्र:, तत्सम्भवेन तदुत्पन्नेन कुमुदानन्दकरत्वात् रोहिणीरमणेन चन्द्रेण,यद्वा रोहिणीनाम तत्पत्नी भद्रमनेन तद्वल्लभेन। अत्र यद्यपि महन्तं स्वप्रशंसयानुचितत्वेन प्रशस्ते नति वक्तुं न युक्तं तथापि हरे: प्रवण: यतो वा तथाभूतकुलसम्भूत: तत: प्रशस्त इति हेतुहेतुमद्भावनया जनयतोरुत्कर्ष: पर्यवस्यतीति हृदयम्। यद्वा स्वल्पार्थे वाक्प्रत्यय इति।।८।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।८।। गीतार्थं सङग्रहेणाह, वर्णितमिति। स्वार्थे क:। जयदेवकेन इदं हरेश्चरितं वर्णितम्। कीदृशेन? [१] प्रवणेन हरिप्रवणेन। पुन: कीदृशेन? किन्दुबिल्वं नाम जयदेवगोत्रं कुलं ग्रामो वा; स एव समुद्रस्तत्र सम्भवो यस्य तादृशेन। रोहिण्या: पद्मावत्या: रमणेन चन्द्रेणेव। यथा [२]समुद्रादुत्पन्न: रोहिणीरमणश्चन्द्र: तथा किन्दुबिल्वोत्पन्नो जयदेव इति। चन्द्रपक्षे रोहिणी प्रसिद्धा। सुन्दरी रोहिणी प्रोक्ता चन्द्रभार्या च रोहिणी। रोहिणी नन्दभार्या च वसुदेवाङ्गनाऽपि च। इति [३] **"विश्वप्रकाश:"**। उत्प्रेक्षा-रूपोऽलङ्कार:।।१०।।

[४]इति श्रीमत्कृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां सप्तम: प्रबन्ध:।।८।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।८।। वर्णितमिति। जयदेवकेनेदं गीतं वर्णितम्। [५] कीदृशेन जयदेवेन? हरिप्रवणेन श्रीकृष्णस्याधीनेन। पुन: कीदृशेन जयदेवेन [६]? किन्दुबिल्वं [७] जयदेवकुलं तदेव

समुद्रः तस्मात्सम्भवो यस्य तादृशो रोहिणी - रमणश्चन्द्र इव। यथा सागरा [८] दुत्पन्नश्चन्द्रस्तथा किन्दु बिल्वोत्पन्नो जयदेव इति ।।८।।

[९]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां सप्तमः प्रबन्धः।।

१.प्रणतेन हरिपरायणेन-इ.फ.ग.ह.ज. २.समुद्र इत्यत्र-इ. ३.नास्ति विश्वप्रकाशे ४.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज. ५.तः. ६.पर्यन्तो भागो नास्ति-ड. ७.जयदेवस्य कुलम्।क. ८.उत्थितः-ल.म. ९.नास्तीयं पुष्पिका-ड.क.ल.म.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।८।। वर्णितमिति। हरेः प्रवणेन भक्तेन। [१] तिन्दुः स्फूर्जवृक्षः, बिल्वःश्रीवृक्षः। तदुभयेन किञ्चित् कुलं तिन्दुबिल्वाख्यम्। तदेव समुद्रः। तत्सम्भवो रोहिणीरमणः चन्द्रः। तेन जयदेवकेन इदं राधाऽवस्थावर्णनरूपं वर्णितं रचितमित्यर्थः। अत्रात्मनश्चन्द्रत्वारोपात्कुलस्य समुद्रत्वारोपेण परम्परितरूपकमलङ्कारः।।१०।।

[२] इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां सप्तमः प्रबन्धः।।८।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।८।। वर्णितमिति ।हरेः प्रवणेन प्रणतेन आयतेन वा। अर्थाद्धरेः उक्तेन जयदेवकेन इदं गीतरूपं वर्णितम्। "प्रवणः क्रमनिम्नोर्व्यां प्रज्ञे ना तु चतुष्पथे" **इत्यमरः**। "प्रवणः क्रमनिम्नोर्व्यामायात्ते च चतुष्पथे" इति **विश्वः**। किंविधेन ? किन्दुबिल्वेति । किन्दुबिल्वाख्यं शासनम्। तच्च महत्त्वात् दुरवग्राहत्वाच्च समुद्रत्वेन निरूपितम्; ततः सम्भव उत्पत्तिर्यस्य। सम्भवत्यस्मिन्निति सम्भवोऽधिकरणसाधनो वा। एतेन विशिष्टदेशसम्भवत्वमात्मनः कथयति। किन्दुबिल्वसमुद्रसम्भवश्चासौ। रोहिणीरमणश्चेति कर्मधारयः। रोहिणीरमण इव रोहिणीरमणः। अत्र रूपकोऽलङ्कारो व्यङ्ग्यः। "उपमैव तिरोभूतभेदोरूपकमिष्यते" इति। यद्वा बाहुलतापाणिपद्मनख- पल्लवमिति शान्तत्वाच्चन्द्रत्वेनायं रूपितः। अन्यकुलोद्भवस्याप्यन्यकुलोन्नति- कारकत्वदर्शनात् सम्भवशब्दोपादानम्। तत्कुलोत्पत्तिकताख्यापनार्थं दृष्टान्तोऽत्र युधिष्ठिरः। तदेव किन्दुबिल्वशासनाज्जातः, तस्यैवोन्नतिकारकः, यथा सागराज्जात- श्चन्द्रः सागरवृद्धिकारक इत्यर्थः सम्पद्यते। यद्वा किन्दुबिल्वसमुद्रसम्भवत्वेन रोहिणीरमण इति विग्रहत्वे गतार्थत्वाद् भावप्रत्ययः न प्रयुज्यते। एतेनापि सम्भवपदं नाधिकम्।।८।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।८।।श्रीजयदेवकेन हरेरिदं विलपनं बर्णितम्। स्वार्थेकः। कीदृशेन ? प्रवणेन नम्रेण। पुनः कीदृशेन ? केन्दुविल्वनामा जयदेवस्य ग्रामः केन्दुविल्वमित कुन्दं च तयोर्महत्वात्

समुद्रत्वेन निरूपणं तदुद्भवचन्द्रेण यथा समुद्रोद्भवश्चन्द्रः समुद्रवृद्धिकरस्तथायमपि तद्वृद्धिकर इत्यर्थः ।।८।।

### (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।८।। वर्णितमिति। जयदेवकेन हरेरिदं विलपनं वर्णितम्। स्वार्थे कः। कीदृशेन प्रवणेन, ईदृशरहस्यवर्णनसमर्थेनापि भक्तिस्वभावादतिनम्रेण इत्यर्थः। पुनः कीदृशेन, किन्दुबिल्व इति जयदेवस्य निवासग्रामः। तस्यातिविपुलत्वात् समुद्रेण उपमा। तत्सम्भवो रोहिणीरमणश्चन्द्रः, तद् ग्रामवासिजनजातस्यातिरहस्यभगवल्लीलानुवर्णनेन समुद्रस्य चन्द्र इवानन्दजनकस्तेन। किन्दुबिल्व इति 'वरणादिभ्यश्च' इत्यदूरभवार्थस्य 'ण' प्रत्ययस्य लोपः। किन्दुबिल्वयोरदूरभवत्वात् ग्रामस्य किन्दुबिल्व इति नाम-निर्देशः ।।८।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

८- वर्णितं जयदेवेनेति; जयदेवेन प्रगल्भेन एतेन विलपनं वर्णितम्। केन्दुविल्वनामधेय-ग्रामरूपसमुद्रसम्भवेन रोहिणिरमणेन नाम केन्दुविल्वग्रामस्य चन्द्रेण यथा चन्द्रः समुद्राद्दुद्भूतः सर्वेषामनन्दं वर्द्धयति आह्लादप्रदो वा जायते तथैव समुद्रवत् विस्तारितं ग्रामसम्भूत मेव जयदेवः सर्वेषां चन्द्र इव प्रफुल्लकरः भवति ।।८ ।।

इति श्रीप्रफुल्लमिश्र प्रणितायां गीतगोविन्दस्य स्वर्णलताख्या टिप्पणी नाम सप्तम प्रवन्धः ।।

**१९-हृदि बिसलताहारो नायं भुजङ्गमनायकः**
**कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः।**
**मलयजरजो नेदं भस्म प्रियारहिते मयि**
**प्रहर न हरभ्रान्त्यानङ्ग क्रुधा किमु धावसि।।१९।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१९।। हे अनङ्ग! हरभ्रान्त्या प्रियारहिते मयि न प्रहरेति वाक्यार्थः। पुरा महादेवेन कामो दग्ध इति वैरवोधार्थमनङ्गेति सम्बोधनम्। हरभ्रान्तिप्रतिपादयन्नाह हृदि विसलतेत्यादि। दैर्ध्यात् धीवल्याच्च मृणाललतायां वासुकिभ्रमः। कुवलयदलश्रेणी-कण्ठेन सा गरलद्युतिरिति कृष्णवर्णत्वात् कण्ठदेशावस्थिततत्वाच्च नीलपद्मे विषभ्रमः। मलयजरजो नेदं भस्मेति धावल्यात्, रजोरूपत्वाच्चन्दने भस्मः भ्रमः। विरहसन्तप्ते हृदये दत्तमात्रं चन्दनं शुष्यतीति रजशब्दोपादानं तत्त्वाख्यानोपमेयम्। यदुक्तम् "न

पद्ममुखमेवेदं न भृङ्गौ चक्षुषी इमे" इति विस्पष्ट सादृश्यात्तत्त्वेनोपमा यथेति मृधा किमु धावसि निवर्त्तस्वेत्यभिप्रायः। ''व्यर्थके तु वृथा मृधेत्**यमरः**"।।१९।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१९।। इदानीं स्मरशराहतिजर्ज्जरचेता भ्रान्तः सन् काममपि भ्रान्तं विदन्नाह, हृदीति। हे अनङ्ग! हरभ्रान्त्या प्रियारहिते मयि न प्रहर, प्रहरं मा कार्षीः. एभिश्चिह्नैर्हरोऽयमिति चेत्तदप्यन्यथयति। हृदये भूजंगमनायको न, अपि तु बिसलताहारः। बिसलताहार इति रुपकालंकारः। शुभ्रत्वात् हृद्यवस्थानाञ्च मृणाले वासुकिभ्रमः। अपि च; कण्ठे इयं कुवलयदलश्रेणी, न प्रसिद्धा गरलद्युतिः। इयमपि विरहातुरस्य मम गरलद्युतिरिव विद्यते। परं यद्भ्रान्त्या मयि प्रहरसि सा प्रसिद्धा ईश्वरसंबन्धिनी न। इदं मलयजरजो[७०]ऽङ्गतापाच्छुष्कं चन्दनं विद्यते, न भस्म। 'किमु' इति वितर्के। सत्यम्, क्रुधा कोपेन धावसि। लोकोक्तिः हरिणीवृत्तम्। 'प्रकृतं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः' (**का.प्र. १०।९६**) इत्यपह्नुतिरलंकारः। विप्रलम्भशृङ्गारो रसः।।१९।।

## (३) जगद्धरकृत- सारदीपिका

।।१९।। इदानीं काम एव मे दुःखं प्रयच्छतीति ।तमुपालम्भगोचरं करोमीत्याशयेनाह हृदीति हे अनङ्ग त्वं मयि हरभ्रान्त्या महादेवभ्रमेण[८] न प्रहर न प्रहारं कुरु क्रुधा कोपेन किमु किमिति धावसि मारयितुं धावनं करोषि ।कीदृशे मयि प्रियारहिते राधा वियोगिनि मयि हरभ्रान्त्या न प्रहर प्रहारं मा कुरु ।सर्वदा प्रियायुक्तो अहं त्वधुना प्रियारहित इति मयि हरभ्रमो न युक्त इति भावः। हरभ्रान्ति परिहरति हे काम मम हृदि विशलतायाः हारो मृणाललताया हार स्तद्विरहजन्य सन्ताप शान्त्यर्थं धृतः नायं भुजङ्गमनायकः शेषः इयं मे कण्ठे कुवलयदलानां नीलोत्पलानां श्रेणीपङ्क्तिः शैत्याय धृता न तु सा गरलद्युति र्हालाहलदीप्तिः इदं मलयजरजो चन्दन लेपोसर्वाङ्गे तापशान्त्यर्थं धृतं न तु भस्म विभूतिः।।१९।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१९।। इदानीं काम एव मे दुःखं प्रयच्छतीति नमेवोपालम्भनेत्याह; हृदीति। हेऽनङ्ग कन्दर्प मायि न प्रहर, प्रहारं मा कुरू। किम्विति वितर्के। मयि हरभ्रान्त्या महादेवभ्रमात्क्रुधा क्रोधेन त्वं धावसि इति किमु तर्कयामि। यद्वा, उ इति संबोधने। हेऽनङ्ग! हरभ्रान्त्या मयि किमिति धावसि ? कीदृशे मयि ? प्रियारहिते विरहिते। तथा च तद्विश्लेषादेवाहं संतप्तस्त्वं मृतकरूपस्य मम मारणं किमिति करोषीति भावः। यद्वा, हरः सर्वदाप्रियायुक्तः, अहं त्वधुना प्रियाविरहित इति मयि हरभ्रमो न युक्त इति भावः। हरेण त्वच्छरीरं दग्धमतः

कामस्य महद्वैरसूचनायानाङ्गपदेन संबोधने भ्रमबीजं निरस्यति। अयं बिसलताहारो मृणाललताहारस्तद्विरहजन्यसंतापशान्त्यर्थं धृत:, न तु भुजंगमनायक:। सर्पराजो वासुकि:। इयं कण्ठे कुवलयदलानां नीलोत्पलपत्राणां श्रेणि पङ्क्ति: शैत्यादधृता न तु सा गरलद्युतिर्विषकान्ति:। इदं सर्वाङ्गे तापशान्त्यर्थं धृतं मलयजरजश्चन्दनधूलि:, नतु भस्म विभूति: अङ्गे लिप्त: प्रसिथिलचन्दनोऽपि विरहतापवशाद्धुलीभूत इति 'रज:' पदेन सूचितम्। तथा च बिसलतायां शौत्यदीर्घत्वादिदर्शनात्तत्र वासुकिभ्रमात्, नीलोत्पलदलपङ्क्तौ श्यामत्वादिदर्शनाद्गरलभ्रमात्, चन्दनरजसि भस्मभ्रमाच्च मयि महादेवभ्रमस्तव युक्तो नेति भाव:। अयं च भ्रान्तिमानलंकार;, 'सादृश्याद्वस्त्वन्तर-प्रतीतिर्भ्रान्तिमान्' इति तल्लक्षणम्। 'वितर्के किं किमूत च' **इत्यमर**:। 'किं संवुद्धौ रूषोक्तै च' इति **विश्व**:।।१९।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१९।।अथ विरहतापो निवर्त्ततामिति विपर्य्ययवुद्ध्या धृतमुद्दीपकं कामिनीकदम्ब-भोगार्थं धृतशिवं विसहारादिकं वा हरपरिकर इत्यवबुध्य भ्रान्त्या प्रहर्त्तुमुद्युक्तं कामदेवं तत्परिकरापदेशेन हरिर्निवर्त्तयति। हृदिति। हे अनङ्ग! कामदेव! अत्रानङ्गपदेन सम्बोधनं हरविषय प्रहरणस्यावश्यम्भावितासूचनार्थम्। तेनैवास्याङ्गहन्यापादनात् अतएव प्रहरणनिवृत्तप्रार्थनार्थमनङ्गतोपपद्यते।

यस्माद्धृदि वक्षस्थले अयं परिदृश्यमान: पदार्थ: भुजङ्गमनायक: हरहार-विशेषरूपो न भवति। किन्तु भवत्परिकर: विसलताहार: विरहतापनिवृत्त्यर्थं धृतमृणाल-खण्डमालिका यस्मान् कण्ठे या परिदृश्यते सा गरलद्युति: कालकूटकालिमा न भवति। किन्तु भवत्परिकरकुवलयदलश्रेणी विरहतापनिवृत्त्यर्थं धृता नीलोत्पलपत्रमालिका, यतश्चेदं सर्वाङ्गीणतया परिदृश्यमानं वस्तु भस्मभसितं न भवति।

किन्तु भवत्परिकरो मलयजरज:[७०] तापापनोदाय कृतश्चन्दनाङ्गराग:, तस्मात्कारणात् हरभ्रान्त्या हर इति विपरीतवुद्ध्या हेतुना प्रियारहिते वल्लभवियोगदु:खिते असहाय इत्यर्थ:। एवंविधे मयि विषये न प्रहर प्रहारं न कुरु। असहायस्य दु:खितस्य च प्रहारे शूरं मन्यस्यातिलाघवाधायकत्वादितिभाव:। अतश्च क्रुधा हरभ्रान्त्या संजातकोपोपलक्षित: सन् किमु किमर्थं धावसि, मां ग्रहीतुं शीघ्रमायासीत्यर्थ:। (लटि) सर्तें वेगिताया ङ्गिताधौरादेश: अथ बिषलताहारादीनां मन्मथपरिकरत्वं विरहि विजयसाधनत्वादवगन्तव्यम्। भुजङ्गत्वादि निषेधेन विषलताहारत्वादारोपणादपन-

ह्नुत्यलङ्कारः। "निषिध्य विषयं साम्यदन्यारोपो ह्यपह्नुतिरिति लक्षणात्।" काव्यलिङ्गं-भ्रान्तिमांश्च।।१९।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१९।। अथ स्मरं सम्बोध्य विलपति, हे अनङ्ग स्मर हरभ्रान्त्या त्रिनयनभ्रमेण मयि न प्रहर प्रहारं न कुरु। भ्रमरीयसादृश्यं सन्दर्श्य तन्नाशकविशेषदर्शनाय भेदमावेदयति हृदीति। अयं पुरोवर्ती धर्मी हृदि हृदये बिसलताहारो मृणाललताहारः न तु भुजंगमनायकः सर्पश्रेष्ठो वासुकिरित्यर्थः। अत्रायतत्वस्य भुजङ्गराजसादृश्यदर्शनाय लतापदोपन्यासः, स च रूपकनामालंकारः। कण्ठे गले कुवलयदलश्रेणी श्यामलपत्रावली सा गरलस्य कालकूटस्य द्यूतिः प्रभा न, इदञ्च मयि मलयजस्य चन्दनस्य रजो रेणुः न भस्म न भूतिः। अत्र च अङ्गरागीकृतसरसचन्दनस्य रजःपदोपन्यासेन नीरसताकथनेन सन्तापाधिक्यं सूचितमिति दर्शितम्। तदाह, 'रजः परागे वेणौ च योषिताञ्च ऋतावपि।' अत्र सकलशरीरावास्तदेनैव मलयरजःसत्त्वान्न विशेषतोऽत्र अधिकरणोपादानं मयीत्येव च तत्राधिकरणतया वियोजितम्, अतो न रीतिभङ्गः। प्रियया रहितेत्युक्ते क्रुधा किमर्थं धारयसि। अनङ्गपदेन हरकृतानङ्गत्वस्याकरणेन धारणनिवृत्तौ हेतुरुक्तः। यद्वा नकारः सर्वत्र शिरश्चालने। तद्यथा अयं हृदि बिसलताहारो भूजङ्गनायको नेति अपितु भुजङ्गमनायक एव, एवं कुवलयदलश्रेणी नेति न अपितु कालद्युतिरेव, इदं मलयरजो नेति न अपितु भस्मैव, अतः हे अनङ्ग समानधर्मदर्शनेन हरभ्रान्त्या मयि न प्रहर, क्रुधा किमु धारयसि ? हरभ्रान्त्या व्युदासेनाप्रहरणे हेतुमाह मयि किम्भूते ? प्रियारहिते प्रियया दयितया त्यक्त इत्यर्थः। एतेन कृष्णस्य बिसलतादौ सर्पादिनिर्णयेन तापातिरेको दर्शितः।।१९।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।१९।। श्रीराधां प्रति स्वापराधमुक्त्वा मदनं प्रत्याह, [३] हृदीति। हे अनङ्ग! अङ्गक्लेशानभिज्ञ! हरभ्रान्त्या श्रीरुद्रभ्रमेण मयि न प्रहर मा प्रहारं कुरु। किञ्च क्रुधा क्रोधेन किमिति धावसि। कीदृशे मयि ? प्रियारहिते [४] श्रीराधाविरहिते। तद्विरहादेवाहं सन्तप्तः। त्वं मृतमारणं किमिति करोषीति भावः। [५] हरभ्रमोऽपि न; स प्रियासहितोऽहं प्रियारहित इति [६] भ्रमबीजमपि निरस्यति। [७] हृदि बिसलताहारो [८] मृणालस्य [९]हारस्तद्विरहशान्त्यै धृतो न भुजङ्गमनायकः सर्पराजो वासुकिः। किञ्चेयं कुवलयदलानां [१०] श्रेणी नीलकमलपत्राणां पङ्क्तिस्तापशान्त्यै[११]धृता, [१२] सा गरलद्युतिर्न [१३] विषकान्तिर्न। [१४] किञ्च मलयजरजश्चन्दनरेणुः, नेदं भस्म विभूतिः।

तद्विरहवशात्सर्वेषां वैपरीत्यं जातमिति भाव:। भ्रान्तिनामाय- मलङ्कार:। स एवायमित्युन्माद:।।१९।।

१.तिन्दुबिल्वेति इ.पाठ:२.नास्तीयं पुष्पिका-इ.३.हृदीत्यादि-इ.ग.ह.हृदीत्यादिना-ज.हृदि बिसेति-फ.४.श्रीवृषभानुसुताविरहिते-ग.श्रीराधारहिते-ज.५.त:५.पर्यन्तं नास्ति-अ.ब.७.हृदि हृदये बिसलताया: मृणालस्सहार:फ.हृदि अयं बिसलतायां: मृणालस्य हार:-ग.ह.ज.८,९.नास्ति-अ.ब.१०.नास्ति-अ.ब.इ.फ.ह.११.कण्ठेधृता-ज.१२.न सा गरलद्युति: विषकान्ति:-ज.गरलद्युतिर्विषकान्तिर्न-इ.फ.ह.१३.नास्ति-अ.ब.१४.किञ्चायं-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।१९।। हृदीति। हे अनङ्ग! त्वं मयि हरभ्रान्त्या महादेवभ्रमेण [१]न प्रहर [२]प्रहारं मा कुरु। क्रुधा कोपेन किमु किमिति धावसि। मारयितुं धावनं करोषि। हरभ्रान्ति परिहरति-[३]हृदीति। हे काम! मम हृदि हृदये बिसलताहारो मृणाललताहारो वर्तते नायं भुजङ्गमनायक: शेष:। [४]मम कण्ठे कुवलयदलश्रेणी गले नीलोत्पलपङ्क्ति: [५] वर्तते ; न सा गरलद्युतिर्हालाहलदीप्ति:। इदं मलयजरजो वर्तते [६] चन्दनालेपो वर्तते नेदं [७]भस्म। कीदृशे मयि ? प्रियारहिते राधावियोगिनि।।१९।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।१९।। इदञ्च समरसगलरूपवर्णनियतत्वाद्वर्गैलारूपं गीतम्। मन्मथमुपालभते, दीति। हे अनङ्ग काम! मम हृदि वक्षसि विसमेव कमलनालतन्तु: मृणाललताकृत: हार: विरहसन्तापशान्त्यर्थं धृत:। अयमिति हस्तनिर्देश:। भुजङ्गमनायक: सर्पाधिपो वासुकि: महादेवभूषणं न। कण्ठेकुवलयस्य नीलोत्पलस्य श्रेणी आवलि:, सा प्रसिद्धा गरलद्युति: विषप्रभा कालिमा न। इदं मलयजस्य चन्दनस्य रज:, शुष्कत्वाच्चर्चितस्यापि चूर्णत्वव्यपदेश:। भस्मोद्धूलितं विभूतिर्न। प्रियारहिते राधावियुक्ते मयि न प्रहर। निमित्तसप्तमी मयीति। पूर्वेण विरलतादिकं वर्तते। मयि हरभ्रान्त्या महादेव इति बुद्ध्या भुजङ्गभूषण: नीलकण्ठ: शुभ्राङ्ग इति व्याप्यभ्रमै: व्यापकशिवभ्रमेण मा प्रहर मा पीडय। क्रुधा स्वाङ्गदाहजरुषा मा प्रहर। किमु व्यर्थं धावसि। प्रहर्तुं वेगेन धावसि ।अत्र भ्रममूलकभुजङ्गाद्यपह्नवादपह्नवालङ्कार:। भ्रान्तापह्नुतिरिति नवीना:। हरिणीवृत्तम्।।१९।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१९।। कथमप्यनागसं मां मदन: पीडयतीति परिचिन्त्य नूनं हरेण सादृश्यान्मयि मदन: प्रहरतीति निश्चित्य प्रहरणकारणभूतां हरभ्रान्तिं निराकुर्वन् मदनमनुनयति। **हृदीत्यादि**। हे अनङ्ग! हरभ्रान्त्या; हरोऽयमिति या भ्रान्तिर्भ्रमस्तया मयि न प्रहर

प्रहारं मा कुरु। पुरा महादेवेन कामो दग्ध इति वैरबोधार्थमनङ्गेति सम्बोधनम्। यस्त्वामङ्गहीनमकार्षीत्तं रुद्रमिव मां मत्वा प्रहारं मा कुर्विति तात्पर्यार्थः। क्रुधा कोपेन किमु किमर्थं धावसि ? मां हन्तुमिति शेषः। यद्वा वितर्के किमुशब्दः। तद्यथा, ''वैसारिणो राजति राजतस्ते करे चकोराक्षि कुतूहलिन्याः जितस्य कान्त्या मदनस्य केतुरानीय दत्तः, किमु बल्लभेन।'' इति। तदयमभिसम्बन्धः। हे अनङ्ग ! किमु वितर्के हरभ्रान्त्या कोपेन त्वं धावसि तर्हि मयि मा प्रहार्षीः इति। हरभ्रान्तिहेतुभूतं प्रसज्य निषेधयति, हृदीत्यादि । मम हृदये अयं बिसलताहारः मृणाललतारूपो हारः भुजङ्गमनायको वासुकिर्न तु हरस्योरसि यज्ञोपवीतरूप उरगराजः खलु प्रतिवसति। दैर्घ्याद्धावल्याच्च मृणाललतायां वासुकिभ्रमः। तथा कण्ठे कुवलयदलश्रेणी नीलोत्पलपङ्क्तिरेषा सा श्रीकण्ठकण्ठवर्तिनी गरलद्युतिः कालकूटकान्तिर्न भवति, सेति प्रसिद्धा। तथा च, ''प्रक्रान्तप्रसिद्धानुभूतार्थस्तच्छब्दः यच्छब्दोपादानं नापेक्षति'' इति **काव्यप्रकाश**ः। यथा - ''कला च सा कान्तिमती कलावतः'' इति। कृष्णत्वात् कण्ठदेशावस्थितत्वाच्च नीलोत्पलपत्रे गरलभ्रमः। इदं मलयजरजो न तु भस्म। धावल्याद्रजोरूपत्वाच्च चन्दने भस्मभ्रमः। विरहसन्तप्ते देहे दत्तमात्रं चन्दनं शुष्यतीति रजःशब्दोपादानम्। ईदृशवेशधारणं प्रति कारणमाह। मयि किंविधे ? प्रियारहितेति। राधिकया विना कृते विरहिणामेवंविधा उपचाराः भवन्तीत्यभिप्रायः। तत्त्वाख्यानोपमेयम्। यदुक्तम्, ''न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे। इति विस्पष्टसादृश्यात्तत्त्वाख्यानोपमा यथा।।'' इति।।१९।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।१९।। उक्त मन्मथसन्तापमेव तत्स्फूर्त्या साक्षादेव विवृणोति हृदीति। हे अनङ्ग ! क्रुधा किमु धावसि ? मदर्थं चेत्तर्हि हरस्य भ्रान्त्या प्रहारं मा कुरु मयि। अहं हरो न भवामीति हरभ्रान्तिं वारयन्नाह प्रियारहिते मयि स तु प्रियार्द्धाङ्गयुक्तः। तल्लक्षणादि दृश्यते इति चेन्न। हृदि मृणाललताहारोऽयं वासुकिर्न, कण्ठे कुवलयदलश्रेणीयं सा गरलद्युतिर्न, सर्वाङ्गे चन्दनरजः इदं भस्म न, अतो मयि हरभ्रान्तिः न कार्य इति भावः।।१९।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१९।। अथ मन्मथेन दूनोमीति यदुक्तं तद्धयभ्रान्तिचित्ततया तं स्वमारणायागच्छन्तं विभाव्य सविनयमाह हृदीति। हे अनङ्ग ! मदन ! क्रुधा क्रोधेन किमु धावसि द्रुतमागच्छसि। मदर्थं चेत् तर्हि हरभ्रान्त्या त्वत् प्रतिपन्थिरुद्रभ्रमेण मयि न प्रहर। शरप्रहारं मा कुरु।

अहं हरो न भवामीति जानीहि। मयि कीदृशे, प्रियया रहिते, विरहिते। स तु प्रियया सहित इति भाव:। तल्लक्षणानि त्वयि दृश्यन्त इति चेत् हृदि वक्षसि विसलताहारोऽयं मृणाललतिकया रचितो यो हार: सोऽयं विरहितापोपशान्त्यै धार्यते। भुजङ्गमनायक: सर्पश्रेष्ठवासुकिर्न भवति। 'मृणालं विसमित्**यमर**:।' शुक्लवर्णत्वेन द्वयो: सादृश्यात्। कण्ठे कुवलयदलश्रेणी नीलोत्पलपत्रपंक्तिर्विरहदाहोपशमाय धृता सा हरकण्ठस्थिता गरलद्युतिर्विषकान्तिर्न भवति। सर्वाङ्गे इदं मलयजरज श्चन्दनरेणु: भस्म न। अतो मयि हरभ्रान्तिं त्यज इति भाव:। यद्वा विरहदु:खमसहमानं स्वप्रहरणाय कामं प्रेरयन्नाह, हे अनङ्ग धन्य: खलु त्वम्। यतोऽङ्गवियुक्तत्वादङ्गक्लेशं न जानासि ।अतोऽहं प्रार्थये प्रहरणार्थमागतश्चेत् प्रियाविरहदूषिताङ्गभारवहनाक्षमे मयि प्रहर । प्रहरेणात्मतुल्यं तां प्रापयन् परं मित्रत्वं सम्पादयेति भाव:। किमित्यनुमित्या त्वन्नाशकरहरबुद्ध्यात्म-संरक्षणपरो धावसि। पलायसे। न धाव। अशक्तोऽस्मीति चेत्। परापकरणलब्धफलया क्रुधा उपलक्षित: शक्तोऽसि। कथमशक्त इति भाव:। नाहं हर:, किन्तु त्वदानुकूल्यमेव कृतवानस्मीत्याहहृदि विसलतेत्यादिना। प्रगाढसन्तप्तहृदयासङ्गमुखनि: सरद्धूमरेखे मृणालखण्डे वाष्पयुतविषज्वालाजटिलवासुकिधियं मा विधेहि। किन्तु तत्पाशतया प्रसिद्धस्य तस्य हृदये धारणात् तत्त्वदानुकूल्यमेवाचरामि। शीघ्रं प्रहरेति भाव:। तथा कण्ठे विधृतेन्दीवरश्रेणीं मदङ्गसन्तापसञ्जातमुर्मुरतया प्राप्तचूर्णतायां स्वेदसम्प्लुतायां मा कुरु विषबुद्धिं, किन्तु त्वद्बाणश्रेष्ठतया प्रसिद्धानामिन्दीवराणां संहति: साऽपि कण्ठे प्राप्तास्ति। किमत: परं करोमिति भाव:। तथानुलिप्तायां चन्दनद्रवघटायां सन्तापाङ्गसम्बन्धसम्प्राप्तरजोभरायां स्वसन्निधानविरोधिभूतधियं नोपोहि। किन्तु विरहिसम्मोहनचूर्णतया ख्यातं चन्दनरजोऽपि गात्रे प्रक्षिप्तमिति कथं विलम्बमिति भाव:। अथवा हे अनङ्ग। निजापकारि हरवैरनिर्यातनधिया मयि न प्रहर। प्रहरन् निष्फलोद्यमे लज्जामवाप्स्यसि। क्रुधा किमु धावसि। क्रोधधावनयोरनुपयोगितां विचारयन् आत्मगौरवं रक्षेति भाव:। हरभ्रान्तिं निरस्य मरणोपायवैफल्यं दर्शयति। अयं हरभ्रान्तिकरो भुजङ्गमनायको न। किन्तु विसलताहारो मया एव मरणोपायतया हृदये धृत:। स तु विधिवैमुख्यात् भस्म जातम्। भस्मेति अकिंचित्कारार्थपर्यवसायि। तद् द्वितीयवाक्यार्थविधेयतया विसलताहार: इत्यादौ सम्बन्धनीयम्। तथा कुवलयदलश्रेण्यपि भस्मत्वं जाता। तथा चन्दनरजोऽपि ।।१९।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

१९-हृदिविषलतेति; हृदये कमलनालस्य हार: श्रीकृष्णस्यैव न स: सर्पधारी महादेव:। गले नीलकमलस्य पुष्पाणि सन्ति न स हलाहलस्य वर्ण:। शरीरे तस्य कृष्णस्य

चन्दनलेपः कामपीडां न्यूनीकर्त्तुं वर्त्तते। न स शिवस्याङ्गे श्मशानभस्माङ्गलेपः। हे कदर्प! नाहं हरः त्वं शिवभ्रमेण मां कथं प्रहारं करोसि? इत्यत्र भ्रान्तिम - दलंकारमाध्यमेन श्रीकृष्णस्य शिवसाम्यं प्रदर्शयति कविः। अपि च कालिदासेन विक्रमोर्वशीये नाटके लिखितम्।

नव जलधर सन्नधोऽयं न दृप्त निशाचरः
सुरधनुरिदं दूराकृष्टं न नाम शराशनम्।
अयमपि पटुर्धारासारो न बाणपरम्परा
कनकनिकषस्निग्धा विद्युत्प्रिया न ममोर्वशी ।।

अत्र कृष्णस्य कुवलयदल शीतलीकरणार्थं चन्दनमपि वक्षस्थले दत्तमस्ति चेत् कामपीडा ह्रातीति सम्प्रदायः।

अत्र श्लोकेऽस्मिन् हरिणीच्छन्दः। विरहव्याधिप्रपीडितः श्रीकृष्णः। काव्यसौन्दर्यम-तुलनीयमेव ।। १९ ।।

**२०-पाणौ मा कुरु चूतसायकममुं मा चापमारोपय**
**क्रीडानिर्जितविश्व मूर्च्छितजनाघातेन किं पौरुषम्।**
**तस्या एव मृगीदृशो मनसिजप्रेङ्खत्कटाक्षाशुग-**
**श्रेणीजर्जरितं मनागपि मनो नाद्यापि संधुक्षते।।२०।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।२०।। न केवलमङ्गदाहनात् शिवो मम वैरीभावानण्युज् झितशासनत्वात् ततस्त्वय्यपि प्रहरिष्यामीति कामस्य प्रतिवचनमाशङ्क्याह। पाणाविति तत्र कन्दर्पं प्राह।

हे मनसिज पाणौ चूतसायकममुं मा कुर्वीत्येको वाक्यार्थः। यदि पाणौ कृतवानसि तदा पाणावेवास्तां, मा चापमारोपयेति द्वितीयः। चापनिहितत्वाद्बाणः प्राणान् हरतीत्यभिप्रायः। कथमेवंविधेयमित्याह। हे क्रीडानिर्जितविश्व! मूर्च्छित जनाघातेन किं पौरुषमिति। क्रीडया निर्जितं विश्वं येन इति कामोऽन्यपदार्थः कथं भवान् मूर्च्छित इत्याह। तस्या एवेत्यादि। तस्याः सर्वोत्कृष्टत्वेन प्रसिद्धायाः मृग्याः दृशाविव दृशौ यस्याः कुरङ्गनयनायाः प्रेङ्खन्त्या उद्गच्छन्त्याः कटाक्षवाणश्रेण्याः जर्जरितं मम मनो मनागल्पमपि न संधुक्षते दीप्ता जीवतीत्यर्थः। सन्धुक्षत इति। धुक्ष सन्दीपने।।२०।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२०।। इदानीं स्मरमुपालंभते, पाणविति। हे क्रीडानिर्जितविश्व काम! पाणौ अमुं चूतसायकं मा कुरू। चापमपि माऽऽरोपय मा सज्जं कुरू। यत: क्रीडयैव निर्जितविश्वस्य केयं सामग्री नाम ? अथ चेतसामग्री तर्हि कस्योपरीत्याह मूर्च्छितजनाघातेन किं पौरुषं कोऽयं पराक्रम: ? अथवा, कुत्सितं पौरूषं किंपौरूषम्। तर्हि किं क्रियतामित्याह, यदर्थं मां प्रहिणोषि तस्या एव मृगीदृशो मनोऽद्यापि मनागपि न संधुक्षते, अपि तु संधुक्षतां नाम। किंविशिष्टं मन: ? प्रेङ्खत्कटाक्षानलज्वालाजर्जरितम्। प्रेङ्खन्तो वल्गन्तो ये कटाक्षा अर्थात्सपत्नीनां त एव अनलोऽग्निस्तस्य ज्वालास्ताभिर्जर्जरितम्। अथवा, हे मनसिज! तस्या एव मृगीदृश: प्रेङ्खत्कटाक्षानलज्वालाजर्जरितं मन:, अर्थान्ममैवाद्य न दीप्यते। अतो मृतमारणं कथं युक्तम्? शार्दुलविक्रिडितं छन्द:। आक्षेपोऽलंकार:। अत्र मनसिजशरा मनो विध्यन्ति इति कर्मत्वे विवक्षिते यत्कर्तृत्वमुपन्यस्यं तदौचित्यचमतकारितामाविष्करो। यथा 'सान्वयं शोभते वाक्यमुचितैरेव कारकै:। कुलाभरणमैश्वर्यमौदार्यं चरितैरिव' इति।।२०।।

## (३) जगद्धरकृत- सारदीपिका

।।२०।। पुष्पसायकत्वेन काम: प्रसिद्धोत: इमाञ्चुतमञ्जरीरूपानेव बाणान्धनुष्यारोप्य मां ताडयिष्यतीति। शङ्कया पुनरपि कामायैव दैन्यं करोति प्राणामिति। हे क्रीडानिर्जित विश्वक्रीडया लीलया जितं भुवनं येन स:। अमुं चूतसायकम् आम्रपुष्पवाणं पाणौ हस्ते मा कुरु। चापं धनु: मा रोपय सशरं मा कुरु। हस्तेपिचेत्करोषितर्ह्यमुसायकं मा सन्धेहीत्यर्थ:। हे मनसिज मदन! यत: मूर्च्छितस्य मूर्छां प्राप्तस्य सादृशजनस्याघाते न पीडया किं ते पौरुषं कस्य वा पुरुषार्थ: न किमपीत्यर्थ:।

मूर्च्छितत्वे कारणमाह तस्या एव मृगीदृशोहरिणीनयनाया: तस्या एवेति विरहाधिक्येन राधानाम ग्रहणाशक्ति: प्रतिपाद्यते प्रेखतोचलन्तो कटाक्ष एवानला: वन्ह्यस्तेषां श्रेण्यापङ्क्त्या जर्जरितं खण्डखण्डीभूतं मम मन: मनागपि स्वल्पमपि नाद्यापि सन्धुक्षते स्वस्छं न भवति। क्वचित्कटाक्षाशृङ्गेतिपास: तदा कटाक्ष एव श्रृङ्गरबाणा:।।२०।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।२०।। कुसुमसायकत्वेन प्रसिद्धो य: काम: स इमानेव चूतमञ्जरीरूपान्बाणनधनुष्यारोप्य मां ताडयिष्यतीति शङ्कया पुनरपि दैन्यं करोति, पाणाविति। हे मनसिज मदन! अमुं पुर: स्थितं चूतसायकमाम्रपुष्परूपं बाणं पाणौ हस्ते मा कुरु। चापं धनुर्माारोपय मौर्वीयुक्तं मा

कुरू। यद्वा, चूतसायक हस्ते मा कुरू। हस्ते चेत्करोषि तदामुं सायकं चापे च मारोपय। मा संधेहीत्यर्थः। अत्र मनसिज पदेन मन्मनसा जातस्य ते मत्संतापकारित्वमनुचितमिति ध्वनितम्। हे क्रीडानिर्जितविश्व क्रीडया लीलया निर्जितं विश्वं जगद्येन तादृश! मूर्च्छितस्य मूर्च्छां प्राप्तस्य मादृशजनस्याघातेन प्रहारेण तव किं पौरूषम्? अपि तु न किमपीत्यर्थः। यद्वा, क्षेपे किं शब्दः। मूर्च्छित जनाघातेन तव किं पौरूषम्, कुत्सितं पौरूषमित्यर्थः। मूर्च्छितत्वे हेतुमाह, तस्या एवेति। तस्या एव मृगीदृशो हरिणीदृशः प्रेङ्खन्तः प्रसर्पन्तो ये कटाक्षास्त एवाशुगा बाणास्तेषां श्रेणिभिः पङ्क्तिभिर्जजरितं खण्डितं मनो मनागपि न संधुक्षते न स्वस्थं भवति। तथा च तत्कटाक्षरूपबाणैस्त्वयाहं मूर्च्छितः कृतः,संप्रति मयि चूतमञ्जरीरूपसायकप्रहारं मा कुरू। मृतमारणं माचरेति भावः। येन लीलयैव संधुक्ष्यते' विश्वमपि जितं तस्य ते मुर्च्छितजनेषु प्रहारो यशोहानिकर इति ध्वनितम्। सायकाः शरखङ्गयोः'इति विश्वः। अथस्त्रियाम्। धनुश्चापौ' **इत्यमरः**। किंपौरूषमित्यत्र द्वितीयव्याख्यानपक्षे 'किमः क्षेपे' इत्यनेन निन्दायां समासः। आशुगो मारूते बाणे' **इत्यमरः**।।२०।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।२०।। इतोऽपि मद्विषये भवादृशस्य ग्रहणधारणं प्रहारश्च न युक्त इत्याह। पाणाविति। क्रीड़या लीलया अनायासेनेत्यर्थः। निर्जितं विश्वं येन तादृश, उक्तं च जगज्जेतृत्वं **रति रहस्ये**;

परिजल्पते भृङ्गश्रेणी पिकाः पटुवन्दिनो
हिमकरसितछत्रं मत्तद्विपो मलयानिलः।
कृशतनुधनुर्वल्ली लीलाकटाक्षशरावलि-
मनसिज महावीरस्योच्चैः जयत्त्रिजगद्गतः।। इति

इदं तु हेतुगर्भविशेषणम्। एतादृशं हे मनसिज! कामदेव! अत्रानेन पदेन मन्मथसम्बोधनं जनककल्पस्य मनसप्रहरणमनुक्तमितिद्योतनार्थम्। मद्विषये चूतसायकं सहकारकोरकरूपं शरं पाणौ मा कुरु सायकं हस्तोन तूणानगृहाणेत्यर्थः। प्रयोगस्तु चूतसायकत्वं च तस्य,

अरविन्दमशोकञ्च चूतं च नवमालिका।
नीलोत्पलं च पञ्चैते पञ्चवाणस्य सायकाः।।

इति वचनादवगन्तव्यम्। चापं शरासनमारोपय नाधिज्यं कुर्वित्यर्थः। यदि कुत्सितदर्पत्वेन चापारोपणं शरप्रयोगं च करोषि, तथापि तस्य कृत्यं नास्तीत्याह

मूर्च्छितेति। मूर्च्छितजनस्य निश्चेष्टितजनस्य घातेन प्रहरणे न किं कियत् पौरुषं पुरुषकार स्यादित्यर्थः क्रीडानिर्जितविश्वभवादृशस्य महावीरस्य मूर्च्छितजनाघातो न केवलं पौरुषान्यधायकः अपि त्वयशस्करोऽपीतिभावः। प्रकृतलक्षणस्य मूर्च्छितत्वं कथमित्याशङ्क्य उपपादयति तस्या इति मृग्या मृगाङ्गनाया दृशाविव विशालौ दृशौ यस्यास्तद्विधायाः तस्या एव राधायाः प्रेङ्खन्तश्चलन्तो ये कटाक्षा अपाङ्गा एवाशुगाः वाणास्तेषां श्रेणी परम्परा तया जर्जरितं वहुधा च्छिन्नं परिभावितराधाकटाक्षशरपरम्परा-विच्छिन्नमित्यर्थः। एतादृशं ये मनः अद्यापि इदानीमपि जर्जरितसमयमारभ्य वहुकालव्यापिनि वर्त्तमानकालेऽपीत्यर्थः। मनागीषदपि सर्वं तु दूर इति भावः न संधुक्षते सन्धानं प्राप्स्यति। तत्कटाक्षच्छिन्ना मनो त्रय वा इदानीमपि परस्परं न मिलन्तीत्यर्थः। अतः पिष्टपेषणवद्वृथैव मन्मनः पीडनम्। अतिपातककरं तत्रेतिभावः। संधुक्षत इति केषुचित् पाठः। तदा संधूक्षणं सन्धानं न प्राप्नोति। स्वास्थ्यं न लभते इत्यर्थः। पूर्वपाठे संपूर्वादुहे लट्। द्वितीये धुक्षतेर्लटि।।२०।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२०।। हरभ्रान्त्या नाहं प्रहरामि किन्तु दुर्जयपौरुषाकांक्ष्यैवेत्याकांक्षायामाह हे क्रीडानिर्जितविश्व लीलाविजितभुवन मूर्च्छितजनाधातेन किं पौरुषं कः पुरुषकारः अपितु न किमपीत्यर्थः। तस्माद् अमुं चूतसायकं सहकारप्रसूनं शरं पाणौ करे मा कुरु मा चापमारोपय धनुः संघटय अर्थात्तत्रैव। आत्मनो मूर्च्छितत्वे हेतुमाह तस्या इति। तस्या एव राधाया एव मृगीदृशो हरिणीनयनायाः मनसिजेन कामेन प्रेङ्खतां चलतां कटाक्षाशुगानां कटाक्षबाणानां श्रेण्या जर्जरितं खण्ड-खण्डीभूतं मम मनः चित्तं नाद्यापि सन्धुक्षते अद्य पर्यन्तमपि न स्वस्थमित्यर्थः। तथास्माकं मारणी हृतमारणं भवतां न पौरुषमिति भावः।।२०।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।२०।। पुनः कामो मां [८] तापयिष्यति इति भयेन कुसुमविशिखायैव दैन्यं करोति, पाणाविति। हे मनसिज मदन! अमुं चूतसायकमाम्रमञ्जरीं पाणौ मा कुरु। किञ्च चापं धनुर्मा आरोपय। क्रीडया [१] लीलया नितरां जितं विश्वं येन, तत्सम्बुद्धिः। मूर्छितानां जनानां घातेन [२] मारणतो [३] किं पौरुषं पुरुषार्थः। कुत्सितं वा [४] पौरुषम्। अपि तु [५]तस्याः श्रीराधाया एव मृगीदृशः हरिणीदृशः प्रेङ्खन्तः प्रसरन्तो ये कटाक्षा स्त एवाशुगा बाणास्तेषां श्रेणीभिः पङ्क्तिभिर्जर्जरितं [६] खण्डं खण्डं कृतं मम मनोऽद्यापि मनागीषदपि न सन्धुक्षते न स्वस्थं भवति। किञ्च पिष्ट [७] पेषवन्मनसिजस्यैतदनुचितमिति भावः। किञ्च [८] लीलया [९] जितं विश्वं येन तस्य जनेषु प्रहरणं यशोहानिर्न च परुषार्थ इति

ध्वनि:। सायक: शरखड्गयो: [10]इति विश्व: [11] (४.७३)। [12] अथास्त्रियौ) धनुश्चापौ **इत्यमर**: (२.८.८३)। [13]आशुगो मारुते बाणे इति विश्व: (१५.३१)। प्रेङ्खनामालङ्कार:।।२०।।

१.न प्रहारं कुरु - क. २.मां प्रहारं मा करु - ड.मा प्रहारं कुरु - ल.म. ३.नास्ति-क. ४.नास्ति - ल.म. ५.नास्ति - ड. ६.त: ७.पर्यन्तं नास्ति - क. ८.ताडयिष्यति - इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।२०।। पाणाविति। हे क्रीडानिर्जितविश्व लीलाविजितभुवन काम! अमुं चूतसायकं आम्रपुष्पबाणं पाणौ हस्ते मा कुरु। चापञ्च धनु: मा आरोपय सशरं [14] मां कुरूष्वेत्यर्थ:। यतो मूर्छितजनाघातेन [15] किं [16] पौरुषम्। मूर्छितजनपीडया किं ते पौरूषं कस्तवपुरुषार्थ:। मूर्छितत्वे कारणमाह, तस्या इति। तस्या एव राधाया मृगीदृशो हरिणनयनाया: मनसिजेन कामेन प्रेङ्खतां चलतां [17] कटाक्षानलानां कटाक्षवह्नीनां श्रेण्या पङ्क्त्या जर्जरितं [18] जर्जरं [19] जातं खण्डीभूतं मम मन: मनागपि स्वल्पमपि नाद्यापि सन्धुक्षते अङ्कुरितं[20]न भवति। क्वचित्कटाक्षागेति पाठ:। तदा कटाक्षा एवाशुगा: बाणा:।।२०।।

१.नास्ति-ज. २.मारणेन-इ.फ.ग.ह.ज. ३.किं पौरुषमपि तु न-ज. ४.पौरुपमपि तु न-इ.फ.ग.ह. ५.तस्या एव-ज. ६.खण्डं नीतं मम मन:-इ.फ.ग.ह. ७.पेषण-ग.ह.ज. ८.क्रीडया लीलया निर्जितं-ज. ९.विश्वं जितं-इ.ह.ग. १०.त: ११.पर्यन्तं नास्ति-अ.ब. १२अथास्त्रियां-इ.फ.ग.ह.ज. १३.आशुगो मारुतो बाण:-इ.फ.ग.ह.ज. १४.मा कुरु-क.मा कुर्वित्यर्थ-ल.म. १५,१६.नास्ति-क.ल.म. १७.नास्ति-क. १८,१९.नास्ति-ड. २०.नास्ति-ड.ल.म.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।२०।। पाणाविति। हे मनसिज मदन। क्रीडया निर्जितं विश्वं येन तत्सम्बुद्धि:। त्रिजगद्विजयेन, अमुं वसन्तकालोद्गतं, दूतो रसाल: तत्कुसुमरूपं सायकं पाणौ मा कुरु मा गृहाण। चापञ्च माऽऽरोपय। हस्तेन धृतञ्चेदमपि धनुषि सन्धानमस्य मा कुरु। तदपेक्षया विलसितत्वात्( ?) मूर्छितानां इन्द्रियव्यापारशून्यानां जनानां आघातेन संहारेण पौरुषं पराक्रम:किम्? उत्कर्षो नास्तीति भाव:। स्वस्य मूर्छितत्वे हेतुमाह, तस्या इति। मृग्या: हरिण्या: दृशाविव दृशौ यस्या: तस्या राधाया:। अत्र विस्तृतचञ्चलत्वादि-धर्मस्य तद्वाचकेवादेश्च उपमानीभूतदृक्पदस्य लोपात् त्रिलुप्तोपमा। तस्या एव प्रेङ्खन्त: चलन्त: कटाक्षा: प्रान्तवीक्षणान्येव आशुगा: बाणा: तेषां श्रेण्या परम्परया जर्जरितं कीलितं मम मन: मनागपि ईषदपि अद्यापि अधुनाऽपि न सन्धुक्षते[71] न सन्दधाति, न

सन्धितं भवतीति भावः। यद्यप्यत्रोत्तरार्धे मनसिजेति पदमस्थानस्थं, तथापि सम्बोधनमाभिमुख्यार्थं वाक्यमध्येऽपि लोके प्रयुज्यत इति न दोषः। यद्वा मनसिजस्य प्रेङ्खत इति वा विग्रहे कृते नास्थानपदत्वम्। कटाक्षाशुगेति।।२०।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२०।। न केवलमङ्गदाहकत्वाच्छिवो मम वैरी भवानप्युज्झितशासनत्वात् ततस्त्वय्यपि प्रहरिष्यामीति कामस्य प्रतिवचनमाशङ्क्याह, पाणावित्यादि। हे मनसिज! पाणौ हस्ते चूतसायकं मा कुर्वित्येको वाक्यार्थः। चूतम् आम्रकुसुमं तदेव सायको बाणः कामस्य पुष्पबाणत्वात्। ''द्विहीनं प्रसवे सर्वं हरीतक्यादयः स्त्रियाम्'' **इत्यमरः**। मा कुरु इत्यत्र माशब्दोऽयं न तु माङ्वाचकः माङ्योगे लुङ एव विधानात्। यदि पाणौ वा कृतवानसि तर्हि पाणावेव आस्ताम्। अमुं चापं मा आरोपयेति। अमुं सायकं धनुषि न संधत्स्व। सज्जं मा कुर्वीति द्वितीयः। चापनिहितत्वात् बाणः प्राणान् हरतीत्यभिप्रायः। अत्र रूपेः ण्यन्तस्य द्विकर्मकत्वम्। किमर्थं चापसायकौ नारोपयिष्यामीत्यत आह, क्रीडानिर्जितविश्वेत्यादि। क्रिडया अवज्ञयैव निर्जितं स्वाधीनतामानीतं विश्वं जगत् येनेति कामसम्बोधनम्। ''क्रीडा केलिप्रकारे स्यात् खलावज्ञानयोरपि'' इति विश्वः। ईदृशस्य तव मूर्च्छितजनाघातेन मूर्च्छितस्य सम्मोहं प्राप्तस्य जनस्य अर्थान्मम आघातेन ताडनेन हिंसया वा किं पौरुषम्? पुरुषार्थो न भवतीति निषेधपरोऽयं किंशब्दः। यद्वा कुत्सितं पौरुषं किंपौरुषमिति। किंपौरुषम् इति ''किमः क्षेपे'' इति समासः। जनशब्दोऽत्र पामरवाची। ''जनो लोके महर्लोके परलोके च पामरे'' इति **विश्वः**। अनेन स्वापकर्षविशेषेण किं पौरुषमिति पुष्णाति। एष नाम गोपालरूपः पामरः। कथं भवान् मूर्च्छित इत्याह, प्रेङ्खदित्यादि । तस्याः राधायाः प्रेङ्खन्त्या आशु गच्छन्त्या कटाक्षाशुगश्रेण्या चक्षुःकोणवीक्षितरूपशरपरम्परया। जर्जरितं जीर्णं मम मनो मनागपि कश्चिदपि अद्यापि इदानीमपि न सन्धुक्षते सन्दीपनं न प्राप्नोति न जीवति वा। धुक्ष धीक्षसन्दीपनक्लेशनजीवनेष्विति धातुः। प्रेङ्खदिति ''इखि गतौ'' इति धातुः। तस्याः कीदृश्याः मृगीदृशः कुरङ्गीनयनायाः मृग्या दृशाविव दृशौ यस्या इति विग्रहे ''सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च'' इति दृक्शब्दलोपः। अत एव मृग्या इव तरलनयनत्वात् कटाक्षाशुगेत्युक्तं युक्तम्। ''आशुगो मारुते बाणे शकुन्ते क्रमुकी फले'' इति हट्टचन्द्रः।।२०।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।२०।। न केवलं मदङ्गदाहाच्छिवो मम वैरी भवानप्युल्लंघितशासनत्वात् अतस्त्वपि प्रहरिष्यामीत्यत आह, हे मनसिज! अमुं चूतमुकुलबाणं पाणौ मा कुरु। यदि पाणौ

कृतवानसि, तदा पाणावेवास्तां चापं मा रोपय, चापारोपिताबाण: प्राणान् हरिष्यति इत्यभिप्राय:। कथमेवं विधेयमित्यत आह, क्रीड़या निर्ज्जितं विश्वं येन हे तथाविध! मूर्च्छितजनस्य प्रहारेण किं पौरुषं ? न किमपि । कथं त्वं मूर्च्छित: ? तस्या: श्रीराधिकाया एव उच्छलन्त्या कटाक्षवाणश्रेण्या जर्जरितं मम मनोऽल्पमपि अधुनापि न संधुक्षते(७१) न दीप्यते स्वस्थं न भवतीत्यर्थ:।।२०।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२०।। पश्याद्य त्रिभुवनविजयिनो मम बाणस्य प्रभावमिति। करधृतसायकं तं विभाव्य पुन: सकार्पण्यमाह; पाणाविति। हे मनसिज! मन: प्रभवत्वाद् विचारचतुरमदन। अमुं नूतनप्रभवतयाऽतिघातुकं चूतमुकुलरूपं सायकं बाणं पाणौ मम सन्धानैककुशले, करे मा कुरु, मा गृहाण। यदि लीलया पाणौ धारयसि तर्हि पाणावेवास्तां, चापं मा रोपय। चापारोपितबाणस्य प्राणघातुकत्वस्यावश्यकत्वात्। ननु सन्धानाय गृहीतस्यास्त्रस्य प्रयोगमन्तरेण प्रतिसंहरणं वीराणामयशस्करमिति चेत्तत्राह; हे क्रीडानिर्जितविश्व! क्रीडया अनायासेन इत्यर्थ:। निर्जितं नि:शेषेण पराभूतं विश्वं विश्वस्थितब्रह्मेन्द्रादिप्राणिमात्रं येन तादृश। तद्यथा,

''अहल्याया जार: सुरपतिरभूदात्मतनयां
प्रजानाथोऽप्यासीदभजत गुरोरिन्दुरवलाम्।
इति प्राय: को वा न पदमपदेऽकार्यत मया,
श्रमो मद्बाणानां क इह भुवनोन्माथविधिषु।।'' इति।

एवं लब्धप्रतिष्ठस्य तव मूर्च्छितस्य मूर्च्छां प्राप्तस्य जनस्य मम मारणेन किं पौरुषम्। पुरुषार्थो न किमपीत्यर्थ:। प्रत्युत पुरुषार्थहानिरिति भाव:। कथं मूर्च्छितोऽसि, इत्यत आह, तस्या:, राधाया एव न त्वन्यस्या: प्रेङ्खन्तश्चलन्त: विविधविलासगतिमन्त इत्यर्थ: ये कटाक्षा: अपाङ्गदृष्टयस्त एव मम घातुकत्वात् आशुगा बाणास्तेषां श्रेणी परम्परा तया जर्जरितं खण्डं खण्डं कृतं मे मन: अद्यापि वर्त्तमानक्षणमपि मनाग् स्वल्पमपि न संघुक्षते सुस्थं न भवति। मृगीदृश इति पुरुषजात्यपेक्षया स्त्रीजातीनां नेत्रशोभाधिक्यात् मृगीशब्दोपन्यास:। 'जर्जरो दर्दुरे मेघे' इत्युत्पलिनी। घुक्ष सन्दीपनक्लेशनजीवनेषु धातु:।।२०।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

२०- पाणौ मा कुरूरिति; अत्र विरहदशायां जर्जरितस्य श्रीकृष्णस्य कदर्पं प्रति अनुरोध: मार्मिको भवति:। कन्दर्प! त्वं कदाचित् मामिमां आम्रमञ्जरी सायकरूपेण आरोपय। यतो हि क्रीडासमये मूर्च्छितस्यो परि पुन: स्वस्य आघातं न पुरूषाकाररूपेण गण्यते।

अहं खलु तस्या: श्रीराधाया: हरिणेक्षणाया: अपाङ्गदृष्ट्या चक्षुपलकशरायमानेन घातित:। तथैव शरघातजन्यपीडया इदानीमपि न लेशमपि स्वस्थो भवामि। शार्दूलविक्रीडितं छन्द:। आक्षेपालंकार: ।।२० ।।

**२१- भ्रूचापे निहित: कटाक्षविशिखो निर्मातु मर्मव्यथां**
**श्यामात्मा कुटिल: करोतु कबरीभारोऽपि मारोद्यमम्।**
**मोहं तावदयं च तन्वि तनुतां बिम्बाधरो रागवान्**
**सद्वृत्तस्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति ।।२१ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२१ ।। राधां प्रत्याह। भ्रूचापे निहित: कटाक्षविशिखा निर्मातुर्ममव्यथामिति नात्रानौचित्यम्। चापारोपितबाणस्य दु:खजनकस्वभावत्वात्। ''पृषत्कबाणविशिखा अजिह्मग खगाशुगा'' **इत्यमर:** श्यामात्मा कुटिल: करोतु कबरी भारोऽपि मारोद्यममिति। नात्राप्यनौचित्यं मलिनस्य कुटिलस्य च क्रूरस्वभावत्वात्। काम: मारणतयोर्मार: कुटिलं कुञ्चवक्रयो:। कवरी केशवेशे स्यात् श्यामो मलिन कृष्णया: इति कोश:।।

मोहं तावदयं च तन्वि ! तनुतां विम्बाधर इति नात्राप्यनौचित्यम्। यतोऽयं रागवान् मात्सर्य्ययुक्त:। तेन श्लेषोक्त्या लोहित्ययुक्त:। तै न कुल फले विम्बे प्रतिविम्बे दर्पणे। ''रागोऽनुरक्तौ मात्सर्य्ये क्लेशादौलोहितेऽपिचेत्''। इति **विश्व**:। सद्धृत्तस्तनमण्डलस्तव कथं प्राणैर्मम क्रीडतीति। सद्वृत्तस्य परप्राणहरणमनौचित्यमित्यभिप्राय: श्लेषोक्त्या वर्त्तुल:। ''वृत्तं पद्ये चरित्रं च वर्त्तुले चाभिधेयवत्'' इति **विश्व**: ।।२१ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२१ ।। इदानीं ध्यानमिलितां राधां संभावयन्नाह, भ्रुचाप इति। हे तन्वि ! भ्रूचापे निहित आरोपित: कटाक्ष एव विशिखो बाणो मर्मव्यथां निर्मातु। यतश्चापरोपितबाणस्य मर्मवेधो युक्त एव। यत: श्यामात्मा कुटिलश्च। श्यामात्मनामन्तर्मलिनचित्तानां च मारणं स्वभाव एव। अपि च, अयं रागवान्बिम्बाधरो मोहं तनुताम्। अस्याप्येवंविधस्य मोहविधाने औचिती; परं तु तव सद्वृत्त: स्तनमण्डल: स मम प्राणै: कथं क्रीडति ? इयमस्यानौचिती। यत: सदाचारवतां परप्राणविशसनं न क्वापि दृष्टमिति भाव:। अत्र विरोधालंकार:। शार्दूलविक्रीडितं छन्द: ।।२१ ।।

## (३) जगद्धरकृत- सारदीपिका

।।२१।। अधुना मनोविषयीकृतां राधां प्रतिस्येयं दुःखमाह भ्रूचाप इति हे तन्वि कृशाङ्गि भ्रूचापे भ्रूवावेव चापधनुस्तत्रनिहितः अर्पितः कटाक्षबाणः मर्मव्यथां मर्मपीडां तावन्निर्मातु करोतु विशिखस्य मर्मव्यथाजनकत्वं युज्यत एवेति भावः अनुच, श्यामात्माश्यामवर्णः कुटिलः वक्राकारः कबरीभारोपि केशसमूहोपि मारोद्यमं कामौनत्यं तावत्करोतु योन्तर्मलिनः कुटिल श्च भवति। सोन्यमारणाय यत्त एवेति सूचितं अयं च बिम्बाधरः बिम्बोष्ठः मोहो मम त्वं युज्यत एव सदृशः साधुवर्तुलः तव स्तनमण्डलः ममप्राणैः कथं क्रीडति ये सद्वृत्तासन्मार्ग प्रवर्तकास्ते तु परप्राणघाताः न भवेति विरोधनामालङ्कारः।।२१।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।२१।। संप्रति राधाङ्गविलसितान्ये स्मरणरूपाणि मां पीडयन्तीति तस्या एवोपालम्भनं करोमीत्याशयेन काममुपेक्ष्य तां च स्थितामिव ज्ञात्वा राधां संबोध्याह, भ्रूचाप इति। भ्रूचापे भ्रुरूपे धनुषि निहितोऽर्पितो यः कटाक्षविबाणो मर्मपीडां निर्मातु करोतु? धनुष्यारोपितस्य बाणस्य परमर्मपीडनमेव धर्म इति तदुचितमेव। अथ च तव कुटिलो वकः श्याम आत्मा स्वरूपं च यस्यौतादृशः कवरीभारोऽपि ग्राथितवेणीकेशसंचयऽपि मारोद्यमं मारणायोद्योगं पराक्रमं करोतु। यद्वा, मारस्य कामस्योद्यमं करोतु। योऽन्तर्मलिनः कुटिलश्च भवति सोऽन्यमारणाय यतत इत्यापि नानुचितम्। अथ च हे. तान्वि! अयं बिम्बाधरो बिम्बफलतुल्योऽधरो मोहं मूर्च्छा तनुतां तनोतु। किंदृशः? रागवान्रत्कता-विशिष्टः। इदमपि नानुचितम्। यतो यो रागवान्मात्सर्ययुत्कः स परमोहं करोत्येव। अयं तव सद्वतो वर्तुलः स्तनमंडलः कुचविस्तारो मम प्राणैः कथं किमिति क्रीडति प्राणग्रहणरूपां क्रीडां किमिति करोति? सद्वत्तस्य सच्चरितस्य परप्राणग्राहित्वनुचितमिति भावः। विरोधनामायमलंकारः। सदृत्तत्वरूपगणस्य परप्राणग्रहक्रियया विरोधकथनात्। तदुक्तं **काव्यप्रकाशे** (१०/१०) विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यदुचः इति। विशिखस्तोमरे शरे इति **विश्व**ः। श्यामो निन्दितकृष्णयोः इति घरणिः। आत्मा देहे मनोब्रहमस्वभावधृति-बुद्धिषु इति विश्वः। बिम्बं फले बिम्बिकायाः प्रतिबिम्बेऽर्कमण्डले इति च। रागोऽनुरक्तमात्सर्ये इति च। वृत्ते तु वर्तुलं वृत्तम् इति शाश्वतः। कबरी केशवेशः **इत्यमर**ः। मारो मृतौ विषेऽनङ्गे इति **विश्व**ः।।२१।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।२१।।अथ विरहातुरः सन्नेव परिभावितः राधाङ्गसौन्दर्य्य सं जातव्यथातुरस्तदीय-मङ्गलावण्यजातं निन्दति। भ्रूचापे इति। भ्रूरूपे चापे कार्मुके निहितः न्यस्तः तव

कटाक्ष एव विशिखो बाणः मर्मव्यथां मम जीवनहेतुभूतस्थानपीड़ां निर्मातु कुरुतात् नात्र खेदः। प्रयुक्तस्य विषमसमभेदकत्वस्य स्वाभाविकत्वादिति भावः।अत्र कटाक्षस्य मर्मभेदकवाणत्वरूपणान्निन्द्यत्वम्। किं च श्यामात्मा नीलवर्णः मलिनचित्तश्च कुटिलः भङ्गुरः वक्रस्वभावश्च उत्कलदेशकेशपाशस्य वक्राकारत्वात्तथोक्तमित्यवगन्तव्यम्। तादृशः कवरीभारः धामिल्लभारोऽपि मारोद्यमं मम मारणोद्योगं ण्यन्ताद्घञ्, अथवा मारस्य कामदेवस्य उद्यमं मम व्यथाकरेण उद्योगं कवरीभारस्य उद्दीपकत्वेन मन्मथोद्यमकारित्वस्य सम्भवात्, अन्यत्र, मारो घातुकः तस्य उद्यमं करोतु, तनुतात्। लोकेऽपि यस्तु मलिनचित्तः कुटिलस्वभावश्च स तु परस्य मारणे मारके वा उद्योगं करोति कवरीभारस्यापि तादृग्गुणसम्पन्नत्वेन स्वोचितकार्य्यकारित्वन्नात्रापि मम खेद इति भावः। हे तन्वि! अयं च परिदृश्यमानः रागवान् अरुणरूपवान् अनुरागवांश्च यस्तव विम्बाधरः विम्बकल्पदशनच्छदः, विम्बाधर इत्यत्र मध्यपदलोपी समासः। अन्यमतविधायकस्याभावात्। उक्तं **वामनेन** विम्बाधरादौ वृत्तौ मध्यपदलोपी स्यादिति। तमहं तावत् अज्ञानं विषेकराहित्यमित्यर्थः। तावदिति वाक्यालङ्कारे तनुतां विधत्ताम्। लोकेऽपि हि यस्तु बुद्धिनाशकः राग सहितश्च स तु परं मोहयन्ति अयमपि तादृक् गुणत्वेन स्वानुगुणकार्य्यकरणेनास्माकं मनः क्लिश्यतीति भावः। अत्र विम्बाया मोहकारित्वात्तल्पत्वेनाधारस्यापि मोहकारित्वमवगन्तव्यम्। विम्बाया मोहकारित्वं **वाहरैनोक्तम**

सद्यो बुद्धिहरा विम्बा सद्यो बुद्धिकरा वचः।
सद्यः प्राणहरा बृद्धा सद्यो बलकरं पयः।।इति।।

विम्बशब्दस्य फलपरत्वऽस्त्रीलिङ्गता। ''विम्बोऽस्त्री मण्डले देहे छायायां विम्बिका फले'' इत्यभिधानात् हे तन्वि। सद्वृत्तः सन् दर्शनस्पर्शनयोग्यः स चासौ वृत्तो वर्त्तृलश्च अन्यत्र समीचीनवर्त्तिनः एतादृशोऽपि सन् तवस्तनमण्डलः कुचभारः मम प्राणैः कथं क्रीडति। मदनभीत्या मम देहे निलीयावस्थितान् प्राणान् गृहीत्वा तव बक्षस्थले कथं विहरतीत्यर्थः।

सद्वृत्तस्य परप्राणापहरणस्यायशस्करत्वादितिभावः। किन्तु दुष्टानां कटाक्षादीनां प्राणहानिपर्य्यन्तो व्यापारो जात इति महदेतदाश्चर्य्यमिति भावः। आद्यपादे मर्मभेदनिर्माणे चापनिहितत्वलक्षणपदार्थस्य हेतुत्वप्रतिपादनात् पदार्थहेतुकं काव्यलिङ्गमलङ्कारः। ''हेतुर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतमिति लक्षणात्।'' एवमश्लिष्टपादद्वये कावयलिङ्गसमम्। आद्यपादे भ्रूचाप कटाक्ष विशिख इत्यत्र रूपकं च। ''आरोपविषयं स्यादिति रोहितरूपणः। उपरञ्जकमारोप्यमाणं तद्रूपकमतमिति-

लक्षणात्। द्वितीय तृतीययोश्च श्यामात्मा कुटिलरागवानित्यत्र च श्लेषः, विम्बाधर इत्यत्रोपमाभेदः। चतुर्थकरचणे सद्वृत्त इत्यत्रापि श्लेषः। सतोऽसत्पुरुषकृत्यरूप-विरुद्धकार्य्योत्पत्तेर्विषमालङ्कारः।

विरुद्धकार्य्यस्योत्पत्तिर्यत्रानर्थश्च वा भवेत्।
विरूपघटना चासौ विषमालङ्कृतिस्त्रिधा ।।इति

लक्षणात्। एतेषां यथायोगं संसृष्टिसङ्करौ द्रष्टव्यौ। सङ्करलक्षणं तु,

क्षीरनीर नयाद् यत्र सम्बन्ध स्यात्परस्परम्।
अलंकृतीनामेताषां सङ्कर स उदाहृतः।। इति लक्षणात् ।।२१।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२१।। ध्यानलब्धाया राधायाः पुरः सञ्जातविस्मयः पुनर्विलपति, हे तन्वि कृशाङ्गि! भ्रूचापे भ्रूधनुषि निहित आरोपितः कटाक्षो दृगन्तवीक्षणं तदेव विशिखः बाणो मर्मव्यथां मर्मपीडां निर्मातु करोतु। तथा च चापनिहितबाणस्य मर्मपीडनं योग्यमेव। यद्वा विगता शिखा मर्यादा यस्य इति विशिखो निर्मर्यादः। यदाह, मर्यादायामर्धवृद्धौ शिखा स्यात्केशवेऽपि च। तथा च निमर्यादस्य मर्मपीडनमुचितमेव। कवरीभारोऽपि केशचयोऽपि मारोद्यमं कन्दर्पोद्योगं करोतु। यद्वा मारः मरणम्, भावे धञ्। तदुद्यमं करोतु। कीदृशः ? श्यामात्मा नीलस्वभावः। पुनः किम्भूत ? कुटिलः कुञ्चितः। अन्योऽपि श्यामात्मा निन्दितः कुटिलो वक्राशयः परेषां मारणङ्करोतीत्युचितमेव। अयञ्च विम्बाधरो विम्बप्रायोऽधरः मोहं चित्तक्षोभं तनुतां विस्तारयतु। कीदृशः ? रागवान् लौहित्ययुक्तः। अन्योऽपि रागवान् द्वेषशीलः सम्मोहं परेषां तनुत इत्युचितमेव। सद्वृत्तः सुवर्तुलः तव स्तनमण्डलः मम प्राणैः कथं क्रीडति कथं जीवितापहो भवतीत्यर्थः। न हि सद्वृत्तः उत्तमचरितः परपीडां करोतीति भावः। स्तनमण्डल इत्येकवचनं सामान्याभिप्रायेण। 'चरिते वर्त्तुले वृत्तमि'ति **शाश्वतः** ।।२१।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।२१।। इदानीं श्रीराधाङ्गविलसितान्येव स्मरबाणरूपाणि मां व्यथयन्ति; कामस्तु निमित्तमात्रमेव, तमपि विहाय भावनयाऽग्रस्थितामिव श्रीराधां सम्बोध्याह, भ्रूचाप इति। हे तन्वि कृशाङ्गि, तव भ्रूचापे भ्रूरूपे धनुषि निहितोऽर्पितः कटाक्षविशिखः [1]कटाक्षरूपो बाणो मम मर्मव्यथां मर्मपीडां तावत्प्रथमं निर्मातु करोतु। बाणस्य प्राणापहरणमेवोचितमिति भावः। किञ्च कबरीभारोऽपि वेणीसञ्चयोऽपि कन्दर्पनिवासत्वात् मारोद्यमं [2] वियोगिनां मारणाय [3]मारस्य चोद्यममुपायं मत्प्राणहरणे वा करोतु। तत्र हेतुः श्यामात्मा [4]कुटिलश्च।

योऽन्तर्मलिनः[५] कुटिलश्च भवति [६]सोऽन्य[७]वधाय प्रवर्तत इत्युचितमेवाङ्गव्यथा-जनकत्वात्। किञ्च अयं विम्बाधरो विम्बफलद्युतिरधरोऽपि मोहं मूर्च्छां तनुतां विस्तारयतु। बिम्बायाः बुद्धिहारित्वं प्रसिद्धमेव, सद्यो बुद्धिहरा विम्बा इति। एतदपि युक्तम्। तत्राप्ययं रागवान्। राग आरक्तता उद्वेगो वा तद्वान्। यो रागवान् सः परप्रतारणायाहङ्करेत्येव। किञ्च सद्वृत्तः साधुः वर्तुलः स्तनमण्डलः कुचाग्रो मम प्राणैः कथं किमिति क्रीडति। प्राणनाशं करोति। सद्वृत्तस्य[८] परप्राणपीडनमनुचितमिति। विरोधनामायमलङ्कारः। [९]विशिखस्तोमरे शरे इति **विश्वः** [१०](१०.१०)। श्यामं [११] निन्दितकृष्णयोः इति **धरणि**। आत्मा देहमनोब्रह्म स्वभाव [१२]वृत्तिबुद्धिषु इति विश्वप्रकाशः (७१.११५)। कबरी केश[१३]पाशोऽथ **इत्यमरः** (२.७.९७)।

१.नास्ति-ग. २.विरागिणां-ग. ३.कामस्य-इ.फ.ग.ह. ४.तः ५.पर्यन्तं नास्ति-अ.ब. ६.सोऽपि-अ.ब. ७.वधायैव-ज. ८.प्राणपीडन-ग. ९.तः १०.पर्यन्तं नास्ति-अ.ब. ११.निशित-अ.ब. १२.धृति-**विश्वप्रकाशः**। १३.वशोऽथ **अमरः**।।२१।।

मारो [१] मृत्यौ विषेऽनङ्गे च इति **विश्वः** १००.२१। [२] बिम्बं फलेऽपि बिम्बायाः प्रतिबिम्बे च मण्डले इति च **विश्वः** ८०.२। [३] रागोऽनुरक्तौ मात्सर्ये इति च **विश्वः** १४.९। चरिते वर्तुले वृत्तम् इति **शाश्वतः**

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।२१।। [४]अधुना मनोविषयीकृतां राधां प्रति[५]स्वीयदुःखमाह, भ्रूचाप इति। हे तन्वि कृशाङ्गि, भ्रूचापे भ्रुवावेव चापो धनुस्तत्र निहितोऽर्पितः [६] कटाक्षविशिखः कटाक्षबाणः मर्मव्यथां मर्मपीडां[७]तावन्निर्मातु करोतु। विशिखस्य मर्मव्यथाजनकत्वं युज्यत एवेति भावः। अनु च श्यामात्मा श्यामवर्णः कुटिलो वक्राकारः कबरीभारोऽपि केशसमूहोऽपि मारोद्यमं कामोद्यमं तावत्करोतु। मलिनस्य कुटिलस्य च [८] मारणोद्यमो युज्यत एव। अयञ्च बिम्बाधरः बिम्बोष्ठः मोहं तनुतां[९]विस्तारयताम्। कथम्भूतो [१०] बिम्बाधरः? रागवान् लोहितवर्णः। रागिणो[११]विषयिणो[१२]मोहो ममत्वं युज्यत एव। सद्वृत्तः साधुवर्तुलः स्तनमण्डलः मम प्राणैः कथं क्रीडति? सद्वृत्तस्तु प्राणघातको[१३]न भवति।।२१।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।२१।। राधां प्रत्याह, भ्रूचापेति। हे तन्वि! तव भ्रूवावेव चापः तस्मिन्। द्वयोरेव चापाकृतित्वात्। निहितः सन्धितः कटाक्ष एव विशिखःशरः मर्मसु प्राणपतनसन्धिषु मांसाश्रितेषु व्यथां निर्मातु। मर्मस्य सम्यक्सन्धितशरस्य व्यथाजनकत्वं युक्तमिति

समालङ्कार:। श्यामात्मा मलिनस्वभाव: कुटिल: अर्धचन्द्राकृतित्वात्। कबरीभार: केशपाश: मार: मारणशील: तस्य उद्यमं मारणं करोतु। कुटिलमलि, नान्त:करणस्य मारकत्वं अतियुक्तमिति भाव:। रागवान् आरक्त: अयं पूर्वानुभूतत्वेन सन्निहित: बिम्बोपमान: अधर: तावत्प्रथमं मोहं जनयत्वित्यर्थ:। सद्वृत्त: सम्यग्वर्तुल: स्तनमण्डल: मम प्राणै: कथं क्रीडति। प्राणापहारेण खेलति। सद्वृत्तानां सच्चरितानां प्राणापहारो न युक्त:। विषमालङ्कार: विश्वद्धकार्योत्पत्तिरूप:। अत्र भ्रूयुगस्य चापत्वाय निमित्तकटाक्षविशिखत्वारोपरूपपरम्परितरूपकेणोत्थापित: समालङ्कारोऽङ्गिभावे न सङ्कीर्ण। रागवत्त्वविशेषणस्य प्रीतिरूपाभिप्रायेकत्वात्परिकरालङ्कार:। तेन सङ्कीर्ण: समालङ्कार: मलिनान्त: करणाभिप्रायककौटिल्यं भयकरविशेषणत्वात्परिकर:। तेन सङ्कीर्ण: समालङ्कार:। सद्वृत्तश्च सच्चरिताभिप्राय:। विषमालङ्कार:। चतुर्णां निरपेक्षत्वात्संसृष्टि:।।२१।।

१.मृतो-इ.फ.ग.ह.ज. २.बिम्बं फले बिम्बिकायाम्-वि.प्र. ३.रागो तु-अ. ४.अथ वा-ल. ५.स्वदु:खमाह-क. ६.नास्ति-क. ७.तापं निर्मातु करोतु-क. ८.माराद्यमो-ल.म.मारणोद्यमं-ड. ९.नास्ति-क. १०.नास्ति-क. ११.विषयैषिणो-क. १२.मोहं-ड. १३.न भवतीति-क.ल.म.

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२१।। इदानीं ध्यानशीलां राधां वर्णयन्नाह, **भ्रूचाप** इति। हे तन्वि ! भ्रूचापे निहित: कटाक्षविशिखो मर्मव्यथां निर्मातु करोत्विति नात्रानौचित्यम्। चापारोपितबाणस्य दु:खजनकस्वभावत्वात्। मर्मणि व्यथा मर्मव्यथा। सप्तमीयोगविभागात्समास:। ''पृषत्कबाणविशिखा अजिह्मगखगाशुगा:'' **इत्यमर:**। तथा कबरीभारोऽपि बृहत्त्वाद् भाररूप:। केशवेशोऽपि, ''कबरी केशवेशे स्याद्'' **इत्यमर:**। **मारोद्यममिति**। मारणोद्यमं करोतु। तादृगनुमतिहेतुप्रतिपत्तये कबरीभारस्य विशेषणद्वयम्। किंविध: ? **श्यामात्मेति**। श्यामो नीलवर्ण: आत्मा स्वरूपं यस्य स तथा। कुटिलोऽनृजुश्च श्लेषोक्त्या श्यामात्मा मलिनहृदय: कुटिल: क्रूरश्च। यो हि ईदृशो भवति, स हन्तुमुद्यतो भवत्येव नात्राप्यनौचित्यम्। ''श्यामो मलिनकृष्णयो: काममारणयोर्मार:'' इति। कामो दाम किं च ? ''क्रूर: कुटिलवक्रयो:, आत्मा पुंसि स्वभावे स्याद् प्रयत्नमनसोरपि'' इति **मेदिनी**। उक्तिश्लेषो नामालङ्कारोऽयम्। तथा अयं बिम्बाधर: मोहं विचेतनभावं तावत्तनुतां सर्वथा निस्तारयतु। अत्राप्युक्तिश्लेषेणानुमतिहेतुमभिप्रेत्य बिम्बाधरं विशिनष्टि। किंविध: ? रागवानित्यादि। रागो लौहित्यं ताम्बूलजनितं स्वाभाविकं वा। तद्युक्तं श्लेषोक्त्या रागो मात्सर्यं तद्वान् यो हि मत्सरी भवति सोऽनिष्टदायको भवत्येव।

नात्राप्यनौचित्यम्। ''बिम्बोऽस्त्री मण्डले देहे छायायां बिम्बिकाफले'' इति **कुमुदाकरः**। ''रागोऽनुरक्ते मात्सर्ये क्लेशादौ लोहितेऽपि च'' इति **विश्वः**। अमी कटाक्षविशिखादयो हिंस्रस्वभावाः दुखं जनयन्तीति युक्तम्। तव सद्वृत्तस्तनमण्डलः कथं प्राणैर्मम क्रीडति, मम प्राणैः सह कथं क्रीडति, प्राणान् ग्रहीतुं कथमिच्छति ? एतदनुचितमिति भावः। सद्वृत्तो हि परप्राणापहारी न भवति। सन् प्रशस्तश्चासौ वृत्तो वर्त्तुलश्चेति। ''सन्महत्परमो-कृष्टाः पूज्यमानै'' रिति समासः। श्लेषोक्त्या सदुत्तमं वृत्तं यस्य स सद्वृत्तः। सतामिव वृत्तं यस्येति व्यधिकरणे बहुव्रीहिर्वा। ''वृत्तोऽधीतेऽप्यतीतेऽपि मृतेऽनृते। दृढेऽन्यलिङ्गं क्लीबं तु च्छन्दश्चारित्र्यवृत्तिषु।।'' इति **मेदिनी**। ''सत्प्रशस्ते विद्यमानेऽभ्यहिते साधुसत्ययोः'' इति **कुमुदाकरः**। दृक्कोणवीक्षितस्य कबरीभारस्य बिम्बाधरस्य स्तनमण्डलस्य च ध्यानात् मर्मव्यथां कामोकृतोद्यमं मूर्छां प्राणसन्देहं च यथाक्रममनुभूय श्लेषोक्त्या इदमुक्तमिति तात्पर्यम्।।२१।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।२१।। एवं परोपकारिण्यास्तव मयि निर्दयता न युक्तेत्याह भ्रूचापारोपितवाणो मम मर्मव्यथां करोतु नात्राप्यनौचित्यं चापार्पितवाणस्य दुःखजनकस्वभावत्वात्। वक्रः क्यामरूपः केशवेशोऽपि मारणाय पराक्रमं करोतु मलिनस्य कुटिलात्मनो मारकस्वभावत्वात्। हे तन्वि ! विम्वफलतुल्योऽयमधरः मूर्च्छां तनुतां नात्राप्यनौचित्यं यतोऽयं रागवान् रागी। इदं त्वनुचितं सद्वृत्तः सुवर्तुलः स्तनमण्डलो मम प्राणहरणरूपां क्रीड़ां किमिति करोति सच्चरितस्य तथाचरणमनुचितमिति भावः। ''मारो मृतौ विषेऽनङ्गे इति वृत्ते च वर्त्तुलः'' इति **विश्व**।।२१।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२१।। कन्दर्पं किं कथयामि, विरहव्यथाया राधैव मूलं कारणमिति तां समुद्दिश्य प्राह; 'भ्रूचाप' इति। हे तन्वि! कोमलाङ्गि! अनेन त्वं स्वभावकोमलाऽसि। तव परिकरभूता भ्रूनेत्रादयः कथं क्रूरा जातास्तन्न वेद्मीति ध्वनितम् । तदेव प्रपञ्चयति, असूयासक्तचित्तायास्तव भ्रूचापे ईषच्चलनमात्रेण कामकार्मुकादपि अधिकव्यथाजनके अद्भुतधनुषि निहितः, अलक्षिततया योजितः कटाक्षविशिखः संधातृनैरपेक्ष्येण स्वयमेव कार्यानुकूलयातायातचेष्टाशालिमोहनशोषणादिविविध शक्तियुक् विचित्रबाणः मम मर्मव्यथां करोतु। इति किं वदामि, अपि तु निर्मातु पीडां मूर्त्तिमतीं घटयतु। नैतदनुचितम्। चापनिहितबाणस्य तादृशताऽवश्यकत्वात्। तथा श्यामात्मा अन्तर्मलिनः पक्षे नीलिस्वरूपतयाऽतिरमणीय इत्यर्थः। 'श्यामं मलिनकृष्णयोः' इति धरणिः। 'आत्मा

देहे मनो ब्रह्मे'ति विश्वः। कुटिलः, अकारणतापकारी, पक्षे कुञ्चिततयाऽतिशोभनः। ईदृशः कवरीभारो धम्मिल्लभारोऽपि मारोद्यमं विविधबाधाविधायिस्वाभीप्सितमरणोद्यमं मम करोतु। पक्षे मारस्य मन्मथस्य उद्यमं मत्पराभावोद्यमं करोतु। नीलकुञ्चितकवरी-भारस्य कामोत्पादकत्वात्। 'मारो मृते विषेऽनङ्गे' इति **विश्वः**। नात्रापि अनुचितमिति मन्ये। मलिनात्मनः कुटिलस्वभावस्य तथात्वसम्भवात्। तथाऽयं च बिम्बाधरः पक्वबिम्बसदृशोष्ठः यावदिति वाक्यालङ्कारे मम मोहं मूर्च्छां तनुतां विस्तारयतु। यतोऽयं रागवान्, मात्सर्यवान्। मात्सर्येण युक्तायुक्तविचारमूढः। पक्षे रागो रक्तिमा, अरुणवर्णत्वात् अतिरुचिरः। ''रागोऽनुरक्ते मात्सर्ये क्लेशादौ लोहितादिषु'' इति विश्वः। किन्तु एकस्यैव विषमाचरणेन चिन्तितोऽस्मीत्याह सद्वृत्त इति। सत् साधुः, वृत्तं चरितं यस्य सः। गाढालिङ्गनपीडनेनापि निजौन्नत्यमहत्त्वरक्षणपर इत्यर्थः। पक्षे सुवर्त्तुलः। 'वृत्तं पद्ये चरित्रे च वर्त्तुले चेति' विश्वः। ईदृशः स्तनमण्डलः कथं मम जीवनकारणभूतैः प्राणैः सह क्रीडति। क्रीडां करोति। कदा च गृह्णाति, नात्मीयतां बुद्धिं विधत्ते। क्वचन मुञ्चति, स्वच्छन्दाचरणाय नानुमन्यते। पुनः छिनत्ति, न च द्वैधीभाव गमयति। क्वचित् ज्वलयति, न भस्मसात् करोति। पुनर्मुर्च्छयति, न चानुसन्धानं लुम्पति' इत्यादि विविधचेष्टाभिर्मरणान्तदशापादनेन कुतुकी भवतीत्यर्थः । इदं तु सोढुं न शक्नोमीति भावः। बाणत्वेन निरूपितस्य कटाक्षस्य मर्मघातुकत्वेऽपि तस्याभिमुखपरिहारेण निराकरणीयतामाशंक्यालक्षितमारणप्रयोगनिपुणाभिचारि-कमान्त्रिकत्वेन कवरीभारे निरूपिते तस्यापि प्रतिमन्त्रयन्त्रादिना प्रतिकारो वा स्यादिति मोहकारितया बिम्बाधरो निरूपितः।।२१।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

२१- सशरचापेति; श्रीराधायाः भ्रूयुगलं स्मरधनुवत् तस्मिन्नुपरि शरायमाना तस्यारपाङ्गदृष्टिः मयि निक्षेपणं मा कुरू। येन मम मर्माणि बिद्धं कर्त्तुमीहते। श्रीकृष्णकर्णकेशपाशवक्रत्वात् मारक स्वभावेन प्रसिद्धम्। अर्थात् कुटिलश्रीकृष्णकेशपाशेन हन्तुमपि उद्यता। श्रुतो हि वक्रस्वभावाः केवलमन्यं कष्टाय प्रभवन्ति। त्वद् विम्बाधरस्य अर्थात् रक्तवर्णस्य अधरस्य रागः मां मोहयति। यतो हि रागवान् किमपि किमपि कर्त्तुं शक्तः भवति। परन्तु तव वर्त्तुलाकारं कुचमन्डलं मां क्रीडाव्याजेन मम प्राणान् हर्त्तुमीहते किमर्थं तन्न जानामि। प्रत्युत सञ्चरितस्येवं वृत्तं न दृश्यते। अत्र विरोधालंकारः। शार्दूलविक्रीडितं छन्दः।।२१।।

**२२-तानि स्पर्शसुखानि ते च तरला: स्निग्धा दृशोर्विभ्रमास्**
**तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दीगिरां वक्रिमा।**
**सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं**
**तस्यां लग्नसमाधि हन्त विरहव्याधि: कथं वर्धते ।।२२।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२२।।श्रीकृष्णस्य मनोगतमाह। तस्यां यदि मनो लग्नसमाधि: कथं तर्हि विरहव्याधि: वर्त्तते। हन्तेति स्वगतसम्बोधने युक्तयोरेव विरह: स्यादत्र तु मन: संयोगो वर्त्ततेऽभिप्राय: स्यादेतत् मन: स योगेऽपि चक्षुरादीनां पञ्चेन्द्रियाणां संयोगाभावाद्विरह उपयुक्त इत्याह। ''रूपं गन्धो रस स्पर्शगन्धाश्च विषया अमी''। इत्युक्तप्रकारेण विषयासङ्गे पञ्चेन्द्रियसुखेऽनुभूतानीत्यर्थ:। कोऽसौ प्रज्वर इत्याह। तानीत्यादि:। तानि स्पर्शसुखानि पूर्व मनुभूतानीत्यर्थ:। एतेन त्वगिन्द्रियनिवृत्ति:। ते च तरला: स्निग्धा: दृशो: विभ्रमा ये पूर्व मनुभूता इत्यर्थ:। एतेन च क्षुरिन्द्रियनिवृत्ति:। तद्वक्त्राम्बजसौरभं यच्च पूर्व मनुभूतमित्यर्थ:। एतेन घ्राणेन्द्रियनिवृत्ति:। स च सुधास्यन्दी गिरां वक्रिमा य: पूर्वमनुभूत इत्यर्थ:। एतेन श्रवणेन्द्रियनिवृत्ति: सा विम्बाधरमाधुरी या पूर्व मनुभूतेत्यर्थ:। एतेन रसनेन्द्रियनिवृत्ति:। ध्यानत: प्रत्यक्षीकृत्य कान्तया विरहिणो रमन्त इत्यभिप्राय:। विरहव्याधि रिति विरहो व्याधिरेव, विरहेण व्याधिरिति वा विग्रह:।।२२।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२२।।इदानीं वक्रोक्त्या स्वगतत्वेन विरहवामतां वदतितानीति। 'हन्त' इति खेदे। विषयासङ्गेऽपि मानसं चेत्तस्यां लग्नसमाधि तर्हि विरहव्याधि: कथं वर्धते ? समाधौ व्याधेरनुद्भवात्, प्रियासङ्गे विरहानुपपत्तेश्च। इतीति किम् ? तानि स्पर्शसुखानि सन्ति। अप्रत्यक्षायामपि तस्यां ध्यानवशादनुभूयमानानीव; एवं सर्वत्र। अपि च, तरलाश्चञ्चला: स्निग्धा: प्रेमार्द्रा दृशोर्विभ्रमा विलासास्त एव; वक्त्राम्बुजसौरभं तदेव; अपि च, सुधास्यन्द्यमृतस्रावी गिरां वक्रिमा वैदग्ध्यविशेष: स एव; अपि च, बिम्बाधरमाधुरी बिम्बाधरसौकुमार्यं तदेव; यत्पूर्वानुभूतं तदेवेति विषयलाभेऽपि विरहो वर्धत इति तस्य वामता। शार्दूलविक्रीडितं छन्द:। समुच्चयोऽलंकार:। रसादि प्रसिद्धम्।।२२।।

## (३) जगद्धरकृत- सारदीपिका

।।२२।।तानीति तान्येव स्पर्शसुखानि यानि पुरायिकासङ्गमानुभूतानि एतेन त्वगिन्द्रिय विषय लाभ: ते च तरलाश्चञ्चला: स्निग्धा: प्रेमान्विता: दृशो श्चक्षुषोर्विभ्रमा विलासा:।

एतेन रूपं तदेव वक्त्राम्बुज सौरभं वदनकमल सौरभित्वं एतेन गन्धत्वं स च सुधास्यन्दी अमृतद्रवयुक्त: गिरां वचसाम्य: वक्त्रिमावक्त्रात्वं एतेन शब्द: सा च बिम्बाधरमधुरी विम्बसदृशौष्ठमाधुर्यं तदेव एतेन रस: इत्येवं प्रकारेण विषयासङ्गे पि तस्या: रूपरसस्पर्शादीनां सानिध्येऽपि मम मानसं मनस्तस्यां राधायां लग्नसमा विप्राप्तस्थानं चेद्यदि तदाहन्त इति खेदं विरह: व्याधि: व्यथा कथं वर्त्तते ध्यानयुक्तस्य योगिनोव्याधिनाशात्।।२२।।

## (४) शंकरमिश्रकृत-रसमञ्जरी (टीकानास्ति)

।।२२।। ननु तस्यापि नापराधो न वा स्मरस्य, किं तु तदङ्गस्पर्शादिविषयालाभाच्चालं त्वच्चेतस्त्वां दु:खीकरोतीति भावनया पुर:स्थितां मत्वाहतानीति। स्पर्शसुखानि तदङ्गस्पर्शजन्यानि सुखानि इदानीमनु-भूयमानानि तान्येव पूर्वानुभूतान्येव। एतेन त्वगिन्द्रियविषयलाभ: कथित:। दृशोर्नेत्रयोस्तरलाश्चञ्चला: स्निग्धा: स्नेहगर्भा विभ्रमा विलासास्त एव विषया:। अनेन चक्षुर्विषयलाभ उक्त:। तस्या वक्राम्बुजसौरभं तस्यामुखपद्मसौरभं तदेव। अनेन घ्राणस्य विषयप्रा तदेवेति विषयलाभेऽपि विरहो वर्धत इति तस्य वामता। शार्दूलविक्रीडितं छन्द:। समुच्चयोऽलंकार:। रसादि प्रसिद्धम्।।२२।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।२२।।अथ विरहातुर: सन् प्रकारान्तरेणापि प्रलपति। तानीति। सहजसम्भोगकाले यानि स्पर्शसुखानि आलिङ्गनसौख्यावहानि तत्रेदानीमपि तान्येव: भावनयाऽनुभूयन्त इति शेष:। तरलस्निग्धाश्चञ्चलनिर्मलाश्च ये दृशोर्विभ्रमा: प्रत्यक्षसम्भोगकालीनापाङ्ग-विलासा: इदानीमपि ते चेत एव चकारोऽवधारणार्थ:। भावनयानुभूयन्ते यद्वक्त्राम्भुज सौरभं सम्भोगकालिनमुखकमलसौरभं तदेतदिदानीं भावनयानुभूयते। सुधास्यन्दी अमृतस्त्रवणशीलो या गिरां वक्रिमा सारस्यापादकवाक्यादेवं च स एवात्रापि चकारोऽबधारणार्थ:, इदानीमप्यनुभूयते। या विम्बाधरमाधुरी प्रत्यक्षास्वादकालीनविम्ब-कल्पाधरमाधुर्य्यं अधुना भावनया स्वाद्यते एवं विरहकालेऽपि भावनया वाहेन्द्रियाणां साफल्यं सम्पादयति। तदनुग्राहकमानसस्य विशेषत: साफल्यं सम्पादयति। मानसं चेति। मनस्तु तस्यां लग्न आसक्त: समाधि: समाधानं यस्य तत्तादृशं विषयान्तरं परित्यज्य यदेकायत्तं विरहतापविवर्त्तके सर्वेन्द्रियसम्बन्धे सत्यपि अथवा विषयेन राधाविषयेन असङ्गे पूर्वोक्तसम्बन्धे सत्यपि विरहव्याधि: विरहेभ्यो व्याधि: विरहजनितव्याधिर्वा कथं वर्त्तते, हन्त विरहव्याधिनिवर्त्तक: विषयासङ्गरूपौषधि-सेवायामपि तद्व्याधिनिवर्त्तनं महाकष्टमित्यर्थ:।

श्लोकस्य व्याख्यान्तरम्। स्पर्शसुखानि तान्येव तदानींन्तनान्येव प्रत्यक्षकालीनान्येव नेदानींन्तनानीत्यर्थः। एवमन्यत्रापि योजनीयम्, इति पूर्वोक्तप्रकारेण विषयैः स्पर्शादिभिः राधाया वा। असङ्गे सङ्गाभावे विरहव्याधिः कथं वर्त्तते। हन्त लोके हि विषयभागाधिक्यवशाद्व्याधिर्भवते। इदानीं तादृशविषयभोगाभावेऽपि विरहव्याधिर्वर्त्तत इति महदेतत्कष्टमित्याश्चर्य्यं चेत्यर्थः। ननु मनःसङ्गाभावकृतोऽयं व्याधिरित्याशङ्करमानसं चेतः मनस्तु तस्यां लग्नसमाधितदेकायत्तमेवमपि विरहव्याधिर्वर्त्तत इति महदेतत्कष्टमित्यर्थः। सुधास्यन्दीत्यत्र ''सुप्यजाताविति णिनिः'' (३-२-७८)। वक्रिमेत्यत्र ''पृथ्वादितीमन्'' (५-१-१२२)। विम्बाधरेत्यत्र मध्यपदलोपप्रकारो व्याख्यात एव माधुरीत्यत्र ब्राह्मणादित्वाद्घञ् षत्वाङ्क्यप्। विरहनिवृत्तिसामग्री सत्यामपि तदनिवृत्तेर्विशेषोक्तिीलङ्कारः।।२२।।

### (६) शुक्लध्वजनृपतिकृत-सारवती

।।२२।। ममायं हृदयखेदो न दृष्टचरः तदन्यदेव किञ्चिदत्र बीजमिति मनसि कृत्वाह, तस्यां राधायां मानसम् अर्थात् मम लग्नसमाधि प्राप्तध्यानञ्चेत्यादि। अतएव तानि स्पर्शसुखानि इत्यादि स्मरणो क्रमेण विषयासङ्गे सत्यपि। हन्त खेदे। विरहव्याधिः कथं वर्तते कथं तिष्ठतीत्यर्थः। तथा च विषयसान्निध्यनिबन्धनो यदि विशेषः खेदः स्यात् तदा तत्सान्निध्यशमित एव स्यादित्यन्यदेवात्र बीजमिति भावः। यद्वा तानि पूर्वभूतान्येव स्पर्शशुखानि तरलाः चञ्चलाः स्निग्धाः ते पूर्वानुभूताःदृशश्चक्षुषोः विभ्रमाः पूर्वानुभूतं वक्त्राम्बुजसौरभम्। स च पुर्वादनंनुभूत एव सुधायाः पीयूषस्य स्यन्दनं क्षरणं यत्र एतादृशः गिरां वक्रिमा वचनभङ्गिः सा। पूर्वानुभूता विम्बाधरमाधुरी विम्बवदधरस्य मधुरता इत्यनेन रमणप्रकारेण स्पर्शरूपगन्धशब्दरसादिरूपाणां पञ्चविषयाणामसङ्गेऽपि निरन्तराननुभवेऽपि चेन्मानसम् अर्थान्मम तस्यां राधायां लग्नसमाधिः प्राप्तध्यानं हन्त कान्तविरहव्याधिः विश्लेषरूपव्याधिः तदा कथं वर्तते तिष्ठतीत्यर्थः। न हि यस्य ध्यानेन विषयासङ्गोऽपि न बाधकः तं व्याधिर्बाधत इत्यभिप्रायः।।२२।।

### (७) वनमालि भट्टकृत-सञ्जीवनी

।।२२।। इदानीं [१] तस्याः स्मरस्य च [२] कोऽपराधः? तदङ्गसङ्गाभावान्मे चेतसि दुःखमिति भावनयाऽग्रे स्थितां दृष्ट्वा तामाहतानीति स्पर्शसुखानि [३]तदङ्गस्पर्शसम्भवानि [४] सुखानि तानि पूर्वमनुभूतान्येव। एतेन त्वगिन्द्रियसुखमुक्तम्। किञ्च दृशोश्चक्षुषोर्विभ्रमाः विलासाः तरलाः चञ्चलाः स्निग्धा [५] प्रेमगर्भितास्त एव मया नायिकायामनुभूताः

पूर्वं ये। एतेन [६] चक्षुरिन्द्रियसुखमुक्तम्। किञ्च [७] तद्वक्त्राम्बुजसौरभं मुखपद्मामृतसौगन्ध्यं तदेव यत्पूर्वमनुभूतम्। एतेन घ्राणलाभ उक्त:। किञ्च गिरां वचसां[८]वक्रिमा वक्रभाव: स एव। कीदृश: ? सुधास्यन्दी अमृत इव युक्त:। एतेन नायिकाया:शब्द[९]माधुर्यमुक्तम्। किञ्च[१०] सा बिम्बाधरमाधुरी बिम्बसदृशस्यौष्ठस्य [११] माधुरी मधुरता [१२] सैव या पूर्वमनुभूता तस्या:। [१] अनेन लावण्यमुक्तम्। इत्येवं प्रकारेण स्पर्शादिपञ्चानां विषयासङ्गेऽपि सान्निध्येऽपि तस्यां श्रीराधायां मानसं [२] मम मन: लग्नसमाधि प्राप्तैकाग्रयं[३]चेत्तस्याम्। [४] हन्तेति खेदे ; महत्कष्टे वा। विरहव्याधि [५] र्वियोगराग: कथं किमिति वर्धते। भ्रमश्चायमलङ्कार:। [६] रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी **इत्यमर:** (१.५.७)।।२२।।

१.न तस्या:-ह.ग.फ. २.कोऽप्यपराध:-अ.ब.फ.ग.ह.ज. ३.स्पर्शसम्भवानि-अ.ब. ४.नास्ति-इ.फ.ग.ह.ज. ५.प्रेमगर्विता-अ.ब. ६.त्वगिन्द्रियसुखमुक्तम-अ.ब.चक्षुर्विषयसुखमप्युक्तम्-इ.फ.ग.ह.चक्षुर्विषये सुखमप्युक्तम्-ज. ७.तस्या: वक्त्राम्बुज-इ.फ.ग.ह.ज. ८.वक्रीभाव:-इ.फ.ग.ह.ज. ९.माधुर्यादिकम्-ग. १०.नास्ति-अ.ब. १२.मयैव पूर्व-अ.ब.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।२२।। तानीति। तान्येव स्पर्शसुखानि यानि पुरा [७] नायिकासङ्गमेऽनुभूतानि ते च तरला: चञ्चला: स्निग्धा: प्रेमान्विता: दृशोश्चक्षुषो र्विभ्रमा विलासा:। एतेन रूपम्। तदेव वक्त्राम्बुजसौरभं वदनकमलसुरभित्वम्। एतेन[८]गन्धवत्त्वम्। स च सुधारसस्यन्दी अमृतद्रवयुक्त: गिरां वचसां वक्रिमा वक्रत्वम्। एतेन शब्द:। सा च बिम्बाधरमाधुरी [९] बिम्बवत् ओष्ठमाधुर्यं तदेव। एतेन रस:। इति विषयासङ्गेऽपि तस्या: [१०] रूपगन्धशब्दस्पर्शादीनां पञ्चानां सान्निध्येऽपि मम मानसं मन: तस्यां राधायां लग्नसमाधि प्राप्तध्यानं[११]वर्तते तथापि [१२]हन्त खेदे, विरहव्याधि: कथं [१३]वर्धते। ध्यानयुक्तस्य योगिनो व्याधिनाशात्।।२२।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।२२।। तानीति। स्पर्शस्य आलिङ्गनकालिकस्य सुखानि शर्माणि। तच्छब्द: सर्वत्रानुभूतार्थक इति न मच्छब्दाकाङ्क्षा। ते च अनुभूता: तरला: चञ्चला: स्निग्धा: प्रीतियुक्ता: दृश: विभ्रमा: प्रेक्षणरूपविलासा:। तत् वक्त्राम्बुजस्य सौरभं परिमल:; पद्मिनीत्वात्सहजसुगन्ध:। सुधास्यन्दी माधुर्यरूपामृतस्रग्वी गिरां वाचां वक्रिमा व्यङ्ग्याभिप्रायवचनानीत्यर्थ:। सा बिम्बाधरस्य माधुरी मिष्टत्वम्। [१]मुखैकदेशत्वेऽपि पृथगुपादानं अधरस्य रदाभ्यां खण्डनव्यापारोप योगार्थम्। मुखस्य चुम्बनाश्रययोग्यत्वा-त्पृथगानन्दभेदात्पृथगुक्त: अधरबिम्ब इति। उक्तप्रकारेण विषयस्य आसङ्गेऽपि[७२]

अत्यन्तमानससम्बन्धेऽपि तस्यां राधायां मानसं लग्नसमाधि। तदितरवृत्तिनिरोधेन तदैकाग्रवृत्तिरूपसम्प्रज्ञानसमाधिनच्चेत् विरहव्याधिः कथं वर्तते। हन्तेत्याश्चर्यम्। तदीयालिङ्गनमनस्सम्बन्धवियोगः कथमिति भावः। तच्छब्दग्रहणेन स्मृतिर्व्यभिचार्युपात्तः श्रीगीतगोविन्दम् टीकासमेतम्।।२२।।

१.एतेन लावण्यमाधुर्यमुक्तम्-इ.फ.ग.ह.ज.२.नास्ति-अ.ब.३.चेत्तथापि-इ.फ.ग.ह.ज. ४.हन्त खेदे-इ.५.वियोगः ग.६.नास्त्ययं नैघण्टुकोद्धारः-अ.ब.रूपरसगन्धस्पर्शशब्दाश्च विषया इत्यमर-इ.फ.ग.ह.ज.७.नायिकासङ्गे-इ.फ.ग.ह.ज.८.गन्धः-क.९.बिम्बोष्ठमादुरी-क.१०.रूपरसस्पर्शादीनां-क.ल.म.११.नास्ति-ड.१२.हन्त इति खेदे-क.१३.वर्तते-ड.क.ल.म.

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२२।। तानीत्यादि। मम मानसं तस्यां राधिकायां चेत् यदि लग्नसमाधिः तर्हि विरहव्याधिः कथं वर्तते? हन्त विषादे, लग्नसमाधिर्ध्यानं यस्य मनसस्तत्। ''समाधिर्नियमे ध्याने निर्वाके च समर्थने'' इति **विश्वः**। विरह एव व्याधिः पीडाजनकत्वात्। अनेनाष्टमावस्था सूचिता। कथंशब्दः कारणान्वेषणपरः। किं पुनरत्र कारणं भविष्यति, येन समाधिदशायामपि विरहव्याधिर्वर्तते इति तात्पर्यम्। तथा चोक्तम्, ''निरालम्बे पदे प्राप्ते चित्ते तल्लयतां गते। क्रियाः सर्वास्ततास्तेनु समाधिस्त्रिविधो नृणाम्।।'' इति। आध्यात्मिकादिना त्रैविध्यम्। तत्र आध्यात्मिकस्तापः व्याधिरित्यर्थः। विरहेति । राधिकायाः वियोगः, स च न सम्भवति। मनस्तस्यां लग्नसमाधित्वेन संसर्गात्। ननु जीवस्य ब्रह्मणा समाधानं समाधिपदार्थः। प्रकृते तु राधिकया समाधानमित्यनुचितमत्र समाधिपदमिति तुच्छमेतत्। अन्येनापि समाधानं समाधिरित्यभ्युपगम्यते। यदुक्तम्, ''समाधिः समतावस्था जीवात्मपरमात्मनोः। ब्रह्मण्येव स्थितिर्या सा समाधिः प्रत्यगात्मनः।'' इति। ''एवमेव हि सर्वत्र यत्प्रत्यक्षस्तु यो नरः। तदात्मा सोऽपि तत्रैव समाधिः समवाप्नुयाद्।।'' इति। अस्तु तावन्मनःसंयोगो विषयासङ्गेन विना विरह उपयुक्त एवेत्याशङ्क्याह। कस्मिन् सति इति। एवंप्रकारेण विषयासङ्गे सति न केवलं मनो लग्नसमाधिः वर्तते। तथाहि, ''विषयास्तावदिन्द्रियार्थाः रूपादयः, रूप-शब्द-रस-स्पर्श-गन्धाश्च विषया अमी'' इति। तेषु आसङ्गः आसक्तिः पञ्चेन्द्रियसुखानुभव इति यावत्। तस्मिन् सत्यपि समाधिरिति अपेः विरोधप्रतीतिरिति पूर्वपक्षः। यदुक्तं **योगार्णवे**, ''न गन्धं न रसं न स्पर्शं न च निस्वनम्। आत्मानं न परं वेत्ति योगयुक्तसमाधिना।।'' इति। समाधानं तु विषयेषु राधिकासम्बन्धि श्वास जायमानं मानसं तस्यां लग्नसमाधिरिति न कश्चिद् विरोधः। ''विषयाः स्यादिन्द्रियार्थे देशे

जनपदेऽपि च। गोचरे च प्रबन्धे च यो यस्य ज्ञातः स तस्य च।।" इति। कथं पुनः विषयासङ्ग इत्याशङ्क्याह, तानीत्यादि। तानि स्पर्शसुखानि यानि प्रियसङ्गमे पूर्वमनुभूतानि तान्येवाधुनाप्यनुभूयन्ते मयेत्यर्थः। त्वगिन्द्रियो ग्राह्यगुणविशेषः स्पर्शः, तदनुभवजनितानि सुखानीति। त्वगिन्द्रियविषयासङ्गः, तेन तरलस्निग्धाः तरलाश्च स्निग्धाश्चेति प्रियदर्शनात् स्निग्धत्वम्। दृशोर्विभ्रमाः ये पूर्वमनुभूता इत्यर्थः। एतेन चक्षुरिन्द्रियस्य विषयासङ्ग उक्तः। तद्वक्त्राम्बुजसौरभं यच्च पूर्वमनुभूतमित्यर्थः। अनेन घ्राणेन्द्रियस्य विषयासङ्ग उक्तः। वक्त्राम्बुजसौरभमिति ष्ट्रण् प्रत्ययान्तेनापि पद्मासनकौशलादिवत् षष्ठीसमासः। स च सुधास्यन्दी गिरां वक्रिमा यः पूर्वमनुभूत इत्यर्थः। अनेन श्रवणेन्द्रियस्य विषयासङ्गः, सा बिम्बाधरमाधुरी बिम्बाधरस्य माधुर्यं तदेव माधुरी गुणवचनब्राह्मणादिभ्यश्चेति ष्यञ्। माधुर्यमेव माधुरीति स्वार्थे ङीप्। हलस्तद्धितस्येति यकारलोपः या पूर्वानुभूतेत्यर्थः। एतेन रसनेन्द्रियस्य विषयासङ्गः कथितः। लग्नसमाधिना चित्तेन इन्द्रियार्थाः सर्वेऽपि प्रत्यक्षमिव अनुभूयन्ते वियोगिभिरिति समुदितार्थः।।२२।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।२२।। अतस्तद्विलासानुभवस्फूर्त्त्याह, तानीति। तस्यां यदि मनो लग्नसमाधि तर्हि विरहव्याधिः कथं वर्द्धते ? हन्तेति खेदे। वियुक्तयोरेव विरहः स्यादत्र मनःसंयोगो वर्त्तते इत्यभिप्रायः। सत्यपि वनःसंयोगे चक्षुरादीनां पञ्चेन्द्रियाणां संयोगाभावात् विरहव्याधिर्युक्त इत्याह इत्युक्तप्रकारेण विषयासङ्गेऽपि पञ्चेन्द्रियसुखेऽनुभूयमानेऽपीत्यर्थः। कोऽसौ प्रकार इत्याह तानि स्पर्शसुखानि पूर्वानुभूतानीत्यर्थः। अनेन त्वगिन्द्रियसुखं, तथा तरलाः स्निग्धाश्च दृशोर्विलासाः अनेन चक्षुरिन्द्रियस्य, तद्वक्त्राम्बुजसौरभमिति प्राणस्य, तथा स च सुधास्यन्दी गिरां वक्रिमेति श्रवणयोः, तथैव च सा विम्बाधरमाधुरीति रसनाया इति।।२२।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२२।। एवं कटाक्षादिगाढचिन्तनाध्याससमुदितस्मृतिविशेषेण चेतसा तां साक्षादनुभवन् राधाया अत्र को दोषः यदसौ मया सङ्गता, 'तथापि विरहदुःखं नापगच्छति' इत्याह तानीति मानसं मम चेतः तस्यां राधायां चेत् यदि लग्नसमाधि, प्राप्तसाक्षात्कारानन्दैकरसं जातं तदा विरहव्याधिः, कार्श्य-पाण्डिम-दाह श्वसिताद्यापादको वियोगरोगः कथं वर्त्तते, तिष्ठति। वर्धत इति क्वचित् पाठः। तदा प्रतिक्षणविलक्षणविविधव्यथापादको भवतीत्यर्थः। वियुक्तयोस्तु विरहः स्यादेव। अत्र तु 'न तनुसङ्गम एव सुसङ्गमः हृदयसङ्गम एव सुसङ्गम' इति मनसा सुसंयोगेऽपि कथमस्तीति भावः।

ननु स्थितेऽपि मन: संयोगे बहिरिन्द्रियाणामसंयोगे विरह: स्यादेव इति चेत् तत्राह; तानीत्यादिना। यानि पूर्वानुभूतानि राधास्पर्शसुखानि सुचारुकपोलचिबुकस्तन-जघनचरणाद्यवयवानां मकरिकाचित्रलिखनाङ्गरागादिरचनयावकरञ्जनचुम्बना-लिङ्गनादिसमयजायमानानि त्वगिन्द्रियानन्द जनकान्यासन् तानि सम्प्रति तथैवानुभूयन्ते इति भाव:। ये च पूर्वमनुभूता राधाया दृशोर्विभ्रमा नेत्रयोर्विलासा:। किम्भूतास्तरला: स्निग्धाश्च। न खलु ममेदृशं चापलं सख्यो जानन्तीति तत्समयोचितभावाभिव्यञ्जक-विविधभङ्गितरङ्गितै: प्रतिदिशं यातायात तया चञ्चला मत्कृतविचित्रवेशादि-समुदितसन्तोषभरेण स्निग्धा: प्रेमगर्भितास्ते च तथैवाधुनाप्यनुभूयन्ते। चकारोऽवधारणार्थ: इति। चक्षुरिद्रियसंयोग: तथा यच्च वक्त्राम्बुजसौरभं मुखकमलसौगन्ध्यं पूर्वं मया रहस्यकथनव्याजेन सलालसं पुन: पुनराघ्राणेन घ्राणसाफल्यं कृतं तदिदानीमपि तथैवानुभूयते। तथा तत्कालीन: गिरां वक्रिमा, धूर्त्त! किं कथयसि वारं वारमिति मुखं तिरयन्ती या खलु बुद्ध्येत, त्वद्वचनार्थं तामेव कथयेत्यादि कर्णामृतस्रावी यो व्यंग्योक्तिक्रम: पूर्वं श्रुत:, सोऽपि अधुना एव तथा श्रूयते। तथा बिम्बाधरमाधुरी सुपक्विमबिम्बानुकरणधुरिणाधरसम्बन्धिनी, विशिष्य वक्तुमशक्याऽनुभवैकवेद्या माधुरी, मुकुरे सम्भोगचिह्नदर्शनसक्तायास्तस्या: निभृतमागतेन मया या सरसमास्वादिता, रसनालाभधन्यताधायिका अभूत् सा अधुनापि तथा स्वाद्यते, इति भाव:। इत्युक्तप्रकारेण विषयै: आसमन्तात् सङ्गेऽपि त्वगिन्द्रियादीनां स्पर्शादिविषया सङ्गेऽपि विशेषेण सिन्वन्ति बध्नन्तीति विषयास्तै सुखेऽपि अनुभूयमानेऽपीत्यर्थ:। न हि बहिरन्तरिन्द्रियाणां तदैकतानत्वे विरह: सम्भवति। नापि समाध्यवस्थायां व्याधेरुद्भव:। नितरां तस्य वृद्धिरिति हन्त महत् कष्टमाश्चर्यं च। अत्र विभावनाविशेषोक्त्याक्षेपसं सृष्टोन्माद-विबोधभावसाङ्कर्यं सूचितम।।२२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

२२- तानि स्पर्शसुखानीति; विरह एव व्याधि:। हन्त: खेदे विरिहव्याधिवर्द्धनं कथमत्र श्रीराधाया: विरहजन्यव्याधि: वर्णितो विषय:। अथ च श्रीराधां स्थूलतया न प्राप्य तस्या: स्पर्शसुखं अर्थात् शरीरालिङ्गनादिपरामर्शेन सुखानुभूति:। तस्या: स्निग्धा दृष्टिरपि तरला चञ्चला दृष्ट्याकर्षणं मनो रञ्जयति।। तस्या: मुखकमलस्य सुरभिं सुवासं वा स्मारयति। तदनु तस्या: प्रगल्भवैदग्ध्यविचित्रवाक्पटुतादिवागिन्द्रियविषयभोगेन शब्दस्पर्शरूपरसगन्ध-पञ्चतन्मात्रानुकूल्येन त्वगेन्द्रियं, दर्शनेन्द्रियं, घ्राणेन्द्रियं, रसनेन्द्रियं तथा श्रवणेन्द्रियं ध्यानबलेन सुखं यत् विम्बफलमिव अधरस्य मधुरिमामास्वाद्य मनसि यद्यपि

तस्याभेदानुभव: हृदि ध्यानवलेन समाधिदशा प्राप्नोति तथापि अहो विवशता किमर्थं मां ग्रसति? फलत: लग्नसमाधिकोऽपि मम विरहव्याधि: वर्द्धते इति विरोधाभास:। श्रीराधाप्राणमयेन चित्तवृत्तौ पुन: प्राप्तेऽपि समाधिदशायां कुत: दु:खम्? अत्र वक्रिमा वक्रोक्तिरिति वदति पूजारीपण्डित:।।२२।।

**२३-भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि**
**बाणा: गुण: श्रवणपालिरिति स्मरेण।**
**तस्यामनङ्गजयजङ्गमदेवतायाम्**
**अस्त्राणि निर्जितजगन्ति किमर्पितानि ।।२३।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२३।। भ्रूपल्लवमित्यादि इत्यनेन प्रकारेण तस्यां राधायां स्मरणास्त्राणि किमर्पितानि इति मन्ये, कथमस्त्राणि तत्रापि तानि इत्याह। भ्रूपल्लवं धनुरित्यादि। अपाङ्गतरङ्गितानीति कटाक्ष इत्यर्थ:। वाणा: श्रवणपालिरिति श्रुत्यधोभाग: पालित:। गुणा: ''वेधित श्रुत्यधोभागे पालिरस्त्यतङ्कपंक्तिषु'' इति **विश्व**:। कथं तस्यामेवास्त्राणि अर्पितानीत्याह। अनङ्गस्य जयजङ्गम देवतायामिति जङ्गमेत्युक्तम्।

इति श्रीकविराजश्रीनारायणदासकृतायां श्रीगीतगोविन्दटीकायां सर्वाङ्गसुन्दर्य्यां मुग्धमधुसूदनो नाम तृतीयसर्गविवरणम्।।२३।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२३।। इदानीं राधायामेव स्मरशरावलित्वमारोपयन्नाह, भ्रूपल्लवमिति। स्मरेण तस्यां इति अस्त्राण्यर्पितानि। किं भूतानि? निर्जितजगन्ति। निर्जितानि जगन्ति यैस्तानि। कि भूतायां तस्याम्? अनङ्गजय-जङ्गमदेवतायाम्। अनङ्गस्य जयाय जङ्गमदेवतेव तस्याम्। इतीति किम्? भ्रुपल्लवं धनु:। अपाङ्गतरङ्गितानि कटाक्षा बाणा:। 'अपाङ्गतरङ्गित' शब्देन कटाक्ष उच्यते। तथा चोक्तम्, 'यद्गतागतविश्रन्तिवैचित्र्येण निवर्तनम्। तारकाया: कलाभिज्ञास्तं कटाक्षं प्रचक्षते।।' इति। श्रवणपालि: गुण इति। अत्र 'अस्त्र' शब्देनास्त्रविद्यासाधनस्यो, पकरणान्युच्यन्ते। भ्रुपल्लवं धनुरित्यत्र रूपकोत्प्रेक्षे अलंकृती।। यथा, 'मुखपङकजरङ्गेऽस्मिन्भ्रूलता नर्तकी नवा। लीलानृत्यं करोतीति रम्यं रूपकरूपकम्।।' अत्र क्वापि क्वाप्यलंकारद्वयत्रयसद्भावेऽपि संसृष्टिसंकरनिरूपणं ग्रन्थविस्तरत्रस्तचित्ततया न क्रियते। तदगतिस्तु पुर्वपदे दर्शितप्रायेति।।२३।।

## (३) जगद्धरकृत- सारदीपिका

।।२३।। ननु तत्कटाक्षादि चिन्तनादेव तव दुःखं भवति मदनस्य तर्हि कोपराध स्तत्राह, भ्रूपल्लवमिति इतीत्थं प्रकारेण स्मरेण कामेनतस्यां राधायाम् अस्त्राणि आर्पितानि स्थापितानि किं तर्कयामि किं वितर्केनन्वन्यत्रेत्याह निर्जितानि जगन्ति यैस्तानि तैरेवास्त्रैर्जगत्रयोजित्वा तत्र स्थापितानीतिभावः। तर्ह्यन्यत्र किं स्थापितानीत्याह अनङ्गस्य कन्दर्पस्य जय त्रैलोक्यविजये जङ्गमदेवतायां गमनशीलदेवता रूपायाम् इतीति किं भ्रूपलवं भ्रूलता तदेवनु अपाङ्गतरङ्गिता निकटाक्षा निरीक्षणानि एव बाणाः श्रवणपालिः कर्णप्रदेश एवगुणः प्रत्यञ्चा।।२३।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।२३।। ननु तनुकटाक्षादिस्मरणादेस्तवैवं दुःखं भवति, कामस्य तत्र कोऽपराध इत्यत आह, भ्रुपल्लवमिति। किमित्याक्षेपे। तस्या राधायां स्मरेण कामेनास्त्राण्यर्पितानीति तर्कयामि। नन्वस्त्राणि वीरेण हस्ते स्थापयितुमर्पितानि, न त्वन्यत्रेत्यत अह, निर्जितानि जगन्ति यैस्तानि। तथा च तैरेवास्त्रैर्जगत्रयं जित्वा तत्र स्थापितानीति भावः। तर्ह्यन्यत्र किमिति न स्थापितानीत्यत आह, अनङ्गेति। अनङ्गस्य कामस्य जङ्गमदेवतायां गमनशीलदेवतायाम्। तथ च त्वयैव त्रैलोक्यजयायास्त्राणि दत्तानि। अतो जातोप्रयोजनानि तत्रैव स्थापितानीति भावः। देवताया यदस्त्रं दीयते तत्केनापि न प्रतिहन्तुं शक्यत इत्यपि ध्वनितम्। कानि तान्यस्त्राणीत्यत आह, भ्रूपल्लवमिति। भ्रूपल्लवं तदेव धनुः, अपाङ्गतरङ्गितानि कटाक्षस्य गतागतानि बाणाः, श्रवणपालिः कर्णलताप्रान्ता एव गुणो मौर्वी। नीलस्निग्धत्वात्भ्रुवः पल्लवत्वेन निरूपणम्। वक्रत्वाच्च धनुस्त्वेन निरूपणम्। अपाङगस्य परमभेदकत्वाद्बाणत्वेन निरूपणम्। श्रवणपाल्याश्च दार्घत्वान्मौर्वीत्वेन निरूपणम्। 'अपङ्गऽप्यङ्गहीने स्यान्नेत्रान्ते नीलकेऽपि च' इति **विश्व** पांलिः कर्णतलाग्रे स्यात् सक्ता वंश प्रभेदयोः इति **विश्व**।।२३।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।२३।। प्रकासन्तरेणापि प्रलपति। भ्रूपल्लवं भ्रूकिशलयं भ्रूरेखेत्यर्थः। ''पल्लवोऽस्त्री किशलयमित्**यमरः**''। उत्पत्तिकाले पल्लवस्यापि बक्राकारत्वात्तथारूरपणम्। भ्रूपल्लवमेव धनुः तद्वद्वक्रत्वात्तथारूपणम्। किञ्च अपाङ्गतरङ्गितानि अपाङ्गयोर्नेत्र-प्रान्तयोः ''अपाङ्गौ नेत्रयोरन्तावित्**यमरः**।'' तयो तरङ्गितानि तरङ्गवदावरितानि परम्परा इत्यर्थः। अन्वेव बाणाः शरा अपाङ्गयोरपि स्मृतिदर्शनाभ्यां मर्मोत्तजकत्वात्। परम्परारूपकत्वात् तथारूपणम्। तथा श्रवणपालिः श्रवणमण्डलं गुणः मौर्वीश्रियणपालेः

कर्णसमीपवर्त्तित्वाद् तथारूपणम्। इत्येवं रूपाणि निर्जितानि जगन्ति यैस्तादृशानि एवंरूपाण्यशस्त्राणि बाणाः स्मरेण कामदेवेन अङ्गहीनस्यापि कामदेवस्य जये सकललोकपरात्पादने मङ्गलदेवतायामधिदेवतायां मदनकर्त्तृक-सकललोकजयस्य मूलकारणभूतायामित्यर्थः। जङ्गमदेवतामिति केषुचित् पाठः। जङ्गमदेवतायां स्थावरेतरदेवतायामित्यर्थः। एवं रूपायां राधायामर्पितानि किम्? स्थापितानि किमित्यर्थः। नोचेदेतानि ब्रह्मचारिणोऽपि मम मनः कथमाकर्षन्तीति भावः।।२ ३।। इति श्री गीतगोविन्दव्याख्याने तृतीयः सर्गः।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२ ३।। स्मृतिविषयप्रियतमा तदङ्गपातितो वितर्कयति। किमुत्प्रेक्षायाम्। स्मरेण कामेन इति शस्त्राणि तस्य! राधायां किमर्पितानि न्यासीकृतानि! कथम्भूतायां राधायाम्? अनङ्गस्य कामस्य जये त्रैलोक्यविजये जङ्गमदेवतायाम्। अस्त्राणि कीदृशानि? निर्जितानि निःशेषेण जितानि जगन्ति यैस्तानि। अन्योऽपि विजयानन्तरं निजास्त्रम् इष्टदेवतायै अर्पयतीति अनुभवोऽपि। कानि तदस्त्राणि? भ्रुवावेव पल्लवे तदेव धनुरिति रूपकरूपकम्। तथा च **दण्डी**, 'मुखपङ्कजरङ्गेऽस्मिन् भ्रूलतानर्तकी तव। लीलानृत्यं करोतीति रम्यं रूपकरूपकम्।।' अपाङ्गितरङ्गितानि कटाक्षानि वीक्षणानि बाणा हृदयभेदकत्वात्।।२ ३।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।२ ३।। ननु श्रीराधाकटाक्षादिस्मरणादेव तव दुःखम्। को वै कामस्यापराधस्तत्राह भ्रूपल्लवमिति। किमित्यव्ययं सन्देहे आक्षेपे वा। तस्यां श्रीराधायां स्मरेण कामेनास्त्राणि [२] अर्पितानि स्थापितानि इति तर्कयामि। किं वा व्यर्थमर्पितानि तत्कटाक्षैरेव जगज्जितमिति ध्वनिः। कीदृशानि? निर्जितानि जगन्ति यै स्तादृशानि। किञ्च तैरेवास्त्रैर्जगत्त्रयं जित्वा तस्यामेव दत्तानीति भावः। किमित्यन्यत्र न स्थापितानि? तत्राहअनङ्गेति। अनङ्गस्य कामस्य जयाय गमनशीलदेवतायां तद्वशीकरणाधिष्ठात्र्यामिति सूचितम्। तानि कानीत्यपेक्षायामाह, भ्रूपल्लवमिति। भ्रूपल्लवमेव धनुः नीलस्निग्धत्वात्। अपाङ्गतरङ्गितानि गतागतकटाक्षा बाणाः। श्रवणपालिः कर्णप्रान्त एव गुणः [१]मौर्वी चेति। रूपकोऽयमलङ्कारः।।१ ३।।

१.पद्यमिदं भ्रूचाप तानीमानि इति पद्यद्वयानन्तरं सव्याख्यं दृश्यते-इ.२.अर्पितानीति तर्कयामि-अ.ज.३.तानि-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।२३।। भ्रूपल्लवमिति। इति पूर्वोक्तप्रकारेण [२] स्मरेण कामेन तस्यां [३]राधायां अस्त्राणि किमर्पितानि स्थापितानि। कीदृश्यां तस्याम्? अनङ्गस्य कामस्य जये त्रैलोक्यविजये जङ्गमदेवतायां जङ्गमदेवता, रूपायाम्। कीदृशान्यस्त्राणि? निर्जितजगन्ति जितत्रैलोक्यानि। इतीति किम्? भ्रूपल्लवं भ्रूलता धनुः। अपाङ्गतरङ्गितानि कटाक्षनिरीक्षणानि बाणाः। श्रवणपालिः कर्ण प्रदेशः [४]गुणः [५]पतप्रत्य ञ्चिका।।१३।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।२३।। [६] भ्रूवल्लरीति। स्मरेण मदनेन भ्रुवौ वल्लरी लता धनुः, अपाङ्गानां तरङ्गितानि सङ्कुचितनेत्रप्रेक्षितानि बाणाः, श्रवणपालिः प्रदेशः गुणः मौर्वी, कर्णपालिस्थरेखाणां संवेष्टितगुणाकृतित्वाद् गुणत्वारोपः। इति एतानि स्मरेण तस्यामेवानङ्गस्य जयजङ्गमदेवता जयलक्ष्मीः, प्रायः देवतायाः अप्रत्यक्षत्वेन प्रतिमाः क्रियन्ते स्थावराः सुवर्णादिमय्यः। इयन्तु चलतीति जङ्गमत्वविशिष्टदेवतात्वमारोपितम्। निर्जितानि जगन्ति यैस्तानि धनुर्बाणगुणाः अस्त्राणि अर्पितानि स्थापितानि। यद्वा अर्पितानि त्यागपूर्वकतया दत्तानि। अत्र जगज्जयकार्ये जाते कालान्तरे सापेक्षाणीति तस्यां निहितत्वेनोत्प्रेक्षा। जगन्मात्रस्य जितत्वात्। त्यक्तानीत्युत्प्रेक्षान्तरेण विकल्पः। श्रवणपालिमुद्दिश्य गुणत्वं विधीयत इति उद्देश्यविधेययोः पौर्वापर्यव्यति क्रमादविमृष्ट-विधेयांशो नाशङ्कनीयः। छन्दोऽनुसारात्पाठे कृते नार्थो भवतीति न दोषः। भ्रूवल्लर्यादीनां जगद्वशीकरणक्रियानिमित्तेन तस्यां जयनक्रियोत्प्रेक्षा समर्पणोत्प्रेक्षा वा। अत्रास्त्रसंयोगे सति दुःखोत्पत्तिर्भवति।

तदभावेऽतिदुःखोत्पत्तेः कारणाभावे कार्योत्पत्तिरूपो विभावनालङ्कारः वक्तृवशादुत्प्रेक्षया व्यज्जते। इत्यलङ्कारेणालङ्कारध्वनिः ।।२३।।

१.प्रत्यञ्चेति–अ.ब.इ.फ.ग.ह.ज. २.नास्ति-ड. ३.राधायां गमनदेवतारूपायां कीदृशान्यस्त्राणि-ड. ४.नास्ति-क.ल.म. ५.प्रत्यञ्चा-क.ल.म.ड. ६.भ्रूवल्लरीधनुरपाङ्गेति -इ. पाठः

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२३।। भ्रूपल्लवमिति। स्मरेण कामेन इत्येवंप्रकारेण तस्यां राधायाम् अस्त्राणि अर्पितानि न्यस्तानि किम् इति मन्ये। कथमस्त्राणि तत्रार्पितानीत्याह। किंविधायाम्? अनङ्गेत्यादि। अनङ्गस्य जय इति कर्तरि षष्ठ्याः समासः। अनङ्गस्य जयहेतुभूता जङ्गमा चासौ देवता चेति तस्याम्। ''द्विविधा हि देवता; स्थावरा जङ्गमा च'' इति। तत्र शिलामयी देवता यत्र तिष्ठति तत्रैव स्थाने जयति नान्यत इति जङ्गमेत्युक्तम्।

कान्यस्त्राणि केन रूपेणार्पितानीत्याशङ्क्याह, भ्रूपल्लवमिति । धनुः भ्रूवा देवपल्लवं तदेव धनुः। अत्र पल्लवशब्दः पत्रयुक्ते शाखायाः पर्वणि वर्तत इति बन्ध्यघटीयटीकायाम्। तथा अपाङ्गतरङ्गितानि बाणाः अपाङ्गौ नेत्रयोरन्तौ तयोः तरङ्गितानि लीला चेष्टितानि शराः तथा गुणः श्रवणपालिः, श्रोत्रलतिकामौर्वीत्यर्थः। श्रवणपालिरिति वेधितश्रुत्यधोभागो वा। ''पालिः वर्णलतायां स्त्री पङ्क्तावङ्कप्रदेशयोः'' इति **विश्वः**। ''वेधितश्रुत्यधोभागे पालिस्त्र्यङ्कपङ्क्तिषु'' इति। अत्र स्वरूपप्रकटनार्थं श्रवणपदप्रयोगः। तथाहि, ''स्कन्ददेशलुलितश्रुतिपालिः'' इति **श्रीनिवासोऽपि**। अत्र श्रवणपालिर्गुण इति भवितुमर्हति। पौर्वा यस्य व्यतिक्रमं तु कविर्न चिन्तितवानिति मन्यते। तथा च व्यक्तिविवेके, ''विधेयोद्देशभावो हि रूप्यारूपकतात्मकः। रूपकस्य तु तत्रोक्तिर्न रूप्यापूर्वमिष्यते।।'' इति स्थापनहेतुमाह। अस्त्राणि किंविधानि ? निर्जितजगन्तीति। निर्जितानि जगन्ति यैरिति विग्रहः। अयमभिप्रायः, निर्जितजगत्त्रयेण स्मरेण अस्त्राणि निष्प्रयोजनानि मन्यमानेन तस्य जयहेतुभूतस्थावरे देवतायामस्यां समर्पितानि किम् ? यतस्तदस्त्राणां स्मरणसमकालमेव तैरस्त्रैरतितरां मम हृदयं पीड्यते।।२३।।

इति श्रीगीतगोविन्दटीकायां तृतीयसर्गविवरणम्।।२३।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२३।।श्रीराधिकायाः कटाक्षाशुगस्मरणेन तत्स्फूर्त्याह, भ्रूपल्लवमिति। इत्यनेन प्रकारेणास्त्राणि तस्यां राधिकायां किं स्मरेणार्पितानीति मन्ये। कुतोऽर्पितानीत्याह यतो निर्जितानि जगन्ति यैस्तानि तत्प्रसादलब्धास्त्रैर्जगज्जित्वा पुनस्तत्रैवार्पितानीति भावः। कुतस्तस्यामेवार्पितानि ? यतोऽनङ्गस्य जयजङ्गमदेवतायां जयदेवतारूपायां कान्यस्त्राणीत्याह भ्रूपल्लवं धनुः अपाङ्गतरिङ्गितानि कटाक्षास्तन्येव वाणाः श्रवणप्रान्तभागः स एव गुण इति ।।२३।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२३।। राधाकटाक्षप्रभावानुभवेन तत्प्रसादादेव कामस्य जगज्जेतृत्वमुत्प्रेक्षमाणः साश्चर्यमाह भ्रूपल्लवमिति तस्यां राधायां स्मरेण कामेन अस्त्राणि अभिमन्त्रितशस्त्राणि किमर्पितानि, स्थापितानीति मन्ये। कुतः अर्पितानि, यतो निर्जितानि पराजितानि जगन्ति जगत्स्थितप्राणिमात्राणि यैस्तानि। तस्यां कुतोऽर्पितानि, तत्राहकीदृश्यां, अनङ्गस्य जयाय जयसम्पादनाय जङ्गमदेवतायां शिलादिमयीनामपि देवतानां प्रभावेण जयः सम्पाद्यते, किमुत जङ्गमरूपाया इति जयस्यातिशयद्योतनार्थं जङ्गमशब्दोपन्यासः। तत्प्रसादलब्धानि अस्त्राणि जगज्जयानन्तरं तानि पुनः तस्यामेवार्पितानीति भावः। 'मन्त्राभिमन्त्रितं

शस्त्रमस्त्रमित्यभिधीयते'' । यान्यर्पितानि तानि कान्यस्त्राणि, भ्रूपल्लवं धनु:, वक्रत्वेन तत्सादृश्यम्। अपाङ्गतरङ्गितानि कटाक्षास्तानि बाणा:, मर्मघातुकत्वांशेन श्रवणपालि: श्रुते: प्रान्तभाग:, किं वा अधोभाग: । गुणसादृश्यात् सगुण इति। ''वेधितश्रुत्यधोभागे पालिरग्रासु पंक्तिषु'' इति **विश्व:** ।।२३ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

२३- भ्रूपल्लवमिति, रमण्या: भ्रूद्वयं धनु:रूपेण तथा नेत्रप्रान्तसंकेतानि शरा इव आकर्णं गुणस्याकर्षणं कन्दर्पेण विहितमस्ति। हे कन्दर्प! एतानि धनुशरादीनि श्रीराधात: गृहीत्वा समग्रं संसारं जेतुकाम: विजयसे। पुन: किमर्थं तानि शस्त्राणि मयि निक्षेप्तुं श्रीराधायै समर्पयसि हे!। रूपकालंकार: । कटाक्षादि स्त्रीयौवनालंकारा:, तेषां लक्षणं कुम्भेनापि उद्धृतम्। यद्गतागतविश्रान्तिवैचित्र्येण निवर्तनम्। तारकाया: कलाभिज्ञास्तं कटाक्षं प्रचक्षते।। अत्र रूपकरूपकस्य निरूपणम्। तस्य लक्षणं प्रपञ्चितमस्ति। मुखपंकजरङ्गेऽस्मिन्भ्रूलता नर्त्तकी नवा। लीलानृत्यं करोतीति रम्यं रूपकरूपकम्।। तल्लक्षणं यथा रूपकोत्प्रेक्षे अलंकृती संसृष्टिसंकरस्तथा।।२३ ।।

**२३ क - तिर्यक्कण्ठविलोलमौलितरलोत्तंसस्य वंशोच्चर -**
**द्दीप्तिस्थानकृतावधानललनालक्षैर्न संलक्षिता:।**
**संमुग्धे मधुसूदनस्य मधुरे राधामुखेन्दौ सुधा**
**सारे कन्दलिताश्चिरंददतु व: क्षेमं कटाक्षोर्मय: ।।२३-क।।**

इति श्रीगीतगोविन्दे मुग्धमधुसूदनो नाम तृतीय: सर्ग:।।

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी(टीकानास्ति)

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२३-क।।इदानीं सर्गार्थसंवरणव्याजेनाशिष-माशास्तेतिर्यक्कण्ठेति। मधुसूदनस्य कटाक्षोर्मयो वो युष्मभ्यं क्षेमं ददतु। ऊर्मयो वेगा लेखा वा। कटाक्षाणामूर्मय: कटाक्षोर्मय:। 'ऊर्मि: पीडालवोत्कण्ठाभङ्गिप्राका-श्यवीचिषु। वस्त्रसंकोचलेखायाम्' इति। किंलक्षणा: ? राधामुखेन्दौ प्रेम्णा कन्दलिता उपरागं गमिता:। 'कन्दलं तु नवाङ्कुरे। कलध्वनावुपरागे च' इति। किंविशिष्टे मुखेन्दौ ? संमुग्धेमधुरे। सम्यक् मुग्धं संमुग्धं, संमुग्धं च तन्मधुरं च तत्तस्मिन्। रम्ये नवप्रिये। 'मुग्धं मूर्खे तथा रम्ये' इति। 'मधुरस्तु

प्रिये स्वादौ' इति। पुनः किंभूते ? सुधाकरे सुधादीनां सारे, सुधायाः सारे वा। पुनः किंभूताः ? वंशोच्चरंद्दीप्तिस्थान- कृतावधानललनालक्षैर्न संलक्षिताः। वंशे उच्चरद्यद्दीप्तिस्थानं तारस्वरस्थानं तत्र कृतावधानं याभिस्तास्तथा, ताश्च ता ललनाश्च तासां लक्षाणि तैः। चतुर्ष्वपि स्वस्थानेषु रागालिप्तौ क्रियमाणायां क्रमेण दीप्तिस्थानारोहे कोऽप्यतिशयो जायत एव। तत्र दत्तावधानत्वात् वल्गुस्वने प्रियकटाक्षादपि प्रियत्वादित्यर्थः। किंभूतस्य मधुसूदनस्य ? तिर्यक्कण्ठविलोलमौलितरलोत्तंसस्य, तिर्यक् कण्ठो यस्यासौ तिर्यक्कण्ठः, विलोलश्चासौ मौलिश्च, विलोलमौलिना तरलावुत्तंसौ कर्णभूषणे यस्य स तथा, तिर्यक्कण्ठश्चासौ विलोलमौलितरलोत्तंसश्च स तस्य। अत्र 'मौलि'शब्दस्य शिरःकिरीटयोः समानवाचकत्वेऽपि वेणुवादकस्य शिरः कम्पितादिदोष- परिजिहीर्षया किरीटे पर्यवसानम्। शीर्ष्णि अकम्पिते किरीटकम्पनं वैचित्र्यायेति। शार्दूलविक्रीडितं वृत्तम्। रूपकमलंकारः।।२३-क।।

रागो गौडाकृतिर्यत्र प्रतिमण्ठ पुरस्कृतः।
अभोगान्ते तथा पाटस्वरैः पद्यगणाञ्चितः।।
शृङ्गाररससंपूर्णकृष्णकेलिविरजितः।
**मुग्धमधुसूदनाख्यो** हंसक्रीडाननामतः।।
श्रीगोविन्दपदारविन्दमकरन्दास्वादचञ्चद्द्विरे-
फेण श्रीनृपसिंहमोकलकुम्भोजप्रकारोन्दुना।
श्रीमत्कुम्भनृपेण क्लृप्ताविवृतौ श्रीगीतगोविन्दके
सङ्गीत..मदिपिकास्वसुरयं सर्गस्तुतीयो गतः।।
इति मुग्धमधुसुदनहंसक्रीडननामा सप्तमः प्रबन्धः।।७।।

इति श्रीगुर्जरधरित्रीपरिवृढपराजयप्रसरत्प्रतापशोबितारोषयवनपल्वलेन राजाधिराज श्रीकुम्भकर्णेन विरचिते गीतगोविन्दविवरणे मुग्धमधुसूदनो नाम तृतीय सर्गः।।३।।

**टिप्प०-१** अत्र मधुसूदन शब्दो भ्रमरपर्यायः सूद क्षरश्रुतिहत्योः, मधु सूदयति क्षरतीति मधुसूदनः। तदेव विशेषण स्पष्टयति-**उदितमनोज**मिति। उदितस्तत्का लत्रुटितमुत्काहारकाञ्चीगुण्स्रस्तस्थानसंघट्टसंजातपयोधर-श्रेणिपरिसरस्पर्शादिना पुनराविर्भुता मनोजो यस्य।तदुत्क **वात्स्यायने**, 'अवसानेऽपि च प्रीतिरुपचारैरुपस्कृता। सविश्रंमकथायोगै रतिं जनयते घराम्' इति दीपिका।

## (३) जगद्धरकृत- सारदीपिका

।।२३-क।। अधुनाकविः सर्गान्ते भक्तानाशिष्यति तिर्यक्कण्ठेति। मधुसुदनस्य कृष्णस्य कटाक्षोर्म्मयः कटाक्षदर्शनतरङ्गाः वः युष्माकं भक्तानां क्षेमं कल्याणां ददतु।

प्रयच्छन्तु कीदृशा: मधुरे सुन्दरे राधाया: मुखमिन्दुमिव तस्मिन् स मुग्धम् अव्यक्तं मृदुस्पन्द किं विच्चलनं च यथास्यात्तथा कन्दलिता: पल्लविता: इन्दुदर्शनात्तरङ्गा: अतीभवन्तीति। कटाक्षाणां तरङ्गसाम्यं नन्वन्यासुपश्यन्तीषु कथं राधामुखचन्द्र एव पल्लविता उर्म्मय:। अत आह वंशादुच्चरन्सुवेणोर्निर्गच्छस्तु गीतस्थानेषु गानपदेषु कृतावधानैर्दत्तमनभिर्लल नालक्षै गोपाङ्गना सह स्त्रैर्नसङ्लक्षिता: न ज्ञाता:। कथंभूतस्य मधुसूदनस्य, तिर्यग्वक्र: कण्ठयस्य विलोलश्चञ्चलो- मौलिर्मस्तक: कीरिटोवायस्य तरलश्चञ्चल उत्तंस अवतंसो यस्य स: पश्चात्कर्म्मधारय: लक्षपदं बहुत्वीपलक्षकं मुग्धोहरिर्विरहीत्यर्थ:।।२३-क।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।२३-क।। इदानीं सर्गान्ते आशिषमाशास्ते, तिर्यगिति। मधुसूदनस्य श्रीकृष्णस्य कटाक्षोर्मयो तद्दर्शनतरङ्गा अनिशं वो युष्माकं क्षेमं ददतु कल्याणं प्रयच्छन्तु। दुरितासद्भावेन क्षेमदातृत्वं संभवतीति दुरितदारणसामर्थ्यद्योतनाय 'मधुसूदन' पदोपादानम्, अतिचापल्यसूचनायेति वा। किंलक्षण: ? मधुरेऽमृतादपि मधुरिमाश्रये राधाया मुखमिन्दुमिव तस्मिन्मृदुस्यन्दं ईषच्च लग्नं संमुग्धमव्यक्तं सुन्दरं वा यथा स्यादेवं कन्दलिता: पल्लविता:। तथा चेन्दुदर्शनात्तरङ्गा अतीव पल्लविता भवन्तीति कटाक्षाणां तरङ्गसाम्यम्। क्वचिच्च, 'प्रेम्णा कन्दलिता: सुमुग्धमधुरे राधाननेन्दौ सुधासारे वो मधुसूदनस्य ददतु क्षेमं कटाक्षोर्मय:' इति वा पाठ:। तत्र किंविशिष्टे सुमुखे ? सुष्ठु मुग्धं च तन्मधुरं च तत्तस्मिन्, रम्ये प्रिये चेत्यर्थ:। 'मधुरस्तु प्रिये स्वादौ' इति कोश:। पुन: कीदृशे ? सुधासारे सुधाया: सारे। ननु सर्वासु पश्यन्तीषु कथं राधामुखचन्द्रे एव पल्लविता ऊर्मय: इत्यत आह, वंशे उच्चरत् गीतिस्थानेषु गानपदेषु स्वरग्रामादिषु कृतावधानै: समर्पितचित्तवृत्तिभि: ललनालक्षै: कामिनीकदम्बै: न संलक्षिता: नावलोकिता:। तथा च सकल एव कलत्रकदंबो वंशध्वनिमोहितो न किंचिदपश्यदिति तत्रैव पल्लविता इति भाव:। वंशपूरणे स्वभावमनुवर्णयति-किंभूतस्य ? तिर्यग्वक्र: कण्ठो यस्य विलोलश्चञ्चलो मौलि: किरीटो यस्य। तरलश्चञ्चल उत्तंस: कर्णाभरणं यस्य स:। तिर्यक्कण्ठविरहमौलिश्चासौ तरलोत्तंसश्चेति कर्मधारय:। तथाविधस्येत्यर्थ:। गीतिर्गानम्। 'ललना तु नितम्बिनी' **इत्यमर**:। 'उत्तंस: कर्णपूरेऽपि सुन्दरे नायकेऽपि च' इति **धरणि**:। 'कंदलं तु नवाङ्कुरे। कलध्वनावुपरागे च' इति। 'ऊर्मि: पीडालवोत्कण्ठाभङ्गि-प्राकाश्यवीचिषु। वस्त्रसंकोचलेखायाम्' इति।।२३-क।।

अप्युद्विग्नमपारकर्मणि लसत्तृष्णाभुजङ्गीविष-

ज्वालालीढमपि व्यसन्यपि सदा संशुष्कतर्कोक्तिषु।
मच्चेतो मुरवैरिसद्गुणसुधासिन्धाविहानुक्षणं
सम्यक्स्नापयता न मय्युपकृतं किं शालिनाथ! त्वया।।

इति श्रीमहामहोपाध्यायश्रीशंकरमिश्रविरचितायां श्रीशालिनाथकारितायां गीतगोविन्दटीकायां रसमञ्जर्याख्यायां तृतीय: सर्ग:।।२ ३-क।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।२ ३-क।। तिर्यगिति।। तिर्यक्कण्ठ: नर्तनानुकूलगानजनकवंशनालविवरेषु यथा योगं अधरपुटास्वादनार्थं ईषद्वक्रितगल: अनेन कृष्णस्य गानानुकूलप्रयत्ननिपुणत्वं[३] सूचितम्; विलोलमौलि: स्वरविशेषसम्पादनार्थं विलोलो मौलि: शीर्ष यस्य स:। अनेन तस्य मिश्रामिश्रस्वरनैपुण्यं सङ्गीतरहस्यज्ञत्वं च व्यञ्जितम्। अत एव तरल: चञ्चल: उत्तंसो[४] वतंस:, विलासार्थं कर्णनिक्षिप्तनीलोत्पलाद्यवतंसो यस्य। मधुसूदनस्य मधुदैत्यहन्तु: कृष्णस्य वंशेवेणौ उच्चरन्त्य: या गीतय: गानानि तासां स्थानानि स्थानविशेषा:, तेषु कृतं अवधानं समवधानं मधुसूदनोच्चरितनर्तनानुकूलगानविशेष-मनस्समाधानं याभिस्ता:। अनेन तासां मधुरतरस्वरविशेषे अत्यन्तानुरक्ति: सूचिता। तासां ललनानां लक्षै: न संलक्षिता न दृष्टा:। गानविशेषचित्तानां तासां कृष्णपाङ्गे दृष्टयभावादिति भाव:। मधुरे सुन्दरे[१] राधाया: निजप्रियनायिकाया: मुखमाननं तदेवेन्दुरिति रूपकं तस्मिन्, संमुग्धं मधुरं यथा तथा। मृदु: कोमल: स्यन्द: स्त्राव: यत्र तत्तथा। कन्दलिता: सञ्जातानि कन्दलानि तासां ता:। राधामुखेन्दौ विषये प्रेरिता इत्यर्थ:। "तदस्य सञ्जातं तारकादिभ्य:[२]", इति इतच् प्रत्यय:। ईदृश्य:[३] कटाक्षोर्मय: अपाङ्गा एवोर्मय: तरङ्गा इति रूपकम्। भङ्गस्तरङ्ग ऊर्मिर्वा इत्यमर:। चिरं बहुकालं क्षेमं कुशलं "कुशलं क्षेममस्त्रियाम्" मित्यमर:। वो दधतु बिभ्रतु। अनेन कृष्णस्य राधामुखचन्द्र- गोचरात्यन्तानुरागवत्त्वं वस्तु व्यज्यते।।२ ३-क।।

इति श्रीमक्ष्मणसुरिविरचितायां गीतगोविन्दव्याख्यायां श्रुतिरञ्जन्याख्या-त्तृतीयसर्ग:[४]।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२ ३-क।। ग्रन्थप्रक्रमं त्यक्त्वा सर्गान्ते जनानामाशिषमाह। मधुसूदनस्य कटाक्षोर्मय: कटाक्षतरङ्गा वो युष्माकं क्षेमं कल्याणं ददतु प्रयच्छन्तु। कथम्भूता: ? मधुरे मनोहरे राधामुखेन्दौ राधिकावदनचन्द्रे संमुग्धं यथा स्यादेवं मृदुस्पन्दम् ईषत्सञ्चरणं यथा स्यादेवं पल्लविता: प्रसृता:। पुन: किम्भूता ? वंशे वेणौ उच्चरन्त्या: उद्गच्छन्त्या गीतेर्गानस्य

स्थानेषु गानपदेषु कृतावधानानां दत्तमनसां ललनानां रम्यस्त्रीणां लक्षैः समूहैः न संलक्षिता आकलिताः। कीदृशस्य मधुसूदनस्य ? वंशीवादनेन तिर्यक् वक्रः कण्ठो यस्य, विलोलः चञ्चलः मौलिः किरीटो यस्य, तरलः चञ्चलः उत्तंसः कर्णपूरो यस्य स तथा। पश्चात्कर्मधारयः। 'उत्तंसः कर्णपूरेऽपि सुन्दरे नायकेऽपि चे'ति धरणिः। 'विशेषास्त्वङ्गना भीरुः कामिनी वामलोचना। प्रमदा भाविनी' कान्ता ललना च नितम्बिनी'त्यमरः।। 'कुशलं क्षेममस्त्रियामि'त्यमरः। मुग्धमधुसूदनो मोहयुक्तो मधुसूदनो यत्रेति व्युत्पत्त्या मुग्धमधुसूदनो नाम तृतीय सर्गः।।२३-क।।

इति समस्तप्रक्रियाविराजमानमहाराजशुक्लध्वजविरचितायां सारवत्यां गीतगोविन्दटीकायां तृतीयः सर्गः।।

टीकानुसारं 'पल्लविताः' इति पाठः स्यात्।

*'मानिनी' इति पाठान्तरम्।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।२३-क।। सम्प्रति आशिषमाशास्ते, तिर्यक्कण्ठेति। मधुसूदनस्य दैत्यनाशकस्य मधुपानकर्तुर्वा कटाक्षोर्मयः कटाक्षसिन्धुतरङ्गा वो युष्माकं [२]क्षेमं मङ्गलं ददतु प्रयच्छन्तु। कीदृशाः ? राधामुखेन्दौ राधामुखचन्द्रे मृदु ईषत् स्यन्दं चलनं तेन प्रेम्णा च कन्दलिताः प्रवृद्धाः। [३] कीदृशे ? [४] सुमुग्धमधुरे सुष्टु मुग्धं तन्मधुरं तत्र। कीदृशाः ? [५] वंशादुच्चरत्सु वेणोर्निर्गच्छत्सु गीतिस्थानेषु गानपदेषु कृतावधानैर्दत्तचेतोभिः ललनालक्षै[६] र्गोपीसमूहैः [७]न संलक्षिताः न ज्ञाता [८] दृष्टा वा। [१] कीदृशस्य ? तिर्यक् त्रिभङ्गं लालितः कण्ठो यस्य, विशेषेण लोलश्चपलो मौलिः शिखासमूहो मुकुटीकृतो यत्र। तरलौ चञ्चलौ उत्तंसौ यस्य कर्मधारयः। रूपकालङ्कारः। [२]गीतं [३] गानमिमे समे **इत्यमरः** (१.६.२६)। उत्तंसः कर्णपूरेऽपि सुन्दरे नायकेऽपि च इति **धरणिः**। कन्दलन्तु नवाङ्कुरः ऊर्मिः पीडा लवोत्कण्ठा इति च[४]।।२३-क।।

श्रीराधिकावियोगाधिव्याकुलं व्रजमोहनम्।
भजामि परमानन्दं वल्लवीगणसंवृतम्।।

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंस [५] शिवदासात्मजश्रीवनमालि - भट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां मुग्धमधुसूदनो नाम तृतीयः सर्ग ।।

मुखैकदेशत्वात्-इ२. क्षेममभीष्टं-इ.फ.ग.ह.ज.३. कीदृशे राधामुखेन्दौ-ज. ४. व्याख्या चेयं प्रेम्णा कन्दलिताः सुमुग्धमधुरे राधाननेन्दौ सुधासारे इति पाठपक्षे; मूलपाठस्तु न तथा दृश्यते। ५.वंशादुच्चरस्तु-

निर्गच्छत्सु-अ.ब. वंशादुद्वलत्सु वेणोनिर्गच्छत्सु-इ.फ.ग. वंशादुच्चलत्सु-ह.ज. ६. गोपसमूहैः-इ.प.ग.ह.ज.७.न संलक्षिता ज्ञाता-ज.नास्ति-अ.ब.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।२३-क।। अधुना कविर्भक्तान् प्रत्याशिषं ब्रूत, तिर्यगिति। मधुसूदनस्य कृष्णस्य कटाक्षोर्मयः कटाक्षदर्शन तरङ्गाः वः युष्माकं भक्तानां क्षेमं कल्याणं चिरं ददतु[७] प्रयच्छन्तु। कीदृशाः? मधुरे सुन्दरे राधामुखचन्द्रे संमुग्धं अव्यक्तमृदुस्यन्दं च किञ्चिच्चलं च यथा स्यात्तथा कन्दलिताः पल्लविताः। पुनः[२] कीदृशाः? वंशादुच्चरत्सु वेणोर्निर्गच्छत्सु गीतस्थानेषु गानपदेषु कृतावधानैर्दत्तमनोभिर्ललनालक्षैर्गोपाङ्गनासहस्रैर्न संलक्षिताः ज्ञाता न दृष्टा इत्यर्थः। कीदृशस्य मधुसूदनस्य? तिर्यक् वक्रः कण्ठो यस्य, विलोलश्चञ्चलो मौलिर्मस्तकः किरीटो वा यस्य; तरलश्चल उत्तंसः अवतंसो यस्य सः ; पश्चात्कर्मधारयः। लक्षपदञ्च बहुत्वोपलक्षकम्। मुग्धो हरिर्विहरता-त्यर्थः।।२३-क।।

[१]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां (मुग्धमधुसूदनो नाम) तृतीयः सर्गः।।

१.कीदृशस्य मधुसूदनस्य-ज.२.तः४.पर्यन्तो भागो नास्ति-अ.ब.३.ज्ञानमुभे समे-इ. गीतिर्गानमुभे समे-फ.ग.ह.ज.५.शिवदासपण्डितात्मज-ह.६.तरङ्गभावः-ड.७.नास्ति-क.८.नास्ति-ड.कथम्भूताः-क.९.नास्तीयं पुष्पिका-क.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।२३-क।। तिर्यक्कण्ठेति। तिर्यक् साचीकृतः कण्ठः स चासौ विलोलमौलिश्च चञ्चलमूर्धा। अत एव तरलोत्तंस इति विशेषणम् यस्य तस्य मधुसूदनस्य वंशोच्चरत्। निर्गच्छन्ति दीप्तिस्थानानि तारस्थानानि। स्वराणां मन्द्रमध्यतारत्वेन त्रेधा विभागः। तारः दीप्तिरित्युच्यते। तेषु कृतं अवधानं तदेकाग्रचित्तत्वं यासां ताश्च ललनाः गोप्यः तासां लक्षाः शतसहस्रं तैः। संख्यायाः संख्येयपरत्वेन लक्षललनाभिरित्यर्थः। न संलक्षिताः नोहिताः इति नशब्देन सह सुपेति केवलसमासः। नञा कृते नलोपप्रसङ्गात्। यथा नैकधासमासः। अलक्षित इत्यर्थः। [१] प्रेम्णा स्नेहेन कन्दलितः वर्धितः सुमुग्धः शोभनः सुन्दरश्चासौ मधुरः रमणीयः तस्मिन्। राधामुखमेव इन्दुः चन्द्रः तस्मिन् सुधायाः अमृतस्य आसाराः धारासम्पातरूपाः। अत्यन्तस्नेहकृताः। कटाक्षानां प्रान्तावलोकितानां ऊर्मयः तरङ्गाः नः अस्माकं क्षेमं सर्वमपि अनाशकतया कुशलं ददतु यच छन्तु। अत्र तिर्यक्कण्ठत्वं दीप्तिस्थानकृतावधानत्वं च परार्थतया अलक्षितत्वे हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः; हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्

इति **काव्यप्रकाश**लक्षणात्। किञ्च वंशीवादनातिशयभरसकण्ठ ..... साचीकरण-व्याजेन ललनादाक्षिण्यकृतत्रासससञ्चारी व्यज्यते। कटाक्षानुभावाः। राधाललनाश्च आलम्बनावशावः। एवमेतौविभावानुभावव्यभिचारिसंयोगाद्रतिरभिव्यज्यत इति शृङ्गारो रसः। स चाशीर्वादरूपालङ्कारस्याङ्गत्वाद्रसवदलङ्कारः। भानुकरेणाशिषोऽप्यलङ्कार-त्वमुक्तम्। भावाङ्गो वा। रतिर्देवादिविषया भाव इत्यभिधीयते।।२३-क।।

इति [2] श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां मुग्धमधुसूदनो नाम तृतीयः सर्गः।

१. प्रेम्णा कन्दलिते सुमुग्धमधुरे राधामुखेन्दौ सुधासारा वो मधुसूदनस्य ददतु क्षेमं कटाक्षोर्मयः इति इ पाठः २.गीतगोविन्दे मुग्धमधुसूदनो नाम-इ.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)(टीकानास्ति)

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।२३-क।।अथ कविर्मामुद्वीक्ष्य इति श्रीराधिकावचनं प्रमाणीकृत्य गोपीमण्डलस्तस्य श्रीकृष्णस्य पूर्वोक्तश्रीराधिकादर्शनप्रकारमाह-तिर्यगिति। मधुसूदनस्य कटाक्षस्य तरङ्गा वो युष्माकं क्षेमं ददतु पूर्वोक्तमधुसूदनपदतात्पर्यं व्यनक्ति। कीदृशाः ? राधामुखेन्दौ ईषत्चलं संमुग्धं विलक्षितं च यतास्यात्तथा पल्लविताः अन्यगोपाङ्गना वदनोडुगणमपहाय तत्रैवोल्लसिता इत्यर्थः। कथमनेकाङ्गनानिकरे तत्सिद्धिः ? वंशोच्चरत्सु स्वरग्राम-मूर्च्छनादिषु समर्पितचित्तवृत्तिभिर्ललनालक्षैर्न संलक्षिताः। यद्वा गीतिस्थानं मुखम् अनेन तादृशैरप्यलक्षितत्वेन चातुर्यं सूचितम् । किदृशस्य ? तिर्यक्कण्ठो यस्य, विलोलः मौलिः शिरोभूषणं यस्य, तरलं कर्णभूषणं यस्य च तस्य। कन्दलस्तु नवाङ्कुर **इत्यमरः**।।२३-क।।

अतएव मुग्धमुधुसूदने रसविशेषा स्वादचतुरस्ततो गुग्धो मुधुसूदनो यत्र इत्ययः सर्गः। इति वालवोधिन्यां तृतीयः सर्गः।।३ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

अधिकश्लोकः

एवं श्रीकृष्णस्य राधाविषयकप्रणयोत्तरङ्गामवस्थां निरूप्य राधाविरहवर्णन-समुत्सुकः कविः तदुपयोगितया तस्य च राधाप्रणयपराधीनतां दर्शयन् तेनैव श्रोतृणामाशिषं कुर्वाणः सर्गान्तं सूचयति तिर्यगिति। हे श्रोतृजनाः! मधुसूदनस्य कटाक्षोर्मयः अपाङ्गदृष्टितरङ्गा वो युष्मभ्यं क्षेमं शुभं ददतु। कीदृशाः, मधुरे कटाक्षास्वाद्यमानमाधुर्याधिरे राधायाः आननेन्दौ स्मितचन्द्रिकासहजप्रसादशालिनि मुखचन्द्रे मृदुस्यन्दं तद्दर्शनसञ्जातजडतामन्थरसंचरणं सम्मुग्धम् अन्यैरविभावनीया-भिप्रायं च यथा स्यात्तथा कन्दलिता पल्लविता अन्यगोपीवदनोडुगणमपहाय तत्रैव

उल्लासिता इत्यर्थः। कथमनेकासु गोपिकासु सन्निहितासु तत्र साकूतावलोकनं सिद्धमित्यत आह-वंशेति। वंशात् मुरलीमुखात् उच्चरन्ति यानि गीतस्थानानि स्वरग्राममूर्च्छनादीनि तेषु कृतावधानैः समर्पितचित्तवृत्तिर्भिललनालक्षैः कामिनीवृन्दैर्न लक्षिता न विदिता इत्यर्थः। अनेन तादृशैरप्यलक्षितत्वेन चातुर्यातिशयः सूचितः। न केवलं गीतमाधुर्येणैव तासां पारवश्यं सम्पादितम्। किन्तु तात्कालिकविलास-माधुर्येणापीति सूचयितुं मधुसूदनस्य तिर्यगिति। तिर्यक् तिरश्चीनः कण्ठो यस्य, विलोलो मौलिः शिरो यस्य, तरल उत्तंसः कर्णभूषणं यस्य, स च स च स च तस्य। तिर्यगिति राधाभिमुखवलितकन्धरत्वं, विलोलेति तदाभिरूप्यानुमोदनं, तरलेति तद्विलासपारवश्यं च प्रकटयतो बहुवल्लभस्य तस्य तासां सन्निधानेऽपि राधां प्रति प्रणयप्रकाशनचातुर्यं तस्याश्च सौभाग्यं किं वक्तव्यमिति भावः।।१६।।

इति श्रीगीतगोविन्दे मुग्धमधुसूदननामा तृतीयः सर्गः। अत एव मुग्धः रसविशेषे आस्वादनचतुरः मधुसूदनः यत्र स इत्ययं सर्गः।

।।इति श्री गीतगोविन्दव्याख्यायां रसिकरङ्गदोख्यायां तृतीयसर्गः समाप्तः।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

२३-क- तिर्यक्कण्ठेति; मधुसूदनस्य कटाक्षरूपाणि तरङ्गाणि अथवा भङ्गिमाविशेषाणि युष्मभ्यः क्षेमं ददातु अर्थात् अभीष्टफलस्य रक्षामपि विदधातु। स श्रीकृष्णः श्रीराधावदनेन्दुस्निग्धेन चक्षुषा कन्दलिता उपरागं गमिता। अर्थात् प्रेम्णा दृष्टिः पल्लविता। यदा स मधुसूदनस्य स्वस्य वंशीवादनेन गोप्यः मुग्धा सत्यः चक्षुः निमिलनं कृतवत्यः। पुनः केन प्रकारेण वंशी वादयति ? ग्रीवाभङ्गेन वक्रिमाधारेण मस्तकभङ्गिमया दोलनेन दोलायमानेन कर्णभूषणेन च गोप्यः तद्दृष्ट्वा मुग्धाः मोमुदिरे। मौलिशब्देन अत्र वंशीवादनस्य शिरकम्पः दोषाय भवति, परन्तु शिरोभूषणस्य कम्पनं दोषं परिहरति। शार्दूलविक्रीडितम्। रूपकालंकारः। कुम्भेन हंसक्रीडनं छन्दः स्वीक्रियते। श्रीकृष्णस्य यमुनायां लीलातनुधरेऽधीरे अन्विष्यान्विष्य श्रीराधां मोमुद्यते सहृदयः।।२३-क।।

श्रित्य श्रीमातरं बाल्याद् सद्गुरोः पदमञ्जुलम्।<br>
कृतकृत्यभमाम्यहं गीतगोविन्द वाचनात्।।<br>
स्वर्णलता प्रसादेन जीवनं सुष्ठु यापितम्।।<br>
अतः लिखामि लीलया गीतगोविन्दटिप्पणीम्।।

इति कविःश्रीप्रफुल्लमिश्रकृतायां श्रीगीतगोविन्दस्य स्वर्णलताटिप्पण्यां तृतीयसर्गः।।

❀ ❀ ❀

शोध-प्रकाशनविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016